TEXT PROBLEM WITHIN THE BOOK ONLY

UNIVERSAL
LIBRARY
OU_184245
UNIVERSAL
LIBRARY

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ३६

कृष्णयजुर्वेदीयं

तैत्तिरीयारण्यकम् ।

श्रीमत्सायणाचार्यविरचितभाष्यसमेतम् ।

(सपरिशिष्टम् ।)

तत्र सप्तमप्रपाठकादारभ्य दशमप्रपाठकपर्यन्तोऽयं
सपरिशिष्टो द्वितीयो भागः (२) ।

एतत्पुस्तकं वे० शा० रा० रा० "बाबाशास्त्री
फडके" इत्येतैः संशोधितम् ।

तच्च

बी० ए० इत्युपपदधारिभिः

विनायक गणेश आपटे

इत्येतैः

पुण्यारव्यपत्तने

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

द्वितीयेयमङ्कनावृत्तिः ।

शालिवाहनशकाब्दाः १८४८

खिस्ताब्दाः १९२७

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः)

मूल्यमाणकनवकसहितं रूपकचतुष्कम् ।

कृष्णयजुर्वेदीयं तैत्तिरीयारण्यकम् ।

(तत्र * शीक्षोपनिषत्संज्ञकसप्तमप्रपाठकस्याऽऽरम्भः ।)

प्रथमोऽनुवाकः ।

(+)वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्[1] ॥ २ ॥
तत्कटाक्षेण तद्रूपं दधद्भुक्कमहीपतिः ।
आदिशत्सायणाचार्यं वेदार्थस्य प्रकाशने ॥ ३ ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात् ।
कृपालुः सायणाचार्यो वेदार्थं वक्तुमुद्यतः ॥ ४ ॥
व्याख्यातः पितृमेधान्तः कर्मकाण्डो नयैः स्फुटम् ।
अथोपनिषदं न्यायैर्व्याकुर्वे ब्रह्मबुद्धये ॥ ५ ॥
अत्रं ह्युपनिषच्छब्दो ब्रह्मविद्यैकगोचरः ।
तच्छब्दावयवार्थस्य विद्यायामेव संभवात् ॥ ६ ॥
उपोपसर्गः सामीप्ये तत्प्रतीचि समाप्यते ।
सामीप्यात्तारतम्यस्य विश्रान्तेः स्वात्मनीक्षणात् ॥ ७ ॥
त्रिविधः सदिधात्वर्थो विद्यायां संभविष्यति ।
श्रीमत्सुरेश्वराचार्यैर्विस्पष्टमिदमीरितम् ॥ ८ ॥
" उपनीयेममात्मानं ब्रह्मोपास्तद्वयं स्वतः ।
निहन्त्यविद्यां तज्जं च तस्मादुपनिषद्भवेत् ॥ ९ ॥
निहत्यानर्थमूलां स्वाविद्यां प्रत्यक्तया परम् ।
गमयत्यस्तसंभेदमतो वोपनिषद्भवेत् ॥ १० ॥
प्रवृत्तिहेतून्निःशेषांस्तन्मूलोच्छेदकत्वतः ।
यतोऽवसादयेद्विद्या तस्मादुपनिषन्मता " इति ॥ ११ ॥

---

* अस्या एव सांहितिकोपनिषदित्यपरं नाम । + इत आरभ्य सप्तमाष्टमनवमेतिप्रपाठकत्रितयभाष्यमेव विद्यारण्यविरचिततैत्तिरीयोपनिषद्दीपिकाख्यया प्रसिद्धम् ।

---

१ ख. 'तीर्थं म' । २ क. ख. 'त्र चोप' ।

यथोक्तविद्याहेतुत्वाद्ग्रन्थोऽपि तदभेदतः ।
भवेदुपनिषन्नामा लाङ्गलं जीवनं यथा ॥ १२ ॥

तत्र—विषयः कः फलं किं कः संबन्धः कोऽधिकारवान् ।
इत्याकाङ्क्षानिवृत्त्यर्थं चतुष्टयमुदीर्यते ॥ १३ ॥

अनन्यलभ्यो विषय इति हि विषयस्य लक्षणम् । औषधविशेषग्रहप्रचारसुशब्दनिर्णयादीनामायुर्वेदज्योतिःशास्त्रव्याकरणादिभिरेव लभ्यत्वात्तद्विषयत्वं दृष्टम् । अत्रापि तद्वदनन्यलभ्यमद्वैतम् । न खल्वद्वैतमात्मतत्त्वं वेदान्तव्यतिरिक्तेन केनाचित्प्रमाणेन लभ्यते । **भागान्तरे** चाऽऽम्नायते—" नावेदविन्मनुते तं बृहन्तम् " इति । अनया **श्रुत्या** यथा वेदव्यतिरिक्तं प्रमाणं निषिध्यते तथा श्रुत्यन्तरेणोपनिषद्व्यतिरिक्तो वेदभागो निषिध्यते । तथा च **वाजसनेयिन** आमनन्ति—" तं त्वौपनिषदं पुरुषं पृच्छामि " इति । उपनिषत्स्वेवाधिगतं औपनिषदः । यत्तु मानान्तरेण गम्यत्वं मन्यते स प्रष्टव्यः । किं प्रत्यक्षेणोतानुमानेनाऽऽहोस्विदागमेनेति । आद्येऽपि किं बाह्येन प्रत्यक्षेण किंवा मानसेन । तत्र बाह्यप्रत्यक्षनिषेधं **तलवकारा** आमनन्ति—" न तत्र चक्षुर्गच्छति " इति । तत्रोपपत्तिं **तैत्तिरीयाः कठाः श्वेताश्वतराश्चाऽऽ**मनन्ति—" न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् " इति । संदृशे सम्यग्द्रष्टुमस्य परमात्मनो रूपं नीलपीतह्रस्वाद्याकारं न तिष्ठति न विद्यते । अतः कश्चिदपि ब्रह्मादिस्तम्बान्ते जगति वर्तमानो जन्तुरेनं परमात्मानं चक्षुषा न पश्यति । चक्षुषो रूपैकविषयत्वं सार्वजनीनम् । तैर्यक्कानां पामराणां चात्र विसंवादाभावात् । यथा रूपराहित्याच्चक्षुर्विषयत्वं नास्ति तथा शब्दादिराहित्याच्छ्रोत्रादिविषयत्वमपि नास्तीति कठैराम्नायते— " अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् " इति । तस्मान्न बाह्यप्रत्यक्षविषय आत्मा । मानसप्रत्यक्षमपि कीदृशमिति वक्तव्यम् । किं ममाऽऽत्मा भद्रसेन इत्येवंरूपमुताहं मनुष्यो ब्राह्मणो ब्रह्मचारीत्येवंरूपमथवा मदीयोऽयं देहो देहस्याहं स्वामी चक्षुरादीन्द्रियैर्ज्ञाता वागादीन्द्रियैरभिवदनादिक्रियायाः कर्ता मनसा सुखदुःखयोर्भोक्ता धर्माधर्माभ्यां स्वर्गनरकयोर्गन्तेत्येवंरूपमाहोस्वित्सत्यं ज्ञानमनन्तं ब्रह्मैकमेवाद्वितीयमहमित्येवंरूपम् । नाऽऽद्यः । तस्य गौणात्मविषयत्वेन मुख्यात्मतत्त्वगोचरत्वाभावात् । त्रिविधो ह्यात्मा । गौणात्मा मिथ्यात्मा मुख्यात्मा चेति । यथा त्रिविधः सिंहस्तद्वत् । तद्यथा—सिंहदेवदत्तयोर्भेदं पश्यन्नेव सिंहगतक्रौर्यशौर्यादिगुणानां देवदत्ते सद्भावात्सिंहोऽयमिति व्यवहरति सोऽयं गौणः सिंहः । अरण्ये मन्दान्धकारे धावन्तं हरिणं दृष्ट्वा भ्रान्त्या सिंहोऽयमिति निश्चित्य बिभेति सोऽयं मिथ्यासिंहः । अहि

१ ख. ग. 'ति वि' । २ क. ख. नीलं पीतं ह्रस्वदीर्घाद्या' । ३ क. ङ. 'चार्यव' ।

स्फीतालोकमध्यवर्तिनं मृगेन्द्रं दृष्ट्वा सिंहोऽयमिति प्रतिपद्यते सोऽयं मुख्यः सिंहः । एवं सत्यत्र राजा भद्रसेने स्वस्माद्भेदं पश्यन्नेव धनरक्षणादिरूपं स्वकीयं गुणं तस्मिन्नवलोक्य ममाऽऽत्मा भद्रसेन इति प्रयुङ्क्तेऽतोऽयं गौणात्मा । नापि द्वितीयः । अहं मनुष्य इत्यादिप्रत्ययस्य देहगोचरत्वेन मिथ्यात्मविषयत्वात् । द्विपात्त्वाद्याकारतादात्म्यान्मनुष्यत्वाख्या महाजातिः । विशिष्टमातापितृजन्यत्वगम्या ब्राह्मणत्वाख्याऽवान्तरजातिः । उपनयनादिसंस्कारगम्यो ब्रह्मचारित्वाश्रम इत्येते स्थूलदेहधर्माः । स्थूलदेहस्य चानात्मत्वं चार्वाकव्यतिरिक्तानां सर्वेषामपि तैर्थिकानामविवादम् । तस्मादात्मदेहयोर्विद्यमानस्यैव भेदस्य ——————— मनुष्य इति प्रत्ययो मिथ्यात्मविषयः । इदं च देहस्य मिथ्यात्मत्वं **प्राणमयकोशावतारे** प्रपञ्चयिष्यते । नापि तृतीयः । तस्यापि लिङ्गदेहविषयत्वात् । तथा हि—अयं देहो मदीय इत्येवं स्वस्वामिभावः प्रतीयते । तत्र स्वं देह आत्मा तु स्वामी तयोः कर्मनिमित्तः संबन्धः कर्मणां च पुण्यपापलक्षणानामनेकत्वात्तदनुसारेणोच्चावचदेहान्पर्यायेण गृह्णाति ।

एतदेवाभिप्रेत्य **भगवतोक्तम्**—

" वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही "॥ इति ।

तस्य च देहग्रहणस्य कर्मनिमित्तत्वं **श्वेताश्वतरा** आमनन्ति—" गुणान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता । स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः संचरति स्वकर्मभिः " इति । सत्त्वरजस्तमोगुणैरन्वयो यस्य जीवात्मनः सोऽयं गुणान्वयः । फलं सुखदुःखरूपं तस्य च कारणे पुण्यपापरूपकर्मणी तयोरयं कर्ता । स च कृतस्यैव कर्मण उपभोक्ता न त्वन्यस्य । कृतानां च कर्मणामनेकत्वात्तदनुसारेण बहुदेहस्वीकारादयं विश्वरूपः । गुणत्रयवशेन मार्गत्रयगामित्वात्त्रिवर्त्मा । सत्त्वगुणाधिक्ये सति यमनियमाद्यष्टाङ्गयोगमभ्यस्य सगुणब्रह्मोपासीन उत्तरमार्गेणार्चिरादिना ब्रह्मलोकं प्राप्नोति । रजोगुणाधिक्ये सति काम्यकर्माणि ज्योतिष्टोमादीन्यनुष्ठाय धूमादिना दक्षिणमार्गेण स्वर्गाख्यं सोमलोकं प्राप्नोति । तमोगुणाधिक्ये सति महापातकोपपातकानि कृत्वा नरकलोकं तृतीयमार्गेण प्राप्नोति । इत्थं प्राणानामधिपतिर्जीवात्मा स्वकीयैः कर्मभिर्मार्गत्रये संचरति । तस्य च जीवस्य स्वरूपं **तत्रैवाऽऽम्नातम्**—" अङ्गुष्ठमात्रो रवितुल्यरूपः संकल्पाहंकारसमन्वितो यः । बुद्धेर्गुणेनाऽऽत्मगुणेन चैव आराग्रमात्रो ह्यवरोऽपि दृष्टः " इति । हृदयपुण्डरीकमङ्गुष्ठपरिमितं तन्मध्ये व्यवस्थानाज्जीवोऽप्यङ्गुष्ठमात्रः । हृदि ह्येष आत्मेति

---

१ ख. °कोषाव° । २ घ. °मुगं ब° ।

श्रुत्यन्तरादस्य हृदयेऽवस्थानं द्रष्टव्यम् । मनुष्याश्चाऽऽबिद्धदङ्गनाविगोपालं कदाचिदात्मानमहमहमित्येवं हस्तेनाभिनीय प्रदर्शयन्तो हृदयदेशमेव स्पृशन्ति न तु शिरःपृष्ठपादादिप्रदेशम् । अतो हस्तिमशकादिनानाविधदेहसंचारित्वेन संकोचविकासयुक्तस्यापि जीवस्य हृदयपरिमाणमुपचर्याऽङ्गुष्ठमात्रत्वमुच्यते । स च सूर्यसदृशः । यथा सूर्यः स्वमण्डलप्रकाशनाय मण्डलव्यतिरिक्तबाह्यं दीपादिप्रकाशं नापेक्षते तथा जीवोऽपि चेतनत्वात्स्वात्मावबोधनाय नान्यत्साधनमपेक्षते । ननु चक्षुरायपेक्षाराहित्येऽपि मनोपेक्षा विद्यते । अयमहं सुखी दुःखीत्यादिशब्दव्यवहारस्य ध्यानपूर्वकत्वात् । " यद्धि मनसा ध्यायति तद्वाचा वदति " इतिश्रुतेर्वक्तृविवक्षितपूर्विका शब्दप्रवृत्तिरितिशास्त्रकृद्भिरुद्घोषणाच्च । भवैत्वेवं शब्दव्यवहारो ध्यानपूर्वकः । तच्च ध्यानं पूर्वप्रतीते वाच्ये वस्तुनि योग्यशब्दप्रयोजनायैव प्रवर्तते । पूर्वमप्रतीते वस्तुन्येतादृशः शब्दो योग्य इति निर्णेतुमशक्यत्वात् । एवं सति जडेषु घटादिषु प्रवृत्तं मनः प्रथमं वस्तु स्फोरयति । पश्चाद्योग्यं शब्दं ध्यायति । ततः पुमानभिवदति । चैतन्यात्मनि स्वत एव भासमाने शब्दविशेषनियमनायैव ध्यानापेक्षा । न तु स्फोरणाय । अन्यथा ध्यानवृत्तिरहितेषु क्षणेषु सुषुप्तिमूर्छामरणेभ्यः स्वात्मानुभवकृतं वैलक्षण्यं न स्यात् । लोकास्तु महदेव वैलक्षण्यं प्रतियन्ति । तस्माज्जीवात्मा लोकव्यवहारे स्वप्रकाशत्वाद्वित्तुल्यरूपः । एतदेवाभिप्रेत्य वाजसनेयिनः समामनन्ति—" विज्ञातारमरे केन विजानीयात् " इति । स च जीवः संकल्पाहंकाराभ्यां समन्वितो व्यवहरति । प्रयाससाध्यत्वविनश्वरत्वादिदोषैरसमीचीनेऽपि गृहक्षेत्रादौ तात्कालिकोपभोगाभासं दृष्ट्वा समीचीनमिदं गृहादिकमिति कल्पनं संकल्पः । तस्य च गृहादेरहं स्वामीत्येवमभिमानोऽहंकारः । अन्तःकरणस्येदमाकारा वृत्तिर्बहिर्मुखाऽहमाकारा वृत्तिरन्तर्मुखा तत्तो द्वे एव वृत्ती । तथाऽपीदंवृत्तेर्विषयबाहुल्यादहंवृत्तेश्च कालभेदेन पुनः पुनरावृत्तेरविच्छिन्नो व्यवहारः प्रवर्तते । तस्य च व्यवहर्तुश्चिदात्मकत्वमुच्यते **बुद्धेर्गुणेनाऽऽत्मगुणेन चैव आराग्रमात्र** इति, लयोदयरूपो बुद्धेर्गुणः । अहंकर्ता च सुप्तौ लीयते प्रबोधे च पुनरुदेति । स्वयंप्रकाशश्चाऽऽत्मनो गुणः । स च सूर्यदृष्टान्तेनोपवर्णितः । एतेन गुणद्वयेन युक्तः । आराग्रमात्रः कृषिकाले बलीवर्दप्रतोदाय दण्डाग्रे स्थापितः सूक्ष्मलोह आरा तस्या अग्रं यथाऽत्यन्तसूक्ष्मं तथाऽयमप्यतिसूक्ष्मोऽन्यथा नाडीष्वप्रतिरुद्धसंचारासंभवात्सोऽयमीदृशो जीवात्मा परमात्मापेक्षयाऽवरो निकृष्टः । सोऽपि प्राणिभिर्दृष्टश्चक्षुषा रूपमिवाहंप्रत्ययेनानुभूतः । स्वप्रकाशस्यापि शब्दव्यवहारयोग्यत्वापादनेनानुभूत इत्युच्यते । तदिदं जीवस्य मानसप्रत्यक्षत्वम् । यद्यपि चिज्जडोभयात्मत्वादिवि-

---

१ ग. हृयव° । २ क. ख. ग. °त्येव ह° । ३ ग. °बाह्यदी° । ४ ग. °खीत्या° । ५ क. °तेर्विव° । ६ घ. °र्वक्तुर्विव° । ७ क. °वत्येवं ।

नेकः शास्त्रकृतस्तथाऽपि जीवस्वरूपमात्रं सर्वैरप्यहमित्यनुभूयत एव । तस्य च जीवस्य स्त्रीत्वादिजातिर्न स्वाभाविकी । किंतु स्थूलशरीरोपाधिकृता ।

एतदपि तत्रैवाऽऽम्नातम्—

" नैव स्त्री न पुमानेष नैव चायं नपुंसकः ।
यद्यच्छरीरमादत्ते तेन तेन स युज्यते " ॥ इति ।

तत्तज्जात्या व्यवहियत इत्यर्थः । किंचास्य कर्त्रात्मनः स्वरूपं मैत्रेय्यां अपि स्पष्टमामनन्ति—"अस्ति खल्वन्योऽवरो भूतात्मारूयः । योऽयं सितासितैः कर्मफलैरभिभूयमानः सदसद्योनिमापद्यते " इति । " अवाचीं वोर्ध्वां वा गतिं द्वंद्वैरभिभूयमानः परिभ्रमति" इति । पूर्वत्र "स वा एष शुद्धः पूतः" इत्यादिनोक्तो यः परमात्मा तस्मादन्योऽवरो निकृष्टोऽस्ति स च भूतात्मारूयः । सूक्ष्माणि पञ्च भूतानि लिङ्गदेहरूपेण विक्रियन्तेऽय पिण्डेऽग्निवल्लिङ्गदेहे चिदात्मा संक्रामति । अतोऽयं लिङ्गदेहो भूतात्मेत्युच्यते। स च सितासितैः सुखदुःखरूपैः पुण्यपापकर्मफलैरभितः प्राप्यमाणः सद्योनिं ब्राह्मणादिरूपामसद्योनिं शूद्रादिरूपामापद्यते । एवमवाचीमधमां नारकीं वा गतिमूर्ध्वामुत्तमां स्वर्गरूपां वा गतिमापद्यते । द्वंद्वैः शीतोष्णमानावमानादिरूपैस्तिरस्क्रियमाणः पुनः पुनर्जायमानो म्रियमाणश्च परिभ्रमति । तस्य भूतात्मनो लिङ्गदेहप्रधानत्वात्तस्य च स्थूलदेहवन्मिथ्यात्मत्वात्तद्बोधकेनाहं कर्ता भोक्तेत्यनेन मानसप्रत्यक्षेणापि न मुख्यात्मलाभः । कर्त्रात्मनो विज्ञानमयस्य मिथ्यात्वमानन्दमयकोशावतारे प्रपञ्चयिष्यते । ननु ममाऽऽत्मा भद्रसेन इत्यनेन वाऽहं मनुष्य इत्यनेन वाऽहं कर्ता भोक्तेत्यनेन वा मुख्यात्मलाभो मा भूदहं ब्रह्मेत्यनेन तु मानसप्रत्यक्षेण मुख्यात्मलाभ इति चतुर्थः पक्षोऽस्त्विति चेत्तत्र वक्तव्यं किमत्र ब्रह्मशब्देन सगुणं ब्रह्म विवक्षितं किंवा निर्गुणं ब्रह्मेति । सगुणत्वेऽपि किं प्राथमिकोऽहं ब्रह्मेतिप्रत्ययो ब्रह्मणि प्रमाणं ध्यानाभ्यासजन्यो वा । आद्ये तस्य शास्त्रजन्यत्वान्न प्रत्यक्षेऽन्तर्भावः । मानसप्रत्ययत्वमात्रेण प्रत्यक्षत्वे धर्मादेरपि प्रत्यक्षत्वप्रसङ्गः । द्वितीये मृतपुत्रसाक्षात्कारवद्भावनाजन्यत्वान्न तस्य प्रामाण्यमस्ति ।

अत एव वार्तिककारा आहुः—

" भावनाजं फलं यत्स्याद्यच्च स्यात्कर्मणः फलम् ।
न तत्स्थास्निति मन्तव्यं पण्यस्त्रीसंगतं यथा " ॥ इति ।

निर्गुणब्रह्मणि तु यः साक्षात्कारस्तस्य मानसप्रत्यक्षत्वेऽपि शास्त्रपूर्वकत्वादागम एवान्तर्भावः । तस्मान्न प्रत्यक्षेण ब्रह्मात्मलाभः । नाप्यनुमानेन तल्लाभः संभवति हेतुदृष्टान्तयोरभावात् । अत एवामृतबिन्दूपनिषद्याम्नायते—" निर्विकल्पमनन्तं च हेतुदृष्टान्तवर्जितम्" इति । निर्धर्मकत्वान्न तत्र हेतुः संभवति अद्वितीयत्वाच्च न दृष्टान्तः ।

१ ख. घ, °या विप्र° । २ ब. °न्योऽपरो । ३ ग. °न्योऽपरोऽ° । ब. °न्योऽरो नि° ।

ननु **जन्मादिसूत्रे भाष्यकारा** अनुमानमङ्गी चक्रुः । सत्सु तु वेदान्तवाक्येषु जगतो जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्यायानुमानमपि वेदान्तवाक्याविरोधे[1] प्रमाणं भवन्न[2] निवार्यते श्रुत्यैव च तर्कस्याभ्युपेतत्वात् । "श्रोतव्यो मन्तव्यः" इति श्रुतिरिति । नैष दोषः । ब्रह्मणि प्रमाणं वेदान्तवाक्यान्येव पुरुषबुद्धिस्वास्थ्याय त्वनुमानमप्यस्त्विति भाष्याभिप्रायः । तत्रानुमानमारोपितौ हेतुदृष्टान्तावुपजीव्य प्रवर्तते । ब्रह्मसिद्धिरपि तेनैवास्त्विति[3] चेन्न । तद्विशेषासिद्धेः । क्षित्यादिकं सकर्तृकं कार्यत्वाद्घटवदित्यनुमानेनेश्वरमात्रसिद्धावपि सत्यज्ञानानन्ताद्वितीयत्वलक्षणो विशेषो न सिध्यति । तस्मान्नानुमानेनापि ब्रह्मलाभः । आगमेऽपि कर्मकाण्डस्य साध्यसाधनभावबोधमात्रपर्यवसायित्वान्न तत्र ब्रह्मलाभशङ्काऽप्यस्ति ।

ननु **ब्रह्मसिद्धिकारैरे**[4]वमुक्तम्—

"सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते ।
प्रपञ्चस्य प्रविलयः शब्देन प्रतिपाद्यते" ॥ इति ।

युक्तं चैतत् । सच्चिदानन्दरूपं हि ब्रह्म तत्र प्रमाणैः प्रमीयमाणेषु सर्वेष्वपि वस्तुषु सत्त्वं भानमानन्दं (न्दनं) च विस्पष्टमतो ब्रह्म सर्वप्रत्ययवेद्यम् । बाढम् । सप्रपञ्चमेव ब्रह्म सर्वैः प्रत्ययैर्वेद्यते । न रूपरसगन्धादिविषयान्परित्यज्य चक्षुरादयः शुद्धं तत्त्वं गृह्णन्ति । अन्यथा गुरुशास्त्रनैरपेक्ष्येणैव सर्वे जना मुच्येरन् । पुरुषार्थस्तु निष्प्रपञ्चब्रह्मवेदनादेव । तद्बोधद्वारत्वेन तु शास्त्रेषु तत्र तत्र सप्रपञ्चं ब्रह्मोपन्यस्यते । तच्च पुरुषार्थभूतनिष्प्रपञ्चब्रह्मवेदनं शास्त्रेणैव जन्यते । तदपि **तैरे**[5]**वोक्तम्** ।

"प्रविलीनप्रपञ्चेन तद्रूपेण न गोचरः ।
मानान्तरस्येति मतमाम्नायैकनिबन्धनम्" ॥ इति ।

तस्मादद्वितीयब्रह्मात्मतत्त्वमनन्यलभ्यत्वादुपनिषदो विषय इति सिद्धम् । एतदेवाभिप्रेत्य भगवान्**बादरायणः** सूत्रयामास—"शास्त्रयोनित्वात्" [१–१–३] इति । तस्य च सूत्रस्य **द्वितीयवर्णके** योनिशब्दस्य ज्ञप्तिकारणत्वमर्थः । ततः शास्त्रप्रमाणत्वादित्युक्तम् । तत्रायं **न्यायसंग्रहः**—

"अस्त्यन्यमेयताऽप्यस्य किंवा वेदैकमेयता ।
घटवत्सिद्धवस्तुत्वाद्ब्रह्मान्येनापि मीयते ॥
रूपलिङ्गादिराहित्यान्नास्य मान्तरयोग्यता ।
तं त्वौपनिषदेत्यादौ प्रोक्ता वेदैकमेयता" इति ॥

---

१ क. °रोधि प्र° । २ घ. °धेन प्र° । ३ क, छ. भवेत्र । ४ ग. तेनास्ति° । ५ म. °धनद्वा° । ६ ग, णम° ।

को विषय इत्यस्योत्तरमुक्तम् ।

अथ **किं फलमि**त्यस्योत्तरमुच्यते—उक्तविषयस्याद्वितीयब्रह्मात्मतत्त्वस्याभिव्यक्तिः साक्षात्फलम् । तच्च **बृहदारण्यके** दर्शितम्—"आत्मन्येवाऽऽत्मानं पश्यति सर्वमात्मानं पश्यति" इति । पूर्वोक्तो यो गौणात्मा पुत्रभृत्यादिर्यौ च मिथ्यात्मानौ स्थूलदेहलिङ्गदेहौ तेभ्यो व्यतिरिक्तः सांख्यादिसंमतः पुरुषश्चिद्रूपः साक्षी मुख्यात्मा तस्मिन्नेवाऽऽत्मनि जगत्कारणं परमात्मानं वेदान्तमहावाक्येन पश्यति । आत्मन्यात्मानमित्याधाराधेयभेदो राहोः शिर इतिवदेकस्मिन्नेव वस्तुन्यौपचारिकः । जीवात्मानमेव परमात्मत्वेन वेदान्तमहावाक्यैः पश्यतीत्यर्थः । परमात्मा हि सर्वस्य जगत उपादानम् । न ह्युपादानव्यतिरेकेण कार्यं किंचिद्वस्त्वस्ति । मृत्सुवर्णादिव्यतिरेकेण घटकुण्डलादिवस्तूनामदर्शनात् । अतो जगत्कारणं परमात्मानं स्वात्मत्वेन पश्यञ्जगदपि सर्वं स्वात्मत्वेनैव पश्यति । न्यायवैशेषिकादिशास्त्राणि मिथ्यात्मन्येव कर्तृत्वादियुक्त उपक्षीणानि । सांख्यशास्त्रं यद्यपि चिदात्मनि मुख्ये प्रवृत्तं तथाऽपि तावत्येव पर्यवसितम् । वेदान्तास्तु तस्य मुख्यात्मन ईश्वरत्वमशेषजगद्रूपत्वं च प्रतिपादयन्तीति विशेषः । एतादृशाद्वितीयत्वबोधः प्रथमफलम् । तद्बोधादूर्ध्वमविद्या निवर्तते । एतच्चाऽऽथर्वणिकैराम्नायते—"एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य" इति । गुहा बुद्धिस्तस्यां निहितं साक्षित्वेनावस्थितमेतद्ब्रह्मात्मतत्त्वं यो वेद स पुमानिह देहे वर्तमान एव सन्नविद्याग्रन्थिं विश्लेषयति । हे सोम्येत्यङ्गिरा गुरुः शिष्यं शौनकं संबोध्य ब्रूते । यथा लोके साकल्येन राहुग्रस्तश्चन्द्रमाः स्वकीयोज्ज्वलत्वस्याऽऽच्छादितत्वेन स्वयं मलिनोऽम्बरे भासमानो राहुं चावभासयंस्तेन राहुणा तादात्म्यं प्राप्त इवावभासते । एवमयमद्वयानन्दैकरसश्चिदात्मा स्वयमनादिरूपाविद्यापटलेनाऽऽवृतः सन्नद्वितीयत्वस्याऽऽनन्दैकरसत्वस्य चाऽऽच्छादितत्वेन बहुविधद्वैतरूपेण जगता युक्तो दुःखी स्वचैतन्येन स्वात्मानमविद्यां चावभासयन्नविद्यया तादात्म्यं प्राप्त इवाहमज्ञ इत्येकीकृत्य व्यवहरति । सोऽयमेकीकारोऽविद्याग्रन्थिः । स च बोधेन विकीर्णो भवति । यथा राहुणा विमुक्तं चन्द्रमण्डलमुज्ज्वलं भासते तथा बोधेनाऽऽच्छादिकायामविद्यायां निवृत्तायामद्वितीयत्वमानन्दैकरसत्वं चाऽऽविर्भवति । तदिदमविद्याग्रन्थेर्विकीर्णत्वम् ।

अयमेवार्थः **पुराणेऽपि** स्मर्यते—

"तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते ।
योगी मायाममेयाय तस्मै विद्यात्मने नमः" ॥ इति ।

एकस्यैव भावरूपाज्ञानस्य स्वाश्रयं प्रत्यावरकत्वाकारेणाविद्यात्वम् । विचित्रकार्यजनकत्वाकारेण मायात्वम् । अतोऽविद्याया इव मायाया अपि तत्त्वज्ञानं निवर्त-

१ ग. सांख्यं शा° । २ ख. घ. °थमं फ° । ३ ग. 'षद्' ।

कम् । तस्मात्तत्त्वविदो नाद्वितीयानन्दैकरसस्वभावः कदाचिदप्याव्रियते । नापि जन्मान्तरादिकं नूतनकार्यमुत्पद्यते । एवमविद्याग्रन्थौ विकीर्णे सति ततो हृदयग्रन्थ्यादयोऽपि निवर्तन्ते ।

तदपि तत्रैवाऽऽम्नातम्—

" भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे " ॥ इति ।

परमुत्कृष्टं जगत्कारणमज्ञानमप्यवरमधमं यस्मात्परमात्मनः सोऽयं परावरः । यद्वा परश्चासाववरश्चेति परावरः । सर्वात्मक इत्यर्थः । परावरे तस्मिन्परमात्मनि साक्षात्कृते सति हृदयग्रन्थिर्भिद्यते । हृदयमन्तःकरणं लिङ्गशरीरं तच्चैतन्यच्छायाव्याप्तत्वेन[1] चेतनमहं कर्तेति प्रतिभासमानं तर्कशास्त्रे पूर्वमीमांसायां च मुख्यात्मत्वेनाङ्गीकृतम् । वेदान्तदृष्ट्या स्थूलदेहवन्मिथ्यात्मरूपं तेन हृदयेन सह चिदानन्दैकरसस्याऽऽत्मनो योऽयमेकीभावभ्रमः सोऽयं हृदयग्रन्थिः । अज्ञातस्य शुक्तिरूपस्याऽऽरोपितेन रजतेन सह यथैकीभावस्तद्वद्गुरुशास्त्रोपदेशरहितः सर्वोऽपि जन्तुरज्ञानावृतचिदानन्दैकरसमात्मतत्त्वं सूक्ष्मभूतकार्यं कर्तृत्वादिधर्मोपेतं हृदयं च विवेक्तुमशक्नुवन्नेकीकृत्याहं कर्तेत्यशेषस्वरूपविवक्षया व्यवहरति । सोऽयं हृदयग्रन्थिस्तत्त्वदर्शनेन भिद्यते विविच्यते । न च तत्त्वविदोऽपि यथापूर्वमहं कर्तेति व्यवहारो दृश्यत इति वाच्यम् । सत्यपि व्यवहारे यथापूर्वत्वाभावात् । अत एव श्रीमच्छारीरकमीमांसायां भगवद्भाष्यकारा आहुः—"नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वम् । यस्य तु यथापूर्वं संसारित्वं नासावावगतब्रह्मात्मभावः "

उपदेशसाहस्र्यामप्युक्तम्—

" आत्मज्ञस्यापि यस्य स्याद्धानोपादानतामतिः ।
न मोक्षार्हः स विज्ञेयो वान्तोऽसौ ब्रह्मणा ध्रुवम् " ॥ इति ।

अहं कर्तेतिव्यवहारस्तु चिदात्मानं बुद्ध्या विविच्यापि कर्तुं शक्यते । अहंशब्दार्थस्य हृदयस्य तन्निष्ठकर्तृत्वधर्मस्य चा(चा?)विद्यमानत्वात् ।

एतदपि साहस्र्यामभिहितम्—

" अहमित्यात्मधीर्या च ममेत्यात्मीयधीरपि ।
अर्थशून्ये यदा यस्य स आत्मज्ञो भवेत्तदा " ॥ इति ।

चिदात्महृदययोस्तादात्म्यभ्रमरूपः पूर्वसिद्धोऽर्थस्तेनार्थेन शून्ये केवलहृदयवि-

---

१ ग. °च्छाययाऽव्या° । २ क. ङ. °नं शा° । ३ क. ख. ङ. 'वेकम' । ४ ख. °पूर्वत्तं° । ५ क. ख. ङ. °पूर्वसं° ।

वक्षापूर्विके इत्यर्थः । नहि भ्रमहेतावविद्यायां निवृत्तायां निर्हेतुको भ्रमः संभवति । न खलु स्वप्ने काशीं प्रत्यर्धमार्गं गत्वा प्रबुद्धः पुरुषो निपुणतरोऽपि परेद्युः पुरतो गन्तुं प्रभुर्भवति । तस्माद्धृदयग्रन्थिभेदो निर्विघ्नः सिद्धः । हृदयग्रन्थौ भिन्ने सति सर्वसंशया-श्छिद्यन्ते । अयमात्मा स्थूलदेहरूपो वा सूक्ष्मदेहरूपो वा ताभ्यामतिरिक्तो वाऽतिरि-क्तत्वेऽप्यणुपरिमाणो वा मध्यमपरिमाणो वा सर्वगतो वा जडो वा द्रव्यबोधात्मको वा चिद्रूपो वेश्वरादन्यो वेश्वर एव वा प्रपञ्चः सत्यो वा मिथ्या वा मोक्षसाधनं कर्माणि वा ज्ञानं वेत्यादिका अनन्ताः संशयाः स्वबुद्धिदोषजन्या बहुविधशास्त्राभ्यासेनोत्पादि-ताश्च सर्वैर्बहिर्मुखैरनुभूयन्ते । ते सर्वेऽपि हृदयग्रन्थिपूर्वकाः । असति हृदयग्रन्थौ सुषुप्ति-मूर्छासमाधिष्वदर्शनात् । तथा जागरणेऽप्यद्वितीयचिदानन्दैकरसमात्मानमनुभवतोऽन्त-र्निपुणस्य हृदयग्रन्थिरहितस्य शास्त्रसहस्रैरपि न ते संशया उत्पादयितुं शक्यन्ते । संशयेषु च्छिन्नेषु ज्ञानस्य फलप्रतिबन्धहेत्वभावादागामिजन्मकारणानि पूर्वानुष्ठितानि पुण्यपापरूपाणि सर्वाणि कर्माण्यपि क्षीयन्ते । यथा गृहस्थे प्रवृत्तानि देवर्षिपितृसंब-न्धीनि त्रीण्यृणानि लौकिका गृहक्षेत्रादिविवादाः पारिव्राज्ये सति निवर्तन्ते तद्वत् । युक्तं चैतत् । कर्त्रात्मनिष्ठानि हि कर्माणि । स च कर्त्रात्मा यावच्चिदात्मना सहैकीभूतस्ताव-त्कर्माणि चिदात्मानं संस्पृशन्तु । विवेकेन त्वपाकृते कर्त्रात्मसंबन्धे कथं नाम तानि चिदात्मानं संस्पृशेयुः ।

एतच्च भगवता विस्पष्टमुक्तम्—

" अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधा च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥
शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥
तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः " ॥ इति ।

अधिष्ठानं स्थूलदेहः । तथा कर्ता चैतन्यच्छायोपेतो लिङ्गदेहः । करणानि लिङ्ग-देहावयवभूतानि चक्षुरादीनि । प्राणवायुकार्यदर्शनश्रवणगमनादिरूपा विविधा चेष्टा । इन्द्रियप्रेरकमादित्यादिदेवतारूपं दैवम् । शरीरादिसाध्यस्य पुण्यस्य पापस्य चाधिष्ठा-नादयः पञ्च हेतवः । न तु चिदात्मा । एवं सत्यात्मस्वरूपमज्ञात्वा भ्रान्तैस्तत्र कर्तृत्व-मारोप्यते ।

---

१ ग. °णि ज्ञा° । २ ग. °नं चेत्या° । ३ क. ङ °विधाः शा° । ४ ङ. °गरेऽप्य° । ५ घ. °र्निष्ठस्य । ६ ख. °स्रशतैर° । ७ क. ख. ग ङ. कर्ताऽऽत्मा ।

" यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वाऽपि स इमाँल्लोकान्न हन्ति न निबध्यते " ॥

यस्य तु तत्त्वविदो भावः सत्तास्वभावश्चिदात्मत्वा नाहं कर्तेतिप्रत्ययेन विपरीकृतो हृदयग्रन्थिर्भिन्नत्वात् । अत एवाहमित्यात्मशब्दोऽर्थशून्येति स्वाहङ्कारत्वं पूर्वमुदाहृतम् । केवलं लिङ्गदेहमेवाभिप्रेत्याहं कर्तेति तत्त्वविद्व्यवहरति । अत एव बुद्धौ लेपो न विद्यते । लिङ्गदेहकृतैः कर्मभिर्जन्मान्तरशङ्कालेपबाधे संशयविपर्यययोरभावात्तस्य बुद्धिर्लिप्यते । यद्यप्येतादृशस्य योगिनो रागद्वेषादिराहित्येन हननार्था प्रवृत्तिरेव न संभवति । तथाऽपि राज्येऽधिकृतस्य क्षत्रियस्यार्जुनस्य दुष्टशिक्षाशिष्टप्रतिपालनयोः कर्तव्यत्वेन तत्र प्रवृत्तिः संभवत्येव । यथा योगिन आहारनिद्रादौ योगाभ्यासे वा प्रवृत्तिस्तद्वत् । अनेनैव न्यायेन कौषीतकिवाक्यमपि नेतव्यम् । तत्र ह्येवमाम्नायते—" स यो ह वां विजानीयान्नास्य केनचन कर्मणा लोको मीयते न मातृवधेन न पितृवधेन न स्तेयेन न भ्रूणहत्यया " इति । अत्र ह्येवं संभावना द्रष्टव्या । क्षत्रियस्य पुत्रः कश्चित्स्वमातृपित्रादिकं स्वगृहेऽवस्थाप्य तत्पोषणार्थं परराष्ट्रे गत्वा राज्ञः समीपे जीवितं गृहीत्वा स्वामिकार्यार्थं घाटीमुखेन[1] रात्रौ समागत्य विचारमन्तरेण स्वमातृपित्रादीन्मारितवान् । यथा जमदग्नेराज्ञया परशुरामः स्वमातरमेव जघान तद्वत् । अतस्तत्त्वविदोऽप्यधिकारविशेषेणैतादृशं संभाव्यते । तच्च तत्त्वदृष्ट्याऽन्यकृतत्वान्न तस्य जन्महेतुः । अन्यकृतत्वं च केनचिन्मन्त्रेणोच्यते—" कामोऽकार्षीत्कामः करोति नाहं करोमि कामः कर्ता नाहं कर्ता कामः कारयिता नाहं कारयिता " इति । अयं मन्त्रो विवेकिनं प्रति कामात्मनोः संबन्धाभावं बोधयन्नविवेकिनः प्रायश्चित्तार्थो भवति । ब्रह्मविदोऽपि लोकव्यवहारमनुसरतः कामपुरःसरा प्रवृत्तिः संभवति । अत एवार्जुनं प्रति भगवतोक्तम्—

" लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि " इति ।

तस्माद्युद्धप्रसक्तियुक्तस्य क्षत्रियस्य " हत्वाऽपि स इमान् " इत्यादिभगवद्वाक्यं कौषीतकिवाक्यं च ब्रह्मवेदनान्निर्लेपत्वपरम् । इतरस्यापि लोकव्यवहारे हत्या मानसी वाचिकी वा प्रसक्तेति निर्लेपत्वं तेन वाक्यद्वयेन प्रतिपाद्यताम् । जन्मान्तरकृतैरेव विद्यादिभिर्निर्लेपत्वं वाक्यद्वयेनाभिधीयते । सत्स्वपि जन्मान्तरकृतपापेषु परिपक्वैरीश्वरार्पितैः पुण्यकर्मभिर्ब्रह्मविद्योत्पद्यत एव पूर्वकृतपापाभावे च ब्रह्मविदां शरीरे रोगादिकं नोपलभ्येत । न च ब्रह्मविद्या प्रायश्चित्तत्वेन पापस्य निवर्तिका । किंतु प्रत्यगात्मनोऽसङ्गत्वबोधनेन पूर्वसिद्धमेव पापराहित्यमभिव्यनक्ति । तच्च नित्यसिद्धं पापराहित्यमेवमाम्नातम्—" य आत्माऽपहतपाप्मा " इति । तद्वत्पुण्यराहित्यमप्यसङ्गत्वादेव नित्यसिद्धम् । तदवबोधेन जन्मान्तरकरणानि काम्यानि पुण्यान्यपि कर्माणि क्षीयन्ते ।

---

१ ङ. लोके । २ घ. 'र्थं वाटी' ।

अत एव काठकमेकेन आमनन्ति—"एतमु हैवैते न तरत इत्यतः पापमकरवमित्यतः कल्याणमकरवमित्युभे उ हैवैष एते तरति नैनं कृताकृते तपतः" इति । एवमेव ब्रह्मविद्येते मामवधी चिन्ते न तरतो न प्राप्नुतः । कीदृश्यावितिं ते अभिधीयेते । इतिशब्दः कर्महेतुभूतरागद्वेषप्रदर्शनार्थः । शत्रुं हनिष्यामीत्येतादृशो यो द्वेषोऽस्यतो द्वेषादहमपि परादिना वधरूपं पापमकार्षम् । स्वर्गं प्राप्स्यामीत्येतादृशो यो रागोऽस्यतो रागादहं ज्योतिष्टोमादिरूपं कल्याणमकार्षम् । तत्र पापेन नरको भविष्यतीत्येवं निमित्तका चिन्तैका । स्वर्गः कदा भविष्यतीत्येवं विलम्बासहिष्णुत्वरूपा चिन्ता द्वितीया । उभे अप्येते चिन्ते एष ब्रह्मविदुल्लङ्घयति । कृताकृते पुण्यपापे नैनं क्लेशयतः । अज्ञानविषं तु प्रत्यवायः कृतस्तपति । पुण्यं त्वकृतं संतपति । न त्वस्यानुभयविधः संतापो ब्रह्मविदोऽस्ति । तदेवं जन्मान्तरकारणानि कर्माणि क्षीयन्त इति सिद्धम् । इह जन्मन्यपि हर्षशोकौ क्षीयेते । तथा च कठा आमनन्ति—"अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति" इति । आत्मानमधिकृत्य वर्तत इत्यध्यात्मं तथाविधो योगश्चित्तैकाग्र्यं तस्याधिगमः प्राप्तिस्तेन देवं स्वयंप्रकाशं परमात्मानं मत्वा साक्षात्कृत्य हर्षशोकौ जहाति परित्यजति । न तावदस्य हर्षहेतुरस्ति । द्विधा हि हर्षहेतुः । समीचीनभजनादिलाभो विस्मयहेतुरणिमादिसिद्धिश्च । समीचीनत्वबुद्धिस्तु न काप्यस्य विद्यते ।

तदुक्तं वासिष्ठरामायणे—

"न केवलं जगद्भावास्तत्त्वज्ञं रञ्जयन्त्यमी ।
नागरं नागरीकान्तं कुग्रामललना इव" ॥ इति ।

विस्मयोऽप्यस्य न क्वापि संभवति । तदपि तत्रैवोक्तम्—

"अपि शीतरुचावर्के उष्णे पीयूषमण्डले ।
अप्यधः प्रसरत्यग्नौ जीवन्मुक्तो न विस्मयी ॥
चिदात्मन इमा इत्थं प्रस्फुरन्तीह शक्तयः ।
इत्यस्याऽऽश्चर्यजालेऽपि नाभ्युदेति कुतूहलम्" ॥ इति ।

शोकस्य तु पुत्रमित्रमरणादिकं निमित्तम् । तच्च नाद्वितीयमात्मानमनुभवतः संभवति । तदनुभवश्चाऽऽचार्यैरुदाहृतः—

"अहमेको न मे कश्चिन्नाहमन्यस्य कस्यचित् ।
न तं पश्यामि यस्याहं तं न पश्यामि यो मम" ॥ इति ।

सोऽयं हर्षशोकपरित्यागो धीरस्यैव न त्वितरस्येत्यभिप्रेत्य धीर इत्युक्तम् ।

---

१ ग. °दिव° । २ घ. द्विविधो हि । ३ ख. संशयी । ४ घ. °लेषु ना° ।

त्रिविधो हि ब्रह्मवित् । लोकव्यवहारप्रधानो विवेकप्रधानः [illegible] । आरब्धकर्मवशाद्राज्यादिषु योऽधिकारी स व्यवहारप्रधानः । स च मूढवत्तात्कालिकाभ्यां हर्षशोकाभ्यामभिभूयत एव । तमेतमभिलक्ष्य भाष्यकारा आहुः—"पश्चादिभिश्चाविशेषात्" इति । राज्याधिकारवशादेव कृष्णेन बोधितोऽर्जुनो वसिष्ठेन बोधितो रामश्च व्यावहारिकं हर्षं शोकं च प्राप्तवन्तौ । विवेकप्रधानस्तु धीरो भूत्वेन्द्रियाणि विजित्य तदा तदा प्रसक्तौ हर्षशोकौ विवेकेन परित्यजति । समाधिप्रधानस्य तु हर्षशोकप्रसङ्ग एव नास्ति । ईदृशमेव विषयीकृत्याऽऽम्नातम्—"पर्याप्तकामस्य कृतात्मनश्च इहैव सर्वे प्रविलीयन्ति कामाः" इति । अन्तर्निष्ठ आत्मानमेव कामयते स चाऽऽत्मा नित्यप्राप्तत्वात्सर्वदा स्फुरतीति तदा तदा न विशेषेण कामयितव्यो भवति । अतोऽयमन्तर्निष्ठः पर्याप्तकामः । स च कृतात्मा नियमितान्तःकरणः । अतो बाह्यं न पश्यति । कुतस्तस्य कामः स्यात् । तथा सति कामयितव्यस्य कस्याप्यभावान्निरिन्धनाग्निवत्सर्वे कामाः प्रलीयन्ते । क्रोधलोभादीनां काममूलत्वात्कामलयेनैव तल्लयः । [illegible] हि क्रोध उत्पद्यते । तच्च स्मर्यते—"कामात्क्रोधोऽभिजायते" इति । सोऽयमीदृशः कामक्रोधाद्यरिषड्वर्गरहितोऽन्तर्निष्ठो ब्रह्मविदामुत्तमः । स चैवमाम्नायते—"आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः" इति । आत्मन्येव क्रीडा यस्यासावात्मक्रीडः । लौकिकः पुरुषो द्यूतादौ स्वस्य जयं परस्य पराजयं चैवान्विच्छन्क्रीडति तथा ब्रह्मवित्पुमानात्मनः स्वप्रकाशत्वाद्वितीयत्वादिसाधकश्रुतियुक्तीनां प्राबल्यं तद्विरुद्धानां दौर्बल्यं चान्विच्छन्क्रीडति । यथा च लौकिकः पुरुषार्थसिद्धये संध्यावन्दनादिक्रियावांस्तथा ब्रह्मविद आत्मरतिरेव क्रिया न तु बाह्यक्रिया काचिदस्ति । तथा चाऽऽरुण्युपनिषद्युक्तम्—"संधिं समाधावात्मन्याचरेत्" इति । परमहंसोपनिषद्यपि—"परमात्मात्मनोरेकत्वज्ञानेन तयोर्भेद एव विभग्नः सा संध्या सर्वान्कामान्परित्यज्याद्वैते परमे स्थितिः" । एवं सत्यस्य लौकिकवैदिककर्तव्याभावादयं कृतकृत्यः । एतदपि परमहंसोपनिषद्युक्तम्—"यत्पूर्णानन्दैकबोधस्तद्ब्रह्मैवाहमस्मीति कृतकृत्यो भवति" इति ।

भगवताऽप्युक्तम्—

"यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते" ॥ इति ।

स्मृत्यन्तरं च—

"ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ।
नैवास्ति किंचित्कर्तव्यमस्ति चेन्न स तत्त्ववित्" ॥ इति ।

---

१ ग. घ. °किह° । २ घ. °नस्त्विहै° । ३ ग. प्रविला° ।

कृतकृत्यस्य स्वरूपं तृप्तिदीप उदाहृतं विस्पष्टम्—

" ऐहिकामुष्मिकव्रातसिद्धयै मुक्तेश्च सिद्धये ।
बहु कृत्यं पुराऽस्याभूत्तत्सर्वमधुना कृतम् ॥
तदेतत्कृतकृत्यत्वं प्रतियोगिपुरःसरम् ।
अनुसंदधदेवायमेवं तृप्यति नित्यशः ॥
दुःखिनोऽज्ञाः संसरन्तु कामं पुत्राद्यपेक्षया ।
परमानन्दपूर्णोऽहं संसरामि किमिच्छया ॥
अनुतिष्ठन्तु कर्माणि परलोकैषियासवः ।
सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथम् ॥
व्याचक्षतां ते शास्त्राणि वेदानध्यापयन्तु वा ।
येऽत्राधिकारिणो मे तु नाधिकारोऽक्रियत्वतः ॥
निद्राभिक्षे स्नानशौचे नेच्छामि न करोमि च ।
द्रष्टारश्चेत्कल्पयन्ति किं मे स्यादन्यकल्पनात् ॥
गुञ्जापुञ्जादि दह्येत नान्यारोपितवह्निना ।
नान्यारोपितसंसारधर्मानेवमहं भजे ॥
शृण्वन्त्वज्ञाततत्त्वास्ते जानन्कस्माच्छृणोम्यहम् ।
मन्यन्तां संशयापन्ना न मन्येऽहमसंशयः ॥
विपर्यस्तो निदिध्यासेत्किं ध्यानमविपर्यये ।
देहात्मत्वविपर्यासं न कदाचिद्भजाम्यहम् ॥
अहं मनुष्य इत्यादिव्यवहारो विनाऽप्यमुम् ।
विपर्यासं चिराभ्यस्तवासनातोऽवकल्पते ॥
आरब्धकर्मणि क्षीणे व्यवहारो निवर्तते ।
कर्माक्षये त्वसौ नैव शाम्येद्ध्यानसहस्रतः ॥
विरलत्वं व्यवहृतेरिष्टं चेद्ध्यानमस्तु ते ।
अबाधिकां व्यवहृतिं पश्यन्ध्यायाम्यहं कुतः ॥
विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम ।
विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः ॥
नित्यानुभवरूपस्य को मेऽत्रानुभवः पृथक् ।
कृतं कृत्यं प्रापणीयं प्राप्तमित्येव निश्चयः ॥
व्यवहारो लौकिको वा शास्त्रीयो वाऽन्यथाऽपि वा ।

---

१ ख. °त्यस्व° । २ क. ङ. °ष्ठन्ति क° । ३ क. ङ. °त्रिपास° ।

' ममाकर्तुरलेपस्य यथारब्धं प्रवर्तताम् ।
अथवा कृतकृत्योऽपि लोकानुग्रहकाम्यया ॥
शास्त्रीयेणैव मार्गेण वर्तेऽहं का मम क्षतिः " ॥ इति ।

तस्यैतस्य कृतकृत्यस्य योगिनः सर्वदा मनस्यानन्द एवाऽऽविर्भवति । स चैवमाम्नायते—"रसो वै सः । रसꣳ ह्येवायं लब्ध्वाऽऽनन्दी भवति " इति । स परमात्मा रसो वै परमानन्दस्वभाव एव । तमेतं रसं परमानन्दस्वभावं परमात्मानं लब्ध्वा साक्षात्कृत्यायं योगी स्वमनस्यानन्दी भवति । विद्याजन्येन हर्षेण युक्तो भवति । हर्षशोकौ जहातीत्यत्र विषयभोगजन्यो हर्षो निषिद्धः । न तु विद्याजन्यः । तं च विद्याजन्यं हर्षं श्रुतिः सामोदाहरणेन स्पष्टी चकार—"इमाँल्लोकान्कामान्नी कामरूप्यनुसंचरन् । एतत्साम गायन्नास्ते । हा३वु हा३वु हा३वु । अहमन्नमहमन्नमहमन्नम् । अहमन्नादोऽ३हमन्नादोऽ३हमन्नादः । अहꣳ श्लोककृदहꣳ श्लोककृदहꣳ श्लोककृत् " इत्यादि । ब्रह्मादीनां तिर्यग्पर्यन्तानां प्राणिनां मध्ये येन येन यदन्नं भुज्यते तन्मुखेन तदन्नं ब्रह्मविदेव भुङ्क्ते । सर्वदेहानां स्वकीयत्वात् ।

तदुक्तमुपदेशसाहस्र्याम्—

" ब्रह्माद्याः स्थावरान्ता ये प्राणिनो मम पूः स्मृता ।
कामक्रोधादयो दोषा जायेरन्मे कुतोऽन्यतः " ॥ इति ।

एवं च सति काम्यमानं सर्वमन्नमस्यास्तीति कामान्नी । अनेनैव न्यायेन देवमनुष्यादिरूपाणां सर्वेषां स्वकीयत्वात्कामरूपित्वम् । तथा सर्वलोकसंचारश्च । साम्नि त्वहोशब्दस्य गानार्थेन वर्णविकारेण हा३वुशब्दनिष्पत्तिः । एकदेहमात्रपरिच्छिन्नस्य ब्रह्मात्मत्वावबोधमात्रेण सर्वात्मकत्वलाभरूपमाश्चर्यमहोशब्दो ब्रूते । आदरार्थस्त्रिरभ्यासः । सर्वात्मत्वमेवोत्तरवाक्यैरुद्घाट्यते । यदन्नं व्रीहियवगोधूमादिविकाररूपं यस्त्वन्नादो ब्राह्मणक्षत्रियादिरूपो भोक्ता यश्च श्लोककृ-काव्यनाटकादिकर्ता तत्सर्वमप्यहमेव । सर्वस्यापि ज्ञानसन्मात्ररूपत्वान्नामरूपविकाराणां च वाचारम्भणमात्रत्वात् । अस्मिन्नर्थे संशयनिवृत्त्यर्थस्त्रिरभ्यासः । सोऽयं विद्याजन्य आनन्दस्तृप्तिदीपेऽप्युदाहृतः—

" कृतकृत्यतया तृप्तः प्राप्तप्राप्यतया पुनः ।
तृप्यन्नेवं स्वमनसा मन्यतेऽसौ निरन्तरम् ॥
धन्योऽहं धन्योऽहं नित्यं त्वात्मानमञ्जसा वेद्मि ।
धन्योऽहं धन्योऽहं ब्रह्मानन्दो विभाति मे स्पष्टम् ॥
धन्योऽहं धन्योऽहं दुःखं सांसारिकं न वीक्षेऽद्य ।
धन्योऽहं धन्योऽहं स्वस्याज्ञानं पलायितं क्वापि ॥

---

१ ख. °हिष्पादि° ।

धन्योऽहं धन्योऽहं कर्तव्यं मे न विद्यते किंचित्।
धन्योऽहं धन्योऽहं प्राप्तव्यं सर्वमद्य संपन्नम्।
धन्योऽहं धन्योऽहं तृप्तेर्मे कोपमा भवेल्लोके॥
धन्योऽहं धन्योऽहं धन्यो धन्यः पुनः पुनः पुनर्धन्यः।
अहो पुण्यमहो पुण्यं फलितं फलितं दृढम्॥
अस्य पुण्यस्य संपत्तेरहो वयमहो वयम्।
अहो शास्त्रमहो शास्त्रमहो गुरुरहो गुरुः॥
अहो ज्ञानमहो ज्ञानमहो सुखमहो सुखम्" इति।

इत्थं फलपरम्परा प्रतिपादिता। सर्वात्मकपरब्रह्मस्वरूपात्माविर्भावः प्रथमं फलम्। तत ऊर्ध्वमविद्याग्रन्थेर्विकीर्णत्वं हृदयग्रन्थेर्भेदः संशयच्छेदः कर्मक्षयो हर्षशोकपरित्यागः कामप्रविलय आत्मन्येव क्रीडाऽऽत्मरतिरेव क्रिया कृतकृत्यत्वमानन्दित्वं चेत्येषा फलपरम्परा। **को विषयः किं फलमित्यनयोरुत्तरमुक्तम्।**

अथ **कः संबन्ध** इत्यस्योत्तरमुच्यते—ज्ञानकाण्डस्य कर्मकाण्डेन सह साध्यसाधनभावलक्षणः संबन्धः। ज्ञानं साध्यम्। कर्माणि तु संस्कारकत्वेन वा विविदिषोत्पादनेन वा ज्ञानस्य साधनानि। संस्कारकत्वमेवं **स्मर्यते**—"यस्यैते चत्वारिंशत्संस्काराः स ब्रह्मणः सायुज्यं सलोकतां जयति" इति। गर्भाधानं पुंसवनं सीमन्तो जातकर्म नामकरणान्नप्राशनं चौलमुपनयनं चत्वारि * वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः + पञ्च महायज्ञाः × सप्त पाकयज्ञाः = सप्त हविर्यज्ञाः * सप्त सोमयज्ञा इत्येवं चत्वारिंशद्भिः कर्मभिः पुरुषस्य चित्तं संस्क्रियते ज्ञा[illegible]। विविदिषाहेतुत्वं तु **वाजसनेयिभिराम्नायते**—"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इति।

विविदिषासंस्कारपक्षयोरवान्तरविशेषो **वार्तिकसारे** दर्शितः—

"जाता विविदिषाऽवश्यं संपाद्याखिलसाधनम्।
स्वफलं जनयेदाशु बुभुक्षादिर्यथा तथा॥

---

* १ प्राजापत्यम्. २ सौम्यम्. ३ आग्नेयम्. ४ वैश्वदेवम्. इति।
+ १ देवयज्ञः. २ भूतयज्ञः. ३ पितृयज्ञः. ब्रह्मयज्ञः. ५ मनुष्ययज्ञ इति।
× १ अष्टका. २ पार्वणः. ३ श्राद्धम्. ४ श्रावणी. ५ आग्रहायणी. ६ चैत्री. ७ आश्वयुजीति।
= १ अन्याधानाम्. २ अग्निहोत्रम्. ३ दर्शपूर्णमासौ. ४ आग्रयणम्. ५ चातुर्मास्यानि ६ निरूढपशुबन्धः. ७ सौत्रामणीति।
* १ अग्निष्टोमः. २ अत्यग्निष्टोमः. ३ उक्थ्यः. ४ षोडशी. ५ वाजपेयः ६ अतिरात्रः. ७ अप्तोर्याम इति।

---

१ ग. °थमफ°। २ ख. 'दृकत्वेन। ३ ख. ग. घ. °त्वं वा°।

प्रतिबन्धकपाप्मानं नाशयेच्चित्तसंस्कृतिः ।
साधनानि तु बोधस्य संपाद्यानि प्रयत्नतः ॥
वर्णाश्रमादिशास्त्रेण प्रेरितोऽकरणे भयम् ।
पश्यन्करोति यत्कर्म तत्संस्कारकमुच्यते ॥
तमेतमिति वाक्येन प्रेरितो बोधवाञ्छया ।
अन्तर्यामिण्यर्पयेद्यत्तत्स्याद्विविदिषाकरम् ॥
कर्मणा पितृलोकः स्यादित्येवं नित्यकर्मणाम् ।
फलमुक्तं तथाऽप्येतैर्वेदनेच्छाऽपि तच्छ्रुते ॥
नित्येषु शुद्धेः प्राधान्याद्भोगोऽप्यप्रतिबन्धकः ।
भोगं भङ्गुरमीक्षन्ते बुद्धिशुद्ध्यनुरोधतः ॥
काम्येष्वपि मुमुक्षुश्चेत्फलं देवे समर्पयेत् ।
एतद्भगवता प्रोक्तं कर्मबन्धनिवृत्तये ॥
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥
शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
कर्मण्येवाधिकारस्ते मा फलेषु कदाचन " ॥ इति ।

तस्मादीश्वरार्पितानि कर्माणि नित्यानि काम्यान्यपि वेदनेच्छां जनयन्ति । यद्यपि श्रुतिवाक्यैर्वेदनसौन्दर्येऽवगते सति तदिच्छोत्पद्यते तथाऽपि वेदनेऽरुचिः कर्मभिर्जन्यते । यथा क्षीरप्रियस्य पुरुषस्य पित्तरोगग्रस्तस्य सत्यामपि क्षीरेच्छायां मुखे रुचिर्नास्ति । सा रुचिः पुनरौषधक्रियया पित्तोपशमने सत्युत्पद्यते । तथा निःशेषदुःखोच्छेदं निरतिशयानन्दप्राप्तिहेतुत्वं ब्रह्मवेदनस्य श्रुतवतः सत्यामपि वेदनेच्छायां पापप्रतिबन्धाद्वेदनसाधनेषु श्रवणादिषु रुचिर्न जायते ।

तथा चाभिहितं पुराणे—

" महापापवतां नृणां ज्ञानयज्ञो न रोचते ।
प्रत्युत ज्ञानयज्ञस्तु प्रद्वेष्यो भासते स्वतः " ॥ इति ।

तस्मिंश्च ज्ञानप्रतिबन्धके महापापे परमेश्वरार्पितैः कर्मभिर्नाशिते सति श्रवणादौ रुचिरुत्पद्यते । सेयं रुचिरत्र विविदिषाशब्देनोच्यते । अतः परम्परया कर्माणि ज्ञानसाधनभावं प्रतिपद्यन्ते ।

---

१ क. ग. ङ. °मेऽथ प्र° ।

तच्च पारम्पर्यं **वार्तिकसारे** दर्शितम्—

" रुचिद्वारोपकुर्वन्ति कर्माण्यात्मविमुक्तये ।
अज्ञानस्याविरोधित्वान्न साक्षादात्मबोधवत् ॥
अविद्याया न चोच्छित्तौ ज्ञानादन्यदपेक्ष(क्ष्य)ते ।
ज्ञानोत्पत्तौ तु नैवान्यच्छमादिभ्यो ह्यपेक्ष(क्ष्य)ते ॥
शमाद्युत्पत्तये नान्यद्बुद्धिशुद्धेरपेक्ष(क्ष्य)ते ।
बुद्धिशुद्धौ च नित्यादिकर्मभ्यो नान्यदिष्यते ॥
पारम्पर्येण कर्मैवं वेदनायोपयुज्यते ।
साधनं कर्म तेनैतत्साध्यं ब्रह्मात्मवेदनम् ॥
इत्येवमभिसंबन्धः कर्मविज्ञानकाण्डयोः ।
इतोऽन्यथाऽपि संबन्धे न किंचिन्मानमीक्ष्यते " ॥ इति ।

अत्रैतं यथोक्तं संबन्धमसहमानाः प्रतिवादिनो बहुधोत्तिष्ठन्ति । तेषां मध्ये केचिद्ब्रह्मज्ञाननैरपेक्ष्येणैव मोक्षं वर्णयन्ति । अन्ये ज्ञानकर्मसमुच्चयेन मुक्तिं ब्रुवते । अपरे ज्ञानस्यैव मुक्तिहेतुत्वमङ्गीकृत्यापि सोपानपङ्क्तिन्यायेन वा कामप्रविलापनेन वा प्रपञ्चलयेन वा कर्मकाण्डस्योपयोगमिच्छन्ति । तत्र ज्ञाननैरपेक्ष्यवादिनां मतं **वार्तिकसारे** दर्शितम्—

" निषिद्धस्य निरस्तत्वान्नारकीं नैत्यधोगतिम् ।
नित्यानुष्ठानतश्चेमं प्रत्यवायो न संस्पृशेत् ॥
आगामिजन्मनोऽसत्त्वे निर्विघ्नं स्वास्थ्यमिष्यताम् ।
शरीरारम्भकं कर्म भोगेन क्षीयते ततः ।
विनाऽप्येकात्मसंबोधान्मुक्तिः सिद्धाऽन्तरात्मनः " ॥ इति ।

अस्य पक्षस्य दूषणमपि तत्रैवोक्तम्—

" सूक्ष्मापराधसंदृष्टेरतियत्नवतामपि ।
निषिद्धकाम्ये निःशेषं वर्जयेन्निपुणोऽपि कः ।
मुमुक्षुः पापकाम्ये द्वे वर्जयेदिति चोदना ।
नास्ति वेदे क्वचिद्येन वचसा तत्प्रकल्प्यते ॥
काम्यादिवर्जनं त्वेतत्स्वकपोलप्रकल्पितम् ।
अतः प्रामादिकात्काम्यान्निषिद्धाच्च पुनर्जनिः ॥
नित्यस्य फलमिष्टं चेदुपात्तदुरितक्षयः ।

---

१ ख. °नमिष्यते २ ग. ब. °थोक्तसं° । ३ ग °हुधा तिष्ठ° । ४ ख. °मर्पणिका° ।

तथाऽपि काम्यपुण्यानां क्षयो नादुरितत्वतः ॥
उपपातकमल्पं चेत्क्षीयतां नित्यकर्मणा ।
अनन्तदेहहेतूनां हत्यादीनां कुतः क्षयः ॥
नित्यकर्मभिरप्यस्ति स्वर्गः काम्याग्निहोत्रवत् ।
आपस्तम्बेन तत्प्रोक्तमाम्रवृक्षनिदर्शनात् ॥
फलार्थे निर्मिते त्वाम्रे छायागन्धाववारितौ ॥
तथा वर्णाश्रमाचारादनुगच्छेत्त्रिविष्टपम् ।
निषिद्धकाम्यनित्यानि पूर्वजन्मसु चात्र च ॥
कृतानि सन्त्यनेकानि स्वास्थ्यं तत्राऽऽत्मनः कुतः ।
ऐकात्म्यबोधतः कर्मक्षयं चेदात्थ तर्हि ते ॥
निर्विघ्ना मुक्तिरस्त्येवं ममेव न हि संशयः " इति ।
अरे मन्वते मोक्षे ज्ञानकर्मसमुच्चयम् ॥
प्रधानगुणभावेन त्रिविधोऽसौ समुच्चयः ।
ज्ञानं प्रधानं केषांचिदन्येषां कर्ममुख्यता ॥
समप्राधान्यमुभयोरपरेषां मते स्थितम् ।
एकदेशे चैककाले स्थितयोरविरुद्धयोः ॥
समुच्चयः फलैक्ये स्यान्न त्वसौ ज्ञानकर्मणोः ।
बाध्यबाधकभावेन पञ्चास्योरणयोरिव ॥
एकदेशानवस्थानान्न समुच्चय एतयोः ।
साध्यसाधकरूपत्वादेककालानवस्थितिः ॥
हेतुस्वरूपकार्येषु विरोधस्त्वनयोः स्फुटः ।
अध्यासः कर्मणो हेतुः प्रमाणं बोधकारणम् ॥
न भासकं कर्मरूपं बोधरूपं तु भासकम् ।
कर्मकार्यं भावि जन्म तन्निवृत्तिस्तु बोधजा ॥
समुच्चयो दुर्लभोऽतस्तेन मुक्तिः कथं भवेत् ।
सोपानपङ्क्तिगत्येव हर्म्यपृष्ठाधिरोहणम् ॥
अशेषकर्मक्रमतोऽधिकारं केचिदूचिरे ।
संध्यावन्दनमारभ्य क्रमानुष्ठितकर्मभिः ॥
सहस्रवर्षसत्रान्तैर्ज्ञानितामधिरोहति ।
यथैव नगराभ्यस्थग्रामगत्युपदेशनम् ॥

---

१ क. ख. ग. °यते नि° । २ घ. °धारू° । ३ घ. ङ. °ष्ठादिरो° ।

नगराध्वोपदेशस्य शेषत्वं प्रतिपद्यते ।
तथैव मोक्षमार्गस्थस्वर्गादिगतिभाषणम् ॥
मोक्षमार्गोपदेशस्य शेषत्वं किं न गच्छति ।
यद्वोपच्छन्दनार्थानि स्वर्गादीनि विमुक्तये ॥
नगरासौ तदध्वस्थग्रामादिगुणगीरिव ।
एवं च सति दृष्टेन द्वारेणैवोपकारिणः ॥
आत्मज्ञानाधिकारार्था विधयः सकला अपि ।
मैवं ग्रामगतेः पुंसामध्वत्वादस्तु शेषता ॥
स्वयमेव पुमर्थत्वात्स्वर्गादेः शेषता कथम् ।
यदुपच्छन्दनार्थत्वं नृवाक्ये तत्समञ्जसम् ॥
वेदेषु वक्तृराहित्यादभिप्रायाद्यसंभवः ।
यद्वा तत्रैव तात्पर्यं यत्रोपच्छन्द्य नीयते ॥
ततश्च विधितात्पर्यं स्वर्ग एव न मोक्षणे ।
दृष्टद्वारं च रागादिप्रवृत्तिप्रतिषेधनम् ॥
यदि तर्हि निषेधेषु द्वारं भवतु तत्तथा ।
विधयस्तु निरुन्धन्ति न रागं रागहेतवः ॥
वर्धयन्ति प्रत्युतामी रागं भोगप्रदानतः ।
अशेषकर्मानुष्ठानमल्पायुषि न संभवेत् ॥
सोपानपङ्क्तिन्यायोऽतो मन्दबुद्धिप्रकल्पितः ।
अन्ये त्वाहुर्न शक्नोति कामसंदूषिताशयः ॥
द्रष्टुं तत्परमद्वैतं सर्वकामासमाश्रितः ।
कर्मभिर्विविधैर्धीमान्स विराडाद्युपासनैः ॥
वैराजान्तं फलं भुक्त्वा तदैकात्म्यं प्रपद्यते ।
सर्वभोगोपभोगेन कृत्स्नकामलयाध्वना ॥
यान्ति मुक्तेरानुगुण्यं कर्माणि निखिलान्यपि ।
ब्रह्मानन्दो मतोऽप्यत्र चित्तेनाविषयीकृतः ॥
दृष्टानन्दाभिलाषं स न मन्दीकर्तुमप्यलम् ।
[illegible] विधयः कर्मकाण्डगाः ॥
प्रलीनकामो विज्ञानकाण्डेऽधिक्रियते पुमान् ।
मैवं न कामसंप्राप्त्या तन्नाशोऽब्दशतैरपि ॥

---

१ ग. °वत्रा° । २ क. ङ. ङ °यादसं° । ३ क. ख. ग. ङ. °त्तनाद्यु° ।

तत्सेवातो विवृद्धिः स्यान्निवृत्तिर्दोषदर्शनात् ।
न जातु कामः कामानामुपभोगेन शाम्यति ॥
हविषा कृष्णवर्त्मेव भूय एव विवर्धते ।
गुणस्यादर्शनाद्दोषदृष्टेर्वा क्षीणकामतः ॥
सर्वक्लेशोपशान्त्यर्थमात्मज्ञानं समाश्रयेत् ।
कामाश्रितो विधिः कामं दोषवन्न विलापयेत्[1] ॥
कामुकः सन्प्रवर्तेत नाऽऽत्मज्ञाने कदाचन ।
उद्विजेताथ वा ज्ञानात्सर्वपुंभोगघस्मरात् ॥
तथाच रागिगीतायां पठ्यते वचनं त्विदम् ।
अपि वृन्दावने शून्ये[2] सृगालत्वं स इच्छति ॥
न तु निर्विषयं मोक्षं कदाचिदपि गौतम ।
वैराजान्तं फलं भुक्त्वा मुच्येतेति यदीरितम् ॥
क्रममुक्तौ तत्तथाऽस्तु न तु सद्योविमोचने ।
द्वारं न नियतं मुक्तेः प्राजापत्यं पदं भवेत् ॥
न ह्युपाधिषु तत्त्वस्य विशेषः कश्चिदीक्ष्यते ।
नाऽऽकाशस्य विशेषोऽस्ति कुम्भद्रोण्याद्युपाधिषु ॥
दूरान्तिकादिभिन्नेषु कल्पिताकल्पितेष्वपि ।
अतः प्रजापतौ तत्त्वं किमौ वा न विशिष्यते ॥
तर्कादागमतश्चापि तद्यो य इति हीदृशात् ।
प्रत्यबुध्यत देवानां मध्ये यो यः स एव तत् ॥
अभवन्नान्य इत्याह श्रुतिर्वैषम्यवारिणी ।
एको देवः सर्वभूतेष्विति चाऽऽहापरा श्रुतिः ॥
अतश्चोपाधिवैषम्यान्नाऽऽत्मतत्त्वं विशिष्यते ।
सद्योमुक्तिं वाञ्छतोऽतो दोषदृष्ट्या विलीयते ॥
कामोऽतः कर्मकाण्डस्य तात्पर्यं नैव तल्लये ।
अन्ये तु मन्वते केचिद्गम्भीरन्यायवेदिनः ॥
भेदस्य विलयो वेदे गम्यते कस्यचित्क्वचित् ।
देहात्मभावविलयः स्वर्गकामपदे खलु ॥
देहाद्भिन्नोऽधिकार्यत्र स्वर्गभोग्येऽवगम्यते ।
रागाद्युत्थप्रवृत्तीनां निषेधेषु लयोऽञ्जसा ॥

---

१ क. ङ. विचालयेत् । २ ख. 'न्ये शृगा' ।

विधिष्वपि लयस्तासां कार्यान्तरनियोगतः ।
लोकेऽपि चानभिप्रेतात्पथः साक्षान्निवारणम् ॥
मार्गान्तरोपदेशाद्वा वेदेऽप्येवं प्रतीयताम् ।
एवं रागादिहेतूत्थप्रवृत्तिलयवर्त्मना ॥
आत्मज्ञानाधिकारार्था निःशेषा विधयः स्थिताः ।
मैवं किं भेदविलयो विधीनां फलकाङ्क्षया ॥
तात्पर्याद्वाऽऽत्मबोधस्य हेतुत्वाद्वाऽवकल्प्यते ।
नाऽऽद्यस्तावद्यतोऽशेषा न कर्मविधयः फलात् ॥
स्वशाक्यावगतार्त्तिंकचिदपेक्षन्ते फलान्तरम् ।
तात्पर्ये च विधीनां स्यात्कर्मानुष्ठान एव हि ॥
अन्तरेण ह्यनुष्ठानं स्वर्गपश्वाद्यसंभवात् ।
श्रुतेर्विलयतात्पर्ये फलमाकस्मिकं भवेत् ॥
फलार्थो चेल्लयो न स्यान्नोभयं वाक्यभेदतः ।
श्रुतेऽपि स्वर्गतात्पर्ये कल्पना चेल्लयेऽर्थतः ॥
तन्न प्रत्यक्षवचनाद्देहादिलयसिद्धितः ।
साक्षाद्धस्तिनि दृष्टे हि नहि हस्तिपदानुमा ॥
अस्थूलादिवचः साक्षाद्देहादिप्रतिषेधकृत् ।
नाऽऽत्मबोधोऽपि देहस्य लयाद्भवति कुत्रचित् ॥
अलयेऽप्युपपन्नत्वाल्लये सुप्तावदीक्षणात् ।
गुरुशास्त्राद्यविलये बोधोऽयमुपपद्यते ॥
लयमात्रेण चेद्बोधः सुप्तौ केन निवार्यते ।
सर्पाभासलयेऽपीयं रज्जुस्तमसि नेक्ष्यते ॥
प्रत्युताऽऽभाससर्पोऽयं लीयते रज्ज्ववेक्षणात् ।
अथ प्रपञ्चनाशेन नाश्यते भेदकारणम् ॥
मैवं न कार्यनाशेन कारणं नश्यति क्वचित् ।
कारणं किमविद्या स्याद्वस्तु वा तत्त्वबोधतः ॥
अविद्यानाशनात्तत्र प्रपञ्चविलयोऽफलः ।
वास्तवोऽयं प्रपञ्चश्चेत्स विलाप्यो न केनचित् ॥
अन्यथा स्वात्मतत्त्वस्य विलयः केन वार्यते ।
किंच कृत्स्नस्य विलयः कर्तुं शक्यो न जन्मभिः ॥

---

१ ग. स्मृताः । २ क. ख. ग. °यमिच्छतः । ३ क. ङ. चोद्बोधः । ४ ग. घ. नैवं ।

लेशस्तु लीयते स्वापे स्वत एव न शास्त्रतः ।
किंच भावी न चोच्छेद्यो भूतोऽप्युपरतः स्वतः ॥
प्रपञ्चो वर्तमानस्तु कार्यत्वान्नश्यति स्वतः ।
किंच भेदलयेनैव सर्वानर्थप्रहाणतः ॥
पुरुषार्थस्य संसिद्धेर्विद्यानैष्फल्यमापतेत् ।
अत ऐकात्म्ययाथात्म्यज्ञानादज्ञानहानतः ॥
सिद्धे पुमर्थे विलयकल्पना निष्प्रयोजना ।
इष्टसाधनता बोध्या विधिभिः सकलैरपि ॥
अनिष्टसाधनत्वं तु निषेधैरिति हि स्थितिः ।
तस्मात्कामलये भेदलये सोपानवर्त्मनि ॥
समुच्चये च संबन्धो न युक्तः काण्डयोर्द्वयोः ।
परिशेषात्पुरा प्रोक्तः साध्यसाधनलक्षणः ॥
संबन्धोऽत्रावगन्तव्यो ज्ञानकर्माख्यकाण्डयोः" ।

को विषयः किं फलं कः संबन्ध इत्येतेषां त्रयाणामुत्तरमुक्तम् ।

अथ **कोऽधिकारवा**नित्यस्योत्तरमुच्यते—अत्रेदं चिन्त्यते, किं चिकीर्षोरुपनिषद्यधिकारः किंवा जिज्ञासोरिति । चिकीर्षोरिति तावत्प्राप्तम् । कुतः । वेदान्तानां कार्यपरत्वात् । विमता वेदान्ताः कार्यपरा वेदभागत्वात्कर्मकाण्डवत् । ननु कर्मकाण्डस्यापि प्रमाणत्वाद्बोधकत्वमेव न तु कारकत्वम् । कर्मकाण्डाभिज्ञानामपि बहूनां कर्मसु प्रवृत्त्यदर्शनात् । नायं दोषः । नदीप्रवाहवेगवत्प्रबलवायुवच्च चोदनाभावेऽपि ममेदं कर्तव्यमितिबुद्धयुत्पादनेन राजाज्ञादिवत्प्रवर्तकत्वात् । अत एव **भाष्यकारैः प्रथमसूत्रेऽ**भिहितम्—"या हि चोदना धर्मस्य लक्षणं सा स्वविषये नियुञ्जानैव पुरुषमवबोधयति" इति । बहूनामप्रवृत्तिस्त्वश्रद्धाद्रव्यराहित्यादिप्रतिबन्धवशादुपपद्यते । अतः कर्मकाण्डवद्वेदान्तानामपि सिद्धार्थे[1] पर्यवसानाभावाच्चिकीर्षोरेवात्राधिकारः । तस्माच्चित्तनिरोधं प्रतिपत्तिं प्रसंख्यानं वा यः कर्तुमिच्छति तस्यैव चोपनिषद्यधिकारः न तु जिज्ञासुत्वधर्ममात्रेणेत्येवं प्राप्तेऽत्राभिधीयते । वेदान्तानां कार्यपरत्वं कुत इति वक्तव्यम् । किं सिद्धार्थे व्युत्पत्त्यभावात्किंवा सत्यामपि व्युत्पत्तौ प्रयोजनाभावादाहोस्वित्कार्यव्यतिरिक्तप्रमेयस्यासंभवात्[3] । नाऽऽद्यः । वृद्धव्यवहारे गामानयेत्यत्र यथा कार्येषु व्युत्पत्तिस्तथा पुत्रस्ते जात इत्यत्र सिद्धे व्युत्पत्तिदर्शनात् । अत्र च **पूर्वाचार्यै**र्बहुभिः पराक्रान्तम् । नापि द्वितीयः । ब्रह्मात्मतत्त्वाविर्भावमुपक्रम्य कृतकृत्यत्वानन्दाभिव्यक्तिपर्यन्तायाः प्रयोजनपरम्परायाः प्रपञ्चितत्वात् । नापि तृतीयः । चिदात्मनस्तत्प्रमेयत्वात् ।

---

१ ग. °म् । वे° । २ क. सिद्धान्ते । ३ घ. °र्थे व्यु° । ४ ग. °ह्मात्मावि° ।

अत **एवोक्तम्**—

" न मेयाभावशङ्काऽस्ति सर्वव्यावृत्तिसाक्षिणः ।
चिदात्मनोऽपलापे तु जगदान्ध्यप्रसङ्गतः " ॥ इति ।

न च कर्मकाण्डस्यापि कृत्स्नस्य कार्यपरत्वमस्ति । ब्राह्मणो न हन्तव्य इत्यादिषु निषेधेष्वनुष्ठेयस्य कस्याप्यभावात् । एवमर्थवादादीनामपि देवताविग्रहादौ सिद्धार्थे तात्पर्यमुदाहरणीयम् । एतच्च **देवताधिकरणे** प्रपञ्चितम् । अतो वेदान्तानां कार्यपरत्वाभावान्न चिकीर्षोरत्राधिकारः । इत्थं वेदान्तानां कार्यपरत्वे निराकृते सति विरोधवादिनः पुनः प्रत्यवतिष्ठन्ते । चिदात्मा न वेदान्तैर्बोधनीयस्तस्यान्वयव्यतिरेकसिद्धत्वात् । जाग्रत्स्वप्नसुषुप्तेषु परस्परव्यावृत्तेषु चिदात्मा तत्रानुवृत्तोऽनुभूयते । अनुवृत्तं व्यावृत्ताद्भिन्नमिति जातिव्यक्त्यादौ दृष्टम् । यथा **विश्वामित्रकठकौण्डिन्यव्यक्तिषु** ब्राह्मणत्वं दृष्टम् । अतोऽन्वयव्यतिरेकाभ्यामेव चिदात्मा सिद्धः ।

एतदेवाभिप्रेत्य **वार्तिकसारेऽ**भिहितम्—

" मानान्तरेण तत्सिद्धेर्नात्र व्याप्रियते वचः ।
वासनानां निरोधेऽतः पुमाञ्श्रुत्या नियुज्यते ॥
अनिरोधे वासनानामन्त्यकालेऽनुवर्तनात् ।
भाविजन्मानिवार्यं स्यादन्त्यप्रत्ययकारितम् ॥
यं यं वाऽपि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥
जाग्रत्स्वप्नसुषुप्त्याख्या या अनात्मार्थवासनाः ।
निरोधनीयास्ताः सर्वा बिभ्यता भाविजन्मतः ॥
अनात्मप्रत्ययानन्तरितस्वात्मैकभावना ।
कार्या तया निरुध्यन्ते वासना जन्महेतवः ॥
उपासीत स्वमात्मानमिति साक्षाद्विधिः श्रुतः ।
तस्याङ्गभावसिद्ध्यर्थं चिदात्माऽनूद्यते श्रुतौ ॥
आत्मैकप्रत्ययो यावत्स्वभावात्संततो भवेत् ।
कुर्यादुपासनं तावत्क्षीयन्ते वासनास्ततः ॥
अन्यदृष्ट्या जाग्रदाद्याः कल्पन्तां क्षीणवासने ।
विदुष्ययं स्वदृष्ट्या तु स्वात्मनोऽन्यन्न पश्यति ॥
देहं विनश्वरमवस्थितमुत्थितं वा
सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपम् ।

---

१ ङ. °न्मनः । ज° । २ क. ख. घ. ङ. कल्प्यन्तां ।

दैवादुपेतमथ दैववशादपेतं
वासो यथा परिकृतं मदिरामदान्धः ॥
तस्मादशेषवेदान्ता वासनानां निरोधने ।
नियुञ्जते हि पुरुषमात्मोपासनमार्गतः ॥
अथवा मनसो रोधे मुमुक्षुं संनियुञ्जते ।
तस्मिन्निरुद्धे निखिला निरुध्यन्ते हि वासनाः ॥
तावन्मनो निरोद्धव्यं यावद्धृदि गतं क्षयम् ।
इति श्रुतिर्मनोरोधं विदधाति विमुक्तये ॥
पातञ्जलं योगशास्त्रं मनोरोधे समापितम् ।
प्रवृत्तिर्मनसो बन्धस्तन्निवृत्तिर्विमुक्तता ॥
वासनामात्रहेतुत्वादात्मनोऽनर्थसंगतेः ।
अन्योपायोऽस्तु वा मा वा निरोधादेव मुक्तता ॥
स्वयंज्योतिःस्वभावत्वान्निरुद्धस्वान्तवासनः ।
प्रमान्तरानपेक्षोऽपि स्वयमात्मा प्रकाशते ॥
एवं कार्यमुखेनैव ज्योतिष्टोमादिवाक्यवत् ।
वेदान्तानां प्रमाणत्वं नाक्षवद्धस्तुनीष्यते ॥
इति व्याचक्षते मन्दा [illegible]गिणः ।
नैतत्साध्वभ्यधाय्यत्र नियोगस्यानपेक्षणात् ॥
कामितार्थस्य संसिद्धेर्लौकिकादेव मानतः ।
वैदिकेन नियोगेन किं कार्यं वद बुद्धिमन् ॥
मनसो वासनानां च भावेऽनर्थोऽस्तु जाग्रति ।
तदभावे सुषुप्तादावनर्थो नैव वीक्ष्यते ॥
अन्वयव्यतिरेकाभ्यां निरोधोऽनर्थवारणे ।
उपाय इति विज्ञातः किमपूर्वं विधीयते ॥
उपासनाचित्तरोधौ विधेयावुदितौ त्वया ।
तौ स्तां तथैव बोधस्य हेतुत्वेनाभ्युपैमि तौ ॥
लौकिकव्यवहारेषु प्रवृत्ता धीरुपासनात् ।
अन्तर्मुखा सती स्वात्मविचारक्षमतां व्रजेत् ॥
शब्दस्पर्शादिरहितमात्मानं स्थूलधीर्न हि ।
द्रष्टुं शक्नोति सौक्ष्म्यार्थं धीनिरोधो विधीयताम् ॥
एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मयेति श्रुतेर्वचः ॥

ब्रह्मात्मबोधहेतुत्वं वासनाधीनिरोधयोः ।
मानान्तरानधिगतं तेनास्तु विधिरेतयोः ॥
ज्ञानेऽधिकारसिद्धिः स्यादुपासाधीनिरोधतः ।
सिद्धेऽधिकारे पश्चात्तु वेदान्ता आत्मबोधिनः ॥
अतोऽत्र वासनारोधे धीरोधे वा चिकीर्षया ।
न वेदान्तेऽधिकारः स्यात्किंतु तत्त्वबुभुत्सया ॥
चित्ततद्वासनारोधतात्पर्येऽत्र निराकृते ।
प्रतिपत्तिविधौ शास्त्रतात्पर्य [illegible] ॥
आत्मा द्रष्टव्य इत्येवं प्रतिपत्तिविधिः श्रुतः ।
कोऽसावात्मेति वीक्षायां सर्वमात्मेति वर्ण्यते ॥
सत्यज्ञानादिवाक्यानि तत्त्वमस्यादिकान्यपि ।
विधिशेषतया ब्रह्म स्वात्मत्वेनार्पयन्ति हि ॥
एवं विधिमिहेच्छन्ति विध्ययोगेऽपि वस्तुनि ।
विधिरागवशात्केचित्तान्प्रतीदमिहोच्यते ॥
किमैकात्म्यं विधेयं स्यात्किंवा तद्दर्शनं वद ।
नाऽऽद्योऽस्य नित्यसिद्धत्वात्पुंव्यापारानपेक्षणात् ॥
दर्शनं च प्रमाणेन जन्यते न त्वनुष्ठितेः ।
चक्षुषा दृश्यते रूपं नानुष्ठित्या कदाचन ॥
समन्वयस्य सूत्रे हि **पूर्वाचार्यै**रिति स्फुटम् ।
निराकृतो विधिर्बोधे पुंव्यापाराप्रवेशनात् ॥
तस्माद्द्रष्टव्य इत्येष प्रतिपत्तिविधिर्नहि ।
बहिर्मुखत्वव्यावृत्तिर्विधेयार्हार्थताऽथवा ॥
आत्मबोधो वेदवाक्यजन्यो न तु विधिं स्पृशेत् ।
किं त्वैन्द्रियकविज्ञानमिव सिद्धार्थनिष्ठितम् ॥
एवं च सति वेदान्ता ब्रह्मतत्त्वमलौकिकम् ।
प्रबोधयन्ति विध्वस्तनिखिलद्वैतमव्ययम् ॥
ऐकात्म्यवस्तुयाथात्म्यप्रकाशनपटीयसः ।
वचसस्त्वतिरेकेण किं मानं तद्धुरं वहेत् ॥
शाब्दज्ञानविधावेवं वेदान्तेषु निराकृते ।

---

१ ङ. °सिद्धित्वा° । २ ग. °र्हार्थतोऽथ° । ३ घ. °ष्टितः । ए° । ४ ङ. हरेत् । ५ ङ. °त् । शब्द° ।

अपरे पण्डितंमन्या विध्यन्तरमिहोचिरे ॥
अन्योऽप्यनुभवोपायो मननध्यानलक्षणः ।
सोपायो विहितोऽस्त्येव प्रतिपत्तिविधिं विना ॥
उपायाः शान्तिदान्त्याद्यास्तेषु सत्सु निरन्तरम् ।
अविक्षेपेण मननं ध्यानं वा सुकरं भवेत् ॥
अवान्तरमहावाक्यरूपात्सिद्धावबोधकात् ।
शास्त्राद्ब्रह्मात्मतामादौ पुरुषः प्रतिपद्यते ॥
तत्त्वे शास्त्रात्प्रपन्नेऽपि पारोक्ष्यानपहारतः ।
तत्साक्षात्करणायैव प्रसंख्यानं विधीयते ॥
आवृत्तिर्हि प्रसंख्यानं शब्दयुक्त्योरिदं त्विह ।
मननध्यानरूपत्वात्साक्षात्कारयितुं क्षमम् ॥
श्रवणं शाब्दविज्ञाने यथोपायस्तथा द्वयम् ।
अनुभूतौ च मननं निदिध्यासनमित्यदः ॥
तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत तत्त्ववित् ।
इत्यादिना प्रसंख्यानं विधेयमनुभूतये ॥
एवमैकात्म्यतात्पर्ये शास्त्रस्येष्टेऽपि युक्तिभिः ।
केचित्कार्यमपीच्छन्ति तदेतन्नैव युज्यते ॥
किमात्मभानायाभ्यास आपरोक्ष्याय वाऽथवा ।
व्यवधानापनुत्त्यर्थं मानजन्यफलाय वा ॥
मानलोपस्य शङ्कापनुत्त्यर्थं वोत मुक्तये ।
सर्वथाऽपि प्रयासस्ते विध्यर्थोऽत्यन्तनिष्फलः ॥
प्रमात्रादित्रयं यस्मात्संविन्मात्रवपुर्भृतः ।
भाति पूर्वमभातं सत्तद्भाने किमपेक्षते ॥
अहंकारः प्रमाता स्याद्धीवृत्तिर्मानमुच्यते ।
घटादिकं प्रमेयं स्याच्चिद्भासा भाति तत्त्रयम् ॥
परोक्षमपि देहादि यस्य भासाऽऽपरोक्ष्यवत् ।
विभात्यात्मैव तस्य स्यादापरोक्ष्यमहेतुकम् ॥
अज्ञानमपि निःशेषप्रमेयव्यवधानकृत् ।
येनाव्यवहितं भाति तत्केन व्यवधीयते ॥
स्वमहिम्नैव यत्सिद्धं तत्तमो हन्ति शास्त्रधीः ।
किं ततोऽन्यत्फलं मानजन्यं यद्विधितो भवेत् ॥

---

१ ग. °त्सिद्धत्व° । २ घ. वा । भान° ।

मात्रादित्रयलोपेऽपि लोपसाक्षितयेक्ष्यते ।
योऽसावलुप्तचैतन्यस्तल्लोपः शङ्क्यते कथम् ॥
ऐकात्म्यस्य स्वतो मुक्तेरज्ञानात्तस्य बद्धता ।
ज्ञानादज्ञानहानौ स्यात्किमपेक्ष्यं विमुक्तये ॥
परोक्षत्वेन शास्त्रेण बुद्धं न त्वनुभूयते ।
प्रसंख्यानमतोऽपेक्ष्यमिति चेद्युज्यते न तत् ॥
मेयस्वभावात्पारोक्ष्यं किंवा शब्दस्वभावतः ।
आद्ये किं ब्रह्मता तत्र परोक्षा स्यादुताऽऽत्मता ॥
यत्साक्षादपरोक्षं तद्ब्रह्मेति ब्रह्मणः श्रुतौ ।
मुख्यापरोक्ष्यमुदितं पारोक्ष्यं शङ्क्यते कुतः ॥
आत्मनस्तत्र पारोक्ष्यं पूर्वमेव निराकृतम् ।
शब्दः स्वयमुदासीनः परोक्षत्वापरोक्ष्ययोः ॥
देशादिभिर्व्यवहितं पारोक्ष्येणावबोधयेत् ।
इतरत्वापरोक्ष्येण दशमस्त्वमसीतिवत् ॥
देशात्कालाद्वस्तुतो वा व्यवधानं मनागपि ।
ऐकास्म्यवस्तुनो नास्ति तत्र पारोक्ष्यधीः कुतः ॥
तमोमात्रान्तरायत्वादैकात्म्याख्यस्य वस्तुनः ।
असाध्यसाधने तस्मिन्काऽपेक्षा भावनां प्रति ॥
ननु विज्ञाय कुर्वीत प्रज्ञामित्यनुशासनात् ।
कर्तव्या भावनेत्येवं यदि ब्रूषेऽस्तु भावना ॥
नैतावताऽवकाशोऽस्ति त्वन्मतस्यात्र कश्चन ।
नैवानुभूतिसिद्ध्यर्थमिदं श्रौतानुशासनम् ॥
विज्ञायेत्यनुभूतिं तां वाक्यजन्यामुपेत्य तु ।
विदधाति तदैकाग्र्यं बहिश्चित्तनिवृत्तये ॥
विवक्षितोपयोगोऽत्र वाक्यशेषेण वर्णितः ।
नानुध्यायाद्बहूञ्शब्दान्वाचो विग्लापनं हि तत् ॥
किं बहूक्त्याऽत्र वेदान्ता बोधमात्रावसायिनः ।
बुभुत्सोरधिकारोऽतश्चिकीर्षोस्तु न कस्यचित् " इति ॥

इत्थमुपनिषदो विषयप्रयोजनसंबन्धाधिकारिणो निरूपिताः । " अधिकारिणः प्रमितिजनको वेदः " इति न्यायेनेयमुपनिषद्बुभुत्सोर्ब्रह्मात्मतत्त्वे प्रमितिं जनयति । न

१ ग. °स्य विदिति ।

वोपनिषदः प्रामाण्ये विवादितव्यम् । तत्प्रामाण्यस्य स्वतस्त्वङ्गीकारादप्रामाण्ये कारणाभावाच्च । किमबोधफलकत्वादप्रामाण्यमुत बाधितत्वाद्बोधानुवादकत्वात् । नाऽऽद्यः । सत्यं ज्ञानमनन्तं ब्रह्मेत्याद्यवान्तरवाक्यानामयमात्मा ब्रह्मेति महावाक्यानां च श्रवणमात्रेण बोधोपलम्भात् । नन्वात्मा ब्रह्मेतिपदयोरर्थौ लौकिकावलौकिकौ वा । नाऽऽद्यः । वेदस्यानुवादकत्वप्रसङ्गात् । द्वितीये संबन्धग्रहणासंभवादबोधकत्वम् । अथोच्येत । पदार्थयोर्लौकिकत्वेन संबन्धग्रहणम् । वाक्यार्थस्य लौकिकत्वाभावादननुवादकत्वम् । एतदेवाभिप्रेत्य **धर्ममीमांसायां** निर्णीतम्—"लोकावगतसामर्थ्यः शब्दो वेदेऽपि बोधकः" इति । तदसत् । वाक्यार्थस्य दुर्निरूपत्वात् । किं संसर्गो वाक्यार्थः किंवा विशिष्ट उताखण्डैकरसः । [illegible]न्वयवादिनो **भट्टाः** पदैरभिहितानां पदार्थानां संसर्गं वाक्यार्थमाहुः । अन्विताभिधानवादिनस्तु **प्राभाकरा** योग्येतरविशिष्टं नियोगं वाक्यार्थमाहुः । एवमत्राप्यात्मब्रह्मणोः संसर्गस्याऽऽत्मविशिष्टब्रह्मणो वा वाक्यार्थत्वे सत्यपसिद्धान्तस्तव प्रसज्येत । त्वदभिमतस्याखण्डैकरसार्थस्यासिद्धेः । तर्ह्यखण्डैकरस एव वाक्यार्थोऽस्त्विति चेन्न दृष्टान्ताभावात् । । कथंचित्सत्यपि दृष्टान्ते हानोपादानराहित्येन पुरुषार्थाभावात् । किंचाखण्डैकरसत्वसिद्ध्यर्थं जगतो मिथ्यात्वे वेदस्यापि मिथ्यात्वादप्रामाण्यं स्यात् । अत्रोच्यते—त्वया हि दूष्यत्वेन परमतमनुवदितुमखण्डैकरसं वस्त्विति यद्वाक्यं प्रयुज्यते तस्यैव वाक्यस्य दृष्टान्तत्वमभ्युपेयम् । नहि तत्र संसर्गस्य विशिष्टस्य वा वाक्यार्थत्वम् । तथा सत्यदूष्यत्वप्रसङ्गात् । न खलु तदुभयं त्वया दूष्यते स्वमतत्वेन स्वीकारात् । तस्मादनुवादकैर्मखण्डैकरसं वस्त्विति वाक्यं तत्रैको दृष्टान्तः । **पूर्वाचार्या** अपि वर्णयन्ति—सत्यज्ञानादिवाक्यमखण्डार्थनिष्ठं लक्षणवाक्यत्वात्प्रकृष्टप्रकाशश्चन्द्र इतिवाक्यवत् । प्रकृष्टशब्देन नक्षत्रप्रकाशव्यावृत्तिः । प्रकाशशब्देन मेघादिव्यावृत्तिः । ततो बुभुत्सितं चन्द्रं(न्द्र)प्रातिपदिकार्थमात्रमखण्डमनेन वाक्येन बोध्यते । तथा तत्त्वमस्यादिवाक्यमखण्डार्थनिष्ठमकार्यकारणद्रव्यनिष्ठत्वे सति समानाधिकरणत्वात्सोऽयं देवदत्त इतिवाक्यवत् । परस्परविरुद्धाभ्यां तद्देशकालाभ्यामेतद्देशकालाभ्यामुपलक्षितस्य देवदत्तस्यैक्यस्य प्रतिपाद्यत्वादखण्डार्थत्वम् ।

वार्तिकसारेऽप्यखण्डार्थत्वं वाक्यस्य प्रतिपादितम्—

"प्रसिद्धात्मन्यात्मशब्दप्रयोगात्स हि लौकिकः ।
ब्रह्मार्थोऽपि महत्त्वेन प्रसिद्धे व्यवहारतः ॥
एवं पदात्परिज्ञाते पदार्थे लोकमानतः ।
वाक्यार्थोऽतीन्द्रियो वेदवाक्यात्केन निवार्यते ॥
अपूर्वदेवतास्वर्गपदार्थाल्लोकमानतः ।

---

१ ख. °धक° । २ म °फलाद् । ३ घ. भाट्टाः । ४ क, ख ङ. °कपरम° ।

व्युत्पाद्यालौकिकोऽप्यर्थो वाक्याद्बुद्धस्त्वया यथा।
यथाऽर्थवादादिवशात्स्वर्गाद्यर्थोऽवगम्यते॥
तर्ह्यवान्तरवाक्येन(ण) ब्रह्मार्थोऽप्यवगम्यताम्।
अप्रसिद्धपदार्थोऽपि प्रसिद्धार्थपदैः सह॥
समभिव्याहृतेर्बोद्धुं शक्यो मधुकरादिवत्।
अतो लोकानुसारिण्या व्युत्पत्त्याऽर्थोऽप्यलौकिकः॥
धर्मब्रह्मात्मकः सिध्येत्तत्र कस्मादमानता।
अन्यत्रेवात्र वाक्यार्थो नैव संसृष्टलक्षणः॥
विशिष्टलक्षणो वा स्यात्कित्वखण्डत्वलक्षणः।
ब्रह्मणोऽनात्मतारूपमब्रह्मत्वं तथाऽऽत्मनः॥
अज्ञानजं द्वयं द्वाभ्यां पदाभ्यां विनिवार्यते।
नेहान्यदात्मनो ब्रह्म न चाऽऽत्मा ब्रह्मणोऽन्यतः॥
तादात्म्यमनयोस्तस्मान्नीलोत्पलविलक्षणम्।
नीलत्वमुत्पलत्वं च अन्योन्यं व्यभिचारिणौ॥
आत्मब्रह्मत्वयोर्नास्ति व्यभिचारो मनागपि।
प्रत्यक्त्वमात्मता तद्वद्ब्रह्मत्वं चाद्वितीयता॥
द्वौ प्रत्यञ्चावसंभाव्यौ तत्रैकस्य पराक्त्वतः।
अतः प्रत्यक्त्वमेवैतद्द्वयत्वं न चेतरत्॥
तथाऽप्यविद्याविभ्रान्तिव्यावृत्त्यर्थं पदद्वयम्।
आत्माऽपि सदिदं ब्रह्म मोहात्पारोक्ष्यदूषितम्॥
ब्रह्मापि संस्तथैवाऽऽत्मा सद्वितीयतयेक्ष्यते।
आत्मा ब्रह्मेति पारोक्ष्यसद्वितीयत्वबाधनात्॥
अखण्डे निष्ठितं शास्त्रं पुरुषार्थे समीहिते।
हानोपादानराहित्येऽप्यपुमर्थो भवेन्न हि॥
इष्टप्राप्तेरनिष्टार्थनिवृत्तेश्चेह संभवात्।
त्वं ब्रह्मेति श्रुते वाक्ये सिध्यत्येवाप्रयत्नतः॥
अशेषानर्थविच्छेदो ब्रह्मानन्दोऽप्यनुत्तमः।
पुरुषार्थोपदेष्टृत्वाद्यद्वत्कार्ये प्रमाणता॥
तथैकात्म्ये विशेषाद्वा पुमर्थातिशयत्वतः।
न चैकात्म्याभ्युपायस्य मिथ्यात्वमिह चोद्यताम्॥

---

१ क. °द्वैतत्वं। २ ख. निश्चितं। ३ ग. °षार्थे स°। ४ ग. घ. समीहते।

कदा वेदस्य मिथ्यात्वं भवता ज्ञायते वद ।
ऐकात्म्यप्रतिपत्तेः प्राङ्न मिथ्यात्वमबाधनात् ॥
पुमर्थस्य समाप्तत्वादूर्ध्वं वेदेन किं तव ।
अज्ञातमपि मिथ्यात्वं प्रागस्त्येवेति तच्छृणु ॥
मानसत्यत्वमिथ्यात्वे न मात्वामात्वकारणे ।
सत्येनाप्यनुपायेन घटेनाग्निर्न मीयते ॥
असत्येनाप्युपायेन प्रतिबिम्बेन बिम्बधीः ।
तस्मादर्थावबोधित्वाद्दुष्टकारणवर्जनात् ॥
अबाधाच्च प्रमाणत्वं वस्तुन्यक्षादिवच्छ्रुतेः ।
ननु भेदाश्रितैर्वाक्यैर्विधायकनिषेधकैः ॥
अक्षादिभिश्च नैकात्म्यं बाधितत्वात्प्रमायुतम् ।
न चास्यैकात्म्यशास्त्रस्य तैर्विकल्पसमुच्चयौ ॥
यत एतावसंभाव्यौ क्रियायामिव वस्तुनि ।
व्रीहिभिर्वा यवैर्वेति यथा यागो विकल्प्यते ॥
नैवमेकमनेकं वेत्येतद्वस्तु विकल्प्यते ।
समुच्चितौ यथा दर्शपूर्णमासौ तथा न तु ॥
भिन्नाभिन्नात्मना वस्तु समुच्चेतुमिहार्हति ।
अत ऐकात्म्यमानस्य भेदमानस्य वा द्वयोः ॥
एकस्य बाधसंप्राप्तावैक्ये धीर्बाध्यतेऽन्यथा ।
नेह नानेति भेदानां निषेधो नान्यबाधकः ॥
वर्णादिग्रहणोपायप्रत्यक्षाद्युपजीवनात् ।
वर्णान्ग्रहीतुमर्थस्य व्युत्पत्त्यैवोपजीवति ॥
श्रुतिरक्षानुमाने द्वे प्रबलत्वं तयोस्ततः ।
निषेधविध्योर्यच्छास्त्रं चित्तशुद्ध्युपकारि तत् ॥
ऐक्यशास्त्रेणोपजीव्यं प्रबलं तेन तन्मतम् ।
तत्तु भेदाश्रयेणैव विधत्ते च निषेधति ॥
तस्मादभेदशास्त्रस्य बाधो विध्यादिशास्त्रतः ।
औपचारिकमैकात्म्यशास्त्रं कर्त्रात्मसंस्तवात् ॥
सावकाशं भवेद्यद्वा जपार्थमुपयुज्यते ।
भेदसाधनमक्षादिभेदादन्यत्र कुत्र वा ॥

१ क. ख. ङ. 'त्। एकशा° । २ ख. 'र्वादिसं° ।

सावकाशं ततस्तस्य बाधो नैकात्म्यशास्त्रतः ।
ऐकात्म्यबोधकत्वेऽपि वेदान्ता बाधितत्वतः ॥
अप्रामाण्यं भजन्तीति पूर्वः पक्षो व्यवस्थितः ।
उच्यते लोकतः सिद्धं भेदमाश्रित्य चोदना ॥
प्रवृत्ता पुरुषार्थाय न तु भेदावबुद्धये ।
आश्रयोऽप्यत्र यो भेदो मायिकोऽसौ न वास्तवः ॥
नेह नानेति शास्त्रात्तु वास्तवः प्रतिषिध्यते ।
आगमो मायिकं भेदं न निषेधति किं त्विमम् ॥
मायिको भेद इत्येवं प्रत्युत प्रतिपादयेत् ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥
इति माण्डूक्यशाखायां श्रुतिवाक्यमधीयते ।
प्रत्यक्षादिभिरप्यत्र भेदो भात्येष[1] मायिकः ॥
उपजीव्यः स एवातो नोपजीव्यविरोधिता ।
वास्तवे शुक्तिशकले मायिकं रजतं यथा ॥
भासते तद्वदेवेदमद्वैते भेदभासनम् ।
वास्तवे ब्राह्मणे स्वप्ने मायिकी शूद्रता यथा ॥
न विरुद्धा तथा भेदो नाद्वैतेन विरुध्यते ।
प्रत्यक्षादिप्रमाणानां प्रामाण्यं व्यावहारिकम् ॥
आश्रित्यायं प्रपञ्चः स्यादलीकोऽपि प्रमाणवान् ।
अद्वैतागमवाक्यं तु तत्त्ववेदनलक्षणम् ॥
प्रमाणभावं भजतां नातोऽन्योन्यविरोधिता ।
नायं शब्दः कुतो यस्माद्रूपं पश्यामि चक्षुषा ॥
इति यद्वत्तथैवायं विरोधोऽक्षजवाक्ययोः ।
विभिन्नविषयत्वेन विरोधासंभवे सति ॥
अबाधितत्वादैकात्म्यं प्रामाणिकमिति स्थितम् ।
ननु वेदान्तसिद्धान्तमजानन्तोऽपि वादिनः ॥
लौकिकाश्च स्वमात्मानं जानन्ति स्वस्वमानतः ।
मानं प्रत्यक्षमन्यद्वा यथायोग्यं भवेत्ततः ॥
ज्ञाँतात्मकथनादेते वेदान्ता अनुवादिनः ।
नैवाऽऽत्मनोऽन्यद्वस्त्वेतैर्वेदान्तैः प्रतिपाद्यते ॥

---

१ ख. °त्येष मा° । २ क. ग. ङ. ज्ञानात्म° ।

येनापूर्वार्थलाभेन तेषामननुवादता ।
उच्यते मान्तरात्सिद्धः किं देहात्माऽथवेतरः ॥
नाऽऽद्ये स्यादनुवादित्वं देहात्माननुकीर्तनात् ।
न वेदान्ताः क्वचिद्देह आत्मेति प्रत्यपादयन् ॥
यः कोशोऽन्नमयः प्रोक्तस्तत्रास्त्वेवानुवादता ।
देहेतरोऽपि किं कर्ता ब्रह्म वोभयथाऽपि वा ॥
तयोर्मानान्तराबोधादाशङ्क्या नानुवादता ।
वादिनो लौकिका वाऽत्र भविष्यद्देहभागिनम् ॥
कर्त्रात्मानं न जानन्ति वेदान्तवचसा विना ।
देहान्तराभिसंबद्धो भावित्वान्नाक्षगोचरः ॥
लिङ्गसादृश्यविरहान्नानुमानोपमा तथा ।
भावरूपात्मबोधाय नाभावोऽपि प्रवर्तते ॥
अर्थापत्तिर्न संभाव्या दृष्टकल्पकवर्जनात् ।
अन्यथाऽनुपपन्नोऽपि श्रुतः स्वर्गो न कल्पकः ॥
श्रुतार्थापत्तितोऽप्यत्र श्रुतिरेव बलीयसी ।
योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ॥
इति वेदान्तवचसा भविष्यद्देहयोगधीः ।
भविष्यद्देहसंबन्धी वाक्यादात्मा न चेन्मतः ॥
चार्वाक इव नो कुर्याददृष्टार्थाः क्रियाः सुधीः ।
योगिप्रत्यक्षतो भाविसंबन्धो ज्ञायते[1] यदि ॥
तथाऽपि योगिता श्रौतानुष्ठानादेव नान्यथा ।
योगिभिर्व्यवधानाद्वा साक्षाद्वा श्रुतिरेव हि ॥
कर्त्रात्मनि प्रमाणं स्यात्स्वर्गादिफलभोक्तरि ।
ब्रह्मात्मन्यप्यहंबुद्धिर्न मानं स्यात्कथंचन ॥
प्रत्युताहंबुद्धिरेव सिध्यत्यात्मानुभूतितः ।
शास्त्रैकवेद्यता प्रोक्ता विषयत्वनिरूपणात् ॥
तस्मादननुवादित्वात्सिद्धा वेदान्तमानता ।
प्रमाणं मेयसापेक्षं मेयता कस्य युज्यते ॥
इत्याकाङ्क्षानिवृत्त्यर्थं मेयमत्र निरूप्यते ।
अविज्ञातः प्रमाणस्य विषयो वादिनां मतः ॥
सोऽज्ञातोऽर्थः प्रमाणार्त्तिं सिध्येद्यद्वाऽनुभूतितः ।

---

१ क. ङ. जायते ।

न तावन्मानतः सिद्धिर्मानात्पूर्वमपेक्षणात् ।
सिद्धमज्ञातमुद्दिश्य ज्ञप्त्यै मानं प्रवर्तते ॥
अज्ञातत्वं न सिद्धं चेन्मानात्तत्केन सिध्यति ।
इति चेन्नित्यचैतन्यानुभावेनानुभूयते ॥
मानप्रवृत्तितः पूर्वमज्ञातत्वं यथा तथा ।
ज्ञातत्वमप्युत्तरत्र चैतन्येनानुभूयते ॥
प्रवृत्तं विषये मानं बोधयेद्विषयाकृतिम् ।
ज्ञाततामज्ञाततां भातो न तेनाविषयत्वतः ॥
रूपार्थं संप्रवृत्तेन नेत्रेण रसगन्धयोः ।
अगृहीतिर्यथा तद्वज्ज्ञाताज्ञातत्वयोर्भवेत् ॥
नेत्रागृहीतयोरन्यद्बोधकं स्याद्यथा तथा ।
ज्ञाततामज्ञाततां ग्राह्ये अमेये अपि ते चिता ॥
अज्ञानव्याप्तमज्ञातं ज्ञातं मानेन भासितम् ।
तच्चोभयं साक्षिभास्यमाहुर्वेदान्तपारगाः ॥
सर्वं वस्तु ज्ञाततया ह्यज्ञातत्वेन वा सदा ।
साक्षिचैतन्यविषय इति शास्त्रेषु निश्चयः ॥
चितैवाज्ञाततासिद्धावज्ञातो यः स मीयते ।
सर्वैर्मानैरतश्चिन्त्यं कस्याज्ञातत्वमीदृशम् ॥
चेतनोऽचेतनो वाऽयमज्ञातो यद्यचेतनः ।
तन्नाज्ञातार्थकार्यस्य जडस्याज्ञाततां कुतः ॥
अज्ञातरज्जुकार्यस्य सर्पस्याज्ञाततां न हि ।
अज्ञातब्रह्मकार्यस्य जडस्याज्ञाततां कुतः ॥
रज्जुसर्पं न जानामि बोद्धुमिच्छामि मानतः ।
इति व्यवहरंति प्राज्ञा नाज्ञां कुर्वन्ति कोऽपि च ॥
किंचाज्ञातत्वतो लभ्यं तिरोधानं न चेतरत् ।
स्वयमेव तिरोभूते जडे काऽन्या तिरोहितिः ॥
आविर्भूतस्वरूपे तु चेतनेऽन्येन निर्मितात् ।
तिरोधानाद्विशेषोऽस्ति शुभ्रवस्त्रे मषी यथा ॥
चन्द्रं मलिनयेद्राहुर्नीलमेघं न तु क्वचित् ।

---

१ ख. °नुभवे° । २ क. ङ. यानपि । ज्ञा° । ३ ग. °तनाचे° । ४ क. ख. घ. ङ. °हितिः ज्ञा° । ५ क. ख. ङ. केषु च । ६ ग. किंवाऽज्ञा° ।

एवं चेतनमज्ञातं जडं त्वज्ञानदेहकम् ॥
कार्यकारणरूपं यन्निखिलं जडमीक्ष्यताम् ।
तेन सर्वेण चिद्रूपः स्वप्रकाशस्तिरोहितः ॥
तिरोहितेनोभयं तद्भासते चन्द्रराहुवत् ।
लयः प्रकाशनाशो वा नास्ति चन्द्रवदेव हि ॥
राहुग्रस्तत्वमिन्दौ चेदस्मद्दृष्टश्चैव भासते ।
अज्ञातत्वं चितस्तद्वन्मूढदृष्टश्चैव भासताम् ॥
अतोऽनुभव एवैको विषयोऽज्ञातलक्षणः ।
अक्षादीनां स्वतःसिद्धे[1] यत्र तेषां प्रमाणता ॥
अनुभूतिग्रहायैव प्रवृत्तान्यपि दुष्टया ।
सामग्र्याऽखिलमानानि गृह्णते जडसंयुताम् ॥
शुक्तिकाग्रहणायैव प्रवृत्तमपि लोचनम् ।
गृह्णीते रजतोपेतं शुक्त्यंशं दोषयोगतः ॥
वेदान्तेतरसामग्री दुष्टैषा चक्षुरादिका ।
तैज्जा धीरत्र गृह्णाति स्फूर्तिं[2] रूपादिसंयुताम् ॥
एवं च सति विभ्रान्तः कल्पिते रजते धियम् ।
प्रमाणं मनुते यद्वद्रूपादौ मनुजास्तथा ॥
धर्मिण्यभ्रान्तमखिलं ज्ञानमिच्छन्ति वादिनः ।
विपर्ययं प्रकारे तु वदन्ति रजतादिके ॥
सर्वधर्मिणि सद्रूपे प्रमा धीवृत्तयोऽखिलाः ।
तथा रूपादिके बुद्धिः स्याद्विपर्ययरूपिणी ॥
एवं न्यायेन संसिद्धा प्रमाणानां प्रमाणता ।
ब्रह्मण्येव तथा प्रज्ञा रूपादावेव तां विदुः ॥
धर्मिण्येव प्रमाणं सदपि मानं विमूढधीः ।
रजतग्राहकं मानमिति विद्याद्यथा तथा ॥
ब्रह्मण्यक्षादिमानत्वमिति न्यायविदां मतम् ।
रूपादावेव तन्मात्वमिति मूढधियो जगुः ॥
किं बहूक्त्या प्रमेयं स्यादज्ञातत्वेन चेतनः ।
सर्वेषामपि मानानामज्ञातत्वाभिभाविनाम् ॥
वेदान्तानां विशेषेण निःशेषाज्ञानघातिनाम् ।

---

१ क. ख. ङ. °सिद्धे य° । २ ङ. तज्जधी° ।

अज्ञातश्चेतनो मेयो नाज्ञातोऽन्योऽस्ति कश्चन ॥
किं चाऽऽनन्दात्मिरूपस्य पुरुषार्थस्य हेतवः ।
वेदान्तास्तेन तन्मेय आनन्दात्मा परः पुमान् " ॥
उक्तमत्रोपनिषदो विषयादिचतुष्टयम् ।
प्रामाण्यमपि तन्मेयमथ व्याख्या प्रवर्तते ॥

सेयं **तैत्तिरीयोपनिषत्त्रिविधा । सांहिती वारुणी याज्ञिकी** चेति । तत्र प्रथमप्रपाठके संहिताध्यायस्योक्तत्वात्तद्रूपोपनिषत्**सांहिती** । द्वितीयतृतीययोः प्रपाठकयोर्या ब्रह्मविद्याऽभिहिता तस्याः संप्रदायप्रवर्तको वरुणस्तस्मात्तदुभयरूपोपनिषद्**वारुणी** । चतुर्थप्रपाठके यज्ञोपयुक्ता अपि मन्त्रास्तत्र तत्राऽऽम्नाता अतस्तद्रूपोपनिषद्**याज्ञिकी** । तासां तिसृणां मध्ये **वारुणी** मुख्या । तस्यां परमपुरुषार्थस्य ब्रह्मप्राप्तिलक्षणस्य साक्षादेव साधनभूतायाँ ब्रह्मविद्यायाः प्रतिपादितत्वात् । एवं तर्ह्यभ्यर्हितत्वेन सैव प्रथमं पठितव्येति चेन्न । तस्यामधिकारसिद्धये **सांहित्याः** प्रथमं पठितव्यत्वात् । यद्यपि विविदिषोर्विद्यायामधिकारो विविदिषा च कर्मभिरेवोत्पादिता तथाऽपि न कर्मभिश्चित्तस्यैकाग्र्यमुत्पद्यते । प्रत्युत प्रवृत्तिबाहुल्याद्विक्षेपवासनैव भूयसी भवति । ऐकाग्र्यस्य साक्षात्कारहेतुत्वं **कठा** आमनन्ति—"दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" इति । ऐकाग्र्यं च ध्यानाभ्यासेन जन्यते । अत एव **पतञ्जलिर्योगस्वरूपं** तत्साधनं च सूत्रयामास—" योगश्चित्तवृत्तिनिरोधः " " अभ्यासवैराग्याभ्यां तन्निरोधः " इति । अतो ध्यानाभ्यासाय **सांहित्याः** प्रथमभावित्वं युक्तम् । ' श्रेयांसि बहुविघ्नानि ' इति लौकिकन्यायाद्विशेषतो ब्रह्मविद्यायां देवकृतविघ्नबाहुल्यसंभवाच्चाऽऽदौ विघ्नपरिहाराय प्रयतितव्यम् । दैविकविघ्नसंभावना च **बृहदारण्यके**ऽवगम्यते—" अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानां यथा ह वै बहवः पशवो मनुष्यं भुञ्ज्युरेवमेकैकः पुरुषो देवान्भुनक्त्येकस्मिन्नेव पशावादीयमानेऽप्रियं भवति किमु बहुषु तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः " इति । अयमर्थः—द्वौ हि पुरुषौ ब्रह्मवित्कर्मी च । तत्र ब्रह्मविदः सर्वभावापत्तिर्भवतीति पूर्ववाक्ये **समाम्नातम्**—" य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति " इति । विदितब्रह्मतत्त्वस्य पुरुषस्य सर्वभावापत्तिविघ्नाय देवा अपि न समर्थाः । यस्मादयं ब्रह्मविदेषां देवानामात्मा भवति । एतदपि **तत्रैवाऽऽम्नातम्**—" तस्य ह न देवाश्चनाभूत्या ईशत आत्मा ह्येषां स भवति " इति । इत्थं ब्रह्मविदः परमपुरुषार्थमाम्नाय विद्यारहितस्य तदभावं दर्शयितुमथ योऽन्यामित्यादि वाक्यमाम्नातम् । अथ ब्रह्मविद्यामहिमोक्त्यनन्तरमविद्यामहिमा वर्ण्यते । यः

---

१ ग. घ. °या वि° । २ घ. °त द्व° ।

पुमान्स्वातिरिक्तां देवतामुपास्ते सेवतेऽसावुपास्यो देवो मत्तोऽन्योऽहं चोपासको देवाद-न्योऽस्मीति सोऽयमुपासको भेददर्शी सन्स्वस्य ब्रह्मत्वलक्षणमहिमानं न जानाति । यथा गजाश्वादिरूपः पशुः स्वस्य शक्त्याधिक्यमज्ञात्वा स्वल्पशक्तीनामपि मनुष्याणामधीनो भवत्येवमज्ञानी स उपासको देवानामधीनो भवति । यथा धेन्वजाश्वबलीवर्दमहिषादयो बहवः पशवः क्षीरप्रदानभारवाहनादिना स्वोचितव्यापारेणैकं मनुष्यं पालयन्त्येवमज्ञानी पुरुष एकैक एवाग्निसूर्येन्द्रादीन्देवान्हविष्प्रदानादिना पालयति । तस्मादेकैकः पुरुषो देवानां सर्वपशुस्थानीयः । यथा बहुपशुस्वामिनः पुरुषस्यैकस्मिन्नेव पशौ चोरव्याघ्रादि-भिरपह्रियमाणे सति महदप्रियं भवति तत्र बहुषु पशुष्वपहृतेषु सत्सु किमु वक्तव्यम् । तस्मान्मनुष्या एतद्ब्रह्मात्मत्वं विद्युरिति यदेतदस्ति तदेतदेषां देवानामत्यन्तमप्रियमिति । एतस्य चाप्रियत्वस्य श्रुत्युक्तत्वाद्ब्रह्मविद्यायां देवकृतो विघ्नः संभाव्यते ।

अयमर्थो **वार्तिकसारे** स्पष्टं संगृहीतः—

" स्वस्य तत्त्वमविज्ञाय यागदानादिकर्मभिः ।
स्वतोऽन्या देवताः पाति ह्यनड्वान्वणिजं यथा ॥
अपि भूरिपशोः पुंस एकस्मिन्नपि तस्करैः ।
ह्रियमाणे पशौ दुःखं किमु सर्वापहारतः ॥
सर्वस्वतुल्ये नृपशौ ब्रह्मधीपरिमोषिणा ।
ह्रियमाणे महद्दुःखं स्यात्सर्वेषां दिवौकसाम् ॥
तस्मादेषामप्रियं तद्यन्मनुष्या विजानते ।
ब्रह्मात्मत्वमतो देवाः प्रतिबध्नन्ति वेदनम् ॥
प्रमादिनो बहिश्चित्ताः पिशुनाः कलहोत्सुकाः ।
संन्यासिनोऽपि दृश्यन्ते देवसंदूषिताशयाः " ॥ इति ।

यथा देवाः प्रतिबन्धकास्तद्वदृष्यादयोऽपि ब्रह्मविद्यायाः प्रतिबन्धकाः । एतदपि **बृह-दारण्यक** एव—" अथो अयं वा आत्मा सर्वेषां भूतानां लोकः " इत्यादिनाऽभिहितम् ।

तदर्थोऽप्येवं संगृहीतः—

" वर्णाश्रमाभिमानी सन्नतत्त्वज्ञः पराङ्मतिः ।
देवादीनामाश्रयः स्यात्सर्वेषामापिपीलिकम् ॥
देवानां यागहोमाभ्यामृषीणां वेदपाठतः ।
पितॄणां श्राद्धतो नॄणां वस्त्रान्नगृहदानतः ॥
पशूनां तृणनीराभ्यामुच्छिष्टकणभान्यतः ।

---

१ ग. °क्षणी° ।

श्वाखुटिट्टिभमुख्यानामेवं सर्वाश्रयो गृही ॥
कर्मणा नार्जितो यस्मान्न कश्चिदुपकारकृत् ।
गृही देवादिभिस्तस्मादर्जितोऽभूत्स्वकर्मभिः ॥
स्वस्वकर्मार्जितत्वेन देवाद्याः स्वस्वदेहवत् ।
अविनाशं सदेच्छन्ति गृहिणः स्वोपकारिणः ॥
तत्त्वं बुद्ध्वाऽननुष्ठानं नाशोऽयं गृहिणो महान् ।
एष देवादिभिः सर्वैर्न हि शक्यश्चिकित्सितुम् ॥
कर्मणामननुष्ठानं रोगालस्यादिना तु यत् ।
नासावात्यन्तिको नाशो यतः पश्चात्करिष्यति ॥
मा भूत्सर्वस्वहानिर्नो ब्रह्मयाथात्म्यविद्यया ।
इति देवादयो विद्यां प्रतिबध्नन्ति यत्नतः " ॥ इति ।

एतदेवाभिप्रेत्य **कठवल्लीष्वाम्नातम्**—" श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः " इति ।

भगवताऽप्येतदेवोक्तम्—

" मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः " ॥

तदेवं परमपुरुषार्थस्य विघ्नबाहुल्यसंभवात्तच्छान्तये सांहित्यामुपनिषद्याद्यानुवाके जप्यो मन्त्र आम्नायते । कर्मकाण्डस्योपक्रमे तु नायं मन्त्र आम्नातः कर्मानुष्ठानस्य देवादिभिरप्यपेक्षितत्वेन तत्र विघ्नानामसंभवात् । ननु पूर्वकाण्डोक्तैर्यज्ञदानादि[भि]रेव विद्याविघ्न उपशाम्यति । बाढम् । तथाऽपि मन्त्रजपानिवर्तनीयं विघ्नान्तरं संभवति । विद्यायामरुचिराद्यो विघ्नः । स च संचितैर्महद्भिः पापैरापाद्यते ।

एतच्च पुराणेऽभिहितम्—

" महापापवतां नृणां ज्ञानयज्ञो न रोचते ।
प्रत्युत ज्ञानयज्ञस्तु प्रद्वेष्यो भासते स्वतः " ॥ इति ।

तानि च महान्ति पापानि ब्रह्मवेदने रुचिमुत्पादयद्भिर्यज्ञदानादिभिर्निवर्त्यन्ते । सेयं रुचिर्विविदिषाशब्दवाच्या । तदुत्पादकत्वं च यज्ञादीनामेवमाम्नायते—" तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन " इति । यज्ञादीनां च काम्यानां सांसारिकफलहेतुत्वेऽपीश्वरार्पितानां वेदनविघ्नकारिमहापातकनिवर्तकत्वं युक्तम् ।

---

१ ख. °ष विघ्न ।

अत एव **भगवतोक्तम्**—

" ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा " ॥ इति ।

तस्य पापक्षयस्य विषयवैराग्यं लिङ्गम् । एतच्च **नैष्कर्म्य**सिद्धावुक्तम्—

" शोध्यमानं तु तच्चित्तमीश्वरार्पितकर्मभिः ।
वैराग्यं ब्रह्मलोकादौ व्यनक्त्यथ सुनिर्मलम् " ॥ इति ।

श्रेयोमार्गेऽप्यभिहितम्—

" ब्रह्मादिस्तम्बान्ते संसारेऽस्मिन्नसारतावुद्धिः ।
अन्तर्यामिणि देवे समर्पितस्वक्रियाविषक्तिरियम् " ॥ इति ।

विरक्तस्य विद्यायामरुचिकरे विघ्ने परिहृतेऽपि चित्तैकाग्र्यहेतोरुपासनस्य योगशब्दाभिधेयस्यान्तरायाः संभवन्ति । ते **च पतञ्जलिना** योगशास्त्रे सूत्रिताः—" व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपा योगान्तरायाः " इति । व्याधिः प्रसिद्धः । स्त्यानमकर्मण्यता चित्तस्य । चित्तं हि कदाचित्तमोगुणबाहुल्येन व्यापारायोग्यं सन्मूढं भवति । उपास्यनिश्चयरहित्यं संशयः । उपासनस्य कदाचिद्विस्मृतिः प्रमादः । पश्चात्करिष्यामीत्युपेक्षाऽऽलस्यम् । वैराग्यराहित्यमविरतिः । उपास्यवस्तुन्यन्यथा निश्चयो भ्रान्तिदर्शनम् । चित्तैकाग्र्यस्योत्तरोत्तराभिवृद्धिराहित्यमलब्धभूमित्वम् । कदाचिदुपासने प्रवृत्तिः कदाचिद्यागदानादौ कदाचित्कृषिवाणिज्यादावित्येतादृगनवस्थितत्वम् ।

एतेषां योगान्तरायाणामुपशमनाय जप्यं मन्त्रमाह—

हरिः ॐ ।

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः, इति ।

अहनः प्राणवृत्तेश्चाभिमानी देवो **मित्रो नो**ऽस्माकं **शं** सुखहेतुर्भवतु । एवमुत्तरत्रापि योज्यम् । रात्रेरपानवृत्तेश्चाभिमानी **वरुणः** । चक्षुष आदित्यमण्डलस्य चाभिमान्य**र्यमा** । बाह्वोर्बलस्या(स्य चा)भिमानीन्द्रः । वाचि बुद्धौ चाभिमानी **बृहस्पतिः** । पादयोरभिमानी **विष्णुः** स **चोरुक्रमः** । त्रिविक्रमावतारे विस्तीर्णपादोपेतत्वात् । अथवा प्राणादिष्ववयवेष्वभिमानिनां मित्रादीनामुक्तत्वादवयविनि कृत्स्नदेहेऽभिमानी विराट्पुरुषः परिशिष्यते । स चोरुक्रमशब्देनाभिधीयते । ब्रह्माण्डदेहोपेतत्वेन सर्वव्यापित्वमुरुक्रमत्वम् ।

---

१ क. ख. ङ. °म्—शुध्य° । २ क. ख. ग. ङ. °भिश्लिष्टम् । ३ ग. घ. मित्रः । मि.ऽस्मा° ।

इत्थमवयवेष्ववयविनि चाभिमानिनो देवा विघ्नपरिहारेण सुखहेतुतया प्रार्थिताः। अथ तेषां देवानामन्तर्यामित्वेन प्रेरकं यत्परं ब्रह्म तदेतन्नमस्क्रियते—

नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्॥ इति।

यच्च ब्रह्म ज्ञानक्रियाशक्त्युपेतसूत्रात्मना **वायुमूर्तिधारिणां** सर्वेषां प्राणिनां विधारकं भवति। "वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति" इति श्रुतेः। अतो वायुरपि नमस्क्रियते। तत्रान्तर्यामिणः शास्त्रानुमानाभ्यामेवावगम्यत्वेन परोक्षत्वान्नास्ति संबोधनम्। सूत्रात्मना वायुरूपेण स्पर्शनेन्द्रियगम्यत्वात्संबोध्यते। अयमेवाभिप्रायस्त्वमेव **प्रत्यक्षमिति** वाक्येन स्पष्टीक्रियते। यतो वायूपाधिकं ब्रह्म प्रत्यक्षयोग्यं ततो हे **वायो** + **त्वामेव** व्याकरिष्यमाणेषूपासनवाक्येषु साक्षात्कारयोग्यं **ब्रह्म वदिष्यामि**। सोपाधिकं ब्रह्म तु येन येन प्रकारेणोपास्यते तेन तेन प्रकारेण चिराभ्यासे सति साक्षात्कर्तुं शक्यते। अत एव **च्छन्दोगाः शाण्डिल्यविद्यायामामनन्ति**—"एतमितः प्रेत्याभिसंभविताऽस्मीति यस्य स्यादद्धा न विचिकित्साऽस्ति" इति। अद्धा साक्षादित्यर्थः। **वाजसनेयिनोऽप्यामनन्ति**—"देवो भूत्वा देवानप्येति" इति। इहैव जन्मनि साक्षात्कारो देवभावः। मरणादूर्ध्वं देवत्वापत्तिर्देवाप्ययः। अतो वक्ष्यमाणवाक्येषु नानृतं वदिष्यामि किंतु विद्यमानमेवार्थं प्रत्यक्षं ब्रह्मेत्येतादृशं वदिष्यामि। विवक्षितस्य विद्यमानार्थस्याऽऽदौ मनसा पर्यालोचनमृतवदनं पश्चाद्वचसोच्चारणं **सत्यवदनमिति** तयोर्विवेकः। यदुत्तरत्र वक्ष्यमाणं प्रत्यक्षं ब्रह्म तन्मां विद्यार्थिनं शिष्यं **वक्तारमाचार्यं** च विद्याग्रहणोपदेशसमर्थ्यप्रदानेनाप्युभौ पालयतु। अनयैव विवक्षया पुनरपि '**अवतु माम्। अवतु वक्तारम्**' इत्यभिधीयते—

इत्थं वायुरूपं प्रत्यक्षं ब्रह्म संप्रार्थ्यान्तर्यामिरूपं परोक्षं ब्रह्म तद्वाचकेन प्रणवेनानुस्मृत्य विघ्नशान्तिरास्त्विति प्रार्थ्यते—

ॐ शान्तिः शान्तिः शान्तिः (१)॥ इति।

+ यद्यपि शान्तिवाक्ये त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामीत्येव वैदिकपाठ उपलभ्यते तथाऽप्युपसंहारशान्तौ त्वामेव प्रत्यक्षं ब्रह्मावादिषमित्येव वैदिकपाठात्तदनुरोधाच्छांकरभाष्येऽत्र चेतिकाराध्याहारेण लापनमकृत्वा त्वामेवेत्युद्दिश्यैवार्थकरणाच्च पुरातनपाठस्त्वामेवेत्येवानुमीयते।

---

१ ख. वक्ष्यामि। २ ङ °मिप।

* सत्यं वदिष्यामि पञ्च च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके सप्तमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

विघ्नाश्च त्रिविधाः । तत्र ज्वरशिरोव्यथादय आध्यात्मिकाः । देवाद्युपद्रवास्त आधिदैविकाः । यक्षराक्षसाद्युपद्रवास्त आधिभौतिकाः । तेषां त्रयाणामुपशमनाय त्रिः **शान्ति**शब्दः पठ्यते । प्रणवेनेश्वरानुस्मरणस्य विघ्नोपशमनार्थत्वं पतञ्जलिश्चतुर्भिः सूत्रैः सूत्रयामास—" क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः " " तस्य वाचकः प्रणवः " "तज्जपस्तदर्थभावनम् " "ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च" इति ।

इति श्रीमत्सायणाचार्यविरचिते श्रीबुक्कणसाम्राज्यधुरंधरमाधवविद्यारण्यपरमेश्वरसंबन्धिवेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये सप्तमप्रपाठके सांहित्यामुपनिषदि प्रथमोऽनुवाकः ॥ १ ॥

अथ सप्तमे द्वितीयोऽनुवाकः ।

प्रथमानुवाकोक्तमन्त्रजपेन परिहृतविघ्नस्य पुरुषस्योपासनार्थं ब्रह्मावबोधार्थं च तत्प्रतिपादको ग्रन्थो वक्तव्यः । तस्य च ग्रन्थस्यार्थज्ञानप्रधानत्वात्पाठे मा भूदौदासीन्यमित्येतदर्थं द्वितीयानुवाके [illegible]ऽभिधीयते । भवत्वौदासीन्यमिति चेन्न । अनर्थप्रसङ्गात् ।

" मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् " ॥

इत्यादिन्यायात् ।

इन्द्रशत्रुवृत्तान्तश्च " त्वष्टा हतपुत्रः " **इत्यनुवाके** विस्पष्टमभिहितः । एवं तर्हि कर्मकाण्डेऽप्ययमध्यायो वक्तव्य इति चेद्भाढम् । अत एव काण्डद्वयशेषत्वा × देहलीप्रदीपन्यायेनोभयोः काण्डयोर्मध्येऽभिहितः । न चोभयशेषत्वेन वेदस्योपक्रम एव पठ्यतामिति वाच्यम् । उ[illegible]ि विद्यायां प्रयोजनाधिक्यद्योतनाय विद्याकाण्डे पठनीयत्वात् । कर्मकाण्डे क्वचित्स्वरवर्णादिव्यत्ययेन यथाशास्त्रमर्थानवबोधेऽपि प्रायश्चित्तेनानुष्ठानवैकल्यं परिहर्तुं शक्यम् । अत एव प्रायश्चित्ताज्याहुतिमन्त्र एवमाम्नायते— " अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु । अग्ने तदस्य कल्पय त्वꣳ हि वेत्थ यथात-

* एतत्परिगणनं क्वचिन्नोपलभ्यते । × देहली सद्मद्वारसमीपतरभागस्तत्स्थानस्थो दीपो द्वारान्तःप्रदेशं तद्बहिर्भूतं चत्वरं च समुज्ज्वलयति । तथाऽयमध्यायः कर्मज्ञानकाण्डयोर्मध्येऽभिहित इति पर्यवसितम् ।

थम्" इति। विद्याकाण्डे त्वयथाशास्त्रमर्थावबोधे सति वैकल्यं न समाधीयेत। न ह्यन्यथाबोधः प्रायश्चित्तेन परिहर्तुं शक्यते। रज्जुसर्पादिभ्रान्तेर्गायत्रीजपादिभिः परिहारादर्शनात्। अत एव कर्मस्विव विद्यायां वैकल्यपरिहाराय प्रायश्चित्तं किमपि नाऽऽम्नातम्। प्रत्युत विद्यामभ्यस्यतः पापे प्रसक्तावप्यन्यप्रायश्चित्ताभावः स्मर्यते—

"यदि स्यात्पातकं किंचिद्योगी कुर्यात्प्रमादतः।
योगमेव निषेवेत नान्यं मन्त्रं कदाचन" इति॥

तस्माद्विद्यायामवैकल्याय यथाशास्त्रं बोद्धुमुपनिषत्पाठे प्रयत्नातिशयं विधातुमत्रैव शिक्षाध्यायोऽभिधीयते—

ॐ शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम्।
साम संतानः। इत्युक्तः शीक्षाध्यायः (१), इति।

शीक्षां पञ्च।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके सप्तमप्रपाठके
द्वितीयोऽ*नुवाकः॥ २॥

"शिक्ष विद्योपादाने" इति धातुः। शिक्ष्यन्ते वेदनीयत्वेनोपदिश्यन्ते स्वरवर्णादयो यत्रासौ शिक्षा सैव **शीक्षा** तां विस्पष्टमा समन्ताद्व्याख्यास्यामः कथयिष्यामः। अकारादिर्वर्णः। उदात्तादिः स्वरः ह्रस्वदीर्घादिका **मात्रा**। स्पृष्टत्वमीषत्स्पृष्टत्वमित्यादिकः प्रयत्नो **बलम्**। अतिद्रुतत्वमतिविलम्बितत्वं च परिहृत्य यस्य यः काल उचितस्तावति काले तदुच्चारणं साम्यं तदेव **सामशब्देनोच्यते**। पूर्वोत्तरवर्णयोः संहिता **संतानः**। त एते वर्णादयः संतानान्ताः षडपि तत्तल्लक्षणलक्षिताः पठनीयाः। इत्यनेन प्रकारेण **शिक्षारूपोऽध्याय** उक्तः। वर्णादयः षडेव शिक्षणीया न त्वन्यः कश्चिच्छिक्षणीयोऽस्तीति द्योतयितुमध्यायोपसंहारः। अध्येतव्यः पठनीयो ग्रन्थोऽध्यायः। यद्यप्यत्र शीक्षादिशब्दानामेकश्रुत्याऽधीयमानत्वाद्व्याकरणोक्तप्रकृतिप्रत्ययादिप्रयुक्तः स्वरो नोपलक्ष्यते तथाऽपि संप्रदायप्रसिद्धः स्वरस्तथैवाभ्यसनीयस्तस्य चार्थविशेषज्ञान उपयोगाभावेऽप्यनेन शीक्षाध्यायेन विधीयमानत्वाददृष्टोपयोगो भविष्यति। तच्चादृष्टमुपासनायां तत्त्वजिज्ञासोस्तत्त्वविद्यायां च प्रतिबन्धपरिहाराय संपद्यते।

इति श्रीमत्सायणाचार्यविरचिते श्रीबुक्कणसाम्राज्यधुरंधरमाधवविद्यारण्यपरमेश्वरसंबन्धिवेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये सप्तमप्रपाठके सांहित्यामुपनिषदि द्वितीयोऽनुवाकः॥ २॥

---

* घ. पुस्तकेऽत्र प्रथमानुवाकसमाप्तिर्वर्तते। एवमग्रेऽपि तृतीयाद्यनुवाकसमाप्तिस्थले द्वितीयाद्यनुवाकसमाप्तिर्वर्तते।

---

१ ख. °तर्तिमन्दम्। २ ग. °दिपदाना°।

अथ सप्तमे तृतीयोऽनुवाकः ।

द्वितीयेऽनुवाके[1] दृष्टादृष्टोपकारी ग्रन्थपाठनियमो विहितः । तृतीये त्वैहिकामुष्मिकफलसिद्धये काचिदुपासना विधीयते । तत्राऽऽदौ तावन्मङ्गलाचरणार्थोऽयं मन्त्र आम्नायते । पूर्वोक्तशान्तिमन्त्रेण विघ्नोपशमः प्रार्थितः । अनेन तु मन्त्रेण विद्यातत्फलयोरुत्कर्षः प्रार्थ्यते । तमिमं मन्त्रमाह—

सह नौ यशः । * सह नौ ब्रह्मवर्चसम्, ॥ इति ।

विद्यानिमित्तं यद्यशस्तन्नावावयोः शिष्याचार्ययोः **सहास्तु**। सम्यगनेनोपासनमनुष्ठीयत इति शिष्यस्य यशः । सम्यगुपदिष्टमित्याचार्यस्य यशः । अनेन विद्यायामवैकल्यलक्षण उत्कर्षोऽभिहितो भवति । ब्राह्मणस्योचितं श्रुताध्ययनलक्षणं तेजो **ब्रह्मवर्चसम्** । एतच्च श्रूयमाणस्य फलस्य सर्वस्याप्युपलक्षणम् । " संधीयते प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन " इति हि श्रूयते। एतच्च ब्रह्मवर्चसादिफलमावयोः शिष्याचार्ययोः सहास्तु । यद्यप्युपासितुः शिष्यस्यैव तत्फलं तथाऽपि तदीयफलसंपत्तेराचार्यपरितोषहेतुत्वादाचार्यस्यापि फलत्वेनोपचर्यते । सोऽयं प्रार्थनारूपो मङ्गलाचरणार्थो मन्त्रः शिष्येण जप्य आचार्यस्य तु कृतार्थत्वान्नानेन कृत्यमस्ति ।

यदर्थमिदं मङ्गलाचरणं तामेतां विद्यां प्रतिजानीते—

अथातः सꣳहिताया उपनिषदं व्याख्यास्यामः । पञ्चस्वधिकरणेषु । अधिलोकमधि+ज्यौतिषमधिविद्यमधिप्रजमध्यात्मम् । ता महासꣳहिता इत्याचक्षते, इति ।

अथशब्दः पूर्वानुवाकविहितवर्णस्वराद्युच्चारणाभ्यासानन्तर्यमाचष्टे । **अतः**शब्दस्तदुच्चारणवासनया युक्तत्वं हेतू करोति । यस्मादुपासनायां प्रवर्तमानः पुरुषश्चिराभ्यस्तवेदपाठेन वासितः सन्वेदपाठसंबन्धरहितेषूपासनेषु चित्तं सहसा प्रवेशयितुं न शक्नोति । तस्मात्तत्संबन्धिनीं **संहिताया उपनिषदं** विस्पष्टमा समन्तात्कथयिष्यामः । वर्णानां परस्परमत्यन्तसामीप्यं संहिता । " परः संनिकर्षः संहिता " इति **पाणिनिना** सूत्रितत्वात् । उप सामीप्ये निषण्णं प्रजापशुब्रह्मवर्चसादिफलमस्यामित्युपनिषदुपासना ताम् ।

---

* अत्र सकाराकारस्य सानुदात्तः पाठोऽपि वैदिकेषु प्रसिद्धः । + अत्र सर्वत्र ग. पुस्तकेऽधिज्योतिषमिति पाठः ।

---

१ ख. °केऽदृष्टो° ।

तत्र येयमुपासनीया संहिता सा पञ्चविधेष्वाश्रयेषु व्याख्यास्यते। आश्रयभेदेनोपासनाया[1] भेदशङ्का मा भूदि[illegible] पञ्चस्वाश्रयेषु प्रतिज्ञायते। लोकज्योतिर्विद्याप्रजात्मानः पञ्चाऽऽश्रयाः। पृथिव्यादीँल्लोकानधिकृत्य वर्तत इत्यधिलोकम्। एवमुत्तरत्रापि द्रष्टव्यम्। या एता लोकादिपञ्चविधाश्रयभेदभिन्नाः संहिताः सन्ति ताः सर्वा महासंहिता इत्येवमभिज्ञा उपासका आचक्षते। लोकादिविषयोत्कृष्टदृष्टयोपासितत्वात्संहितानां महत्त्वम्।

प्रतिज्ञातायामुपासनायामुपास्यं प्रथमावयवमाह—

अथाधिलोकम्। पृथिवी पूर्वरूपम्। द्यौरुत्तररूपम्। आकाशः संधिः (१)। वायुः संधानम्। इत्यधिलोकम्, इति।

लोकादिपञ्चकविषयोपासनाप्रतिज्ञानन्तरं लोकविषय उपास्यावयव उच्यते। संहितावयवयोः पूर्वोत्तरवर्णयोर्मध्ये यत्पूर्ववर्णस्य स्वरूपं तत्पृथिवीदेवतारूपमिति चिन्तयेत्। यदुत्तरवर्णस्य स्वरूपं तद्[illegible]। यश्च तयोर्वर्णयोः संधिर्मध्यदेशः सोऽयं द्युलोकपृथिवीलोकमध्यवर्त्याकाशाभिमानिदेवतारूपः। यदपि तयोर्वर्णयोर्मध्यदेशे वर्तमानं संधानं संहितायाः स्वरूपं तदेतद्वायुदेवतारूपम्। इत्येवं लोकविषयं संहिताध्यानमुक्तम्। तदेतदुदाहियते—इषे त्वेत्यत्र षकारस्योपरि योऽयमेकारः सोऽयं पृथिवीरूपो यश्चोपरितनस्तकारोऽसौ द्युलोकात्मकस्तयोर्वर्णयोर्मध्यदेश आकाशात्मकस्तस्मिन्देशे संहितानिमित्तो द्विर्भावेनाऽऽपादितो योऽन्यस्तकारः स वाय्वात्मक इति ध्यायेत्। एवमुत्तरेष्वप्युपास्यावयवेषु चतुर्षु योज्यम्।

तत्र द्वितीयमवयवमाह—

अथाधिज्यौतिषम्। अग्निः पूर्वरूपम्। आदित्य उत्तररूपम्। आपः संधिः। वैद्युतः संधानम्। इत्यधिज्यौतिषम्, इति।

तृतीयमवयवमाह—

अथाधिविद्यम्। आचार्यः पूर्वरूपम् (२)। अन्तेवास्युत्तररूपम्। विद्या संधिः। प्रवचनं[2] संधानम्। इत्यधिविद्यम्, इति।

आचार्येणोपदेष्टव्यः शिष्येण पठनीयो ग्रन्थो विद्या। ग्रन्थस्य पाठः प्रवचनम्।

---

१ ग. घ. 'भेदाश' । २ ग. °ताया रू° ।

चतुर्थमवयवमाह—

अथाधिप्रजम्। माता पूर्वरूपम्। पितोत्तररूपम्। प्रजा संधिः। प्रजननꣳ संधानम्। इत्यधिप्रजम् (३), इति।

प्रजा पुत्रपौत्रादिरूपा। **प्रजननमुत्पत्तिः।**

पञ्चममवयवमाह—

अथाध्यात्मम्। अधरा हनुः पूर्वरूपम्। उत्तरा हनुरुत्तररूपम्। वाक्संधिः। जिह्वा संधानम्। इत्यध्यात्मम्, इति।

देहेन्द्रियादिसाक्षिचैतन्यान्तःसंघातोऽत्राऽऽत्मशब्देन विवक्षितः। तस्याहंप्रत्ययगम्यत्वात्। तमात्मानमधिकृत्य वर्तत इत्यध्यात्मम्। **वाक्**शब्देन कण्ठतालवादिस्थानगतमिन्द्रियमुच्यते।

प्रतिपादितरूपान्संहितावयवानुपसंहरति—

इतीमा महासꣳहिताः, इति।

फलसाधनत्वेनोपासनां विधत्ते—

य एवमेता महासꣳहिता व्याख्याता वेद। संधीयते प्रजया पशुभिः। ब्रह्मवर्चसेनान्नाद्येन + सुवर्ग्येण लोकेन (४), इति॥ संधिराचार्यः पूर्वरूपमित्यधिप्रजं लोकेन॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके सप्तमप्रपाठके तृतीयोऽनुवाकः॥ ३॥

यः पुमानेवमुपास्ते स पुमान्प्रजादिभिः संबध्यते। यद्यपि विदिधातुः प्रमाणज्ञानमभिधत्ते न तु पुरुषतन्त्रमानसक्रियारूपमुपासनम्, तथाऽपि विज्ञानवाचिविदिधातुनाऽत्रोपासनक्रियोपलक्ष्यते। तयोर्मानसत्वसाम्यात्। न खल्वत्र मुख्यार्थः संभवति। अपुरुषतन्त्रस्य ज्ञातस्य विधातुमयोग्यत्वात्पृथिवी पूर्वरूपमित्यादिवाक्येनैव ज्ञानसिद्धौ तद्विधिवैयर्थ्याच्च। न चात्र वेदेत्येष लट्प्रत्ययो न विधायक इति वाच्यम्। विधायकस्य पञ्चमलकारस्याऽऽश्रयणात्। न च वाक्यजन्यमेव ज्ञानं लट्प्रत्ययेनानूद्यतामिति वाच्यम्। ज्ञानमात्रेण प्रजापश्वादिफलासंभवात्। तस्मादुपा-

+ सुवर्गेणेत्यपि पाठो वैदिकेषु प्रसिद्धः।

१ ख. ग. °सनं वि°। २ ग. संपद्यते। ३ ग, घ, तन्त्रं मा°। ४ घ. °पि ज्ञा°। ५ ख, °भावे प्र°।

सनक्रियां विदिधातुनोपलक्ष्य पञ्चमलकारेण विधत्ते । एवं च सत्युपासनप्रकरणमनुगृह्यते । इति प्राचीनयोग्योपास्स्वेत्यभिधानात्तत्प्रकरणत्वमवगम्यते । अत्र स्वर्गाख्यस्य फलस्यांऽऽमुष्मिकत्वमेव । पश्वादिफलस्य तु चित्रान्यायेनाऽऽमुष्मिकत्वं पाक्षिकम् । "चित्रया यजेत पशुकामः" इत्यत्रासति प्रतिबन्धे पशुप्राप्तिरैहिकी, अन्यथा त्वामुष्मिकीति चित्रान्यायः । ईदृक्फलसिद्ध्यर्थं पुरुषतन्त्रोपासनक्रियाऽत्र वेदेत्यनेन विधीयते ।

अत्र मीमांसा । **चतुर्थाध्यायस्य प्रथमपादे** * चिन्तितम्—

" नास्त्यासनस्य नियम उपास्तावुत विद्यते ।
न देहस्थितिसापेक्षं मनोऽतो नियमो नहि ॥
शयनोत्थानगमनैर्विक्षेपस्यानिवारणात् ।
धीसमाधानहेतुत्वात्पारिशिष्यत आसनम् " ॥

आसीनेनैवोपासितव्यमिति नास्ति नियमः । मानसव्यापारं प्रति देहस्थितिविशेषस्यानुपयुक्तत्वादिति प्राप्ते ब्रूमः—परिशेषादासनं नियम्यते । तथाहि—न तावच्छयानेनोपासितुं शक्यमकस्मान्निद्राया अभिभूतिसंभवात् । नाप्युत्थितेन गच्छता वा देहधारणमार्गनिर्ध्यायादिव्यापारेण चित्तस्य विक्षिप्तत्वादत आसीनेनैवोपासितव्यम् " ।

+ **तत्रैकाग्र्यचिन्तितम्** —

" दिग्देशकालानियमो विद्यतेऽथ न विद्यते ।
विद्यते वैदिकत्वेन कर्मस्वेतस्य दर्शनात् ॥
ऐकाग्र्यस्याविशेषेण दिगादिर्न नियम्यते ।
मनोनुकूल इत्युक्तेर्दृष्टार्थं देशभाषणम् " ॥ इति ।

" ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि " इति दिङ्नियमः । " प्राचीनप्रवणे वैश्वदेवेन यजेत " इति देशनियमः । "अपराह्णे पिण्डपितृयज्ञेन चरन्ति " । इति कालनियमः । तदेतन्नियमत्रयं यथा कर्मणि दृश्यते तथोपासनेऽपि द्रष्टव्यम् । वैदिकत्वस्याविशेषादिति प्राप्ते ब्रूमः—ऐकाग्र्यं हि ध्यानस्य प्रधानसाधनं न च तस्य दिगादिनियत्या कश्चिदतिशयो विद्यतेऽतो नास्ति नियमः । अत एव श्रुतिर्योगाभ्यासाय प्रदेशं निर्दिशन्ती मनोनुकूलत्वमेवाऽऽह । यस्मिन्देशे सौमनस्यं तत्रैव युञ्ज्यान्नतु शास्त्रेण नियमितः कश्चिद्देशोऽस्तीत्यर्थः । " समे शुचौ शर्करावह्निवालुकाविवर्जिते " इति योगा-

---

* आसीनः संभवात् । अध्यायः (४) पादः (१) अधिकरणम् (६) सूत्रम् (७) + तत्रैकाग्रता तत्राविशेषात् । अ० ४ पा० १ अ० ७ । सू० ११ ।

---

१ क. ख. ग. ङ. °स्याऽऽमुष्मिकत्वं पा ।

भ्यासाय देशविशेषः श्रूयत इति चेत्सत्यम् । इष्टसौकर्यार्थं तदिति वाक्यशेषे मनोनुकूलत्वविशेषणान्निश्चीयते । तस्मान्नास्ति दिगादिनियमः ।

अत्रोपास्यवस्तुस्वरूपस्येयत्तां निश्चेतुमिदमपरं चिन्तनीयम् । **ऐतरेयोपनिषद्यपि** संहितोपासना काचिदेवमाम्नायते—"अथातः संहिताया उपनिषत् । पृथिवी पूर्वरूपम् । द्यौरुत्तररूपम् " इत्यादिः । अस्यामैतरेयशाखायां **तैत्तिरीयशाखायां** चाऽऽम्नाता येयमुपासना सा किमेका भिन्ना वेत्येको विचारः । उपासनैक्यपक्षेऽपि शाखाद्वये परस्परं गुणोपसंहारसद्भावासद्भावविषयो द्वितीयो विचारः । तत्र पञ्चाग्निविद्याप्राणविद्यान्यायेनोपासनैक्यं भवितुमर्हति ।

स च न्यायस्तृतीयाध्यायस्य तृतीयपादे + सम्यगभिहितः—

" सर्ववेदेष्वनेकत्वमुपास्तेरथ वैकता ।
अनेकत्वं कौथुमादिनामधर्मविभेदतः ॥
विधिरूपफलैकत्वादेकत्वं नाम न श्रुतम् ।
शिरोव्रताख्यधर्मस्तु स्वाध्याये स्यान्न वेदने ॥

छान्दोग्यबृहदारण्यकयोः पञ्चाग्न्युपासनमाम्नायते तदेकं न भवति नामभेदात् । कौथुममिति च्छान्दोग्यगतस्य नाम । वाजसनेयकमिति **बृहदारण्यकगतस्य** नाम । तयोपासनान्तरेषु योजयितव्यम् । धर्मभेदोऽप्युपासनाभेदगमकः शिरोव्रतलक्षणो **मुण्डक**शाखायां श्रूयते—" तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम् " इति । शिरोव्रतं नाम वेदव्रतविशेष आथर्वणिकान्प्रति विहितो नेतरान्प्रति । तस्माच्छाखाभेदादुपासनाभेद इति प्राप्ते ब्रूमः —शाखाभेदेऽपि विद्यभेदादुपासनं न भिद्यते । तथाहि च्छान्दोग्ये—"यो ह वै ज्येष्ठं च श्रेष्ठं च वेद" इति । यादृशः प्राणविद्याविधिस्तादृश एव **बृहदारण्यके**ऽप्याम्नायते । तथा द्युपर्जन्यपृथिवीपुरुषयोषिदाख्यमग्निपञ्चकं वेद्यतया पञ्चाग्निविद्यायां यत्स्वरूपं तदुभयोरपि शाखयोः समानम् । फलं च " ज्येष्ठश्च ह वै श्रेष्ठश्च भवति " इत्येवंरूपं प्राणोपास्तिजन्यं शाखाद्वयेऽप्येकविधम् । यस्तु कौथुमादिनामभेद उदाहृतो नासौ श्रुत्याऽभिहितः । किं तर्ह्यध्येतार एव केवलं तत्तच्छाखाप्रवर्तकमुनिनाम्ना तं तं वेदं व्याहरन्ति । योऽपि शिरोव्रताख्यधर्मभेद उक्तः सोऽप्यध्ययनविषय एव नोपास्तिविषयः । नैतदचीर्णव्रतोऽधीत इत्यध्ययनधर्मत्वावगमात् । तस्मादैक्यहेतुसद्भावाद्भेदहेत्वभावाच्च न शाखाभेदादुपासनं भिद्यते " ।

अनेनैव न्यायेन संहितोपासनाया अप्यैक्यं द्रष्टव्यम्—य एवमेतां संहितां वेदेति ।

+ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् । अ० ३ पा० ३ अ० १ सू० १ ।

---

१ ग. °नानाध° । २ ख. °ण्यस्य । ३ क. ङ. °कीय ।

तथा पृथिवी पूर्वरूपमित्यादिकं वेद्यस्वरूपमप्युभयत्रैकविधम्। संधीयते प्रजया पशुभिरित्यादिकं फलमप्येकरूपम्। तस्मादुपासनैक्यं युक्तम्।

गुणोपसंहारन्यायश्च तत्रै×वाभिहितः—

"एकोपास्तावनाहार्या आहार्या वा गुणाः श्रुतौ।
अनुक्तत्वादनाहार्या उपकारः श्रुतैर्गुणैः॥
श्रुतत्वादन्यशाखायामाहार्या अग्निहोत्रवत्।
विशिष्टविद्योपकारः स्वशाखोक्तगुणैः समः॥

बाजसनेयके प्राणविद्यायामधिको गुणो रेतआख्यः श्रुतः—"रेतो होच्चक्राम" इति। नासौ **छान्दोग्ये** प्राणविद्यायामुपसंहर्तव्यः। अत्रानुक्तत्वात्। विद्योपकारस्तत्र श्रुतैरेव प्राणवागादिभिर्गुणैर्भविष्यतीति प्राप्ते ब्रूमः—एतच्छाखायामश्रवणेऽपि शाखान्तरे श्रुतत्वादुपसंहार्य एव। अग्निहोत्राद्यनुष्ठानेषु शाखान्तरोक्तगुणयुक्ततयैवानुष्ठानदर्शनात्। न च स्वशाखोक्तगुणैरेव विद्योपकारसिद्धौ गुणोपसंहारो निरर्थक इति वाच्यम्। कर्मभूयस्त्वात्फलभूयस्त्वमिति न्यायात्स्वशाखोक्तगुणवत्परशाखोक्तगुणानामप्युपकारित्वात्। तस्मादुगुणोपसंहारः कर्तव्यः"।

अनेनैव न्यायेनैतरेयकगतं वाक्पूर्वरूपं मन उत्तररूपमित्यादिगुणजातं **तैत्तिरीय** उपसंहर्तव्यम्। तैत्तिरीयगतं चाग्निः पूर्वरूपमित्यादिकमैतरेय उपसंहर्तव्यम्। तदेवं विद्यैक्ये गुणोपसंहारे च प्राप्ते सत्यत्रोद्गीथविद्यान्यायेनोभयं निराकरणीयम्। सोऽपि न्यायस्तत्रैवा+भिहितः—

"एका भिन्नाऽथवोद्गीथविद्या छन्दोगकाण्वयोः।
एका स्यान्नामसामान्यात्संग्रामादिसमत्वतः॥
उद्गीथावयवोंकार उद्गातेत्युभयोर्भिदा।
वेद्यभेदेऽर्थवादादिसाम्यमत्राप्रयोजकम्॥

उद्गीथविद्येति समाख्याया एकत्वाच्छान्दोग्यकाण्वशाखयोर्विद्यैकत्वमुचितम्। यद्यपि समाख्या न श्रौती तथाऽपि श्रौताः संग्रामादय उभयत्र समाः। तथाहि—**छान्दोग्ये** देवासुरभावं क्रमेण सात्त्विकेन्द्रियवृत्तीनां तामसेन्द्रियवृत्तीनां चाङ्गीकृत्य तत्संग्रामं निरूप्य वागादिदेवानामासुरविद्धत्वमुक्त्वा प्राणदेवस्यैकस्यैव तदविद्धत्वमुक्तम्। एतत्सर्वं **काण्ववेदेऽपि** समानम्। तस्मादुभयत्र विद्यैक्ये प्राप्ते ब्रूमः—भिन्ने-

× उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च। अ० ३ पा० ३ अ० २। सू० ९।
+ अन्यथात्वं शब्दादिति चेन्नाविशेषात्। अ० ३ पा० ३ अ० ३। सू० ६।

१ ख. अनु°। २ ङ. तदेवं। ३ ग, घ. °णस्यै°। ४ ख. °स्माद्विद्यै°।

यमुद्गीथविद्या वेद्यस्वरूपस्य भिन्नत्वात् । छान्दोग्ये तावत्सामभक्तिविशेषस्योद्गीथस्यावयवो य ओंकारः स एव प्राणदृष्ट्योपासनीयः । काण्ववेदे तु कृत्स्नोद्गीथभक्तेर्य उद्गाता वाग्गिन्द्रियप्रेरकः प्राणः स उद्गातृत्वेनोपास्य इति वेद्यभेदाद्विद्याभेदः । यत्तु संग्रामसाम्यमुक्तं तदप्रयोजकमार्थवादिकत्वात् । यद्यपि प्राणस्यासुराविद्धत्वेन श्रेष्ठत्वमुक्तं तद्यद्यप्युपास्यं तथाऽप्युक्तस्य वेद्यभेदस्यानिराकरणाद्भिन्नैवोद्गीथविद्या " ।

अनेनैव न्यायेन प्रकृतेऽपि वेद्यभेदाद्विद्याभेदो द्रष्टव्यः । तैत्तिरीयके पञ्चाधिकरणोपासने पूर्वं व्याख्यातानि वेद्यानि । ऐतरेयके त्वधिदैवाध्यात्मभेदभिन्नं वेद्यम् । तथा चाऽऽम्नायते—" वायुश्चाऽऽकाशश्चेत्यधिदैवतम् । अथाध्यात्मं वाक्पूर्वरूपं मन उत्तररूपम् " इत्यादि । यत्तु पृथिवी पूर्वरूपमित्यस्य वेद्यस्योभयत्र समानत्वमुक्तम् । नैतावता विद्यैकत्वं संभवति । वैलक्षण्यस्य बहुलत्वाद्बहुनुग्रहस्य च न्याय्यत्वात् । सति च विद्याभेदे गुणोपसंहारो न युक्तः । यथा दर्शपूर्णमासगुणानां भिन्नाग्निहोत्राख्ये कर्मणि नोपसंहारस्तद्वदत्र विद्याभेदे गुणानामनुपसंहारे च स्थिते सत्यन्यदपि चिन्तयितुं विभज्यते—द्विविधान्युपासनान्यहंग्रहयुक्तानि प्रतीकविषयाणि चेति । येषु परमात्मा सगुणः सन्नुपास्यते तान्यहंग्रहयुक्तानि । तद्यथा—"स य एषोऽन्तर्हृदय आकाशः । तस्मिन्नयं पुरुषो मनोमयः । अमृतो हिरण्मयः " इत्यत्र हृदयाकाशमध्यवर्ती परमात्माख्यः पुरुषो मनोमयत्वादिगुणयुक्त उपासितव्यः परमात्माऽहमिति । स चाहंग्रहश्चतुर्थाध्याये—" आत्मेति तूपगच्छन्ति ग्राहयन्ति च " [ब्र० सू० अ० ४ पा० १ सू० ३] इति सूत्रेऽभिहितः । परमात्मव्यतिरिक्तानि लौकिकानि वस्तून्युत्कृष्टदेवतादृष्ट्या ब्रह्मदृष्ट्या वा संस्कृत्य यत्रोपास्यन्ते तानि प्रतीकविषयाणि । तद्यथा—पृथिवी पूर्वरूपमित्यत्र भूदेवतादृष्ट्या संस्कृतं पूर्ववर्णस्वरूपमुपास्यम् । मनो ब्रह्मेत्युपासीतेत्यादौ ब्रह्मदृष्ट्या संस्कृतं मनःप्रभृतिकमुपास्यम् । तच्च प्रतीकमुपासकेन न स्वात्मतया ग्रहीतव्यम् । * प्रतीकस्य ब्रह्मकार्यत्वेनोत्कृष्टदृष्टिप्रत्यालम्बनत्वात्प्रतीकमित्युच्यते । तस्मिंश्च प्रतीकेऽहंग्रहो नास्तीति चतुर्थाध्यायस्य प्रथमपादे + चिन्तितम्—

" प्रतीकेऽहंदृष्टिरस्ति न वा ब्रह्मविभेदतः ।
जीवप्रतीकयोर्ब्रह्मद्वाराऽहंदृष्टिरिष्यते ॥
प्रतीकत्वोपासकत्वहानिर्ब्रह्मैक्यवीक्षणे ।
अवीक्षणे तु भिन्नत्वान्नास्त्यहंदृष्टियोग्यता " ॥ इति ।

---

* अस्मिन्वाक्ये यत इति शेषः । + न प्रतीके न हि सः । अ० ४ पा० १ अ० ३ सू० ४ ।

---

१ ङ. °यः । अन्तरेण तालुके " इ° । २ ग. पूर्वं व° । ३ ग. घ. तच्चोत्कृष्ट° ।

" मनो ब्रह्मेत्युपासीत " " आदित्यो ब्रह्मेत्यादेशः "इत्यादौ ब्रह्मदृष्ट्या संस्कृतं मनआदित्यादिप्रतीकमुपास्यम् । तच्च प्रतीकमुपासकेन स्वात्मतया ग्रहीतव्यम् । प्रतीकस्य ब्रह्मकार्यत्वेन ब्रह्मणा सह भेदाभावाज्जीवस्य च ब्रह्माभिन्नत्वाद्ब्रह्मद्वारोपास्यस्य प्रतीकस्योपासकजीवस्य च भेदाभावेनैकत्वसंभवादिति प्राप्ते ब्रूमः—यदि ब्रह्मकार्यस्य[1] प्रतीकस्य ब्रह्मैक्यमवलोक्येत तदा प्रतीकस्वरूपमेव विलीयेत घटस्य मृद्रूपेणैक्ये विलयदर्शनात् । यदि जीवस्य ब्रह्मैक्यमवलोक्येत तदा जीवत्वस्यापाये सत्युपासकत्वं हीयेत । अथोपास्योपासकस्वरूपलोभेन कार्यकारणैक्यं जीवब्रह्मैक्यं च न पर्यालोच्येत तदा गोमहिषवदत्यन्तभिन्नयोः प्रतीकोपासकयोर्नास्त्येकत्वयोग्यता । तस्मान्न प्रतीकस्याहंदृष्टिः ।

तत्राहंग्रहोपासनानां सर्वेषामपि ब्रह्मसाक्षात्कारफलत्वादेकेनोपासनेन ब्रह्मणि साक्षात्कृते सत्युपासनान्तरवैयर्थ्यादुपासनान्तरप्रवृत्तौ पूर्वसाक्षात्कारविक्षेपप्रसङ्गाच्च बहुषूपासनेषु ब्रह्मसाक्षात्कारार्थिनः प्राप्तेष्विदं वा तद्वा यत्किंचिदेकमेवानुष्ठेयमित्येतादृशो विकल्पो निर्णीतः । इह तु संहितोपासनमेकं वा द्वयं वा यथेच्छमनुष्ठेयम् । एतदपि **तृतीयध्यायस्य तृतीयपादे** + निर्णीतम्—

" प्रतीकेषु विकल्पः स्याद्यथाकाम्येन वा मितिः ।
अहंग्रहेष्विवैतेषु साक्षात्कृत्यै विकल्पनम् ॥
देवो भूत्वेतिवन्नात्र काचित्साक्षात्कृतौ मितिः ।
याथाकाम्यमतोऽमीषां समुच्चयविकल्पयोः ॥

प्रतीकोपासनेषु पूर्वाधिकरणन्याय इति प्राप्ते ब्रूमः—अस्त्यत्र महद्वैषम्यम् । "देवो भूत्वा देवानप्येति " इति जीवन्नेव भावनाप्रकर्षवशाद्देवभावसाक्षात्कारं प्राप्य मृतो देवत्वमुपैतीति यथाऽहंग्रहेष्ववगम्यते न तथा प्रतीकेषु साक्षात्कारफलत्वे किंचिन्मानमस्ति । साक्षात्कारफलत्वाभावे[3] च तत्र तत्र प्रोक्ता भोग्यवस्तुप्राप्तयः फलत्वेनाभ्युपगन्तव्याः । तथा सति भिन्नफलत्वान्नान्यानर्थक्यं विक्षेपशङ्का तु दूरापेता । एकं प्रतीकं केषुचित्क्षणेषूपास्य क्षणान्तरेषु प्रतीकान्तरोपासने तु पूर्वोपास्तिजन्यस्यापूर्वस्याविनाशात् । तस्माद्विकल्पेनैकमेव वा बहूनि वा समुच्चित्य वा याथाकाम्येन प्रतीकमुपासितव्यम् " ।

" पृथिवी पूर्वरूपम् " इत्यत्र प्रथमनिर्दिष्टत्वेनोद्देश्यतया यद्यपि पृथिव्याः प्रतीकत्वं

+ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् । अ० ३ पा० ३ अ० ३९ सू० ६९ ।

---

१ ग. °र्थत्वेन ब्रह्मणा सहैक्यं प्रतीकस्य तदा प्रतीक° । घ. °र्थत्वेनैक्यं प्र° । २ घ. °स्य प्रती° । ३ ग. घ. °वे त° । ४ ख. °नाभि।° ।

प्राप्तम् । तथा चरमनिर्दिष्टत्वेन विधेयतया पूर्ववर्णस्य दृष्टिपरत्वं प्राप्तम् । तथाऽपि पृथिव्या उत्कृष्टत्वात्तद्दृष्टिरेव पूर्ववर्णे कर्तव्या । यथोत्कृष्टविष्णुशिवादिदृष्टिर्निकृष्टे शालग्रामादौ क्रियते न तु विपर्ययस्तद्वत् । उत्कर्षन्यायश्चतुर्थाध्यायस्य प्रथमपादे + चिन्तितः—

" किमन्यधीर्ब्रह्मणि स्यादन्यस्मिन्ब्रह्मधीरुत ।
अन्यदृष्ट्योपासनीयं ब्रह्मात्र फलदत्वतः ॥
उत्कर्षेतिपरत्वाभ्यां ब्रह्मदृष्ट्याऽन्यचिन्तनम् ।
अन्योपास्त्या फलं दत्ते ब्रह्मातिथ्याद्युपास्तिवत् ॥

" मनो ब्रह्म " इत्यात्राब्रह्मरूपमनोदृष्टिं ब्रह्मणि कृत्वा ब्रह्मोपासनीयम् । ब्रह्मणः फलप्रदत्वेनोपास्यतार्हत्वादिति प्राप्ते ब्रूमः—ब्रह्मण उत्कृष्टत्वात्तद्दृष्टिर्निकृष्टे मनसि कर्तव्या । लोके हि निकृष्टे भृत्ये राजदृष्टिं कृत्वा राजवत्तं पूजयन्ति । नतु विपर्ययैः । किंच " मनो ब्रह्मेत्युपासीत " इत्यत्र ब्रह्मशब्द इतिशब्दपरत्वेन दृष्टिलक्षको भविष्यति । मनःशब्दश्चानितिपरत्वान्मुख्यार्थवाची । यथा स्थाणुं चोर इति प्रत्येतीत्यत्र स्थाणुशब्दो मुख्यार्थवाची चोरशब्दो दृष्टिलक्षकस्तद्वत् । न चाब्रह्मस्वरूपस्य मनस उपास्यत्वे ब्रह्मणः फलप्रदत्वानुपपत्तिः । अब्रह्मरूपस्यातिथेरुपासने कर्माध्यक्षत्वेन यथा फलं प्रयच्छति तद्वदत्रापि संभवात् । तस्माद्ब्रह्मणि प्रतीके ब्रह्मधीः कर्तव्या " ।

यद्यप्यधिलोकमितिशब्देन पृथिव्या अधिकरणत्वाभिधानात्प्रतीकत्वं प्रतिभाति तथाऽपि पृथिवीदृष्टिरेवात्र पूर्ववर्णात्मके युक्ता । यथा लोकेषु पञ्चविधं सामोपासीतेत्यत्राधिकरणत्ववाचिन्या सप्तम्या निर्दिष्टानां लोकानां दृष्टिः कर्माङ्गे साग्नि प्रतीके संपादिता तद्वत् । एतदपि यदि " आदित्यादिमतयश्चाङ्ग उपपत्तेः " [ब्र० सू० अ० ४ पा० १ सू० ६] इति सान्न उपास्तिक्रियाकर्मत्वेनाभिधानाद्दृष्टिलक्षकत्वं लोकशब्दस्य युक्तमित्यभिप्रेत्य लोकदृष्ट्या सामारूयं प्रतीकमुपास्येत तर्ह्यत्रापि महासंहिता व्याख्याता वेदेतिसंहिताशब्देन विदिक्रियाकर्मणो निर्देशात्पृथिव्यादिदृष्ट्या संहितोपास्यताम् । पृथिव्याः प्रतीकत्वाभावेऽपि दृष्टिविषयत्वाभिप्रायेणाधिलोकमिति निर्देश उपपद्यते । तत्रेदमपरं चिन्तनीयम् । उपासनं नाम किं सकृत्प्रत्यय आहोस्वित्प्रत्ययावृत्तिरिति । तत्र यथा " अष्टवर्षं ब्राह्मणमुपनयीत " इत्यत्र सकृदनुष्ठानाद्विधिसिद्धिस्तद्वत्सकृत्प्रत्ययेनैव विधेश्चरितार्थत्वान्नाऽऽवृत्तिरिति चेन्न वेदाध्ययनवदा-

+ ब्रह्मदृष्टिरुत्कर्षात् । अ० ४ पा० १ अ० ४ सू० ९ ।

१ ग. घ. °यः । ब्र° । २ क ख. घ. ङ. °दृष्ट्यादि° ।

वर्तनीयत्वात् । यथा " स्वाध्यायोऽध्येतव्यः " इत्यत्र वेदोच्चारणमावर्त्यते तथा प्रत्यय आवर्तनीयः । तत्रोच्चारणावृत्तिरेवाध्ययनशब्दार्थ इति चेत्तर्ह्यत्रापि प्रत्ययावृत्तिरेवोपासनाशब्दार्थोऽस्तु । अत एव भगवद्भिर्भाष्यकारैरावृत्त्यधिकरणेऽभिहितम्—" अपि चोपासनं निदिध्यासनं चेत्यन्तर्णीतावृत्तिगुणैव क्रियाऽभिधीयते । तथा हि । लोके गुरुमुपास्ते राजानमुपास्त इत्यत्र यस्तात्पर्येण गुर्वादीननुवर्तते स एवमुच्यते । तथा ध्यायति [illegible] पतिमिति या निरन्तरस्मरणा पतिं प्रति सोत्कण्ठा सैवमभिधीयते " इति । यद्यपि पुरश्चरणादौ जप्यमन्त्रावृत्तिसंख्येव प्रत्ययावृत्तेरियत्ता न क्वचिच्छ्रुता तथाऽपि यस्मिन्प्रतीके यद्देवतादृष्टिर्विहिता तत्प्रतीकं तद्देवतारूपमिति निरूढोऽभिमानो यावत्संपद्यते तावदावर्तयेत् । अत एवं वार्तिककारैरुक्तम्—

" शास्त्रार्पितधियोपेत्य यत्तादात्म्याभिमानतः ।
चिरासनं भवेद्यत्र तदुपासनमुच्यते " ॥ इति ।

यथा प्रबुद्धा अमात्याः कंचिद्राजकुमारं बालं राज्येऽभिषिच्य यावता कालेनायं सर्वासां प्रजानां राजेत्यभिमानेन तदाज्ञावशवर्तित्वं संपद्यते तावदप्रमत्तास्तं प्रयत्नेन पालयन्ति तद्वत् । संपन्ने तु प्रतीकविषये देवत्वाभिमाने स पुनर्नापैति । यथा जीर्णदेवालये पूजारहितामपि प्रतिमां दृष्ट्वा देवत्वबुद्धिरनुवर्तते तद्वत् । तस्मात्प्रतीके देवत्वाभिमानदार्ढ्यपर्यन्तमुपासीनस्य यथोक्तं फलं सिध्यति ।

इति श्रीमत्सायणाचार्यविरचिते श्रीबुक्कणसाम्राज्यधुरंधरमाधवविद्यारण्यपरमेश्वरसंबन्धिवेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये सप्तमप्रपाठके सांहित्यामुपनिषदि तृतीयोऽनुवाकः ॥ ३ ॥

अथ सप्तमे चतुर्थोऽनुवाकः ।

तृतीयानुवाके प्रजादिफलसिद्ध्यर्थं संहितोपासनमुक्तम् । तत्र ब्रह्मज्ञानसाधनं चित्तैकाग्र्यमप्यर्थात्संपद्यते । अथ मेधारहितस्य श्रुतग्रन्थार्थविस्मृतौ ब्रह्मज्ञानोदयासंभवाद्रोगादिना शरीरादिपाटवरहितस्याशनाच्छादनादिभिर्वा रहितस्य ब्रह्मज्ञानहेतुभूतश्रवणादिप्रवृत्त्यसंभवान्मेधादिसिद्ध्यर्था मन्त्राश्चतुर्थेऽनुवाकेऽभिधीयन्ते । तत्राऽऽदौ मेधाकामेन जप्यं मन्त्रमाह—

यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात्संबभूव । स

१ ब. °व च पा° । २ क. ख. ङ. °ये सांहि° ।

मेन्द्रो मेधयां स्पृणोतु । अमृतस्य देव धारणो भूयासम्, इति ।

यः प्रणवो गायत्र्यादिच्छन्दोयुक्तानां वेदानां मध्य ऋषभः श्रेष्ठः । तच्च कठवल्लीषु—" सर्वे वेदा यत्पदमामनन्ति " इत्युपक्रम्य " तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् " इत्याम्नातम् । स च प्रणवो विश्वरूपः सर्वजगदात्मकः । अर्थप्रपञ्चस्य शब्दात्मकवाच्यन्तर्भावाद्वाचश्चाकारे प्रणवस्य प्रथमावयवेऽन्तर्भावात् । अर्थप्रपञ्चस्य वाच्यन्तर्भाव ऐतरेयके समाम्नातः—" तस्य वाक्तन्तिर्नामानि दामानि तदस्येदं वाचा तन्त्या नामभिर्दामभिः सर्वं सितं सर्वं हीदं नामानि " इति । यथा वणिजः प्रसारितया दीर्घरज्ज्वा संलग्नैर्बहुभिः पाशैर्बहून्बलीवर्दान्बध्नन्ति, तथा तस्य प्रणवोपाधिकस्य परमेश्वरस्य वागेव दीर्घरज्जुर्देवदत्तादिनामानि पाशास्तैः सर्वमर्थप्रपञ्चजातं बद्धम् । तस्मात्सर्वं नामनि वर्तते । सर्वो जनः स्वकीयं नाम श्रुत्वा पाशेन बद्ध्वा समाकृष्ट इवाऽऽगच्छतीति तस्य वाक्यस्यार्थः । अन्तर्भावितकृत्स्नार्थप्रपञ्चोपेताया वाचः प्रणवेऽन्तर्भावश्छन्दोगैराम्नायते—" तद्यथा शङ्कुना सर्वाणि पर्णानि [illegible] सर्वा वाक्संतृण्णा " इति लोके [illegible] शङ्कुशब्दाभिधेयेन स्वान्तर्गतशलाकाविशेषेण यथा व्याप्तानि तद्वदोंकारेण सर्वाऽपि वाग्व्याप्तेत्यर्थः । प्रणवे वाचोऽन्तर्भावोऽप्यकारद्वारेण द्रष्टव्यः । एतदप्यैतरेयके समाम्नातम्—" अकारो वै सर्वा वाक्सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति " इति । कवर्गादिषु स्पर्शनामकेष्वक्षरेषु शषसहेषूष्मनामकेषु चाकारोऽनुगतो मातृकामन्त्रे पठ्यते । तस्मादकारस्य सर्ववाङ्मयत्वमित्यर्थः । तदेवं प्रणवस्य विश्वरूपत्वं सिद्धम् । तादृशः प्रणवश्छन्दोभ्यो वेदेभ्योऽधिकत्वेन सारत्वेन संबभूव सम्यक्प्रजापतेः प्रादुरभूत् । तथा च च्छन्दोगा आमनन्ति—" प्रजापतिर्लोकानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयी विद्या संप्रास्रवत्तामभ्यतपत्तस्या अभितप्ताया एतान्यक्षराणि संप्रास्रवन्त भूर्भुवः स्वरिति तान्यभ्यतपत्तेभ्योऽभितप्तेभ्य ओंकारः संप्रास्रवत् " इति । अभ्यतपत्सारजिघृक्षया पर्यालोचितवान् । संप्रास्रवत्सम्यक्सारत्वेन प्रत्यभादित्यर्थः । अमृतादित्यनेन [illegible] । मरणरहितं मोक्षरूपं यदमृतं तदेवोंकारप्रादुर्भूतौ निमित्तम् । अत एव च्छान्दोग्ये च तस्योंकारप्रादुर्भाववाक्यस्योपक्रमे—" ब्रह्मसंस्थोऽमृतत्वमेति " इत्युपक्रान्तम् । प्रणवस्य ब्रह्मवाचकत्वेन प्रणवनिष्ठ एव ब्रह्मसंस्थः । स प्रणववाच्य इन्द्रः परमेश्वरो मेधया ग्रन्थतदर्थधारणशक्त्या मां विद्यार्थिनं स्पृणोतु प्रीणयतु । हे देव त्वत्प्रसादादहममृतस्य मोक्षोपलक्षितस्य मुक्तिहेतोर्ग्रन्थादेर्धारयिता भूयासम् ।

मेधाहेतुमन्त्रमुक्त्वा रोगादिराहित्यहेतुमन्त्रमाह—

शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां

---

१ घ. तदैत° । २ क. ङ. °भ्योऽधि° । ३ घ. °हेतुं म° । ४ क. घ. ङ. 'हेतुं म' ।

भूरि विश्रुवम् । ब्रह्मणः कोशोऽसि मेध-
याऽपिहितः । श्रुतं मे गोपाय, इति ।

मम विद्याधिकारिणः शरीरं विचर्षणं विचक्षणं रोगादिराहित्येन विद्याभ्यासयोग्य-मस्तु । मदीया जिह्वाऽप्यतिशयेन माधुर्योपेता ग्रन्थाभ्यासपटीयसी भवतु । कर्णाभ्यां च विद्योत्पादकं बहुविधग्रन्थजातं श्रूयासं कदाचिदपि बाधिर्यदोषो मा भूत् । हे प्रणव त्वं ब्रह्मणो जगत्कारणस्य परवस्तुनो ध्यानाय कोश आलम्बनभूतोऽसि । यथा चर्म-मयः कोशः खड्गरक्षणायाऽऽलम्बनभूतस्तद्वद्ब्रह्मध्यानरक्षणाय प्रणव आलम्बनभूतः । अत एव कठवल्लीष्वोंकारं प्रकृत्याऽऽम्नायते-" एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् " इति । तादृशः प्रणवो मेधया धारणशक्त्याऽपिहितो व्याप्तः । तथाविधप्रणवप्रतिपाद्य हे परमेश्वर मदीयं श्रुतं कर्णाभ्यामवगतं वेदार्थरहस्यं विस्मृत्यादिदोषनिवारणेन पालय ।

आरोग्यादिसिद्धये जप्यो मन्त्रोऽभिहितः । अथान्नपानवस्त्रादिसिद्धये होमार्था मन्त्रा उच्यन्ते । तत्र प्रथमं मन्त्रमाह—

आवहन्ती वितन्वाना (१) । कुर्वाणा चीरमात्मनः ।
वासांऽसि मम गावश्च । अन्नपाने च सर्वदा । ततो मे
श्रियमावह । लोमशां पशुभिः सह स्वाहा, इति ।

हे प्रणवाभिधेय परमेश्वर या श्रीरुक्तविधा तां श्रियं मदर्थमावह सर्वतः संपादय । किंविधेति तदुच्यते । यानि वासांसि याश्च गावो ये चान्नपाने तत्सर्वं सर्वदा मम भोगार्थमावहन्ती सर्वतः संपादयन्ती तथा संपादितं सर्वं वितन्वाना विस्तारयन्ती वर्ध-यन्ती वर्धितं तत्सर्वमात्मनो विद्यार्थिनो मम चिरं दीर्घकालं कुर्वाणा यथा विनष्टं न भवति तथा स्थापयन्ती । यस्मादेवंविधा श्रीस्ततस्तामावह । पुनरपि कीदृशीम्—पशुभिः सह लोमशामजावयोऽश्वाश्चेत्येवमादयो ये पशवस्तैः सह वर्तमानत्वेन बहुविधरोमयु-क्ताम् । तथाविधश्रीप्रदाय देवायेदमाज्यादिहोमद्रव्यं स्वाहा हुतमस्तु ।

अथ वस्त्रान्नपानादिसमृद्ध्या श्रिया युक्तस्य विद्यासंप्रदायप्रवृत्त्यर्थं शिष्यसंपादकहो-मार्थान्पञ्च मन्त्रानाह—

आ मा यन्तु ब्रह्मचारिणः स्वाहा । वि माऽऽयन्तु
ब्रह्मचारिणः स्वाहा । प्र माऽऽयन्तु ब्रह्मचारिणः

---

१ क. ख. ङ स्वाहुं ।

स्वाहा । दमायन्तु ब्रह्मचारिणः स्वाहा । शमा-
यन्तु ब्रह्मचारिणः स्वाहा (२), इति ।

ब्रह्मचारिणो वैदिकविद्याभ्यासपराः शिष्या मां संप्रदायप्रवर्तकमाचार्यं**मायन्तु** प्राप्नुवन्तु । विशब्दो विविधत्वमाचष्टे । पश्वादिकामाः स्वर्गलोककामा ब्रह्मलोककामा मोक्षकामाश्चेत्येवं ब्रह्मचारिणां विविधत्वम् । प्रशब्दः प्रकर्षमाचष्टे । विद्याग्रहणे प्रज्ञाति-शयः प्रकर्षः । दमित्यनेनाव्ययेन दान्तिरभिधीयते । बाह्येन्द्रियचेष्टाभ्यो बाललीलाभ्य उपरतिरत्र दान्तिः । शमित्यनेन शान्तिरभिधीयते । क्रोधादिचित्तदोषराहित्यं शान्तिः । वि मायन्तित्यादयश्चत्वारो मन्त्राः शाखान्तरगतत्वाभिप्रायेण केषुचिद्देशेषु नाऽऽम्ना-यन्ते ।

संप्रदायप्रवृत्तिजनितकीर्तिप्रदौ मन्त्रावाह—

यशो जनेऽसानि स्वाहा । श्रेयान्वस्यसोऽसानि स्वाहा, इति ।

हे परमेश्वर त्वत्प्रसादादहं **जने** सर्वेषु जनेषु **यशोऽसानि** । आचार्योऽयमित्येवं यशस्वी भवानि । वसु धनं बहुलं यस्य सोऽयं वसुमानतिशयेन वसुमान्वसीयांस्तादृशा-दप्यहं **श्रेयान्प्रशस्यतरो** भवानि ।

यशस्वित्वश्रेयस्त्वहेतुप्रतिपादकांस्त्रीन्मन्त्रानाह—

तं त्वा भग प्रविशानि स्वाहा । स मा
भग प्रविश स्वाहा । तस्मिन्त्सहस्रशाखे ।
नि भगाहं त्वयि मृजे स्वाहा, इति ।

भगशब्द ऐश्वर्यादिषड्गुणवाचकः ।

" ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना " ॥ इति स्मरणात् ।

तेन तद्वानुपलक्ष्यते । हे भगवन्परमेश्वर तं भगवन्तं त्वामहं **प्रविशानि** तादात्म्येन त्वयि प्रविष्ट इव सर्वदा त्वां भजानि । **स** तादृशस्त्वमपि मां **प्रविश** मयि प्रविष्ट इवाऽऽदरेण मामनुगृहाण । **सहस्रमूर्तिभेदयुक्ते तस्मिन्**स्त्वयि मामहं **निमृजे** नितरां शोधयामि । त्वद्भजनमेव श्रेयोहेतुरित्यर्थः ।

दृष्टान्तपुरःसरं बहुशिष्यसंपादकं मन्त्रमाह—

यथाऽऽपः प्रवतोऽऽयन्ति । यथा मासा अहर्जरम् । एवं मां

---

१ ख. प्रतिज्ञाति° । २ ख. स्त्वम° । ३ ख. °श प्र° ।

ब्रह्मचारिणः । धातरायन्तु सर्वतः स्वाहा, इति ।

आपो लोके प्रवता प्रवणवता निम्नदेशगतेन मार्गेण यथा त्वरया समागच्छन्ति । यथा च मासाश्चैत्रवैशाखादयः सर्वेऽप्यहर्जरं संवत्सरमायन्ति । अहानि षष्ट्युत्तरशतत्रयसंख्याकानि जीर्णान्यन्तर्भवन्ति यस्मिन्संवत्सरे सोऽयमहर्जरः । न खलु कश्चिदपि मासः संवत्सरमतिक्रामति । हे धातः सर्वस्य जगतो विधातः सर्वेऽपि ब्रह्मचारिणो मासन्यायेन मामनतिक्रामन्तो जलन्यायेन त्वरोपेताः सर्वस्मादपि देशान्ममागच्छन्तु ।

होममन्त्रानभिधायोपस्थानमन्त्रमाह—

प्रतिवेशोऽसि प्र मा भाहि प्र मा पद्यस्व (३), इति ।

वितन्वाना शमायन्तु ब्रह्मचारिणः स्वाहा
धातरायन्तु सर्वतः स्वाहैकं च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके सप्तमप्रपाठके
चतुर्थोऽनुवाकः ॥ ४ ॥

श्रमापनयनस्थानं गृहं प्रतिवेश इत्युच्यते । हे धातस्त्वं मम प्रतिवेशोऽसि । अतो मां प्रभाहि प्रकाशय ब्रह्मविद्याचार्यत्वेन प्रख्यातं कुरु । तदर्थं मां प्रपद्यस्व प्राप्नुह्यनुगृहाणेत्यर्थः ।

इति श्रीमत्सायणाचार्यविरचिते श्रीबुक्कणसाम्राज्यधुरंधरमाधवविद्यारण्यपरमेश्वरसंबन्धिवेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये सप्तमप्रपाठके सांहित्यामुपनिषदि चतुर्थोऽनुवाकः ॥ ४ ॥

अथ सप्तमे पञ्चमोऽनुवाकः ।

चतुर्थे मेधादिसिद्ध्यर्था मन्त्रा उक्ताः । अथ पञ्चमषष्ठयोर्ब्रह्मोपासनमुच्यते । तत्राप्यङ्गदेवतानामुपासनं पञ्चमे । षष्ठे त्वङ्गिनो ब्रह्मण इति विभागः । अङ्गदेवताध्यानस्य प्रतीकत्वेन व्याहृतित्रयं दर्शयति—

भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः, इति ।

भूरित्येका । भुवरिति द्वितीया । सुवरिति तृतीया । एतास्त्रिसंख्याका व्याहृतिशब्दवाच्याः । व्याहरणमुच्चारणं तद्विषयत्वान्मन्त्राणां व्याहृतित्वम् । यद्वा विविधे कर्मण्याहियन्ते प्रयुज्यन्त इति व्याहृतयः । तत्प्रयोगप्रसिद्धिद्योतनार्थो वैशब्दः ।

अग्निहोत्रहविष उपसादने दर्शपूर्णमासचातुर्मास्यहविषामासादने च प्रयोग एवमाम्नायते— " अग्निहोत्रमेताभिर्व्याहृतिभिरुपसादयेत् " इति । " दर्शपूर्णमासौ चातुर्मास्यान्यालभमान एताभिर्व्याहृतिभिर्हवीष्यासादयेत् " इति च ।

एवमाधानादावुदाहार्यं कर्मकाण्डप्रसिद्धं व्याहृतित्रयं दर्शयित्वा तथैव प्रतीकत्वेन व्याहृत्यन्तरं दर्शयति —

तासामु ह स्मैतां चतुर्थीम् । माहाचमस्यः प्रवेदयते । मह इति इति, ।

महान्सोमपानार्थश्चमसः पात्रविशेषो यस्य मुनेः स मुनिर्महाचमसः । बहुषु सोमयागेषु वर्तमानत्वाच्चमसस्य महत्त्वम् । तस्यापत्यं माहाचमस्यनामक ऋषिः । स तासां भूरादीनां तिसृणां व्याहृतीनां चतुर्थीं चतुःसंख्यापूरणीमेतां मह इति व्याहृतिं प्रवेदयते प्राधान्येनोपासनायोपदिशति । उ ह स्मेति निपातत्रयसमुदायः प्रसिद्ध्यर्थः । ऋषेर्नामग्रहणमुपासनायामनुस्मरणार्थम् ।

तस्मिन्व्याहृतिचतुष्टये दृष्टिविशेषं विधत्ते—

तद्ब्रह्म । स आत्मा । अङ्गान्यन्या देवताः, इति ।

यदेतन्मह इति चतुर्थव्याहृतिरूपमस्ति तदेतद्ब्रह्म वस्त्विति चिन्तयेत् । ब्रह्मत्वादेव चतुर्थव्याहृतिरूपः सोऽयं शरीरमध्येऽवस्थित आत्मा । अन्यास्तु व्याहृतिदेवता हस्तपादादिसदृशान्यङ्गानीति चिन्तयेत् । यद्वा चतुर्थव्याहृतिः प्रशस्यते । महःशब्दस्य पूजावाचिधातुनिष्पन्नत्वात् । पूज्यब्रह्मवस्तुरूपेण स्तुतिर्युक्ता । यथा शरीरगतावयवापेक्षया चेतन आत्मोत्कृष्टस्तथा व्याहृत्यन्तरापेक्षया मह इति चतुर्थव्याहृतिरुत्कृष्टा ।

उक्तासु व्याहृतिषु लोकदृष्टिं विधत्ते—

भूरिति वा अयं लोकः । भुव इत्यन्तरिक्षम् ।
सुवरित्यसौ लोकः (१) । मह इत्यादित्यः ।
आदित्येन वाव सर्वे लोका महीयन्ते, इति ।

यस्मादादित्येन प्रकाशिताः सन्तः सर्वे लोकाः पूज्या व्यवहारक्षमा भवन्ति तस्मान्मह इतिव्याहृतेरादित्यरूपत्वं युक्तम् ।

अथ तास्वेव व्याहृतिषु देवाविशेषदृष्टिं विधत्ते—

भूरिति वा अग्निः । भुव इति वायुः । सुवरित्यादित्यः । मह

---

१ क. ख. ग, ङ. 'हुतीभि' । २ क. ख. ग, ङ. °हुतीभि° । ३ क, ख. ङ. °त्रयं स°

इति चन्द्रमाः । चन्द्रमसा वाव सर्वाणि ज्योतींष्यपि महीयन्ते, इति ।

सन्ति हि चन्द्रमण्डले परितोऽवस्थितानि नक्षत्रज्योतींषि सर्वाण्यपि पूज्यानि भासन्ते। अथ तास्वेव वेददृष्टिं विधत्ते—

भूरिति वा ऋचः । भुव इति सामानि । सुवरिति यजूंषि ।
(२) । मह इति ब्रह्म । ब्रह्मणा वाव सर्वे वेदा महीयन्ते, इति ।

वेदत्रयगता मन्त्रविशेषा ऋगादयः । ब्रह्म त्वोंकारस्तेन हि सर्वे वेदाः पूज्यन्ते वेदोच्चारणस्य प्रणवपूर्वकत्वात् ।

अथ प्राणदृष्टिं विधत्ते—

भूरिति वै प्राणः । भुव इत्यपानः । सुवरिति व्यानः ।
मह इत्यन्नम् । अन्नेन वाव सर्वे प्राणा महीयन्ते, इति ।

अन्नेन हि भुक्तेन प्राणास्तृप्यन्ति ।

यथोक्तलोकादिदृष्टिभिरुक्ता व्याहृतीरुपसंहरति—

ता वा एताश्चतस्रश्चतुर्धा । चतस्रश्चतस्रो व्याहृतयः, इति ।

या भूरित्यादिव्याहृतयस्ता एताश्चतस्रो व्याहृतयो लोकदेववेदप्राणदृष्टिभिश्चतुर्धा भिद्यन्ते । तथा सति भूरित्येका व्याहृतिः पृथिव्यग्निर्ऋग्वेदः प्राण इत्येवं चतुर्विधा । ततश्चतस्रो व्याहृतयो भवन्ति । एवं भुव इत्यादिष्वपि प्रत्येकं चतुष्टे सति षोडश संपद्यन्ते । तासां सर्वासामपि संग्रहाय चतस्रश्चतस्र इति वीप्सा ।

तासां व्याहृतीनामुपासनं विधत्ते—

ता यो वेद । स वेद ब्रह्म । सर्वेऽस्मै देवा बलिमावहन्ति (३), इति ।

असौ लोको यजूंषि वेद द्वे च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके सप्तमप्रपाठके
पञ्चमोऽनुवाकः ॥ ५ ॥

ताः पृथिव्यादिदृष्टिभिर्युक्ता व्याहृतीर्यो वेदोपास्ते तस्मा उपासकाय सर्वे देवा इन्द्रादयो बलिं पूजामावहन्ति संपादयन्ति । ननु यथोक्तव्याहृतिरूपप्रतीकोपासकस्य ब्रह्मलोकप्राप्तिर्नास्ति, " अप्रतीकालम्बनान्नयतीति बादरायणः " [ब्र० सू० अ० ४ पा० ३ सू० १५] इति सूत्रे प्रतीकरहितब्रह्मोपासकानामेव तत्प्राप्तिनिर्णयात् । ततो ब्रह्मप्राप्त्यभावेन सर्वदेवपूज्यत्वं न युक्तम् । नायं दोषः । यस्माद्यः पुमान्या-

१ ख. °दिषु प्र° ।

हृतीर्वेद स पुमान्वक्ष्यमाणानुवाकोक्तं ब्रह्मोपास्ते । ब्रह्मोपासनमेवात्र प्रधानम् । व्याहृत्युपासनमङ्गम् । तस्माद्ब्रह्मप्राप्तौ सत्यां सर्वदेवपूज्यत्वं युक्तम् ॥

इति श्रीमत्सायणाचार्यविरचिते श्रीबुक्कणसाम्राज्यधुरंधरमाधवविद्यारण्यपरमेश्वरसंबन्धिवेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये सप्तमप्रपाठके सांहित्यामुपनिषदि पञ्चमोऽनुवाकः ॥ ५ ॥

अथ सप्तमे षष्ठोऽनुवाकः ।

पञ्चमेऽङ्गोपासनमुक्तं षष्ठे त्वङ्गिन उपासनमुच्यते । तत्राऽऽदावुपास्यस्वरूपं दर्शयति—

स य एषोऽन्तर्हृदय आकाशः । तस्मिन्नयं पुरुषो मनोमयः । अमृतो हिरण्मयः, इति ।

हृदयपुण्डरीकस्य मध्ये स्वाङ्गुष्ठपरिमित आकाशो वर्तते । **स एष** इत्येताभ्यां दूरसामीप्यवाचिभ्यां व्यवहितयोगशास्त्रप्रसिद्धः संनिहितश्रुत्यन्तरप्रसिद्धश्चोच्यते । ईदृशो **य आकाशस्तस्मिन्नाकाशे पुरुषः** संपूर्णः परमात्माऽस्ति । यद्यप्यसौ सर्वत्र वर्तते तथाऽपि तस्योपलब्ध्यर्थमुपासनार्थं च हृदयस्थानमुपदिश्यते । हृदयकमलमध्ये हि समाधिना निरुद्धमेकाग्रं मनः परमात्मानं साक्षात्कर्तुं प्रभवति । " दृश्यते त्वग्र्यया बुद्ध्या " इतिश्रुत्यन्तरात् । अपरोक्षवाचकेनायमित्यनेन शब्देन सेयं साक्षात्कारयोग्यताऽभिधीयते । तादृशः पुरुषो हृदयमध्य उपास्यमानः प्रसीदति । अत एव **दहरशाण्डिल्यविद्यासु** हृदयमाम्नातम् । **तस्मिन्हृदय उपासितव्यः पुरुषो मनोमयो** मनःप्रधानः । जिज्ञासवो हि तं पुरुषं मनसा साक्षात्कुर्वन्ति, उपासकाश्च मनसा ध्यायन्ति, तदिदं मनोमयत्वम् । **अमृतत्वं** विनाशराहित्यम् । **हिरण्मयो** ज्योतिर्मयः स्वप्रकाश इत्यर्थः ।

इत्थमुपास्यस्वरूपमभिधायोपासकस्य मार्गविशेषं दर्शयति—

अन्तरेण तालुके । य एष स्तन इवावलम्बते । सेन्द्रयोनिः । यत्रासौ केशान्तो विवर्तते । व्यपोह्य शीर्षकपाले, इति ।

मुखबिलस्यान्तर्जिह्वामूलस्योपरि स्थितौ [1]तालुके इत्युच्येते । **तालुके अन्तरेण** तालुकयोर्मध्ये वत्सतर्याः **स्तन इव** स्वल्पः कश्चिन्मांसखण्डो लम्बमान-

[1] ख. °ध्ये स° ।

स्तिष्ठति तस्य मांसखण्डस्य योगशास्त्रप्रसिद्धिं द्योतयितुं यच्छब्दः। प्रत्यक्षतां द्योतयितुमेतच्छब्दः। लम्बिकाकरणप्रवीणस्य जिह्वाग्रस्पर्शेनेन प्रत्यक्षः। परकीयमुखे तु चक्षुषैव प्रत्यक्षः। स च मांसखण्ड इन्द्रस्य परमेश्वरस्य योनिः स्थानम्। शाखाग्रचन्द्रदर्शनन्यायेन स मांसखण्डः स्वसमीपवर्तिनीं योगशास्त्रप्रसिद्धां सुषुम्नाख्यां नाडीमुपलक्षयति। तस्यां च नाड्यां प्रविष्टं चित्तमेकाग्रं भूत्वा परमात्मानं साक्षात्कर्तुं प्रभवति। एतदेवाभिप्रेत्य क्षुरिकोपनिषद्याम्नायते—

" एकोत्तरं नाडिशतं तासां मध्ये वरा स्मृता।
सुषुम्ना तु परे लीना विरजा ब्रह्मरूपिणी॥
इडा तिष्ठति वामेन पिङ्गला दक्षिणेन तु।
तयोर्मध्ये परं स्थानं यस्तं(?) वेद स वेदवित्" ॥ इति।

अतः सा नाडी परमेश्वरस्य स्थानम्। किंचामृतत्वप्राप्तेर्मार्गभूतत्वादपि तस्य स्थानम्। तन्मार्गत्वमपि च्छन्दोगैः कठैश्चाऽऽम्नायते—" शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका। तयोर्ध्वमायन्नमृतत्वमेति " इति। सेयमिन्द्रस्य योनिः सुषुम्ना नाडी शिरसो वामदक्षिणकपाले व्यपोह्य विनिर्भिद्य यत्र यस्मिन्मूर्धप्रदेशे केशानामन्तो मूलमस्ति तत्र विशेषेण वर्तते। यथाऽग्रस्योपरि केशानामभावादग्रमन्तशब्देनोच्यते, तथा मूलादधोऽपि तदभावान्मूलमप्यन्तशब्दवाच्यम्।

इत्थमुपासकस्य फलप्राप्तये निर्गमनद्वारमभिधायेदानीं फलं दर्शयति—

भूरित्यग्नौ प्रतितिष्ठति। भुव इति वायौ (१)। सुवरित्यादित्ये। मह इति ब्रह्मणि। आप्नोति स्वाराज्यम्। आप्नोति मनसस्पतिम्। वाक्पतिश्चक्षुष्पतिः। श्रोत्रपतिर्विज्ञानपतिः। एतत्ततो भवति। आकाशशरीरं ब्रह्म। सत्यात्मं प्राणारामं मनआनन्दम्। शान्तिसमृद्धममृतम्, इति।

व्याहृतित्रयध्यानेनाग्न्यादिषु प्रतितिष्ठति। अग्निवाय्वादित्यानां यदैश्वर्यं तत्प्राप्नोति। चतुर्थव्याहृतिध्यानेन ब्रह्मणि सत्यलोकवासिनि प्रतितिष्ठति। ब्रह्मणो यदैश्वर्यं तत्प्राप्नोति। तदेव स्वाराज्यादिवाक्यैः प्रपञ्च्यते—अग्न्यादीनामङ्गदेवतानां स्वयमेव राजा भवति। राजत्वादेव सर्वेऽस्मै देवा बलिमावहन्तीत्युक्तम्। न केवलं स्वाराज्यप्राप्तिः किंतु सर्वेषां प्राणिनां यन्मनस्तस्य पतित्वं प्राप्नोति सर्वप्राण्यात्मको भूत्वा-

---

१ ख. ग. 'न मां'। २ घ. परस्था'। ३ ग. 'ति। सोऽय'। ४ क. 'मद्या'।

सर्ववागाद्याधिपत्यं द्रष्टव्यम्(?)। एकमेवान्तःकरणं शक्तिभेदेन मनोविज्ञानशब्दाभ्यामभिधीयते। करणशक्त्या मन इत्युच्यते। कर्तृशक्त्या तु विज्ञानमिति। पूर्वमसावेव देहमात्रवर्तिमनोवागादीनामधिपतिरभूत्। इदानीं तु विद्यासामर्थ्येन सर्वात्मकविराडुपाधिमत्तां प्राप्य सर्वदेहवर्तिमनोवागाद्याधिपतिर्भवति। ततः समष्टिरूपविराट्प्राप्तेरनन्तरमुत्पन्नब्रह्मतत्त्वावबोधः सन्नविद्यायां विनष्टायामेतद्वक्ष्यमाणस्वरूपं भवति। आकाशेत्यादिना तदेतत्स्वरूपमभिधीयते—आकाशवन्मूर्तिरहितं शरीरं स्वरूपं यस्य ब्रह्मणस्तदाकाशशरीरम्। यद्वा सर्वजगत्कल्पनाधिष्ठानत्वेन सर्वात्मकत्वादाकाशोऽपि ब्रह्मणः स्वरूपम्। आकाशे हि सच्चिदानन्दरूपोऽधिष्ठानभागो नामरूपात्मक आरोप्यभागश्चेत्युभयं दृश्यते। तत्र नामरूपयोर्मिथ्यात्वेन ब्रह्मत्वाभावेऽप्यधिष्ठानस्य सत्यत्वेन ब्रह्मत्वं युक्तम्। एतदेवाभिप्रेत्य सत्यात्मेत्युच्यते। सत्यमबाध्यं सर्वजगत्कल्पनाधिष्ठानमात्मा स्वरूपं यस्य ब्रह्मणस्तत्सत्यात्म। तथा प्राणस्याऽऽरामः सर्वतः क्रीडारूप उत्पत्त्यादिव्यापारो यस्मिन्ब्रह्मणि तत्प्राणारामम्। प्राणोत्पत्तिश्च ब्रह्मणः सकाशादाम्नायते—"एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" इति। प्रश्नोत्तराभ्यामपि स एवार्थ आम्नायते—"भगवन्कुत एष प्राणो जायते" इति प्रश्नः। "आत्मन एष प्राणो जायते" इत्युत्तरम्। प्राणोत्पत्तिप्रयोजनं चापरमात्मन उत्क्रान्त्यादिव्यपदेशसिद्धिः। एतदप्याम्नातम्—"कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत" इति। ईदृश्याः प्राणक्रीडाया आधारत्वेन प्राणारामम्। तथा मनस आनन्दो यस्मिन्ब्रह्मणि तन्मनआनन्दम्। यदा विषयाभिमुख्यं परित्यज्य मनो ब्रह्माभिमुखं भवति तदा महत्सुखं मनसा प्राप्यते। एतच्च मैत्रेयोपनिषद्याम्नातम्—

"समाधिनिर्धूतमलस्य चेतसो निवेशितस्याऽऽत्मनि यत्सुखं भवेत्।
न शक्यते वर्णयितुं[1] गिरा तदा स्वयं तदन्तःकरणेन गृह्यते" ॥ इति।

अत्राप्याम्नायते—"रसꣳ ह्येवायं लब्ध्वाऽऽनन्दी भवति" इति। यथा मनसो विक्षेपराहित्यं शान्तिस्तया शान्त्या समृद्धं संपूर्णं ब्रह्म। न खलु ब्रह्मण्यवगते सति ह्या(स्वा?)नन्दैकरसे निमग्नस्य मनसः कदाचिदपि विक्षेपः संभवति। सेयं शान्तिः श्वेताश्वतरैराम्नायते—"ज्ञात्वा शिवं शान्तिमत्यन्तमेति" इति। भगवताऽप्युक्तम्—

"युञ्जन्नेवं सदाऽऽत्मानं योगी नियतमानसः।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति" ॥ इति।

तस्मान्मनोव्रतया शान्त्या समृद्धं ब्रह्म। यद्वा ब्रह्मगतैव शान्तिः। यथा माया जगदाकारेण विक्रियमाणा विक्षिप्यते तथा ब्रह्म कदाचिदपि न विक्रियते तस्य कूटस्थनित्यत्वात्। "अज आत्मा महान्ध्रुवः" इत्यादिश्रुतेः। तस्मात्स्वनिष्ठया शान्त्या

१ घ. °तुं तदा गिरा स्व°।

समृद्धं ब्रह्म। तथा तदेतद्ब्रह्मामृतं मरणरहितम्। मरणं नाम प्राणस्य देहान्निष्क्रमणम्। "मृङ् प्राणत्यागे" इति धातुस्मरणात्। तच्च मरणं प्राणधारिणो जीवस्य संभवति न तु प्राणरहितस्य परमात्मनः। तद्राहित्यं च "अप्राणो ह्यमनाः शुभ्रः" इति श्रुत्यन्तरादवगन्तव्यम्।

इत्थमुपास्यस्वरूपं मार्गं फलं चाभिधायोपासनं विधत्ते—

इति प्राचीनयोग्योपास्स्व (२), इति।

वायावमृतमेकं च॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके सप्तमप्रपाठके षष्ठोऽनुवाकः॥ ६॥

प्राचीनानि पूर्वकाण्डोक्तानि नित्यनैमित्तिककर्माणि, तैः पापे प्रहीणे सत्युपासनायां योग्यो भवति। तादृशं शिष्यं प्रति माहाचमस्यनामको गुरुरुपदिशति। **इतिशब्दः** "**स य एषोऽन्तर्हृदय आकाशः**" इत्याद्युक्तप्रकारं परामृशति। **तथैवाऽऽकाशशरीरं ब्रह्मे**त्यादिगुणा अपि परामृश्यन्ते। यद्यप्येतत्ततो भवतीतिवाक्येन विराट्प्राप्तेरूर्ध्वं ब्रह्मभावलक्षणस्य फलस्य प्रतिज्ञातत्वान्मुक्तिस्वरूपप्रतिपादकमाकाशशरीरादिवाक्यम्, तथाऽपि "तं यथा यथोपासते तदेव भवति" इतिश्रुतावुपास्यफलयोरेकविधत्वश्रवणादाकाशशरीरत्वादिगुणानामुपास्यत्वमपि संभवतीति। तस्मादाचार्यैरुपास्यगुणत्वेन योजितम्।

अथ मीमांसा—तत्रेदं चिन्तनीयम्। किं **पञ्चमषष्ठयो**रनुवाकयोरुपासना भिद्यत आहोस्विदेकेति। उपास्यवैलक्षण्यात्फलभेदाच्च भिद्यत इति तावत्प्राप्तम्। **पञ्चमे** लोकादिदृष्ट्या व्याहृतिरूपं प्रतीकमुपास्यम्। **षष्ठे** तु मनोमयत्वादिगुणकं ब्रह्मोपास्यमिति वैलक्षण्यम्। फलं च **सर्वेऽस्मै देवा बलिमावहन्ती**ति पञ्चमे श्रुतम्। षष्ठे त्वाप्नोति स्वाराज्यमित्यन्यदेव फलं श्रूयते। तस्मादुपासनाभेद इति प्राप्ते ब्रूमः—एकाधिकारित्वश्रवणादेकमेवोभयत्रोपासनम्। पञ्चमेऽभिहितम्। **ता यो वेद स वेद ब्रह्मे**ति व्याहृत्युपासकस्यैव ब्रह्मोपासनाधिकारः श्रूयते। यथा षष्ठे **भूरित्यग्नौ प्रतितिष्ठती**त्यादिना व्याहृत्युपासनफलं च सहैवाऽऽम्नातम्। तस्मादेकमेवोभयत्रोपासनम्। उपास्यवैलक्षण्यं त्वङ्गाङ्गिभावभेदेनाप्युपपद्यते। **सर्वेऽस्मै देवा बलिमावहन्ती**त्येतदप्यङ्गफलं भविष्यति। "यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति" इत्यादौ पर्णद्रव्यमन्तरेण क्रतुनिष्पत्त्यभावात्क्रत्वर्थत्वे सति फलाकाङ्क्षाया अभावात्फलस्यार्थवादत्वं युक्तम्। इह तु

---

१ ग. °य इ°। २ ङ. °युक्तं प्र°। ३ क. ग. न पा°।

व्याहृतिध्यानमन्तरेणापि ब्रह्मोपासनसिद्धेः फलायैव व्याहृतिध्यानमुच्यत इति नार्थवादत्वम् । तस्मादङ्गाङ्गिभावेनैकोपासनत्वं युक्तम् । न चानेनैव न्यायेन **सप्तमानुवाकोक्तस्य** पृथिव्यन्तरिक्षाद्यात्मकब्रह्मोपासनस्यापि पूर्वेण सहैकत्वं **शङ्कनीयम्** । शाण्डिल्यदहरादिन्यायेन पृथगुपासनत्वात् । स च न्यायस्तृतीयाध्यायस्य **तृतीयपादे*** चिन्तितः—

" न भिन्ना उत भिद्यन्ते शाण्डिल्यदहरादयः ।
समस्तोपासनश्रैष्ठ्याद्ब्रह्मैक्यात्स्यादभिन्नता ॥
कृत्स्नोपास्तेरशक्यत्वाद्गुणैर्ब्रह्मपृथक्त्वतः ।
दहरादीनि भिद्यन्ते पृथक्पृथगुपक्रमात् ॥

छान्दोग्ये दहरविद्या शाण्डिल्यविद्या मधुविद्येत्यादयः पठिताः । तथा **शाखान्तरे**ष्वपि । तत्र पूर्वाधिकरणन्यायेन समस्तोपासनस्य श्रेष्ठत्वाद्वेद्यस्य ब्रह्मण एकत्वाच्च सर्वासामेकविद्यात्वमिति प्राप्ते ब्रूमः—अनन्तासु विद्यास्वेकीकरणेनानुष्ठानं तावदशक्यमिति विद्याभेदोऽप्यवगन्तव्यः । न च वेद्यस्य ब्रह्मण एकत्वं **शङ्कनीयं** गुणभेदेन व्यवस्थोपपत्तेः । न चैकैकस्या विद्याया इयत्ता निश्चेतुमशक्या प्रत्येकमुपक्रमोपसंहारयोस्तन्निश्चायकत्वात् । तस्माद्विद्यानां नानात्वम् " ।

एवमुपासनयोर्भेदे सत्येकमेवानुष्ठेयं न तूभयम् । एतदपि **तत्रैव** + चिन्तितम्—

" अहंग्रहेष्वनियमो विकल्पनियमोऽथ वा ।
नियामकस्याभावेन याथाकाम्यं प्रतीयताम् ॥
ईशसाक्षात्कृतेस्त्वेकविद्ययैव प्रसिद्धितः ।
अन्यानर्थक्यविक्षेपौ विकल्पस्य नियामकौ ॥

द्विविधान्युपासनान्यहंग्रहाणि प्रतीकानि चेति । आत्मनः सगुणोपासनेष्वहंग्रहस्य चतुर्थाध्याये वक्ष्यमाणत्वात्तान्यहंग्रहाणि । अनात्मवस्तूनि देवतादृष्ट्या संस्कृत्योपास्यमानानि प्रतीकानि । तत्राहंग्रहेषु शाण्डिल्याद्युपासनेष्वेकं द्वे बहूनि वोपासनानि याथाकाम्येनानुष्ठेयानि विकल्पस्य नियामकाभावात् । न हि शाण्डिल्योपासनं दहरोपासनमन्यद्वैकमेवानुष्ठेयं नेतरदिति विकल्पनियमे किंचित्कारणमस्ति । तस्माद्याथाकाम्यमिति प्राप्ते ब्रूमः—अन्यानर्थक्यं तावदेकं नियामकम् । तथाहीश्वरसाक्षात्कार उपासनस्य प्रयोजनं तच्चैकेनैवोपासनेन सिध्यति चेदन्योपासनवैयर्थ्यम् । किंचोपासनेषु न प्रमाणजन्यः साक्षात्कारः । किं तर्हि निरन्तरभावनया ध्येयतादात्म्याभिमानः । सैं

* नाना शब्दादिभेदात् । अ० ३ पा० ३ अ० ३३ सू० ५८ । + विकल्पोऽविशिष्टफलत्वात् । अ० ३ पा० ३ अ० ३४ सू० ५९ ।

१ क. ग. घ. ङ. °त्र स । २ क. ख. ङ. °गुणत्वोपा° । ३ ख. °सनस्य न । ४ ख. °जन्यसा° । ५ घ. स एवाभि° ।

चाभिमान एकमुपासनमनुष्ठाय तत्परित्यज्यान्यत्र वर्तमानस्य पुरुषस्य चित्तविक्षेपे[1] कथं नाम दृढी भवेत् । तस्मादानर्थक्यविक्षेपयोर्नियामकत्वाद्विकल्पो नियम्यते " ।

ब्रह्मतत्त्वविद्यायामिव ब्रह्मोपासनेऽप्यहंग्रहः[2] कर्तव्यः । तत्त्वविद्यायामहंग्रहश्चतुर्थाध्यायस्य प्रथमपादे * चिन्तितः—

" ज्ञात्रा स्वान्यतया ब्रह्म ग्राह्यमात्मतयाऽथ वा ।
अन्यत्वेन विजानीयाद्दुःख्यदुःखिविरोधतः ॥
औपाधिको विरोधोऽत आत्मत्वेनैव गृह्यते ।
गृह्णन्त्येवं महावाक्यैः स्वशिष्यान्ग्राहयन्त्यपि ॥

यच्छास्त्रप्रतिपाद्यं ब्रह्म तज्जीवेन ज्ञात्रा स्वव्यतिरिक्ततया ग्रहीतव्यम् । दुःख्यदुःखिनोर्जीवब्रह्मणोरेकत्वविरोधादिति प्राप्ते ब्रूमः—" वस्तुतो ब्रह्मरूपस्यैव सतो जीवस्यान्तःकरणोपाधिकृतो दुःखित्वादिसंसारधर्मः । " इति वियत्पादे [ब्र० सू० अ० २ पा० ३] जीवविचारे प्रपञ्चितम् । अतो वास्तवविरोधाभावादात्मत्वेनैव ब्रह्म गृह्यताम् । अत एव " अहं ब्रह्मास्मि " " अयमात्मा ब्रह्म " इत्यादिमहावाक्यैस्तत्त्वविद् आत्मत्वेनैव ब्रह्म गृह्णन्ति । तथा तत्त्वमस्यादिभिर्महावाक्यैः स्वशिष्यान्ग्राहयन्त्यपि । तस्मादात्मत्वेनैव ब्रह्म ग्रहीतव्यम् " ।

एवं सति मनोमयोऽमृतो हिरण्मयः परमात्माऽहमित्युपासनीयम् । मनोमयस्य परमात्मत्वं शाण्डिल्यविद्योदाहरणेन प्रथमाध्यायस्य द्वितीयपादे + चिन्तितम्—

" मनोमयोऽयं शारीर ईशो वा प्राणमानसे ।
हृदयस्थित्यणीयस्त्वे जीवे स्युस्तेन जीवगीः ॥
शमवाक्यगतं ब्रह्म तद्धितादिरपेक्षते ।
प्राणादियोगश्चिन्तार्थश्चिन्त्यं ब्रह्म प्रसिद्धितः ॥

छान्दोग्यस्य तृतीयाध्याये शाण्डिल्यविद्यायामिदमाम्नायते—" मनोमयः प्राणशरीरो भारूपः " इति । तत्र जीव ईशो वेति संदेहे जीव इति प्राप्तम् । मनःसंबन्धादीनां जीवे सुसंवादत्वात्[3] । मनसो विकारो मनोमय इति मनःसंबन्धः । प्राणः शरीरमस्येति प्राणसंबन्धः । न चेदं द्वयमीश्वरे सुसंवादम्[4] । " अप्राणो ह्यमनाः शुभ्रः " इति निषेधात् । तथा " एष य आत्माऽन्तर्हृदयेऽणीयान् " इति श्रूयमाणं हृदयेऽवस्थानमणीयस्त्वं च निराधारस्य सर्वगतस्य न कथंचिदप्युपपद्यते । तस्माज्जीव

---

* आत्मेति तूपगच्छन्ति ग्राहयन्ति च । अ० ४ पा० १ अ० २ सू० ३ ।
+ सर्वत्र प्रसिद्धोपदेशात् । अ० १ पा० २ अ० १ सू० १ ।

---

१ ख. °क्षेपात्कथं । २ ग. °संपाद° । ३ ग. संपाद° । ४ क, ख. ङ. 'येऽन्तस्था° ।

इति प्राप्ते ब्रूमः—"सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत" इत्येतस्मिञ्शमविधिपरे पूर्ववाक्ये श्रूयमाणं यद्ब्रह्म तदेव मनोमयः प्राणशरीर इत्येताभ्यां तद्धितबहुव्रीहिभ्यां विशेष्यत्वेनापेक्ष्यते । शमवाक्यस्यायमर्थः । यस्मात्सर्वमिदं ब्रह्म तज्जत्वात्तल्लत्वात्तदनत्वात्तस्मात्सर्वात्मके ब्रह्मणि रागद्वेषविषयासंभवादुपास्तिकाले शान्तो भवेदिति । तथा तद्वाक्यगते ब्रह्मणि विशेष्यत्वेनान्विते मनोमयवाक्यमपि ब्रह्मपरं भविष्यति । न च ब्रह्मणो मनःप्राणसंबन्धानुपपत्तिः । निरुपाधिके तदनुपपत्तावपि सोपाधिकस्योपास्यस्य चिन्तनार्थतया तदुपपत्तेः । तस्मात्सर्वेष्वपि वेदान्तेषु यद्ब्रह्मोपास्यत्वेन प्रसिद्धं तदेवात्राप्युपास्यम् । न हि क्वचिदपि वेदान्ते जीवस्योपास्यत्वं प्रसिद्धम् । ततो ब्रह्मैवेति राद्धान्तः" ।

तत्र यथा शमवाक्यगतं ब्रह्म मनोमयत्वविशेषणेन विशेष्यत एवमत्रापि परिपूर्णवांचिपुरुषशब्दोक्तः परमात्मा मनोमयशब्देन विशेष्यते । परिपूर्णवाचित्वं च श्रेयोमार्गे दर्शितम्—" पुरुषः पुरि शयनाद्वा पूर्णत्वाद्वाऽमुनाऽस्य वा पूर्तेः " इति । पुरिशयनपक्षे जीवपरत्वमपि भविष्यतीति चेन्न । " ता यो वेद स वेद ब्रह्म " इत्येवं ब्रह्मणः प्रक्रान्तत्वात् । " आकाशशरीरं ब्रह्म " इत्युपसंहाराच्च । हिरण्मयशब्दस्य तु ब्रह्मपरत्वम् । " य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते " इतिवाक्ये निर्णीतम् । स च निर्णयः **प्रथमाध्यायस्य प्रथमपादेऽ*भिहितः—**

" हिरण्मयो देवतात्मा किं वाऽसौ परमेश्वरः ।
मर्यादाधाररूपोक्तेर्देवतात्मैव नेश्वरः ॥
सार्वात्म्यात्सर्वदुरितराहित्याच्चेश्वरो मतः ।
मर्यादाद्या उपासार्थमीशेऽपि स्युरुपाधिगाः ॥

छान्दोग्यस्य प्रथमाध्याय उद्गीथोपासनाया उपसर्जनान्युपास्यान्यभिधाय प्रधानमुपास्यं विधातुमिदमाम्नायते—" अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते " इति । तत्राऽऽदित्यमण्डले विद्याकर्मातिशयवशात्कश्चिज्जीवो देवरूपमुपेत्य जगदधिकारं निष्पादयन्नवतिष्ठते । ईश्वरश्च सर्वगतत्वान्मण्डलेऽपि वर्तते । अतस्तयोः संशयः । तत्र देवतात्मेति तावत्प्राप्तम् । कुतः । मर्यादाधाररूपाणामुच्यमानत्वात् । " ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां च" इत्यैश्वर्यमर्यादोक्तिः । अन्तरादित्य इत्याधारोक्तिः । हिरण्मय इति रूपोक्तिः । न हि सर्वेश्वरस्य सर्वाधारस्य नीरूपस्य परमेश्वरस्यैश्वर्यमर्यादाधाररूपाणि संभवन्ति । तस्माद्देवतात्मेति प्राप्त उच्यते—हिरण्मय

* अन्तस्तद्धर्मोपदेशात् । अ० १ पा० १ अ० ७ । सू० २० ।

१ घ· °न्धायनु° । २ क. ख ङ. °शब्द एकः प° । ३ ङ. °गत्वा° ।

ईश्वरो भवेत् । कुतः । सर्वात्मत्वश्रवणात् । " सैवर्क्तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म " इतिवाक्ये तच्छब्दैः प्रकृतं हिरण्मयं पुरुषं परामृश्य तस्यैकस्मादाद्यशेषजगदात्मकत्वमुपदिश्यते । तच्चाद्वितीये परमेश्वरे मुख्यमुपपद्यते न तु सद्द्वितीयायां देवतायाम् । तथा " स एष सर्वेभ्यः पाप्मभ्य उदितः " इति श्रूयमाणं सर्वपापराहित्यं ब्रह्मणोऽसाधारणं लिङ्गम् । यद्यपि देवतायाः कर्मण्यनधिकारात्क्रियमाणकरिष्यमाणपुण्यपापयोरभावस्तथाऽप्यसुरादिजनितनिमित्तदुःखसद्भावाद्दुःखहेतुभूतजन्मान्तरसंचितदुरितमनुवर्तत एव । मर्यादाधाररूपाणि तूपाधिधर्मतया सोपाधिके परमात्मन्युपास्ये वर्तितुमर्हन्ति । तस्मादीश्वरो हिरण्मयः " ।

तत्र यथा सार्वात्म्यादिकं ब्रह्मलिङ्गमस्त्येवमत्राप्यमृतत्वसत्यात्मत्वादिकं लिङ्गमवगन्तव्यम् । अतो मनोमयत्वादिगुणकः परमात्माऽत्रोपास्यः । **छन्दोगाः शाण्डिल्यविद्यायामेवमामनन्ति**—"मनोमयः प्राणशरीरो भारूपः सत्यसंकल्पः " इति । **वाजसनेयिनश्च बृहदारण्यके** पठन्ति—" मनोमयोऽयं पुरुषो भाः सत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किंच " इति । तथा **शाखाभेदेऽपि पञ्चाग्निविद्यान्यायेन** मनोमयत्वादिगुणकस्य वेद्यस्वरूपस्य प्रत्यभिज्ञानाद्विद्यैक्यं द्रष्टव्यम् । स च न्यायस्तृतीयानुवाके प्रदर्शितः । सति च विद्यैक्ये तिसृष्वपि शाखासु परस्परं विशेषगुणा उपसंहर्तव्याः । उपसंहारन्यायश्च तत्रैव प्रदर्शितः । उपसंहृतसर्वगुणोपेते ब्रह्मणि तादात्म्याभिमानरूपः साक्षात्कारो यावद्भवति तावत्प्रत्ययावृत्तिः कर्तव्या । **उपास्वेत्युक्तस्योपासनशब्दस्य तद्वाचित्वात्** । एतदपि **तत्रैव** प्रदर्शितम् । श्रुतिश्च—"देवो भूत्वा देवानप्येति " इत्येतस्मिन्नेव जन्मनि देवभावलक्षणं दर्शयति । उत्पन्नेऽपि साक्षात्कारे ब्रह्मोपासनमामरणमावर्तितव्यम् । तदेतच्चतुर्थाध्यायस्य **प्रथमपादे** + चिन्तितम्—

" उपास्तीनां यावदिच्छमावृत्तिः स्यादुताऽऽमृति ।
उपास्त्यर्थाभिनिष्पत्तेर्यावदिच्छं न तूपरि ॥
अन्त्यप्रत्ययतो जन्म भाव्यतस्तत्प्रसिद्धये ।
आमृत्यावर्तनं न्याय्यं सदा तद्भाववाक्यतः ॥

विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाह उपास्तिशब्दस्यार्थः । स च कियताऽपि कालेन संपद्यतेऽतो यावदिच्छमावृत्तिर्न त्वामरणमिति प्राप्ते ब्रूमः—भाविजन्मनः प्रयोजकोऽन्त्यप्रत्यय आमरणावृत्तिमन्तरेण न सुलभोऽत एव **स्मृतिः**—"सदा

+ आ प्रायणात्तत्रापि हि दृष्टम् । अ० ४ पा० १ अ० ८ सू० १२ ।

---

१ ङ. °त्वदर्शनात् । २ क. ग. ङ. °रणाद्धि ।

तद्भावभावितः " इत्याह । कथं तर्हि ज्योतिष्टोमादिकर्मणा स्वर्गं गच्छतोऽन्त्यप्रत्ययः, कर्मजन्यापूर्वादिति ब्रूमः । उपासनेऽप्यपूर्वमस्तीति चेद्भाढम् । नैतावता निरन्तरावृत्तिलक्षणो दृष्टोपायः परित्यज्यो भवति । अन्यथा सर्वस्य सुखदुःखादेरपूर्वजन्यत्वेन भोजनाद्यर्थो दृष्टः प्रयत्नः परित्यज्येत । ततो दृष्टोपायत्वादामरणमावर्तनं कर्तव्यम् " ।

तथाविधावृत्तियुक्तस्योपासकस्योत्क्रान्तौ विशेषश्चतुर्थाध्यायस्य द्वितीयपादे चिन्तितः—

" अविशेषो विशेषो वा स्यादुत्क्रान्तेरुपासितुः ।
हृत्प्रद्योतनसाम्योक्तेरविशेषोऽन्यनिर्गमात् ॥
मूर्धन्यैव नाड्याऽसौ व्रजेन्नाडीविचिन्तनात् ।
विद्यासामर्थ्यतश्चेति विशेषोऽस्त्यन्यनिर्गमात् ॥

उपासकस्य येयमुत्क्रान्तिः सेयमितरोत्क्रान्त्या मार्गोपक्रमपर्यन्तं समेत्युक्तम् । अथ मार्गोपक्रमेऽपि सैव भवितुमर्हति हृत्प्रद्योतनादेः समत्वश्रवणात् । तथा हि— " तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यः " इति श्रूयते । अयमर्थः । वाङ्मनसि संपद्यत इति क्रमेण सजीवं लिङ्गशरीरं शक्त्यवशेषं परमात्मनि यदा लीयते तदा पूर्वजन्म समाप्तं भवति । अथ जन्मान्तराय तल्लिङ्गं पुनर्हृदये प्रादुर्भवति । तस्मिन्नवसरे हृदयाग्रेऽवस्थितस्य लिङ्गस्य गन्तव्यभाविजन्मालोचनात्मकोऽन्त्यप्रत्ययत्वेन लोके प्रसिद्धः कश्चित्प्रद्योतो भवति तेन युक्तः सन्नाडीभ्यो निर्गच्छतीति । एतच्च सर्वेषां समानम् । तस्मान्नोपासकस्येतरेभ्यो विशेष इति प्राप्ते ब्रूमः—मूर्धन्यैव नाड्योपासको निर्गच्छतीतराभ्य एव नाडीभ्य इतरे । कुतः । उपासकेन मूर्धन्यनाड्याश्रिन्नितत्वात्सगुणब्रह्मविद्यासामर्थ्याच्च । श्रुत्यन्तरे चायमर्थः स्पष्टमवगम्यते—

" शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति " इति ॥

अन्या नाड्य उत्क्रमणाय युज्यन्ते न त्वमृतत्वप्राप्तय इत्यर्थः । तस्मादस्त्युपासकस्य विशेषः " ।

अस्मान्मूर्धन्यनाडीनिष्क्रमणरूपाद्विशेषात्प्राचीनो योऽयमुत्क्रान्तिप्रकारस्तत्र शाखान्तरवाक्योदाहरणेन पञ्च विचाराः प्रवृत्ताः । तद्वाक्यं च च्छन्दोगैरान्नायते—" अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते । मनः प्राणे । प्राण-

* तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया । अ० ४ पा० २ अ० ९ सू० १७ ।

१ स. °साम्ये को विशेषोऽन्यस्य नि° । २ घ. अस्याय° ।

स्तेजसि। तेजः परस्यां देवतायाम्" इति। तत्र म्रियमाणस्य पुरुषस्य वागुपलक्षितानां दशेन्द्रियाणां मनसि स्वरूपप्रविलयो न भवति किंतु वृत्तिमात्रप्रविलय इत्येको विचारः। तस्य च मनसः प्राणे वृत्तिप्रविलय इति द्वितीयः। तस्य च प्राणस्य स्वात्मनि जीवे वृत्तिप्रविलय इममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्तीति बृहदारण्यकवाक्यादिति तृतीयः। सेयं वृत्तिप्रविलयरूपोत्क्रान्तिर्नाडीनिष्क्रमणरूपमार्गोपक्रमपर्यन्ता धर्माधर्मप्रवृत्तस्योपासकस्य तत्त्वज्ञानिनश्च त्रयाणामेतेषां समानैव न तु विषमेति चतुर्थः। बाह्येन्द्रियमनःप्राणा यस्मिञ्जीवात्मनि वृत्त्या प्रविलीयन्ते स जीवात्मा यस्मिंस्तेजःप्रधाने भूतपञ्चके वृत्त्या प्रविलीयते तद्भूतपञ्चकं ब्रह्मतत्त्वानभिज्ञस्य पुरुषस्य परमात्मनि वृत्त्यैव प्रविलीयते न तु स्वरूपेणेति पञ्चमः। एवमेतैः पञ्चभिर्विचारैः सर्वसाधारणोत्क्रान्तिर्विचारिता। अत्र परमात्मनि योऽयं पञ्चभूतरूपलिङ्गशरीरप्रविलयस्तेन पूर्वजन्म समाप्तम्। अथोपासकस्य ब्रह्मलोकप्राप्तये मूर्धन्यनाडीनिष्क्रमणरूपो विशेषो विचारितः। स चात्रान्तरेण तालुके इत्यारभ्य व्यपोह्य शीर्षकपाले इत्यन्तेन समाम्नातः। तच्च ब्रह्मलोकप्राप्तिपर्यन्तस्य मार्गस्योपलक्षणं द्रष्टव्यम्। तस्मिंश्च मार्गे शाखान्तरवाक्योदाहरणेन षड्विचाराः प्रवृत्ताः। तत्र च्छन्दोगाः—"अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्व आक्रमते" इति वाक्येन मूर्धन्यनाड्या निष्क्रान्तस्याऽऽदित्यरश्मिसंबन्धमामनन्ति। तत्राहर्मृतस्य तत्संभवेऽपि रात्रौ मृतस्योपासकस्य न संभवतीति पूर्वपक्षीकृत्य रात्रावादित्यरश्मीनामभिव्यक्त्यभावेऽपि नाडीरश्मिसंबन्धस्य यावद्देहभावित्वादस्ति रश्मिप्राप्तिरिति प्रथमो विचारः। एतस्मिन्नादित्यरश्म्यादिके उत्तरमार्ग उत्तरायणश्रवणाद्दक्षिणायने मृतस्योपासकस्य विद्याफलं नास्तीति पूर्वपक्षीकृत्योत्तरायणशब्देन तदभिमानिदेवताया विवक्षितत्वात्फलमस्तीत्युक्तम्। सोऽयं द्वितीयः। छन्दोगबृहदारण्यकयोः "तेऽर्चिषमभिसंभवन्ति" इत्यादिना पञ्चाग्निविद्यायामर्चिरादिको मार्ग आम्नातः। विद्यान्तरे तु वाजसनेयिभिः "स वायुमागच्छति" इत्यादिना वाय्वादिकः पठितः। पर्यङ्कविद्यायां कौषीतकिभिः—"स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति" इत्यग्निलोकादिकः पठितः। तस्मादुत्तरमार्गो नानाविध इति पूर्वपक्षीकृत्य वाय्वग्निलोकादीनामेकस्मिन्नेव मार्गे पर्वविशेषत्वेनान्वयसंभवादेक एवार्चिरादिको मार्ग इत्युक्तः (क्तम्?)। सोऽयं तृतीयः। कौषीतकिप्रोक्तस्य वायुलोकस्य मार्गमध्ये संनिवेशासंभवमाशङ्क्य बृहदारण्यके वायुप्रक्तेन मार्गेणाऽऽदित्यादिप्राप्तिश्रवणादादित्यादर्वाग्वायोः संनिवेश उक्तः। सोऽयं चतुर्थः। तथा कौषीतकिप्रोक्तानां वरुणेन्द्रप्रजापतिलोकानां मार्गमध्ये संनिवेशासंभवमाशङ्क्य विद्युद्वरुणयोर्वृष्टिद्वारा संबन्धसंभवाद्विद्युल्लोकादूर्ध्वं वरु-

---

१ ख. °प्रल°। २ क ख ङ. 'स्य त्वात्म°। ३ क. ग. घ. ङ. °प्रल°।

णलोकस्याऽऽगन्तूनामन्ते[1] संनिवेश इति न्यायेनेन्द्रप्रजापतिलोकयोर्वरुणलोकादूर्ध्वं संनिवेश इत्युक्तम्। सोऽयं **पञ्चमः**। तस्मिन्मार्गे श्रुतानामर्चिरादीनां मार्गचिह्नत्वं भोगभूमित्वं च निराकृत्याऽऽतिवाहिकदेवत्वमुक्तम्। सोऽयं **षष्ठः**। एतैः षड्भिर्विचारैर्निर्णीतो यो मार्गः[2] स्तस्य मार्गस्य ब्रह्मतत्त्वावबोधब्रह्मोपासनयोः साधारणत्वमाशङ्क्योपासनविषय एवायं मार्ग इति निर्णीतम्। उपासनेष्वपि यत्र मार्गश्रवणं तत्रैवेत्याशङ्क्य सर्वोपासनसाधारणत्वं मार्गस्य निर्णीतम्। तेन मार्गेणोपासकस्य ब्रह्मप्राप्तिर्भवति। "तत्पुरुषोऽमानवः स एनान्[3] ब्रह्म गमयति" इत्यमानवेन विद्युल्लोकवर्तिना पुरुषेण ब्रह्मप्रापणस्योक्तत्वात्। तत्र परब्रह्मैव प्राप्यमित्याशङ्क्य परब्रह्मणि गत्यसंभवाल्लोकविशेषरूपं कार्यमेव ब्रह्मोपासकेन प्राप्यमिति निर्णीतम्। एवं कार्यब्रह्मलोकप्राप्तिः प्रतीकोपासकानामप्यस्तीत्याशङ्क्य ब्रह्मोपासकानामेव नेतरेषामिति निर्णीतम्। योऽयमर्चिरादिमार्गेण प्राप्यो ब्रह्मलोकः स एव "भूरित्यग्नौ प्रतितिष्ठति" इत्यारभ्य "विज्ञानपतिः" इत्यन्तया श्रुत्या प्रपञ्च्यते। तत्र ब्रह्मलोकप्राप्तौ सत्यां व्यष्ट्यभिमानः समष्ट्यभिमानश्चेत्युभयं संपद्यते। तयोर्मध्ये व्यष्ट्यभिमानेनाग्निवाय्वादित्यादिदेवतानां तादात्म्यं प्राप्य तदीयेष्वैश्वर्येषु प्रतितिष्ठति। समष्ट्यभिमानेन तु भूलोकाद्यधिष्ठातृब्रह्मरूपो भूत्वा स्वाराज्यमाप्नोति। तथाविधब्रह्मरूपत्वसिद्ध्यर्थमेव ब्रह्मलोकगामिनं योगिनं प्रति **कौषीतकिनः** पर्यङ्कविद्यायामेवमामनन्ति—"तं पञ्च शतान्यप्सरसां प्रतिधावन्ति शतं चामरहस्ताः शतं मालाहस्ताः शतं[4] माञ्जनहस्ताः शतं वासोहस्ताः शतं[5] फलहस्तास्तं ब्रह्मालंकारेणालं कुर्वन्ति। स ब्रह्मालंकारेण[6]लंकृतो ब्रह्म विद्वान्ब्रह्मैवाभिप्रैति" इति। तदिदं ब्रह्मप्राप्तिलक्षणं स्वाराज्यमेव विविक्ष्य चतुर्भिर्विचारैर्निर्णीतम्। ब्रह्मलोकवासिनो योगिनो भोग्यवस्तुसंपादने मनुष्यलोकवासिबह्वाद्यसाधनापेक्षितमित्याशङ्क्य संकल्पमात्रस्य तत्सा[ध]नत्वं निर्णीतम्। सोऽयं **प्रथमो** विचारः। तस्य संकल्पमात्रेण भोग्यजातं सृष्टवतो योगिनो भोगाधिष्ठानस्य देहस्य भावाभावौ श्रुतिद्वयप्रोक्तौ पुरुषभेदेन व्यवस्थितावित्याशङ्क्यैकस्यैव पुरुषस्येच्छितौ[7] देहभावाभावाविति निर्णीतम्। सोऽयं **द्वितीयः**। यदाऽयं योगी स्वेच्छया युगपदेव बहून्देहान्सृजति तदानीं तेष्वेक एव देहो जीवात्मोपेत इतरे तु तद्रहिता इत्याशङ्क्यैकस्य चित्तानुवर्तीभिः पृथगेव जीवात्मभिरुपेतास्ते सर्वे देहा इति निर्णीतम्। सोऽयं **तृतीयः**। तस्य योगिनो भोग्यवस्तुदेहजीवात्मनां सृष्टिः संकल्पमात्रेण यथा भवति तथैवाऽऽकाशादिपञ्चमहाभूतानां भौतिकस्य ब्रह्माण्डादेर्जगतश्च सृष्टिरस्तीत्याशङ्क्यानादेर्नित्यसिद्धस्य परमेश्वरस्यैव जगत्सृष्टृत्वं न तु योगिन इति निर्णीतम्। सोऽयं **चतुर्थः**। तैरेतैश्चतुर्भिर्विचारैर्निर्णीतं स्वाराज्यं प्राप्तवतो योगिन-

---

१ ख. ङ. °गन्तुकाना°। २ क. ख. घ. ङ. °न्ते नि°। ३ ख. ग. एतान्ब्र°। ४ ग. °विधाधिष्ठ तृब्र°। ५ क. ग. घ चूर्णहस्ताः। ६ ख. °तमज्ज°। ७ ग. °तं स्वर्णह°। ८ ख. °तुवृत्तिभिः।

स्तस्मिन्नेतद्ब्रह्मलोके निर्गुणब्रह्मतत्त्वसाक्षात्कारे सति ब्रह्मलोकस्यावसाने विदेहकैवल्यं भवतीति। अयमर्थ **एतत्ततो भवतीत्यादिना** समाम्नातः। एतदेवाभिप्रेत्य **भगवता व्यासेनापि** सूत्रितम्–"कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्" [ब्र० सू० अ० ४ पा० ३ सू० १०] इति । कार्यस्य ब्रह्मलोकस्यात्यये प्रलये सत्यत ऊर्ध्वं तल्लोकाध्यक्षेण चतुर्मुखेन ब्रह्मणा सह परं ब्रह्म प्राप्नोतीति **श्रुतिस्मृत्योस्तथाऽभिधानात्** ।

" वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे" ॥ इति **श्रुतिः** ।
" ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् " ॥ इति **स्मृतिः** ।

तदेवं ब्रह्मोपासकस्य ब्रह्मलोकप्राप्तिपूर्विका क्रममुक्तिर्भवतीति स्थितम् ॥

इति श्रीमत्सायणाचार्यविरचिते श्रीबुक्कणसाम्राज्यधुरंधरमाधवविद्यारण्यपरमेश्वरसंबन्धिवेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये सप्तमप्रपाठके सांहित्यामुपनिषदि षष्ठोऽनुवाकः ॥ ६ ॥

अथ सप्तमे सप्तमोऽनुवाकः ।

षष्ठेऽनुवाके मनोमयत्वादिगुणविशिष्टस्य ब्रह्मण उपासनमुक्तम् । तस्य ब्रह्मणश्चक्षुर्गम्यगुणविशेषाभावेनोत्तमाधिकारिविषयत्वान्मन्दाधिकारिणं प्रति चक्षुर्गम्यगुणोपेतब्रह्मोपासनं सप्तमेऽनुवाकेऽभिधीयते । तत्र [illegible]तिकं गुणपञ्चकत्रयं दर्शयति—

पृथिव्यन्तरिक्षं द्यौर्दिशोऽन्तरादिशः । अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि । आप ओषधयो वनस्पतय आकाश आत्मा । इत्यधिभूतम्, इति ।

पृथिव्यादिकं लोकपञ्चकम् । अग्न्यादिकं देवतापञ्चकम् । आप इत्यादिकं द्रव्यपञ्चकम् । तत्राऽऽत्मशब्देन समष्टिरूपो विराट्पुरुष उच्यते । इत्येवमुक्तं पञ्चकत्रयमधिभूतम् । प्रत्ययग्राह्येभ्यो वक्ष्यमाणेभ्यः प्राणादिभ्यो व्यतिरिक्तानीदंप्रत्ययग्राह्याणि पृथिव्यादीनि भूतान्याश्रित्य वर्तत इत्यधिभूतम् । भूतविषयमुपासनमुक्तमित्यर्थः ।

१ ग. °ष्ठेनानुवाकेन म° । २ ग. °दिशः । अ° । ३ क. ग. घ. ङ. °दि द्र° ।

वक्ष्यमाणेनासंकीर्णत्वायोक्तं विभज्य प्रतिज्ञापुरःसरमन्यत्पञ्चकत्रयं दर्शयति—

अथाध्यात्मम् । प्राणो व्यानोऽपान उदानः समानः । चक्षुः श्रोत्रं मनो वाक्त्वक् । चर्म मा꣡ꣳसꣳ स्नावास्थि मज्जा, इति ।

अथ भूतविषयपञ्चकत्रयकथनानन्तरमध्यात्ममात्मविषयपञ्चकत्रयमभिधीयत इति शेषः । यस्मिन्देहेन्द्रियादिसंघाते शास्त्रसंस्काररहितस्य जनस्याहमिति बुद्धिः सोऽयं लोकप्रसिद्ध आत्मा तमधिकृत्य यदुपासनं वर्तते तदध्यात्मम् । देहमध्यवर्तिन एकस्यैव वायोः प्राणादयः पञ्च वृत्तिभेदाः । अत एव प्राणविचारे **भगवता व्यासेन** सूत्रितम्— " पञ्चवृत्तिर्मनोवद्व्यपदिश्यते " [ब्र० सू० अ० २ पा० ४ सू० १२] इति । तासां च वृत्तीनां स्थानभेदः **पूर्वैः**रुदाहृतः—

" हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ।
उदानः कण्ठदेशे स्याद्व्यानः सर्वशरीरगः " ॥ इति ।

तदेतद्वायुपञ्चकम् । **चक्षु**रादिकमिन्द्रियपञ्चकम् । **चर्मा**दि धातुपञ्चकम् । **स्नाव**शब्देन वसाऽभिधीयते । यदेतदधिभूतपञ्चकत्रयं यच्चाध्यात्मपञ्चकत्रयं तेनोभयेन ब्रह्मण उपाधिभूतं कृत्स्नं जगदभिधीयते । तदेतज्जगदुपाधिविशिष्टं ब्रह्मस्वरूपमुपासितव्यम् ।

अथार्थवादेनोपास्तौ विधिमुन्नयति—

एतदधिविधाय ऋषिरवोचत् । पाङ्क्तं वा इद꣡ꣳ सर्वम् । पाङ्क्तेनैव पाङ्क्तꣳ स्पृणोतीति (१), इति ।

सर्वमेकं च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके सप्तमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

ऋषिरतीन्द्रियस्य शास्त्रार्थस्य द्रष्टा कश्चिन्मुनिरेतत्पृथिव्यन्तरिक्षादिकमुपास्यस्वरूपमधिविधायाधिकं साक्षात्कारपर्यन्तं यथा भवति तथोपास्य स्वानुभवेन[1] सर्वात्मकं विराड्रूपं प्राप्य स्वानुभवसिद्धमर्थं शिष्येभ्यः प्रोक्तवान् । किमुक्तवानिति तदभिधीयते— **इदं** प्रतीयमानं **सर्वं जगद्विराड्रूपं पाङ्क्तं** पङ्क्तिच्छन्दसः संबन्धि । **वै**शब्देन तत्प्रसिद्धिरुच्यते । प्रसिद्धमेतत्सर्वस्य पाङ्क्तत्वम् । तथा हि—" पञ्चाक्षरा पङ्क्तिः " इति **श्रुत्या** पङ्क्तिश्छन्दः पञ्चसंख्योपेतम् । तथा जगदपि पञ्चसंख्योपेतम् । पञ्चीकृतपञ्चमहाभूतानि तत्कार्यं च सर्वं विराडित्युच्यत इति **संप्रदायविद्भि**रभिधानात् । तथा

---

१ क. ख. ङ. °नुभावे° ।

सति जगतः पङ्क्तिच्छन्दसा सह सादृश्यलक्षणस्य संबन्धस्य विद्यमानत्वात्पाङ्क्तत्वम् । तथा पृथिव्याद्युपासनमपि पञ्चकैरुपेतत्वात्पाङ्क्तम् । तेन पाङ्क्तेनैवोपासनेन **पाङ्क्तं** विराड्रूपमुपासकः **स्पृणोति** प्रीणयति प्राप्नोतीत्यर्थः । एतेनार्थवादेन पाङ्क्तरूपविराट्प्राप्तिकाम एवमुपासीतेति विधिरवगम्यते । सत्यां च विराट्प्राप्तौ तत्त्वज्ञानोत्पत्तिद्वारा क्रममुक्तिः पूर्वोक्तन्यायेनावगन्तव्या ॥

इति श्रीमत्सायणाचार्यविरचिते श्रीबुक्कणसाम्राज्यधुरंधरमाधवविद्यारण्यपरमेश्वरसंबन्धिवेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये सप्तमप्रपाठके सांहित्यामुपनिषदि सप्तमोऽनुवाकः ॥ ७ ॥

अथ सप्तमेऽष्टमोऽनुवाकः ।

सप्तमे स्थूलदर्शिनो मन्दस्य स्थूलरूपपृथिव्याद्युपाधिकब्रह्मोपासनमुक्तम् । पूर्वस्मिन्ननुवाके **षष्ठे** किंचित्सूक्ष्मदर्शिनो मध्यमस्य सूक्ष्मरूपमनआद्युपाधिकब्रह्मोपासनमुक्तम् । अथोत्तमाधिकारिणोऽष्टमानुवाके वेदान्तप्रतिपाद्यप्रणवाभिधेयशुद्धब्रह्मोपासनमुच्यते । तत्रोपास्यस्वरूपं दर्शयति—

ओमिति ब्रह्म, इति ।

ओंकारः परमात्मनो वाचकः । तथा च **पतञ्जलिप्रोक्तं योगसूत्रं** पूर्वमेवोदाहृतम्—"तस्य वाचकः प्रणवः" इति । **इति**शब्दोऽर्थान्तरव्यावृत्त्यर्थः । ओमित्यनेनैव **शब्देन** प्रतिपाद्यं **यद्ब्रह्म** तदेवात्रोपास्यं वस्तु । नं ह्यत्र मनआद्युपाधि पृथिव्याद्युपाधि वा चिन्तनीयम् । वाचकमोंकारमुच्चारयन्वाच्यं ब्रह्मोपासीतेत्यर्थः ।

ओंकारस्य ब्रह्मवाचकत्वयोग्यतां दर्शयति—

ओमितीदꣳ सर्वम्, इति ।

ओमित्येतस्मिन्नेवाक्षरे शब्दरूपमर्थरूपं चेदं **सर्वं** जगदन्तर्भूतम् । तद्यथा शङ्कुनेत्यादिश्रुत्या शब्दान्तर्भाव आम्नातः । तस्य वाक्तन्तिरित्यादिश्रुत्या शब्दद्वारेणार्थान्तर्भावोऽप्याम्नातः । एतच्च सर्वं **यच्छन्दसामृषभ** इत्यत्र विश्वरूपपदव्याख्याने प्रपञ्चितम् । तथा सति प्रणवस्य सर्वात्मकत्वेन सर्वात्मकब्रह्मवाचकत्वयोग्यता संभवति ।

ओंकारस्य सर्वसंबन्धं केषुचिद्वैदिकव्यवहारेषूदाहृत्य प्रदर्शयति—

ओमित्येतदनुकृति ह स्म वा अप्यो श्रावयत्याश्रावयन्ति । ओमिति सामानि गायन्ति । ओꣳ शोमिति शस्त्राणि शꣳसन्ति । ओमि-

१ घ. न त्वत्र ।

त्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओमिति ब्रह्मा प्रसौति । ओमित्यग्निहोत्रमनुजानाति । ओमिति ब्राह्मणः प्रवक्ष्यन्नाह,—इति ।

दर्शपूर्णमासादियागेषु यजुर्वेदोक्तकर्मानुष्ठायिनोऽध्वर्यवो यस्मिन्काल आग्नीध्रं प्रत्याश्रावयेति प्रैषमन्त्रं प्रयुञ्जते तदानीमो श्रावयेति मन्त्रं पठन्ति । अत एवाऽऽपस्तम्ब आकारादिमोकारादिमोंकारादिं च तं मन्त्रं विकल्पेनोदाजहार—" आ श्रावयो +श्रावयों श्रावयेति श्रावयति " इति । तेषु पक्षेषु द्वितीय ओकारादिपक्षोऽत्र श्रुत्योदाहृतः । मन्त्रगत ओंकार आग्नीध्रसंबोधनार्थः । हे आग्नीध्र देवान्प्रति हविष्प्रदानावसरं श्रावयेति मन्त्रार्थः । तस्मिन्मन्त्रे यदेतदोकारोच्चारणं तदेतदोमित्येतदनुकृति भवति । प्रणवे मकारात्पूर्वभागरूपो य ओकारस्तस्यानुकृतिरनुकरणं सादृश्यसंपादनं तद्यस्मिन्नुच्चारणे तदिदमोमित्येतदनुकृति । प्रसिद्धिद्योतनार्था ह स्म वा इति त्रयो निपाताः । प्रणवभागसादृश्यमोकारे प्रसिद्धमित्यर्थः । अपिशब्दो वक्ष्यमाणोदाहरणसमुच्चयार्थः । अध्वर्यवोऽप्योकारेण प्रणवभागेनैवाऽऽश्रावयन्ति । यथा सामगा उद्गातारोऽपि प्रणवोच्चारणपुरःसरमेव सामगानं कुर्वन्ति । बह्वृचा होतारोऽपि प्रणवोच्चारणेनौं शोमिति शब्दोच्चारणेनैव शस्त्राणि निष्केवल्यप्रउगादिनामकानि पठन्ति । तथा हि—शस्त्रशंसनस्याध्वर्यु प्रत्यनुज्ञां याचमाना होतारोऽनेन मन्त्रेण याचन्तोऽध्वर्यो [illegible] । तत्राऽऽदौ शोमिति शब्दोऽन्ते च प्रणव इत्युभयं दृश्यते । तदिदमभिलक्ष्यौं शोमिति शस्त्राणि शंसन्तीत्याम्नातम् । हेऽध्वर्यो होतारो वयं किंशंसनं कुर्म इत्यनुज्ञापनं मन्त्रस्यार्थः । यदा होता शस्त्राणि शंसति तदानीमध्वर्युः शंसितारं होतारं प्रति प्रोत्साहनद्योतकं शब्दमुच्चारयति । सोऽयं शब्दः प्रतिगर इत्युच्यते । तं प्रतिगरं यदा प्रतिगृणात्युच्चारयति तदानीमोमिति प्रयुङ्क्ते । तदिदमापस्तम्बो विस्पष्टमाह —"ऋतुपात्रं धारयमाणः सदोबिले प्रत्यङ्तिष्टन्प्रतिगृणाति प्रह्वो वोऽथा मोद इवेत्यर्धर्चेष्वोऽथा मोद इवेत्यवसानेषु प्रणव एवान्ते " इति । शस्त्रमध्य एकस्या ऋचः पूर्वार्धे समाप्ते सत्यध्वर्युरोऽथा मोद इवेत्येतं प्रतिगरं प्रयुङ्क्ते । ओकारेण होता संबोध्यते । हे होतरथार्धर्चशंसनानन्तरमस्माकं मोद इव हर्ष एव संपन्न इत्यर्थः । ऋचोऽवसाने सति प्रतिगरादौ प्रणवः प्रयोक्तव्यः । स च शस्त्रशंसनस्याङ्गीकारे वर्तते । कृत्स्नस्य शस्त्रस्यावसाने सत्यङ्गीकारार्थः प्रणवः एव प्रयोक्तव्यः । अतः प्रतिगरेऽपि प्रणवोऽनुवर्तते । वेदत्रयोक्तप्रयोगज्ञर्त्विग्ब्रह्मा । स च यदा प्रोक्षणादिक्रियास्वन्यानृत्विजः प्रेरयति तदानीमों

+ ओमित्येतत्प्राग्वर्तिन ओकारस्यानुकरणमित्युक्त्यैकदेशविकृतमनन्यवत्प्रकृतिवदनुकरणमिति न्यायाभ्यां तस्मिन्पर [illegible] पररूपमिति सूचितम् ।

१ क. ग. ङ. °वयोमाश्रा° । २ क. ङ. ओंकार । ३ क. ख. घ. ङ. °सरे श्रा° । ४ क. ख. ग. ङ. तद्यु° । ५ ङ. तदेतदो°मि° । ६ ख. ग °नाय ह ।

प्रोक्षेत्येवं प्रणवपुरःसरमेव **प्रसौति** प्रेरयति । अग्निहोत्रहोमेऽध्वर्युर्होमद्रव्यं क्षीरं तत्पात्रादग्निहोत्रहवणीनामके पात्रे यदा स्रुवेणोन्नयति तदानीमोमुन्नेष्यामि हव्यं देवेभ्य इत्यादिमन्त्रेण यजमानं **प्रत्यनुज्ञां** याचते । स च यजमान ॐकारेणनुज्ञां प्रयच्छति । तथा च सूत्रकार आह—"ओमुन्नयेत्युच्चैरनुजानाति" इति । तथा **ब्रह्मयज्ञं** चिकीर्षुर्**ब्राह्मणो ब्रह्मयज्ञ**नामकस्य प्रवचनस्याऽऽदौ प्रणवं प्रयुङ्क्ते । तथा च **ब्रह्मयज्ञप्रकरणे** समाम्नातम्—"दक्षिणोत्तरौ पाणी पादौ कृत्वा सपवित्रावोमिति प्रतिपद्यते" इति । प्रतिपद्यते ब्रह्मयज्ञं प्रारभत इत्यर्थः ।

तदेवं वैदिकैरुदाहरणैरोंकारव्याप्तिः प्रपञ्चिता । अथ फलकथनव्याजेनोपासनविधिमुन्नयति—

ब्रह्मोपाप्नवानीति । ब्रह्मैवोपाप्नोति (१), इति ।

ओं दश ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके सप्तमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

यः पुमान्**ब्रह्म प्राप्नवानीति** कामयते स पुमानोमित्यनेन शब्देन वाच्यं ब्रह्मोपासीत तेनोपासनेन **ब्रह्म प्राप्नोत्येव** ।

अथ **मीमांसा**—अत्रैतच्चिन्तनीयम् । ओमिति ब्रह्मेतिवाक्ये किमोंकारे प्रतीके ब्रह्मदृष्टिर्विधीयते किंवोपास्यं ब्रह्मोमित्यनेन विशेषणेन विशेष्यत इति । तत्र य ओमिति शब्दस्तद्ब्रह्मेत्येवमोंकारप्रतीकमाधारत्वेनोद्दिश्य तत्र ब्रह्मदृष्टिर्विधीयते । तथा सत्युद्देश्यविधेययोः क्रमनिर्देशस्योपपन्नत्वादिति प्राप्ते ब्रूमः—उद्गीथन्यायेनात्रोंकारस्य विशेषणत्वं द्रष्टव्यम् । स च न्यायस्तृतीयाध्यायस्य तृतीयपादे * दर्शितः—

"किमध्यासोऽथ वा बाध ऐक्यं वाऽथ विशेष्यता ।
अक्षरस्यात्र नास्त्येकं नियतं हेत्वभावतः ॥
वेदेषु व्याप्त ओंकार उद्गीथेन विशेष्यते ।
अध्यासादौ फलं कल्प्यं संनिकृष्टांशलक्षणा ॥

"ओमित्येतदक्षरमुद्गीथमुपासीत" इत्यक्षरोद्गीथयोः सामानाधिकरण्यं श्रूयते । तत्र चतुर्धा संशयः । तथा हि—"नाम ब्रह्मेत्युपासीत" इत्यत्र नामनि ब्रह्मदृष्टच्यध्यासाय सामानाधिकरण्यं श्रुतम् । तथा बाधादिष्वप्युदाहियते—"यश्चोरः स स्थाणुः" इति चोरत्वस्य बाधः । "यो जीवस्तद्ब्रह्म" इत्येकत्वम् । "यन्नीलं तदुत्पलम्" इति विशे-

* व्याप्तेश्च समञ्जसम् । अ० ३ पा० ३ अ० ४ सू० ९ ।

१ क. ग. 'वधिना' । २ ग. 'न्ब्रह्मोपाप्न' ।

ष्यता । अतोऽक्षरस्य चतुर्धा संदेहे सतीदमेवेत्यध्यवसायो नास्ति नियामकस्य हेतो-रभावादिति प्राप्ते ब्रूमः—अक्षरस्योद्गीथेन विशेष्यता नियन्तुं शक्यते । ओंकार ऋग्यजुःसामसु त्रिषु पठ्यते । तत्र कस्योपास्यत्वमित्यपेक्षायामुद्गीथभागगतस्य न त्वितरस्येति सामवेदगतस्य विशेषणीयत्वात् । अध्यासबाधैक्यपक्षेषु फलमपि कल्पनीयं प्रसज्येत । स्वतन्त्रोपासनत्वेन फलस्याऽऽकाङ्क्षितत्वात् । विशेषणपक्षे तु वक्ष्यमाणर-सतमत्वादिगुणोपासनाय प्रतीकत्वेनोंकार उद्गीथेन विशेष्यते न तु स्वतन्त्रमुपासनम् । तदा न पृथक्कल्पनीयं फलम् । ननूद्गीथशब्दः कृत्स्नभक्तिवाचकः । ओंकारस्तु तदवयवः । अत ओंकारं विशेषयितुमुद्गीथशब्दे तदंशलक्षणा स्वीकरणीया स्यात् । बाढम् । तथाऽ-प्यध्यासपक्षात्समीचीनो विशेषणपक्षः । अध्यासपक्षे तु यथा विष्णुशब्दः स्वार्थं सर्वं परित्यज्यार्थान्तरभूतां शिल्पिप्रतिमां लक्षयति तथोद्गीथशब्दोऽपीति विप्रकर्षः । अंश-लक्षणायां तु स्वार्थैकदेशस्यैव परित्याग इति संनिकर्षः । ओंकारादितरदक्षरजातं यदस्ति सोऽयं परित्यक्तव्यस्तदेकदेशः । तस्माद्वेदान्तरगतोंकारव्यावृत्त्यर्थमुद्गीथावयवत्वेनेदम-क्षरं विशेष्यते ।

अनेन न्यायेनात्रापि ब्रह्मशब्देन मनोमयत्व[illegible] पृथिव्यादिगुणकं शुद्धं चेति त्रिविधब्रह्मप्राप्तौ सत्यां सगुणत्वं व्यावर्त्य शुद्धब्रह्मसमर्पणार्थमोमिति विशेषणम् । ओमि-त्यनेनैव वाचकेन शब्देन वाच्यं यत्परं ब्रह्म तदुपासितव्यमित्युक्तं भवति । प्रती-कपक्षे त्वोंकारस्य शब्दात्मकस्य ब्रह्मदृष्ट्योपासनायां शब्दोपासनमेव स्यान्न तु ब्रह्मो-पासनम् । तथा सति प्रतीकोपासकस्य ब्रह्मलोकप्राप्तिरेव तावन्न संभवति । कुतो ब्रह्म-तत्त्वप्राप्तिः । तदभावे च ब्रह्मैवोपाप्नोतीति फलवाक्यं बाध्येत । ओंकारवाच्यब्रह्म-तत्त्वोपासने तु ब्रह्मलोकप्राप्तिर्ब्रह्मतत्त्वज्ञानद्वारेण विदेहमुक्तिलक्षणा ब्रह्मप्राप्तिश्चोप-पद्यते । तस्मादोंकारवाच्यत्वेन ब्रह्मतत्त्वं विशेषणीयम् । ननु ब्रह्मतत्त्वस्य प्रमाणजन्यं वेदनमेव संभवति न तूपासनम् । अत एव दहरशाण्डिल्यादिविद्यासु सर्वत्र सगु-णस्यैव ब्रह्मण उपासनं विधीयते न तु क्वचिदपि शुद्धस्य ब्रह्मतत्त्वस्य । किं च वेदान्तवाक्येन शुद्धे ब्रह्मतत्त्वेऽवगते सति कृतकृत्यत्वान्नानेनोपासनेन किंचित्प्रयोजन-मस्ति । नापि ब्रह्मविदां कर्तृत्वेऽपगते सत्युपासकत्वं संभवतीति । नायं दोषः । द्विविधं हि वेदान्तवाक्यम् । अवान्तरवाक्यं महावाक्यं चेति । जगत्कारणब्रह्मणो यत्तात्त्विकं रूपं तस्य बोधकमवान्तरवाक्यम् । जीवब्रह्मणोस्तादात्म्यबोधकं महावा-क्यम् । तत्र महावाक्येन तादात्म्यं विदितवतस्त्वदुक्तरीत्या प्रयोजनाभाव उपास-कत्वाभावश्च भवतु नाम । यस्त्ववान्तरवाक्यमात्रेण जगत्कारणस्य तत्त्वमात्रं बुध्यते तस्य तावता कर्तृत्वानपायादुपासकत्वं संभवति । प्रयोजनं च ब्रह्मलोकप्राप्तिर्ब्रह्मतत्त्वा-

१ क. ग. ङ. °ब्देन तद्वंशे ल° । २ घ. °विदः क° ।

वबोधे विदेहमुक्तिलक्षणं संभाव्यते। तस्मात्तादृशः पुमान्ब्रह्मतत्त्वमुपासीत। अत एवोत्तरतापनीयोपनिषदि निर्गुणब्रह्मतत्त्वविषयाण्येव बहून्युपासनानि विहितानि। स्मृतिश्च ब्रह्मतत्त्वध्यानं विदधाति—

" उपपातकसंघेषु पातकेषु महत्सु च।
प्रविश्य रजनीपादं ब्रह्मध्यानं समाचरेत् " ॥ इति।

तदेतद्ब्रह्मतत्त्वस्य ध्यानं प्रथमाध्यायस्य तृतीयपादे *चिन्तितम्।

" त्रिमात्रप्रणवे ध्येयमपरं ब्रह्म वा परम्।
ब्रह्मलोकफलोक्त्यादेरपरं ब्रह्म गम्यते ॥
ईक्षितव्यो जीवघनात्परस्तत्प्रत्यभिज्ञया।
भवेद्ध्येयं परं ब्रह्म क्रममुक्तिः फलिष्यति ॥

प्रश्नोपनिषदि श्रूयते—" यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत" इति। तत्र ध्येयं वस्तु हिरण्यगर्भाख्यमपरं ब्रह्मोत परं ब्रह्मेति संशये सति ह्यपरमिति प्राप्तम्। कुतः। "स सामभिरुन्नीयते ब्रह्मलोकम्" इति कमलासनलोकप्राप्तिफलश्रवणात्परब्रह्मध्यानस्य परमपुरुषार्थत्वस्य तावन्मात्रफलत्वानुपपत्तेः। परं पुरुषमिति परब्रह्मविशेषणमपरस्मिन्नपि ब्रह्मण्युपपद्यते। तस्याप्यन्यापेक्षया परत्वादिति प्राप्ते ब्रूमः—परमेव ब्रह्माभिध्येयम्। कुतः। ईक्षितव्यस्य परस्य ध्येयत्वेन प्रत्यभिज्ञानात्। " स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते " इति वाक्यशेषे श्रूयते। तस्यायमर्थः। य उपासनया ब्रह्मलोकं प्राप्तः स एतस्मात्सर्वजीवसमष्टिरूपादुत्कृष्टाद्धिरण्यगर्भादप्युत्कृष्टं सर्वप्राणिहृदयेशयं परमात्मानं पश्यतीति। तत्रेक्षितव्यो यः परमात्मा स एव वाक्योपक्रमे ध्यानविषयत्वेनाभिप्रेत इत्यवगम्यते। परपुरुषशब्दाभ्यां तस्य प्रत्यभिज्ञानात्। न च ब्रह्मलोकमात्रमत्र फलं क्रममुक्तिसंभवात्। तस्माद्ब्रह्मैव ध्येयम्।

तदेवं शुद्धब्रह्मतत्त्वस्याप्युपास्तिसंभवाद्ब्रह्मोपाप्नवानीत्येवं कामयमानः प्रणवमुच्चारयंस्तदर्थरूपं ब्रह्मतत्त्वमुपासीत। तेन चोपासनेन ब्रह्म प्राप्नोत्येव ॥

इति श्रीमत्सायणाचार्यविरचिते श्रीबुक्कणसाम्राज्यधुरंधरमाधवविद्यारण्यपरमेश्वरसंबन्धिवेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये सप्तमप्रपाठके सांहित्यामुपनिषद्यष्टमोऽनुवाकः ॥ ८ ॥

---

* ईक्षतिकर्मव्यपदेशात्सः। अ० १ पा० ३ अ० ४ सू० १३।

अथ सप्तमे नवमोऽनुवाकः ।

अष्टमेऽनुवाके शुद्धब्रह्मतत्त्ववाचिना प्रणवेन ब्रह्मोपासनमुक्तम् । तावतैव क्रममुक्तिलक्षणस्य पुरुषार्थस्य सिद्धत्वादुपासकस्य श्रुतिस्मृत्युदितनित्यकर्मवैयर्थ्यमाशङ्क्य च **नवमेऽनुवाके** नित्यकर्मणामुपासनेन सह समुच्चयं विधत्ते—

ऋतं च स्वाध्यायप्रवचने च । सत्यं च स्वाध्यायप्रवचने च । तपश्च स्वाध्यायप्रवचने च । दमश्च स्वाध्यायप्रवचने च । शमश्च स्वाध्यायप्रवचने च । अग्नयश्च स्वाध्यायप्रवचने च । अग्निहोत्रं च स्वाध्यायप्रवचने च । अतिथयश्च स्वाध्यायप्रवचने च । मानुषं च स्वाध्यायप्रवचने च । प्रजा च स्वाध्यायप्रवचने च । प्रजनश्च स्वाध्यायप्रवचने च । प्रजातिश्च स्वाध्यायप्रवचने च , इति ।

यं कंचिदर्थं विवक्षुः पुरुषो मनसा तमर्थं यथावस्तु पर्यालोच्य[1] तद्वाचकं शब्दमनुस्मरति । तदिदं मानसं यथावस्तु भाषणानुचितमृतमुच्यते[2] । **स्वाध्यायो** नित्यमध्ययनम् । **प्रवचनम**ध्यापनं ब्रह्मयज्ञो वा । न केवलमुपासनमेव मुक्तिकामेनानुष्ठेयम् । किं तर्हि **यदृतमु**क्तविधं तदप्यनुष्ठेयम् । तथा स्वाध्यायप्रवचने अप्यनुष्ठेये । उपासनेन **सह समुच्चयार्थौ चकारौ** । वाचा यथार्थभाषणं **सत्यम्** । अशनपरित्यागरूपं कृच्छ्रचान्द्रायणादिव्रतं **तप** इत्युच्यते । " तपो नानशनात्परम् " इति श्रुतेः । " यज्ञेन दानेन तपसाऽनाशकेन " इति श्रुत्यन्तरे तपसः पृथगेवानशनं निर्दिष्टमिति चेत्तर्हि तस्मिन्ननशने सामर्थ्यरहितस्य धनदानं तपोऽस्तु । " एतत्खलु वाव तप इत्याहुर्यः स्वं ददाति " इति श्रुतेः । चक्षुरादीनां [illegible] निषिद्धविषयेभ्यो निवर्तनं **दमः** । मनसो निषिद्धानुचिन्तनान्निवर्तनं **शमः** । आधानादिसंस्कारेण निष्पन्ना आहवनीयादयोऽग्नयः । आहिताग्नौ सायं [illegible] होमोऽग्निहोत्रम् । शेषमनपेक्ष्य यदा कदाचिद्याच्ञार्थं परगृहे समागता **अतिथयः** । मनुष्यैर्विवाहाद्युत्सवेषु क्रियमाणं बन्धादिपूजनं **मानुषम्** । एतदपि शिष्टाचारप्राप्तत्वाच्छ्रौतस्मार्तवदनुष्ठेयमेव । **प्रजाशब्देन** पुत्रोत्पत्तिविषया गर्भाधानादयः संस्कारा विवक्षिताः । **प्रजनश-**

---

१ क. ख. ङ. °लोक्य त° । २ ग. °षमृतमित्युच्य° । ३ ब. °नुचितनमृतमित्युच्य° । ४ ब. °णं बन्धादि° ।

ब्देन पुत्रोत्पत्त्यर्थमृतुकाले दारसंगमो विवक्षितः । प्रजातिशब्देन श्रुतिस्मृत्युदितं सर्वं कर्म स्ववर्णाश्रमानुसारेणोपासकोऽप्यनुतिष्ठेत् । अन्यथा विहिताकरणप्रत्यवायेन प्रतिबद्धमुपासनं फलपर्यवसायि न स्यात् । न चानेन न्यायेन ब्रह्मतत्त्वज्ञानस्यापि कर्मसमुच्चयः प्राप्नुयादिति शङ्कनीयम् । तत्त्वविदः स्वात्मनि कर्तृत्ववर्णाश्रमाद्यध्यासनिवृत्तौ कर्माधिकाराभावात् । उपासकस्य त्वध्याससद्भावादस्ति कर्माधिकार इति युक्तः समुच्चयः । निरन्तरमुपासीनस्य चित्तविक्षेपहेतावग्निहोत्रादौ बहुप्रयाससाध्ये कर्मणि प्रवृत्तिर्न संभवतीति चेत्तर्ह्यसौ शमदमादिलक्षणमनुकूलं कर्मानुनिष्ठतु । अत एवोपासकं प्रति यमनियमादिप्रतिपादकं योगशास्त्रं प्रवृत्तम् । अग्निहोत्रादीनां शमदमादीनां च पुरुषविशेषं प्रति चित्तसमाधानानुसारेण वैकल्पिकत्वेऽपि स्वाध्यायप्रवचनयोरवश्यमनुष्ठेयत्वमभिप्रेत्य तेन तेन कर्मणा सह समुच्चयं विधातुं पुनः पुनर्वाक्यमभ्यस्तम् । न हि स्वाध्यायः कदाचिदपि परित्यक्तुं शक्यते । तत्परित्यागे शूद्रत्वप्रसङ्गात् ।

तथा च स्मृतिः—

"योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" इति ॥

प्रवचनपरित्यागनिषेधस्तु ब्रह्मयज्ञप्रकरणे समाम्नायते—"अपहतपाप्मा स्वाध्यायो देवपवित्रं वा एतत्तं योऽनूत्सृजत्यभागो वाचि भवत्यभागो नाके । तदेषाऽभ्युक्ता—यस्तित्याज सखिविदꣳ सखायं न तस्य वाच्यपि भागो अस्ति । यदीꣳ शृणोत्यलकꣳ शृणोति न हि प्रवेद सुकृतस्य पन्थाम्" इति । यस्तु परिव्राट्पूर्वकर्माणि संन्यस्यति तेनापि स्वाध्यायो न परित्याज्यः । तथा च स्मृतिः—"संन्यसेत्सर्वकर्माणि वेदमेकं न संन्यसेत्" इति । नन्वारुण्युपनिषदि स्वाध्यायस्यापि संन्यासः श्रूयते पुत्रान्भ्रातृबन्धवादीञ्शिखां यज्ञोपवीतं यागं सूत्रं स्वाध्यायं चेति परित्याज्येषु वस्तुषु स्वाध्यायस्य पठितत्वात् । नायं दोषः । परिव्राजकानामनुपयुक्तस्यैव कर्मभागस्य त्याज्यत्वात् । उपयुक्तस्य तु भागस्याऽऽवृत्तिर्यतिधर्मेष्वाम्नायते—"त्रिसंध्यादौ स्नानमाचरेत् । संधिं समाधावात्मन्याचरेत् । सर्वेषु वेदेष्वारणमावर्तयेत् । उपनिषदमावर्तयेदुपनिषदमावर्तयेत्" इति । अतः स्वाध्यायप्रवचनयोः परित्यागो न कस्यापीत्यभिप्रायेणाऽऽदरार्थोऽयं विधिवाक्याभ्यासः ।

अथ यथोक्तेषु कर्मसु प्राशस्त्येन मतभेदं दर्शयति—

सत्यमिति सत्यवचा राथीतरः । तप इति तपोनित्यः पौरुशिष्टिः । स्वाध्यायप्रवचने एवेति नाको

---

१ क. ख. घ. ङ. °कालदा° । २ ग. °म्भ्रातृन्बन्धा° ।

मौद्गल्यः । तद्धि तपस्तद्धि तपः (१), इति ।
प्रजा च स्वाध्यायप्रवचने च षट् च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके सप्तमप्रपाठके
नवमोऽनुवाकः ॥ ९ ॥

रथीतराख्यस्य मुनेः पुत्रः कश्चित्सर्वदा सत्यमेव वक्त्यतः **सत्यवचा** इति तस्य नामधेयम् । स हि सत्यमेवोत्तमं कर्मेति ब्रूते । **पुरुशिष्ट्या**ख्यस्य मुनेः पुत्रः कश्चित्तपसि नियतो वर्तते । अतस्तपोनित्य इति तस्य नामधेयम् । स त्वनशनधनदानरूपमेव कर्मोत्तममिति ब्रूते । मुद्गलाख्यस्य मुनेः पुत्रः कश्चिन्**मौद्गल्यः** सर्वदा स्वाध्यायप्रवचनाभ्यां तुष्टः सन्दुःखरहितो वर्तते । अतो **नाक** इति तस्य नामधेयम् । स तु **स्वाध्यायप्रवचने** एवोत्तमे **कर्मणी** इति ब्रूते । ननु—"तपसा देवा देवतामग्र आयन् । तपसर्षयः सुवरन्वविन्दन्" इत्यादिश्रुतेस्तपस एवोत्तमत्वं युक्तमिति चेदस्तु नाम तावता स्वाध्यायप्रवचनवादिनो **मौद्गल्यस्य** न हानिः कदाचिदस्ति यस्मात्तत्स्वाध्यायप्रवचनानुष्ठानं तपोरूपम् । तस्मात्तदेव प्रशस्तम् । **तद्धि तपस्तद्धि तप** इत्यभ्यासो मुख्यतपस्त्वद्योतनार्थः । मुख्यतपोरूपत्वादेवानध्यायेष्वपि ब्रह्मयज्ञस्वाध्यायोऽध्येतव्यः । तथा चाऽऽम्नायते—"य एवं विद्वान्मेघे वर्षति विद्योतमाने स्तनयत्यवस्फूर्जति पवमाने वायावमावास्यायाꣳ स्वाध्यायमधीते तप एव तत्तप्यते तपो हि स्वाध्यायः" इति । वाक्यान्तरेणाप्ययमेवार्थः स्पष्टी क्रियते—"उत तिष्ठन्नुत व्रजन्नुताऽऽसीन उत शयानोऽधीयीतैव स्वाध्यायं तपस्वी पुण्यो भवति । य एवं विद्वान्स्वाध्यायमधीते" इति । तस्मादनशनरूपं धनदानरूपं वा यत्तपोऽस्ति ततोऽप्यधिकफलहेतुत्वादेतदुत्तमं तपः । तदप्याम्नातम्—"यावꣳतꣳ ह वा इमां वित्तस्य पूर्णां ददत्स्वर्गं लोकं जयति तावन्तं लोकं जयति भूयाꣳसं चाक्षय्यं चाप पुनर्मृत्युं जयति ब्रह्मणः सायुज्यं गच्छति" इति ॥

इति श्रीमत्सायणाचार्यविरचिते श्रीबुक्कणसाम्राज्यधुरंधरमाधवविद्यारण्यपरमेश्वरसंबन्धिवेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये सप्तमप्रपाठके सांहित्यामुपनिषदि नवमोऽनुवाकः ॥ ९ ॥

---

१ क. ख. घ. ङ. °ष्टः स दुः° ।

अथ सप्तमे दशमोऽनुवाकः।

नवमेऽनुवाके ब्रह्मोपासनेन समुचित्य श्रौतस्मार्तकर्मानुष्ठेयमित्युक्तम्। तत्प्रसङ्गाद्ब्रह्मयज्ञस्योत्तमतपस्त्वमुक्तम्। यस्तु श्रद्धालुरपि प्रज्ञामान्द्यादिदोषेण वेदपाठाभावाद्ब्रह्मयज्ञे समर्थो न भवति तस्य ब्रह्मयज्ञफलसिद्धये जप्यं मन्त्रं दशमानुवाके दर्शयति—

अहं वृक्षस्य रेरिवा। कीर्तिः पृष्ठं गिरेरिव। ऊर्ध्वपवित्रो
वाजिनीव स्वमृतमस्मि। द्रविणꣳ सवर्चसम्। सुमेधा
अमृतोक्षितः। इति त्रिशङ्कोर्वेदानुवचनम् (१), इति।

अहꣳ षट्॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके सप्तमप्रपाठके
दशमोऽनुवाकः॥ १०॥

वृश्च्यते तत्त्वज्ञानेनोच्छिद्यत इति वृक्षः संसारः। स चाऽऽरुणकेतुकमकरणे केनचिन्मन्त्रेण स्पष्टीकृतः—"ऊर्ध्वमूलमवाक्शाखं वृक्षं यो वेद संप्रति" इति। ऊर्ध्वं सर्वस्माज्जगत उत्कृष्टं परं ब्रह्म मूलं कारणं यस्य संसारवृक्षस्य सोऽयमूर्ध्वमूलः। अवाच्यः सुरनरतिर्यग्देहाः शाखा यस्य सोऽयमवाक्शाखः। कठवल्लीष्वप्याम्नायते—"ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः" इति। अनित्यतया श्वो न तिष्ठतीत्यश्वत्थः। सनातनत्वमनादित्वम्। भगवताऽप्यसौ वृक्षोऽभिहितः—

"ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्" ॥ इति।

मुमुक्षुरहं तस्य संसाररूपस्याश्वत्थवृक्षस्य रेरिवा विषयवैराग्यरूपेण शस्त्रेण च्छेत्ता भूयासमिति शेषः। "री हिंसायाम्" इति धातोरयं शब्दो निष्पन्नः। वैराग्यशस्त्रेण च्छेदो भगवतोक्तः—

"अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन च्छित्त्वा।
ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः" ॥ इति।

संसारवृक्षे छिन्ने सति मदीया कीर्तिर्गिरेः पृष्ठमिव भवति। यथा पर्वतस्योपरिभागोऽत्यन्तमुन्नतः। या मदीया मोक्षविषया कीर्तिरत्यन्तमुन्नता सती देवलोकेष्वपि प्रसरति। ततो देवा अपि मदीयं पुरुषार्थं विहन्तुं न क्षमन्ते। तथा च श्रूयते—

---

१ ग, घ. 'त्यन्त उन्न°।

"तस्य ह न देवाश्चनाभूत्या ईशते" इति । **वाजिनि स्वमृतमिवाहमूर्ध्वपवित्रोऽस्मि** । वाजो गतिस्तद्वानादित्यो वाजी । स हि सर्वदा वेगेनैव गच्छति ।

तथा **चोक्तम्**—

"योजनानां सहस्रे द्वे द्वे शते द्वे च योजने ।
एकेन निमिषार्धेन क्रममाण नमोऽस्तु ते" ॥ इति ।

तस्मिन्वाजिन्यादित्ये शोभनममृतं विद्यते । अत एव **च्छन्दोगा** मधुविद्यायामादित्यमण्डलस्य मधुरूपत्वं तदीयप्रागादिभागेष्वृग्वेदादिप्रोक्तकर्मफलरूपाणि रोहितशुक्लादिवर्णयुक्तान्यमृतानि चाऽऽम्नातानि तद्यत्प्रथममृतं तद्वसव उपजीवन्तीत्यादिना तेषाममृतानां वस्वाद्युपजीव्यत्वमा(त्वं चाऽऽ)मनन्ति । तदिदमादित्यमण्डलगतममृतं शोभनमत्यन्तं शुद्धम् । तद्वदहमप्यूर्ध्वपवित्र ऊर्ध्वं पवित्रमुत्कृष्टा शुद्धिर्यस्य मम सोऽहमूर्ध्वपवित्रः । तादृशस्य मम **सवर्चसं द्रविणं** सिध्यतु । द्विविधं हि द्रविणम् । मानुषं दैवं च । तत्र चक्षुषा दृश्यमानं सुवर्णरजतादिकं मानुषम् । श्रोत्रेण श्रूयमाणं वेदे प्रतीयमानं ब्रह्मज्ञानादिकं दैवम् । अत एव **वाजसनेयिनः** । कस्मिंश्चिदुपासने चक्षुःश्रोत्रयोर्मानुषदैववित्तदृष्टिमामनन्ति—"चक्षुर्मानुषं वित्तम् । चक्षुषा हि तद्विन्दते । श्रोत्रं दैवम् । श्रोत्रेण हि तच्छृणोति" इति । तत्र दैववित्तमाभिप्रेत्य **सवर्चसमिति** विशेष्यते । वर्चो बलं तद्योगात्सवर्चसं बलवत्त्वं च दैववित्तस्य ब्रह्मज्ञानस्य सर्वसंसारनिवर्तकत्वादुपपन्नम् । ब्रह्मज्ञानरूपेण दैववित्तेनात्र द्रविणशब्दवाच्येन संपन्नोऽहं **सुमेधा अमृतोक्षितश्च** भूयासम् । शोभना मेधा ब्रह्मज्ञानप्रतिपादकग्रन्थतदर्थावधारणशक्तिर्यस्य मम सोऽहं सुमेधाः । अत एवाहममृतेन ब्रह्मानन्दरसेनोक्षितः सेचितः । इत्यहं वृक्षस्येत्यादिमन्त्रस्त्रिशङ्कुनामकस्य मुनेर्मतं वेदानुवचनं वेदस्य गुरुपूर्वकमध्ययनमनु पश्चाद्वचनं ब्रह्मयज्ञस्वाध्यायतप इत्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते श्रीबुक्कणसाम्राज्यधुरंधरमाधवविद्यारण्यपरमेश्वरसंबन्धिवेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये सप्तमप्रपाठके सांहित्यामुपनिषदि दशमोऽनुवाकः ॥ १० ॥

अथ सप्तम एकादशोऽनुवाकः ।

दशमे ब्रह्मयज्ञप्रतिनिधित्वेन जप्यो मन्त्र उक्तः । ततो मन्दप्रज्ञस्यापि सुकरो ब्रह्मयज्ञः । तथा तस्य "ऋतं च स्वाध्यायप्रवचने च" इत्येवमुक्तोपासनेन सह श्रौतस्मा-

१ ग, °द्विमार्गेष्वृ° । २ ग. °माणवे° । ३ ग. घ. °र्मते वे° ।

र्कर्मसमुच्चयः क्रममुक्तिहेतुः सुस्थितः । अथैकादशेऽनुवाके केवलकर्मणामपि विविदिषोत्पादनद्वारेण मोक्षहेतुत्वमभिप्रेत्य तदनुशासनं विधत्ते—

वेदमनूच्याऽऽचार्योऽन्तेवासिनमनुशास्ति, इति ।

आचार्यस्वरूपं **मनुना** स्मर्यते—

" उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते " ॥ इति ।

अन्ते पूर्वोक्तस्याऽऽचार्यस्य समीपे । सर्वदा वसतीत्यन्तेवासी । " छायाभूतोऽपरित्यागी नित्यमेव वसेद्गुरौ " इति स्मृतेः । तादृशं शिष्यमाचार्यो वेदमनूच्योपनयनमनु पश्चादध्याप्यानुशास्ति । ग्रन्थग्रहणादूर्ध्वमनुष्ठेयमर्थं ग्राहयति । अनेनैतदवगम्यते । अधीतवेदेन धर्मजिज्ञासामकृत्वा गुरुकुलान्न निवर्तितव्यमिति ।

अनुशासनप्रकारं संग्रहेण दर्शयति—

सत्यं वद । धर्मं चर, इति ।

सत्यशब्देन " अहिंसा सत्यमस्तेयम् " इत्यादिस्मृतिप्रसिद्धाः सर्वेऽप्युपलक्ष्यन्ते । **धर्म**शब्देन प्रत्यक्षश्रुतिविहिता अग्निहोत्रादयो विवक्षिताः । " चोदनालक्षणोऽर्थो धर्मः " इति **जैमिनिना** सूत्रितत्वात् । श्रौत्रं स्मार्तं च कर्म सर्वमनुष्ठेयमिति संग्रहवाक्ययोस्तात्पर्यार्थः ।

" सकृत्कृते कृतः शास्त्रार्थः " इति न्यायेन श्रौतस्मार्तयोः सकृदनुष्ठितयोः पश्चात्परित्यागप्रसक्तौ तत्परित्यागरूपं प्रमादं निषेधति—

स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् (१) । देवपितृकार्याभ्यां न प्रमदितव्यम्, इति ।

अध्ययनेन गृहीतस्य **स्वाध्यायस्य** विस्मृतिः **प्रमादस्तं** मा कार्षीः । "ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनम्" इति स्मृतेः । गोसुवर्णवस्त्रादिरूपं यद्धनमाचार्यस्य **प्रियं** तद्विद्यादक्षिणार्थं संपाद्य गुरवे समर्प्य ततो विवाहं कृत्वा प्रजायाः पुत्रपौत्रादिरूपायास्तन्तुर्विस्तारस्तस्य **विच्छेदं** मा कार्षीः । पूर्वोक्तयोः **सत्यधर्मयोः** कदाचिदालस्या-

---

१ क. ख. 'क्षणाथा ।

दननुष्ठानं **प्रमादः** सोऽपि न कर्तव्यः । **कुशलं** क्षेमस्तेन तत्कारणं कर्म विवक्षितम् । तच्च द्विविधं वैदिकं लौकिकं च । " यो ज्योगामयावी स्याद्यो वा कामयेत सर्वमायुरियामिति तस्मा एतामिष्टिं निर्वपेत् " इत्यादिकमायुरारोग्यप्रदं वैदिकम् । विचिकित्सादिकं लौकिकम् । **भूतिरैश्वर्यं** तया तत्कारणमुपलक्ष्यते । तत्रापि " वायव्यꣳ श्वेतमालभेत भूतिकामः " इत्यादिकं वैदिकम् । प्रतिग्रहादिकं लौकिकम् । कुशलभूत्योरभावे मुक्तिहेतुकर्मानुष्ठानासंभवात्तयोरप्रमादोऽनुशासनीयः । गृहीतस्वाध्यायस्य विस्मृतिरूपः प्रमादः पूर्वं निवारितः । अत्र त्वध्यापनीयस्वाध्यायब्रह्मयज्ञयोरननुष्ठानरूपः प्रमादो निवार्यते । पौराणिकं विनायकव्रतानन्तव्रतादिकं **देवकार्यम्** । प्रतिसांवत्सरादिकं **पितृकार्यम्** ।

अथ मात्रादिषु मनुष्यत्वबुद्धिपरित्यागेन देवताबुद्ध्या पूजां विधत्ते—

मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव, इति ।

मातैव पूजनीयो रुद्रविष्णुविनायकादिरूपो देवो यस्य सोऽयं **मातृदेवः** । एवमुत्तरत्रापि ।

यदुक्तं **कुशलान्न प्रमदितव्यम्** । **भूत्यै न प्रमदितव्यमिति** । तत्र कंचिद्विशेषं दर्शयति—

यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि, इति ।

क्षेमैश्वर्यकारणानि कर्माणि द्विविधानि । अनिन्द्यानि निन्द्यानि च । तत्र पूर्वोदाहृतान्यायुष्कामेष्टिप्रतिग्रहयाजनादीन्यनिन्द्यानि कर्माणि **सेवितव्यानि** । **इतराणि** त्वभिचारादीनि शत्रुवधद्वारा क्षेमहेतुत्वेऽपि नरकप्रदत्वेन निन्दितत्वान्न सेव्यानि ।

ननु शिष्टाचारस्यापि श्रुतिस्मृतिवत्प्रमाणत्वादाचार्यस्य तव संबन्धीनि चारितानि सर्वाण्यपि सेवितव्यानीत्याशङ्क्य तत्रापि विशेषं दर्शयति—

यान्यस्माकꣳ सुचरितानि । तानि त्वयोपास्यानि (२) । नो इतराणि, इति ।

द्विविधं चरितं दैवमासुरं चेति । तदुभयं **भगवानुदाजहार**—

" अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥

---

१ ब. °लक्ष्यते ।

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुत्वं (प्त्वं) मार्दवं ह्रीरचापलम्॥
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति संपदं दैवीमभिजातस्य भारत॥
दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम्।
दैवी संपद्विमोक्षाय निबन्धायाऽऽसुरी मता" ॥ इति।

तत्रास्माकं संबन्धीनि **यान्यभयादीनि सुचरितानि त्वया तान्येव** सेवितव्यानि न तु दम्भादीनि। अयं न्यायः सर्वत्र शिष्टाचारे योजनीयः। तथा हि--जामदग्न्यः पितुराज्ञया स्वजननीं जघानेत्यत्रापि पित्राज्ञापालनरूपं सुचरितमादर्तव्यम्। न तु मातृवधरूपं दुश्चरितम्। एवमन्यदप्युदाहार्यम्।

अथ महापुरुषसेवायां कंचिद्विशेषमुपदिशति--

ये के चास्मच्छ्रेयांऽसो ब्राह्मणाः। तेषां

त्वयाऽऽससेन प्रश्वसितव्यम्, इति।

वयोविद्यादिगुणैरस्मत्तो भवदाचार्येभ्यो येऽधिका धर्मनिष्ठाः सन्ति तेषामासनदानपादप्रक्षालनादिशुश्रूषया प्रश्वासः श्रमापनयनं त्वया कर्तव्यम्। अथवा तेषामासने त्वया प्रश्वासोऽपि न कर्तव्यः। पण्डितंमन्यतया विस्रम्भेण वादादि न कर्तव्यमिति किमु वक्तव्यम्। तस्मात्तदुपदिष्टार्थग्राहिणैव त्वया भवितव्यम्।

अथ दाने कंचिद्विशेषमुपदिशति--

श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्।
ह्रिया देयम्। भिया देयम्। संविदा देयम्, इति।

यदा धनं विप्राय दीयते तदा **श्रद्धायुक्तेनैव** भवता देयम्। **अश्रद्धया** तु किंचिदप्यदेयम्। श्रद्धया रहितस्य दानस्य लोकद्वयेऽप्यनुपयोगात्। तथा च **भगवतोक्तम्।**

"अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह" ॥ इति।

अदेयमितिपदच्छेदपक्षे तदिदं व्याख्यानम्। **देयमिति** वा पदच्छेदः। यथा श्रद्धया युक्तो ददाति तथा श्रद्धाराहित्येऽपि दातव्यम्। सात्त्विकदानफलाभाव एवो-

---

१ घ. कार्यम्।

दाहृतवाक्येन दर्शितः । राजसतामसदानफलं तु विद्यते । अत एव भगवता दाने त्रैविध्यमुक्तम्—

'दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥
यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्राजसमुदाहृतम् ॥
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम्" ॥ इति ।

श्रीर्विभवः । ह्रीर्लज्जा । भीः शास्त्रभीतिः । संविद्देशकालपात्रविशेषज्ञानम् । एतैर्वाक्यैः पूर्वोक्तं त्रिविधं दानं प्रपञ्च्यते । धनबाहुल्याच्छ्रीर्मम विद्यते तत्र दासा दास्यश्च यथा धनमपहरन्ति तथा ब्राह्मणैरप्यपहियतामित्येवमवजानानः श्रिया निमित्तभूतया यद्दानं करोति तत्तामसम् । मत्समाः पुरुषा दानं कुर्वन्ति मम त्वदानेन महती लज्जेत्येवं लज्जया निमित्तभूतया पूर्ववदवज्ञातो यद्ददाति तद्राजसम् । ऋत्विगादिभ्यो यद्दानं शास्त्रेण विहितं तस्यादाने मम प्रत्यवायः स्यादिति भीत्या यद्दानं तत्सात्त्विकम् । तत्राध्वर्युप्रमुखाश्चत्वारः प्रधानभूताः संपूर्णदक्षिणामर्हन्ति । प्रतिप्रस्थात्रादयस्तदर्धमर्हन्ति । नेष्ट्रादयस्तृतीयांशमर्हन्ति । उन्नेत्रादयश्चतुर्थांशमर्हन्तीत्येवं संविदा विवेकज्ञानेन युक्तः सात्त्विको दद्यात् । यद्वा सर्वमप्येतत्सात्त्विकदानविषयमेव । वित्तशाठ्यं न कारयेदित्यादिशास्त्राद्विभवानुसारेण दातव्यम् । स्वल्पदानेन मम प्रभोर्महती लज्जा भविष्यतीत्येवं लज्जया युक्तः प्रभूतं दद्यात् ।

एवमज्ञातमनुष्ठेयमर्थमुपदिश्यानन्तरं संदिग्धेऽनुष्ठेये निर्णयोपायमुपदिशति—

अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् (३) । ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः, इति ।

कर्म श्रौतमाग्निहोत्रादिकं स्मार्तं संध्यावन्दनादिकं च । " उदिते जुहोति " " अनुदिते जुहोति " इति वाक्यद्वयं श्रुतवतः श्रौते कर्मणि संदेहः स्यात् । स्मार्तेऽपि संध्यादेवता पुरुषमूर्तिः स्त्रीमूर्तिर्वेति वचनद्वयेन संदेहः । वृत्तं कुलपरम्परागतो लौकिक आचारः । तत्रापि मातुलसुताविवाहमांसभक्षणादिविप्रतिपत्तिदर्शिनः संदेहो भवति । तदानीं यस्मिन्देशे यस्मिन्काले यस्मिन्कुले स्वयं वर्तते तत्र तेषु देशकालकुलविशेषेषु वर्तमानाः संमर्शादिविशेषणविशिष्टा **ब्राह्मणास्तत्र** तस्मिन्संदिग्धे विषये यथा वर्तेरं-

स्तथा त्वमपि वर्तस्व। रागद्वेषौत्सुक्यादिदोषराहित्येन सम्यक्शास्त्रार्थनिर्णयकुशलाः संमार्शिनः। नित्यनैमित्तिकानुष्ठाने स्वयं प्रवृत्ता युक्ताः। तत्राप्या समन्ताद्युक्ता आयुक्ताः। अवैकल्येन सम्यगनुष्ठास्याम इत्येवमभियुक्ता इत्यर्थः। लूक्षेण क्रोधेनाऽऽग्रहेण वा रहिता अलूक्षाः। धर्ममेव कामयन्ते न तु लाभपूजादिकामिति धर्मकामाः।

इत्थं संदिग्धधर्मनिर्णयोपायमुपदिश्यानन्तरं पातकादिशङ्क्या निन्दितेषु पुरुषेष्वव्यवहार्यत्वे निर्णयोपायमुपदिशति—

अथाभ्याख्यातेषु। ये तत्र ब्राह्मणाः संमर्शिनः।
युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा
ते तेषु वर्तेरन्। तथा तेषु वर्तेथाः, इति।

पूर्ववद्व्याख्येयम्।

उक्तमनुशासनमुपसंहरति—

एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमु चैतदुपास्यम् (४), इति।
स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यं तानि त्वयोपास्यानि
स्युस्तेषु वर्तेरन्सप्त च॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके सप्तमप्रपाठक
एकादशोऽनुवाकः॥ ११॥

सत्यं वदेत्यारभ्य तथा तेषु वर्तेथा इत्यन्तो योऽयं ग्रन्थसंदर्भः स एष आदेशः श्रौतो विधिः। यथा राजा स्वभृत्यमादिशति तथा वैदिको विधिरनुष्ठातारमादिशति। आदेशस्य समीपवर्तित्वात्स्मार्तो विधिरुपदेशः। स्मृतीनां वेदमूलतया तत्समीपवर्तित्वम्। अप्रत्यक्षश्रुतिमूलासु स्मृतिष्वपि सत्यं वदेत्यादिवाक्यार्थ एवमेवोपलभ्यते। येयं सत्यं वदेत्याद्युक्तिः सैषा वेदोपनिषद्वेदरहस्यं विध्यर्थवादमन्त्रात्मके वेदे विधिरूपः सारभागः। यदेतत्सत्यं वदेत्यादिकं तदेतदनुशासनमीश्वरस्याऽऽज्ञा। श्रुतिस्मृती ममैवाऽऽज्ञे इत्येवमीश्वरेणोक्तत्वात्। यस्मात्सत्यवदनादिकं श्रौतस्मार्तविध्युक्तं वेदरहस्यमीश्वराज्ञारूपं च तस्मादेवमुक्तेन प्रकारेणोपासितव्यमनुष्ठातव्यम्। एवमु चैतदुपास्यमिति पुनर्वचनमादरार्थम्। उ चेत्यव्ययसमुदायोऽवधारणार्थः। उक्तप्रकारेणैतदनुष्ठेयमेव नतु कदाचिदपि परित्यक्तुं शक्यम्। अत्र केचिदेवमादरं दृष्ट्वा कर्मभिरेव मोक्षं वर्णयन्ति। अपरे तु पुनर्ज्ञानकर्मसमुच्चयेन। तावेतौ

१ क. ग. ङ. ल्क्षेण; २ क. ख. ग. ङ. °न्तो यो म°।

पक्षावस्माभिः पूर्वोत्तरकाण्डसंबन्धकथनप्रसङ्गेनैव निराकृतौ । कर्मणां साक्षान्मोक्षहेतुत्वाभावेऽपि विविदिषोत्पादनद्वारेण तद्धेतुत्वमभिप्रेत्य विद्याप्रकरणे तदनुशासनमाम्नातम् । विद्याफले मोक्षे कर्मनैरपेक्ष्यं तृतीयाध्यायस्य चतुर्थपादे *चिन्तितम्—

"आत्मबोधः फले कर्मापेक्षो नो वा ह्यपेक्षते ।
अङ्गिनोऽङ्गेष्वपेक्षायाः प्रयाजादिषु दर्शनात् ॥
अविद्यातमसोर्ध्वस्तौ दृष्टं हि ज्ञानदीपयोः ।
नैरपेक्ष्यं ततोऽत्रापि विद्या कर्मानपेक्षिणी" ॥ इति ।

विमतो ब्रह्मतत्त्वावबोधः स्वफलदाने स्वाङ्गभूतकर्मापेक्षोऽङ्गित्वात्प्रयाजाद्यपेक्षदर्शपूर्णमासादिवत् । यद्यपि प्रथमाधिकरणे विद्यायाः स्वतन्त्रपुरुषार्थत्वप्रतिपादनेन कर्माङ्गत्वं निवारितम् । तथाऽप्यङ्गित्वं न निवारितम् । अतो नासिद्धो हेतुः । अतः कर्मापेक्षो बोध इति प्राप्ते ब्रूमः—विमतं ब्रह्मज्ञानं स्वनिवर्त्यनिवर्तनेऽन्यापेक्षं न भवति प्रकाशकत्वात्प्रदीपवद्घटज्ञानवच्च । यत्त्वङ्गित्वमुक्तम् । तत्र कर्मणः कीदृशमङ्गत्वं भवतोऽभिप्रेतं किं प्रयाजादिवत्फलोपकार्यङ्गत्वमुतावघातादिवत्स्वरूपोपकार्यङ्गत्वम् । नाऽऽद्यः । मुक्तेः कर्मजन्यत्वेनानित्यत्वप्रसक्तेः । द्वितीये साध्यविकलो दृष्टान्तः । प्रयाजादीनां स्वरूपोपकार्यङ्गत्वाभावात् । तस्मादुत्पन्ना विद्या स्वफलप्रदाने कर्माणि नापेक्षते ।

विद्यायाः स्वोत्पत्तौ कर्मापेक्षाऽपि तत्रैव ×चिन्तिता—

" उत्पत्तावनपेक्षेयमुत कर्माण्यपेक्षते ।
फले यथाऽनपेक्षैवमुत्पत्तावनपेक्षता ॥
यज्ञशान्त्यादिसापेक्षं विद्याजन्म श्रुतिद्वयात् ।
हलेऽनपेक्षितोऽप्यश्वो रथे यद्वदपेक्ष्यते" ॥

ब्रह्मविद्या स्वफले यथा कर्माणि नापेक्षते तथा स्वोत्पत्तावपि । अन्यथा क्वचिदपेक्षते क्वचिन्नापेक्षत इत्यर्धजरतीयन्यायः प्रसज्येतेति प्राप्ते ब्रूमः । नार्धजरतीयत्वदोषोऽत्रास्ति । योग्यतावशेनैकस्यैव कार्यविशेषेष्वपेक्षानपेक्षयोरुभयोरुपपत्तेः । यथा लाङ्गलवहने [illegible]ऽप्यश्वो रथवहनेऽपेक्ष्यते तद्वत् । नच विद्यायाः स्वोत्पत्तौ कर्मापेक्षायां प्रमाणाभावः । " तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन " इति प्रवृत्तिरूपाणां वेदानुवचनादीनां विविदिषोत्पादनद्वारा बहिरङ्गसाधनत्वावगमात् । " शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्यति " इति निवृत्तिरूपाणां शमदमादीनां विद्योत्पत्तौ साधनत्वेन विधीयमा-

* अत एव चाग्नीन्धनाद्यनपेक्षा । ब्र० सू० अ० ३ पा० ४ अ० ५ सू० २५ ।
× सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् । ब्र० सू० अ० ३ पा० ४ अ० ६ सू० २६ ।

१ क. ख ङ. क्षायाः प ।

नतयाऽन्तरङ्गसाधनत्वावगमात्। तस्माद्यज्ञादीनि शमदमादीनि च विद्या स्वोत्पत्ता-वपेक्षते।

विद्याहेतुभिरेवाऽऽश्रमसिद्धिश्च तत्रैव * चिन्तिता—

" विद्यार्थमाश्रमार्थं च द्विः प्रयोगोऽथवा सकृत्।
प्रयोजनविभेदेन प्रयोगोऽपि विभिद्यते॥
श्राद्धार्थभुक्त्या तृप्तिः स्याद्विद्यार्थेनाऽऽश्रमस्तथा।
अनित्यनित्यसंयोग उक्तिभ्यां खादिरे मतः "॥ इति।

यानि यज्ञादीनि विद्याहेतुत्वेन विविदिषावाक्ये विहितानि तान्येवाऽऽश्रमधर्मत्वेन पूर्वकाण्डे विहितानि तेषां प्रयोजनद्वैविध्याद्द्विरनुष्ठानमिति प्राप्ते ब्रूमः— यथा श्राद्धार्थ-भोजने तृप्तिर्नान्तरीयकतया सिध्यति तथा विद्यार्थमनुष्ठितैराश्रमधर्मैः सिध्यतु। नच विद्याहेतूनां काम्यत्वादाश्रमधर्माणां नित्यत्वाच्च सकृत्प्रयोगे नित्यानित्यसंयोगविरोध इति वाच्यम्। वचनद्वयबलेनैकस्यैव कर्मण आकारद्वयोपपत्तेः। यथा " खादिरो यूपो भवति " " खादिरं वीर्यकामस्य यूपं कुर्वीत " इत्यत्र वचनद्वयेनैकस्य नित्यत्वकाम्यत्वे च तद्वत्। तस्मादुभयविधानां यज्ञादीनां सकृदेव प्रयोगः।

अनाश्रमिकर्मणामपि विद्याहेतुत्वं तत्रैव = चिन्तितम्—

" नास्त्यनाश्रमिणो ज्ञानमस्ति वा नैव विद्यते।
धीशुद्ध्यर्थाश्रमित्वस्य ज्ञानहेतोरभावतः॥
अस्त्येव सर्वसंबन्धिजपादेश्चित्तशुद्धितः।
श्रुता हि विद्या रैक्कादेराश्रमे त्वतिशुद्धता "॥ इति।

पूर्वमाश्रमं समाप्य केनापि कारणेनोत्तरमाश्रममप्रतिपन्नोऽनाश्रमी स्नातको विधु-रादिस्तस्य तत्त्वज्ञानं न संभाव्यते। बुद्धिशुद्धिहेतोराश्रमस्याभावादिति प्राप्ते ब्रूमः— संभवत्येवानाश्रमिणामपि ज्ञानम्। आश्रमनिरपेक्षस्य जपादेर्बुद्धिशुद्धिहेतुत्वात्। " जप्ये-नैव तु संसिध्येद्ब्राह्मणो नात्र संशयः " इति स्मृतेः। श्रुतश्च संवर्गविद्यायामधिकारोऽ-नाश्रमिणोऽपि विवाहार्थिनो रैक्कस्य। एवमाश्रमरहिता गार्ग्यादय उदाहार्याः। न चैवं सत्याश्रमवैयर्थ्यम्। शुद्ध्यतिशयहेतुत्वात्। तस्मादनाश्रमिणोऽपि संभवति विज्ञानम्।

इति श्रीमत्सायणाचार्यविरचिते श्रीबुक्कणसाम्राज्यधुरंधरमाधवविद्यारण्यपरम-श्वरसंबन्धिवेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये सप्तम-प्रपाठके सांहित्यामुपनिषद्येकादशोऽनुवाकः॥ ११॥

* विहितत्वाच्चाऽऽश्रमकर्मापि ब्र० सू० अ० ३ पा० ४ अ० ८ सू० ३२। = अन्त-श्चापि तु तथादृष्टेः। ब्र० सू० अ० ३ पा० ४ अ० ९ सू० ३६।

अथ सप्तमे द्वादशोऽनुवाकः ।

एकादशे शिष्यं प्रत्याचार्यस्यानुशासनमुक्तम् । तावता ब्रह्मतत्त्वविद्याया बहिरङ्गसाधनान्युपासनानि कर्माणि च सन्तीत्यवगतानि । अथ तद्ग्रन्थपाठतदर्थज्ञानतदनुष्ठानानामवसाने जपितव्यं शान्तिमन्त्रं द्वादशे दर्शयति—

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् । ॐ शान्तिः शान्तिः शान्तिः(१), इति ।

सत्यमवादिषं पञ्च च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके सप्तमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

अक्षरार्थस्तूपक्रमे समाम्नातमन्त्रवदवगन्तव्यः । उपक्रमकाले ब्रह्मणः पूर्वमनुक्तत्वाद्ब्रह्म वदिष्यामीति पठितम् । तथा विघ्नपरिहारस्य प्रार्थनीयत्वादवत्विति पठितम् । अवसाने तु ब्रह्मणः पूर्वमुक्तत्वाद्विघ्नराशेश्च परिहृतत्वादवादिषमावीदिति पठितम् । निष्पन्नस्य विघ्नपरिहारस्य पुनः परामर्शः कृतघ्नत्वनिवारणार्थः । अन्यथा मित्रावरुणादिदेवकृतमुपकारमजानानस्य मुमुक्षोः कृतघ्नत्वं प्रसज्येत तच्चायुक्तम् । "ब्रह्मघ्ने निष्कृतिर्दृष्टा कृतघ्ने नास्ति निष्कृतिः" इति स्मरणात् । निष्पन्नेऽपि साधनानुष्ठाने कृतघ्नत्वदोषेण फलं प्रतिरुध्येत । तन्मा भूदित्याध्यात्मिकादिविघ्नानां शान्तिर्निष्पन्नेत्येवं देवकृत उपकारः परामृश्यते ॥

इति श्रीमत्सायणाचार्यविरचिते श्रीबुक्कणसाम्राज्यधुरंधरमाधवविद्यारण्यपरमेश्वरसंबन्धिवेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये सप्तमप्रपाठके सांहित्यामुपनिषदि द्वादशोऽनुवाकः ॥ १२ ॥

शं नः शीक्षाꣳ सह नौ यश्छन्दसां भूः स यः पृथिव्यामित्यृतं चाहं वेदमनूच्य शं नो द्वादश ॥ १२ ॥

---

१ घ. °श्चि० मो मि° ।

शं नो मह इत्यादित्यो नो इतराणि त्रयोविंशतिः ॥ २३ ॥

+शं नो मित्रः शं वरुणः ॥ शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं ब्रह्म वादिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्।

ॐ शान्तिः शान्तिः शान्तिः ॥

हरिः ॐ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके सप्तमः प्रपाठकः समाप्तः ॥ ७ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्वीरबुक्कणसाम्राज्यधुरंधरश्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये सप्तमः प्रपाठकः समाप्तः ॥ ७ ॥

समाप्ता च सांहित्युपनिषत्।

+ इयं शान्ति...पुस्तके नास्ति।

कृष्णयजुर्वेदीयं तैत्तिरीयारण्यकम् ॥

(ब्रह्मविद्याप्रपाठकस्याऽऽरम्भः)

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
साधनं ब्रह्मविद्यायाः सांहित्यामीरितं स्फुटम् ।
वारुण्युपनिषद्येतद्ब्रह्मतत्त्वं विविच्यते ॥ २ ॥

तत्राऽऽदौ शिष्याचार्ययोः परस्परानुकूल्यसिद्धये तत्प्रातिकूल्यशान्तिकरं जप्यं मन्त्रं पठति—

हरिः ॐ ।

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः,* इति ।

अत्र नाविति शब्देन शिष्याचार्यावुच्येते । अस्मिञ्जन्मन्यतीतजन्मसु वाऽनुष्ठितैः कर्मकाण्डोक्तैर्नित्यनैमित्तिककर्मभिरुत्पन्नविविदिषः **सांहित्यामुपनिषदि** प्रोक्तैरुपासनैरन्तर्मुख एकाग्रचित्तः काम्यकर्मादिभिः संपादितानां लोकानामसारत्वं परीक्ष्य ततो निर्विण्णः कर्मणा मोक्षो नास्तीति निश्चित्य मुक्तिहेतुब्रह्मतत्त्वज्ञानार्थं गुरूपसत्तिं यः करोति तादृशोऽत्र शिष्यो विवक्षितः । गुरुश्च श्रोत्रियो वेदशास्त्रार्थपारं(र?)गतत्वेन बोधयितुं कुशलो ब्रह्मनिष्ठत्वेन कदाचिदपि बहिर्मुखत्वरहितो विवक्षितः । तथा **चाऽऽथर्वणिका** आमनन्ति—" परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्य+कृतः = कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् " इति । **कठाश्चाऽऽमनन्ति**—" आश्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्टः " इति । तत्र गुरोः कृतार्थत्वेन प्रार्थनीयाभावेऽप्यनेन मन्त्रेण शिष्यस्तयोरुभयोः क्षेमं प्रार्थयते । यद्ब्रह्माऽऽचार्यप्रसादानन्तरं मया वेदिष्यते तद्ब्रह्म नौ गुरुशिष्यावावामुभौ **सहावतु** रक्षतु । तथा **भुनक्तु** पालयतु । यथा गुरुर्निरालस्य उपदिशति यथा चाहमुपदिष्टमर्थमप्रतिपत्तिविप्रतिपत्तिरहितो गृह्णामि तथा रक्षणमुपदेशकाले प्रार्थ्यते ।

* भाष्यानुरोधेनात्र प्रथमानुवाकस्थमाप्तिरपेक्षिता । + अकृतो मोक्ष इत्यर्थः । = कृतेन कर्मणेत्यर्थः ।

१ ख. °तीर्थं म° । २ घ. जप्यम° ।

एककालीनत्वमुभयोरपि रक्षणे सहभावः। उपदिष्टार्थग्रहणेन ममाविद्या यथा निवर्तते तन्निवृत्तिं पश्यन्नाचार्यो यथा परितुष्यति तथा पालनमुत्तरकालीनं प्रथमं प्रार्थ्यते। उक्तप्रयोजनासिद्ध्यर्थमावामुभौ परस्परं सह विद्यायां वीर्यं स्वप्रयोजनसामर्थ्यं करवावहै तस्मिंश्च सामर्थ्यकरणे य एष उपायः स प्रार्थ्यते। नौ गुरुशिष्ययोरावयोः संबन्धि यदधीतं ग्रन्थजातं तत्तेजस्वि स्वार्थप्रकाशकमस्तु। आवां च परस्परं द्वेषं मा करवावहै। गुरुणा न सम्यग्व्याख्यातमिति शिष्यस्यापरितोषो द्वेषस्तथा शुश्रूषा न समीचीनेति गुरोरपरितोषस्तदुभयं मा भूदित्यर्थः। प्रणवशान्तिशब्दाः पूर्ववद्व्याख्येयाः॥

इति श्रीमत्सायणाचार्यविरचिते श्रीबुक्कणसाम्राज्यधुरंधरमाधवविद्यारण्यपरमेश्वरसंबन्धिवेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्येऽष्टमप्रपाठके वारुण्यामुपनिषदि प्रथमोऽनुवाकः॥ १॥

अथाष्टमे द्वितीयोऽनुवाकः।

प्रथमे द्वेषादिरूपसंभावितविघ्नपरिहाराय जप्यमन्त्रमाम्नाय द्वितीयस्यानुवाकस्याऽऽदौ वृत्तस्योपनिषत्सारं संग्रहेण सूत्रयति—

ॐ ब्रह्मविदाप्नोति परम्, इति।

ब्रह्मवेदनेन मुक्तिः कृत्स्नोपनिषत्तात्पर्यार्थः। "बृह बृहि वृद्धौ" इत्यस्माद्धातोर्निष्पन्नो ब्रह्मशब्दो वृद्धं वस्त्वभिधत्ते। वृद्धिश्चात्र निरतिशया विवक्षिता। संकोचकयोः प्रकरणोपपदयोरभावात्। यदा त्वापेक्षिकवृद्धियुक्तं वस्तु प्रकृतं भवेत्, उपपदं वा किंचिद्वाचकं प्रयुज्येत तदा संकोचो भवेत्। न त्वेतदुभयमप्यत्रास्ति। निरतिशयवृद्धिर्नाम नित्यशुद्धत्वादिरूपा। एतदेवाभिप्रेत्य श्रीमच्छारीरमीमांसाभाष्ये भगवत्पादैरभिहितम्—"अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्ति। ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते। बृंहतेर्धातोरर्थानुगमात्" इति। ईदृशार्थविवक्षा च सत्यं ज्ञानमित्यादिना लक्षणवाक्येन स्पष्टी करिष्यते। तथाविधं ब्रह्म वेत्ति मनसा साक्षात्करोतीति ब्रह्मवित्। "मनसैवानु द्रष्टव्यं नेह नानाऽस्ति किंचन" इति वाजसनेयिनः समामनन्ति। चक्षुरादीन्द्रिययुक्तेन तु मनसा नामरूपादिविशिष्टमेव ब्रह्म गृह्यते। नतु शुद्धम्। अतो मनसैव केवलेन द्रष्टव्यमित्युच्यते। ननु चक्षुरादिनैरपेक्ष्येऽपि वेदवाक्यापेक्षा विद्यते ब्रह्मणः शास्त्रप्रमेयत्वात्। बाढम्। अत एवानु द्रष्टव्यमित्युच्यते। *ब्रह्मप्रतिपादकं शास्त्रमनु पश्चा-

---

* ब्रह्मप्रतिपादकशास्त्रश्रवणानन्तरं मनसैव द्रष्टव्यं श्रोतव्यमित्यर्थः।

---

१ ग. जप्यं म°। २ क. ख. ङ. °षत्तात्पर्यं सं°। ३ क. ख. घ. ङ. °द्धमु°।

द्रष्टव्यम्। अत्र मनसैवेत्येवकारेण चक्षुरादिबाह्येन्द्रियाणि व्यावृत्यानुशब्देन शास्त्रमपि शङ्की करोति। नच शास्त्रगम्यत्वे धर्माधर्मयोरिव परोक्षबोधः शङ्कनीयः। दृष्टान्तस्यात्र विषमत्वात्। अपरोक्षस्वभावं हि ब्रह्म, "यत्साक्षादपरोक्षाद्ब्रह्म" इति श्रुतेः। धर्माधर्मौ परोक्षस्वभावाविति वैषम्यम्। स्वतोऽपरोक्षेऽपि ब्रह्मण्यस्ति परोक्षत्वभ्रम इति चेत्सत्यम्। अत एव श्रुतिर्जगत्कारणत्वेनोपलक्षितं ब्रह्म सत्यज्ञानाद्यवान्तरवाक्येन(ण) बोधयित्वा पुनः परोक्षत्वभ्रमनिवृत्त्यर्थं तस्य ब्रह्मणो महावाक्येन प्रत्यगात्मना तादात्म्यं बोधयति। तथा च वाजसनेयिनः। पठन्ति—"य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति" इति। अत्रापि प्रत्यगात्मतादात्म्यमेवाभिप्रेत्य यो वेद निहितं गुहायामिति वाक्येन च प्रत्यगात्मनि परोक्षत्वभ्रमः शङ्कितुमपि न शक्यः। आबालगोपालं सर्वैरपि प्राणिभिः प्रत्यगात्मनोऽहमित्यनेन मानसप्रत्यक्षेण विस्पष्टं व्यवह्रियमाणत्वात्। यस्य *प्रत्यगात्मनः संबन्धिभिश्चक्षुरादीन्द्रियैर्गृह्यमाणा घटादयो +जडा अपि लिङ्गादिव्यवधानमन्तरेण प्रतीयमानत्वादपरोक्षा इत्युच्यन्ते, तस्य प्रत्यगात्मनो व्यवधानशङ्कारहितस्य चिद्रूपस्य स्वप्रकाशस्य सर्वावभासकस्य च भ्रान्त्याऽपि कथं परोक्षत्वमाशङ्क्येत। स्वप्रकाशत्वं सर्वावभासकत्वं चाऽऽम्नायते—"तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति। एवं सति वस्तुतः सर्वावभासकस्य चिद्रूपस्य व्यवहारदशायां चाहंप्रत्ययेन भासमानस्य प्रत्यगात्मनो वास्तवं भ्रान्तं वा परोक्षत्वं न शङ्कितुं शक्यते। देहादिभ्यः पञ्चभ्यः कोशेभ्यो विविक्तः साक्षी परोक्ष इति चेन्न। तस्यात्यन्तापरोक्षत्वात्। यदा तिरोधायकत्वसंभावनोपेतैर्मलैर्देहादिभिः संयुक्तस्याप्यपरोक्षत्वमभ्युपगम्यते तदा तत्संयोगरहितोऽपरोक्ष इति किमु वक्तव्यम्। अतोऽपरोक्षप्रत्यगात्मतादात्म्याच्छास्त्रगम्यमपि ब्रह्मापरोक्षमेव मनसाऽवगम्यते। ननु मनसाऽवगतस्य ब्रह्मत्वमेव नास्ति। तथा च तलवकारा आमनन्ति—

"यन्मनसा न मनुते येनाऽऽहुर्मनो मतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते"॥ इति।

अयमर्थः। यत्साक्षिचैतन्यं सर्वो जनो मनसा विषयीकृत्यावगन्तुं न शक्नोति। येन तु साक्षिचैतन्येन तन्मनः प्रकाशितमि×त्यनेन च वेदरहस्याभिज्ञाः कथयन्ति तदेव साक्षिचैतन्यं ब्रह्मेति हे शिष्य त्वं विजानीहि। उपासकास्तु स्वातिरिक्ततया घटादिवदिदमित्यनेन दृश्यत्वाकारेण भासमानं शास्त्रसिद्धं जगत्कारणं यद्ब्रह्मोपासते

* कुमुत्पन्न येन परोक्षत्वाभावं साधयति। + व्यवधानशङ्कयेता अपीति शेषः। × अनेन प्रकारेणेत्यर्थः।

१ ग. °श्चभ्र°। २ ग. लिङ्गव्य°। ३ ग. °धानाश°।

तदिदमुपास्यं वस्तु मुख्यं ब्रह्म न भवति। न खलु स्वातिरिक्तस्य दृश्यस्योपाधिविशिष्टस्य मुख्यब्रह्मत्वमर्हतीति। अतो निषेधान्मनसा विषयीकृत्य साक्षात्क्रियमाणं न ब्रह्मेति चेन्नायं दोषः। न ह्यस्यां श्रुतौ ब्रह्मणो *मनोविषयत्वमभ्युपगम्यते। अन्यथा तदेव ब्रह्म त्वं विद्धीति कथमुच्येत। साक्षिणः स्वप्रकाशस्य घटादिवन्मनोजन्यस्फुरणभास्यत्वमयु+क्तमिति चेदेवं* तर्हि+फलव्याप्यत्वं मा भूदवृत्तिव्याप्यत्वं तु भविष्यति साक्षिचैतन्यं ब्रह्मेत्युल्लिखन्त्या महावाक्यजन्यया मनोवृत्त्या ब्रह्मणि व्याप्यमाने सति तद्वृत्तिरूपया तत्त्वविद्यया प्रत्यग्ब्रह्मणोर्भेदहेतुरविद्या निवर्तते। न चास्या वृत्तेः परोक्षज्ञानत्वं संभवति। विषयसंबन्धस्यैव वृत्त्याकारजनकत्वात्। यथा चक्षुर्जन्या मनोवृत्तिर्घटसंबन्धाद्घटाकारा सती जनैरपरोक्षज्ञानमित्युच्यते, तथा साक्षिसंबन्धात्साक्ष्याकाराया अस्या अप्यपरोक्षज्ञानत्वं कुतो न स्यात्। न च विषयसंबन्धादेव वृत्तेरतदाकारत्वे वाक्यं व्यर्थमिति शङ्कनीयम्। जगत्कारणत्वेनोपलक्षितं ब्रह्म प्रत्यगात्मरूपादन्यतिरिक्तमित्येतादृशस्य भेदभ्रमस्य वाक्येनापोद्य(ह्य)त्वात्। तथा सति प्रत्यग्ब्रह्मैक्यरूपा वृत्तिर्भेदापवादेन विषयसंबन्धादेव जायत इति *वाक्यजन्यमपि ज्ञानमपरोक्षमेव। यस्य तु बहिर्मुखस्य मनोवृत्तिरभ्यन्तरवर्तिना साक्षिणा न संबध्यते तस्य शब्दसामर्थ्यादेव प्रत्यग्ब्रह्मैक्यरूपा वृत्तिर्जायते। तदिदं ज्ञानं धर्माधर्मस्वर्गनरकादाविव परोक्षम्। न ह्यत्र साक्षात्काराभावे वाक्यापराधो निमित्तम्। किं तु पराङ्मुखत्वलक्षणः पुरुषापराधः। यथा प्राङ्मुखस्य पश्चिमावस्थितरूपदर्शनाभावे चक्षुर्दोषो न निमित्तत्वेन कल्प्यते तद्वत्। स च बहिर्मुखः पुरुषो यदा निदिध्यासनशब्दवाच्येन ब्रह्मध्यानेनान्तर्मुखां सूक्ष्मवस्तुनिरूपणकुशलामेकाग्रां बुद्धिवृत्तिं संपादयति, तदाऽसौ बुद्धिवृत्तिः प्रत्यगात्मना संबध्य तदाकारा सती वाक्यानुग्रहेण भेदभ्रमं निराकुर्वती, ब्रह्मसाक्षात्कार इत्युच्यते। वाक्यश्रवणात्पूर्वमेव सगुणब्रह्मोपासनेन वा पश्चान्निदिध्यासनेन वाऽन्तर्मुखस्यान्वयव्यतिरेकाभ्यां साक्षिचैतन्यं देहादिभ्यो विविच्यानुभवतोऽवान्तर+वाक्येन(ण) ब्रह्मत्वं निश्चितवतो मुख्याधिकारिणो×महावाक्येन ब्रह्मात्मसाक्षात्कार एवोत्पद्यते। न तु परोक्षज्ञानम्। तदेतदभिप्रेत्य **वाक्यवृत्ता**वुक्तम्—

" प्रत्यग्बोधो य आभाति सोऽद्वयानन्दलक्षणः।
अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः॥

---

* अविषयत्वमिति च्छेदः। + एवं च मन्मनसा न मनुत इति श्रुतिविरोधस्तदवस्थ इति। भावः। * फलव्याप्यत्वनिषेधप्रतिपादिकैव श्रुतिरिति न तद्विरोध इत्यर्थः। + ज्ञानानुकूलव्यापारजन्यज्ञानरूपफलव्याप्यत्वम्। * भेदभ्रमनिवृत्तिद्वारेत्यर्थः। + सत्यं ज्ञानमित्यादिना। × भेदभ्रमनिवृत्तिद्वारेत्यर्थः।

इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् ।
अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि ॥
तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु ।
* पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते " ॥ इति ।

ननु प्रत्यग्ब्रह्मणोरन्योन्यतादात्म्याङ्गीकारे सति नाखण्डैकरसत्वं सिध्यति । नील-मुत्पलमित्यत्र सत्यपि तादात्म्ये गुणद्रव्यभेदस्यापि सद्भावात् । एवमत्राप्यात्मैत्वब्रह्मत्व-कृतो भेदोऽपि प्रसज्येतेति चेन्न । गुणद्रव्ययोः परस्परव्यभिचारेण वैषम्यात् । नैल्यगुणो मेघादावपि वर्तमान + उत्पलं व्यभिचरति । × उत्पलद्रव्यमपि शुक्लरक्तोत्पलयोर्वर्तमान-त्वान्नैल्यगुणं व्यभिचरति । अतस्तत्रार्थभेदान्नाखण्डार्थत्वम् । इह त्वात्मब्रह्मणोः परस्पर-व्यभिचाराभावादेकार्थत्वे सत्यखण्डत्वसिद्धिः । एतच्च **विश्वरूपाचार्यैर्दर्शितम्**—

" नाऽऽत्मता ब्रह्मणोऽन्यत्र ब्रह्मता नाऽऽत्मनोऽन्यतः ।
तादात्म्यमनयोस्तस्मान्नीलोत्पलविलक्षणम् " ॥ इति ।

एवं तर्हि पर्यायत्वादात्मा ब्रह्मेतिपदद्वयवैयर्थ्यमिति चेन्न । प्रतिपाद्यभेदाभावेऽपि मोहकल्पितयोरब्रह्मत्वपारोक्ष्ययोर्व्यावर्त्ययोर्भिन्नत्वात् । तदप्याचार्यैर्दर्शितम्—

" आत्माऽपि सदिदं ब्रह्म मोहात्पारोक्ष्यदूषितम् ।
ब्रह्मापि संस्तथैवाऽऽत्मा +सद्वितीयतयेक्षते " इति ॥

एकमेव वस्तु शास्त्रगम्यत्वाकारेण ब्रह्मेत्युच्यते । मानसप्रत्यक्षत्वाकारेणाऽऽत्मेति । तत्र शास्त्रगम्यानां (णां) जगत्कारणत्वसर्वज्ञत्वादीनां परोक्षत्वेन ब्रह्मणोऽपि परोक्षत्व-भ्रमः । अहंप्रत्ययरूपेण मानसप्रत्यक्षेण प्रतीयमानानां देहादीनामब्रह्मत्वात्साक्षिणि चिदात्मन्यप्यब्रह्मत्वभ्रमः । *तयोर्ब्रह्मात्मनोर्भेदेन पदद्वयोपयोगात्प्रतिपाद्यस्याखण्डैकर-सत्वे सत्यपरोक्षप्रत्यगात्मरूपे ब्रह्मणि महावाक्येनापरोक्षज्ञानोदयात्तथाविधज्ञानोपेतः पुमानत्र ब्रह्मविच्छब्देन विवक्षितः । तादृशस्य परप्राप्तियोग्यत्वात्**परमाप्नोतीति** हि तत्प्राप्तिः श्रूयते । परशब्दश्चान्यत्वं= तदत्र न संभवत्यद्वितीयत्वाद्वस्तुनः । " नेह नानाऽस्ति किंचन " इति श्रुत्या निषिद्धत्वात् । उत्कृष्टार्थत्वे तु ब्रह्मैव परशब्देनाभिधातव्यमितरस्य सर्वस्य मायामयत्वेन निकृष्टत्वात् । तथा सति ब्रह्मवि-त्पुमान्ब्रह्मैव प्राप्नोतीत्युक्तं भवति । **आथर्वणिकास्तु** विस्पष्टमिदमामनन्ति—

---

* प्रकृत्यादित्वात्तृतीया । + उत्पलत्वमित्यर्थः । × उत्पलजातिरपीत्यर्थः । + मोहादित्यत्रा-प्यन्वेति । * मोहकल्पितोपाधिविशिष्टयोरित्यर्थः । = ब्रूत इति शेषः ।

---

१ क. ख. ग. ङ. °त्मब्र° । २ ग. °येष्यते । ३ ख. °ब्दस्यान्य° । ४ क. ख. ङ. °स्तुतः । " ने° । ५ ग. °ष्टार्थे तु ।

" स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति " इति । ननु ग्रामं प्राप्नोतीत्यत्र गतिपूर्वको ग्रामसंयोगः प्राप्तित्वेन प्रसिद्धः । अतो यथा सगुणब्रह्मोपासको मूर्धन्यनाड्युत्क्रम्यार्चिरादिमार्गेण गत्वा ब्रह्मलोकं प्राप्नोति, तथाऽत्रापि ब्रह्मप्राप्तिर्वक्तव्येति चेन्न। उत्क्रान्तिगत्योर्निषेधात् । " न तस्य प्राणा उत्क्रामन्ति " इति श्रुत्योत्क्रान्तिर्निषिध्यते । गतिनिषेधश्च स्मर्यते—

" सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः ।
देवा मार्गे विमुह्यन्ति ह्यपदस्य पदैषिणः " ॥ इति ।

अयमर्थः । सर्वेषां प्राणिनामात्मभूतो यो ब्रह्मवित्सोऽयं सर्वान्प्राणिनः स्वात्मत्वेन सम्यक्पश्यति तस्य मार्गे देवा अपि मुह्यन्ति । उत्तरदक्षिणाधोमार्गेष्वातिवाहिकत्वेनावस्थिता ये देवाः सन्ति ते सर्वेऽपि मार्गत्रयगन्तॄणामुपासकानामिष्टापूर्तानुष्ठायिनामिष्टापूर्तानानुष्ठायिनां पापिनां पदं गतिं यथा पश्यन्ति तथा ब्रह्मविदोऽपदस्य गतिरहितस्य पदैषिणो गतिमन्विच्छन्तस्तामदृष्ट्वा भ्रान्ता भवन्तीति । तस्मादस्य ब्रह्म प्राप्ति(प्त)त्वेनोपचर्यत इति । तं च विलयं श्रुतिर्दर्शयति—" न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते ब्रह्मैव सन्ब्रह्माप्येति " इति । बोधात्पुराऽपि ब्रह्मैव सन्नज्ञानाज्जीवत्वभ्रमं प्राप्य पुनर्बोधादूर्ध्वमनुभवेनापि ब्रह्म यथा भवति तथा स्वयमप्येति विलीयते स्वकीयो जीवत्वोपाधिर्विनश्यतीत्यर्थः । यथा स्वकण्ठेऽवस्थितमाभरणमज्ञात्वाऽन्यत्रान्विष्यन्केनचिद्बोधितो हस्तेन संस्पृश्येदानीमेतत्प्राप्तमित्युपचरति, तद्वदौपचारिकी ब्रह्मप्राप्तिर्द्रष्टव्या । तदेवं ब्रह्मस्वरूपविषया मीमांसोपरिष्टाद्वक्ष्यति । वेदनविषया परप्राप्तिविषया चोदाह्रियते । यद्यपि पूर्वत्र सर्वत्र तत्तदनुवाकस्यावसान एव तत्तद्विषया मीमांसोदाहृता, तथाऽप्यत्र ब्रह्मविदित्यारभ्येत्युपनिषदित्यन्तस्यानुवाकस्यातिप्रौढतया तन्मध्ये मीमांसितव्यानामर्थानां बहुत्वाद्बुद्धिसौकर्याय तत्तद्वाक्यसमीप एव तत्तन्मीमांसोदाह्रियते । या तु देशविशेषे ब्रह्मविदित्यारभ्य नवानुवाका इति प्रसिद्धिः सा त्वध्यापकैः पाठसौकर्याय परिकल्पिता, न त्वर्थानुसारिणी । ते हि तदप्येष श्लोको भवतीत्यस्याः प्रतिज्ञायाः श्लोकपाठस्य च मध्ये तं तमनुवाकं समापयन्ति । न चैतद्युक्तम् । कस्यचिदप्यर्थस्य पर्यवसानाभावात्। तस्मादितरदेशगताध्यापकप्रसिद्धया च कृत्स्नोऽप्ययमेक एवानुवाकः। एतदेवाभिप्रेत्य काण्डानुक्रमणिकाभाष्यकारो वारुण्या उपनिषदः " सह नाववतु " " ब्रह्मविदाप्नोति " " भृगुर्वै वारुणिः " इत्यनुवाकत्रयात्मकत्वं व्याजहार । भारद्वाजसूत्रे मुमूर्षोः कर्णे जप्यत्वेनैवमुदाहृतम्- " ब्रह्मविदाप्नोति परम्, भृगुर्वै वारुणिरित्येतावनुवाकौ ब्रह्मविदो दक्षिणे कर्णे जपति " इति । ब्रह्मविदित्यारभ्य भृगुरित्यन्तः (तः) प्राक्तनो ग्रन्थ

---

१ ङ. °मार्गेऽपि मु° । २ ग. घ. °यिनां पा° । ३ घ. °मेकः स ए° । ४ ङ. जपत्ये° ।

एक एवानुवाकः । येषां नवानुवाककल्पना तेषामप्येकवल्लीत्वप्रसिद्धिरस्ति । ब्रह्मवल्लीत्येवं तैर्व्याहृतत्वात् । भगवद्भिर्भाष्यकारैरप्यानन्दवल्लीत्येवं व्याहृतम् । अतो बहुस्कन्धयुक्तवल्लीवद्बहुविधावान्तरपाठभेदयुक्तोऽप्येक एवायमनुवाकः । तथा सति बुद्धिविक्षेपानुत्पादनाय तत्तद्वाक्यसमीप एव मीमांसोदाहरणं युक्तम् । अत्र यद्वेदनं ब्रह्मविच्छब्देन व्यवहृतं तस्य स्वातन्त्र्येण पुरुषार्थहेतुत्वं **तृतीयाध्यायस्य चतुर्थपादे*** **चिन्तितम्**—

"क्रत्वङ्गमात्मविज्ञानं स्वतन्त्रं वाऽऽत्मनो यतः ।
देहातिरेकमज्ञात्वा न कुर्यात्क्रतुगं ततः ॥
नाद्वैतधीः कर्महेतुर्हन्ति प्रत्युत कर्म सा ।
आचारो लोकसंग्राही स्वतन्त्रा ब्रह्मधीस्ततः ॥

आत्मनो देहातिरेकज्ञानमन्तरेण परलोकगामित्वानिश्चायाज्ज्योतिष्टोमादिप्रवृत्तिरेव न स्यादिति क्रतुषु प्रवर्तकत्वेनौपनिषदमात्मज्ञानं कर्माङ्गमिति प्राप्ते ब्रूमः—देहव्यतिरिक्तात्मज्ञानं द्विविधम् । परलोकगामिकर्त्रात्मविज्ञानमेकं द्वितीयं ब्रह्मात्मतत्त्वविज्ञानं[3] चेति । तत्र कर्त्रात्मज्ञानस्य प्रवर्तकत्वेऽपि नाद्वैतब्रह्मात्मतत्त्वज्ञानं प्रवर्तकम् । प्रत्युत क्रियाकारकफलनिषेधेन निवर्तकमेव । ननु तत्त्वविदामपि **जनकादीनां** कर्मप्रवृत्तिलक्षण आचारो दृश्यते । बाढम् । लोकसंग्रहार्थोऽयमाचारः । यदि तत्त्वविदामपि मुक्तये कर्माण्यनुष्ठेयानि स्युः कथं तर्हि प्रजादिवैयर्थ्यश्रुतिरुपपद्यते[4] । "किं प्रजया करिष्यामो येषां नोऽयं लोकः" इति । आत्मतत्त्वरूपस्य लोकस्यापरोक्षे सत्यात्मलोकसाधनभूतायाः प्रजाया वैयर्थ्यं श्रूयते । एवं किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामह इत्याद्युदाहरणीयम् । तस्मादात्मतत्त्वज्ञानं स्वतन्त्रपुरुषार्थसाधनं न तु कर्माङ्गम्" ।

तस्य च ज्ञानस्योत्पत्तिकालस्तत्रैव + **चिन्तितः**—

"इहैव नियतं ज्ञानं पाक्षिकं वा नियम्यते ।
तथाऽभिसंधेर्यज्ञादिः क्षीणो विविदिषाजनौ ॥
असति प्रतिबन्धेऽत्र ज्ञानं जन्मान्तरेऽन्यथा ।
श्रवणायेत्यादिशास्त्राद्वामदेवोद्भवादपि" ॥ इति ।

श्रवणमननिदिध्यासनेष्वनुष्ठीयमानेष्वस्मिन्नेव जन्मनि ज्ञानं जायत इति नियम

---

* पुरुषार्थोऽतः शब्दादिति बादरायण । ब्र सू अ. ३ पा. ४ अ. १ सू. १ । + ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ब्र०सू० अ० ३ पा० ४ अ १६ सू० ५१ ।

---

१ ग. °त्येव व्या° । २ ग °ठयुं । ३ ग. °ज्ञानमिति । ४ ख. °पद्येत । कि°।

म्यते। न त्विहैव वा जन्मान्तरे वेति कालविकल्पः। कुतः। श्रवणादिषु प्रवर्तमानस्य पुरुषस्येच्छाया ऐहिकज्ञानोत्पत्तिविषयत्वात्। इहैव मे विद्या जायतामित्यभिसंधाय पुरुषः प्रवर्तते। न चादृष्टफलानां यज्ञादीनां * तत्साधनत्वेन स्वर्गवज्जन्मान्तरे ज्ञानोत्पत्तिः शङ्कनीया। श्रवणादिप्रवृत्तेः प्रागेव विविदिषामुत्पाद्य यज्ञादीनां चरितार्थत्वात्। तस्मादैहिकत्वेन ज्ञानोत्पत्तिर्नियम्यत इति प्राप्ते ब्रूमः—असति प्रतिबन्धे ज्ञानमिहैव संभवति। सति तु प्रतिबन्धेऽन्यानुष्ठितैः श्रवणादिभिर्जन्मान्तरे विज्ञानमुत्पद्यते। प्रतिबन्धश्च बहुविधः श्रूयते—

श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः।
आश्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्टः॥ इति।

न च पूर्वजन्मानुष्ठितैः श्रवणादिभिर्जन्मान्तरे ज्ञानोत्पत्तिर्न दृष्टचरेति वाच्यम्। वामदेवस्य गर्भ एवावस्थितस्य ज्ञानोत्पत्तिश्रवणात्। "गर्भ एवैतच्छयानो वामदेव एवमुवाच" इति श्रुतेः। तस्मादिह वा जन्मान्तरे वा ज्ञानोत्पत्तिः।

परमाप्नोतीत्यत्र परशब्दोऽन्यवस्तुवाची न भवति। ब्रह्मव्यतिरिक्तस्य वस्तुनोऽसत्त्वादिति यदुक्तं सोऽयमन्याभावस्तस्यैवाध्यायस्य **द्वितीयपादे** +चिन्तितः—

"अस्त्यन्यद्ब्रह्मणो नो वा विद्यते ब्रह्मणोऽधिकम्।
सेतुत्वोन्मानवत्त्वाच्च संबन्धाद्भेदवत्त्वतः॥
धारणात्सेतुतोन्मानमुपास्त्यै भेदसंगती।
उपाध्युद्भवनाशाभ्यां नान्यदन्यनिषेधतः"॥ इति।

यदेतद्ब्रह्म नेति नेतीति दृश्यप्रतिषेधेन व्यवस्थापितम्, तस्मादपि ब्रह्मणोऽन्यदस्तीत्यभ्युपगन्तव्यम्। कुतः। सेतुत्वादिव्यपदेशेभ्यः। "अथ य आत्मा स सेतुर्विधृतिः" इति सेतुत्वं चोपदिश्यते। तत्र यथा लोके पारावारवाञ्छलस्य विधारकः सेतुस्तं च सेतुं तीर्त्वा जाङ्गलं प्रतिपद्यते, तथा ब्रह्मणोऽपि सेतुत्वेन जगद्विधारकत्वाद्ब्रह्म तीर्त्वा गन्तव्येनान्येन केनचिद्भावितव्यम्। तथोन्मानव्यपदेशोऽपि ब्रह्मणः श्रूयते—"चतुष्पाद्ब्रह्म" "षोडशकलं ब्रह्म" इति। तच्चोन्मानं सद्वितीय एव गवादौ दृष्टचरम्, न त्वद्वितीये कुत्रचित्। तथा संबन्धव्यपदेशः श्रूयते—"सता सौम्य तदा संपन्नो भवति" इति। स च संबन्धः सद्रूपादसतोऽन्यस्य विद्यमानतायामवकल्पते। तथा "आत्मा वा अरे द्रष्टव्यः" इति द्रष्टृद्रष्टव्यभेदव्यपदेशोऽपि भवति। तस्मान्नाद्वितीयं ब्रह्मेति प्राप्ते ब्रूमः—न तावद्ब्रह्मणः सेतुत्वं मुख्यं संभवति मृद्दारुमयत्वप्रस-

* ज्ञानसाधनत्वेन। + परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः। ब्र० सू० अ० १ पा० १ अ० ७ सू० ३१।

१ क. ग. °नतयाऽव°। २ घ. °यामेव क°।

क्षात् । केनचित्सेतुसामान्येन सेतुत्वविवक्षायां विधारकत्वमात्रं विवक्ष्यताम् । न तु सद्वितीयत्वम् । सेतुर्विधृतिरितिश्रवणात् । उन्मानं तूपास्त्यै व्यपदिश्यते तत्प्रकरणत्वात्, न तु तत्त्वावबोधाय । भेदव्यपदेशश्चोपाध्युद्भवमपेक्ष्य घटाकाशमठाकाशवदुपपद्यते । संबन्धव्यपदेशश्चोपाधिनाशमपेक्ष्य घटभङ्गे घटाकाशमहाकाशवदुपचर्यते । तस्माद्ब्रह्मव्यतिरिक्तवस्तुसाधकहेतूनामन्यथासिद्धत्वादेकमेवाद्वितीयमित्यन्यवस्तुनिषेधाच्चाद्वितीयमेव ब्रह्म ।

प्राप्नोतीत्यत्र ब्रह्मलोकवत्प्राप्तिर्न भवत्युत्क्रान्तिनिषेधादिति यदुक्तं सोऽयं निषेधश्चतुर्थाध्यायस्य द्वितीयपादे *चिन्तितः—

" किं जीवादथवा देहात्प्राणोत्क्रान्तिर्निवार्यते ।
जीवान्निवारणं युक्तं जीवेद्देहोऽन्यथा सदा ॥
तप्ताश्मजलवद्देहे प्राणानां विलयः स्मृतः ।
=उच्छ्वयत्यत्र देहोऽतो देहात्सा विनिवार्यते ॥

" न तस्य प्राणा उत्क्रामन्ति " इति तत्त्वविदः प्राणानामुत्क्रान्तिर्निषिध्यते तस्य निषेधस्यापादानं जीवः । न तु देहः । अन्यथा देहानुत्क्रान्तौ मरणाभावः प्रसज्येतेति प्राप्ते ब्रूमः—तप्ताश्मनि प्रक्षिप्तं जलं न यथाऽन्यत्र गच्छति नापि तत्र दृश्यते किंतु स्वरूपेण लीयते तद्वत्तत्त्वविदः प्राणा देहादनुत्क्रामन्तोऽपि न देहेऽवतिष्ठन्ते किंतु विलीयन्ते । अतो जीवनासंभवान्मृतो देह इति व्यवहारः । न चानुत्क्रान्तौ न मृतो देह इति व्यवहारः । अनुत्क्रान्तानां प्राणानां देहेऽवस्थानाभावे देहस्योच्छ्वनत्वमेव लिङ्गम् । नन्वियतः प्रयासाद्वरं देहादुत्क्रान्तिरस्तु प्रतिषेधस्तु जीवापादानको भविष्यति । मैवम् । देहादुत्क्रम्य जीवेन सहावस्थितेषु प्राणेषु देहान्तरग्रहणस्याऽऽवश्यकत्वान्मुक्तिरेव न स्यात् । तस्मादुत्क्रान्तिप्रतिषेधस्य देह एवापादानं न जीवः " ।

प्राप्तिशब्देन जीवत्वोपाधिविलयो विवक्षित इत्युक्तं सोऽपि विलयस्तत्रैव +चिन्तितः—

" तस्य वागादयः स्वस्वहेतौ लीनाः परेऽथवा ।
गताः कला इति श्रुत्या स्वस्वहेतुषु तल्लयः ॥
नद्यब्धिलयसाम्योक्तेर्विद्वदृष्ट्या लयः परे ।
अन्यदृष्टिपरं शास्त्रं गता इत्याद्युदाहृतम् ॥

---

* प्रतिषेधादिति चेन्न शारीरात् । ब्र० सू० अ० ४ पा० २ अ० ६ सू० १२ । = निश्चेष्टो भवतीत्यर्थः । + तानि परे तथा ह्याह । ब्र० सू० अ० ४ पा० २ अ० ७ सू० ११ ।

तत्त्वज्ञानिनो वागादयः प्राणा विलीयमानाः प्रातिस्विकेषु कारणेषु विलीयन्ते न तु परमात्मनि । गताः कलाः पञ्चदश प्रतिष्ठा इति कलाशब्दवाच्यानां प्राणादीनां प्रतिष्ठाशब्दवाच्यस्वस्वकारणप्राप्तिप्रतिपादिकायाः " यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यम् " इत्यादिश्रुतेरिति प्राप्ते ब्रूमः—तत्त्वविद्दृष्ट्या[1] परमात्मन्येव लय इति श्रुत्यन्तरान्निश्चीयते—

" यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् " ॥ इति ।

श्रुतौ नद्यब्धिलयदृष्टान्त उपन्यस्यते । अथ दार्ष्टान्तिके परमात्मनि लय इत्ययमर्थो न विशदस्तर्हि श्रुत्यन्तरे विशदो गम्यते—" यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते तासां नामरूपे समुद्र इत्येवं प्रोच्यते । एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति भिद्येते चाऽऽसां नामरूपे पुरुष इत्येवं प्रोच्यते " इति । भिद्येते विलीयेते । सेयं श्रुतिस्तत्त्वविद्दृष्टिविषया । गताः कला इति शास्त्रं तु तटस्थपुरुषप्रतीतिविषयम् । म्रियमाणे तत्त्वविदि समीपवर्तिनः पुरुषाः स्वस्वदृष्ट्या तदीयवागादीनामप्यग्न्यादिषु लयं मन्यन्तेऽतः श्रुत्योर्न विरोधः । तस्मात्परमात्मनि तत्त्वविदः प्राणानां विलयः " ।

उपाधिविलये यन्मुक्तिरूपं त[त्ति]स्मिन्नेवाध्याये **चतुर्थपादे** *चिन्तितम्—

"नाकवन्नूतनं मुक्तिरूपं यद्वा पुरातनम् ।
अभिनिष्पत्तिवचनात्फलत्वादपि नूतनम् ॥
स्वेन रूपेणेतिवाक्ये स्वशब्दात्तत्पुरातनम् ।
आविर्भावोऽभिनिष्पत्तिः फलं चाज्ञानहानितः ॥

" एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते " इति श्रूयते । अस्यायमर्थः । सम्यक्प्रसीदत्युपाध्युपशान्ताविति संप्रसादो जीवः । स च शरीरत्रयाभिमानं परित्यज्य परं ब्रह्म प्राप्य मुक्तरूपेणावतिष्ठत इति । तत्रैतन्मुक्तिरूपं न जीवस्य पूर्वसिद्धं किंतु स्वर्गवदागन्तुकम् । कुतः । अभिनिष्पद्यत इत्युत्पाद्यत्वश्रवणात् । पूर्वसिद्धत्वे संसारदशायामपि सद्भावेन फलत्वं न स्यात्तस्मात्स्वर्गवदिदं नूतनं मुक्तिरूपमिति प्राप्ते ब्रूम.—स्वेन रूपेणाभिनिष्पद्यत इति स्वशब्देन विशेषितत्वान्पूर्वमपि विद्यत एव मुक्तिरूपम् । न चात्र स्वशब्दः स्वकीयत्वमभिधत्ते विशेषणवैयर्थ्यप्रसङ्गात् । यद्यद्रूपं मुक्तावुपादत्ते तत्तत्स्वकीयमेवेति कस्य व्यावृत्तये विशे-

* संपद्याऽऽविर्भावः स्वेनशब्दात् । ब्र० सू० अ० ४ पा० ४ अ० १ सू० १ ।

१ क, ग. घ. ङ. °विदो दृष्ट्या । २ म. घ. °तनगि° ।

प्येत । आत्मवाचित्वे तु स्वशब्दस्य स्वकीयत्वव्यावृत्तिः प्रयोजनम् । न चाभिनिष्पत्तिरुत्पत्तिः पूर्वसिद्धस्योत्पत्त्यसंभवात् । किं तर्हि तत्त्वज्ञानेन ब्रह्मत्वाविर्भावोऽभिनिष्पत्तिः । न चैवं सत्युपसंपद्याभिनिष्पद्यत इत्यनयोः पुनरुक्तिरिति शङ्कनीयम् । संपत्तिशब्देन तत्पदार्थशोधनस्य विवक्षितत्वात् । अभिनिष्पत्तिस्तु वाक्यार्थावबोधः । न च पूर्वसिद्धत्वे मुक्तिरूपस्य फलत्वविरोधः । निवृत्ताज्ञानरूपत्वाकारेण पूर्वसिद्धत्वाभावात् । तस्मात्पुरातनं वस्त्वेव मुक्तिरूपम् " ।

तत्रैवान्य*श्चिन्तितम्—

"मुक्तरूपाद्ब्रह्म भिन्नमभिन्नं वा विभिद्यते ।
संपद्य ज्योतिरित्येवं कर्मकर्तृभिदोक्तितः ॥
अभिनिष्पन्नरूपस्य स उत्तमपुमानिति ।
ब्रह्मत्वोक्तेरभिन्नं तद्भेदोक्तिरुपचारतः ॥

पूर्वाधिकरणे निर्णीतं यदेतन्मुक्तस्य स्वरूपं तत्परस्माद्ब्रह्मणो भिन्नं भवितुमर्हति । कुतः । कर्मकर्तृव्यपदेशात् । " एष संप्रसादः परं ज्योतिरुपसंपद्य " इत्यत्र संप्रसादशब्दोदितो जीव उपसंपत्तौ कर्तृत्वेनोपादिश्यते । ज्योतिःशब्दवाच्यं च ब्रह्म कर्मत्वेन । तस्मान्मुक्तस्य जीवस्य स्वरूपं ब्रह्मणो भिन्नमिति प्राप्ते ब्रूमः—ज्योतिरुपसंपद्येति वाक्यं तत्पदार्थशुद्धिविषयमुक्तम् । अतस्तदानीं भेदोऽस्तु नाम । तदुपरि स्वेन रूपेणाभिनिष्पद्यत इति वाक्यं वाक्यार्थदशापन्नं मुक्तस्वरूपं प्रतिपादयति । न च तस्य ब्रह्मणा सह भेदोऽस्ति । " स उत्तमः पुरुषः " इति वाक्ये तच्छब्देनाभिनिष्पन्नरूपं मुक्तस्वरूपं परामृश्य तस्योत्तमपुरुषशब्दवाच्यब्रह्मस्वरूपत्वाभिधानात् । तस्मान्मुक्तस्वरूपं ब्रह्माभिन्नम् " ।

पुनरन्य=श्चिन्तितम्—

" क्रमेण युगपद्वाऽस्य सविशेषाविशेषते ।
विरुद्धत्वात्कालभेदाद्व्यवस्था श्रुतयोस्तयोः ॥
मुक्तामुक्तदृशोर्भेदाद्व्यवस्थासंभवे सति ।
अविरुद्धं यौगपद्यमश्रौतं क्रमकल्पनम् " ॥

मुक्तस्य स्वरूपभूतं ब्रह्म श्रुतिषु द्विधा प्रतिपाद्यते । क्वचित्सविशेषं क्वचिन्निर्विशेषम् । तथा हि—" य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः " इति सविशेषत्वश्रुतिः । " स यथा सैन्धवघनोऽन-

* अविभागेन दृष्टत्वात् । ब्र० सू० अ० ४ पा० ४ अ० २ सू० ४ । = ब्राह्मेण जैमिनिरुपन्यासादिभ्यः । ब्र० सू० अ० ४ पा० ४ अ० ३ सू० ५ ।

१ क. ख. ङ. °क्तस्य स्व° ।

न्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव" इति निर्विशेषत्वश्रुतिः। ते एते सविशेषत्वनिर्विशेषत्वे मुक्तिदशायां ब्रह्मणो न युगपत्संभवतः परस्परविरुद्धत्वात्। अतः कालभेदेनोभे व्यवस्थापनीये इति प्राप्ते ब्रूमः—प्रतिपत्तृभेदाद्युगपदेव सविशेषत्वनिर्विशेषत्वे उपपद्येते। मुक्तप्रतिपत्त्या निर्विशेषत्वमेव। बद्धप्रतिपत्त्या तु मुक्तस्वरूपं ब्रह्म सर्वज्ञत्वादिगुणविशिष्टं सज्जगत्कारणत्वेनावभासते। नहि मुक्ताः पुरुषाः कदाचिदपि सर्वज्ञत्वसत्यसंकल्पत्वादिगुणयुक्ता वयमिति प्रतिपद्यन्ते। तत्प्रतिपत्तिहेतुभूताया अविद्याया विनाशितत्वात्। बद्धपुरुषास्त्वविद्यायुक्ताः सन्तो निर्विशेषमेव ब्रह्म सर्वज्ञत्वादिगुणविशिष्टं कल्पयन्ति। अतः प्रतिपत्तृभेदाद्युगपद्व्यवस्थासिद्धौ किमनेन कालभेदकल्पनेन। तस्माद्युगपदेव सविशेषत्वनिर्विशेषत्वे।

मुक्तावन्यो विशेषस्तृतीयाध्यायस्य चतुर्थपादे *चिन्तितः—

"मुक्तिः सातिशया नो वा फलत्वाद्ब्रह्मलोकवत्।
स्वर्गवच्च नृभेदेन मुक्तिः सातिशयैव हि॥
ब्रह्मैव मुक्तिर्न ब्रह्म क्वचित्सातिशयं श्रुतम्।
अत एकविधा मुक्तिर्वैधसो मनुजस्य वा॥

यथा ब्रह्मलोकाख्यं फलं सालोक्यसारूप्यसामीप्यसार्ष्टिभेदेन चतुर्विधम्। तत्र सार्ष्टिर्नाम चतुर्मुखेन(ण) समानैश्वर्यत्वम्। यथा वा कर्मभूयस्त्वात्फलभूयस्त्वमिति-न्यायेन स्वर्गो बहुविधस्तथा मुक्तिरपि फलत्वाविशेषात्सातिशयेति प्राप्ते ब्रूमः—मुक्तिर्नाम निजसिद्धब्रह्मस्वरूपमेव न तु स्वर्गवदागन्तुकं किंचिद्रूपमिति वक्ष्यते। ब्रह्म चैकविधत्वेन श्रुतं निर्णीतं च। तस्माच्चतुर्मुखस्य मानुषस्य वा मुक्तिरेकविधैव। सालोक्यादिविशेषस्तु जन्यरूपत्वादुपासनातारतम्येन सातिशयो भविष्यति। मुक्तिस्तु न तादृशीति सिद्धम्"।

यथोक्तैर्दशभिर्विचारैर्निर्णीतौ ज्ञानमोक्षौ साधनफलरूपौ ब्रह्मविदाप्नोति परमिति वाक्येन सूत्रितौ। इदानीं तस्य सूत्रस्य संक्षिप्तव्याख्यानरूपां कांचिदृचमुदाहरति—

तदेषाऽभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म। यो
वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते
सर्वान्कामान्त्सह। ब्रह्मणा विपश्चितेति, इति।

---

* एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः। ब्र०सू०अ०३ पा ४अ०१७ सू० ५२।

---

१ क. ख ङ. °पत्तासि°। २ ग. च। ३ ग. घ मनुष्यस्य।

तत्तस्मिन्पूर्वसूत्रार्थे तदभिप्रायपरिज्ञानार्थमेषाऽनन्तरमेव वक्ष्यमाणा काचिद्गम्युक्ताऽभितः कथिता । सर्वोऽपि सूत्राभिप्रायस्तस्यां विस्पष्ट इत्यर्थः । ब्रह्मविदित्युक्ते कीदृशं ब्रह्मेत्येवं बुभुत्सोदयात्सत्यादिभिश्चतुर्भिः पदैस्तत्स्वरूपमुच्यते । तानि च पदानि समानाधिकरणत्वाद्विशेषणविशेष्यरूपाणि । यथा नीलं महत्सुगन्ध्युत्पलमित्यत्र विशेषणविशेष्यभावस्तद्वत् । तत्र वेद्यतया विवक्षितत्वात्प्रधानं ब्रह्म विशेष्यं सत्यादिपदानि च स्वार्थविपरीतेभ्यस्तद्ब्रह्म व्यावर्तयन्ति । ननु विवक्षितोत्पलविपरीतान्यन्यान्युत्पलानि विद्यन्ते रक्तमुत्पलं स्वल्पमुत्पलमीषद्गन्धमुत्पलमित्येवं दृष्टत्वात् । अतो विवक्षितस्योत्पलस्य तेभ्यो व्यावृत्तये नीलादिपदानि । अत्र त्वनृतं ब्रह्म जडं ब्रह्म परिच्छिन्नं ब्रह्मेत्येवं विपरीतानि ब्रह्माणि न सन्ति । यथाऽसावादित्य एकस्तद्वद्ब्रह्माप्येकमेव । तस्य व्यावर्त्याभावात्सत्यादिविशेषणानि [illegible] चेन्न । तेषां लक्षणरूपविशेषणत्वेन व्यावर्त्यसद्भावात् । सजातीयमात्राद्व्यावर्तकं केवलं विशेषणम् । स्वेतरकृत्स्नव्यावर्तकं लक्षणरूपविशेषणमिति[1] तयोर्विवेकः । तथा सत्यब्रह्मरूपेभ्योऽसत्यजडपरिच्छिन्नेभ्यो व्यावृत्तये सत्यादिपदानि भविष्यन्ति । अवकाशरूपमाकाशमित्येतस्मिन्लक्षणे सजातीयस्याऽऽकाशान्तरस्य व्यावर्त्यस्याभावेऽपि विजातीयानि मूर्तद्रव्याणि यथा व्यावर्त्यन्ते, तद्वदसत्यादीन्यत्र व्यावर्त्यन्ताम् । सत्यादिपदानि ब्रह्म विशेष्टुं प्रवृत्तया परार्थत्वात्परस्परानिरपेक्षाण्येव ब्रह्मशब्देन संबध्यन्ते, सत्यं ब्रह्म ज्ञानं ब्रह्मानन्तं ब्रह्मेति । यद्वस्तु येन रूपेण निश्चीयते तच्चेत्कदाचिदपि तद्रूपं न व्यभिचरेत्तदा तद्वस्तु सत्यमित्युच्यते । यथा सर्पस्याधिष्ठानभूता रज्जुः । यस्य तु व्यभिचारोऽस्ति तदनृतम् । यथा रज्ज्वां प्रतीतः सर्पस्तथा सर्वजगदधिष्ठानभूतं ब्रह्म मुक्तावपि व्यभिचाराभावात्सत्यम् । ज्ञानबाध्यत्वेन मुक्तौ व्यभिचरितत्वाज्जगदनृतम् । अत एव माण्डूक्यश्रुतिर्जगतो मिथ्यात्वं दर्शयति—" [illegible] द्वैतम् " इति । छन्दोगाश्च दृष्टान्तत्वेन विकारस्य घटादेरनृतत्वं प्रकृतेश्च मृत्तिकायाः सत्यत्वमामनन्ति—" वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् " इति । ब्रह्म जडं भवितुमर्हति सत्यत्वान्मृत्तिकावादित्याशङ्क्य च ज्ञानमित्युच्यते । व्यावहारिकसत्यं त्वचिद्रूपमित्यभिप्रायः । ब्रह्म परिच्छिन्नं भवितुमर्हति ज्ञानशब्दार्थत्वाद्घटज्ञानवदित्याशङ्क्यानन्तमित्युच्यते । ज्ञायते स्फोर्यते घटादिकमनेनेति व्युत्पत्त्या घटस्फुरणयोः संबन्धजनकोऽन्तःकरणवृत्तिविशेषो लोके ज्ञानशब्दस्यार्थः । स च भौतिकः । " अन्नमयं हि सोम्य मनः " इति श्रुतेः । तस्माद्युक्तं तस्य ज्ञानस्य परिच्छिन्नत्वम् । इह तु ज्ञप्तिर्ज्ञानमिति व्युत्पत्त्या स्फुरणमेवोच्यते, तस्य भौतिकत्वाभावादनन्तत्वम् । अन्तः परिच्छेदः । स च त्रिविधः—

---

१ क. ख. ङ. ङ. °र्तं रूपं लक्षणमिति ।

देशकृतः कालकृतो वस्तुकृतश्चेति । तत्र " आकाशवत्सर्वगतश्च नित्यः " इति श्रुत्या सर्वदेशसर्वकालसंबन्धावगमाद्देशकालपरिच्छेदौ न स्तः ।

" ब्रह्मैवेदममृतं पुरस्तात्पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण ।
अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्" ॥

इति श्रुतौ सर्वदेशकालसंबन्धवत्सर्ववस्त्वात्मकत्वस्यापि श्रवणाद्ब्रह्मव्यतिरिक्तवस्त्वभावेन वस्तुपरिच्छेदोऽपि नास्ति । तदेवं सत्यादिशब्दैर्मिथ्यात्वजाड्यपरिच्छेदेभ्यो यद्व्यावर्तितं तद्ब्रह्मेति वाक्यार्थः संपद्यते । ननु सत्यादिपदानामतद्व्यावृत्तिपरत्वाद्ब्रह्मशब्दार्थस्योत्पलादिशब्दार्थवल्लोके प्रसिद्ध्यभावाद्वाक्यं शून्यपरं प्रसज्येत—

" मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः ।
एष वन्ध्यासुतो याति शशशृङ्गधनुर्धरः " ॥

इतिवाक्यार्थवदिति चेन्न । बृंहतेर्धातोरर्थानुगमेन ब्रह्मशब्दार्थस्य प्रसिद्धत्वात् । प्रकारान्तरेणापि प्रसिद्धिर्भगवद्भिर्दर्शिता —"सर्वस्य ऽऽत्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः । सर्वो ह्यात्मास्तित्वं प्रत्येति " इति । ब्रह्मणश्चाऽऽत्मत्वादस्तित्वं प्रसिद्धम् । ब्रह्मणश्चाऽऽत्मत्वम् " अयमात्मा ब्रह्म " इत्यादिश्रुतिसिद्धम् । अतः शून्यार्थत्वाभावे सति सत्यादिपदानां विशेषणत्वं लक्षणत्वं चोपपद्यते । अन्यथा किं विशेष्येत किं वा लक्ष्येत । वस्तुतो ब्रह्मान्तराभावेऽप्यविद्यादशायामनृतजडपरिच्छिन्नैरुपाधिभिरुपहितत्वाकारेणानृतत्वादिधर्मविशिष्टानां त्रयाणां[3] ब्रह्मान्तराणां सजातीयानां सद्भावाद्विवक्षितं ब्रह्म तेभ्यो ब्रह्मभ्यः सत्यादिपदैर्विशेष्यते[4]* । लक्षणपक्षे तु विजातीयेभ्योऽप्युपाधिभ्यो व्यावर्त्यते । यथा द्रष्टृदर्शनदृश्यादित्रिपुटीव्यवहाराद्व्यावर्त्य भूमपदार्थो लक्ष्यते तद्वत् । तथा च च्छन्दोगा आमनन्ति—"यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा" इति । अन्योऽन्यत्पश्यतीत्येवमादिका त्रिपुटी यस्मिन्नदार्थे नास्ति स पदार्थो भूमेत्यतद्व्यावृत्त्या सर्वव्यवहाररहितं वस्तु लक्ष्यते । एवमत्रापि सत्यादिपदैर्मिथ्यात्वादिव्यावृत्त्या तद्रहितं ब्रह्म लक्ष्यताम् । अत्र केवलविशेषणत्वपक्षे सत्यादिपदानि त्रीण्यपि परस्परनियामकत्वेन मिलित्वा ब्रह्मस्वरूपं प्रतिपादयन्ति । तथा हि—बाधराहित्यवाची सत्यशब्दस्त्रिविधं सत्यमाचष्टे । प्रातिभासिकं व्यावहारिकं पारमार्थिकं चेति त्रैविध्यम् । शुक्तिरजतादीनां यावत्प्रतिभासं बाधराहित्यात्प्रातिभासिकं सत्यत्वम् । पृथिव्यादिभूतानां शरीरादिभौतिकानां च तत्त्वज्ञानोदयात्पूर्वं लोकव्यवहारे बाधाभावाद्व्यावहारिकं सत्यत्वम् । वेदान्तोत्पादितविज्ञानादूर्ध्व-

* व्यावर्त्यत इत्यर्थः ।

१ घ. °स्ताद्ब्रह्म पश्चा° । २ घ. °वाक्यव° । ३ क. ङ. °णां स° । ४ ग. °र्विशिष्य° । ५ ग. घ. °हारैर्बाधा°।

मपि बाधाभावाद्ब्रह्मणः पारमार्थिकं सत्यत्वम् । तत्राविशेषेण त्रिष्वपि प्रवर्तमानः सत्यशब्दो ज्ञानानन्तशब्दाभ्यां नियमितः सन्ब्रह्मण्येव पर्यवस्यति । न हि व्यावहारिकप्रातिभासिकयोश्चिद्रूपत्वमपरिच्छिन्नत्वं वाऽस्ति । ज्ञानशब्दोऽपि चिद्वस्तुनि बुद्धिरूपज्ञाने च प्रवर्तमानः सत्यानन्तशब्दाभ्यां नियमितश्चिद्रूपे ब्रह्मण्येवावतिष्ठते । न खलु बुद्धिवृत्तिर्ब्रह्मवदत्यन्तमबाध्या त्रिविधपरिच्छेदरहिता वा । अनन्तशब्दश्च देशपरिच्छेदरहित आकाशे सर्वपरिच्छेदरहिते ब्रह्मणि च प्रवर्तमानः सत्यज्ञानशब्दाभ्यां नियमितो [illegible] । न ह्याकाशस्य [illegible] सत्यत्वं स्फुरणत्वं वाऽस्ति । तदेवं परस्परं [illegible] त्रीणि सत्यादिपदानि कूटस्थं चिद्रूपमद्वितीयं ब्रह्म प्रतिपादयन्ति । तदुक्तं **पूर्वाचार्यैः**—

"कौटस्थ्यमेव सत्यत्वं स्फुरणं ज्ञानमुच्यते ।
आनन्त्यमेकता चैवं बोध्यते ब्रह्म तैस्त्रिभिः" ॥ इति ।

तेष्वनन्तशब्द इतरव्यावृत्तिमुखेनैव ब्रह्म विशिनष्टि । सत्यज्ञानशब्दौ तु स्वार्थरूपं कूटस्थत्वं स्फुरणं च *समर्पयन्तौ तद्विपरीतं मिथ्यात्वं जाड्यं चार्थान्निवारयन्तौ विशेषणत्वं प्राप्नुतः । तदुक्तं **वार्तिककृद्भिः**—

"तत्रानन्तोऽन्तवद्वस्तुव्यावृत्त्यैव विशेषणम् ।
स्वार्थार्पणप्रणाड्या च परिशिष्टौ विशेषणम् ॥
शब्दात्प्रतीयते तावत्संग[illegible] ।
मानान्तरादपोहस्तु न शाब्दस्तेन स स्मृतः" ॥ इति ।

सत्यत्वज्ञानत्वयोर्मिथ्यात्वजडत्वयोश्च सहावस्थानान्यथानुपपत्तिर्मानान्तरम् । यद्यपि धर्मधर्मिसंबन्धो न वास्तवस्तथाऽपि ब्रह्मबोधस्य द्वारं भवत्येवं । मिथ्याभूतेन प्रतिबिम्बेन सत्यबिम्बावबोधदर्शनात्स्वप्नकामिनीदर्शनेन भाविश्रेयःसूचनाच्च । तदेवं सत्यादिविशेषणत्रयेण ब्रह्मस्वरूपावबो[illegible] लक्षणम् । यद्वा तेषां पदानामेकैकमेव निरपेक्षं ब्रह्मलक्षणम् । सत्यशब्देन मिथ्याभूतयोरज्ञानतत्कार्ययोर्व्यावृत्तौ सत्यामखण्डबोधं ब्रह्मैकमेव परिशिष्यते । ब्रह्मण उपलक्षको यः सत्यत्वधर्मः सोऽप्यविद्याकार्यत्वान्मिथ्यैवेति सत्यशब्देनैव व्यावर्त्यते । यथा कलुषिते जले प्रक्षिप्तं कतकरजः पूर्वकालुष्यं निवर्तयत्स्वयमपि निवर्तते । यथा वा भुक्तान्नजरणाय स्वीकृतमौषधमन्नं च [illegible] जरयति तद्वत् । न च सत्यत्वधर्मे व्यावर्तिते सति ब्रह्मणो मिथ्यात्वं

---

* बोधयन्ताविन्यर्थः । + संबन्ध इत्यर्थः ।

---

१ ध. वर्तमानः । २ ग. घ. वर्तमानः । ३ व. °णेव ति° । ४ ग. घ. वर्तमानः । ५ ग. °स्परानि° ।

प्रसज्येतेति शङ्कनीयम् । मिथ्यात्वस्याऽऽदावेव निवर्तितत्वात् । न हि कतकरजसो निवृत्तौ पूर्वकालुष्यं पुनरागच्छति । नाप्यौषधे जीर्णे पुनरन्नमजीर्णं भवति । सत्यत्वमिथ्यात्वयोरुभयोरपि व्यावृत्तौ निर्धर्मकं ब्रह्मेति लक्षितं भवति । न च तादृशं नास्त्येवेति शङ्कनीयं सदात्मरूपत्वानुपपत्तेः । सद्रूपत्वमात्मरूपत्वं च च्छान्दोगा आमनन्ति "सदेव सोम्येदमग्र आसीत्" इति सद्वस्तु प्रक्रम्य—"तत्सत्यं स आत्मा" इति श्रवणात् । अतो यदत्र सत्यशब्देन विवक्षितं तदेव सद्रूपमात्मरूपं चेत्यवगम्यते । न हि तेजसस्तमस्त्वमिव सतोऽसत्ता संभवति । आत्मनोऽसत्त्वं भाष्यकारवचनमुदाहृत्य पूर्वमेव निराकृतम् । किंच सत्यत्वमिथ्यात्वादिकल्पनाया अधिष्ठानत्वादपि ब्रह्मणो नासत्यत्वम् । न हि निरधिष्ठानो भ्रमः संभवति । एतदेवाभिप्रेत्य च्छान्दोग्ये "तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत" इति परकीयमतत्वेनासत्पक्षमुपन्यस्य "कुतस्तु खलु सौम्यैवं स्यादिति होवाच कथमसतः सज्जायेत" इति तं पक्षं दूषयित्वा "सत्त्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इति सत्पक्षं स्वकीयमतत्वेनोपसंहरति । युक्तश्चायमेव पक्षः । असतो जगदुपादानत्वे तु पृथिवी नास्त्यापो न सन्तीति सर्वं जगदसदनुविद्धं प्रतीयेत न त्वेवं प्रतीयते । किं त्वस्ति पृथिवी सन्त्याप इत्येवं सदनुविद्धमेव सर्वं प्रतीयते । तस्माज्जगत्कारणं ब्रह्म सद्रूपमेव । यथा छान्दोग्ये ब्रह्मणः कारणत्वमुपजीव्य सत्त्वासत्त्वपक्षयोर्गुणदोषावुपन्यस्तावेवमत्रापि ब्रह्मणः प्रत्यगात्मरूपत्वमुपजीव्य सत्त्वासत्त्वपक्षयोस्तावुपन्यासिष्येते—"असन्नेव स भवति । असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद । सन्तमेनं ततो विदुः" इति । कठाश्चाऽऽमनन्ति—"अस्तीत्येवोपलब्धव्यः" इति तस्माद्भस्तुतः सत्यत्वधर्मरहितमपि ब्रह्म तत्कल्पनाधिष्ठानत्वात्सद्रूपमेव । "परस्परविरोधे हि न प्रकारान्तरस्थितिः" इतिन्यायेन सत्यत्वमिथ्यात्वोभयराहित्यमयुक्तमिति चेत् । मैवम् । नपुंसकव्यक्तिवत्तदुपपत्तेः । यथा परस्परविरुद्धस्त्रीत्वपुरुषत्वोभयरहिता सा व्यक्तिस्तद्वत् । प्रत्यक्षेण प्रमिताऽसौ व्यक्तिरिति चेत्तर्हि ब्रह्मापि श्रुत्या प्रमीयताम् । श्रुतिस्तु सत्यं ब्रह्मेति सत्यशब्दवाच्यत्वं ब्रुवती सत्यत्वधर्ममङ्गी करोतीति चेन्न । "यतो वाचो निवर्तन्ते" इति वाच्यत्वप्रतिषेधश्रुतेः । सत्यशब्दस्तु * व्यावहारिकसत्यत्वधर्मवाचकतया लोके व्युत्पन्नः सन्ब्रह्मण्यारोपितं व्यावहारिकसत्यत्वधर्ममुपजीव्य तद्विरुद्धं मिथ्यात्वं निराकुर्वन्धर्मद्वयरहितं सन्मात्रं ब्रह्मतत्त्वं +लक्षयति । यथा पादतले लग्नकण्टकमन्येन कण्टकेनोद्धृत्य कण्टकद्वयं परित्यज्य केवलं पादमवशेषयति तद्वत् । तस्मात्सत्यं ब्रह्मेत्येतल्लक्षणं निर्दो-

* व्यावहारिकश्चासौ सत्यत्वधर्मश्चेति समासः । + बोधयतीत्यर्थः ।

१ ग. °वृत्तः पू° । २ ख. नास्तीति । ३ क. ख. घ. ङ. °त्मत्वं छन्दो° । ४ ख. °त्मा" इत्युपसंहारात् । ५ ग. घ. °ति तत्पक्षं । ६ क. ख. ङ. °कर्तव्य° ।

षम् । ननु ज्ञानं ब्रह्मणि क्रिया प्रसज्येत । तथा हि । ज्ञायतेऽनेनेति व्युत्पत्तौ ब्रह्मणो ज्ञानक्रियाकरणत्वं भावार्थव्युत्पत्तौ तु क्रियारूपत्वम् । न चोभयं युज्यते । "निष्कलं निष्क्रियं शान्तम्" इति क्रिया प्रतिषिध्यते । तस्मादेतल्लक्षणं दुष्टमिति चेत् । मैवम् । सत्यशब्दवज्ज्ञानशब्दस्यापि लक्षणत्वात् । धात्वर्थस्तु बुद्धेर्वृत्तिः । तथा चोपदेशसाहस्र्यामभिहितम्—

" आत्माभासस्तु तिङ्वाच्यो धात्वर्थश्च धियः क्रिया ।
उभयं त्वविवेकेन जानातीत्युच्यते मृषा ॥
चैतन्यप्रतिबिम्बेन व्याप्तो बोधोऽभिजायते ।
बुद्धेः शब्दादिनिर्भासस्तेन मोमुह्यते जगत् " ॥ इति ।

चैतन्यप्रतिबिम्बयुक्तायां शब्दस्पर्शादिविषयावभासिकायां बुद्धौ व्युत्पन्नो ज्ञानशब्दो ब्रह्मण्यारोपितसर्वदृश्यभासकत्वधर्मं जडत्वनिवारणायोपजीव्य ततस्तेनापि धर्मेण विरहितं नित्यचैतन्यं प्रत्यगात्मरूपं ब्रह्मतत्त्वमुपलक्षयति । तदेतत्सर्वं वार्तिककारैर्विस्पष्टमभिहितम्—

" बुद्धेः प्रत्ययकारित्वं तत्साक्षिण्युपचर्यते ।
आत्मचैतन्यसंदीप्तां वृत्तिं धीः कुरुते यतः ॥
चैतन्यालिङ्गिताः सर्वास्तप्तायोविस्फुलिङ्गवत् ।
धीवृत्तयो हि जायन्ते न क्वचिच्चिद्विवर्जिताः ॥
चैतन्यखचितान्दृष्ट्वा प्रत्ययान्बुद्धिकर्तृकान् ।
ज्ञानं क्रियत इत्यज्ञाः कूटस्थमिति मन्वते ॥
बुद्ध्यभावादवच्छिन्नं न दृग्रूपं यथा पुरा ।
बुद्ध्युत्पत्तावपि तथा निष्क्रियं ह्यनुभूयताम् "॥ इति ।

" न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते । यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव " इत्यादिश्रुतेर्नित्यचैतन्यैकरसस्वभावावगमात्तादृशस्यैव निष्क्रियस्याऽऽत्मनो ज्ञानशब्देन लक्ष्यमाणत्वाज्ज्ञानं ब्रह्मेत्येतल्लक्षणमपि निर्दोषमेव । नन्वनन्तं ब्रह्मेतिलक्षणे त्रिविधपरिच्छेदनिषेधात्तदभावविशिष्टं ब्रह्मेति प्राप्नुयात् । इह भूतले घटो नास्तीति निषेधेन यथा घटाभाववैशिष्ट्यं भूतलस्य प्रतीयते तद्वत् । तथा च नाखण्डैकरसत्वसिद्धिरिति चेन्मैवम् । वस्तुपरिच्छेदनिषेधेन ब्रह्मव्यतिरिक्तस्य * वास्तवस्याभावस्यापि निषेधान्मायाकार्यमेवाभा-

* व्यावहारिकस्येत्यर्थः ।

१ ग. °याकार° । २ ग. °पितं स° । ३ ख. इत्यज्ञः । ४ ख. मन्यते ।

वमुपजीव्य परिच्छेदं व्यावर्त्य कटकरजोन्यायेनैनमप्यभावं व्यावर्त्य सदेकरसमेव लक्ष्यते। तथा सति श्रुत्यन्तरे "सदेव सोम्य" इत्यवधारणमुपपद्यते। तस्मादनन्तं ब्रह्मेत्येतदपि लक्षणमदुष्टमेव। तदेतदभिप्रेत्य **वार्तिककार** आह—

"कालाकाशादियोनित्वात्सर्वात्मत्वात्तथाऽऽत्मनः।
वस्त्वन्तरस्य चाभावान्मुख्यानन्त्यं परात्मनः॥
कल्पितेन परिच्छेदो न ह्यकल्पितवस्तुनः।
कल्पितश्चेह कालादिर्वाचाऽऽरम्भणशास्त्रतः" ॥ इति।

अनेनैव सत्यादिन्यायेन "विज्ञानमानन्दं ब्रह्म" "अत्रायं पुरुषः स्वयंज्योतिर्भवति" "पूर्णमदः पूर्णमिदम्" इत्यादिश्रुतिषूक्ता आनन्दस्वयंज्योतिःपूर्णादिशब्दाः प्रत्येकं लक्षणत्वेन योजनीयाः। तदर्थमानन्दादयो गुणा अत्रोपसंहर्तव्याः। ब्रह्मणि निवर्तनीयानां पुरुषभ्रान्तीनां बहुत्वेन लक्षणबाहुल्यम्। न त्वेतावता ब्रह्मणो बहुविधत्वमस्ति। निर्विशेषमेव सर्वैरपि लक्षणैः प्रतिपाद्यते। आनन्दाद्युपसंहारस्तृतीयाध्यायस्य **तृतीयपादे*** **चिन्तितः**—

"अनाहार्या उताऽऽहार्या आनन्दाद्यास्तु नाऽऽहृतिः।
वामनीसत्यकामादेरिवैतेषां व्यवस्थितेः॥
विधीयमानधर्माणां व्यवस्था स्याद्यथाविधि।
प्रतिपत्तिफलानां तु सर्वशाखासु संहृतिः॥

"आनन्दो ब्रह्म" "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यानन्दसत्यत्वादयस्तैत्तिरीयके परब्रह्मविद्यायां पठ्यन्ते। ते "प्रज्ञानं ब्रह्म" इत्याद्यैतरेयकादिप्रोक्तासु परविद्यासु नोपसंहर्तव्याः। वामनीत्वादिवद्व्यवस्थोपपत्तेः। "एष उ एव वामनीरेष उ एव भामनीः" इति कामनेतृत्वभासकत्वादयो गुणा **उपकोसलविद्यायाम्** आम्नाताः। "सत्यकामः सत्यसंकल्पः" इति सत्यकामत्वादयो **दहरविद्यायामाम्नाताः**। तत्र यथा परस्परं गुणानुपसंहार एवमानन्दादीनां व्यवस्थाऽस्तीति प्राप्ते ब्रूमः— विषमो दृष्टान्तः। वामनीत्वादीनां ध्येयत्वेन विधीयमानत्वाद्यथाविधि व्यवस्था युक्ता। आनन्दादयस्तु प्रतिपत्तिफला इति न विधीयन्ते। अतो व्यवस्थापकविध्यभावात्प्रतिपत्तिफलस्य सर्वत्र समत्वाच्चाऽऽनन्दादय उपसंहर्तव्याः"।

---

* आनन्दादयः प्रधानस्य। ब्र० सू० अ० ३ पा० ३ अ० ६ सू० ११।

---

१ घ. °न्ते। °प्र°। २ क. ख. ङ. °मीत्यादि°। ३ ग. °ष ए°। ४ क. ग. घ. ङ. °कामाद्°। ५ क. ख. ङ. °नीत्यादी°।

ब्रह्मणो निर्विशेषत्वं तत्रैव द्वितीयपादे * चिन्तितम्—

"ब्रह्म किं रूपि वाऽरूपि भवेन्नीरूपमेव वा ।
द्विविधश्रुतिसद्भावाद्ब्रह्म स्यादुभयात्मकम् ॥
नीरूपमेव वेदान्तैः प्रतिपाद्यमपूर्वतः ।
रूपं त्वनूद्यते ध्यातुमुभयत्वं विरुध्यते ॥

"तदेतच्चतुष्पाद्ब्रह्म" इत्यादिश्रुतयो रूपवद्ब्रह्म प्रतिपादयन्ति । " अस्थूलमनणु " इत्यादिश्रुतयो नीरूपम् । तस्माद्वस्तुत उभयात्मकं ब्रह्मेति प्राप्ते ब्रूमः—नीरूपमेव शास्त्रप्रतिपाद्यं मानान्तरासिद्धत्वात् । जगत्कर्तृत्वादिरूपयुक्तं तु ब्रह्म क्षित्यादिकं सकर्तृकं कार्यत्वादित्यनुमानेनावगन्तुं शक्यमत एवोपासनीयामनूद्यते न तु तात्पर्येण प्रतिपाद्यते । न चानुमानशास्त्रसिद्धयोरुभयोर्वास्तवत्वमेकस्मिन्वस्तुनि सरूपत्वनीरूपत्वयोर्विरुद्धत्वात् । तस्मादतात्पर्यविषयस्य सरूपत्वस्य भ्रान्तत्वान्नीरूपमेव तत्त्वतो ब्रह्म । तदेतदखण्डैकरसं ब्रह्म सत्यज्ञानादिवाक्येन लक्षितम् । ब्रह्मविदाप्नोति परमितिसूत्रस्य व्याख्यानरूपायामृचि प्रथमपादेन ब्रह्मशब्दार्थं व्याख्यायावशिष्टेन यो वेदेत्यादिना पादत्रयेण वेदनफलपरार्थी व्याख्यायेते । यः पुमान्वेद स पुमानश्नुते व्याप्नोति । किं वेदेत्याशङ्क्यैतदुच्यते—**गुहायां परमे व्योमन्निहितमिति** । अन्नमयाद्यानन्दमयान्तानां वक्ष्यमाणानां पञ्चकोशानां समुदायो गुहा । तथा चान्यत्रोक्तम्—

"देहादभ्यन्तरः प्राणः प्राणादभ्यन्तरं मनः ।
ततः कर्ता ततो भोक्ता गुहा सेयं परम्परा" ॥ इति।

यदेतत्पञ्चकोशोपादानकारणमव्याकृतं तदेतत्परमं व्योमेत्युच्यते । तच्चाव्याकृतं संप्रदायविद्भिर्दर्शितम्—"शरीरद्वयकारणमात्माज्ञानं साभासमव्याकृतमित्युच्यते "इति । श्रुतिश्च सर्वस्यास्य जगत उत्पत्तेः प्रागव्याकृतत्वं दर्शयति—"तँद्धेदं तर्ह्यव्याकृतमासीत्" इति । अस्पष्टदशापन्नत्वमव्याकृतत्वम् । तच्चाव्याकृतममूर्तत्वसाम्येन **वाजसनेयिनोऽक्षरब्राह्मणे** गार्गीयाज्ञवल्क्यप्रश्नोत्तरयोराकाशशब्देन समामनन्ति—"कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च" इति प्रश्नः । "एतस्मिन्खल्वक्षरे गार्गि आकाश ओतश्च प्रोतश्च" इत्युत्तरम् । तस्य चाऽऽकाशस्य लोकप्रसिद्धाकाशवाय्वादिपञ्चमहाभूतकारणत्वात्परमत्वम् । तस्मिन्परमाकाशे निहितमवस्थितं ब्रह्म । यद्यप्यविनाशिन्यक्षरशब्दवाच्ये सर्वाधिष्ठाने ब्रह्मण्यव्याकृतपञ्चभूतादिकं जगदारोपितं सदवस्थितम् । तथाऽपि

---

* न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि । ब्र० सू० अ० ३ पा० २ अ० ११ सू० ११ ।

---

१ ग. °नायानू° । २ ग. °नप्र° । ३ क. ख. ङ. तदिदं । ४ ङ. °तात्मकं ।

बुभुत्सोर्बुद्धिर्बाह्यान्रूपरसादिविषयानुपेक्ष्यान्नमयादिक्रमेणाव्याकृतपर्यन्तं प्रविश्य निष्प्रपञ्चब्रह्मतत्त्वं साक्षात्करोति । तस्माद्बुभुत्सुदृष्टिमपेक्ष्य परमे व्योमन्नवस्थितमित्युपचर्यते । यद्वा गुहायां परमे व्योमन्निति सामानाधिकरण्यादव्याकृतमेव गुहाशब्देनाप्यभिधीयते । सर्वस्य जगतस्तत्र निगूढत्वात् । अथवा हृदयपुण्डरीकस्य मध्ये स्वाङ्गुष्ठपरिमितो यः प्रसिद्ध आकाशः स एवात्र परमं व्योमेत्युच्यते । जागरणव्यवहारहेतुं स्वप्नव्यवहारहेतुं देहमध्यवर्त्याकाशं बाह्याकाशं चापेक्ष्य सर्वदुःखरहितयोः सुषुप्तिसमाध्योः स्थानत्वेन हृदयाकाशस्योत्कृष्टत्वं युक्तम् । तस्मिन्नाकाशेऽवस्थिता बुद्धिर्गुहा तस्यां ज्ञातृज्ञेयज्ञानरूपत्रिपुटीव्यवहारस्य भ्रान्तिविवेकाभ्यां संपादितयोर्भोगमोक्षयोश्च निगूढत्वात्तया बुद्ध्योपलभ्यत्वेन ब्रह्म तत्र निहितम् । तत्र हि प्रत्यग्ब्रह्मास्ति ।

एतच्च वार्तिके स्पष्टमुक्तम्—

"ज्ञातुर्हार्दगुहान्तःस्थं प्रतीचोऽन्यन्न लभ्यते ।
सत्यादिमदतो ब्रह्म प्रत्यगात्मैव तद्विदः " ॥ इति ।

स्वरूपत्वेऽपि कामाविद्यादिभिरावृतत्वाद्बहिर्मुखैर्नोपलभ्यते । अन्तर्मुखैस्तु तदावरणबाधादुपलभ्यते । **तदप्युक्तम्**—

"बुद्धौ निगूढं तद्ब्रह्म कामाविद्याद्युपप्लवात् ।
प्रत्यग्धियोऽनुपश्यन्ति न तु बाह्यधियोऽपरे ॥
सत्याद्यर्थविरुद्धेभ्यः सम्यग्व्यावृत्तधीर्यतिः ।
धियः प्रत्यक्प्रविश्याथ सत्यात्मानं प्रपश्यति " ॥ इति ।

ब्रह्मप्रतीचोरेकत्वे सति वेद्यवेदितृवेदनाभावेन वेदनमयुक्तमिति चेन्न । वेदनसर्वकामप्राप्तिमुक्त्यादिव्यवहाराणामौपचारिकत्वात् । **तदप्युक्तम्** —

"ज्ञात्रभेदात्तु तद्ब्रह्म ह्यनीप्सिततमं परम् ।
ज्ञातुरन्यस्य चाभावाद्यो वेदेत्युच्यते कथम् ॥
सत्यादिलक्ष्याऽज्ञानोत्थासत्याद्यर्थनिषेधधीः ।
एवं [illegible] केवलाज्ञानहानतः ॥
तेनद्रज्ञातं विजानाति विमुक्तश्च विमुच्यते ।
निवर्तते निवृत्तं च त्रिर्वः शपथयाम्यहम् " ॥ इति ।

यथा ज्ञातृज्ञानज्ञेयभेदाभावेऽपि दशमस्त्वमसीतिवाक्येन स्वकीयं दशमत्वं बुध्यते तथा स्वकीयं ब्रह्मत्वमवबुध्यताम् । अबुद्धे तु स्वकीये ब्रह्मत्वे ब्रह्मबोधमात्रेण स्वकीयो

---

१ ग. घ. तच्च । २ क. ग. ङ. °नास्थे प्र° । ३ क. ख. ङ °र्यतः । धि° । ४ ग. घ. °धीः । वर्त्मनैवाऽऽत्मप्रो° । ५ घ. एवं ज्ञानं । ६ ग. °ज्ञानं वि° । ७ ग. °र्कीयद्° ।

जीवत्वभ्रमो न निवर्तते । तस्मादगुहानिहितं प्रत्यक्त्वमेव ब्रह्मतया विद्यात् । एतावता सूत्रोक्तं वेदनं व्याख्यातम् । सोऽश्नुत इत्यादिना परप्राप्तिर्व्याख्यायते **स ब्रह्मवित्पुमान्सर्वान्कामान्सर्वप्राणिगतान्भोगान्सहाश्नुते** युगपदाप्नोति । अज्ञानी पुरुषः क्रमेण विविधानि स्वकर्मफलभूतानि शरीराणि गृहीत्वा चक्षुरादिकरणापेक्ष उपाधिकृतेन जलसूर्यकादिवत्प्रतिबिम्बभूतेन जीवरूपेण तं तं भोगमनुभवति । ज्ञानी तु **विपश्चिता ब्रह्मणा** सर्वज्ञब्रह्मरूपेण सर्वान्भोगान्युगपदनुभवति ।

तदेतत्पूर्वाचार्यैरप्युक्तम्—

"अवगत्याखिलान्कामानेकदा क्रमशून्यया ।
ब्रह्मज्ञानी सदा वेत्ति ततः सर्वज्ञ ईरितः ॥
आदावन्ते तथा मध्ये धियोऽनेकशरीरगाः ।
स्वप्रकाशचिता[2] व्याप्ता ह्यनन्यानुभवात्मना" ॥ इति ।

ननु " द्वा सुपर्णा " इति मन्त्रेण शरीरे चेतनद्वयमाम्नातम् । तयोरन्यः पिप्पलं स्वादत्त्यनश्नन्यो अभिचाकशीति " इति । तत्र सोपाधिकेन प्रतिबिम्बरूपेण भोक्त्रा जीवेनैकशरीरमात्रवर्तिता[3] भोगः प्राप्यते । अभोक्त्रा तु साक्षिणा ब्रह्मचैतन्येन निरुपाधिकतया सर्वगतेन कृत्स्नमपि भोग्यजातं प्रकाश्यते । तदेतदविद्वद्विदुषोः साधारणम् । तथा सति किंविशेषमभिप्रेत्य विदुषः फलत्वेनोपन्यस्यत इति चेदुच्यते । अत्र विद्वान्हि मदीयं वास्तवस्वरूपं ब्रह्म सर्वभोगप्रकाशकमित्यवगत्य परितुष्यति । मूढस्तु न तथेत्ययमेव विशेषोऽभिप्रेतः । ननु ब्रह्मचैतन्येन सर्वगतशरीरसुखवत्तद्गतदुःखान्यपि प्रकाश्यन्ताम् । ततस्तदवगमेन विदुषः क्लेशोऽपि प्रसज्येतेति चेन्न । ब्रह्मणः साक्षिणो दुःखलेपाभावात्[4] । तथा च **कठाः** पठन्ति—

" सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः ।
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः " ॥ इति ।

दुःखवत्सुखेनापि ब्रह्म न लिप्यते इति चेन्माऽस्तु सुखलेपः । सुखं तु ब्रह्मणः स्वरूपमेव ! " आनन्दो ब्रह्मेति व्यजानात् " " विज्ञानमानन्दं ब्रह्म " इत्यादिश्रुतिभ्यः । ब्रह्मणः स्वरूपभूतोऽप्यानन्दश्चित्तवृत्त्या परिच्छिद्यमानो विषयानन्द इत्युच्यते । अभीष्टविषयेष्विच्छया प्रवर्तमानः पुरुषस्तदलाभेन क्लिश्यन्कदाचित्पुण्यवशाद्विषयलाभे सति तदिच्छायां निवृत्तायामन्तर्मुखां सात्त्विकीं कांचिद्वृत्तिं लभते । सा च वृत्तिरान्तरं ब्रह्मानन्दं व्यवच्छिनत्ति । सोऽयं परिच्छिन्नो विषयानन्दः । एतदेवाभिप्रेत्य **बृहदारण्यके** पठ्यते—"एषोऽस्य परमानन्दः । एतस्यैवाऽऽनन्दस्यान्यानि

---

१ ख. °त्यक्तत्त्वमे° । २ क. ख. ङ. °काशान्विता । ३ क. ख. ङ. °वर्ती भो° । ४ क. ख. ग. ङ. °लेशाभा° ।

भूतानि मात्रामुपजीवन्ति " इति । ब्रह्मादिस्तम्बान्तेषु प्राणिषु वर्तमानाः सात्त्विकवृत्तिभिरवच्छिन्ना ब्रह्मानन्दस्य लेशरूपा ये विषयानन्दाः सन्ति तेऽत्र सर्वान्कामानित्यनया श्रुत्या विवक्षिताः । काम्यन्त इति कामाः । सुखान्येव प्राणिभिः काम्यन्ते न दुःखानि तेष्वानन्देषु वृत्तिकृतमवच्छेदं विद्यया बाधित्वा तदवच्छेदरहितमानन्दैकरसं वस्तु ब्रह्मरूपेणावगत्य कृतं कृत्यं प्राप्तं प्रापणीयमित्येवं ब्रह्मवित्सर्वदा परितुष्यति । सोऽयं परितोषो मूढाद्विशिष्यते । तदेवं सूत्रव्याख्यानरूपायां सत्यं ज्ञानमित्यादिकायामृचि ब्रह्मतद्वेदनप्राप्तयः कीदृश्य इत्याकाङ्क्षानिवृत्त्यर्थं त्रयमप्येतन्निरूपितम् । श्रौत इतिशब्द ऋक्समाप्त्यर्थः । वेदो हि मन्त्रब्राह्मणभेदेन द्विविधः । तत्रेयं ब्रह्मवल्ली **ब्राह्मणरूपा**। **ब्राह्मणं** चाष्टधा भिन्नम् । तद्भेदास्तु **वाजसनेयि**भिराम्नायन्ते—" इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि " इति । १—भृगुर्वै वारुणिरित्यादिरितिहासः । २—यतो वा इमानि भूतानि जायन्त इत्यादिकं सर्गप्रतिसर्गादिप्रतिपादकं **पुराणम्** । ३—य एवमेता महासंहिता व्याख्याता वेदेत्यादय उपास्तयो **विद्याः** । ४—रहस्यार्थोपदेशा **उपनिषदः**, अत एवानुशासनानुवाके पूर्वमेषा वेदोपनिषदित्युक्तम् । ५—श्लोकास्तु तत्र तत्रोदाहारिष्यन्ते । ६—ब्रह्मविदित्यादिकं **सूत्रम्** । ७—सत्यं ज्ञानमित्यादिकमनुव्याख्यानम् । अनुक्रमेण सूत्रगतानां पदानां तात्पर्यकथनात् । ८—तस्मिन्ननुव्याख्याने यो बुभुत्सितोऽर्थविशेषस्तस्य विस्पष्टमा समन्तात्कथनं **व्याख्यानम्** । तदिदमत्र तावत्तस्माद्वा एतस्मादित्यारभ्यान्नात्पुरुष इत्यन्तेन ग्रन्थेनाभिधीयते । अनुव्याख्यानगतमनन्तत्वमुपपादयितुं तस्मिन्ग्रन्थे सृष्टेः प्रतिपाद्यमानत्वात् ।

तथा च **वाक्यवृत्तिकारै**रुक्तम्—

" यदानन्त्यं प्रतिज्ञाय श्रुतिस्तात्सिद्धये जगौ ।
तत्कार्यत्वं प्रपञ्चस्य तद्ब्रह्मेत्यवधारय " ॥ इति ।

तामेतामानन्त्योपपादनोपयुक्तां सृष्टिं दर्शयति—

तस्माद्वा एतस्मादात्मन आकाशः संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात्पुरुषः, इति ।

तस्माद्वा इत्यादिना । व्यवहिते सूत्रवाक्ये ब्रह्मशब्देन परशब्देन चोपात्तं यद्वस्तु

---

१ ग. °तस्यावच्छेदस्य वि° । २ ग. घ. °धितत्वाद्° । ३ म. °दनयु° । ४ ग. °न्नाद्रेतः । रेतसः पुरु° ।

तदत्र व्यवहितार्थवाचिना **तस्मा**दित्यनेन तच्छब्देन परामृश्यते । संनिहितायां सूत्रव्याख्यानरूपायामृचि सत्यादिशब्देन निहितशब्देन च व्यवहृतं वस्तु संनिहितवाचके**नैतस्मा**दित्येतच्छब्देन परामृश्यते । **वै**शब्दोऽवधारणार्थः । तस्मादेवैतस्मादित्युक्ते सत्यृचा सूत्रेण च प्रतिपादितमेकमेव वस्त्वित्युक्तं भवति । अथवा परोक्षवाचिना तच्छब्देन शास्त्रगम्यो ब्रह्मत्वाकारोऽभिधीयते । **वै**शब्दस्तस्मिन्ब्रह्मणि सर्ववेदान्तप्रसिद्धिप्रदर्शनार्थः । प्रत्यक्षवाचि**नैतच्छब्देनापरोक्षानुभवगम्यः** प्रत्यगात्मत्वाकारोऽभिधीयते तदेव विस्पष्टयितु**मात्मन** इत्युच्यते । तस्मादेतस्मादितिपदद्वयसामानाधिकरण्येन प्रत्यग्ब्रह्मणोस्तादात्म्यमुच्यते । एतदेव पूर्वस्यामप्यृचि ब्रह्मणा विपश्चितेतिसामानाधिकरण्येनोदाहृतम् । [illegible] यत्परं ब्रह्म तस्य ब्रह्मण आकाशवाय्वादिकाञ्जायमानपदार्थान्प्रति यत्प्रकृतित्वं तत्पञ्चमीविभक्त्या प्रतिनिर्दिश्यते । " जनिकर्तुः प्रकृतिः " इत्यनेन **पाणिनीयसूत्रेण**[1] पादानसंज्ञाविधानात् । **आकाशः संभूत** इत्युक्तत्वादुत्पद्यमान आकाशो जनिकर्ता तस्य प्रकृतिरुपादानकारणं ब्रह्मेत्यमुमर्थं बोधयितुं पञ्चमी प्रयुक्ता । प्रकर्षेण क्रियत उत्पाद्यते कार्यमनयेतिव्युत्पत्त्या प्रकृतिरुपादानं मृदादिकम् । यद्यपि निमित्तकारणेन कुलालेनापि घट उत्पाद्यते तथाऽपि कुलालस्य तदुत्पादने प्रकर्षो नास्ति । नहि कुलालो मृत्तिकेव कार्ये घटे सर्वदाऽनुगच्छति । तस्मात्कार्यं प्रत्युपकारप्रकर्षादुपादानं[2]वत्प्रकृतिः । ननु प्रकृतित्वं मायाया एव न तु ब्रह्मणः । तथा च **श्वेताश्वतरा** आमनन्ति—

"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" ॥ इति ।

नायं दोषः । मायाया ब्रह्मशक्तित्वेन स्वातन्त्र्याभावात् ।

शक्तित्वमपि तत्रैवाऽऽम्नातम्—

" न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते ।
पराऽस्य [illegible] श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" ॥ इति ।
"ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम्" ॥ इति [च] ।

न खलु शक्तिः क्वचिदपि स्वाश्रयमुल्लङ्घ्य स्वतन्त्राऽवतिष्ठते । अतः शक्तिरूपाया मायाया यप्रकृतित्वं तदेव ब्रह्मणः शक्तिमतः प्रकृतित्वम् । योऽयं प्रकृतिरूपः परमात्मा मायी महेश्वरोऽन्यत्र श्रुतः सोऽयमत्राऽऽत्म**न** इत्यनेन पञ्चम्यन्तेन निर्दिश्यते । तस्मान्मायिनः परमात्मन **आकाशः संभूत** उत्पन्नः । परमात्मैवाऽऽकाशवाय्वाद्याकारेण[3] प्रतिभासत इत्यर्थः । यदुपादानकारणं मृद्रूपं तदे[4]तत्स्वस्माद्भिन्नं घटमारभते । क्षीरस्वरूपमुपादानं स्वयं दध्याकारेण परिणमते । रज्जुरूपमुपादानमज्ञानेन सहितं सर्पा-

---

१ घ. °मानान्यदा° । २ क. ख. घ. ङ. निर्दिश्यते । ३ घ. °नमेव प्रकृ° । ४ क. ख. ङ. °रूपप° । ५ घ. °ण भा° । ६ ग. °तत्तस्मा° ।

कारेण विवर्तते। तत्र नैयायिकादयो मृद्घटन्यायेन सर्वे परमाणुभिः पृथिव्यादिकं जगदारभ्यत इत्याहुः। सांख्यास्तु क्षीरदधिन्यायेन सत्त्वरजस्तमोगुणात्मकं प्रधानमेव महदहंकारादिजगदाकारेण परिणमत इति वर्णयन्ति। वेदान्तास्तु रज्जुसर्पन्यायेन सर्वजगत्कल्पनाधिष्ठानभूतमखण्डैकरसं ब्रह्मैव स्वमायावशादाकाशादिजगदाकारेण विवर्तत इत्याभिप्रायेण सृष्टिं प्रतिपादयन्ति। तेषु त्रिषु मतेष्वारम्भपरिणामवादौ शारीरकमीमांसायां निराकृतौ। का तर्हि महर्षि[illegible] चेन्मन्दबुद्धचनुग्रहार्थमवान्तरसृष्टिंविषयौ तौ वादाविति ब्रूमः। यः पुमाँल्लोकायतमतानुसारेण देहमात्मत्वेनाभिमन्यमानः [illegible] देहव्यतिरिक्तमात्मानमज्ञात्वा कर्माणि ज्योतिष्टोमादीनि चाननुतिष्ठन्नुपास्यमीश्वरमज्ञात्वा तदुपासनेऽपि ब्रह्मलोकहेतौ न प्रवर्तते। तादृशस्य जीवेश्वराविवेकाय प्रयतमानो गौतमादिर्महर्षिः परमाणुभ्यः पृथिव्याद्युत्पत्तिमुवाच। मूलकारणात्परब्रह्मण उत्पन्ना आकाशकालदिशः परमाणवश्च यदा व्यवस्थितास्तदा तत आरभ्योत्तरकालीना सृष्टिर्गौतमाद्युक्तप्रकारेण व्यवतिष्ठताम्। किं नश्छिन्नं वेदान्तिनाम्। न चैतावता मायावादस्य हानिः शङ्कनीया। ब्रह्मादिस्तम्बान्तानां सर्वेषां प्राणिनां विचित्रसंसारभ्रममुत्पादयन्त्या मायायैव दृश्यस्य गौतमादिमतभ्रमस्योत्पादितत्वात्। अनेनैव न्यायेन वेदान्तैर्या सृष्टिरभिहिता सा भ्रान्तिर्भवेदिति चेत्। भवत्वेवं कृत्स्नायाः सृष्टेर्भ्रान्तित्वं बोधयितुमेव वेदान्तैः प्रवृत्तत्वात्। यथा मन्दाधिकारिणो देहव्यतिरिक्तं स्वर्गप्राप्तियोग्यं कर्त्रात्मानं बोधयितुं गौतमस्योद्योगस्तथा मध्यमाधिकारिणो ब्रह्मबोधयोग्यतायै कर्तृत्वरहितं साक्षिणं चिदात्मानमसङ्गं बोधयितुं कपिलमहर्षिः सांख्यशास्त्रं निर्ममे। तत्र परमाणुभ्यः प्राचीना चिदचिद्विवेकहेतुरवान्तरसृष्टिः कियत्यपि वर्णिता। अखण्डैकरसे ब्रह्मणि मायया चिज्जडभेदाश्चिदात्मनां परस्परभेदसत्त्वादिगुणाश्चेत्येते पदार्थाः कल्पिताः। तत उत्तरकालीना सृष्टिः सांख्येनाभिधीयताम्। एवमुपास्यमीश्वरं विवेक्तुं सांख्योक्तेभ्यः पञ्चविंशतितत्त्वेभ्यः पूर्वभावि(वी)न्येकादश तत्त्वानि शैवागमेषु निरूप्यन्ते। श्रुतिस्तु प्रदर्शनार्थत्वेनाऽऽकाशादिकां कियतीमपि सृष्टिमुदाजहार। साकल्येन त्वभिधानमशक्यमनुपयुक्तं च। ब्रह्मावबोधद्वारत्वेन तदभिधानम्। तच्च द्वारत्वमल्पाभिधानेऽपि संपद्यते।

द्वारत्वेनोपयोगो गौडाचार्यैरुदाहृतः—

> " मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदिताऽन्यथा।
> उपायः सोऽवताराय नास्ति भेदः कथंचन " ॥ इति।

---

१ क. ख सर्ग° । २ घ. °न ज° । ३ क. ख. ङ. कृत्स्नाया: । ४ क. ख. ङ. °र्गयो° । ५ क. ख. ङ. कर्तारमात्मा° । ६ ग. °यते । ए° ।

नहि सृष्टिरुपास्यत्वेन ज्ञेयत्वेन वा स्वतन्त्रपुरुषार्थाय कल्पते[1] । सृष्टिमुपासीत, सृष्टिविच्छ्रेयः प्राप्नोतीत्येवंवचनाभावात् । अत एव श्रुतिस्मृतिपुराणागमेषु परस्परविरोधेन बहुधा कथ्यमाना सृष्टिः सर्वाऽपि वार्तिककारैरङ्गीकृता—

" यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि ।
सा सैव प्रक्रियेह स्यात्साध्वी सा चानवस्थिता " ॥ इति ।

न बहुभिर्दृष्टेषु बहुविधस्वप्नेषु[2] कश्चिदेवाङ्गीकार्यो न त्वितरेऽङ्गीकार्या इति नियमोऽस्तीत्यलमतिप्रसङ्गेन । योऽयमाकाशो मायाविशिष्टब्रह्मण उपादानकारणादुत्पन्नस्तस्मिन्ब्रह्मांशो मायांशश्चोभावनुगतौ । सत्यं ज्ञानमिति यद्ब्रह्म सत्यत्वेनाभिहितं तत्सदात्मकम् । सदेव सोम्येति प्रकृत्य तत्सत्यमिति श्रुतत्वात् । सत्त्वं चाऽऽकाशेऽनुगच्छत्याकाशोऽस्तीत्येवं भासमानत्वात् । मायात्वं नामाऽऽश्चर्यरूपत्वम् । ऐन्द्रजालिकेन गृहपर्वतादौ निर्गिर्णे सति मायैवैषेति लोकैर्व्यवह्रियमाणत्वात् । यथा निश्छिद्रे कांस्यघनरूपे दर्पणे भासमानो विशाल आकाशप्रतिबिम्ब आश्चर्यरूपस्तथा निश्छिद्रे सत्यज्ञानानन्तानन्दैकरसे ब्रह्मण्यसंभावितस्याऽऽकाशस्य प्रतिभास आश्चर्यरूपः । यथा गृहादिनिगरणमैन्द्रजालिक[3]व्यतिरेकेण[4] केनापि कर्तुमशक्यत्वादितरैराश्चर्यमित्युच्यते । एवमीश्वरेण[5] निर्मिता आकाशवाय्वादयो जीवेन केनापि निर्मातुमशक्यत्वादाश्चर्यरूपा इत्युच्यन्ते । तदिदमाश्चर्यरूपत्वं मायांशः । यस्तु वस्तूनामवकाशप्रदानयोग्यस्वरूपः सोऽयमाकाशभागः । एवं चास्त्याश्चर्यरूपमवकाशप्रदमित्येवं ब्रह्मांशमायांशाभ्यामनुगत आकाशः प्रतिभासते । स च शब्दगुणकः । गिरिगुहादौ यः प्रतिध्वनिः सोऽयमाकाशसमवेतत्वेन प्रतीयमानत्वादाकाशगुण इत्युच्यते । यथोक्तशब्दमात्रगुणकस्यावकाशप्रदस्याऽऽकाशस्य सर्जने[6] कामसंकल्पावेव तु मायाविशिष्टस्य ब्रह्मणः । आकाशं सृक्ष्यामीत्येवंविधेच्छा काम इत्युच्यते । यथोक्तस्वरूप आकाशो निष्पद्यतामित्येवंविधा भावना संकल्प इत्युच्यते । ब्रह्मणो मनोराहित्येन मनोवृत्तिरूपाया भावनाया अभावेऽप्यचिन्त्यशक्तिरूपमायैव कामसंकल्परूपवृत्तिद्वयाकारेण विक्रियत इति । इन्द्रियरहितस्याप्यचिन्त्यशक्तिबलात्सर्वव्यवहारः श्रूयते—" अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः " इति । पूर्वसृष्टावनुष्ठितानि सर्वप्राणिकर्माणि पूर्वमपक्वानि प्रलयकाले मायाविशिष्टे ब्रह्मणि स्थित्वा शनैः पच्यन्ते । पक्वेषु कर्मसु तत्फलभोगदानाय जगत्सृजति ।

---

१ ग. घ. कल्प्यते । २ ग. सा वाऽन° । ३ क. ख. ङ. °विधं स्व° । ४ घ. °जाल व्यतिरिक्तेन के° । ५ ग. °तिरिक्तेन के° । ६ घ. °नेच्छासं° ।

तदेतच्छैवागमसारसंग्रहरूपायां तत्त्वप्रकाशिकायामुक्तम्—

" संसारे खिन्नानां निखिलानां प्राणिनां प्रभुः कृपया ।
कुरुते महार्थसंहृतिमेतेषामेव विश्रान्त्यै ।
कर्मविपाचनहेतोः पशुदयया पुनरपीह परमेशः ।
सृष्टिं विधाय तेषां कर्म विपाचयति देहभृताम् " ॥ इति ।

अतः प्राणिकर्मपरिपाकवशात्परमेश्वरस्य सिसृक्षा स्रष्टव्यपदार्थसृष्टिगोचरसंकल्पश्चोपजायते । तदीयेच्छासंकल्पावनुसृत्य स्रष्टव्यपदार्थोऽपि तथैवोत्पद्यते । अत एव **परमात्मप्रकरणे**—' सत्यकामः सत्यसंकल्पः " इत्याम्नातम् । एवं सत्युत्तरोत्तरपदार्थान्यथा यथाऽसौ संकल्पयति तथा तथा ते सर्वेऽप्युत्पद्यन्ते । प्रथमं सृष्टेनाऽऽकाशोपहितान्मायाविशिष्टब्रह्मणो **वायुः संभूतः** । [illegible]ः सर्वसाधारणकारणत्वात्तदुपाधिभूतस्याऽऽकाशस्य वायुं प्रत्यसा[illegible] प्रत्यासत्तिमपेक्ष्याऽऽकाशाद्वायुरित्याम्नातम् । तस्य यो वायोर्गुणः स्पर्शः स चानुष्णाशीतरूपः । आकाशस्यावकाशप्रदानवद्बृहनं वायोः कृत्यम् । कारणधर्माश्च तस्मिन्वायावनुगच्छन्ति । अस्ति वायुरित्यभिधीयमानं सत्त्वं ब्रह्मधर्मः । वस्त्वन्तरेष्वदृष्टत्वेनाऽऽश्चर्यरूपो यो वायौ स्वभावः सोऽयं मायाधर्मः । समुद्रतीरादौ प्रसरतो वायोर्यो घोषः सोऽयं शब्द आकाशधर्मः । एवं **वायोरग्निरित्यादौ** योजनीयम् । भास्वररूपमग्नेर्गुणः । प्रकाशनमग्नेः कार्यम् । तत्राप्यग्नेः सत्त्वं ब्रह्मधर्मः । इतरसर्ववस्तुविलक्षणत्वेनाऽऽश्चर्यकरत्वं मायाधर्मः । ज्वलतोऽग्नेर्योऽयं भुगुभुगितिशब्दः सोऽयमाकाशधर्मः । यस्तूष्णः स्पर्शः सोऽयं वायुधर्मः । तत्र शब्दस्पर्शयोराकाशवायुनिष्ठशब्दादिवैलक्षण्यं भासमानं यदस्ति तदप्याश्चर्यहेतुत्वान्मायाप्रयुक्तमेव । यथोक्तादग्नेरापः **संभूताः** । अपां मधुररसो विशेषगुणः । कारणधर्माश्च तत्रानुगच्छन्ति । आपः सन्ति । ताश्चेतरविलक्षणेन द्रवत्वेनाऽऽश्चर्यरूपाः । पाषाणबहुल[illegible] बुलुबुल्वित्येवं शब्दः श्रूयते । स्पर्शः शीतलः । रूपं श्वेतम् । तादृशीभ्योऽद्भ्यः **पृथिवी संभूता** । गन्धस्तस्या विशेषगुणः । अस्ति पृथिवी । सा च काठिन्येनेतरविलक्षणेनाऽऽश्चर्यरूपा । तस्यां च मूर्तद्रव्यसंयोगेन कटकटेत्येवंशब्दः श्रूयते । स्पर्शः कठिनः । रूपं नीलपीताद्यनेकविधम् । रसो मधुरादिलक्षणः । एतत्सर्वं **पञ्चभूतविवेके** संगृह्योक्तम्—

" शब्दस्पर्शौ रूपरसौ गन्धो भूतगुणा इमे ।
एकद्वित्रिचतुष्पञ्च गुणा व्योमादिषु क्रमात् ॥
प्रतिध्वनिर्विषयच्छब्दो वायौ बीसीति शब्दनम् ।
अनुष्णाशीतसंस्पर्शो वह्नौ भुगुभुगुध्वनिः ॥

---

१ क. °नुस्मृत्य ।

उष्णः स्पर्शः प्रभा रूपं जले बुलुबुलुध्वनिः ।
शीतः स्पर्शः शुक्लरूपं रसो माधुर्यमीरितम् ॥
भूमौ कटकटाशब्दः स्पर्शः कठिन ईर्यते ।
नीलादिकं च भूरूपं मधुराम्लादिको रसः ॥
सुरभीतरगन्धौ द्वौ गुणाः सम्यग्विवेचिताः " ॥ इति ।

इत्थमाकाशादिपृथिव्यन्तानां पञ्चभूतानां सृष्टिरुक्ता । ओषध्यन्नपुरुषा भौतिकास्तेषां सृष्टिकथनेन गिरिनदीसमुद्रादिकृत्स्नभौतिकसृष्टिरुपलक्ष्यते । यद्यपि मिथुनजन्याः पश्वादिदेहाः सर्वेऽप्यन्नमयास्तथाऽपि मनुष्यदेहस्य ——[1]विकारित्वेन प्राधान्यमभिप्रेत्य तेषु पुरुषसृष्टिरत्राभिहिता । तच्च प्राधान्यमैतरेयके स्पष्टं प्रतीयते—" पुरुषे त्वेवाऽऽविस्तरामात्मा स हि प्रज्ञानेन संपन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीप्सत्येवं संपन्नोऽथेतरेषां पशूनामशनायापिपासे एवाभिविज्ञानं न विज्ञातं वदन्ति न विज्ञातं पश्यन्ति न विदुः श्वस्तनं न लोकालोकौ " इति । एतस्या आकाशादिपुरुषान्ताया भूतभौतिकसृष्टेः स्वयमुपादानरूपा स्वाश्रये ब्रह्मण्यपि प्रकृतित्वमापादयन्ती या माया तस्याः स्वभावविशेष उत्तरतापनीये विस्पष्टमाम्नातः—" माया च तमोरूपाऽनुभूतेस्तदेतज्जडं[3] मोहात्मकमनन्तं तुच्छमिदं रूपमस्यास्य व्यञ्जिका नित्यं नित्यनिवृत्ताऽपि मूढैरात्मैव[2] दृष्टाऽस्य सत्त्वमसत्त्वं च दर्शयति सिद्धत्वासिद्धत्वाभ्यां स्वतन्त्रास्वतन्त्रत्वेन " इति ।

अस्याः श्रुतेरभिप्रायश्चित्रदीपे प्रपञ्चितः—

" माया चेयं तमोरूपा तापनीये तदीरणात् ।
अनुभूतिस्तत्र मानं प्रतिजज्ञे श्रुतिः स्वयम् ॥
जडं मोहात्मकं तच्चेत्यनुभावयति श्रुतिः ।
आबालगोपं स्पष्टत्वादानन्त्यं तस्य साऽब्रवीत् ॥
अचिदात्मघटादीनां यत्स्वरूपं जडं हि तत् ।
यत्र कुण्ठी भवेद्बुद्धिः स मोह इति लौकिकाः ॥
इत्थं लौकिकदृष्टचैतत्सर्वैरप्यनुभूयते ।
युक्तिदृष्ट्या त्वनिर्वाच्यं नासदासीदिति श्रुतेः ॥
नासदासीद्विभातत्वान्नो सदासीच्च *बाधनात् ।
विद्यादृष्ट्या श्रुतं तुच्छं तस्य नित्यनिवृत्तितः ॥

* नेह नानाऽस्ति किंचनेतिश्रुत्या निषेधादित्यर्थः ।

१ ग. घ, °शनापि° । २ ग. °रूपस्वा° । ३ ग. °ज्जडमो° ।

तुच्छाऽनिर्वचनीया च वास्तवी चेत्यसौ त्रिधा ।
ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः ॥
अस्य सत्त्वमसत्त्वं च जगतो दर्शयत्यसौ ।
प्रसारणाच्च संकोचाद्यथा चित्रपटस्तथा ॥
अस्वतन्त्रा हि माया स्यादप्रतीतेर्विना चितिम् ।
स्वतन्त्राऽपि तथैव स्यादसङ्गस्यान्यथाकृतेः ॥
कूटस्थासङ्गमात्मानं जगत्त्वेन करोति सा ।
चिदाभासस्वरूपेण जीवेशावपि निर्ममे ॥
कूटस्थमनुपद्रुत्य करोति जगदादिकम् ।
दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः ॥
द्रवत्वमुदके वह्नावौष्ण्यं काठिन्यमश्मनि ।
मायायां दुर्घटत्वं च स्वतः सिध्यति नान्यतः ॥
न वेत्ति मायिनं लोको यावत्तावच्चमत्कृतिम् ।
धत्ते मनसि पश्चात्तु मायेषेत्युपशाम्यति[1] ॥
प्रसरन्ति हि चोद्यानि जगद्वस्तुत्ववादिषु ।
न चोदनीयं मायायां तस्यां चोद्यैकरूपतः ॥
चोद्येऽपि यदि चोद्यं स्यात्त्वच्चोद्ये चोद्यते मया ।
परिहार्यं ततश्चोद्यं न पुनः प्रतिचोद्यताम् ॥
विस्मयैकशरीराया मायायाश्चोद्यरूपतः ।
अन्वेष्यः परिहारोऽस्या बुद्धिमद्भिः प्रयत्नतः ॥
मायात्वमेव निश्चेयमिति चेत्तर्हि निश्चिनु ।
लोकप्रसिद्धमायाया लक्षणं यत्तदीक्ष्यताम् ॥
न निरूपयितुं शक्या विस्पष्टं भासते च या ।
सा मायेतीन्द्रजालादौ लोकाः संप्रतिपेदिरे ॥
स्पष्टं भाति जगच्चेदमशक्यं तन्निरूपणम् ।
मायामयं जगत्तस्मादीक्षस्वापक्षपाततः ॥
निरूपयितुमारब्धे निखिलैरपि पण्डितैः ।
अज्ञानं पुरतस्तेषां भाति कक्ष्यासु कासुचित् ॥
देहेन्द्रियादयो भावा वीर्येणोत्पादिताः कथम् ।
कथं वा तत्र चैतन्यमित्युक्ते ते किमुत्तरम् ॥

१ क ङ 'येत्यु° । २ ग. तस्याश्चोद्यै' ।

वीर्यस्यैव स्वभावश्चेत्कथं तद्विदितं त्वया ॥
अन्वयव्यतिरेकौ यौ भग्नौ तौ व्यर्थवीर्यतः ।
न जानामि किमप्येतदित्यन्ते शरणं तव ॥
अत एव महान्तोऽस्य प्रवदन्तीन्द्रजालताम् ।
एतस्मात्किमिवेन्द्रजालमपरं यद्गर्भवासस्थितं
रेतश्चेतति हस्तमस्तकपदप्रोद्भूतनानाङ्कुरम् ।
पर्यायेण शिशुत्वयौवनजरावेषैरनेकैर्वृतं
पश्यत्यत्ति शृणोति जिघ्रति तथा गच्छत्यथाऽऽगच्छति ॥
देहवद्बटधानादौ सुविचार्य विलोक्यताम् ।
क्व धानाः कुत्र वा वृक्षस्तस्मान्मायेति निश्चिनु ॥
निरुक्तावभिमानं ये दधते तार्किकादयः ।
हर्षमिश्रादिभिस्ते तु खण्डनादौ सुशिक्षिताः ॥
अचिन्त्याः खलु ये भावा न तांस्तर्केण[2] योजयेत् ।
अचिन्त्यरचनारूपं मनसाऽपि जगत्खलु ॥
अचिन्त्यरचनाशक्तिबीजं मायेति निश्चिनु ।
मायाबीजं तदेवैकं सुषुप्तावनुभूयते " ॥ इति ।

ईदृङ्मायाधिष्ठानत्वेन मायी महेश्वरो यः स श्वेताश्वतरैराम्नातः । तस्य स्रष्टृत्वं[3] त एवाऽऽमनन्ति—"अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः " इति।

सृष्टिप्रयोजने मतभेदा माण्डूक्यशाखायामाम्नायन्ते—

" विभूतिप्रसवं त्वन्ये मन्यन्ते सृष्टिचिन्तकाः ।
स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता ॥
इच्छामात्रं प्रभोः सृष्टिरिति सृष्टिर्विनिश्चिता ।
कालात्प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः ॥
भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे ।
देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा " ॥ इति ।

यः प्रसवो जगदुत्पत्तिः सेयमीश्वरस्य विभूतिस्तत्प्रकटनार्थमीश्वरः सृजतीत्येकं मतम् । यथा स्वप्नो विचारमन्तरेणाकस्मादुत्पद्यते तद्वदिति द्वितीयं मतम् । इन्द्रजालरूपा माया यथा लोके चमत्काररूपा तथा चमत्कारप्रदर्शनार्थमिति तृतीयं मतम् । यथा सत्स्वपि बहुषु भक्ष्यभोज्येषु कश्चित्किंचित्स्वी करोतीत्यत्र तदिच्छैव नियामिका तद्वदिति चतुर्थं मतम् । यथा वसन्ताद्यृतुलिङ्गानि पुष्पोद्गमादीनि कालविशेषाधी-

१ घ. °चार्यावलो° । २ क. ख. घ. ङ. °र्केषु यो° । ३ क. ख ङ. तद्वत्वं ।

नानि तद्वदिति **पञ्चमं मतम्** । यथा कृषिवाणिज्यादिकं स्वभोगार्थं क्रियते तद्वदिति **षष्ठं मतम्** । यथाऽक्षद्यूतादिकं क्रीडार्थं तद्वदिति **सप्तमं मतम्** । यथा ब्रह्मतत्त्वस्य सच्चिदानन्दैकरसत्वं स्वभावस्तथा मायाविशिष्टस्य सृष्टिस्थितिसंहाराः स्वभावभूता अतो निःस्पृहस्य प्रयोजनविशेषो न कल्पनीय इत्यष्टमं मतम् । एतदेव सिद्धान्तरहस्यम् । ननु कर्माण्येव स्वस्वफलदानाय प्राणिदेहानुत्पादयन्ति किमनेनेश्वरेणेति चेन्न । ईश्वर एव फलदातेति **तृतीयाध्यायस्य द्वितीयपादे*** चिन्तिततत्वात् ।

" कर्मैव फलदं यद्वा कर्माराधित ईश्वरः ।
अपूर्वावान्तरद्वारा कर्मणः फलदातृता ॥
अचेतनात्फलासूतेः शास्त्रीयात्पूजितेश्वरात् ।
कालान्तरे फलोत्पत्तेर्नापूर्वपरिकल्पना ॥

अन्वक्षविनाशिनोऽपि कर्मणोऽपूर्वव्यवधानेन कालान्तरभाविफलप्रदत्वसंभवादीश्वरकल्पने गौरवमिति प्राप्ते ब्रूमः—अचेतनस्य कर्मणोऽपूर्वस्य तारतम्येन प्रतिनियतफलं दातुं न सामर्थ्यमस्ति । लोके सेवादिक्रियायामचेतनायां तददर्शनात्ततः सेवितराजवत्पूजितेश्वरात्फलसिद्धिरभ्युपेया । न च कल्पनागौरवं शास्त्रसिद्धत्वेनेश्वरस्याकल्पनीयत्वात् । " एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते । एष उ एवासाधु कर्म कारयति तं यमधो निनीषते " इति श्रुतिरीश्वरस्यैव धर्माधर्मयोः फलदातृत्वं तत्कारयितृत्वं चाभिदधाति । सति चेश्वरस्य प्रामाणिकत्वे तवैव प्रत्युताश्रुतस्यापूर्वस्य कल्पने गौरवं भवेत् । तस्मात्कर्मभिराराधित ईश्वरः फलदाता " ।

तस्येश्वरस्योभयविधकारणत्वं **प्रथमाध्यायस्य चतुर्थपादे** + चिन्तितम्—

" निमित्तमेव ब्रह्म स्यादुपादानं च वेक्षणात् ।
कुलालवन्निमित्तं तन्नोपादानं मृदादिवत् ॥
बहु स्यामित्युपादानभावोऽपि श्रुत ईक्षितुः ।
एकबुद्ध्या सर्वधीश्च तस्माद्ब्रह्मोभयात्मकम् ॥

जगत्कारणत्वप्रतिपादकानि सर्वाणि वाक्यानि विषयः । तत्र किं ब्रह्म निमित्तकारणमेवोतोपादानकारणमपीति संदेहे निमित्तकारणमेवेति तावत्प्राप्तम् । कुतः । तदैक्षततेति सृज्यकार्यविषयपर्यालोचनश्रवणात् । पर्यालोचनं च निमित्तकारणमेवेति प्राप्ते ब्रूमः—"तदैक्षत बहु स्यां प्रजायेय" इतीक्षितुरेव प्रकर्षेणोत्पत्त्या बहुभावः श्रूयते । तत

* फलमत उपपत्तेः—ब्र० सू० अ० ३ पा० २ अ० ८ सू० ३८ । + प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्—ब्र० सू० अ० १ पा० ४ अ० ७ सू० २३ ।

१ ख. अक्षणवि° ।

उपादानत्वमप्यस्ति । किंच येनाश्रुतं श्रुतं भवतीत्यादिना ब्रह्मण्येकस्मिञ्श्रुते सत्यश्रुतमपि जगच्छ्रुतमेव भवतीति प्रतिपाद्यते । तदेतदेकविज्ञानेन सर्वविज्ञानम् । तच्च ब्रह्मणः सर्वोपादानत्वे सति ब्रह्मव्यतिरेकेण कार्याभावादुपपादयितुं सुशकम् । केवलनिमित्तत्वे तु सर्वेषु कार्येषु ब्रह्मव्यतिरिक्तेषु सत्सु कथं नामैकविज्ञानेन सर्वविज्ञानं प्रतिपाद्येत । तस्मादुभयविधकारणं ब्रह्म " ।

तस्योभयविधकारणत्वस्य प्रतिपादको वेदान्तसमन्वयः श्रुत्यन्तरविसंवादपरिहारेण तत्रैव* समर्थितः—

" समन्वयो जगद्योनौ न युक्तो युज्यतेऽथ वा ।
न युक्तो वेदवाक्येषु परस्पराविरोधतः ।
सर्गक्रमविवादेऽपि नासौ स्रष्टरि युज्यते ।
अव्याकृतमसत्प्रोक्तं युक्तोऽसौ कारणे ततः " ॥ इति ।

योऽयं **वेदान्तानां** समन्वयो जगत्कारणविषयः सार्धैस्त्रिभिः पादैः प्रतिपादितस्तमाक्षिप्य समाधातुमयमारम्भः । न युक्तोऽयं समन्वय इति तावत्प्राप्तम् । कुतः । वेदान्तेषु बहुशो विरोधप्रतीतेः । प्रामाण्यस्यैव दुःसंपादत्वात् । तथाहि—आत्मन आकाशः संभूतः " इति **तैत्तिरीयके** वियदादीन्प्रति स्रष्टृत्वं श्रूयते । **छान्दोग्ये**—"तत्तेजोऽसृजत" इति तेजआदीन्प्रति । **ऐतरेयके**—"स इमाँल्लोकानसृजत" इति लोकान्प्रति । **मुण्डके**—" एतस्माज्जायते प्राणः " इति प्राणादीन्प्रति । न केवलं कार्यद्वारेणैव विरोधः किंतु कारणस्वरूपोपन्यासेऽपि । "सदेव सोम्येदमग्र आसीत् " इति **च्छान्दोग्ये** सद्रूपत्वं कारणस्यावगम्यते । **तैत्तिरीयके** तु—"असद्वा इदमग्र आसीत् " इत्यसद्रूपत्वम् । **ऐतरेयके** च—" आत्मा वा इदमेक एवाग्र आसीत् " इत्यात्मरूपत्वम् । अतो विरोधान्न युक्तः समन्वय इति प्राप्ते ब्रूमः—भवतु नाम सृज्येषु वियदादिषु तत्क्रमे च विवादः । वियदादीनामतात्पर्यविषय[त्वाद]द्वितीयब्रह्मबोधायैव तदुपन्यासः । तात्पर्यविषये तु जगत्स्रष्टरि ब्रह्मणि न क्वापि विवादोऽस्ति। क्वचित्सच्छब्देनोक्तस्य ब्राह्मणोऽन्यत्र सर्वजीवस्वरूपत्वविवक्षयाऽऽत्मशब्देनाभिधानात् । यत्त्वसच्छब्देनाभिधानं तदव्याकृताभिप्रायम् । न त्वत्यन्तासत्त्वाभिप्रायम् । " कथमसतः सज्जायेत " इति **श्रुत्यन्तरे** चासत्कारणत्वनिषेधात् । तस्मादेकवाक्यतायाः सुसंपादत्वाद्युक्तो जगत्कारणे समन्वयः ।

---

*. कारणत्वेन चाऽऽकाशादिषु यथा व्यपदिष्टोक्तेः—ब्र०सू०अ० १ पा० ४ अ० ४ सू० १४ ।

---

१ ग. °पाद्यते । त° ।

तत्रैव पुनरपि परमाण्वादिकारणानां श्रौतत्वनिराकरणेन स एव *समर्थितः—

"अण्वादेरपि हेतुत्वं श्रुतं ब्रह्मण एव वा ।
वटधानादिदृष्टान्तादण्वादेरपि तच्छ्रुतम् ॥
शून्याण्वादिष्वेकबुद्ध्या सर्वबुद्धिर्न युज्यते ।
स्युर्ब्रह्मण्यपि धानाद्यास्ततो ब्रह्मैव कारणम् ।

वेदान्तो विषयः । तत्र किं ब्रह्मण इव परमाणुशून्यादीनामपि क्वचिज्जगत्कारणत्वं श्रुतमस्ति । अथवा सर्वत्र ब्रह्मण एव कारणत्वं प्रतिनियतमिति संशयः । अण्वादेरपि कारणत्वं श्रुतम् । कुतः । वटधानादिदृष्टान्तश्रवणात् । तथा हि—**छान्दोग्ये** षष्ठाध्याये **श्वेतकेतुं** प्रत्युपदिशन्नुद्दालकः सूक्ष्मतत्त्वे स्थूलस्य जगतोऽन्तर्भावं प्रतिपादयितुं महावृक्षगर्भितानि वटबीजानि दृष्टान्तत्वेनोदाजहार । अतस्तत्सदृशाः परमाणवो दार्ष्टान्तिकत्वेन श्रुता भवन्ति । शून्यस्य च—"असद्वा इदमग्र आसीत् " इति साक्षादेव कारणत्वं श्रुतम् । "स्वभावमेके कवयो वदन्ति कालं तथाऽन्ये" इति स्वभावकालपक्षौ श्रुतौ । तस्मात्परमाण्वादीनामपि श्रौतं कारणत्वमिति प्राप्ते ब्रूमः—एकविज्ञानेन सर्वविज्ञानं शून्यादिमतेषु नोपपद्यते । शून्यादिभिरजन्यस्य ब्रह्मणः शून्यादिज्ञानेनाज्ञातत्वात् । धानादिदृष्टान्तस्तु ब्रह्मणोऽपीन्द्रियागम्यतया सूक्ष्मत्वादुपपद्यते । असच्छब्दस्य नामरूपराहित्याभिप्रायश्च**तुर्थाधिकरणे** वर्णितः । स्वभावकालपक्षौ तु पूर्वपक्षत्वेन श्रुत्योपन्यस्तौ । तस्माद्ब्रह्मैव श्रुत्याभिहितं जगत्कारणं न परमाण्वादीति सिद्धम् " ।

तस्यैतस्य समन्वयस्य स्मृतिविरोधतर्कविरोधौ **द्वितीयाध्यायस्य प्रथमपादे त्रयोदशाधिकरणैः** परिष्टतौ । तत्र **संग्रहकारः** +प्रथमाधिकरणमारचयति—

"सांख्यस्मृत्याऽस्ति संकोचो न वा वेदसमन्वये ।
धर्मे वेदः सावकाशः संकोच्योऽनवकाशया ॥
प्रत्यक्षश्रुतिमूलाभिर्मन्वादिस्मृतिभिः स्मृतिः ।
अमूला कापिली बाध्या न संकोचोऽनया ततः ॥

अस्मिन्पादे सर्वेष्वधिकरणेषु पूर्वाध्यायोक्तः समन्वयो विषयः । तत्रास्मिन्नधिकरणे वैदिकस्य समन्वयस्य **सांख्यस्मृत्याऽभिसंकोचोऽस्ति** न वेति संशयः । संकोचोऽस्तीति तावत्प्राप्तम् । कुतः **सांख्यस्मृ**तेरनवकाशत्वेन प्रबलत्वात् । **सांख्यस्मृतिर्हि** वस्तु-

* एतेन सर्वे व्याख्याता व्याख्याता—ब्र० सू अ० १ पा० ४ अ० ८ सू० २८ । + स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्—ब्र०सू०अ० २ पा० १ अ० १ सू० १ ।

१ क. ग. ङ. 'ति सिद्धान्तस्यै' ।

तत्त्वनिरूपणायैव प्रवृत्ता न त्वनुष्ठेयं धर्मं क्वचिदपि प्रतिपादयितुम् । यदि तस्मिन्नपि वस्तुन्यसौ बाध्येत तदा निरवकाशा स्यात् । वेदस्तु धर्मब्रह्मणी प्रतिपादयन्ब्रह्मण्येकस्मिन्बाध्यमानोऽपि धर्मे सावकाशः । तस्मादनवकाशया **स्मृत्या** सावकाशस्य **वेदस्य** संकोचो युक्त इति प्राप्ते ब्रूमः—**सांख्यस्मृत्या वेदस्य** संकोचो न युक्तः । कुतः । **मन्वादिस्मृतिभिर्ब्रह्मकारणवादिनीभिर्बाधितत्वात्** । प्रबला हि **मन्वादिस्मृतयः** । प्रत्यक्षवेदमूलत्वात् । न तु तथा **कापिली स्मृतिः** । नहि प्रधानकारणवादिन्या मूलभूतं कंचन वेदमुपलभामहे । दृश्यमानवेदवाक्यानां ब्रह्मपरत्वस्य पूर्वमेव निर्णीतत्वात् । तस्मान्न **सांख्यस्मृत्या वेदस्य** संकोचो युक्तः " ।

* द्वितीयाधिकरणमारचयति—

" योगस्मृत्याऽस्ति संकोचो न वा योगो हि वैदिकः ।
तत्त्वज्ञानोपयुक्तश्च ततः संकुच्यते तया ॥
प्रमाऽपि योगे तात्पर्यादतात्पर्यान्न सा प्रमा ।
अवैदिके प्रधानादावसंकोचस्तयाऽप्यतः ॥

योगस्मृतिः पातञ्जलशास्त्रं तत्रोक्तोऽष्टाङ्गयोगः प्रत्यक्षवेदेऽप्युपलभ्यते । **श्वेताश्वतरादिशाखासु** योगस्य प्रपञ्चितत्वात् । किंचायं **योगस्तत्त्वज्ञानोपयोगी** । दृश्यते त्वग्र्यया बुद्ध्येति योगसाध्यस्य चित्तैकाग्र्यस्य ब्रह्मसाक्षात्कारहेतुत्वश्रवणात् । अतः प्रमाणभूतं **योगशास्त्रम्** । तच्च **प्रधानस्यैव** जगत्कारणतां वक्ति । तस्माद्**योगस्मृत्या वेदस्य** संकोच इति प्राप्ते ब्रूमः—अष्टाङ्गयोगे तात्पर्यवत्त्वात्प्रमाणभूताऽपि सती **योगस्मृतिरवैदिके** प्रधानादौ न प्रमाणं तत्र तात्पर्याभावात् । तथा हि—" अथ योगानुशासनम् " इति प्रतिज्ञाय " योगश्चित्तवृत्तिनिरोधः " इति **योगस्यैव** लक्षणमुक्त्वा तमेव कृत्स्नशास्त्रेण प्रपञ्चयामासेति तस्य **योगे** तात्पर्यम् । **प्रधानादीनि** तु न प्रतिपाद्यतया प्रतिज्ञे किं तर्हि **द्वितीयपादे** यमनियमादिसाधनप्रतिपादके हेयं हेयहेतुं हानं हानहेतुं च विवेचयन्प्रसङ्गात्**सांख्यस्मृतिप्रसिद्धानि प्रधानादीनि** व्याजहारैव ततो न तत्र तात्पर्यम् । तस्मान्न **योगस्मृत्या वेदस्य** संकोचः ।

+तृतीयाधिकरणमारचयति—

" वैलक्षण्याख्यतर्केण बाध्यतेऽथ न बाध्यते ।
बाध्यते साम्यनियमात्कार्यकारणवस्तुनोः ॥

---

* एतेन योगः प्रत्युक्तः—ब्र० सू० अ० २ पा० १ अ० २ सू० ३ । + न विलक्षणत्वादस्य तथात्वं च शब्दात्— ब्र० सू० अ० २ पा० १ अ० ३ सू० ४ ।

---

१ घ. न त° । २ ग. व्यवजहारैव ।

मृद्घटादौ समत्वेऽपि दृष्टं वृश्चिककेशयोः।
स्वकारणेन वैषम्यं तर्काभासो न बाधकः॥

अचेतनं जगच्चेतनाद्ब्रह्मणो न जायते विलक्षणत्वात्। यद्येन विलक्षणं तत्तस्मान्न जायते। यथा गोर्महिषीत्यनेन तर्केण समन्वयो बाध्यत इति प्राप्ते ब्रूमः—ये ये कार्यकारणे ते ते सलक्षणे इत्यस्या व्याप्तेर्वृश्चिककेशयोर्व्यभिचारो दृश्यते। अचेतनाद्गोमयाद्वृश्चिकस्य चेतनस्योत्पत्तेश्चेतनाच्च पुरुषादचेतनानां केशानामुत्पद्यमानत्वात्। अतो वेदनिरपेक्षः शुष्कतर्को न कुत्रापि प्रतितिष्ठति।

तदुक्तमाचार्यैः—

" यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते " ॥ इति।

तस्मादाभासत्वाद्वैलक्षण्यहेतुर्न बाधकः "।

+ चतुर्थाधिकरणमारचयति—

" बाधोऽस्ति परमाण्वादिमतैर्नो वा यतः पटः।
न्यूनतन्तुभिरारब्धो दृष्टोऽतो बाध्यते[२] मतैः॥
शिष्टेष्टाऽपि स्मृतिस्त्यक्ता शिष्टत्यक्तं मतं किमु।
न तैर्बाधो विवर्ते तु न्यूनत्वनियमो नहि॥

सांख्ययोगस्मृतिभ्यां तदीयतर्केण च बाधो माऽस्तु नाम। **कणादबुद्धादिस्मृतिभिस्तदीयतर्केण** च समन्वयो बाध्यताम्। **कणादो** हि परमर्षिः **परमाणूनां** जगत्कारणत्वं स्मरति स्म, तर्कं च तस्मिन्नर्थे प्रोवाच। विमतं द्व्यणुकादिकं स्वन्यूनपरिमाणेनाऽऽरब्धम्। कार्यद्रव्यत्वात्। यथा तन्तुभिः पट इति। बुद्धश्च भगवतो **विष्णो**रवतारः। स चाभावं जगदुद्धर्तुं स्मरति स्म, तर्कं च तदनुकूलमाह। विमतं भावरूपं जगदभावपुरःसरं भावरूपत्वाद्यथा सुषुप्तिपुरःसरः स्वप्नश्च इति। तस्मात्तैः प्रबलैः **कणादादिमतैर्बाध** इति प्राप्ते ब्रूमः—यदा वैदिकशिरोमणिभिः पुराणकर्तृभिस्तत्र तत्र प्रसङ्गादुदाहृता प्रकृतिपुरुषादिप्रतिपादिका **सांख्ययोगस्मृतिर्जगत्कारणविषये दौर्बल्येन** परित्यक्ता तदा निखिलैः शिष्टैरुपेक्षितानां **कणादादिमतानां दौर्बल्यमिति किमु** वक्तव्यम्। न खलु ब्राह्मपाद्मादिषु **पुराणेषु** क्वचिदपि प्रसङ्गाद्द्व्यणुकादिप्रक्रियोदाहृता। प्रत्युत " हैतुकान्बैककवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् " इति बहुशो निन्दोपलभ्यते। अस्तु न्यूनारब्धत्वनियम उक्तो नासौ विवर्तवादेऽस्ति। दूरस्थपर्वताग्रस्थितैर्महद्भिर्वृक्षैः-

---

* एतेन शिष्टापरिग्रहा अपि व्याख्याताः—ब्र० सू० अ० २ पा० १ अ० ४ सू० १२।

---

१ ख. °त्पत्तिः। अचेत°। २ ख. °ते स तैः। ३ ख. °न्बलवृ°। ४ ख. °भ्यनि°।

रित्यल्पदूर्वाग्रभ्रमस्य जन्यमानत्वात् । यदप्यभावपुरःसरत्वानुमानं तत्रापि साध्यविकलो दृष्टान्तः । सुषुप्तेरवस्थात्वेनावस्थावत आत्मनः सद्रूपस्याङ्गीकरणीयत्वे सति स्वप्नस्य भावपुरःसरत्वात् । तस्मादेतैर्मतैर्नास्ति बाधः " ।

*पञ्चमाधिकरणमाचरयति —

" अद्वैतं बाध्यते नो वा भोक्तृभोग्यविभेदतः ।
प्रत्यक्षादिप्रमासिद्धो भेदोऽसावन्यबाधकः ॥
तरङ्गफेनभेदेऽपि समुद्राभेद इष्यते ।
भोक्तृभोग्यविभेदेऽपि ब्रह्माद्वैतं न बाध्यते " ॥ इति ।

समन्वयेनावगम्यमानमद्वैतं प्रत्यक्षादिप्रसिद्धेन भोक्तृभोग्यविभेदेन बाध्यत इति चेत् । न । तरङ्गादिरूपेण भेदस्य समुद्ररूपेणाभेदस्य च दृष्टत्वेन भेदाभेदयोर्विरोधाभावात् । भेदाभेदविरोधव्यवहारस्याऽऽकारभेदेनापि रहितेऽत्यन्तमेकस्मिन्नपि वस्तुनि सावकाशत्वात् । तस्माद्ब्रह्माकारेणाद्वैतं भोक्तृभोग्याकारेण द्वैतमित्याकारभेदाव्यवस्थासिद्धौ न कोऽपि बाधः " ।

+षष्ठाधिकरणमारचयति—

" भेदाभेदौ तात्त्विकौ स्तो यदि वा व्यावहारिकौ ।
समुद्रादाविव तयोर्बाधाभावेन तात्त्विकौ ॥
बाधितौ श्रुतियुक्तिभ्यां तावतो व्यावहारिकौ ।
कार्यस्य कारणाभेदादद्वैतं ब्रह्म तात्त्विकम् ॥

स्पष्टौ संशयपूर्वपक्षौ । "नेह नानाऽस्ति किंचन" इति श्रुतिर्भेदं बाधते । युक्तिश्च परस्परोपमर्दात्मकयोर्भेदाभेदयोरेकत्रासंभवादेकस्मिंश्चन्द्रमसि द्वित्वासंभवात् । यदुक्तं पूर्वाधिकरण आकारभेदाद्भेद इति तदप्यसत् । अद्वैते वस्तुन्याकारभेदस्यासंप्रतिपत्तेः । समुद्रादौ तु दृष्टत्वादभ्युपगम्यते । नहि दृष्टेऽनुपपन्नं नामेति न्यायात् । अत्रापि ब्रह्माकारजगदाकारौ दृष्टाविति चेन्न । ब्रह्मणः शास्त्रैकसमधिगम्यत्वात् । तस्माच्छ्रुतियुक्तिभ्यां बाधितत्वाव्यावहारिकौ भेदाभेदौ । किं तर्हि वस्त्विति चेदद्वैतमेवेति ब्रूमः । कार्यस्य कारणान्यतिरेकेण कारणमात्रस्य वस्तुत्वात् । तथा च श्रुतिर्मृत्तिकादिदृष्टान्तैः कारणस्यैव सत्यत्वं प्रतिपादयति—" यथा सोम्यैकेन[3] मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमेवं सोम्य[4] स आदेशो भवति" इति ।

---

* भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्—ब्र० सू० अ० २ पा० १ अ० ५ सू० १३ । + तदनन्यत्वमारम्भणशब्दादिभ्यः—ब्र० सू० अ० २ पा० १ अ० ३ सू० १४ ।

---

१ ख. 'रलत्वद्' । २ ख. 'दू ङिङ्कराव''म' । ३ क. ग. ङ. सोम्यै° । ४ ग. सोम्य ।

अस्यायमर्थः । प्रौढो मृत्पिण्डः कारणं तद्विकारा घटशरावादयः । तत्र मृद्वस्त्वन्यद्घटादीनि चान्यानि वस्तूनीति तार्किका मन्यन्ते । तत्र घटादीनां पृथग्वस्तुत्वनिरासाय विकारशब्देन श्रुतिस्तान्व्यवहरति । मृद्वस्तुनो विकाराः संस्थानविशेषा घटादयो न पृथग्वस्तुभूताः । यथा देवदत्तस्य बाल्ययौवनस्थाविरादयस्तद्वत् । एवं च सति घटाद्याकारप्रतिभासदशायामपि मृन्मात्रमेव स्वतन्त्रं वस्तु । ततो मृद्यवगतायां घटादीनां यत्तात्त्विकं स्वरूपं तत्सर्वमव तम् । आकारविशेषो न ज्ञायत इति चेन्मा ज्ञायतां नाम । तेषामवस्तुभूतानामजिज्ञासार्हत्वात् । चक्षुषा प्रतिभासमाना अपि विकारा निरूपिताः सन्तो मृद्व्यतिरेकेण न स्वरूपं किंचिल्लभन्ते । घटोऽयं शरावोऽयमिति वाङ्निष्पाद्यनामधेयमात्रं लभन्ते । अतो निर्वस्तुकत्वे सत्युपलभ्यमानत्वरूपेण मिथ्यात्वलक्षणेनोपेतत्वादसत्या विकाराः । मृत्तिका तु विकारव्यतिरेकेणापि स्वरूपं लभत इति सत्या । तथा ब्रह्मोपदेशोऽवगन्तव्यः । ब्रह्मणि मृत्तिकान्यायस्य जगति घटादिन्यायस्य च योजयितुं शक्यत्वादिति । तस्माज्जगतो ब्रह्माभेदाद्द्वैतं ब्रह्म तात्त्विकम् । एवंविधविचारशून्यानां पुरुषाणामापातदृष्ट्या वेदेनाभ्युपेताद्वितीयब्रह्मप्रतिपत्तेः प्रत्यक्षादिभिर्भेदप्रतिपत्तेश्च सद्भावात्समुद्रतरङ्गन्यायेन भेदाभेदौ भासमानौ व्यावहारिकावेवेति स्थितम् " ।

* सप्तमाधिकरणमारचयति—

"हिताहितक्रियादिः स्यान्नो वाऽभेदं प्रपश्यतः ।
जीवाहितक्रिया स्वार्था स्यादेषा नहि युज्यते ॥
अवस्तुजीवसंसारस्तेन नास्ति मम क्षतिः ।
इति पश्यत ईशस्य न हिताहितभागिता ॥

परमेश्वरो हि केषांचिज्जीवानां संसारासक्तानां वैराग्यादिकं हितं निर्मिमीते । अहितं च नरकहेतुमधर्मं निर्मिमीते । निर्मिमाणश्च स्वस्य जीवैरभेदं सर्वज्ञतया पश्यति । तस्मात्स्वस्यैव हिताकरणमहितकरणं च प्रसज्येयाताम् । एतच्च न युक्तम् । नहि लोके प्रेक्षावान्कश्चिदपि स्वस्य हितं न करोत्यहितं वा कसेति तस्माद्धिताकरणादिदोष इति प्राप्ते ब्रूमः —सर्वज्ञत्वादीश्वरो जीवसंसारस्य मिथ्यात्वं स्वस्य निर्लेपत्वं च पश्यत्यतो न हिताहितभाक्त्वदोषः " ।

---

* इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः—ब्र० सू० अ० २ पा० १ अ० ७ सू० २१ ।

---

१ ग. °स्यादि° २ ग. °टादि° । ३ क. ग. ङ. °षाणां माया तद्दृष्ट्या ।

* अष्टमाधिकरणमारचयति—

"न संभवेत्संभवेद्वा सृष्टिरेकाद्वितीयतः ।
नानाजातीयकार्याणां क्रमाज्जन्म न संभवे ॥
अद्वैतं तत्त्वतो ब्रह्म तच्चाविद्यासहायवत् ।
नानाकार्यकरं कार्यक्रमोऽविद्यास्थशक्तिभिः" ॥ इति ।

एकमेवाद्वितीयमिति ब्रह्मणः स्वगतसजातीयविजातीयभेदैः शून्यत्वमवगम्यते । सृष्टव्यानि चाऽऽकाशवाय्वादीनि विचित्राणि । नह्यविचित्रे कारणे कार्यस्य विचित्रत्वं युक्तम् । अन्यथैकस्मादपि क्षीराद्दधितैलाद्यनेकविचित्रकार्यप्रसङ्गात् । क्रमश्चाऽऽकाशादीनां श्रुताववगम्यते । न च तस्य व्यवस्थापकं किंचिदस्ति । तस्मादनेककार्याणां क्रमेण जन्माद्वितीयब्रह्मणो न संभवतीति प्राप्ते ब्रूमः- यद्यपि तत्त्वतो ब्रह्माद्वैतं तथाऽप्यविद्यासहायोपेतमिति श्रुतियुक्त्यनुभवैरवगम्यते । "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" इति श्रुतिः । मायैवाविद्या । उभयोरप्यनिर्वचनीयलक्षणस्यैकत्वात् । न च मायाङ्गीकारे द्वैतापत्तिर्वास्तवस्य द्वितीयस्याभावात् । अत एकमपि ब्रह्म विद्यासहायवशान्नानाकार्यकरं भविष्यति । न च कार्यक्रमस्य व्यवस्थापकाभावः । अविद्यागतानां शक्तिविशेषाणां व्यवस्थापकत्वात् । तस्माद्द्वितीयाद्ब्रह्मणो [illegible] क्रमेण सृष्टिः संभवति ।

+ नवमाधिकरणमारचयति—

"न युक्तो युज्यते वाऽस्य परिणामो न युज्यते ।
कात्स्न्र्याद्ब्रह्मानित्यतासिरंशात्सावयवं भवेत् ॥
मायाभिर्बहुरूपत्वं न कात्स्न्र्यान्नापि भागतः ।
युक्तोऽनवयवस्यापि परिणामोऽत्र मायिकः ॥

आरम्भणाधिकरणे (ब्र० सू० २-१-६)—कार्यकारणयोरभेदः प्रतिपादितः । अतो न वैशेषिकादिवदारम्भवादो ब्रह्मवादिनोऽभिमतः । तस्मात्क्षीरदधिन्यायेन परिणामोऽभ्युपगन्तव्यः । तत्र किं ब्रह्म कात्स्न्र्येन परिणमत उतैकदेशेन । नाऽऽद्यः । अशेषपरिणामे ब्रह्मणः क्षीरवदनित्यत्वप्रसङ्गात् । द्वितीये सावयवत्वप्रसङ्गः । तस्मान्न परिणाम इति प्राप्ते ब्रूमः—"इन्द्रो मायाभिः पुरुरूप ईयते" इति श्रुतेर्ब्रह्मणो मायाशक्तिभिर्जगद्रूपत्वं परिणामो न त्वसौ वास्तवः । तेन कृत्स्नैकदेशाविकल्पयोर्नावकाशः । तस्माद्युज्यते परिणामः" ।

---

* उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि—ब्र० सू० अ० २ पा० १ अ० ८ सू० २४ । + कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा—ब्र० सू० अ० २ पा० १ अ० ९ सू० २६ ।

---

१ क. घ. ङ. °कवि° । २ ख. °तीयब्रह्म° ।

* दशमाधिकरणमारचयति—

"नाशरीरस्य मायाऽस्ति यदि वाऽस्ति न विद्यते ।
ये हि मायाविनो लोके ते सर्वेऽपि शरीरिणः ॥
बाह्यहेतुमृते यद्वन्मायाया कार्यकारिता ।
ऋतेऽपि देहं मायैवं ब्रह्मण्यस्तु प्रमाणतः ॥

लोके मायाविनामैन्द्रजालिकानां[1] सशरीरत्वदर्शनादशरीरस्य ब्रह्मणो न माया संभवतीति प्राप्ते ब्रूमः—गृहादिनिर्मातॄणां स्वव्यतिरिक्तमृद्दारुतृणादिबाह्यसाधनसापेक्षत्वदर्शनेऽप्यैन्द्रजालिकस्य बाह्यसाधननैरपेक्ष्येण यथा गृहादिनिर्मातृत्वं तथा लौकिकमायाविनः शरीरसापेक्षत्वदर्शनेऽपि ब्रह्मणो मायासिद्ध्यर्थं तदपेक्षा मा भूत् । अथोच्यते[2] । ऐन्द्रजालिकस्य बाह्यसाधननैरपेक्ष्येण निर्मातृत्वे प्रत्यक्षप्रमाणमस्तीति । तर्हि ब्रह्मणोऽपि शरीरनैरपेक्ष्येण मायासद्भावे " मायिनं तु महेश्वरम् " इति श्रुतिः प्रमाणमस्तु" ।

+एकादशाधिकरणमारचयति—

"तृप्तोऽस्रष्टाऽथ वा स्रष्टा न स्रष्टा फलवाञ्छने ।
अतृप्तिः स्यादवाञ्छायामुन्मत्तनरतुल्यता ॥
लीलाश्वासवृथाचेष्टा अनुद्दिश्य फलं यतः ।
अनुन्मत्तैर्विरच्यन्ते तस्मात्तृप्तस्तथा सृजेत्" ॥ इति ।

"आनन्दो ब्रह्म " इति शास्त्रान्नित्यतृप्तः परमेश्वरः । तादृशस्य सृष्टिविषयायामिच्छायामभ्युपगम्यमानायां नित्यतृप्तिर्व्याहन्येत । अनभ्युपगम्यमानायामबुद्धिपूर्विकां सृष्टिं विरचयत उन्मत्तनरतुल्यता प्रसज्येतेति प्राप्ते ब्रूमः—बुद्धिमद्भिरेव राजादिभिरन्तरेण प्रयोजनं लीलया मृगयादिप्रवृत्तिः क्रियते । श्वासोच्छ्वासव्यवहारस्तु सार्वजनीनः । व्यर्थचेष्टाश्च बालकैः क्रियमाणा बहुशो दृश्यन्ते । तद्वन्नित्यतृप्तोऽपीश्वरः प्रयोजनमन्तरेणाप्यनुन्मत्तः सन्नशेषं जगत्सृजतु " ।

×द्वादशाधिकरणमारचयति—

"वैषम्यान्नैर्घृण्यतो वा सुखदुःखे नृभेदतः ।
सृजन्विषम ईशः स्यान्निर्घृणश्चोपसंहरन् ॥

---

* सर्वोपेता च तद्दर्शनात्—ब्र० सू० अ० २ पा० १ अ० १० सू० ३० । + न प्रयोजनवत्त्वात्—ब्र०सू०अ० २ पा० १ अ० ११ सू० ३२ । × वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति—ब्र० सू० अ० २ पा० १ अ० १२ सू० ३४ ।

---

१ क. ख. ग. ङ. °नां शरीरित्वं । २ ग. °था मृदादि° । ३ ग. अथोच्यते ।

प्राण्यनुष्ठितकर्मादिमपेक्ष्येशः प्रवर्तते ।
नातो वैषम्यनैर्घृण्ये संसारस्तु न चाऽऽदिमान् " ॥ इति ।

ईश्वरो देवादीनत्यन्तसुखिनः सृजति पश्वादीनत्यन्तदुःखिनो मनुष्यांश्च मध्यमानेवं तारतम्येन पुरुषविशेषेषु सुखदुःखे सृजन्नीश्वरः कथं विषमो न स्यात्। कथं च नीचैरप्यत्यन्तजुगुप्सितं देवतिर्यङ्मनुष्याद्यशेषजगदुपसंहारं कुर्वन्निर्घृणो न भवेत् । तस्माद्वैषम्यनैर्घृण्ये प्रसज्येयातामिति प्राप्ते ब्रूमः—न तावदीश्वरस्य वैषम्यप्रसङ्गोऽस्ति । प्राणिनामुत्तममध्यमाधमलक्षणवैषम्ये तत्तत्कर्मणामेव प्रयोजकत्वात् । न चैतावतेश्वरस्य स्वातन्त्र्यहानिः । अन्तर्यामितया कर्माध्यक्षत्वात् । न त्वेवं सति *घट्टकुटीप्रभातन्याय आपद्यते । ईश्वरे वैषम्यं परिहर्तुं कर्मणां वैषम्ये हेतुत्वमुक्त्वा पुनरपीश्वरस्य स्वातन्त्र्यसिद्धये तत्कर्मनियामकतेऽभ्युपगम्यमाने सत्यन्ततो गत्वा चेश्वरस्यैव वैषम्यहेतुत्वप्रसङ्गात् । नायं दोषः । नियामकत्वं नाम तत्तद्वस्तुशक्तीनामव्यवस्थापरिहारमात्रम् । शक्तयस्तु मायाशरीरभूताः । न तु तासामुत्पादक ईश्वरः । ततः स्वशक्तिवशात्तत्तत्कर्मणां वैषम्यहेतुत्वेऽपि न व्यवस्थापकस्येश्वरस्य वैषम्यप्रसङ्गः । संहारस्य सुषुप्तिवददुःखजनकत्वात्प्रत्युत सर्वक्लेशनिवर्तकत्वाच्च । ततः सघृणत्वमेव । नन्ववान्तरसृष्टिषु पूर्वपूर्वकर्मापेक्षया सृजत ईश्वरस्य वैषम्याभावेऽपि प्रथमसृष्टौ पूर्वकर्मासंभवाद्वैषम्यदोषस्तदवस्थ इति चेन्न । सृष्टिपरम्पराया अनादित्वात् । नान्तो न चाऽऽदिरित्यादिशास्त्रात् । तस्मान्न कोऽपि दोषः ।

× त्रयोदशाधिकरणमारचयति—

"नास्ति प्रकृतिता यद्वा निर्गुणस्यास्ति नास्ति सा ।
मृदादेः सगुणस्यैव प्रकृतित्वोपलम्भनात् ॥
भ्रमाधिष्ठानताऽस्माभिः प्रकृतित्वमुपेयते ।
निर्गुणेऽप्यस्ति जात्यादौ सा ब्रह्म प्रकृतिस्ततः ॥

प्रकृतित्वं नाम कार्याकारेण विक्रियमाणत्वम् । तच्च लोके सगुण एव मृदादावुपलब्धम् । अतो निर्गुणस्य ब्रह्मणः कथं प्रकृतितेति प्राप्ते ब्रूमः—यद्यपि प्रक्रियतेऽनयेतिव्युत्पत्त्या विक्रियमाणत्वं प्रतीयते तथाऽपि तद्विक्रियमाणत्वं द्वेधाऽपि संभवति । क्षीरादिवत्परिणामित्वेन वा रज्ज्वादिवद्भ्रमाधिष्ठानत्वेन वा । तत्र निर्गुणस्य परिणा-

* यथा कश्चित्सार्थं पान्थो द्रव्यलिप्सुर्घट्टपालभिया (घट्टः पर्वतीयविषममार्गः) तान्प्रतारयितुं पलायनमार्गभ्रंशात्पुनरपि प्रातर्घट्टकुट्यामेवाऽऽयातीति । × स्ववैधर्म्योपपत्तेश्च—ब्र० सू० अ० २ पा० १ अ० १३ सू० ३५ ।

१ क. घ. ङ. गत्वेश्वरवै° ।

मित्वासंभवेऽपि भ्रमाधिष्ठानत्वमस्तु। दृश्यते हि निर्गुणेऽपि जात्यादौ भ्रमाधिष्ठानता। मलिनं ब्राह्मणं दृष्ट्वा शूद्रोऽयमिति भ्रान्तिव्यवहारदर्शनात्। तस्मान्निर्गुणमपि ब्रह्म प्रकृतिरिति सिद्धम्"।

द्वितीयपादेऽष्टाभिरधिकरणैर्मतान्तरनिराकरणेन ब्रह्मणो जगत्कारणत्वं प्रतिष्ठापितम्। तत्र *प्रथमाधिकरणमारचयति—

"प्रधानं जगतो हेतुर्न वा सर्वे घटादयः।
अन्विताः सुखदुःखाद्यैर्यतो हेतुरतो भवेत्॥
न हेतुर्योग्यरचनाप्रवृत्त्यादेरसंभवात्।
सुखाद्या आन्तरा बाह्या घटाद्यास्तु कुतोऽन्वयः॥

सुखदुःखमोहात्मकं प्रधानं जगतः प्रकृतिः। जगति सुखाद्यन्वयदर्शनात्। घटपटादयो लभ्यमानाः सुखाय भवन्त्युदकाहरणप्रावरणादिकार्यकारित्वात्। अत एव घटादयोऽन्यैरपह्रियमाणास्तस्यैव दुःखजनकाः। यदा तूदकानयनादिकार्यं नापेक्षितं तदा न सुखदुःखे जनयन्ति। केवलमुपेक्षणीयत्वेनावतिष्ठन्ते। तदिदमुपेक्षाविषयत्वं मोहः। मुह वैचित्त्य इतिधातोर्मोहशब्दनिष्पत्तेः। उपेक्षणीयेषु च चित्तवृत्त्यनुदयात्। अतः सुखदुःखमोहान्वयदर्शनात्प्रधानं प्रकृतिरिति सांख्या मन्यन्त इति प्राप्ते ब्रूमः—न प्रधानं जगतो हेतुः। देहेन्द्रियमहीधरादिरूपस्य विचित्रस्य प्रतिनियतसंनिवेशविशेषस्य जगतो रचनायामचेतनस्य प्रधानस्य योग्यत्वासंभवात्। लोके हि प्रतिनियतकार्यस्य विचित्रप्रासादादेरतिबुद्धिमत्कर्तृकत्वोपलम्भनात्। औरतां तावदियं रचना तत्सिद्ध्यर्थं प्रवृत्तिरपि नाचेतनस्योपपद्यते। चेतनानधिष्ठिते शकटादौ तददर्शनात्। अथ पुरुषस्य चेतनस्य प्रकृत्यधिष्ठातृत्वमभ्युपगम्येत तर्ह्यसङ्गत्वं पुरुषस्य हीयेतेत्यपसिद्धान्तापत्तिः। यदुक्तं सुखदुःखमोहान्विता घटादय इति। तदसत्। सुखादीनामान्तरत्वाद्घटादीनां बाह्यत्वात्। तस्मान्न प्रधानं जगद्धेतुः"।

+द्वितीयाधिकरणमारचयति—

"नास्ति काणाददृष्टान्तः किंवाऽत्यसदृशोद्भवे।
नास्ति शुक्लः पटः शुक्लतन्तोरेव हि जायते॥
अणुद्व्यणुकमुत्पन्नमेनोः परिमण्डलात्।
अदीर्घाद्द्व्यणुकाद्दीर्घं त्र्यणुकं तन्निदर्शनम्॥

---

* रचनानुपपत्तेश्च नानुमानम्—ब्र० सू० अ० २ पा० २ अ० १ सू० १। + महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्—ब्र० सू० अ० २ पा० २ अ० २ सू० ११।

---

१ ग. °णे जा°। २ ग. °ति वा°। ३ क. ङ. सुखदुःखा। ४ ख. °न्ते यदि°। ५ ग. घ. अदि°। ६ क. ख. ग. ङ. °मणव. प°।

पूर्वस्मिन्पादे चेतनाद्ब्रह्मणो विलक्षणमचेतनं जगज्जायत इत्यत्र **सांख्यान्प्रति** लोकसिद्धं गोमयवृश्चिकादिनिदर्शनमभिहितम् । तावता **सांख्यैः** क्रियमाणस्याऽऽक्षेपस्य परिहृतत्वात्स्वपक्षसाधनं संपन्नम् । परपक्षदूषणं चास्मिन्पादे प्रक्रम्य पूर्वाधिकरणे **सांख्यमतं** दूषितम् । इतःपरं **वैशेषिकमतं** दूषयितव्यम् । तन्मतस्य च प्रक्रियाबहुलत्वात्तद्वासनावासितः काश्चित्पुरुषस्तत्प्रक्रियासिद्धं विलक्षणोत्पत्तिदृष्टान्तमन्तरेण ब्रह्मकारणवादं न बहु मन्यते । अतो विसदृशोत्पत्तौ **काणादमत**सिद्धो दृष्टान्तोऽस्ति वा न वेति विचार्यते । नास्तीति तावत्प्राप्तम् । यतः शुक्लः पटः शुक्लेभ्य एव तन्तुभ्यो जायते न तु रक्तेभ्यस्तस्मान्नास्तीति प्राप्ते ब्रूमः—अस्त्येव विसदृशोत्पत्तौ दृष्टान्तः । तथा हि । परमाणवः पारिमाण्डल्यपरिमाणयुक्ताः । न त्वणुपरिमाणयुक्ताः । द्वाभ्यां परमाणुभ्यामणुपरिमाणर[illegible] द्व्यणुकमुत्पद्यते । इदमेकं निदर्शनम् । तथा ह्रस्वपरिमाणोपेतत्वाद्दीर्घपरिमाणरहितं द्व्यणुकं तादृशेभ्यस्त्रिभ्यो द्व्यणुकेभ्यो दीर्घपरिमाणोपेतमणुपरिमाणरहितं त्र्यणुकमुत्पद्यते । इदमपरं निदर्शनम् । एवमन्यान्यपि तत्प्रक्रियाप्रसिद्धानि निदर्शनान्युदाहरणीयानि " ।

* तृतीयाधिकरणमारचयति—

" जनयन्ति जगन्नो वा संयुक्ताः परमाणवः ।
आद्यकर्मजसंयोगाद्द्व्यणुकादिक्रमाज्जगत् ॥
सनिमित्तानिमित्तादिविकल्पेष्वाद्यकर्मणः ।
असंभवादिसंयोगे जनयन्ति न ते जगत् " ॥ इति ।

प्रलीने पूर्वसिद्धे जगति यदा महेशस्य सिसृक्षा भवति तदा प्राणिकर्मवशान्निश्चलेषु परमाणुष्वाद्यं कर्मोत्पद्यते । तस्मात्कर्मण एकः परमाणुः परमाण्वन्तरेण संयुज्यते । तस्मात्संयोगाद्द्व्यणुकमारभ्यते । तेभ्यस्त्रिभ्यो द्व्यणुकेभ्यस्त्र्यणुकमित्यादिक्रमेण कृत्स्नस्य जगत उत्पत्तौ बाधकाभावात्संयुक्ताः परमाणवो जगज्जनयन्तीति प्राप्ते ब्रूमः—यदेतदाद्यं कर्म तत्सनिमित्तमनिमित्तं वा । अनिमित्तत्वे नियामकाभावात्सर्वदा तदुत्पत्तौ प्रलयाभावप्रसङ्गः । सनिमित्तत्वेऽपि तन्निमित्तं दृष्टमदृष्टं वा । न तावद्दृष्टम् । प्रयत्नस्य वाऽभिघातस्य वा शरीरोत्पत्तेः प्रागसंभवात् । ईश्वरप्रयत्नस्य नित्यस्य कादाचित्कीमाद्यकर्मोत्पत्तिं प्रत्यनियामकत्वात् । नाप्यदृष्टमाद्यकर्मनिमित्तम् । आत्मसमवेतस्यादृष्टस्य परमाणुभिरसंबन्धात् । अत एवमादिविकल्पदोषप्रसरे सत्याद्यकर्मासंभवान्न परमाणुसंयोगो जायते । ततः संयुक्तेभ्यः परमाणुभ्यो जगज्जनिरिति मतं दूरापास्तम् ।

---

* उभयथाऽपि न कर्मातस्तदभावः— ब्र० सू० अ० २ पा० २ ब्र० ३ सू० १२ ।

---

१ ग. °द्यायक° ।

* चतुर्थाधिकरणमारचयति—

" समुदायावुभौ युक्तावयुक्तौ वाऽणुहेतुकः ।
एकोऽपरः स्कन्धहेतुरित्येवं युज्यते द्वयम् ॥
स्थिरचेतनराहित्यात्स्वयं चाचेतनत्वतः ।
न स्कन्धानामणूनां वा समुदायोऽत्र युज्यते ॥

बाह्यास्तित्ववादिनो **बौद्धा** मन्यन्ते । द्वौ समुदायौ बाह्य आभ्यन्तरश्चेति । तत्र बाह्यो भूनदीसमुद्रादिकः । आन्तरश्चित्तचैत्यात्मकः । तदेतत्समुदायद्वयमेवाशेषं जगत् । तत्र बाह्यसमुदायस्य परमाणवः कारणम् । ते च परमाणवश्चतुर्विधाः । केचित्खराः[1] पार्थिवाख्याः । अपरे स्निग्धा आप्याख्याः । अन्ये चोष्णास्तैजसाख्याः । अन्ये चलनात्मका वायवीयाख्याः । तेभ्यश्चतुर्विधेभ्यः परमाणुभ्यो युगपत्पुञ्जीभूतेभ्यो बाह्यः समुदायो जायते । आन्तरस्य समुदायस्य स्कन्धपञ्चकं कारणम् । रूपस्कन्धो विज्ञानस्कन्धो वेदनास्कन्धः संज्ञास्कन्धः संस्कारस्कन्धश्चेति पञ्च स्कन्धाः । तत्र चित्तेन निरूप्यमाणाः शब्दस्पर्शादयो रूपस्कन्धः । तदभिव्यक्तिर्विज्ञानस्कन्धः । तज्जन्यसुखदुःखे वेदनास्कन्धः । देवदत्तादिनामधेयं संज्ञास्कन्धः । एतेषां वासना संस्कारस्कन्धः । तेभ्यः पञ्चस्कन्धेभ्यः पुञ्जीभूतेभ्य आन्तरसमुदायो जायते । तस्माद्युज्यते समुदायद्वयमिति प्राप्ते ब्रूमः—किमणूनां स्कन्धानां[2] च संघातापत्तौ निमित्तभूतश्चेतनोऽन्योऽस्ति । किंवा स्वयं संहन्यन्ते । आद्येऽपि स चेतनः स्थायी क्षणिको वा स्यात् । स्थायित्वेऽपसिद्धान्तः । क्षणिकत्वे प्रथमं स्वयमलब्धात्मकः पश्चात्संघातापत्तिं करोतीति वक्तुमशक्यम् । द्वितीये त्वचेतनाः स्कन्धा अणवश्च नियामकं चेतनमन्तरेण प्रतिनियताकारेण कथं संहन्यन्ताम् । तस्मान्न युक्तं समुदायद्वयम्" ।

= पञ्चमाधिकरणमारचयति—

"विज्ञानस्कन्धमात्रत्वं युज्यते वा न युज्यते ।
युज्यते स्वप्नदृष्टान्ताद्बुद्धेश्चैव व्यवहारतः ॥
अबाधात्स्वप्नवैषम्याद्बाह्यार्थस्तूपलभ्यते ।
बहिर्वदिति तेऽप्युक्तिर्नातो धीरर्थरूपभाक् ॥ इति ।

केचिद्बौद्धा बाह्यार्थमपलपन्तो विज्ञानस्कन्धमात्रं तत्त्वमित्याहुः । न चात्र व्यवहारानुपपत्तिः स्वप्ने बाह्यार्थाननपेक्ष्य केवलया बुद्ध्या व्यवहारदर्शनात् । तथैव जाग्रद्व्यव-

* समुदाय उभयहेतुकेऽपि तदप्राप्तिः—ब्र० सू० अ० २ पा० २ अ० ४ सू० १८ । = नाभाव उपलब्धेः—ब्र० सू० अ० २ पा० २ अ० ५ सू० २८ ।

१ क. ख. ङ. °चित्तिस्थराः । २ ग. च. न्तरिक्षात्मका । घ. च. तरलात्मका । ३ ख. ग. घ. °नां सं° ।

हारस्याप्युपपत्तेः । तस्माद्विज्ञानस्कन्धमात्रत्वं युज्यत इति प्राप्ते ब्रूमः— विषमो हि स्वप्नदृष्टान्तः प्रबोधदशायां स्वप्नस्य बाध्यमानत्वात् । जाग्रद्व्यवहारस्य न क्वचिद्बाधं पश्यामः । न च बाह्यार्थसद्भावे प्रमाणाभावः । उपलब्धेरेव प्रमाणत्वात् । उपलभ्यन्ते हि घटादयो बहिष्ठत्वेन । अथोच्येत । बुद्धिरेव बाह्यघटादिवदवभासते । तथा चाऽऽहुः—"यदन्तर्ज्ञेयं तत्त्वं तद्बहिर्वदवभासते" इति । एवं तर्हि त्वदुक्तिरेव बाह्यार्थसद्भावे प्रमाणमिति ब्रूमः । क्वचिदपि बाह्यार्थासद्भावे तद्व्युत्पत्तिरहितत्वाद्बहिर्वदित्युपमानोक्तिर्न संगच्छते । तस्माद्बाह्यार्थसद्भावाद्विज्ञानमात्रत्वं न युक्तम् " ।

*षष्ठाधिकरणमारचयति—

"सिद्धिः सप्तपदार्थानां सप्तभङ्गीनयान्न वा ।
साधकन्यायसद्भावात्तेषां सिद्धौ किमद्भुतम् ॥
एकस्मिन्सदसत्त्वादिविरुद्धप्रतिपादनात् ।
अपन्यायः सप्तभङ्गी न च जीवस्य सांशता ॥

अत्राऽऽर्हता मन्यन्ते । जीवोऽजीवश्चेति द्वौ पदार्थौ । जीवश्चेतनः शरीरपरिमाणः सावयवः । अजीवः षड्विधः । तत्र महीधरादिरेकः । आस्रवसंवरनिर्जरबन्धमोक्षाख्याः पञ्च । आस्रवत्यनेन जीवो विषयेष्वित्यास्रव इन्द्रियसंघातः । संवृणोति विवेकमित्यविवेकादिः संवरः । निःशेषेण जीर्यत्यनेन कामक्रोधादिरिति केशोल्लुञ्चनतप्तशिलारोहणादिकं तपो निर्जरः । कर्माष्टकेनाऽऽपादिता जन्ममरणपरम्परा बन्धः । चत्वारि घातिकर्माणि[1] पापविशेषरूपाणि । चत्वारि चाघातिकर्माणि[2] पुण्यविशेषरूपाणि । शास्त्रोक्तोपायेन[3] तेभ्योऽष्टभ्यः कर्मभ्यो विनिर्गतस्य जीवस्य संततोर्ध्वगमनं मोक्षः । त एते सप्त पदार्थाः सप्तभङ्गीरूपेण न्यायेन व्यवस्थाप्यन्ते—१ स्यादस्ति, २ स्यान्नास्ति, ३ स्यादस्ति च नास्ति च, ४ स्यादवक्तव्यः, ५ स्यादस्ति चावक्तव्यश्च, स्यान्नास्ति चावक्तव्यः ७ स्यादस्ति च नास्ति चावक्तव्यश्चेति सप्तभङ्गीनयः । अस्यायमर्थः । स्याच्छब्द ईषदर्थवाची निपातः । प्रतिवादिनो हि चतुर्विधाः । सद्वादिनोऽसद्वादिनः सदसद्वादिनोऽनिर्वचनीयवादिनश्चेति । पुनरप्यनिर्वचनीयमतेन मिलितानि[4] सदसदादीनि मतानि त्रिविधानि । तानेतान्सप्तविधान्वादिनः प्रति सप्तविधा न्यायाः प्रयोक्तव्याः । तद्यथा । सद्वादी समागत्याऽऽर्हतं प्रति किं त्वन्मते मोक्षोऽस्तीति पृच्छति । तत्राऽऽर्हत उत्तरं ब्रूत ईषदस्तीति । एवमन्यानपि वादिनः प्रतीषन्नास्तीतित्यादीन्युत्तरा-

---

* नैकस्मिन्नसंभवात्—ब्र० सू० अ० २ पा० २ अ० ६ सू० ३३ ।

---

१ ग. घ. घाति° । २ म. व. °घाति° । ३ ग. °स्त्रोक्तो° । ४ व. °मिश्रितानि° । ५ घ. सद्वादिम° ।

प्युदाहर्तव्यानि । तावता वादिनः सर्वे निर्विण्णाः सन्तो नोत्तरं प्रतिपद्यन्ते । अतोऽस्य सप्तभङ्गीरूपस्य साधकन्यायस्य सद्भावाजीवादीनां सप्तपदार्थानां सिद्धौ किमत्राऽऽश्चर्यमिति प्राप्ते ब्रूमः—सप्तभङ्गीरूपोऽयमपन्यायः । एकस्य जीवपदार्थस्य सद्वादिनं प्रति सद्रूपत्वमसद्वादिनं प्रत्यसद्रूपत्वं चेत्येवमादिविरुद्धधर्मप्रतिपादकत्वात् । न च जीवस्य सावयवत्वं युज्यतेऽनित्यत्वप्रसङ्गात् । तदनित्यत्वे च मोक्षः कस्य पुरुषार्थः स्यात् । तस्मान्न्यायाभासेन सप्तभङ्ग्याख्येन जीवादिपदार्थानां न सिद्धिः ।

* सप्तमाधिकरणमारचयति—

"तटस्थेश्वरवादो यः स युक्तोऽथ न युज्यते ।
युक्तः कुलालदृष्टान्तान्नियन्तृत्वस्य संभवात् ॥
न युक्तो विषमत्वादिदोषाद्वैदिक ईश्वरे ।
अभ्युपेते तटस्थत्वं त्याज्यं श्रुतिविरोधतः ॥

पूर्वाध्यायस्योपान्त्याधिकरणे जगतो निमित्तमुपादानं चेश्वर इत्यागमबलादुक्तम् । तदेतदसहमानास्तार्किकशैवादयः केवलं निमित्तत्वमीश्वरस्य मन्यन्ते । युक्तिं चाऽऽहुः—यथा कुलालोऽनुपादानादिभूतो दण्डचक्रादीन्नियच्छन्कर्ता भवति तथा तटस्थ ईश्वर इति प्राप्ते ब्रूमः—न युक्तं केवलनिमित्तत्वं वैषम्यनैर्घृण्यादिदोषस्य दुष्परिहरत्वात् । कथं त्वया परिहृतो दोष इति चेत्प्राणिकर्मसापेक्षत्वादिति ब्रूमः—तथात्वे चाऽऽगमोऽस्माकं प्रमाणं, त्वयाऽप्यन्ततो गत्वाऽऽगमश्चेदङ्गी क्रियते तर्हि तटस्थत्वमीश्वरस्य त्याज्यं स्यात् । बहु स्यां प्रजायेयेत्युपादानत्वश्रुत्या विरोधात् । तस्मान्न युक्तस्तटस्थेश्वरवादः" ।

× अष्टमाधिकरणमारचयति—

"जीवोत्पत्त्यादिकं पाञ्चरात्रोक्तं युज्यते न वा ।
युक्तं नारायणव्यूहतत्समाराधनादिवत् ॥
युज्यतामविरुद्धोंऽशो जीवोत्पत्तिर्न युज्यते ।
उत्पन्नस्य विनाशित्वे कृतनाशाद्यदोषतः ॥

पाञ्चरात्रिका भागवता मन्यन्ते—भगवानेको वासुदेवो जगत उपादानं निमित्तं च । तत्समाराधनज्ञानध्यानैर्भवबन्धविच्छेदः । तस्माच्च वासुदेवात्संकर्षणाख्यो जीवो जायते । जीवाच्च प्रद्युम्नाख्यं मनः । मनसश्चानिरुद्धाख्योऽहंकारः । त एते वासुदेवादयश्चत्वारो व्यूहाः सर्वात्मका इति प्राप्ते ब्रूमः—तत्र वासुदेवं तत्समाराधना-

---

* पत्युरसामञ्जस्यात्—ब्र० सू० अ० २ पा० २ अ० ७ सू० ३७ । × उत्पत्त्यसंभवात्—ब्र० सू० अ० २ पा० २ अ० ८ सू० ४२ ।

---

१ घ. °दानभू° । २ घ. °था सत्याग° ।

दिकं च श्रुत्यविरोधादभ्युपगच्छामः । यत्तु जीव उत्पद्यत इत्युक्तं तदसत् । कृतनाशाकृताभ्यागमप्रसङ्गात् । पूर्वसृष्टौ यो जीवस्तस्मिन्नुत्पत्तिमत्त्वेन प्रलयदशायां विनष्टे सति तत्कृतयोर्धर्माधर्मयोरफलप्रदत्वेन विनाशः प्रसज्यते । अस्मिंश्च कल्प उत्पद्यमानस्य नूतनजीवस्य धर्माधर्मयोः पूर्वमननुष्ठितयोः सतोरिह सुखदुःखप्राप्तिर्भवतीत्यकृताभ्यागमः प्रसज्येत । तस्माज्जीवोत्पत्त्यादिकं न युक्तम्" ।

तृतीयपादे नवभिरधिकरणैराकाशादिसृष्टिर्विचारिता । तत्र *प्रथमाधिकरणमारचयति—

"व्योम नित्यं जायते वा हेतुत्रयविवर्जनात् ।
जनिश्रुतेश्च गौणत्वान्नित्यं व्योम न जायते ॥
एकज्ञानात्सर्वबुद्धेर्विभक्तत्वाज्जनिश्रुतेः ।
विवर्ते कारणैकत्वाद्ब्रह्मणो व्योम जायते ॥

तैत्तिरीये—" तस्माद्वा एतस्मादात्मन आकाशः संभूतः " इति श्रूयते । तत्राऽऽकाशं नित्यं न तु जन्मवत् । कुतः । आकाशोत्पादकस्य समवाय्यसमवायिनिमित्ताख्यकारणत्रितयस्य दुःसंपादत्वात् । संभूत इति जनिश्रुतिस्तु संप्रतिपन्नब्रह्मकार्यवद्व्योम्नि सत्ताश्रयत्वगुणयोगात्प्रवृत्ता । तस्मादनाद्यनन्तं व्योम न जायत इति प्राप्ते ब्रूमः— एकविज्ञानेन सर्वविज्ञानं तावदशेषेषु **वेदान्तेषु** डिण्डिमः । तच्च व्योम्नो ब्रह्मकार्यत्वे मृद्घटन्यायेन ब्रह्माव्यतिरेकादुपपादयितुं सुशकम् । नान्यथा । किंचाऽऽकाशं जायते विभक्तत्वाद्घटवत् । न चायमसिद्धो हेतुः । वाय्वादिवैलक्षण्यस्याऽऽकाशे प्रसिद्धत्वात् । नापि ब्रह्मण्यनैकान्तिकत्वम् । सर्वात्मकस्य ब्रह्मणः कस्माच्चिदपि विभक्तत्वस्य दुर्भणत्वात् । जनिश्रुतिश्चोत्पत्तिवादिनाऽनुगृहीता भवति । यत्तु कारणत्रितयासंभव इत्युक्तम् । तदसत् । आरम्भवादे त्रितयापेक्षायामपि विवर्तवादे तदनपेक्षत्वात् । तस्मादेतेभ्यो हेतुभ्यो ब्रह्मणः कारणाद्व्योम जायते " ।

+ द्वितीयाधिकरणमारचयति—

" वायुर्नित्यो जायते वा छान्दोग्येऽजन्यकीर्तनात् ।
सैषाऽनस्तमिता देवतेत्युक्तेश्च न जायते ॥
श्रुत्यन्तरोपसंहाराद्वाय्वनस्तमयश्रुतिः ।
वियद्वज्जायते वायुः स्वरूपं ब्रह्म कारणम् ॥

---

* न वियदश्रुतेः—ब्र० सू० अ० २ पा० ३ अ० १ सू० १ । × एतेन मातरिश्वा व्याख्यातः—ब्र० सू० अ० २ पा० ३ अ० २ सू० ८ ।

---

१ ग. घ. °मत्त्वे प्र° । २ ख. °सज्येतेति कृतविप्रणाशः । अ° । ३ ग. °सज्यते । त° । ४ ख. °शेषवे° ।

तैत्तिरीय एवाऽऽकाशाद्वायुरिति श्रूयते। सेयमुत्पत्तिर्गौणी **छान्दोग्ये सृष्टिप्रकरणे** तेजोबन्नानामेवोत्पत्त्यभिधानाद्वायोरुत्पत्त्यनभिधानात्। ननु क्वचिदश्रवणमन्यत्र श्रुतं न निवारयितुमुत्सहत इति **न्यायेन तैत्तिरीयश्रुतेः** कुतो गौणत्वमितिचेच्छ्रुत्यन्तरविरोधादिति ब्रूमः—**बृहदारण्यके** " सैषाऽनस्तमिता देवता यद्वायुः " इति वायोर्विनाशप्रतिषेधादुत्पत्तिमत्त्वे च तदयोगात्तस्मान्न जायते वायुरिति प्राप्ते ब्रूमः—**छान्दोग्ये** जन्माश्रवणेऽपि गुणोपसंहारन्यायेन तैत्तिरीयवाक्यस्येतरत्रोपसंहारे सति श्रुतमेव **च्छान्दोग्ये** वायुजन्म। अनस्तमयश्रुतिस्तु न मुख्या। उपासनप्रकरणपठितत्वेन स्तुत्यर्थत्वात्। आकाशोत्पत्तिहेतवश्चात्रानुसंधेयाः। न च वायोराकाशकार्यत्वेन ब्रह्मण्यनन्तर्भावाद्ब्रह्मज्ञानेन वायुज्ञानं न सिध्येदिति शङ्कनीयम्। पूर्वपूर्वकार्यावीशिष्टस्य ब्रह्मण उत्तरोत्तरकार्यहेतुत्वस्य वक्ष्यमाणतया वियद्रूपापन्नस्य ब्रह्मण एव वायुकारणत्वात्। तस्माद्वायुर्जायते "।

*तृतीयाधिकरणमारचयति—

" सद्ब्रह्म जायते नो वा कारणत्वेन जायते।
यत्कारणं जायते तद्वियद्वाय्वादयो यथा॥
असतोऽकारणत्वेन खादीनां सत उद्भवात्।
व्याप्तेरजादिवाक्येन बाधात्सन्नैव जायते॥

छान्दोग्ये—" सदेव सोम्येदमग्र आसीत् " इति श्रूयते। तत्सद्रूपं ब्रह्म जन्मवद्भवितुमर्हति कारणत्वाद्वियदादिवदिति प्राप्ते ब्रूमः—सद्रूपं ब्रह्म न जायते। कुतः। तज्जनकस्य कारणस्य दुर्निरूपत्वात्। तथा हि न तावदसत्कारणं कथमसतः सज्जायेतेति निषेधात्। नापि सदेव सतः कारणमात्माश्रयापत्तेः। नापि वियदादिकं सतः कारणं वियदादीनां सतो जायमानत्वात्। या तु व्याप्तिर्यत्कारणं तत्तज्जायत इति, सा—स वा एष महानज आत्मेत्यादिश्रुतिबाध्या। तस्मात्सद्ब्रह्म नैव जायते "।

+चतुर्थाधिकरणमारचयति—

" ब्रह्मणो जायते वह्निर्वायोर्वा ब्रह्मसंयुतात्।
तत्तेजोऽसृजतेत्युक्तेर्ब्रह्मणो जायतेऽनलः॥
वायोराग्निरितिश्रुत्या पूर्वश्रुत्यैकवाक्यतः।
ब्रह्मणो वायुरूपत्वमापन्नादग्निसंभवः॥

---

* असंभवस्तु सतोऽनुपपत्तेः—ब्र० सू० अ० २ पा० ३ अ० ३ सू० ९। + तेजोऽत. तथा ह्याह—ब्र० सू० अ० २ पा० ३ अ० ४ सू० १०।

---

१ ग. °वे सौम्ये°।

छान्दोग्ये तत्तेजोऽसृजतेति तेजसो ब्रह्मजत्वं श्रूयते । तैत्तिरीयके वायोरग्निरिति वायुजत्वम् । तत्र वायोरिति पञ्चम्या * आनन्तर्यार्थत्वस्यापि संभवात्केवलब्रह्मजन्यं तेज इति प्राप्ते ब्रूमः— अनुवर्तमानेन संभूतशब्देनान्विताया वायोरितिपञ्चम्या + उपादानार्थत्वस्यैव मुख्यत्वादुभयोः श्रुत्योरेकवाक्यत्वे सति वायुरूपापन्नाद्ब्रह्मणस्तेजो जायत इति लभ्यते " ।

= पञ्चमाधिकरणमारचयति—

"ब्रह्मणोऽपां जन्म किंवा वह्नेर्नाग्नेर्जलोद्भवः ।
विरुद्धत्वान्नीरजन्म ब्रह्मणः सर्वकारणात् ॥
अग्नेराप इति श्रुत्या ब्रह्मणो वह्न्युपाधिकात् ।
अपां जन्म विरोधस्तु सूक्ष्मयोर्नाग्निनीरयोः ॥

यद्यपि तदपोऽसृजत । अग्नेराप इत्युभयोश्छान्दोग्यतैत्तिरीययोस्तेजोजन्यत्वमेवापां श्रूयते तथाऽपि न तद्युक्तम् । निवर्त्यनिवर्तकयोरग्निजलयोर्विरुद्धयोर्न हेतुहेतुमद्भाव इति पूर्वः पक्षः । पञ्चीकृतयोर्दृश्यमानयोर्विरोधेऽप्यपञ्चीकृतयोः श्रुत्येकसमधिगम्ययोर्विरोधकल्पनायोगात्संतापाधिक्ये स्वेदवृष्ट्युद्भवदर्शनाच्च श्रुतिद्वयानुसारेण तेजोरूपापन्नाद्ब्रह्मणोऽपां जनिरिति राद्धान्तः" ।

×षष्ठाधिकरणमारचयति—

"ता अन्नमसृजन्तेति श्रुतमन्नं यवादिकम् ।
पृथिवी वा यवाद्येव लोकेऽन्नत्वप्रसिद्धितः ॥
भूताधिकारात्कृष्णस्य रूपस्य श्रवणादपि ।
तथाऽद्भ्यः पृथिवीत्युक्तेरन्नं पृथ्व्यन्नहेतुतः ॥

छान्दोग्ये ता अन्नमसृजन्तेत्यद्भ्योऽन्नस्य जन्म श्रूयते । तत्रान्नशब्दस्य लोकप्रसिद्ध्या व्रीहियवादिकमर्थ इति प्राप्ते ब्रूमः—पृथिव्यत्रान्नशब्दार्थः । कुतः ? पञ्चमहाभूतसृष्टेरधिकृतत्वात् । किंच यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति श्रुतम् । कृष्णरूपं पृथिव्यां बहुलमुपलभ्यते न तु व्रीहियवादौ । तथाऽद्भ्यः पृथिवीति तैत्तिरीयश्रुत्येकवाक्यताबलादत्रान्नं पृथिवी । न चान्नशब्दस्य तत्र प्रवृत्त्यनुपपत्तिः । कार्यकारणयोरन्नपृथिव्योरभेदविवक्षया तदुपपत्तेः । तस्मादन्नं पृथिवी " ।

---

* पश्चादित्यर्थः । + जनिकर्तुः प्रकृतिरितिसूत्रात् । = आपः—ब्र० सू० अ० २ पा० ३ अ० ५ सू० ११ । × पृथिव्यधिकाररूपशब्दान्तरेभ्यः—ब्र० सू० अ० २ पा० ३ अ० ६ सू० १२ ।

---

१ घ. युक्तम् । २ ख. श्रुत्यैक° । ३ ख. कृष्णं रू° । ४ घ. °दन्नं ।

*सप्तमाधिकरणमारचयति—

"व्योमाद्याः कार्यकर्तारो ब्रह्म वा तदुपाधिकम् ।
व्योम्नो वायुर्वायुतोऽग्निरित्युक्तेः खादिकर्तृता ॥
ईश्वरोऽन्तर्यमयतीत्युक्तेर्व्योमाद्युपाधिकम् ।
ब्रह्म वाय्वादिहेतुः स्यात्तेजआदीक्षणादपि ॥

पूर्वाधिकरणेषु पूर्वपूर्वकार्योपाधिकाद्ब्रह्मण उत्तरोत्तरकार्योत्पत्तिरिति यदेतत्सिद्धवत्कृत्य सिद्धान्तितम् । तदयुक्तम् । व्योम्नो वायुर्वायुतोऽग्निरित्यादौ ब्रह्मनिरपेक्षात्केवलाद्व्योमादेरुत्तरकार्योत्पत्तिश्रवणादिति प्राप्ते ब्रूमः—"य आकाशमन्तरो यमयति स वायुमन्तरो यमयति" इत्यादिनाऽन्तर्यामिब्राह्मणे व्योमादेः स्वातन्त्र्यं निवारितम् । तथा—"तत्तेज ऐक्षत ता आप ऐक्षन्त" इति तेजआदेरीक्षणपूर्वकं स्रष्टृत्वं श्रूयते । तदीक्षणं चेतनब्रह्मनिरपेक्षाणामचेतनानां न संभवति । तस्माद्व्योमाद्युपाधिकस्य ब्रह्मण एव कार्यत्वम् " ।

+अष्टमाधिकरणमारचयति—

"सृष्टिक्रमो लये ज्ञेयो विपरीतक्रमोऽथवा ।
क्लप्त कल्प्याद्वरं तेन लये सृष्टिक्रमो भवेत् ॥
हेतावसति कार्यस्य न सत्त्वं युज्यते ततः ।
पृथिव्यप्स्विति चोक्तत्वाद्विपरीतक्रमो लये ॥

आकाशादिक्रमः सृष्टौ क्लप्तोऽतः प्रलयेऽपि स एव क्रम इति प्राप्ते ब्रूमः—प्रथमतः कारणे लीने सति निरुपादानानां कार्याणां कंचित्कालमवस्थानं प्रसज्येत ।

किंच—" जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ।
ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते ॥ "

इति पुराणे विपरीतक्रमस्योक्तत्वात्क्लप्त एवायं क्रमः । तस्मात्सृष्टिविपरीतेन पृथिव्यादिक्रमेण प्रविलयः " ।

× नवमाधिकरणमारचयति—

" किमुक्तक्रमभङ्गोऽस्ति प्राणाद्यैर्नास्ति वाऽस्ति हि ।
प्राणाक्षमनसां ब्रह्म वियतोर्मध्य ईरणात् ॥

---

* तदभिध्यानादेव तु तल्लिङ्गात्सः—ब्र० सू० अ० २ पा० ३ अ० ७ सू० १३ । + विपर्ययेण तु क्रमोऽत उपपद्यते च—ब्र० सू० अ० २ पा० ३ अ० ८ सू० १४ । × अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात्—ब्र० सू० अ० २ पा ३ अ० ९ सू० १५ ।

---

१ घ. °वद्व्योमा° । २ ग. च. प्रसज्यते । ३ घ. प्रलयः ।

प्राणाद्या भौतिका भूतेष्वन्तर्भूताः पृथक्क्रमम् ।
नेच्छन्त्यतो न भङ्गोऽस्ति प्राणादौ न क्रमः श्रुतः ॥

मुण्डके श्रूयते—" एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी " इति । तत्र प्राणादीनां वियदादिभ्यः पूर्वं श्रूयमाणत्वादाकाशादिकः पूर्वोक्तसृष्टिक्रमो भज्येतेति प्राप्ते ब्रूमः—" अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक् " इति प्राणादीनां भौतिकत्वश्रवणाद्भूतेष्वेवान्तर्भावेन पृथक्क्रमो नापेक्षितः । न च **मुण्डकश्रुतिः** क्रमवाचिनी । आकाशाद्वायुर्वायोरग्निरित्यादाविव क्रमस्याप्रतीयमानत्वात् । तदुत्पत्तिमात्रं तु केवलं ब्रूते । तस्मान्नानर्था श्रुत्या पूर्वोक्तक्रमभङ्गोऽस्ति " ।

तैरेतैरधिकरणैर्मायाविशिष्टाद्ब्रह्मण आकाशादिका पुरुषान्ता जगदुत्पत्तिः सुस्थिता । तस्यां च सुस्थितायां कारणव्यतिरेकेण कार्यस्याभावाद्ब्रह्मणो देशकालसर्ववस्त्वात्मकत्वेनानन्तत्वं सुस्थितम् । तस्य सत्यं ज्ञानमनन्तमिति प्रतिज्ञातमनन्तत्वं समर्थ्य यो वेद निहितं गुहायामित्युक्तं गुहानिहितत्वं समर्थयितुमन्नमयादिभ्य आनन्दमयान्तेभ्यः पञ्चभ्यः कोशेभ्यो ब्रह्मतत्त्वं विवेक्तुकामः आदावन्नमयकोशं दर्शयति—

स वा एष पुरुषोऽन्नरसमयः, इति ।

यः पुरुषः शिरःपाण्यादिमानाकृतिविशेषः सृष्ट्यादावाकाशादिक्रमेणोत्पन्नः **स एवैष** इदानीमस्मद्देहत्वेनानुभूयते । यद्यप्ययं न सृष्ट्यादावुत्पन्नस्तथाऽप्याकाशादिपरम्पराप्राप्तान्नकार्यत्वेन सजातीयतया **स** एवोच्यते । तामेतां विवक्षां स्पष्टकर्तुमन्नरसमयशब्दः । मधुराम्ललवणतिक्तकटुकषायात्मकः षड्विधोऽन्नस्य रसस्तस्य च विकारोऽन्नरसमयः । मातापितृभ्यां भुक्तान्नरसस्तयोः शरीरे त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्रारूयसप्तधातुरूपेण क्रमात्परिणतः सन्गर्भाशये प्रविश्य पुनर्देहरूपेण विक्रियते । तथा च **गर्भोपनिषद्याम्नायते**—" षड्विधो रसो रसाच्छोणितं शोणितान्मांसं मांसान्मेदो मेदसोऽस्थीन्यस्थिभ्यो मज्जा मज्जायाः शुक्रं शुक्रशोणितसंयोगादावर्तते गर्भः " इति । एतेनान्नरसमयेन स्थूलदेहेन तदन्तवर्ती सूक्ष्मदेहोऽप्युपलक्ष्यते । तस्यापञ्चीकृतभूतकार्यत्वादुक्तेनान्नादिना पोष्यमाणत्वाच्च । तत्र भूतकार्यत्वमाचार्यैरुदाहृतम्—" अपञ्चीकृतपञ्चमहाभूतानि तत्कार्यं च सप्तदशकं लिङ्गं भौतिकम् " इति । अन्नादिपोष्यत्वं **छन्दोगैराम्नायते**—" अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक् " इति । उपवासेन प्रक्षीणशक्तिकस्य मनसः पारणेनाऽऽप्यायनं जन्तूनामन्वयव्यतिरेकसिद्धम् । तथा मार्गश्रमेण प्रक्षीणशक्तेः प्राणो जलपानेनाऽऽप्यायमानो **लोके** दृश्यते । तथा

---

१ ग. °तेष्वन्त° । २ घ. °या पृ° । ३ घ. °शादिषु° । ४ क. ख. घ. ङ. °हाहिं° । ५ ग. भुक्तोऽन्न° । ६ ख. ग. °शुक्लाख्य° । ७ ख. ग. शुक्लं शुक्लशो° । ८ ख. °था च मा° ।

घृततैलादितैजसद्रव्यसेवया कण्ठशुद्धिं कृत्वा वाचं पोषयन्तो **गायका** उपलभ्यन्ते। ईदृशेन मनःप्राणवागादिना लिङ्गदेहेन संयुतो योऽन्नकार्यः स्थूलदेहोऽस्माभिरुपलभ्यते सोऽयमाध्यात्मिकः। एतेनाधिदैविको वैराजदेहो ब्रह्माण्डरूप उन्नेयः।

सोऽप्याचार्यैर्वार्तिके दर्शितः—

" दिगादिकरणो देवः पञ्चभूतशरीरभृत्।
सर्वोऽस्मीत्यभिमानेद्धो विराडेवमजायत " ॥ इति।

सोऽयमन्नमयः कोशः **शाखाग्रचन्द्रदर्शनन्यायेन** ब्रह्मतत्त्वं बोधयितुमुपन्यस्तः। अथास्य कोशस्य चित्याग्निवत्पक्ष्याकारेणोपासनार्थं पञ्चावयवानुपन्यस्यति—

" **तस्येदमेव शिरः। अयं दक्षिणः पक्षः। अयमुत्तरः पक्षः। अयमात्मा। इदं पुच्छं प्रतिष्ठा**, इति।

यथा श्येनकङ्कादिपक्ष्याकारेण चीयमानस्याग्नेः शिरः पक्षौ मध्यशरीरं पुच्छं चेति पञ्चावयवा एवमत्रापि द्रष्टव्यम्। **तस्योपासितव्यस्यान्नमयस्य** ग्रीवाया **उपरि** प्रसिद्धत्वेन दृश्यमानमिदमेव **शिरः**। नात्रोपचारः कश्चिदस्ति। तथा दृश्यमानौ हस्तावेव **पक्षत्वेन** ध्यातव्यौ। कण्ठादधस्तान्नाभेश्चोपरिष्टाद्दृश्यमानोऽयं शरीरभाग **आत्मा** जीवावस्थानक्षमदेशरूपो मध्यदेहः "मध्यं ह्येषामङ्गानामात्मा" इति **श्रुतेः** नाभेरधोवर्ति यदङ्गमस्ति तदिदं पक्ष्याकारस्य **पुच्छस्थानीयम्**। तच्च **प्रतिष्ठा** शरीराधारः, प्रतितिष्ठत्यस्यामिति शब्दस्य व्युत्पत्तिः। मनुष्यशरीरे नाभेरधोभागस्योर्ध्वभागं प्रत्याधारत्वं प्रसिद्धम्। गवादिशरीरे मक्षिकादिनिवारणेन पुच्छस्याऽऽधारत्वं द्रष्टव्यम्। पुच्छस्याऽऽधारतोक्तिरुपासनार्था।

तदेवमन्नमयकोशस्योपासनीय आकारः प्रतिपादितः। अथास्य कोशस्य तदुपासनस्य च ब्राह्मणवाक्येनाभिहितस्य संवादेन दार्ढ्यार्थं कंचिन्मन्त्रमुदाहरति—

तदप्येष श्लोको भवति ॥

***इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकेऽष्टमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥**

---

* वैदिकमतानुसरणेन मूलक्रमतोऽत्रानुवाकपरिसमाप्तिरस्ति, परं च भाष्यकारमतेनात्रानुवाकसमाप्तिर्नैव। किंतु तेषां मतेनास्य प्रपाठकस्यानुवाकद्वयमेव। तत्र प्रथमोऽनुवाकः शान्तिसमाप्तावेवावसितः। द्वितीयश्च ब्रह्मविदाप्नोति परमित्यारभ्य प्रपाठकसमाप्तौ समापितः। अतोऽत्र वैदिकमतानुसरणेनैव मूले क्रमः प्रतिनिविष्टो भाष्ये भाष्यकारमतानुसरणेन। एवं पुरतः सर्वत्रोहनीयम्।

---

१ ग. उपलक्ष्यन्ते। २ ग. °दिलि°। ३ घ. संयुक्तो। ४ घ. मध्यं श°। ५ क. ख. ङ. °चारात्काश्चि°। ६ ग. घ. °नदे°।

अन्नाद्वै प्रजाः प्रजायन्ते । याः काश्च पृथिवीꣳश्रिताः । अथो अन्नेनैव जीवन्ति । अथैनदपियन्त्यन्ततः । अन्नꣳ हि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । सर्वं वै तेऽन्नमाप्नुवन्ति । येऽन्नं ब्रह्मोपासते । अन्नꣳ हि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । अन्नाद्भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते । अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत इति, इति ।

तदपि तस्मिन्नप्यर्थे ब्रह्मणोक्तेऽन्नमयकोशे संवादबुद्धिजनक **एष** वक्ष्यमाणोऽन्नाद्वै प्रजा इत्यादिकस्तस्मादन्नं तदुच्यत इत्यन्तः **श्लोकः** पादबद्धो मन्त्रो विद्यते । पूर्वं सूत्रोक्तेऽर्थे काचिद्गुदाहृता । तत्समुच्चयमभिप्रेत्यात्रापिशब्दः प्रयुक्तः । चतुर्दशभिः पादैरुपेतोऽयं श्लोकः । ईदृशस्य लोकप्रसिद्धस्य च्छन्दोविशेषस्याभावेऽपि वैदिकं किंचिदितिच्छन्दो भविष्यति । जरायुजाण्डजादिदेहरूपाः **प्रजा** याः **काश्चित्पृथिवीमाश्रित्योपलभ्यन्ते** ताः सर्वा **अन्नादेवोत्पद्यन्ते** । **तच्च** पूर्वमेव **प्रपञ्चितम्** । अपि चान्नेनैव जीवन्ति प्राणान्धारयन्ति तत्तु लोके प्रसिद्धम् । **अथ** जीवनानन्तरमन्तत आयुषोऽन्ते ताः प्रजा **एतदन्नमपियन्ति** प्रविशन्ति अन्ने लीयन्ते । मृगादिदेहानां व्याघ्राद्यन्नत्वेनान्ने लयो द्रष्टव्यः । हि यस्मात्कारणादन्नं **भूतानां** प्राणिदेहानां ज्येष्ठमुक्तरीत्या कारणम् । **तस्मात्कारणात्सर्वौषधं** सर्वेषां प्राणिनां क्षुद्रोगनिवर्तकमित्युच्यते । निवर्तिते हि क्षुद्रोगे जीवनरूपायाः स्थितेः कारणं भवति । अतः स्थितिहेतुत्वसिद्धये क्षुन्निवर्तकत्वं युक्तम् । अनेनोत्पत्तिस्थितिलयकारणत्वप्रतिपादनेनान्नमयकोशः प्रपञ्चितः । **सर्वं वा** इत्यादिना सफलमुपासनं विधीयते । ये पुरुषा **अन्नं ब्रह्मोपासतेऽन्ने** प्रतीके ब्रह्मदृष्टिं कुर्वन्ति **ब्रह्मदृष्ट्या संस्कृतमन्नं** देहाकारेण परिणतं सच्छिरआदिभिः पुच्छान्तैरवयवैरुपेतमिति ध्यायन्ति, **ते** ध्यातारः **सर्वमेवान्नं** भक्ष्यभोज्यलेह्यचोष्यरूपं प्राप्नुवन्ति । यद्वा वियदादिपरम्परया ब्रह्मणः सकाशान्निष्पन्नमन्नमाध्यात्मिकमानुषदेहरूपेणाऽऽधिदैविकविराड्रूपेण चावस्थितं [१]---विना विशिष्टं[२] ब्रह्मोपासकाः पुरुषाः सर्वात्मकं विराड्रूपं प्राप्य ब्रह्मादिस्तम्बान्तानां सर्वेषां प्राणिनां यद्यदुचितमन्नं तत्तत्सर्वं प्राप्नुवन्ति । पूर्वत्र बुभुत्सुं प्रति बोधसाधनभूतकोशप्रतिपादनार्थमन्नं हि भूतानामित्युक्तम् । अत्र तूपास्यवस्तुप्रशंसार्थं पुनरप्युच्यते । अस्मदादीनां विराट्पर्यन्तानां प्राणिदेहानां **यस्मादन्नं ज्येष्ठमतिशयेन वृद्धं** कारणभूतम् , **तस्मात्सर्वस्य** संसारव्याधेरौषधं निवर्तकम् । यथोक्तोपासनं हि विराट्प्राप्तिद्वारा क्रममुक्तिहेतुः । सर्वप्राणिदेहानामु-

१ क. 'मयः को' । २ क. ङ. 'शिष्टब्र' ।

त्पत्त्यभिवृद्धिहेतुत्वादप्युपास्यमन्नं प्रशस्तम् । अन्नशब्दनिर्वचनपर्यालोचनेऽपि सर्वं देहकारणत्वेनान्नस्य प्रशस्तत्वमवगम्यते । अद्यते सर्वैः प्राणिभिर्जीवनार्थं भक्ष्यत इत्यन्नम् । यद्वा सर्वान्प्राणिनोऽत्ति भक्षयति संहरतीत्यन्नम् । सर्वेऽपि देहा अन्नरस वैषम्योत्पादितरोगादिना म्रियन्त इति लोके प्रसिद्धम् । श्रौत इतिशब्द उदाहृत श्लोकसमाप्त्यर्थः कोशसमाप्त्यर्थश्च । यः पुमान्गुहाहितं ब्रह्मतत्त्वं बुभुत्सते तं प्रति बोधद्वारभूतोऽयन्नमयकोशोऽभिहितः । द्वारत्वं चास्य पुत्रमित्रकलत्रगृहक्षेत्रादिबाह्य विषयासक्तिं निवार्य देहमात्रपर्यवसायित्वसंपादनादुपपद्यते । प्राणिनां हि स्वभावत एव पुत्रादिष्वात्मव्यवहारो भवति । तं च श्रुतिरनुवदति—" आत्मा वै पुत्रनामासि " इति । ऐतरेयकेऽप्याम्नायते—" सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयतेऽथास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति " इति । अस्यायमर्थः—पुत्रवतो गृहस्थस्य द्वावात्मानौ पुत्ररूपः पितृरूपश्चेति । अस्य गृहिणः संबन्धी सोऽयं पुत्ररूप आत्मा श्रौतस्मार्तपुण्यकर्मानुष्ठानार्थं गृहेऽवस्थाप्यते । पितृरूपस्तु स्वस्य कर्तव्यानि सर्वाणि कृत्वा वयोगत आयुष्येण विरहितो म्रियत इति । ईदृशं पुत्रादावात्मत्वारोपं भगवान्भाष्यकार उदाजहार—"पुत्रभार्यादिषु विकलेषु सकलेषु वाऽहमेव विकलः सकलो वेति बाह्यधर्मानात्मन्यध्यस्यति" इति स्वस्माद्भेदस्य पुत्रे प्रतीयमानत्वात्तस्मिन्नात्मत्वव्यवहारः सिंहो देवदत्त इतिवत् । तर्ह्यमुमेव मुख्यताभावं बोधयितुं पुत्रमित्रादिकाद्बाह्यात्सर्वस्माल्लोकाद्व्यावर्त्याऽऽत्मतत्त्वबुद्धिं देहे संकोचयितुमन्नमय आत्मोपदिश्यते । एतमेवाभिप्रायमुपरिष्टाद्विस्पष्टी करिष्यति—" स य एवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रामति " इति । यस्तु बाह्यविषयासक्तिवासनाप्राबल्यात्सकृदुपदेशमात्रेणान्नमयात्मनि न पर्यवस्यति तस्य तत्पर्यवसानार्थं तद्विषयोपासनोपदिष्टा । स चोपासको निरन्तरमन्नमयमात्मानमुपासीनो बाह्यविषयेभ्यो व्यावृत्तोऽर्थादन्नमये पर्यवस्यति । यदि कश्चिदल्पायुः सन्नुपरितनस्य प्राणमयादिविवेकस्याभावेन ब्रह्मतत्त्वबोधस्य संपूर्त्यभावादुक्तोपासनं कुर्वन्नेव म्रियेत । तदानीमुक्तरीत्या तस्य सर्वान्नप्राप्तिर्भवति । ईदृशमेव विषयमभिप्रेत्य भगवतोक्तम्—

"प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते" ॥ इति ।

तदेवं विषयाभिमुख्यनिवृत्त्यर्थमन्नमयकोशमुपदिश्य प्रसङ्गात्तदुपासनं तत्फलं चोक्तम् । अथ विषयेभ्यो निवृत्तस्यान्नमयकोशादप्यन्तःप्रवेशाय प्राणमयकोशमुपदिशति—

तस्माद्वा एतस्मादन्नरसमयात् । अन्योऽन्तर
आत्मा प्राणमयः । तेनैष पूर्णः, ॥ इति ।

---

१ ग. द्वारं चा° । २ घ. °त्मत्वबु° । ३ ग. °वृत्त्यार्थं° । ४ ग. म्रियते । तत्तद्वा° ।

यः परमात्मा स्वयमाकाशादिक्रमेणान्नमयतां प्राप्त इति ब्राह्मणेन प्रतिपादितः स एव पुनः श्लोकेन स्पष्टीकृतः । तस्मादेव ब्राह्मणोक्तादेतस्माच्छ्लोकेन प्रतिपादितादहं मनुष्य इत्यनुभूयमानाद्व्यतिरिक्तोऽभ्यन्तरप्रदेशवर्ती कश्चित्प्राणमय आत्मा विद्यते । तेन प्राणमयेनैषोऽन्नमयः पूर्णः । देहस्यान्तरापादमस्तकं प्राणमयो व्याप्य वर्तते । लिङ्गशरीरे ज्ञानशक्तिः क्रियाशक्तिश्चेतिद्वयं विद्यते । तयोर्मध्ये क्रियाशक्तिकार्यभूतः काश्चित्प्राणाख्यः पदार्थः । तस्य च प्राणस्य विकारः पञ्चवृत्तिसमूहः प्राणमयः । वृत्तयश्च प्राणापानव्यानोदानसमानाख्यास्तस्य प्राणपदार्थस्य व्यापारविशेषास्ते च हृदयादिप्रदेशेषु निष्पद्यन्ते ।

तथा चोक्तम्—

"हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ।
उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः" ॥ इति ।

तस्यैतस्य वृत्तिसमूहरूपस्य प्राणमयस्याऽऽत्मन्यारोपितत्वादहं प्राणीत्येवमुच्छ्वासादिकर्तृत्वेनाहंप्रत्ययगम्यत्वाच्चाऽऽत्मत्वं द्रष्टव्यम् । आत्मत्वं नाम प्रत्यक्स्वरूपत्वम् । तत्र यथा पुत्रापेक्षया प्रतीच्यन्नमयदेह आत्मत्वेनोपदिष्टे सति परात्मनि पुत्रादौ मुख्यात्मत्वबुद्धिर्निवृत्ता । तथा देहादप्यान्तरे प्राणमयात्मन्युपदिष्टे सति देहस्य मुख्यात्मत्वं निवारितं भवति । पुत्रदेहयोर्मुख्यात्मत्वाभावसाम्येऽप्यवान्तरवैषम्याद्गौणात्मत्वं मिथ्यात्मत्वं चास्ति । तच्च भगवद्भिर्भाष्यकारैरेवमुदाहृतम्— "गौणमिथ्यात्मनोः सत्त्वे पुत्रदेहादिबाधनात्" इति । तयोरात्मत्वव्यवहारदशायां स्वस्माद्भेदप्रतीत्यप्रतीतिभ्यां वैषम्यं द्रष्टव्यम् ।

देहात्मनोर्भेदमजानद्भिर्लौकिकैर्लोकायतिकैश्चोच्यमानं देहस्याऽऽत्मत्वं मिथ्येति यदत्र प्राणमयात्मोपदेशेनार्थात्संपादितम् । तदेतत्तृतीयाध्यायस्य तृतीयपादे*निर्णीतम्—

"आत्मा देहस्तदन्यो वा चैतन्यं मदशक्तिवत् ।
भूतमेलनजं देहे नान्यत्राऽऽत्मा वपुस्ततः ॥
भूतोपलब्धिर्भूतेभ्यो विभिन्ना विषयित्वतः ।
सैवाऽऽत्मा भौतिकाद्देहादन्योऽसौ परलोकभाक् ॥

पूर्वत्र मनश्चिदादीनां कृत्वर्थता नास्ति किंतु पुरुषार्थत्वमित्युक्ते सति कोऽसौ पुरुष इति प्रसङ्गाद्विचार्यते । तदेतदधिकरणं पूर्वोत्तरयोर्मीमांसयोः शेषभूतम् । देहव्यतिरिक्तस्य स्वर्गमोक्षभागिन आत्मनः प्रतिपादकत्वात् । तत्र लोकायतिका देह-

* एक आत्मनः शरीरे भावात्—ब्र० सू० अ० ३ पा० ३ अ० ३० सू० ५३ ।

१ ख. तत्तु । २ ग. 'रमीमां' ।

एवाऽऽत्मेति मन्यन्ते। अन्वयव्यतिरेकाभ्यां चैतन्यस्य देह एवोपलम्भात्। सति च देहे चैतन्यमुपलभ्यते न त्वसति। नं च चैतन्यस्य जात्यन्तरतया देहव्यतिरिक्तात्मत्वं शङ्कनीयम्। क्रमुकनागवल्लीचूर्णानां संयोगान्मदशक्तिरिव देहाकारपरिणतेभ्यो भूतेभ्यो जायमानं चैतन्यं कथं नाम जात्यन्तरं स्यात्। तस्माच्चेतनो देह आत्मेति प्राप्ते ब्रूमः—पृथिव्यादीनां भूतानामुपलब्धिर्भूतेभ्यो व्यतिरिक्ता भवितुमर्हति विषयित्वात्। यद्यद्विषयि तत्तद्विषयाद्व्यतिरिक्तम्। यथा रूपाच्चक्षुः। तथा सति तादृशचैतन्यस्याऽऽत्मत्वं वदन्तं प्रति कथं भौतिकदेहरूपत्वमापाद्यते। सत्येव देहे चैतन्यमुपलभ्यते नासतीति यावन्वयव्यतिरेकावुक्तौ तत्र व्यतिरेकोऽसिद्धः। असत्यपि देहे परलोकगामिनश्चिदात्मनः शास्त्रेणोपलम्भात्। शास्त्रस्य च प्रामाण्यं समर्थनीयम्"।

अनात्मत्वेन निर्णीतादस्मादेहादभ्यन्तरो यः प्राणस्तस्योत्पत्तिर्द्वितीयाध्यायस्य चतुर्थपादे* चिन्तिता—

"मुख्यप्राणः स्यादनादिर्जायते वा न जायते।
आनीदिति प्राणचेष्टा प्राक्सृष्टेः श्रूयते यतः॥
आनीदिति ब्रह्मसत्त्वं प्रोक्तं वायुनिषेधनात्।
एतस्माज्जायते प्राण इत्युक्तेरेष जायते"॥ इति॥

मुखबिले संचरन्नुच्छ्वासनिश्वासकारी वायुर्मुख्यप्राणः। सोऽनादिः। कुतः। नासदासीदितिसूक्ते आनीदवातमित्यानीच्छब्देन सृष्टेरर्वाक्प्राणचेष्टाश्रवणादिति प्राप्ते ब्रूमः—आनीच्छब्दो न प्राणव्यापारं वक्त्यवातमितिनिषेधात्। किं तर्हि ब्रह्मसत्त्वं ब्रूते। सदेव सोम्येदमग्र आसीदित्यादिभिः सृष्टिप्रागवस्थाप्रतिपादकश्रुत्यन्तरैः समानार्थत्वात्। एतस्माज्जायते प्राण इति श्रुतिस्तु स्पष्टमेव प्राणजन्म प्रतिपादयति। तस्मादिन्द्रियवत्प्राणो जायते।

× तत्रैवान्याचिन्तितम्—

"वायुर्वाऽक्षक्रिया वाऽन्यो वा प्राणश्रुतितोऽनिलः।
सामान्येन्द्रियवृत्तिर्वा सांख्यैरेवमुदीरणात्॥
भाति प्राणो वायुनेति भेदोक्तेरेकताश्रुतिः।
वायुजत्वेन सामान्यवृत्तिर्नाक्षेष्वतोऽन्यता"॥ इति।

बाह्यवायुरेव वेणुरन्ध्रवन्मुखाच्छिद्रे प्रविश्यावस्थितः प्राणनाम्ना व्यपदिश्यते। न तु

---

* श्रेष्ठश्च— ब्र० सू० अ० २ पा० ४ अ० ४ सू० ८। × न वायुक्रिये पृथगुपदेशात्—ब्र० सू० अ० २ पा० ४अ० ५ सू० ९।

---

१ क. ख. ग. ङ, °ति दे°। २ ख. न चै°। ३ क. ख. म. ङ. °सका°।

प्राणो नाम किंचित्तत्त्वान्तरमस्ति । कुतः । यः प्राणः स वायुरिति **श्रुतेः** । अथवा पञ्जरस्था यथा बहवः पक्षिणः स्वयं चलन्तः पञ्जरमपि चालयन्ति एवमेकादशाक्षाणि स्वस्वव्यापारद्वारा देहं चेष्टयन्ते । तत्र देहचालनाख्यो योऽयं सर्वेन्द्रियसाधारणो व्यापारः स प्राणो भविष्यति । तथा च **सांख्यैरुक्तम्**—" सामान्या करणवृत्तिः प्राणाद्या वायवः पञ्च " इति । तस्मान्न तत्त्वान्तरं प्राण इति प्राप्ते ब्रूमः—" प्राण एव ब्रह्मणश्चतुर्थः पादः । स वायुना ज्योतिषा भाति " इति **श्रुत्यन्तरे** चतुष्पाद्ब्रह्मोपासनप्रसङ्गेनाऽऽध्यात्मिकप्राणस्याऽऽधिदैविकवायोश्चानुग्राह्यानुग्राहकरूपेण विभेदः स्पष्टमेव निर्दिष्टः । अतो यः प्राणः स वायुरित्येकत्वश्रुतिः कार्यकारणयोरभेदवृत्त्या नेतव्या । यत्तु **सांख्यैरुक्तं** तदसत् । इन्द्रियाणां सामान्यवृत्त्यसंभवात् । पक्षिणां तु सामान्यचलनान्येकविधानि पञ्जरचलनस्यानुकूलानि । न तु तथेन्द्रियाणां दर्शनश्रवणमननादिव्यापारा एकविधाः । नापि देहचलनानुकूलाः । **तस्मात्तत्त्वान्तरं प्राण इति परिशिष्यते** ।

* **तत्रैव** पुनरप्यन्यच्चिन्तितम्—

"प्राणोऽयं विभुरल्पो वा विभुः स्यात्प्लुष्युपक्रमे ।
हिरण्यगर्भपर्यन्ते सर्वदेहे समोक्तितः ॥
समासव्यासरूपेण विभुतैवाऽऽधिदैविकी ।
आध्यात्मिकोऽल्पः प्राणः स्याददृश्यश्च यथेन्द्रियम् ॥

प्लुषिर्नाम मशकादेरपि न्यूनकायः पुत्तिकाख्यो जीवस्तामारभ्य हिरण्यगर्भपर्यन्तेषु देहेषु तैस्तैर्देहैः समत्वं प्राणस्य श्रूयते— "समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण " इति । तस्माद्व्यापी प्राण इति प्राप्ते ब्रूमः— आधिदैविकस्य हिरण्यगर्भप्राणस्य समष्टिरूपेण व्यष्टिरूपेण चावस्थानाद्विभुत्वमस्तु । वायुरेव व्यष्टिर्वायुः समष्टिरिति श्रुतेः । तदेव विभुत्वं समः प्लुषिणेत्यादिश्रुतावुपासनार्थं प्रपञ्चितम् । आध्यात्मिकस्तु प्राण इन्द्रियवदृदृश्यः परिच्छिन्नश्च " ।

यस्त्वनेकजन्माभ्यस्तदेहात्मत्ववासनाप्राबल्यात्प्राणमयात्मोपदेशमात्रेणाऽऽत्मत्वबुद्धिं देहे पारियुक्तं न शक्नोति तं प्रत्युपासनानन्तरं विधातुमुपास्यस्वरूपं दर्शयति—

स वा एष पुरुषविध एव । तस्य पुरुषविधताम् ।
अन्वयं पुरुषविधः । तस्य प्राण एव शिरः ।

---

* अणुश्च— ब्र० सू० अ० २ पा० ४ अ० ६ सू० १३ ।

---

१ ब. °ण भे° । २ ग. घ तु च सा° । ३ व. °ननन्या° । ४ ब. °हचाल° । ५ ग. °रन्य° । ६ ख. घ. °सनां वि° ।

व्यानो दक्षिणः पक्षः। अपान उत्तरः पक्षः।
आकाश आत्मा। पृथिवी पुच्छं प्रतिष्ठा, इति॥

देहादभ्यन्तरत्वेन यः प्रोक्तः स एवैष प्राणमित्येवमनुभूयमानः प्राणमयः पुरुषविध एव। यद्यप्यस्य शिरआद्यवयवाः स्वतो न सन्ति तथाऽपि तान्संपाद्य पुरुषाकार एव उपासनीयः। न चात्र दुःसंपादत्वं शङ्कनीयम्। तस्य पूर्वोक्तस्यान्नमयस्य पुरुषप्रकारतामनुसृत्य तन्मध्ये पूर्णत्वेन वर्तमानोऽयं प्राणमयोऽपि पुरुषप्रकार इति वक्तुं शक्यत्वात्। यथा मूषायां निषिक्तं द्रुतताम्रं प्रतिमाकारं संपद्यते तद्वत्। तत्र हृदयादूर्ध्वं मुखनासिकयोः संचारी प्राणाख्यो वृत्तिविशेषः शिरस्त्वेन चिन्तनीयः। सर्वासु नाडीषु संचारी व्यानाख्यो यो वृत्तिविशेषो यश्चापानाख्यो वृत्तिविशेषो हृदयादधो निर्गच्छति, तावुभौ पक्षद्वयरूपेण चिन्तनीयौ। आकाशशब्देनोदरमध्यवर्ती नाभिसमीपस्थो देशविशेष उच्यते। तेन तत्रावस्थितः समानो वायुरुपलक्ष्यते। स च वायुरात्मा प्राणमयकोशस्य मध्यमभागः। पृथिवीशब्देनावशिष्ट उदानवायुरुपलक्ष्यते। मुख्यार्थस्वीकारे हि प्राणमयकोशाधिकारो बाध्येत। यथा पृथिवी प्राणिनामवस्थानहेतुत्वात्प्रतिष्ठा। तथैवोदानवायुः प्राणादिवायूनां देहेऽवस्थानहेतुः। यावदयमुदानवायुरुत्क्रान्ति न जनयति तावत्प्राणापानादीनां देहेऽवस्थानम्। अतः प्रतिष्ठा। उदानाख्यवृत्तिविशेषयुक्तस्य पञ्चविधवृत्तिकर्तुः प्राणपदार्थस्योत्क्रान्तिप्रतिष्ठयोः स्वातन्त्र्यमाथर्वणिका आमनन्ति—"स ईक्षांचक्रे कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि। कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति। स प्राणमसृजत" इति। अतः प्रतिष्ठाहेतोः प्राणपदार्थस्य वृत्तिविशेष उदानः पक्ष्याकारेण ध्येयस्य प्राणमयकोशस्य पुच्छस्थानीयः। ये शिरःपक्षादिरूपेण परिकल्पिताः प्राणापानादिवृत्तिविशेषाः। यच्च वृत्तिमत्प्राणतत्त्वं तत्सर्वं मैत्रेयोपनिषदि स्पष्टमाम्नातम्—"प्रजापतिर्वा एक एवाग्रेऽतिष्ठत्स नारमतैकः। स आत्मानमभिध्यायन्बहीः प्रजा असृजत। ता ऐक्षमेवाप्रबुद्धा अप्राणाः स्थाणुरिव तिष्ठमाना अपश्यत्स नारमत। सोऽमन्यतैतासां प्रतिबोधनायाभ्यन्तरं विविशामीति। स वायुरिवाऽऽत्मानं कृत्वाऽभ्यन्तरं प्राविशत्स एको नाशकत्स पञ्चधाऽऽत्मानं प्रविभज्योच्यते यः प्राणोऽपानः समान उदानो व्यान इति। अथ योऽयमूर्ध्वमुत्क्रामत्येष वाव स प्राणः। अथ योऽयमवाङ्संक्रामत्येष वाव सोऽपानः। अथ येन वा एता अनुगृहीता इत्येष वाव स व्यानः। अथ योऽयं स्थविष्ठमन्नधातुमपाने स्थापयन्यणिष्ठं चाङ्गेऽङ्गे समानयत्येष

१ घ. °रुषाका°। २ घ. द्रुतं ता°। ३ ख °ख्यो वृ° ४ ख. °स्मिन्नाह°। ग. °स्मिन्नह°। ५ क. ख. ङ. अस्मै वा शमुद्धृत्य प्रा°। ६ क. ख. ङ. °विश्य स ए°। ७ ग °नं वि°। ८ ग. °पानो व्यानः। ९ घ. °द्वान इ°।

वाव समानसंज्ञोत्तरं व्यानस्य रूपं चैतेषामन्तरा प्रसूतिरेवोदानस्याथ योऽयं पीतमशित-मुद्विरति निगिरति चैष वाव स उदानः" इति। पुरा प्रजापतिः स्वयमेकाकित्वेन क्रीडा-रहितस्तत्सिद्ध्यर्थं देहान्सृष्ट्वा सृष्टानां तेषां व्यवहारसिद्ध्यर्थं प्राणवायूपाधिकजीवात्मरूपे-णान्तः प्रविश्य पञ्चधा विभज्य व्यवहरतीति श्रुतेरर्थः।

पूर्वोक्तान्नमयवत्प्राणमयेऽपि श्लोकमुदाहरति—

तदप्येष श्लोको भवति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकेऽष्टमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

अथ तृतीयोऽनुवाकः।

प्राणं देवा अनुप्राणन्ति । मनुष्याः पशवश्च ये।
प्राणो हि भूतानामायुः । तस्मात्सर्वायुषमुच्यते ।
सर्वमेव त आयुर्यन्ति । ये प्राणं ब्रह्मोपासते । प्राणो
हि भूतानामायुः । तस्मात्सर्वायुषमुच्यत इति, इति।

ये सात्त्विका अग्नीन्द्रादयो देवा ये च राजसा ब्राह्मणक्षत्रियादयो मनुष्या येऽपि तामसा गवाश्वादयः पशवः [ते] सर्वेऽपि स्वस्वदेहमध्यवर्तिनं प्राणवायुं चेष्टमानमनुसृत्य स्वयमपि चेष्टन्ते। प्राण एव हि देहं चालयति। तथा कौषीतकिनः समामनन्ति— "अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति" इति। आथर्वणिकाश्चाऽऽकाशादिभूताभिमानिदेवैर्वागादीन्द्रियाभिमानिदेवैश्च सह प्राणाभिमानिदेवस्य देहधारणविषये संवादे समामनन्ति—"तान्वारिष्टः प्राण उवाच मा मोहमापद्यथाहमेवैतत्पञ्चधाऽऽत्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामि" इति। यथा बाणो धानुष्केण प्रेर्यते तथा प्राणेन प्रेर्यमाणत्वाद्बाणशब्देन शरीरमुपलक्ष्यते। यः प्राणो देवमनुष्यपश्वादिदेहानां चेष्टामुत्पादयति स प्राणो यस्मात्सर्वप्राणिनामायुर्हेतुस्तस्मात्सर्वायुषमुच्यत इति प्राणस्य नामधेयम्। यथोक्तप्राणमयकोशज्ञानमात्रेणान्नमयात्मवासनां परित्यक्तुमशक्नुवन्तो ये पुरुषास्तद्वासनानिवृत्तये प्राणोपाधिकं ब्रह्मोपासते, ते पुरुषा आध्यात्मिकप्राणोपाधिक-ब्रह्मोपासनादेतस्मिञ्जन्मन्यपमृत्युपरिहारेण सर्वमायुः प्राप्नुवन्ति। आधिदैविकहिरण्यगर्भा-ख्यप्राणोपासनेन तु जन्मान्तर स्वयमेव हिरण्यगर्भरूपाः सन्ता महाप्रलयपर्यन्तं सर्वमायुः प्राप्नुवन्ति। कोशप्रशंसार्थं पूर्वमुक्तस्य प्राणो ह्रीतिवाक्यस्योपास्तिप्रशंसार्थं पुनरप्यभि-धानम्।

---

१ क. ख. ङ. °र पान° । २ क. ख. ग. ङ. °जीवरू° ।

प्राणमयोपदेशस्य तात्पर्यं दर्शयति—

तस्यैष एव शारीर आत्मा । यः पूर्वस्य, इति ।

यः प्राणमय इदानीमुक्तः स **एष एव तस्य पूर्वस्यान्नमयस्य शरीरे** भवः **शारीर आत्मा** । यदा प्राणमयस्याऽऽत्मत्वं दृढवासितं भवति तदानीमन्नमये स्वात्मत्वभ्रमोऽपगच्छति । किंत्वमन्नमयः शरीरं प्राणमयस्तु शरीरी स्वात्मेति निश्चयो जायते । द्वयोरात्मनोरसंभवादित्यर्थः ।

अथान्नमयकोशान्निवृत्तस्याधिकारिणः प्राणमयकोशाभ्यन्तःप्रवेशाय मनोमयकोशमुपदिशति—

तस्माद्वा एतस्मात्प्राणमयात् । अन्योऽन्तर
आत्मा मनोमयः । तेनैष पूर्णः, इति ।

ब्रह्मण्याश्रिता जगदुपादानरूपा माया त्रिगुणात्मिका । तत्र तमोगुणभागस्यान्नमयकारणत्वात्तस्मिन्कोशे जाड्यमेव बहुलमुपलभ्यते । न तु क्रियाशक्तिर्ज्ञानशक्तिर्वा तस्मिन्नास्ति । रजोगुणभागस्य प्राणमयकारणत्वात्तस्मिन्प्राणमये क्रियाशक्तिरुपलभ्यते । सत्त्वगुणभागस्य मनोमयादिकोशत्रयकारणत्वात्तेषु त्रिषु कोशेषु ज्ञानशक्तिरुपलभ्यते । तमोमिश्रः सत्त्वगुणो मनोमयकारणम् । अतो मनोमये तामसभागधर्मा रागद्वेषादय उपलभ्यन्ते । रजोमिश्रः सत्त्वगुणो विज्ञानमयकारणम् । अतो विज्ञानमये यज्ञादीनां वैदिककर्मणां कृष्यादीनां लौकिककर्मणां च कर्तृत्वमुपलभ्यते । शुद्धसत्त्वगुणः आनन्दमयकारणम् । अतस्तत्र प्रियादिशब्दवाच्याः सुखविशेषा एवोपलभ्यन्ते । यद्यपि स्वरूपेणैकैव ज्ञानशक्तिस्तथाऽपि तदवान्तरभेदात्त्रिविधा करणशक्तिः कर्तृशक्तिर्भोगशक्तिश्चेति । तत्र करणशक्तिजन्यं मनस्तस्य विकारः कामसंकल्पादिवृत्तिसमूहो मनोमयः । वृत्तयश्च **वाजसनेयिभिराम्नायन्ते**—"कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीरित्येतत्सर्वं मन एव" इति । तथा तृष्णा स्नेहो रागो लोभ इत्यादिश्रुत्यन्तराण्युदाहार्याणि । सोऽयं **मनोमयः** प्राणमयादभ्यन्तरः । अत एव प्रत्यासन्नत्वान्मनस्यात्मचैतन्यं सर्वान्तरमभिव्यज्यते । तदभिव्यक्तिवशादेव मनोमयस्याऽऽत्मत्वम् । **तेनाभ्यन्तरेण मनोमयेन बाह्यः प्राणमयः पूर्णो** वर्तते । यथा क्रियाशक्तेरापादमस्तकं व्याप्तिस्तथा ज्ञानशक्तेरपि व्याप्तिरुपलभ्यते । अत्रान्तःकरणेन मनसा बाह्यिष्करणानि वाक्चक्षुरादीनि दशाप्युपलक्ष्यन्ते । अतः सर्वेषां ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च मनोमयाख्ये कोशेऽन्तर्भावो द्रष्टव्यः ।

---

१ घ. दृढं वा° । २ ख. °त्मभ्र° । ३ ख. °नभूता मा° । ४ घ. °भोक्तृश° । ५ ख. °यादाभ्य° । ६ ग. सर्वोत्तर° । ७ घ. °नि चक्षु° ।

तेषामिन्द्रियाणामुत्पत्तिर्द्वितीयाध्यायस्य चतुर्थपादे*चिन्तिता—

" किमिन्द्रियाण्यनादीनि सृज्यन्ते वा परात्मना ।
सृष्टेः प्रागृषिनाम्नैषां सद्भावोक्तेरनादिता ॥
एकबुद्ध्या सर्वबुद्धेर्भौतिकत्वाज्जनिश्रवात् ।
उत्पद्यन्तेऽथ सद्भावः प्रागवान्तरसृष्टितः ॥

" ऋष्यो वाव तदग्रे सदासीत्केत ऋषय इति प्राणा वा ऋषयः " इति श्रुत्या सृष्टेः पूर्वमिन्द्रियाणां सद्भावावगमादनादित्वं तेषामिति प्राप्ते ब्रूमः—एकविज्ञानेन सर्वविज्ञानं तावदिन्द्रियाणामनुत्पत्तौ न घटते । तथा " अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक् " इति भूतकार्यत्वमिन्द्रियाणां श्रूयते । " एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च " इति स्पष्टमेवेन्द्रियाणां जन्मश्रवणम् । यत्तु सृष्टेः प्राक्सद्भाववाक्यं तदवान्तरसृष्टिविषयं व्याख्येयम् । तस्मादिन्द्रियाणि परमात्मन उत्पद्यन्ते " ।

+तत्रैवान्यच्चिन्तितम्—

" सप्तैकादश वाऽक्षाणि सप्त प्राणा इति श्रुतेः ।
सप्त स्युर्मूर्धविष्ठेषु च्छिद्रेषु च विशेषणात् ॥
अशीर्षण्यस्य हस्तादेरपि वेदे समीरणात् ।
ज्ञेयान्येकादशाक्षाणि तत्तत्कार्यानुरोधतः ॥

सप्तेन्द्रियाणि । कुतः । सप्त प्राणाः प्रभवन्ति तस्मादिति सामान्यश्रुतेः । सप्त वै शीर्षण्याः प्राणा इति शिरोगतसप्तच्छिद्रनिष्ठत्वेन विशेषितत्वाच्चेति प्राप्ते ब्रूमः—शिरोनिष्ठेभ्य इतराणि हस्तादीन्यपि वेदे समीर्यन्ते " हस्तौ चाऽऽदातव्यं चोपस्थश्चाऽऽनन्दयितव्यं च " इत्यादिना । तथा च वेदमुखादेव निश्चये सत्येकादशव्यापाराणां दर्शनश्रवणाघ्राणास्वादनस्पर्शनाभिवदनादानगमनानन्दविसर्गध्यानानामुपलम्भात्तत्साधनत्वेनेन्द्रियाण्येकादशेत्युपगन्तव्यम् " ।

÷पुनरप्यन्यच्चिन्तितम्—

" व्यापीन्यणूनि वाऽक्षाणि सांख्या व्यापित्वमूचिरे ।
वृत्तिलाभस्तत्र तत्र देहे कर्मवशाद्भवेत् ॥
देहस्थवृत्तिमत्त्वेनाक्षत्वं प्रकाश्यते ।
उत्क्रान्त्यादिश्रुतेस्तानि ह्यणूनि स्युरदर्शनात् ॥

---

* तथा प्राणाः—ब्र० सू० अ० २ पा० ४ अ० १ सू० १ । + सप्त गतेर्विशेषितत्वाच्च—ब्र० सू०अ०२ पा० ४ अ० २ सू० ५ । ÷ अणव—ब्र० सू०अ० २ पा० ४ अ० ३ सू० ७ ।

---

१ ग. °न्ते च स° । २ घ. °न्न शी° । ३ घ. देशे ।

सर्वगतानामिन्द्रियाणां तत्तच्छरीरावच्छिन्नप्रदेशेषु तत्तज्जीवकर्मफलभोगाय वृत्तिलाभो भवतीति यत्सांख्यैरुक्तं तदयुक्तम्। कल्पनागौरवप्रसङ्गात्। देहावच्छिन्नवृत्तिमद्भागैरेवाशेषव्यवहारसिद्धौ किमनया वृत्तिरहितानां सर्वगतानामिन्द्रियाणां कल्पनया। किंच श्रुतिरुत्क्रान्तिगत्यागतीर्जीवस्य प्रतिपादयति। ताश्च सर्वगतस्य जीवस्य न मुख्याः संभवन्तीति मुख्यत्वसिद्ध्यर्थमिन्द्रियोपाधिः स्वीकृतः। यदि सोऽप्युपाधिः सर्वगतः स्यात्कुत्र तर्ह्युत्क्रान्त्यादयो मुख्याः संभवेयुः। तस्मादसर्वगतान्यक्षाणि। मध्यमपरिमाणेष्वदृश्यत्वविवक्षया **सूत्रकारेणाणुशब्दः** प्रयुक्तः"।

* पुनरप्यन्यच्चिन्तितम्—

"स्वतन्त्रा देवतन्त्रा वा वागाद्याः स्यात्स्वतन्त्रता।
नोचेद्वागादिजो भोगो देवानां स्यान्न चाऽऽत्मनः॥
श्रुतमग्न्यादितन्त्रत्वं भोगोऽग्न्यादेस्तु नोचितः।
देवदेहेषु सिद्धत्वाज्जीवो भुङ्क्ते स्वकर्मणा॥

वागादीन्यक्षाणि स्वस्वविषये स्वातन्त्र्येण प्रवर्तन्ते न तु देवतापरतन्त्राणि। अन्यथा वागादिजन्यस्य भोगस्य देवानां भोक्तृत्वान्न जीवात्मनो भोगः स्यादिति प्राप्ते ब्रूमः—अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादौ वागादीनामग्न्याद्यनुगृहीतत्वं श्रूयते। अतो देवपरतन्त्रैवेन्द्रियप्रवृत्तिः। न चैतावता देवानामत्र भोक्तृत्वम्। महापुण्यफलं देवत्वं प्राप्तानामधमभोगस्यानुचितत्वाद्देवतादेहेषु परमभोगस्य सिद्धत्वाच्च। मनुष्यादिजीवस्तु देवप्रेरितैरक्षैरापादितं भोगं स्वकर्मफलतया भुङ्क्त इत्युपपद्यते। तस्माद्देवतापरतन्त्राणीन्द्रियाणि"।

\+ पुनरप्यन्यच्चिन्तितम्—

"प्राणस्य वृत्तयोऽक्षाणि प्राणात्तत्त्वान्तराणि वा।
तद्रूपत्वश्रुतेः प्राणनाम्नोक्तत्वाच्च वृत्तयः॥
श्रमाश्रमादिभेदोक्तेर्गौणे तद्रूपनामनी।
आलोचकत्वेनान्यानि प्राणो नेताऽक्षदेहयोः"॥ इति।

इह वागादीन्यक्षाणि मुख्यप्राणवृत्तयो भवितुमर्हन्ति। कुतः। तेषां प्राणरूपत्वश्रवणात्। "त एतस्यैव सर्वे रूपमभवन्" इति श्रुतेः। किंच प्राणशब्देनैव तानि लोके व्यवह्रियन्ते म्रियमाणस्य प्राणा नाद्यापि निर्गच्छन्तीत्यादौ। श्रुतिश्च वागादीनां प्राणनाम्नैकतामाह—"न वै वाचो न चक्षूंषि न श्रोत्राणि न मनांसीत्याचक्षते प्राणा

---

*ज्योतिराद्यधिष्ठानं तु तदामननात्—ब्र० सू० अ० २ पा० ४ अ० ७ सू० १४। + त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्—ब्र० सू० अ० २ पा० ४ अ० ८ सू० १७।

---

१ थ °ण्याः स्युः। त°।

इत्येवाऽऽचक्षते " इति । तस्मान्न प्राणादन्यानि तत्त्वानीति प्राप्ते ब्रूमः—" तानि मृत्युः श्रमो भूत्वोपयेमे तस्माच्छ्राम्यत्येव वाक् " इत्यादिना वागादीनां स्वस्वविषयेषु श्रान्त्यादिमभिधाय " अथेममेव नाऽऽप्नोद्योऽयं मध्यमः प्राणो यः संचरंश्चासंचरंश्च न व्यथते " इति प्राणस्य स्वव्यापारे श्रान्त्यभावमाह । अयमेको भेदः । तथा प्राणसंवादे वागादिनिर्गमनप्रवेशयोर्देहस्य मरणोत्थानाभावमभिधाय प्राणनिर्गमनप्रवेशयोर्मरणोत्थाने दर्शयति । अत एवमादिभेदोक्तेर्वागादीनां प्राणरूपत्वं प्राणनामत्वं च गौणम् । स्वामिभृत्यन्यायेन च प्राणानुवर्तित्वात् । व्यवहारभेदश्च भूयानुपलभ्यते । स्वस्वविषयं परिच्छिद्याऽऽलोचकानीन्द्रियाणि । प्राणस्त्वक्षाणां देहस्य च नेता । तस्माद्बहुश्रमादिवैलक्षण्यात्प्राणात्तत्त्वान्तर[1]ं ।

एतेषामेकादशेन्द्रियाणां मध्ये मनसो मुख्यत्वात्तन्नाम्ना मनोमयकोश इत्युच्यते । प्राधान्यं च मनसो वागादीन्द्रियैः स्वस्वव्यवहारेषूपजीव्यत्वादुपपद्यते । वागादयस्तु विवक्षादिदृक्षाशुश्रूषादिरूपां प्रज्ञाशब्दाभिधेयां मनोवृत्तिं पुरस्कृत्यैव व्यवहरन्ति । एतच्चान्वयव्यतिरेकाभ्यां प्रपञ्चय **कौषीतकिनः** समामनन्ति—" प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि रूपाण्याप्नोति[2] " इत्यादिरन्वयः । " नहि प्रज्ञापेता वाङ्नाम किंचन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतन्नाम प्राज्ञासिषमिति । नहि प्रज्ञापेतं चक्षू रूपं किंचन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतद्रूपं प्राज्ञासिषम् " इत्यादिव्यतिरेकः ।

एतस्मिन्सर्वेन्द्रियसमष्टिरूपे मनोमयकोशे स्वात्मत्वमुपादिश्य तदेव दृढं दृढं वासयितुमुपासनाविधिमभिप्रेत्योपास्यस्वरूपं दर्शयति—

स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य यजुरेव शिरः । ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः । आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा, इति ।

स वा इत्यादिना । यो मनोमयः प्राणमयादभ्यन्तर आत्मत्वेनोपदिष्टः **स** एवैष संकल्पयाम्यहमित्यनुभूयमान उपासनार्थं पञ्चावयवोपेतः पुरुषाकार **एव** भवति । पूर्ववन्मूषानिषिक्तद्रुतताम्रन्यायेन प्राणमयमनुसृत्य **पुरुषविधत्वम्** । यजुरादयस्त्रयो वेदत्रयगता मन्त्राः । आदिश्यते विधीयतेऽनेनेत्यादेशो विधायकं ब्राह्मणवाक्यम्।अथर्वाख्येना(णा)ङ्गिरोनामकेन च महर्षिणा दृष्टाश्चतुर्थवेदगता मन्त्रा **अथर्वाङ्गिरसः** । तेषां चैहिकाविष्टप्राप्त्यनिष्टपरिहारौ प्रति साधनत्वेन **प्रतिष्ठात्वम्** । यद्यपि शब्दात्मका यजुरादयो न मनोरूपास्तथाऽपि तदालोचका[3] मनोवृत्तिविशेषा यजुरादिशब्दैरुपलक्ष्यन्ते ।

---

१ ख. °णि । ते° । २ घ. °ति " इत्यन्व° । ३ घ. °चकम° ।

पूर्ववदस्मिन्मनोमयेऽपि श्लोकमुदाहरति—

तदप्येष श्लोको भवति।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकेऽष्टमप्रपाठके
तृतीयोऽनुवाकः ॥ ३ ॥

अथ चतुर्थोऽनुवाकः।

यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं
ब्रह्मणो विद्वान्। न बिभेति कदाचनेति, इति।

वाचकाः शब्दा ज्ञापकेन मनसा सह ब्रह्मणः स्वरूपभूतमानन्दमप्राप्य यस्माद्ब्रह्मानन्दान्निवर्तन्ते तद्ब्रह्मानन्दं विद्वान्मनोमयोपाधिविशिष्टमुपासीनः कदाचिदपि न बिभेति। जातिगुणाद्यभावान्न ब्रह्मणि वाचकशब्दप्रवृत्तिः।

एतच्च नैष्कर्म्यसिद्धावुक्तम्—

" षष्ठीगुणक्रियाजातिरूढयः शब्दहेतवः।
नाऽऽत्मन्यन्यतमोऽमीषां तेनाऽऽत्मा नाभिधीयते "॥ इति।

मनोऽपि वस्तूनि संकल्पयत्तदानीमीदृगिति वा तादृगिति वा संकल्पयति। न चैतदुभयं ब्रह्मणि संभवति। तस्मान्मनो ब्रह्मणो निवर्तते।

तदेतत्पञ्चकोशविवेकेऽभिहितम्—

" कीदृक्तदिति चेत्पृच्छेरीदृक्ता नास्ति तत्र हि।
यदनीदृगतादृक्च तत्स्वरूपं विनिश्चिनु ॥
अक्षाणां विषयस्त्वीदृक्परोक्षस्तादृगुच्यते।
विषयी नाक्षविषयः स्वत्वान्नास्य परोक्षता " ॥ इति।

पूर्वत्र यथाऽन्नमयोपाधिविशिष्टस्य प्राणमयोपाधिविशिष्टस्य च ब्रह्मण उपासनमुक्तम्, एवमत्रापि मनोमयोपाधिविशिष्टस्योपासनं विवक्षितम्। अन्यथा यजुरादिषु शिरःपक्षादिकल्पनावैयर्थ्यं प्रसज्येत। विद्वानित्यत्र विदिधातुरुपासनवाची। [illegible] ययोरुपास्तिप्रकरणे पर्यायत्वदर्शनात्। एतच्चाऽऽवृत्त्यधिकरणे भाष्यकारैरुदाहृतम्—क्वचिद्विदिनोपक्रम्योपासिनोपसंहरति " यस्तद्वेद यत्स वेद" इत्यत्र " अनु म एतां भगवो देवतां शाधि यां देवतामुपास्से " इति। क्वचिच्चोपासिनोपक्रम्य विदिनोपसंहरति। यथा—" मनो ब्रह्मेत्युपासीत " इत्यत्र " भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद', इति। तस्माद्वेदनमत्रोपासनम्। तेन चोपासनेनेहामुत्र च भीतिर्न भवति। निरन्तरमुपासीनस्य

---

१ ग. श्लोको भवति। २ घ. °न्ते तं ब्रह्मा°। ३ घ. नास्मिन्नन्यत°। ४ क. ख. घ. ङ. °च्छेदीद°। ५ क. ग. ङ. °पास्त इ°।

रागद्वेषाद्यवसराभावादैहिकभीत्यभावः क्रममुक्तिसद्भावाच्चाऽऽमुष्मिकभीत्यभावः । उभयमपि विवक्षित्वा कदाचनेत्युक्तम् ।

मनोमयोपदेशेऽस्य तात्पर्यं दर्शयति—

तस्यैष एव शारीर आत्मा । यः पूर्वस्य, इति ।

प्राणमयः शरीरं तत्स्वामी मनोमय आत्मेति दृढनिश्चयो जायत इत्यर्थः । **बृहदारण्यके बालाक्यजातशत्रुसंवादे** प्राणात्मवादिनं **बालाकिं** प्रति प्राणस्यानात्मत्वं बोधयितुमजातशत्रुर्बालाकिना सह कस्यचित्पुरुषस्य सुप्तस्य समीपे गत्वा शास्त्रप्रसिद्धैः प्राणनामभिश्चतुर्भिस्तं पुरुषमामन्त्र्य तावता तस्मिन्नुत्थिते सति जडत्वेन प्राणस्यानात्मत्वं निश्चित्य प्राणादन्यं चेतनमात्मानं दर्शयितुं पाणिना तं पुरुषं पुनः पुनरापिष्य बोधयांचकार । ततश्चेतन आत्मोत्तस्थौ । तथा च **श्रूयते**—"तौ ह सुप्तं पुरुषमाजग्मतुस्तमेतैर्नाममिरामन्त्रयांचक्रे । बृहत्पाण्डरवासः सोम राजन्निति । स नोत्तस्थौ । तं [illegible] पेषं बोधयांचकार । स होत्तस्थौ" इति ।

अथ प्राणमयान्निवृत्तस्य मनोमयकोशादप्यन्तःप्रवेशाय विज्ञानमयकोशमुपदिशति—

तस्माद्वा एतस्मान्मनोमयात् । अन्योऽन्तर
आत्मा विज्ञानमयः । तेनैष पूर्णः, इति ।

कामसंकल्पादिवृत्तिसमूहरूपो यो मनोमयः प्रत्यगात्मोपाधित्वादात्मत्वेनोपदिष्टः । **तस्मादेवैतस्मादहं** कामयेऽहं संकल्पयामीत्येवमनुभूयमानादभ्यन्तरो **विज्ञानमयाख्योऽन्य आत्माऽस्ति** । **तेन** विज्ञानमयेनान्तरवस्थितेन बहिःस्थितो मनोमयः **पूर्णो** वर्तते । सत्त्वगुणकार्यायां ज्ञानशक्तौ तमोमिश्रभागो यथा रागद्वेषादितामसधर्मोपेतं मनो भवति तथा रजोमिश्रो भागो राजसेन कर्तृत्वेन धर्मेणोपेतं विज्ञानं भवति । मनोवृत्तीनां मध्ये विशिष्टमहं कर्तेत्येवंरूपं वृत्तिज्ञानं यस्य कर्तृत्वधर्मोपेतस्य वस्तुनो ग्राहकं भवति तद्वस्तु विज्ञानं तस्य विकारो विज्ञानमयः । रजोमिश्रसत्त्वगुणकार्यं हि विज्ञानमहंप्रत्ययविषयाभिमन्तृरूपेण विक्रियते । तमेतमभिमन्तारं सर्वे जना अहंप्रत्ययेन विषयं कुर्वन्ति । द्विविधो मनसः प्रत्यय इदंप्रत्ययोऽहंप्रत्ययश्चेति । तत्रेदंप्रत्ययो बहिर्मुखतया प्रमातुरन्यपदार्थं प्रमेयं विषयी करोति । अहंप्रत्ययस्त्वन्तर्मुखः प्रमातारमेव विषयी करोति । नैं चात्र प्रमातृप्रमेयसांकर्यदोषः शङ्कनीयः । दृष्टत्वेन तस्य दोषत्वाभावात् । नहि दृष्टेऽनुपपन्नं नामेतिन्यायात् । योऽयमहंप्रत्ययविषयोऽ-

---

१ ग °त्याण्डुर° । २ क. घ. ङ. °नोऽहि° । ३ क. ख. घ. ङ. °र्तृत्वध° । ४ ग. धर्मोपे° । ५ ङ. न त्वत्र ।

भिमन्ता सर्वेषु प्रमाणव्यवहारेषु प्रमाता सोऽयमत्र विज्ञानमयः। एतमेवोद्दिश्याऽऽथर्वणिकाः—"चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं च" इत्यादिना प्रमाणप्रमेयजातं सर्वमनुक्रम्य सर्वव्यवहारकर्तारं पृथगेव विस्पष्टमामनन्ति—"एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः" इति। कौषीतकिनश्च—"प्रज्ञया वाचं समारुह्य" इत्यादिना विषयेन्द्रियव्यवहारस्य सर्वस्यान्वयव्यतिरेकाभ्यां मनोधीनत्वमाम्नायाशेषव्यवहारकर्तारं पृथगामनन्ति—"न वाचं विजिज्ञासीत वक्तारं विद्यात्" इत्यादिना। नन्वात्मैव व्यवहारस्य कर्ता भवति। नैत्वसौ विज्ञानमयाख्यश्चतुर्थः कोशः। अत एव भगवान्बादरायणो द्वितीयाध्यायस्य तृतीयपादे जीवात्मविचारे—"कर्ता शास्त्रार्थवत्त्वात्" [ब्र० सू० अ० २ पा० ३ सू० ३३] इति सूत्रयामास। नायं दोषः। आत्मकर्तृत्वस्यौपाधिकत्वात्। एतच्च "यथा च तक्षोभयथा" [ब्र० सू० अ० २ पा० ३ सू० ४०] इत्येवं सूत्रितम्। लोके तक्षा यथा बाह्यसाधनैर्वास्यादिभिर्युक्तः प्रासादस्य कर्ता भवति। साधनहीनस्तु नैव कर्ता। तथाऽयमात्माऽपि स्वरूपतोऽसङ्ग एव सन्वागादिकरणसहितः कर्तेति सूत्रार्थः। तर्हि पूर्वोक्तबाह्येन्द्रियान्तःकरणसमूहरूपमनोमयस्य संयोगेनैवाऽऽत्मनः कर्तृत्वसिद्धौ किमनेन विज्ञानमयेनेति चेन्मैवम्। अनेन न्यायेन तक्षण्यपि वैयर्थ्यस्याऽऽपादयितुं शक्यत्वात्। वास्यादिसाधनसंयुक्तस्य ब्राह्मणादेरेव प्रासादकर्तृत्वे सति व्यर्थस्तक्षा स्यात्। यदि ब्राह्मणादौ प्रासादगोचरज्ञानक्रियाशक्त्योरभावात्तक्षाऽपेक्ष्येत तर्ह्यत्रापि सर्वव्यवहारगोचरज्ञानक्रियाशक्तियुक्तो विज्ञानमयोऽपेक्ष्यते। न चासङ्गस्याऽऽत्मन आरोपमन्तरेण शक्तिद्वयं संभवति। आरोपश्च क्वचिन्मुख्यस्यैवाऽऽधारान्तरे दृश्यते। बिलगते हि सर्पे मुख्यं सर्पत्वं रज्ज्वावारोप्यमाणं दृष्टम्। तस्मादत्रापि विज्ञानमये मुख्यं शक्तिद्वयं चिदात्मन्यारोप्यताम्। एतदेवाभिप्रेत्य वाजसनेयिनः समामनन्ति—"योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीव" इति। अत्र योऽयं चैतन्यज्योतिःस्वरूपः पुरुषो विज्ञानमयोपाधिकः स पुरुषस्तेनोपाधिना समानः परिच्छिन्नः सन्नुपाधिं संचरन्तमनु स्वयमपि लोकावुभौ संचरति। स्वयमसंचरन्नेवोपाधिसंचारेण च संचारवानिवोपलभ्यते। यथा घटे देशान्तरं प्रति नीयमाने घटावच्छिन्नस्याऽऽकाशस्यान्यदेशे नयनं न स्वतस्तद्वत्। सोऽयमर्थः श्रुताविवशब्देन स्पष्टी क्रियते। उपाधौ ध्यायति सति चिदात्मा स्वयमपि ध्यायन्निवोपलभ्यते। तथोपाधौ लेलायमाने स्वयमपि चलन्निवोपलभ्यते। एतमेवोपाधिप्रयुक्तमुत्क्रान्तिगमनागमनादिसंसारं भगवान्सूत्रयामास—"तद्गुणसारत्वात्तु तद्व्यपदेशः" [ब्र० सू० अ० २ पा० ३ सू० २९] इति।

---

१ ग. °दि। न°। २ ग. घ. °र्ता। न°। ३ ख. न वि°। ४ व. मुख्ये। ५ ग. °नादि°।

एवं च सति कर्तृत्वमपि विज्ञानमयोपाधौ वर्तमानमात्मन्यारोप्यत इत्यभ्युपगन्तव्यम्। सोऽयं कर्तृत्वशक्तियुक्तो **विज्ञानमयः** करणत्वशक्तियुक्तान्मनोमयादभ्यन्तरः। ननु मनसा सहितान्येकादशेन्द्रियतत्त्वानि पञ्चवृत्त्युपेतं प्राणतत्त्वं चेत्येतावदेव लिङ्गशरीरं **मीमांसाशास्त्रे** विचारितम्। न तु विज्ञानाख्यं किंचित्तत्त्वमिति चेत्**प्राणपादे** तद्विचाराभावेऽपि ततः **पूर्वस्मिन्पादे** जीवात्मनि संसारधर्मापादकत्वेन तद्गुणसारत्वादित्यादिना विचारितत्वात्। अङ्गीकृतेऽपि विज्ञानाख्ये बुद्धितत्त्वे लिङ्गशरीरस्य सप्तदशसंख्या पूर्यते। सा च संख्या **भगवद्भिरुदाहृता**—" अपञ्चीकृतपञ्चमहाभूतानि तत्कार्यं च सप्तदशकं लिङ्गम् " इति।

तस्याश्च संख्यायाः संख्येयानि तत्त्वानि **विश्वरूपाचार्यैर्दर्शितानि**—

" ज्ञानेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाण्यपि।
वायवः पञ्च बुद्धिश्च मनः सप्तदशं विदुः " ॥ इति।

नन्वेकस्यैवान्तःकरणतत्त्वस्य मनोबुद्ध्यहंकारचित्ताख्याश्चत्वारो वृत्तिभेदाः। संशयात्मकं मनः। निश्चयात्मिका बुद्धिः। अभिमानात्मकोऽहंकारः। चेतनात्मकं चित्तमिति वृत्तीनां लक्षणानि। एताश्चतस्रो वृत्तयस्तद्विषयाश्चाऽऽथर्वणिकैरनुक्रान्ताः—"मनश्च मन्तव्यं च बुद्धिश्च बोद्धव्यं चाहंकारश्चाहंकर्तव्यं च चित्तं च चेतयितव्यं च " इति। एते च वृत्तिविशेषाः क्षणिकाः कालभेदेनैवोत्पद्यन्ते "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" इति **न्यायात्**। तथा सति वृत्तिमात्रस्वरूपयोर्मनोमयविज्ञानमययोरन्नमयप्राणमयवत्पृथक्त्वरूपत्वाभावाद्भिन्नकालीनत्वाच्चान्तर्बहिर्भावो न युक्त इति चेत्। न। करणरूपेण कर्तृरूपेण च तयोस्तत्त्वभेदाङ्गीकारात्। पूर्वोक्ता मनोबुद्ध्यादयश्चत्वारोऽपि करणस्यैव व्यापारविशेषाः। कर्तृरूपं तु करणात्पृथगेव तत्त्वम्। तच्च बुद्धिशब्देन विज्ञानशब्देनाहंशब्देन च तत्र तत्र व्यवह्रियते। तत्र **कठाः** कर्तरि बुद्धिशब्दमेवमामनन्ति—"आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च। इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् " इति। चिदात्मा रथस्वामी। अचिद्रूपा दर्पणसदृशी चैतन्यप्रतिबिम्बस्य कर्तृत्वधर्मस्य वाऽऽधारभूता बुद्धिः सारथिः। सा हि चिच्छायोपेतत्वेन चेतना कर्तृत्वेन च सारथिवत्स्वतन्त्रा सती प्रग्रहसदृशेन मनोरूपेण करणेन हयसदृशानीन्द्रियाणि नियमयन्ती रथसदृशं शरीरं व्यापारयति। अतोऽत्र बुद्धिमनसोस्तत्त्वभेदः। बुद्धिस्थायित्वमेककालवर्तित्वं चावगम्यते। विज्ञानशब्दोऽपि **तत्रैवाऽऽम्नायते**—" विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः। सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् " इति। बुद्धेरान्तरत्वाविवक्षयोत्कर्षस्तत्रैवाऽऽम्नातः—"इन्द्रि-

---

१ ग. °ते हि वि°। २ ग. °र्वोक्तम°। ३ ग. घ. बुद्धेः स्था°। ४ ख. °त्रैव वर्णितः।

येभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिः " इति । तथा प्रत्यगात्मदर्शनार्थं निरोधसमाधिरूपं योगं ब्रुवती श्रुतिर्विज्ञानस्याभ्यन्तरत्वं दर्शयति—" यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि " इति । प्रथमतो वागादीनि बाह्यानीन्द्रियाण्यभ्यन्तरे मनसि नियम्य तदपि मनस्ततोऽप्यान्तरे ज्ञानात्मनि नियच्छेत् । ज्ञानात्मशब्देनात्र विज्ञानमयोऽभिधीयते । न तु चिदात्मा । तस्योत्तरत्र तद्यच्छेच्छान्त आत्मनीति वक्ष्यमाणत्वात् । परब्रह्मरूपस्य प्रत्यगात्मनः संसारार्थं विज्ञानं प्रथममुपाधिस्ततो[1] मनस्ततोऽपि बहिः प्राणः । सोऽयं क्रमः संसारवर्णनप्रस्तावे **वाजसनेयि**भिराम्नायते—" स वा अयमात्मा विज्ञानमयो मनोमयः प्राणमयः " इति । सोऽयं बुद्धिविज्ञानशब्दाभ्यामभिधीयमानः पदार्थः सर्वैरप्यहंशब्देन व्यवहियते । **भाष्यकारा**श्चाध्याससमुदाहरन्तः पुत्रभार्यादिकं देहेन्द्रियमनांसि चोदाहृत्य तद्दृष्टान्तेन विज्ञानमयस्याध्याससमुदाजहृरुः—" एवमहंप्रत्ययिनमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य " इति । **समन्वयसूत्रभाष्ये**ऽप्येवमाहुः—" तेनैवाहंकर्त्राऽहंप्रत्ययिना सर्वाः क्रिया निष्पाद्यन्ते तत्फलं च स एवाश्नाति 'तयोरन्यः पिप्पलं स्वाद्वत्ति' इति श्रुतेः" इति । अयमेव कर्ता भोक्ता **नैयायिकादि**मतसिद्धो जीवात्मा । **सांख्याश्चै**वमाहुः—अन्तःकरणं त्रिविधमिति । तत्रेन्द्रियाणामेकादशसंख्यापूरकं मनोनामकमेकम् । अहंकारतत्त्वं द्वितीयम् । महत्तत्त्वं तृतीयम् । तेष्वहंकारमेवं लक्षयन्ति । अभिमानोऽहंकार इति । स एष चितिच्छायोपेतोऽहंकारोऽत्र[2] **विज्ञानमयः** । तेन विज्ञानमयेन मनोमयस्य पूर्णत्वात्तादृशमनोमयव्याप्तप्राणमयेन पूर्णेऽन्नमयेऽप्यापादमस्तकमहं मनुष्य इत्यभिमान उपलभ्यते ।

अथ विज्ञानमये स्वात्मत्वबुद्धिदार्ढ्यार्थमुपासनं विधित्सुरुपास्यस्वरूपं निरूपयति—

स वा एष पुरुषविध एव । तस्य पुरुषविधताम् ।
अन्वयं पुरुषविधः । तस्य श्रद्धैव शिरः । ऋतं
दक्षिणः पक्षः । सत्यमुत्तरः पक्षः । योग
आत्मा । महः पुच्छं प्रतिष्ठा , इति ।

यः पूर्वोक्तप्रकारेण श्रुतिषु नैयायिकादिमतेषु लोकव्यवहारे च प्रसिद्धः कर्ता **स एवैषोऽस्माभिरहं कर्तेत्यनुभूयमानो** विज्ञानमयः । शिरःपक्षादिकल्पनयोपासितं मनोमयमनु स्वयमपि ताम्रप्रतिमान्यायेन शिरःपक्षादिकल्पनया पुरुषाकार एव भवति । यद्यपि श्रद्धादयो वृत्तिरूपत्वान्मनोमयस्य कार्याः, तथाऽपि विज्ञानमयस्य कर्तृत्वेन करणतद्वृत्तिस्वामित्वान्मनोवृत्तय एतदीया अपि भवन्तीत्यभिप्रेत्य विज्ञानमयस्य

---

१ ग. घ. °तोऽपि बहिर्मन° । २ घ. चिच्छा° ।

श्रद्धा शिर इत्युच्यते । गुरुशास्त्राभ्यामभिहिते तत्त्वे तदवबोधोपाययोश्च परमो विश्वासः **श्रद्धा** । ऋतसत्यशब्दाभ्यामप्यत्र तत्तत्कर्तृत्वाभिमानरूपं वृत्तिद्वयं विवक्षितम् । **योगः** संप्रज्ञातासंप्रज्ञातसमाधिद्वयम् । " योगश्चित्तवृत्तिनिरोधः " इति **योगशास्त्रे** सूत्रितत्वात् । **महः**शब्देन महतः परमितिश्रुत्यन्तरोक्तमव्याकृतस्य प्रथमकार्यरूपं हिरण्यगर्भाख्यं महत्तत्त्वं विवक्षितम् । तच्च सर्वेषामहंप्रत्ययगम्यानां कर्त्रात्मनां समष्टिरूपत्वेन **प्रतिष्ठा** । एतदेवाभिप्रेत्योत्तरतापनीये समाम्नायते—" सर्वाहंमानी हिरण्यगर्भः " इति ।

अस्मिन्विज्ञानमयेऽपि पूर्ववच्छ्लोकमुदाहरति—

तदप्येष श्लोको भवति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकेऽष्टमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

अथ पञ्चमोऽनुवाकः ।

विज्ञानं यज्ञं तनुते । कर्माणि तनुतेऽपि च ।
विज्ञानं देवाः सर्वे । ब्रह्म ज्येष्ठमुपासते । विज्ञानं
ब्रह्म चेद्वेद । तस्माच्चेन्न प्रमाद्यति । *शरीरे पाप्मनो
हित्वा । सर्वान्कामान्त्समश्नुत इति, इति ।

यदेतत्कर्तृत्वशक्तियुक्तं **विज्ञानं** तदेव ज्योतिष्टोमादीन्यज्ञाननुतिष्ठति । एतदीयमनुष्ठानं तत्साक्षिणि चिदात्मनि भ्रान्त्या परिकल्प्यते । तथा कृषिवाणिज्यादिलौकिक**कर्माण्यपि** विज्ञानेनैव क्रियन्ते । तदेतल्लौकिकवैदिकसर्वक्रियाकर्तृरूपमाध्यात्मिकं **विज्ञानमिन्द्रादयः सर्वे देवा ज्येष्ठब्रह्मरूपेणोपासते** । महत्तत्त्वरूपं हिरण्यगर्भाख्यं प्रथमोत्पन्नज्येष्ठशरीरम् । " स यो हैतन्महः प्रथमजं यक्षम् " इति **श्रुतेः** । यक्षं पूज्यम् । तथा—" हिरण्यगर्भः समवर्तताग्रे " इति श्रुत्यन्तरम् ।

स्मृतिश्च—"स वै शरीरी प्रथमः स वै पुरुष उच्यते ।
आदिकर्ता स भूतानां ब्रह्माऽग्रे समवर्तत " ॥ इति ।

इन्द्रादिवधः पुमान्विज्ञानोपाधिकं ब्रह्म यद्युपासीत तदुपासीनश्च यावज्जीवं तस्माद्विज्ञानोपाधिकाद्ब्रह्मणो यदि न प्रमाद्येत्, उक्तविधं ब्रह्माहमस्मीत्येवं प्रत्ययप्रवाहं पारित्यज्य मनुष्योऽहं कर्ता भोक्ता सुखी दुःखीत्येवं प्राकृतजनवद्व्यवहारः प्रमादः ।

---

* अत्र शकाराकारस्य सानुदात्तः पाठोऽपि वैदिकेषु प्रसिद्धः ।

---

१ ग. °रूपवृ° । २ ब. °रूपहि° । ३ ग. स व्य° । ४ ङ. °नस्प या° । ५ ङ. नो । ६ ग. °त्येव प्र° ।

तं यदि न कुर्यात्तदानीमयं शरीरे वर्तमान एव सन्भाविजन्मरूपदुःखहेतून्सर्वान्पाप्मनः परित्यज्य ब्रह्मलोके संकल्पमात्रसंपादितान्सर्वान्भोगान्भुक्त्वा तत्त्वज्ञानोदये सति विमुच्यते । इन्द्रादिदेवानां स्त्रीशूद्रवद्वेदाध्ययनाभावेऽप्यस्ति वैदिकब्रह्मविद्यायामधिकारः । शूद्रादेस्तु वेदमुखेनाधिकाराभावेऽपि स्मृतिपुराणादावस्त्यधिकारः प्रथमाध्यायस्य तृतीयपादे + चिन्तितः—

"नाधिक्रियन्ते विद्यायां देवाः किंवाऽधिकारिणः ।
विदेहत्वेन सामर्थ्यहानेर्नैषामधिक्रिया ॥
अविरुद्धज्ञानवादिमन्त्रादेर्देहसत्त्वतः ।
अर्थित्वादेश्च सौलभ्याद्देवाद्या अधिकारिणः" ॥ इति ।

बृहदारण्यके तृतीयाध्याये श्रूयते—" तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणाम् " इति । देवादीनां मध्ये यो यो ब्रह्म बुबुधे स स एव ब्रह्माभवादित्यर्थः । तत्र देवर्ष्यादयो विद्यायां नाधिक्रियन्त इति प्राप्तम् । कुतः । अर्थी समर्थो विद्वाँञ्छास्त्रेणापर्युदस्तोऽधिक्रियत इत्युक्तानामधिकारहेतूनामशरीरेषु देवेष्वसंभवात् । न च मन्त्रार्थवादादिभ्यो देवानां विग्रहवत्त्वम् । विध्येकवाक्यतापन्नानां मन्त्रादीनां स्वार्थे तात्पर्याभावादिति प्राप्ते ब्रूमः—त्रिविधो ह्यर्थवादः । गुणवादोऽनुवादो भूतार्थवादश्चेति । तथा चाऽऽहुः—

"विरोधे गुणवादः स्यादनुवादोऽवधारिते ।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः" ॥ इति ।

आदित्यो यूपो यजमानः प्रस्तर इत्यत्र प्रत्यक्षविरोधे सत्यादित्यादिवद्यूपादेर्यज्ञनिर्वाहकत्वगुण आदित्यादिशब्दैरुपलक्षित इति गुणवादः । " अग्निर्हिमस्य भेषजम् " " वायुर्वै क्षेपिष्ठा देवता " इत्यादिषु मानान्तरसिद्धार्थवादत्वादनुवादत्वम् । तयोरुभयोः स्वार्थे तात्पर्यं मा भूत् । " इन्द्रो वृत्राय वज्रमुदयच्छत् " इत्यादिष्वविरुद्धेषु भूतार्थवादेषु स्वतः प्रामाण्यवादे स्वार्थे तात्पर्यस्य निवारयितुमशक्यत्वात्पदैकवाक्यतया स्वार्थेऽवान्तरतात्पर्यं प्रतिपाद्य पश्चाद्वाक्यैकवाक्यतया विधिषु महातात्पर्यं भूतार्थवादाः प्रतिपद्यन्ते । मन्त्रेष्वप्ययं न्यायो योज्यः । तथा च मन्त्रार्थवादादिबलाद्देवादीनां विग्रहवत्त्वे सति श्रवणादिषु सामर्थ्यं सुलभम् । अर्थित्वं चैश्वर्यस्य क्षयित्वसातिशयित्वदर्शनान्मोक्षसाधनब्रह्मविद्याविषय उपपद्यते । विद्वत्ता चोपनयनाध्ययनरहितानामपि स्वयंभातवेद-

+ तदुपर्यपि बादरायणः संभवात्—ब्र० सू० अ० १ पा० ३ अ० ९ सू० २६ ।

१ ख. °वधि° । २ ग. °तीये पा° । ३ क. ग. °रुद्धाज्ञान° । ४ ग. स ए° । ५ ग. घ. °द्वानधि° । ६ ख. °माण्यादेव स्वा° ।

त्वात्सुलभैव । तस्माद्देवादीनां विद्याधिकारो न निवारयितुं शक्यः । यद्यप्यादित्यादीनां देवानामादित्यादिध्यानमिश्रासु सगुणब्रह्मविद्यासु ध्येयानामन्येषामादित्यादीनामसंभवादादित्यत्वादिप्राप्तिलक्षणविद्याफलस्य सिद्धत्वाच्च माऽस्त्वधिकारः । तथाऽपि निर्गुणविद्यायामधिकारे को दोषः । तस्मादस्त्येवाधिकारः ।

शूद्राधिकारोऽपि **तत्रैव*** चिन्तितः—

"शूद्रोऽधिक्रियते वेदविद्यायामथवा नहि ।
अत्रैवर्णिकदेवाद्या इव शूद्रोऽधिकारवान् ॥
देवाः स्वयंभातवेदाः शूद्रोऽध्ययनवर्जनात् ।
नाधिकारी श्रुतौ स्मार्ते त्वधिकारो न वार्यते ॥

छान्दोग्यस्य चतुर्थाध्याये संवर्गविद्यायामाम्नायते—" आजहारेमाः शूद्रानेनैव मुखेन [illegible] " इति । अयमर्थः । **जानश्रुतिर्नाम** कश्चिच्छिष्यो गोसहस्रं दुहितरं मुक्ताहारं रथं कांश्चिद्ग्रामांश्चोपायनत्वेनाऽऽनीय **रैक्वनामकं** गुरुमुपससाद । तस्य रैक्वस्य वचनमेतत् । हे शूद्र **जानश्रुत** इमा गोसहस्राद्या आजहाराऽऽहृतवानसि । अनेनैव दुहित्राद्युपायनमुखेन मच्चित्तं प्रसाद्योपदेशं यिष्यसीति । तत्र शूद्रोऽपि वेदविद्यायामधिकारवानिति प्राप्तम् । कुतः । अत्रैवर्णिकदेवदृष्टान्तेन शूद्रस्याप्यत्रैवर्णिकस्य तत्संभवादिति प्राप्ते ब्रूमः—अस्ति देवशूद्रयोर्वैषम्यम् । उपनयनाध्ययनाभावेऽपि स्वयंप्रतिभातवेदा देवास्तादृशस्य सुकृतस्य पूर्वमुपार्जितत्वात् । शूद्रस्तु तादृशसुकृतराहित्यान्न स्वयंप्रतिभातवेदः । नापि तस्य वेदाध्ययनमस्त्युपनयनाभावात् । अतो विद्वत्ताख्यस्याधिकारहेतोरभावान्न श्रौतविद्यायां शूद्रोऽधिकारी । कथं तर्ह्युदाहृतवाक्ये **जानश्रुति**विषयः शूद्रशब्दो यौगिकोऽयं **न** रूढ इति ब्रूमः । विद्याराहित्यजनितया शुचा गुरुं दुद्रावेति शूद्रः । न च रूढ्या योगस्यापहारो रूढेरत्रासंभवात् । अस्मिन्नुपाख्याने क्षतृप्रेरणाद्यैश्वर्योपन्यासेन जानश्रुतेः क्षत्रियत्वावगमात् । ननु शूद्रस्य वेदविद्यानधिकारे सति मुमुक्षायां सत्यामपि मुक्तिर्न स्यादिति चेन्मैवम् । **स्मृतिपुराणादि**मुखेन ब्रह्मविद्योदये सति मुक्तिसिद्धेः । तस्मान्न शूद्रो वेदविद्यायामधिक्रियते " ।

सगुणब्रह्मविदो देहपातात्प्रागेव पुण्यपापत्यागस्तृतीयाध्यायस्य **तृतीयपादे** + **चिन्तितः**—

"कर्मत्यागो मार्गमध्ये यदि वा मरणात्पुरा ।
उत्तीर्य विरजां त्यागस्तथा **कौषीतकिश्रुतेः** ॥

---

* शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि—ब्र० सू० अ० १ पा० ३ अ० १० सू० ३४ । + सांपराये तर्तव्याभावात्तथा ह्यन्ये—ब्र० सू० अ० ३ पा० ३ अ० १६ सू० २७ ।

---

१ °शमिच्छसी° ।

कर्मप्राप्यफलाभावान्मध्ये साधनवर्जनात् ।
ताण्डिश्रुतेः पुरा त्यागो बाध्यः **कौषीतकिक्रमः** ॥

पूर्वाधिकरणोक्तसुकृतदुष्कृतपरित्यागो ब्रह्मलोकमार्गस्य मध्ये भवितुमर्हति । तल्लोकसमीपमार्गवर्तिनद्युत्तरणानन्तरं तच्छ्रवणात् "स आगच्छति विरजां[1] नदीं तां मनसैवात्येति तत्सुकृतदुष्कृते विधूनुते" इति । तस्मान्मार्गमध्ये परित्याग इति प्राप्ते ब्रूमः—ब्रह्मलोकमार्गमध्ये ब्रह्मप्राप्तिव्यतिरिक्तस्य सुकृतदुष्कृताभ्यां प्राप्यस्य फलस्याभावात्तयोर्नदीपर्यन्तनयनं निरर्थकम् । किंच मरणात्प्रागपरित्यक्तयोः सुकृतदुष्कृतयोर्मार्गमध्ये परित्यागस्य साधनं न संभवति । देहरहितेन साधनमनुष्ठातुमशक्यत्वात् । न च मरणात्पुरा तत्त्यागे प्रमाणाभावः । "अश्व इव रोमाणि" इति **ताण्डिश्रुतौ** तदवगमात् । तथा च सति श्रुत्या नदीमुत्तीर्य परित्याग इत्ययं **कौषीतकि**प्रोक्तः क्रमो बाधनीयः । तस्मान्मरणात्प्रागेवोपासकस्य सुकृतदुष्कृतयोः परित्यागः" ।

अथ विज्ञानमयं बुद्धवत्तस्तदुपासकस्य मनोमये शरीरत्वंबुद्धिदार्ढ्यं पर्यवस्यतीति दर्शयति—

तस्यैष एव शारीर आत्मा । यः पूर्वस्य, इति ।

पूर्ववद्योजनीयम् । लोके करणस्य कुठारादेरात्मत्वं नास्ति । तथा मनोमयस्यापि करणस्याऽऽत्मत्वाभावाच्छरीरकोटावन्तर्भावः परिशिष्यते ।

तस्माद्वा एतस्माद्विज्ञानमयात् । अन्यो -
न्तर आत्माऽऽनन्दमयः । तेनैष पूर्णः ।

अथ विज्ञानमयकोशेऽप्यात्मत्वबुद्धिं वारयितुमानन्दमयमुपदिशति—**तस्माद्वा** इत्यादिना । आनन्दः परस्य ब्रह्मणः स्वरूपम् "आनन्दो ब्रह्मेति व्यजानात्" "विज्ञानमानन्दं ब्रह्म" इत्यादिश्रुतिभ्यः । तस्याऽऽनन्दस्य विकारो वक्ष्यमाणप्रियमोदादिसमूह **आनन्दमयः** । यद्यप्यानन्दो निर्विकारस्तथाऽपि घटाद्युपाधिभिराकाश इव सात्त्विकान्तःकरणवृत्त्युपाधिभिः परिच्छेदे कल्पिते सति प्रियादिरूपतया विक्रियते । **सोऽयमानन्दमयः** कर्तृत्वाभिमानयुक्ताद्विज्ञानमयादभ्यन्तरः पृथगेवाऽऽत्मा । **तेनाऽऽनन्दमयेनैष पूर्वोक्तो विज्ञानमयः पूर्णः** । यथा प्राणमयेन व्याप्ते देहे कृत्स्नेऽपि प्राणकार्ये चलनमुपलभ्यते । यथा च मनोमयेन व्याप्ते प्राणविशिष्टे देहे सर्वस्मिन्नपि मनःकार्यभूता चेतनत्वलक्षणा ज्ञानशक्तिरुपलभ्यते । यथा च विज्ञानमयेन व्याप्ते मनःप्राणोभयविशिष्टे देहे कृत्स्नेऽप्यहं कर्तेति कर्तृत्वमुपलभ्यते । एवमानन्दमयेन व्याप्ते विज्ञानमनःप्राणविशिष्टे देहे हस्तपादादिषु सुखविशेषा उपलभ्यन्ते । तदेतदानन्दमय-

---

१ ग. घ. °रजां न° । २ ख. °था स° । ३ ख. °त्वदा° ।

पूर्णत्वम् । सुखवद्दुःखमपि हस्तादिषूपलभ्यत इति चेदुपलभ्यतां नाम । दुःखात्मकवृत्तिहेतुना मनोमयेन देहस्य पूर्णतया तदुपपत्तेः । दुःखस्य मनोमयधर्मत्वं सुखस्याऽऽनन्दमयधर्मत्वं चोपरिष्टाद्विस्पष्टी करिष्यते । अत्रेदं चिन्तनीयम् । कोऽयमानन्दो नाम किं दुःखनिवृत्तिराहोस्विद्भावरूप इति । तत्र दुःखाभाव इति तावत्प्राप्तम् । लोके क्षुत्पिपासारोगादिजनितस्य दुःखस्य निवृत्तौ सुखबुद्धिदर्शनात् । ननु विरोधिनि दुःखे वर्तमाने भावरूपं सुखं तिरोधीयते[1] । अतः सुखाविर्भावकाले दुःखनिवृत्तिरपेक्षितेत्येककालीनतया दुःखनिवृत्तौ सुखत्वभ्रम इति चेन्न । दुःखनिवृत्तिव्यतिरेकेण ज्वरमोचनकाले कस्यचिद्भावरूपस्यानुभवाभावात् । तस्माद्दुःखनिवृत्तिरेवाऽऽनन्द इति प्राप्ते ब्रूमः—अकस्मादुत्पन्नविपञ्चीस्वरश्रवणादन्तरेणापि दुःखपरामर्शमानन्दावभासेन भावरूपत्वं सिध्यति । अभावत्वे तु प्रतियोगिनिरूप्यत्वेन । दुःखस्मृतिपुरःसरमेव प्रतीयेत[3] । घटाभावः पटाभाव इत्यादौ प्रतियोगिपूर्वकप्रतीतिनियमात् । एतच्च **पूर्वाचार्यैरेव** साधितम् । आनन्दो दुःखाभावो न भवति तदनिरूप्यत्वात् । यद्दुःखेन न निरूप्यते तद्दुःखाभावो न भवति यथा घटः । यद्वा । आनन्दोऽयं भावरूपः प्रतियोग्यनिरूप्यत्वाद्घटवत् । यद्वा । आनन्दोऽयं भावरूपः सातिशयत्वाद्दुःखवदिति । सातिशयत्वं **चोपरिष्टात्सार्वभौमाद्यानन्देषु** स्पष्टी भविष्यति । सिद्धे भावरूपत्वे पुनरप्येतच्चिन्तनीयम् । किमसावानन्दः क्रियारूपः किंवा गुणरूप उत कस्यचित्प्रतिबिम्ब आहोस्विदवच्छिन्नः पदार्थोऽथवाऽनवच्छिन्नः स्वतन्त्रो वेति । तत्र तावत्क्रियारूप इति प्राप्तोति । कुतः । टुनदि समृद्धाविति[4]स्माद्धातोरानन्दशब्दनिष्पत्तेः । **कौषीतकिनश्च** कर्मेन्द्रियाणां मध्ये गुह्येन्द्रियस्याऽऽनन्दक्रियोपेतं विषयमामनन्ति—"प्रज्ञयोपस्थं समारुह्योपस्थेनाऽऽनन्दं रतिं प्रजातिं चाऽऽप्नोति" इति । उपस्थजन्ययाऽऽनन्दक्रियया व्याप्यमानः शरीरावयवसंयोगोऽत्राऽऽनन्दशब्देनोच्यते । संयोगकालीना क्रीडा रतिः । संयोगफलभूतप्रजोत्पत्तिः प्रजातिः । यथा वागादीन्द्रियजन्या अभिवदनादयः क्रियाविशेषाः । तथोपस्थजन्य आनन्दोऽपि क्रियाविशेषः । तथा च **सांख्या** आहुः—"वचनादानविहरणोत्सर्गानन्दास्तु पञ्चानाम्" इति । **आर्थवणिकाश्च** यथोक्तक्रियाविशिष्टान्कर्मेन्द्रियविषयानामनन्ति—"वाक्च वक्तव्यं च हस्तौ चाऽऽदातव्यं चोपस्थश्चाऽऽनन्दयितव्यं च वायुश्च विसर्जयितव्यं च पादौ च गन्तव्यं च" इति । तस्याश्चोपस्थजन्याया आनन्दक्रियाया मनोमयान्तःपातित्वादानन्दमयस्य विज्ञानमयादभ्यन्तरत्वमयुक्तमिति चेन्नैवम् । त्वदुक्तक्रियाया अतिरिक्तस्याऽऽनन्दस्यात्र विवक्षितत्वात् । स चाऽऽनन्दः कर्तृत्वभोक्तृत्वोपेतस्याऽऽत्मनो मनःसंयोगजन्यः क्षणिको गुण इति **वैशेषिकाणां** मतम् । बुद्धिसुखदुःखेच्छादीनां नवानां तैश्चाऽऽत्मविशेषगुणत्वा-

१ घ. °ते । ततः । २ क. ग. ङ. °नुभवा । ३ घ. प्रतीयते । ४ घ. तैरात्म° ।

ङ्गीकारात् । **सांख्यास्तु** मन्यन्ते—' आत्मनोऽसङ्गत्वादिच्छायाः प्रकृतेर्गुणत्रयपरिणामाः । तत्र सुखं सत्त्वगुणपरिणामः । प्रवृत्ती रजोगुणपरिणामः । प्रमादस्तमोगुणपरिणामः ' इति ।

तथा च **भगवताऽप्युक्तम्**—

" सत्त्वं सुखे संजयति रजः कर्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत " ॥ इति ।

न्यायैकदेशिनस्त्वेवमाहुः—'यद्विषयसुखमस्ति तद्दुःखानुषङ्गाद्दुःखमेव । साधनसंपादनप्रयासेन सुखस्य तारतम्येन विनाशेन च दुःखोत्पत्तेर्दुःखानुषङ्गो द्रष्टव्यः । मोक्षदशायां तु नित्यसुखमात्मगुणभूतं ज्ञानेनाऽऽत्मगुणेन विषयी क्रियते । अतो मोक्षः पुरुषार्थः' इति । त एते **वैशेषिकादि**पक्षाः पुरुषबुद्धिभिरुत्प्रेक्षिताः । **श्रुतिस्त्वात्मस्वरूपभूतस्य** नित्यानन्दस्य स्वतन्त्रद्रव्यस्य लेशो विषयानन्द इत्याचष्टे—" एषोऽस्य परम आनन्दः । एतस्यैवाऽऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति " इति । एतमेवार्थं **कश्चिद्योगी** स्वकीयं विवेकं प्रकटयन्नुदाजहार—

" आनन्ददुग्धोदधिमध्यवर्ती कणांस्तदीयान्विषयानलोत्थान् ।
आस्वादयन्कालमियन्तमेवं वृथाऽप्यनैषं हि विमूढचेताः " ॥ इति ।

सोऽयमानन्दलेशो द्विविधः । प्रतिबिम्बोऽवच्छिन्नश्चेति । प्रतिबिम्बपक्षः **पूर्वाचार्यै**रेवमुदाहृतः—

" अथात्र विषयानन्दो ब्रह्मानन्दांशरूपभाक् ।
निरूप्यते द्वारभूतस्तदंशत्वं श्रुतिर्जगौ ॥
एषोऽस्य परमानन्दो योऽखण्डैकरसात्मकः ।
अन्यानि भूतान्येतस्य मात्रामेवोपभुञ्जते ॥
शान्ता घोरास्तथा मूढा मनसो वृत्तयस्त्रिधा ।
वैराग्यं क्षान्तिरौदार्यमित्याद्याः शान्तवृत्तयः ॥
तृष्णा स्नेहो रागलोभावित्याद्या घोरवृत्तयः ।
संमोहो भयमित्याद्याः कथिता मूढवृत्तयः ॥
वृत्तिष्वेतासु सर्वासु ब्रह्मणश्चित्स्वभावता ।
प्रतिबिम्बति शान्तासु सुखं च प्रतिबिम्बति ॥
रूपं रूपं बभूवासौ प्रतिरूप इति श्रुतिः ।
उपमा सूर्यकादीति सूत्रयामास सूत्रकृत् ॥

---

१ घ. 'तिगु° । २ ख. ग. 'रमान° ।

एक एव तु भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥
जलप्रविष्टश्चन्द्रोऽयमस्पष्टः कलुषे जले ।
विस्पष्टो निर्मले तद्वद्द्वेधा ब्रह्मापि वृत्तिषु ॥
घोरमूढासु मालिन्यात्सुखांशोऽत्र तिरोहितः ।
ईषन्नैर्मल्यतस्तत्र चिदंशः प्रतिबिम्बति ॥
यथाऽतिनिर्मले नीरे वह्नेरौष्ण्यस्य संक्रमः ।
न प्रकाशस्य तद्वत्स्याच्चिन्मात्रोद्भूतिरत्र हि ॥
काष्ठे त्वौष्ण्यप्रकाशौ द्वावुद्भवं गच्छतो यथा ।
शान्तासु सुखचैतन्ये तथैवोद्भूतिमाप्नुते " ॥ इति ।

प्रतिबिम्बपक्ष इत्थमुदीरितः । अथावच्छिन्नपक्ष उच्यते । देहेन्द्रियाद्युपाधौ स्वयमेव भासमानस्य जीवात्मनः स्वरूपभूतो य आनन्दः सोऽयमवच्छिन्नोऽतिशयेन प्रीतिविषयत्वात् । आत्मन आनन्दरूपत्वं तद्विषयत्वं च **वाजसनेयिन** आमनन्ति—"तदेतत्प्रेयः पुत्रात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा" इति । अयमहंप्रत्ययेनानुभूयमानो देहेन्द्रियादिसाक्ष्यात्मेति यदस्ति तदेतदतिशयेनाभ्यन्तरं स्वरूपं तदेव वित्तपुत्रादिभ्यस्तारतम्येन प्रत्यासन्नेभ्योऽतिशयेन प्रियम् ।

तच्च तारतम्यं **वार्तिककारो** दर्शयति—

" वित्तात्पुत्रः प्रियः पुत्रात्पिण्डः पिण्डात्तथेन्द्रियम् ।
इन्द्रियाच्च प्रियः प्राणः प्राणादात्मा परः प्रियः " ॥ इति ।

आत्मव्यतिरिक्तेषु वित्तादिष्वात्मशेषत्वोपाधिना प्रीतिः । आत्मनि तु निरुपाधिकप्रीतित्वेन तस्याः प्रीतेः परत्वम् । एतच्च सर्वं **मैत्रेयीब्राह्मणे**—" न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति " इत्यादिभिर्बहुभिरुदाहरणैः प्रपञ्चितम् ।

तानि चोदाहरणानि **कैश्चिदेवं** संगृहीतानि—

" पतिर्जायापुत्रावित्तपशुब्राह्मणभूमिपाः ।
लोकाः देवा वेदभूते सर्वं चाऽऽत्मार्थतः प्रियम् " ॥ इति ।

मुख्यप्रीतिविषयत्वादात्मा मुख्यानन्दस्वरूपभूतः । एकैकदेहमात्रवर्तित्वादवच्छिन्नः । स च स्वाभाविकानन्दत्वाद्बिम्बरूपः । तदीयः प्रतिबिम्बोऽनुकूलवित्तपुत्रादिगोचरासु

---

१ ख. जलं प्र° । घ. जले प्र° । २ ख. °मः । प्रकाशयति त° । ३ घ. °रं रू° । ४ क. ख. ङ. तत एव । ५ क. ङ. °देव सं° । ६ क. ख. ग. ङ. °तिर्जाया° । ७ घ. °णबाहुजाः । लो° । ८ घ. °का वेदा देवभू° । ९ क. ङ. °र्वं वाऽऽत्मा° । १० ग. घ. °म्बभूतः । त° ।

शान्तवृत्तिष्ववभासते । तस्य प्रतिबिम्बस्य जलदर्पणादिप्रतिबिम्बवन्मिथ्यात्वादवच्छिन्नस्य वस्तुत्वेऽप्यवच्छेददोषोपेतत्वान्न तयोर्मुख्यानन्दत्वम् । यस्त्ववच्छेदरहितो ब्रह्मस्वरूपभूत आनन्दः स मुख्यः । तथा च **च्छन्दोगा नारदसनत्कुमारसंवादे** समामनन्ति—" सुखं त्वेव विजिज्ञासितव्यमिति सुखं भगवो विजिज्ञास इति । यो वै भूमा तत्सुखं नाल्पे सुखमस्ति । भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति । यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा । अथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पम् । यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम् " इति । अस्यायमर्थः । शोकस्य पारं तारयेत्येवं **नारदेन** प्रार्थितः **सनत्कुमारः** शोकतरणाय सुखरूपमेव त्वया विचारयितव्यमित्युवाच । तद्विचारमङ्गीकृतवते **नारदाय** भूमपदार्थं सुखत्वेनोपदिदेश । बहोर्भावो भूमा । यथा प्रकरणोपपदयोः संकोचहेत्वोरसत्त्वेन निरतिशयबृहत्त्ववाची ब्रह्मशब्द इति पूर्वत्रोक्तम्, एवमत्रापि निरतिशयबाहुल्यवाची भूमशब्दः । लोके हि धनाल्पत्वे सुखं न दृष्टम् । किंतु धनबाहुल्य एव सुखं दृष्टम् । तस्मात्सुखात्मको भूमैव विचारणीय इत्युक्त्वा ताद्विचाराभिमुखाय भूमलक्षणं यत्र नान्यदित्यादिनोपदिदेश । लोकव्यवहारे हि कश्चिद्द्रष्टा स्वस्मादन्यद्रूपं चक्षुषा पश्यति । सेयं द्रष्टृदृश्यदर्शनरूपा काचित्त्रिपुटी । तथा श्रोतृश्रोतव्यश्रवणविज्ञातृविज्ञातव्यविज्ञानादयस्त्रिपुट्यो यस्मिन्पदार्थे न सन्ति स पदार्थो भूमा । यस्मिंस्तु मायारूपे त्रिपुट्यो विद्यन्ते तन्मायारूपमल्पम् । तयोर्मध्ये भूमा नाशरहितः । अल्पं तु विनश्वरम् । तस्मिन्नल्पे द्वैतरूपे दुःखनिमित्तानां संभवात्तदल्पं दुःखात्मकम् । भूम्नि त्वद्वैते तदभावात्सुखात्मको भूमेति । सोऽयं भूमा त्रिपुटीरहितयोः सुषुप्तिसमाध्योः सुखात्मकोऽनुभूयते । जागरणव्युत्थानयोस्तु त्रिपुटीयुक्तयोर्लोकव्यवहाररूपोऽल्पाख्यः पदार्थो मूर्खेण तत्त्वविदा च दुःखात्मकोऽनुभूयते । अतो दुःखमिश्रत्वादवच्छिन्नो जीवात्मस्वरूपभूत आनन्दस्तत्प्रतिबिम्बरूपो वृत्त्यानन्दश्च न मुख्यः । किंतु भूमैव मुख्यानन्द इति सिद्धम् ।

स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा ।

एतस्याऽऽनन्दस्य विकारैः प्रियमोदादिरूप आनन्दमये स्वात्मत्वबुद्धिदार्ढ्यार्थमुपासनीयं स्वरूपं दर्शयति—**स वा** इत्यादिना । य आनन्दमयो विज्ञानमयादभ्यन्तरः

---

१ घ. यस्मिन्माया° । २ घ. °दा चानुभू° ।

स एवैषोऽहं सुखी भोक्तेत्येवमनुभूयमानो विज्ञानमयस्य शिरःपक्षादिपुरुषाकारमनु स्वयमपि पुरुषाकार एव प्रियमोदप्रमोदाः सात्त्विकवृत्तिप्रतिबिम्बिता आनन्दाः । तत्राभीष्टपुत्रादिदर्शनजन्यं प्रियम् । तल्लाभजन्यो मोदः । तत्कृतोपकारजन्यः प्रमोदः । यथोक्तवृत्त्युपादानभूताज्ञाने प्रतिबिम्बित आनन्दः । यद्वा वृत्तिप्रतिबिम्बानां प्रतियोगिजीवात्मस्वरूपभूतोऽवच्छिन्नो बिम्बस्थानीयः स आनन्दः । अनवच्छिन्नो मुख्य आनन्दो ब्रह्म तदेवेरेतरेषां प्रतिष्ठाऽऽधारः । अवच्छिन्नस्य प्रतिबिम्बानां च तदधीनत्वात् । यद्यपि प्रियमोदप्रमोदा मनसः करणरूपस्य वृत्तिविशेषतया कर्तृरूपाद्विज्ञानमयाद्बहिर्भूतास्तथाऽप्यान्तरस्यावच्छिन्नजीवानन्दस्यानवच्छिन्नब्रह्मानन्दस्य वा प्रतिबिम्बं धारयन्तीत्यान्तरत्वमभिप्रेत्य विज्ञानमयादभ्यन्तर आत्माऽऽनन्दमय इत्युक्तम् । तमेतमानन्दमयमात्मानमुपासीनो यदा भावनया साक्षात्करोति तदा पुच्छत्वेनोपचरिते ब्रह्मण्यप्यैकाग्र्यं प्रतिपन्ना मनोवृत्तिः प्रतिबिम्बाभावाद्ब्रह्मतत्त्वं साक्षात्करोत्येव " दृश्यते त्वग्र्यया बुद्ध्या " इति श्रुतेः । यथा मणिप्रभायां मणित्वभ्रान्त्या प्रवर्तमानस्यार्थान्मणितत्त्वसाक्षात्कारस्तद्वत् ।

अयमेवार्थात्सिद्धो ब्रह्मतत्त्वसाक्षात्कार उपास्तिफलमित्यभिप्रेत्य श्रुतिः फलान्तरमनभिधाय केवलं ब्रह्म पुच्छं प्रतिष्ठेत्येवं सर्वजगदाधारभूतब्रह्मतत्त्वोपदेशे पर्यवसिता ततोऽस्मिन्नानन्दमयकोशे प्रधानभूतस्य ब्रह्मणः प्रतिपादकं श्लोकमुदाहरति—

तदप्येष श्लोको भवति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकेऽष्टमप्रपाठके
पञ्चमोऽनुवाकः ॥ ५ ॥

अथाष्टमे षष्ठोऽनुवाकः ।

असन्नेव स भवति । असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद । सन्तमेनं ततो विदुरिति, इति ।

लोके हि जलाहरणचाक्षुषदर्शनादिव्यवहारविषयं घटमुद्दिश्य प्राणिनः सर्वेऽप्ययं घटोऽस्तीति ब्रुवते । तद्विपर्यये तु घटो नास्तीति च वदन्ति । अतो व्यवहारवासनायुक्तः पुमानैव्यवहार्यस्य ब्रह्मणोऽसत्त्वं मन्यते । अन्यस्तु विवेकी व्यवहार्याणां भूतानां भौतिकानां च श्रुतियुक्त्यनुभूतिभिर्मायामयत्वनिश्चयादसत्त्वं प्रतिपद्यते । व्यवहारातीतस्य ब्रह्मणः श्रुत्यादिभिः सत्यत्वनिश्चयात्सत्त्वमेव प्रत्येति । तत्र ब्रह्मणोऽसत्त्वं यो वेद स पुमानसन्नेव स्यात् । अन्नमयादिकोशानामनात्मत्वस्य प्रतिपादितत्वात्तदतिरिक्तस्य ब्रह्मणः स्वयमनङ्गीकृतत्वाच्च । यस्तु पञ्चकोशातीतं ब्रह्मा-

---

१ घ. °णभूतस्य । २ ख. ग. °ह्यत्वं सा° । ३ घ. °नप्यव्यव° ।

स्तीति वेद तस्य पुंसस्तदेव ब्रह्म स्वरूपम् । ततो ब्रह्मास्तित्ववेदनादेनं विवेकिनं सन्तं विद्यमानं सात्मकं जानन्ति शास्त्रपारं गताः । अथवा योऽसद्ब्रह्मेति वेद सोऽसन्नसाधुरेव भवति । वर्णाश्रमादिव्यवस्थालक्षणस्य सर्वस्य सन्मार्गस्य [illegible] ब्रह्मापलापेन सर्वसन्मार्गदूषको नास्तिको भवति । अस्तित्ववादिनमुक्तविपर्ययेण सन्तं सर्वसन्मार्गस्थापकमाहुः । एतदेवाभिप्रेत्य **कठा** आमनन्ति—" अस्तीत्येवोपलब्धव्यः " इति ।

अथोपासकस्याऽऽनन्दमये बुभुत्सोश्च ब्रह्मतत्त्वे त्वात्मबुद्धिं द्रढयितुमाह—

तस्यैष एव शारीर आत्मा । यः पूर्वस्य, इति ।

य आनन्दमयोऽस्ति स **एष एव तस्य पूर्वस्य** विज्ञानमयस्य **शारीरः** स्वामी । विज्ञानमयः शरीरम् । आनन्दमय आत्मेत्युपासकं प्रति योजनीयम् । बुभुत्सुं प्रति त्वेवं योजयेत् । यो ब्रह्म पुच्छमित्युक्तः पदार्थ एष एव तस्य पूर्वस्य प्रियमोदादिचतुष्टयस्य **शारीर आत्मा** । प्रियादिकं शरीरं तस्मिञ्शरीरेऽवस्थितं ब्रह्मैवाऽऽत्मेति ।

एतदेवाभिप्रेत्य **वार्तिककारा** आहुः—

मिथ्यात्मनां हि सर्वेषां सत्यादिगुणलक्षणम् ।
व्याविद्धाशेषसंसारमात्मानं तं प्रचक्षते ॥
न ह्यात्मवान्भवेत्सर्पो दण्डाद्यध्यासरूपिणा ।
आत्मना ह्येष सत्येन सर्पो रज्ज्वात्मनाऽऽत्मवान् " ॥ इति ।

अथ मीमांसा । तत्रैकदेशिनां विचारः **प्रथमाध्यायस्य प्रथमपादे*** दर्शितः—

"संसारी ब्रह्म वाऽऽनन्दमयः संसार्ययं भवेत् ।
विकारार्थमयट्शब्दात्प्रियाद्यवयवोक्तितः ॥
अभ्यासोपक्रमादिभ्यो ब्रह्माऽऽनन्दमयो भवेत् ।
प्राचुर्यार्थो मयट्शब्दः प्रियाद्याः स्युरुपाधिगाः " ॥ इति ।

तैत्तिरीयके देहप्राणमनोबुद्ध्यानन्दरूपा अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयसंज्ञकाः पञ्च पदार्थाः क्रमेणैकैकस्मादान्तराः पठिताः । तत्र सर्वान्तर आनन्दमयः संसारी परमात्मा वेति संदेहः । संसारीति तावत्प्राप्तम् । कुतः । आनन्दस्य विकार आनन्दमय इति व्युत्पत्तेः संसारिणि संभवात् । अविक्रिये परमात्मन्यसौ न संभवति । किंच—" तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः ।

---

* आनन्दमयोऽभ्यासात्—ब्र० सू० अ० १ पा० १ अ० ६ । सू० १२ ।

---

१ °त्सोश्चाऽऽत्मतत्त्वे त्वात्मत्वबु° । २. °हः । आनन्दमय. सं° । ३ क. ख. ग. ङ. °ति प्राप्त° ।

आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा " इत्यानन्दमयस्य पञ्चावयवा उच्यन्ते । अपेक्षितविषयदर्शनजन्यं सुखं प्रियम् । तल्लाभजन्यो मोदः । तद्भोगजन्यः प्रमोदः । सुषुप्त्यादौ भासमानमज्ञानोपहितं सुखसामान्यमानन्दः । निरुपाधिकं सुखं ब्रह्म । प्रियादीनां पञ्चावयवानां शिरआदिरूपत्वमुपास्तिप्रतिपत्तिसौकर्याय कल्प्यते । कल्पितस्याऽऽनन्दमयस्य शिरः पक्षौ चेत्यवयवत्रयम् । आत्मशब्देन मध्यशरीरं चतुर्थावयवत्वेनोच्यते । पुच्छमपरभागः । प्रतिष्ठाऽऽधारः पञ्चमोऽवयवः । न च निरंशस्य परमात्मनोऽवयवा युक्ताः । तस्मात्संसार्येवाऽऽनन्दमय इत्येवं प्राप्ते ब्रूमः—आनन्दमयः परमात्मा । कुतः । अभ्यासात् । " सैषाऽऽनन्दस्य मीमांसा भवति । एतमानन्दमयमात्मानमुपसंक्रामति " इत्यादिनाऽऽनन्दमयोऽभ्यस्यते । अभ्यासश्च तात्पर्यलिङ्गम् । तात्पर्यं च वेदान्तानां ब्रह्मण्येवेत्यवोचाम । किंच—"सत्यं ज्ञानमनन्तं ब्रह्म " इति ब्रह्मोपक्रमात् " इदं सर्वमसृजत " इति सर्वजगत्स्रष्टृत्वादिभ्यश्चाऽऽनन्दमयो ब्रह्म । न च ब्रह्मणि मयट्शब्दानुपपत्तिः । प्राचुर्यार्थसंभवात् । प्रियाद्यवयवा अपि विषय[illegible] भविष्यन्ति । तस्मात्परमात्माऽऽनन्दमय इत्येकदेशिनां मतम् ।

इदानीं स्वमतानुसारेणाधिकरणमुच्यते—

"अन्याङ्गं स्वप्रधानं वा ब्रह्म पुच्छमिति श्रुतम् ।
स्यादानन्दमयस्याङ्गं पुच्छेऽङ्गत्वप्रसिद्धितः ॥
लाङ्गूलासंभवादत्र पुच्छेनाऽऽधारलक्षणा[1] ।
आनन्दमयजीवोऽस्मिन्नाश्रितोऽतः प्रधानता[2]" ॥ इति ।

" ब्रह्म पुच्छं प्रतिष्ठा " इति यच्छ्रुतं ब्रह्म तत्किमानन्दमयस्याङ्गत्वेन निर्दिश्यत उत स्वयं प्राधान्येन प्रतिपाद्यत इति संशयः । आनन्दमयस्यावयवत्वेनेति तावत्प्राप्तम् । लोके पुच्छशब्दस्यावयववाचित्वेन प्रसिद्धत्वादिति प्राप्त उच्यते— न पुच्छशब्दोऽवयववाची । किंतु लाङ्गूलवाची । न चाऽऽनन्दमयस्य लाङ्गूलं संभवति । लाङ्गूलस्य गवादिलक्षणान्नमयावयवत्वात् । अतः पुच्छशब्दस्य मुख्यार्थासंभवे सति योग्यतावशादन्नाऽऽधारो लक्ष्यते । ब्रह्माऽऽनन्दमयस्य जीवस्याऽऽधारस्तत्कल्पनाधिष्ठानत्वात । न चाऽऽनन्दमयः परमात्मा । प्राचुर्यार्थस्वीकारेऽप्यल्पदु[illegible]तेः । तस्माज्जीवाधारत्वाद्ब्रह्म प्राधान्येन प्रतिपाद्यते । तथा—" असन्नेव स भवति । असद्ब्रह्मेति वेद चेत् " इत्यादिब्रह्माभ्यासः " [illegible] " इति ब्रह्मोपक्रमश्चानुकूलो भवति । अतः कठवल्ल्युक्तपुरुषन्यायेन ब्रह्मैव ज्ञेयम् । न त्वाकाशादिसृष्टिरन्नमयादिकोशाश्च ।

---

१ क. ख. ङ. °क्षणम् । आ° । २ घ. स्वप्रा° । ३ घ. °शादाधा° । ४ ख. °था चास° ।

स च न्यायस्तृतीयाध्यायस्य * तृतीयपादेऽभिहितः—

" सर्वा परम्पराऽक्षादेर्ज्ञेया पुरुष एव वा।
ज्ञेया सर्वा श्रुतत्वेन वाक्यानि स्युर्बहूनि हि ॥
पुमर्थः पुरुषज्ञानं तत्र यत्नः श्रुतेर्महान्।
तद्बोधाय श्रुतोऽक्षादिर्वेद्य एकः पुमानतः ॥

कठवल्लीषु पठ्यते—" इन्द्रियेभ्यः परा ह्यर्था ह्यर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः। महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः " इति। अस्यायमर्थः—मनसा विषयानभिलप्स्य पश्चादिन्द्रियैर्बाह्यान्विषयानाप्नोति। तत्र बाह्यविषयेभ्य इन्द्रियाणामान्तरत्वात्परत्वं प्रसिद्धम्। इन्द्रियेभ्यश्चाभिलप्यमाणत्वदशापन्ना अर्था आन्तरास्तेभ्योऽ[illegible] मनोवृत्तिरान्तरा। वृत्तेरपि वृत्तिमती बुद्धिरभ्यन्तरा। बुद्धेरपि बुद्ध्युपादानभूतो महच्छब्दवाच्यो हिरण्यगर्भरूप आत्माऽऽन्तरः। महतोऽपि तदुपादानभूतमव्यक्ताख्यं मूलाज्ञानमान्तरम्। अव्यक्तादपि तदधिष्ठानभूताश्चिद्रूपः पुरुषोऽभ्यन्तरः। पुरुषादभ्यन्तरं न किंचिदस्ति। पुरुष एवाभ्यन्तरतारतम्यस्य विश्रान्तिभूमिः। पुरुषार्थकामैः परमो गन्तव्यः प्रदेशश्चेति। तत्र यथा पुरुषः श्रुत्या तात्पर्येण प्रतिपाद्य एवमिन्द्रियादिपरम्पराऽपि प्रतिपाद्यैव। अन्यथा तदुपन्यासवैयर्थ्यात्। बहूनां प्रतिपादने वाक्यभेदः स्यादिति चेद्बाढम्। सन्त्येव तानि बहूनि वाक्यानि। एकवाक्यत्वस्यासंभवादिति प्राप्ते ब्रूमः—पुरुषज्ञानस्याशेषसंसारनिदानभूताज्ञाननिवर्तकत्वात्पुरुष एव ज्ञेयतया प्रतिपाद्यः। अत एव वाक्यशेषे पुरुषज्ञानायैव महता प्रयत्नेन योग उपदिष्टः।

" एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः " ॥ इति।

अयमर्थः—सर्वाभ्यन्तरत्वेन गूढ आत्मा बहिर्मुखानां(णां) न प्रकाशते। अन्तर्मुखानां(णां) तु प्रकाशते। अन्तर्मुखा ये सूक्ष्मतत्त्वदर्शनशीलास्तैर्योगाभ्यासेनैकाग्र्यमापन्नया बुद्ध्या सूक्ष्मवस्तुविषयया द्रष्टुं शक्यत इति। न च पुरुषस्यैव प्रतिपाद्यत्वे परम्परोपदेशवैयर्थ्यम्। बहिर्मुखस्य चित्तस्य क्रमेण पुरुषप्रवेशे परम्परायाः साधनत्वात्। तस्मात्पुरुष एव ज्ञातव्यः "।

अनेन न्यायेन ब्रह्मण आनन्त्यमुपपादयितुमाकाशादिसृष्टिरुक्ता। गुहाहितत्वमुपपादयितुं पञ्चान्नमयादिकोशा उपन्यस्ताः। ज्ञातव्यं तु ब्रह्मैव। तच्च सत्यज्ञानादिलक्षणं गुहाहितत्वेन प्रत्यगात्मस्वरूपं चेति स्थितम्।

---

* आध्यानाय प्रयोजनाभावात्—ब्र० सू० अ० ३ पा० ३ अ० ७ सू० १४।

---

१ क. ख ङ. °लक्ष्य प°। २ क. ङ. उपादिष्टः।

इत्थं ब्रह्मोपदेशरूपं श्रवणप्रकरणं परिसमाप्य बहिर्मुखाना(णा)मुपपादनरूपस्य मननप्रकरणस्याऽऽरम्भे शिष्यप्रश्नान्प्रतिजानीते—

अथातोऽनुप्रश्नाः, इति ।

उपदेशानन्तरमुपदिष्टेऽर्थे यस्मात्कारणाच्छिष्यस्य बुद्धिदोषेण बहवः संदेहाः प्रादुर्भवन्त्यतः कारणादुपदिष्टानुरूपाः **प्रश्नाः** क्रियन्ते । अत्राथशब्देन विवक्षितं श्रवणमननयोः पूर्वापरभावमन्यत्र विस्पष्टमेव **श्रुतिराह**—" श्रोतव्यो मन्तव्यः " इति । तयोः स्वरूपमेवं **स्मर्यते**—" श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः " इति । तयोः प्रयोजनं विभज्याऽऽ**म्नायते**—" भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः " इत्युपदेशेन ब्रह्मतत्त्वे ज्ञाते सति प्रत्यगात्मनोऽन्तःकरणेन सह तादात्म्यभ्रमस्वरूपो ग्रन्थिर्निवर्तते । उपपत्तिपर्यालोचनरूपेण मननेन संशयाश्छिद्यन्ते । तस्मादत्र च्छेत्तव्यसंशयोपन्यासरूपाः प्रश्नाः क्रियन्त इत्यर्थः ।

प्रतिज्ञातान्प्रश्नानुपन्यस्यति —

उताविद्वानमुं लोकं प्रेत्य । कश्चन गच्छती३ । आहो विद्वानमुं लोकं प्रेत्य । कश्चित्समश्नुता३ उ, इति ।

यदुक्तम् —"[illegible]ति परम्" इति तेन बुद्धिस्थेन तत्प्रतियोगिन्यविदुषि द्वौ प्रश्नौ क्रियेते । उतशब्दः प्रश्नद्योतकः किमित्येतस्मिन्नर्थे वर्तते । **चनशब्दोऽपिशब्दार्थवाची । अमुं लोकमिति** पुरोवर्ती परमात्मोच्यते । किमविद्वान्यः कोऽपि देहात्प्रेत्य परमात्मानं गच्छतीति श्रौत **आद्यः** । अथवा न गच्छतीत्यर्थसिद्धो **द्वितीयः** प्रश्नः । तथा विद्वद्विषयावपि **द्वौ** प्रश्नावित्येवं चत्वारः प्रश्नाः । सर्वजगत्कारणस्य जीवरूपेण देहेषु प्रविष्टस्य ब्रह्मणो विद्वदविद्वत्साधारणत्वेन विदुषस्तत्प्राप्तावविद्वानपि प्राप्नुयात् । अविदुषोऽप्राप्तौ विद्वानपि न प्राप्नुयादिति चतुर्णां प्रश्नानामभिप्रायः । यद्वा श्रूयमाणौ विद्वदविद्वद्विषयौ द्वावेव प्रश्नौ । पूर्ववाक्यसूचितेन प्रश्नेन सह समुच्चितत्वाद्बहुवचननिर्देशः ।

पूर्ववाक्ये हि—"असद्ब्रह्मेति वेद चेदस्ति ब्रह्मेति चेद्वेद " इतिकोटिद्वयोपन्यासेन सूचितो ब्रह्मसद्भावविषयः प्रथमः प्रश्नः । एतस्य प्रश्नस्योत्तरत्वेन गुरुर्ब्रह्मणः सद्भावं साधयितुं सृष्टिमुपन्यस्यति —

सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदꣳ सर्वमसृजत, इति ।

---

१ घ. °विद्यते । २ क. घ. ङ. °षयेऽपि । ख. °षये द्वौ ।

ब्रह्म पुच्छं प्रतिष्ठेति निर्दिष्टो योऽयं ब्रह्मपदार्थोऽन्नमयादीनामानन्दमायान्तानां पञ्चानां कोशानां शारीर आत्मेत्युक्तः **सो**ऽयमात्मा सृष्टेः पूर्वमेक एवाद्वितीयः सन्स्वशक्तिसंयोगात्कामितवान् । आत्मन्याश्रिता मायाशक्तिः कामनाकारेण विक्रियामापद्यत इत्यर्थः । न ह्यविक्रियस्य चिदेकरसस्य मायामन्तरेण कामः संभवति । *यद्यप्यस्तीश्वरस्य मायाकल्पितः कामस्त+थाऽपि कामित्वेन जीववन्नित्यतृप्तो न स्यादिति चेन्न । लीलाश्वासादिदृष्टान्तेन **मीमांसायां** परिहृतत्वात् । कामितार्थस्य क्वचिदपि विघाताभावादपि जीववैषम्यम् । अत एव—"सत्यकामः सत्यसंकल्पः" इत्यन्यत्राऽऽम्नातम् । कामनाप्रकार एव निर्दिश्यते—**बहु स्यां** प्रभूतं भवेयम् । नन्वाकाशस्य घटादिपदार्थान्तरोपाधिकृतं बहुवचनं दृष्टमद्वितीयस्य तु कथं बहुतेत्याशङ्क्योच्यते—**प्रजायेय** प्रकर्षेण पूर्वावस्थितात्स्वरूपादाधिक्येनोत्पद्येय । ननु विद्यमानः पिता पुत्रमुत्पादयति न तु स्वयमुत्पद्यते । तथा सत्यत्रापि जगदुत्पादकस्य ब्रह्मणः स्वोत्पत्त्यभावात्प्रजायेयेत्युक्तिरनुपपन्नेति चेन्न । उत्पद्यमानयोर्नामरूपयोर्ब्रह्मणोऽत्यन्तभेदाभावात् । यथा समुद्रादाविर्भवन्तस्तरङ्गादयो नात्यन्तं भिन्नास्तथा ब्रह्मशक्तौ मायायामवस्थिते पूर्वमनभिव्यक्ते नामरूपे पश्चादभिव्यज्यमाने सती ब्रह्मणः सद्रूपतामपरित्यज्यैव स्वयमपि सद्रूपत्वेन भासेते । एतदेवाभिप्रेत्य **वाजसनेयिन** आमनन्ति—"तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियत" इति । तस्माद्ब्रह्मण एव मायया जगद्रूपेण प्रतिभासात्प्रजायेयेत्युक्तिरुपपद्यते । स परमात्मोक्तप्रकारेण कामयमानस्तपोऽतप्यत । तपःशब्देन ज्ञानमुच्यते । "यस्य ज्ञानमयं तपः" इति श्रुत्यन्तरात् । सृज्यमानजगद्रचनालोचनमकरोदित्यर्थः । न खलु परमेश्वरस्य कृच्छ्रचान्द्रायणादिरूपेण तपसा किंचित्प्रयोजनमास्ति । **स** परमेश्वरः स्रष्टव्यवस्तुपर्यालोचनं कृत्वा प्राणिकर्मनिमित्तानुरूपमिदं **सर्वं** जगद्देशतः कालतो नाम्ना रूपेण च सर्वप्राणिभिः सर्वावस्थैरनुभूयमानं सृष्टवान् । अत्र कामयितृत्वपर्यालोचकत्वजगत्स्रष्टृत्वरूपैर्हेतुभिः परमात्मनः सद्भावः प्रतिपाद्यते । **असद्वादी** तावदेवं मन्यते—यद्यदस्ति तत्सर्वं नामरूपात्मकमित्याकाशादिभूतेषु देवतिर्यगादिभौतिकदेहादिषु चेत्यादिव्याप्तिर्दृष्टा । परमात्मा तु नामरूपाभ्यामन्यः "आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म" इति श्रुत्यन्तरात् । यस्तु परमात्मा ब्रह्मेत्यादिव्यवहारः सोऽपि तत्सद्भावं साधयितुं न प्रभवति । नरविषाणादिवत्तस्य विकल्पमात्रत्वात् । "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" इति हि **पातञ्जलं** सूत्रम् । ततो नामरूपे ब्रह्मणो व्यावर्तमाने स्वव्याप्यं[3] सद्भावमपि व्यावर्तयतः । एवं च सति

* यदीत्यर्थः । + तर्हीत्यर्थः ।

१ ग. 'त्यन्तभि° । २ ग. °ष्टत्वादिरू° । ३ ग. 'व्याप्तं स° ।

" असद्वा इदमग्र आसीत् " " यतो वाचो निवर्तन्ते " " अथात आदेशो नेति नेति " " अस्थूलमनण्वह्रस्वम् " इत्याद्याः श्रुतयोऽनुगृहीता [illegible]। तस्मान्नास्ति ब्रह्मेति । तमेतमसद्वादिनं प्रति सद्भावः साध्यते । परमात्मा सद्रूपः कामयितृत्वात्स्वर्गादिकामयितृवत् । पर्योलोचकत्वाद्राजमन्त्रिवत् । स्रष्टृत्वात्कुम्भकारादिवत् । यत्तु नामरूपयोः सत्त्वं भवतोदाहृतं तदेवास्मदभिप्रेतं ब्रह्म । सद्रूपे ब्रह्मण्यधिष्ठाने मायया नामरूपयोः कल्पितत्वात् । असद्वा इत्यादेस्त्वर्थो वक्ष्यते ।

किंच ब्रह्म सद्रूपं प्रवेष्टृत्वाद्यथा गृहादौ प्रवेष्टा पुरुष इत्यभिप्रेत्य प्रवेशं दर्शयति—

यदिदं किंच । तत्सृष्ट्वा । तदेवानुप्राविशत्, इति ।

हिरण्यगर्भादिस्थावरान्तं शरीरजातं यत्किंचिदस्ति तत्सर्वं **सृष्ट्वा तदेव** सृष्टं शरीरजातं परमात्मा **प्राविशादि**त्यर्थः । अत्रेदं चिन्तनीयम् । यः परमात्मा स्रष्टाऽस्ति स किं तेनैव रूपेण प्राविशात्किंवा रूपान्तरेणेति । तत्र सृष्ट्वेति क्त्वाप्रत्ययेन सृष्टिप्रवेशयोः समानकर्तृकत्वावगमात्स्रष्टृरूपेणैव प्रवेश इति चेन्न । मृत्पिण्डवदुपादानस्य प्रवेशानानुपपत्तेः[1] । न खलु यो मृत्पिण्डो घटाकारेण परिणतः स एव घटमनुप्रविशति । तथा शरीराकारेण परिणतस्य स्रष्टुस्तेष्वेव शरीरेषु कथं प्रवेशो घटेत । ननु तर्हि रूपान्तरेण प्रवेशोऽस्तु । यथा मृत्पिण्डविकारे घटे पुनरन्या चूर्णरूपा मृत्प्रविशति । तथेश्वररूपेण प्रवेशाभावे जीवरूपेण प्रवेशः स्यात् । मैवम् । अद्वयस्य रूपद्वयाभावात् । तदङ्गीकारेऽपि प्रवेष्टव्यप्रदेशाभावात् । उपादानत्वेन सर्वकार्येषु पूर्वमेवानुगतोऽवतिष्ठते । तथासति परमात्मशून्यप्रदेशाभावेन कुत्रायं प्रविशेत् । अवस्थिते परमात्मन्येव प्रविशेदिति चेन्न । **तदेवानुप्राविशदि**ति सृष्टे कार्ये प्रवेशश्रवणात् । सृष्टं शरीररूपं कार्यं पुनर्जीवलक्षणकार्यान्तराकारेण परिणमते । सोऽयं परिणामः प्रवेश इति चेन्न । कुम्भाकारपरिणामस्य पुनः शरीराकारपरिणामादर्शनात् । जलसूर्यकादिप्रतिबिम्बवत्प्रवेशः स्यादिति चेन्मैवम् । अपरिच्छिन्नत्वादमूर्तत्वाद्विप्रकृष्टदेशावस्थितस्य प्रतिबिम्बाधारस्याभावाच्च । परिच्छिन्नो मूर्तश्च सूर्यबिम्बो विप्रकृष्टदेशस्थे जलादौ प्रतिबिम्बितो भवति । ब्रह्म तु न परिच्छिन्नम् । नापि मूर्तम् । न च ब्रह्मणो विप्रकृष्टदेशवर्ती काश्चिदुपाधिरस्ति । तस्मान्न केनापि प्रकारेण प्रवेश उपपादयितुं शक्यते । अत्रोच्यते । जगत्सृष्टिवदयं प्रवेश उपपादनीयः । अचिन्त्यरचनारूपं जगद्यथा **परमेश्वरो** मायाबलेन ससर्ज तथा मायाबलेनैव प्रविशतु । अथोच्येत । येयमाकाशादिका मायामयी सृष्टिर्न तां वस्तुत्वबुद्ध्या श्रुतिः प्रतिपादयति । किं तर्हि मृद्घटन्यायेन कार्यस्य कारणव्यतिरेकेणाभावं विवक्षित्वा ब्रह्मण आनन्त्यं पूर्वत्र प्रतिज्ञातमुपपादयितुं भ्रान्तिसिद्धा सृष्टिरनूद्यत इति ।

---

१ ध. वेशानु°।

तर्हि प्रतिज्ञातं गुहानिहितत्वं पञ्चकोशोपन्यासद्वारेण ब्रह्म पुच्छमित्युपपाद्य पुनरपि तदेव स्पष्टी कर्तुं भ्रान्तिसिद्धः प्रवेशोऽनूद्यताम्। यथा काश्चित्पुमान्गृहं निर्माय तत्र प्रविश्याभ्यन्तरे स्थित उपलभ्यते, एवं ब्रह्माप्याकाशादिकार्यं सृष्ट्वा तस्यान्तः प्रविष्टमिव हृदयपुण्डरीकेऽवस्थितायां बुद्धौ द्रष्टृ श्रोतृ विज्ञात्रित्येवं विशेषवदुपलभ्यते। सोऽयमस्य प्रवेश इत्युपचर्यते। वाजसनेयिभिरप्ययं प्रवेश आम्नायते—"स एष इह प्रविष्ट आनखाग्रेभ्यो यथा क्षुरः क्षुरधानेऽवहितः स्याद्विश्वंभरो वा विश्वंभरकुलायः" इति।

एतस्य वाक्यस्यार्थो वार्तिकसारे विस्पष्टमाख्यातः—

"तच्छब्देन परामृष्टः साक्ष्यव्याकृतभासकः।
एतच्छब्देन कार्यस्थः प्रत्यक्ष उपदिश्यते॥
अद्वितीयमधिष्ठानं कार्यस्थः सद्वयस्तयोः।
स एष इत्यभेदोक्तिर्दुष्करेति न चोद्यताम्॥
अज्ञातवस्तुतत्त्वस्य दुष्करं नास्ति किंचन।
नीलीकृतं नभः पश्य चक्षुषा नीलवस्त्रवत्॥
योग्यायोग्यव्यपेक्षेयं मानव्यवहृतौ भवेत्।
कल्पनामात्रनिष्पत्तेर्नापेक्षाऽज्ञानभूमिषु॥
इहेत्यनेन सूत्रादिस्थाणुपर्यन्तविग्रहाः।
उच्यन्ते तेषु जीवोऽयं विस्पष्टमुपलभ्यते॥
प्रविष्ट इति शब्देन चिदाभासतमोन्विता।
जीवत्वेनोपलब्धिर्या चितः सैषाऽभिधीयते॥
चिदाभासप्रवेशस्तु प्रत्यङ्मोहे स्वतो भवेत्।
तत्कार्येष्वनुवृत्तः सन्नुपाधिश्चित्प्रवेशने॥
जपाकुसुमरक्तत्वं स्फटिके कल्पितं यथा।
चिदाभासप्रवेशोऽयं चित्यध्यारोप्यते तथा॥
सूत्रादिस्थाणुपर्यन्तं जगत्सृष्ट्वाऽऽत्ममायया।
स्वाभासैकस्वभावेन स एवं प्राविशत्परः॥
आनखाग्रेभ्य इत्युक्ता मर्यादाऽस्य प्रवेशने।
उष्णस्पर्शेन चैतन्यं नखाग्रावधि लक्ष्यते॥

---

१ क. ख. ङ. °लक्ष्यते। २ घ. पश्येच्चक्षु°। ३ ख. °तयोचिता। ४ ग. °र्याऽन्विता सै°। ५ ख. एव। ६ क. ख. ङ. °त्युक्त्या म°। ७ क. ख. ङ. उक्ता स्प°। ८ घ. लभ्यते।

सामान्येन विशेषाच्च चिदेहं व्याप्य वर्तते[1]।
दृष्टान्ताभ्यां द्वयी वृत्तिर्द्विविधाऽऽम्यामिहोच्यते ॥
दारु कृत्स्नमभिव्याप्य यथाऽग्निर्दारुणि स्थितः ।
संव्याप्य देहमखिलं तद्वदात्मा व्यवस्थितः ॥
तस्यावसंव्याप्य यथा क्षुरपौत्रं[2] क्षुरस्तथा ।
श्रोत्रादिनाडीमध्यस्थस्तनुमव्याप्य संस्थितः ॥
क्षुरपात्रे स्थानभेदाद्विभिद्यन्ते यथा क्षुराः ।
चैतन्यानि विभिद्यन्ते तथा नाडीविभेदतः ॥
प्राप्नोति वृत्ती द्वे जीवः स्वप्नजाग्रदवस्थयोः ।
सामान्यवृत्तिभेवैकां सुषुप्ते प्रतिपद्यते ॥
सामान्यवृत्तिर्या साऽत्र जीवनायोपयुज्यते ।
विशेषवृत्तयो देहे शब्दाद्यालोचनोद्यताः ॥
प्रवेशवाक्यं पदशस्तात्पर्याच्च स्फुटीकृतम् ।
तदनुग्राहको न्याय इदानीं प्रविचार्यते ॥
किं देवदत्तगृहवत्प्रवेशोऽथोपलाहिवत् ।
जलार्कबिम्बवत्किंवा यद्वा द्रव्यगुणादिवत् ॥
फलबीजवदाहोस्विन्नाऽऽद्यः सर्वगतत्वतः ।
देवदत्तः परिच्छिन्नः सांशश्चाऽऽत्मा तु नो तथा ॥
अव्यावृत्ताननुगतयाथात्म्यादात्मवस्तुनः ।
परिच्छेदाद्यसंभाव्यं नेति नेतीतिवारणात् ॥
नातोऽनवच्छिन्नतनोर्निर्विभागात्मवस्तुनः ।
पूर्वस्थानवियोगेन नूत्नस्थानान्तरागमः ॥
न द्वितीयोऽपरिणतेरश्मान्तं[3] सर्परूपतः ।
भूतानि परिणम्यन्ते न त्वात्मा परिणामवान् ॥
न तृतीयोऽर्कजलयोरिव देहचिदात्मनोः ।
न संयोगविभागौ स्तो येन तद्वत्प्रवेशनम् ॥
न चतुर्थोऽपारतन्त्र्याद्द्रव्यतन्त्रा गुणादयः ।
न चाऽऽत्मा देहतन्त्रोऽयं सर्वेश्वर इति श्रुतेः ॥
न पञ्चमोऽविक्रियत्वाद्बीजं विक्रियया युतम् ।
षड्भावंविक्रियाहीन आत्मा शास्त्रेषु निश्चितः ॥

---

१ व चिदेवं व्या° । २ ग. °पात्रे क्षु° । ३ व. °रश्मान्तः स° ।

आधाराधेयता सर्पशिलयोः फलबीजयोः ।
अंशांशितेति वैषम्यान्न तत्र पुनरुक्तता ॥
परिच्छिन्नो जीव एव देहेषु प्रविशेत्यतः ।
न दोष इति चेन्मैवं स्रष्टुरेव प्रवेशनात् ॥
तत्सृष्ट्वाऽथ तदेवानुप्राविशत्स इति श्रुतेः ।
सृष्टृप्रवेष्टृरेकत्वं स्याद्भुक्त्वा व्रजतीतिवत् ।
अतः केनाप्युपायेन प्रवेशो घटते न हि ॥
इति प्राप्ते पूर्वपक्षे प्रवेश उपपाद्यते ।
अप्रविष्टस्वभावोऽयं दिग्देशाद्यनभिप्लुतेः ॥
कल्पितोऽस्य प्रवेशः स्याज्जलपात्रार्कबिम्बवत् ।
विभागाद्यंशवैषम्येऽप्यस्ति साम्यं विवक्षितम् ॥
उपाधिस्थोपलब्ध्यादिसाम्यं केन निवार्यते ।
उपाधावुपलब्धत्वमन्यथात्वेन भासनम् ॥
बहुत्वभानमित्येतद्दृष्टदार्ष्टान्तयोः समम् ।
तेजोधिकं रवेर्बिम्बमशक्यं द्रष्टुमञ्जसा ॥
तथाऽपि जलमध्ये तद्बिम्बं सम्यगवेक्ष्यते ।
स्वयंप्रकाश आत्मैवं नोपलभ्योऽनुपाधिकः ॥
जडदेहाद्युपाधौ तु विस्पष्टमुपलभ्यते ।
दर्पणाभिहता दृष्टिः पर्यावृत्य स्वमाननम् ॥
व्याप्नुवत्याभिमुख्येन व्यत्यस्तं दर्शयेन्मुखम् ।
देहाद्युपप्लुतैवं धीरात्मानं व्याप्नुवत्यसौ ॥
अविक्रियं विक्रियाभिर्युक्त इत्यवभासयेत् ।
एकोऽप्यनेकधा भाति तरणिः पात्रभेदतः ॥
एवं नानादेहभेदाद्भात्यात्मैकोऽप्यनेकधा ।
निर्धूताशेषनानात्वं तद्धेतुरविभागवान् ॥
अनन्यसाक्षिकोऽपीदृक्स्यात्प्रवेशभ्रमादयम् ।
द्रष्टृादिरूपरहितः प्रत्यगात्माऽभवत्पुरा ॥
नामरूपजनौ सत्यां द्रष्टृत्वादियुतो भवेत् ।
द्रष्टृश्रोत्रादिरूपो यो यश्च द्रष्टृादिवर्जितः ॥

---

१ क. ख. ङ. °शत्वतः । २ ग. °मुखा दृ° । ३ क. ङ. °वेशाद्भ्रमा° ।

बुद्धितत्कारणोपाधी क्षेत्रज्ञेश्वरसंज्ञकौ ।
जिघ्राणीममहं गन्धमिति यो वेत्त्यविक्रियः ॥
स सर्वसाक्षी पूर्वाभ्यामुपलक्षणमर्हति ।
अप्पात्रोत्थापिताद्भानोर्दिवि भानुर्यथेक्ष्यते ॥
सर्वसाक्षी तथा धीस्थात्कर्तृभोक्त्रादिलक्षणात् ।
प्रकाशात्मा यथा चन्द्रः शाखाग्रादतथाविधात् ॥
लक्ष्यस्तथा चिदात्माऽपि कारणोपाधितो जडात् ।
जीवत्वभ्रान्तिरेवैषा प्रत्यग्बोधोपयोगतः ॥
जलपात्रार्कसाम्येन प्रवेश इति कल्प्यते ।
दिग्देशकालशून्यस्य प्रवेशो बिलसर्पवत् ॥
न त्वङ्गसा परस्यास्ति तेनाविद्याप्रकल्पितः ।
अविद्यया तु साक्ष्येव केवलोऽप्यविवेकतः ॥
बुद्ध्यादिकार्यगैर्धर्मैः प्रतिबिम्बवदीक्ष्यते ।
अग्निः सूर्यो मरुच्चेति दृष्टान्ताः श्रुत्युदीरिताः ॥
अप्रविष्टस्वभावोऽतः कार्यमात्माऽविशज्जगत् ।
अग्निर्यथैको भुवनं काष्ठैकोष्ठादिरूपकम् ॥
प्रविष्टः प्रतिरूपोऽभूदप्रविष्टोऽपि सँस्वतः ।
वायुर्यथैको भुवनं नानाव्यजनरूपकम् ॥
प्रविष्टो बहुरूपोऽभूदप्रविष्टोऽपि सन्स्वतः ।
सूर्यो यथोदपात्रेषु प्रविष्टो बहिरेव सन् ॥
तथाऽऽत्माऽप्यप्रविष्टः सँन्प्रविष्ट इव लक्ष्यते ।
यथा सृष्ट्यादयः क्लृप्ताः प्रवेशोऽपि तथेक्ष्यताम् ॥
युक्त्या नैवोपपद्यन्ते सृष्ट्याद्याः कल्पितास्ततः ।
नासतो जन्मना योगः सतः सत्त्वान्न चेष्यते ॥
कूटस्थे विक्रिया नास्ति तस्मादज्ञानतो जनिः ।
रूपं रूपमितीयं तु स्पष्टमृक्प्रत्यगात्मनः ॥
याथात्म्यदर्शनायैव सृष्ट्यादीन्यभ्यभाषत ।
क्षुरपात्राख्यदृष्टान्ताद्विशेषेण प्रवेशनम् ॥
इन्द्रियेष्वपि विस्पष्टमुपलभ्यत्वमात्मनः ।
यदग्निकाष्ठदृष्टान्तात्सामान्येन प्रवेशनम् ॥

---

१ ग. °क्ष्येवं के° । २ क. ख. ङ. 'ष्ठलोष्टादि' । ३ ग. स स्वतः । ४ ग. स प्रवि° ।
५ ग. °नाप्त्यैवँ ।

तदधिष्ठानरूपेण कार्यव्यापित्वमुच्यते ।
अधिष्ठानारोप्यभावमन्तरेण न कुत्रचित् ॥
व्याप्यव्यापकयोः कृत्स्नस्वरूपव्याप्तिरिष्यते ।
अत्यन्तभिन्नयोर्व्याप्तिर्नेहि दृष्टा गवाश्वयोः ॥
नाप्यत्यन्तमभिन्नस्य व्याप्यव्यापकवर्जनात् ।
भेदाभेदौ वास्तवौ तु दुर्लभौ तेन शिष्यते ॥
अधिष्ठानारोपितयोरेवं व्याप्तिर्बलादियम् ।
तमसैव यथा सर्पः स्वक्प्राविष्टा न तु स्वतः ॥
प्रत्यगज्ञानकार्याणि स्वात्मैवं मायया बलात् ।
व्यापित्वमुपलभ्यत्वमिति द्वेधा प्रवेशनम् ॥
सिद्धं प्रवेशाद्ये दोषास्तान्निराचक्ष्महेऽधुना ।
पर एव प्रविष्टश्चेत्प्रविष्टानामनेकतः ॥
तदनन्यत्वतः प्राप्ता महेशस्याप्यनेकता ।
नैष दोषोऽस्य चोद्यस्य विपरीतत्वसंभवात् ॥
बहूनामेकतादात्म्यादेकत्वं किं न चोद्यते ।
नियामकश्चाऽऽगमोऽत्र स च भेदं निवारयेत् ॥
कल्प्यैः सर्पादिभिर्भेदैर्न च रज्जुर्विभिद्यते ।
एको देवो निविष्टोऽत्र बहुधेति श्रुतीरणात् ॥
वियद्वदेक एवैष ईश्वरोऽभ्युपगम्यताम् ।
संसारित्वात्प्रविष्टानां परस्य तदभेदतः ॥
संसारित्वं प्रसक्तं चेन्न क्षुधाद्यत्ययश्रुतेः ।
सुखदुःखविमोहादिदर्शनान्नेति चेन्न तत् ॥
न लिप्यते लोकदुःखैर्लोकबाह्य इति श्रुतेः ।
उपाधिजनितो योऽयं चिदाभासोऽवभासते ॥
दुःखाद्यनुभवस्तत्र सावकाशो भविष्यति ।
दुःखी यदि भवेदात्मा कः साक्षी दुःखिनो भवेत् ॥
दुःखिनः साक्षिता नैव साक्षिणो दुःखिता तथा ।
नर्ते स्याद्विक्रियां दुःखी साक्षिता का विकारिणः ॥
धीविक्रियासहस्राणां साक्ष्यतोऽहमविक्रियः ।
शरीरेन्द्रियसंघात आत्मत्वेनाभिमानिनीम् ॥

---

१ क. ख. ग. ङ. प्रविष्टा ये दो° ।

चिदाभासयुतां बुद्धिं विशिषन्ति सुखादयः ।
उदासीनो यथा पश्येद्दण्डिनं कलहोद्यतम् ॥
सुखदुःखादिमद्बुद्धिं साक्षी तद्वदसंहतः ।
एवं सति पराच्येव दुःखं प्रत्यक्षमीक्ष्यताम् ॥
प्रतीच्यात्मनि वेदोऽयमक्षादीनि निषेधति ।
विज्ञातारमरे केन विजानीयादिति श्रुतिः ।
विदिताविदिताभ्यां तदन्यदेवेति च श्रुतिः ॥
अहं दुःखीतिविज्ञानमात्मच्छायैककर्मकम् ।
आत्मन्यारोप्यते भ्रान्तैर्विद्वद्भिश्चोपचर्यते ॥
नासिकाग्रे महद्दुःखं पादाङ्गुष्ठाग्र इत्यपि ।
देहावयवगं दृष्टं दुःखमात्मनि तत्कथम् ॥
प्रतीचि चेद्भवेद्दुःखं व्याप्नुयाद्बोधवद्वपुः ।
चिद्वद्द्रष्टृस्वरूपत्वात्प्रतिकूलं च नो भवेत् ॥
आत्मनश्चैव भोगाय सर्वं प्रियमिति श्रुतेः ।
सुखमात्मैकविषयमिति चेत्तन्न युज्यते ॥
यत्र वा अन्यत्पश्यति स्यात्तत्रान्योऽन्यत्प्रपश्यति ।
इति भ्रान्तात्मविषयं श्रुतं द्वैतं सुखादिकम् ॥
यत्र त्वात्मैव सर्वं स्यात्तत्र कः केन पश्यति ।
इति बुद्धात्मनि द्वैतं सुखदुःखादि वारितम् ॥
तुभ्यं न रोचते पापान्मया त्वित्यनुभूयते ।
प्रत्यक्प्रवणया दृष्ट्या संसारः कोऽपि नाऽऽत्मनि ॥
इच्छाद्वेषादिमानात्मेत्येवं समयबन्धनम् ।
तार्किकैः क्रियतां तत्तु नैव युक्त्योपपद्यते ॥
नित्यानुमेय आत्मा चेन्मनसा तस्य दुःखिता ।
न भयाद्दृश्य आत्मा चेद्द्रष्टृभावः प्रसज्यते ॥
दृश्यत्वं द्रष्टृता चास्य निरंशत्वान्न युज्यते ।
सांशत्वे स्यादनित्यत्वं नातो दुःखित्वमात्मनः ॥
अदुःखित्वे परस्येष्टे तदन्यस्याप्यभावतः ।
कस्य दुःखनिवृत्त्यर्थमारब्धोपनिषत्त्वया ॥
प्रत्यगज्ञानहेतूत्थदुःखित्वादिभ्रमोऽत्र यः ।
तद्ध्वंसमात्रसिद्ध्यर्थमारब्धोपनिषन्मया ॥

---

१ ग °द्द्रष्टुः स्व° । २ ग. घ. सर्वः । ३ ख ग. कं ।

नवसंख्येयमात्रेक्षी दशमो बिभ्रमाद्यथा।
न वेत्ति दशमोऽस्मीति वीक्षमाणोऽपि तान्नव ॥
निःशेषानात्मदृक्तद्वदनिर्ज्ञातात्मतत्त्वकः।
न वेत्त्यैकात्म्यमस्तीति वीक्षमाणोऽप्यनात्मनः ॥
दशमोऽसीतिवाक्योत्थसम्यग्ज्ञानानलार्चिषा।
प्लुष्टात्मदशमाज्ञानो दशमोऽस्मीति वीक्षते ॥
तथा तत्त्वमसीत्यादिवाक्योत्थज्ञानवह्निना।
प्लुष्टाऽनात्मतमस्तज्जं चैकात्म्यं प्रतिपद्यते ॥
प्रत्यगज्ञानहेतूत्थशा[illegible]धनः।
तद्विरुद्धं निजैकात्म्यं प्रत्यपद्यत मायया ॥
प्रविष्टमुपजीव्यापि दोषः कोऽपि न वादिभिः।
इहाऽऽपादयितुं शक्यः प्रवेशस्तेन सुस्थितः" ॥ इति।

अन्यान्यपि प्रवेशवाक्यान्येवं व्याख्येयानि। "पुरः पुरुष आविशत्" इति **मधुब्राह्मण**वाक्यम्। "विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते मायथैव" इत्युत्तरतापनीयवाक्यम्। सर्वगतस्य देहे प्रवेशाय प्राणवायुरूपोपाधिः साधनम्। तथा च **मैत्रेयोपनिषद्यामनन्ति**—"स वायुमिवाऽऽत्मानं कृत्वाऽभ्यन्तरं प्राविशत्" इति। तस्य वायोः प्रवेशनिर्गमावात्मन्यध्यारोप्य व्यवह्रियेते। तदे**तदाथर्वणिकैः** पठ्यते—"स ईक्षांचक्रे कस्मिन्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत" इति। यद्यपि लिङ्गदेहः कृत्स्नोऽप्यात्मनः स्थूलशरीरे प्रवेशोपाधिस्तथाऽपि प्राणस्य तत्र प्राधान्यं द्रष्टव्यम्। स च लिङ्गोपाधिः पादाग्रयोः प्रविश्योर्ध्वमारुह्योपरि स्थितयोरूर्वोरुदर उरसि शिरसि च प्रतितिष्ठति। तदेतदै**तरेयिणः**—"तं प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषम्" इत्यादिना समामनन्ति। ननु "स ईक्षत कतरेण प्रपद्ये" इति वाक्येन परमात्मनः प्रवेशद्वारविचारमाम्नाय "स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत" इति **वाक्येन** मूर्धन्यवस्थितं सुषुम्नाग्ररूपं द्वारं भित्त्वा तेन द्वारेणान्तराविशत्, इ**त्यैतरेयिण** एव समामनन्ति। अतो वाक्ययोर्विरोध इति चेन्न। विषयभेदेन व्यवस्थितत्वात्। लौकिकव्यवहारहेतोर्लिङ्गदेहस्य पादाग्रप्रवेशः। तत्त्वाभिव्यञ्जिकायाः समाधिशब्दवाच्यायाः एकाग्रायाश्चित्तवृत्तेः सुषुम्नायां संभवेन तदुपाधिकस्य तत्र प्रवेश इति व्यवस्था। एतदेवाभिप्रेत्याऽऽम्नायते—"सुषुम्ना तु परे लीना विरजा ब्रह्मरूपिणी" इति। यदप्यै**तरेयिण** आमनन्ति—"अग्निर्वाग्भूत्वा मुखं प्राविशत्। वायुः

१ ग °मेऽस्तीति। २ ख प्लुष्ट्वाऽऽत्म°। ३ ख. °ज्ञानं द्र°। ४ घ. °म्नारू°।

प्राणो भूत्वा नासिके प्राविशत्" इत्यादि । तत्र पादाग्रद्वारा देहे प्रविष्टस्य लिङ्गशरीरस्यावयवा वागादयः स्वस्वदेवताभिरग्न्यादिभिरनुगृहीता मुखच्छिद्रादिगोलकेषु व्यवस्थिता इत्येतावद्विवक्षितम् । यदपि **च्छन्दोगै**राम्नायते—"अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" इति, । तत्र प्राणधारकत्वं जीवत्वं तेनोपाधिना युक्तः प्रविशति । तदेवं सर्वासामपि **श्रुतीनां** पर्यालोचनया परमात्मनो जीवत्वेन प्रवेश इति सिद्धम् ।

अथ मीमांसा । तत्र जीवस्य नामरूपस्रष्टृत्वाभावो **द्वितीयाध्यायस्य चतुर्थपादे*** चिन्तितः—

" नामरूपव्याकरणे जीवः कर्ताऽथवेश्वरः ।
अनेन जीवेनेत्युक्तेर्व्याकर्ता जीव इष्यते ॥
जीवान्वयः प्रवेशेन संनिधेः सर्वसर्जने ।
जीवोऽशक्तः शक्त ईश उत्तमोक्तिस्तथेक्षितुः ॥

ईश्वरेण पञ्चभूतेषु सृष्टेषु भौतिकयोर्दृश्यमानयोर्महीधरादिनामरूपयोर्जीव एव स्रष्टा स्यात् । कुतः । " अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि " इति जीवरूपस्यैव सृष्टावन्वयश्रवणादिति प्राप्ते ब्रूमः—जीवेनानुप्रविश्येतिप्रवेशने जीवोऽन्वेति संनिहितत्वात् । जीवेन व्याकरवाणीत्युक्तौ व्यवहितान्वयः स्यात् । नहि जीवस्य गिरिनदीनिर्माणे शक्तिरस्ति । ईश्वरस्तु सर्वशक्तियुक्तः "पराऽस्य शक्तिर्विविधा" इति **श्रवणात्** । किंच व्याकरवाणीत्युत्तमपुरुषोऽपीश्वरपक्षे समञ्जसः । तस्मादीश्वर एव नामरूपयोः स्रष्टा । कथं तर्हि घटपटादौ कुलालादेर्निर्मातृत्वम्, ईश्वरप्रेरणादिति ब्रूमः । तस्मादीश्वर एव सर्वकर्तेति सिद्धम् " ।

तत्रैव **तृतीयपादे दशमाधिकरणमारभ्य सप्तदशाधिकरणपर्यन्तैरष्टभिरधिकरणै**र्जीवविचाराः प्रवर्तिताः । तत्र = **दशमाधिकरणमारचयति**—

" जीवस्य जन्ममरणे वपुषो वाऽऽत्मनो हि ते ।
जातो मे पुत्र इत्युक्तेर्जातकर्मादितस्तथा ॥
मुख्ये ते वपुषो भाक्ते जीवस्यैते अपेक्ष्य हि ।
जातकर्म च लोकोक्तिर्जीवापेतेतिशास्त्रतः ॥

लोके जातो मे पुत्र इति व्यवहाराच्छास्त्रे जातकर्मादिसंस्कारोक्तेश्च जन्ममरणे जीवस्येति प्राप्ते ब्रूमः—जीवस्य जन्ममरणाङ्गीकारे कृतनाशाकृताभ्यागमप्रसङ्गस्

---

* संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्–ब्र० सू० अ० २ पा० ४ अ० ९ सू० २० । = चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ब्र०सू०अ० २ पा० ३ अ० १० सू० १६

---

१ ब. प्रवेश इति । २ ब. °किरये° ।

दुर्वारत्वादेहगते एव जन्ममरणे जीवस्योपचर्येते । औपचारिके एव ते अपेक्ष्य लोकव्यवहारकर्मशास्त्रयोः प्रवृत्तिः । उपनिषच्छास्त्रं तु जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति । जीवविमुक्तस्यैव शरीरस्य मुख्यमरणमभिधाय जीवस्य तन्निराचष्टे । तस्माद्वपुषो जन्ममरणे "

*एकादशाधिकरणमारचयति—

" कल्पादौ ब्रह्मणो जीवो वियद्वज्जायते न वा ।
सृष्टेः प्रागद्वयत्वोक्तेर्जायते विस्फुलिङ्गवत् ॥
ब्रह्माद्वयं जातबुद्धौ जीवत्वेन विशेत्स्वयम् ।
[illegible]ं जीवजन्म नित्यत्वं वस्तुतः श्रुतम् ॥

" एकमेवाद्वितीयम् " इति सृष्टेः प्रागद्वयत्वं श्रूयमाणं ब्रह्मव्यतिरिक्तस्य जीवस्यानुत्पत्तौ नोपपद्यते । श्रुतिश्च विस्फुलिङ्गदृष्टान्तेन जीवस्योत्पत्तिं प्रतिपादयति— ' यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मानो व्युच्चरन्ति " इति । तस्मात्कल्पादौ वियदादिवद्ब्रह्मणो जीवो जायत इति प्राप्ते ब्रूमः—यदद्वयं ब्रह्म तदेव जातायां बुद्धौ जीवरूपेण प्रविशति । " तत्सृष्ट्वा तदेवानुप्राविशत् " इति श्रुतेः । अतो जीवानुत्पत्तौ नाद्वयश्रुतिविरोधः । विस्फुलिङ्गश्रुतिस्त्वौपाधिकजन्माभिप्रायेण प्रवृत्ता । अन्यथा कृतनाशाकृताभ्यागमादिदोषः स्यात् । वस्तुतत्त्वाभिप्रायेण तु नित्यत्वं श्रुतिर्ब्रूते—"नित्यो नित्यानां चेतनश्चेतनानाम् " इति । तस्मात्कल्पादौ जीवो नोत्पद्यते " ।

+द्वादशाधिकरणमाचयति—

" अचिद्रूपोऽथ चिद्रूपो जीवोऽचिद्रूप इष्यते ।
चिदभावात्सुषुप्त्यादौ जाग्रच्चिन्मनसा कृता ॥
ब्रह्मत्वादेव चिद्रूपश्चित्सुषुप्तौ न लुप्यते ।
द्वैतादृष्टिर्द्वैतलोपान्न हि द्रष्टुरिति श्रुतेः ॥

तार्किका मन्यन्ते—सुषुप्तिमूर्छासमाधिषु चैतन्याभावादचिद्रूपो जीवः । जागरणे चात्ममनःसंयोगाच्चैतन्याख्यो गुणो जायत इति । तदसत् । चिद्रूपस्य ब्रह्मण एव जीवरूपेण प्रवेशश्रवणात् । न च चैतन्यं सुषुप्त्यादौ लुप्यते सुषुप्त्यादिसाक्षित्वेनावस्थानात् । अन्यथा सुषुप्त्यादिपरामर्शायोगात् । कथं तर्हि सुषुप्त्यादौ द्वैतप्रतीति-

---

* नाऽऽत्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः—ब्र० सू० अ० २ पा० ३ अ० ११ सू० १७ । + ज्ञोऽत एव—ब्र० सू० अ० २ पा० ३ अ० १२ सू० १८ ।

---

१ ख. मुख्यं म° । २ ग. एवाऽऽत्मा° । ३ क. ख. ङ. °यात्प्रवृ° । ४ घ. °शादि° । ५ शादिदोषस्योक्तत्वात् । घ° । ५ ख. °ताप्राप्तिरि° ।

रिति चेद्द्वैतलोपादिति ब्रूमः । तथा च श्रुतिः—" यद्वै तन्न पश्यति पश्यैन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत् " इति । अस्यायमर्थः—तत्र सुषुप्तौ जीवः किमपि न पश्यतीति यल्लौकिकैरुच्यते तदसत् । पश्यन्नेव जीवस्तदानीं न पश्यतीति भ्रान्त्या केवलं व्यपदिश्यते । कथं तद्दर्शनमित्यत्र हेतुरुच्यते—द्रष्टुरात्मनः स्वरूपभूताया दृष्टेर्लोपो नहि विद्यते विनाशरहितस्वभावत्वात् । अन्यथा लोपवादिनोऽपि निःसाक्षिकस्य लोपस्य वक्तुमशक्यत्वात् । कथं तर्हि लौकिकानां न पश्यतीतिभ्रम इत्यत्र हेतुरुच्यते—यद्ब्रह्मचैतन्यादन्यत्क्रियाकारकफलरूपेण विभक्तं जगदार्ष्यं द्वितीयं वस्तु तन्नास्ति तस्य स्वकारणे लीनत्वात् । अतो जागरण इव द्रष्टृदृश्यदर्शनव्यवहाराणामभावान्न पश्यतीति लौकिकानां भ्रम इति । तस्माच्चिद्रूपो जीवः " ।

***त्रयोदशाधिकरण**मारचयति—

" जीवोऽणुः सर्वगो वा स्यादेषोऽणुरितिवाक्यतः ।
उत्क्रान्तिगत्यागमनश्रवणाच्चाणुरेव सः ॥
साभासबुद्ध्यणुत्वेन तदुपाधित्वतोऽणुता ।
जीवस्य सर्वगत्वं तु स्वतो ब्रह्मत्वतः श्रुतम् ॥

" एषोऽणुरात्मा चेतसा वेदितव्यः " इत्यणुत्वं श्रुतम् । " अस्माच्छरीरादुत्क्रामति " इत्युत्क्रान्तिः । " चन्द्रमसमेव ते सर्वे गच्छन्ति " इति गतिः । " तस्माल्लोकात्पुनरे(रै)ति " इत्यागमनम् । न ह्युत्क्रान्त्यादयः सर्वगतस्योपपद्यन्ते । मध्यमपरिमाणस्य तदुपपत्तावप्यणुत्वश्रुतिर्विरुध्यते । अनित्यत्वं च दुर्वारम् । तस्मादणुर्जीव इति प्राप्ते ब्रूमः—चैतन्यप्रतिबिम्बसहिता बुद्धिरसर्वगता तदुपाधिकत्वाज्जीवस्याणुत्वोत्क्रान्त्यादय उपपन्नाः । स्वतस्तु जीवस्य ब्रह्मरूपत्वात्सर्वगतत्वम् । " स वा एष महानज आत्मा " " सर्वव्यापी सर्वभूतान्तरात्मा " इत्यादौ सर्वगतत्वं श्रुतम् । तस्मात्सर्वगतो जीवः " ।

=चतुर्दशाधिकरणमारचयति—

" जीवोऽकर्ताऽथवा कर्ता धियः कर्तृत्वसंभवात् ।
जीवकर्तृतया किं स्यादित्याहुः **सांख्यमानिनः** ॥

---

* उत्क्रान्तिगत्यागतीनाम्—ब्र० सू० अ० २ पा० ३ अ० १३ सू० १९ । = कर्ता शास्त्रार्थवत्त्वात्—ब्र० सू० अ० २ पा० ३ अ० १४ सू० ३३ ।

---

१ ग °श्यन्नेत° । २ ब. °र्थं दर्श° । ३ ब. °तत्वा° । ४ ब. °ते ब्रह्म° । ५ घ. °दन्यात्क्रि° । ६ ब. °ल्यं यद्द्वै° । ७ क. ख. ङ. °तो गर° ।

करणत्वान्न धीः कर्त्री यागश्रवणलौकिकाः ।
व्यापारा न विना कर्त्रा कस्माज्जीवस्य कर्तृता ॥

बुद्धेः परिणामित्वेन क्रियावेशात्मकं कर्तृत्वं संभवति न त्वसङ्गस्याऽऽत्मन इति यत्सांख्यैरुक्तं तदसंगतम् । करणत्वेन बलहृच्छक्तिकाया बुद्धेः कर्तृता कल्पयितुं न शक्या । कुठारादावदर्शनात् । बुद्धेः कर्तृत्वेन करणान्तरस्य कल्पनीयत्वाच्च । न च मा भूत्कर्तृतेति वाच्यम् । पूर्वकाण्डोक्तयागादिव्यापाराणामुत्तरकाण्डोक्तश्रवणादिव्यापाराणां लौकिककृष्यादिव्यापाराणां च कर्तृसापेक्षत्वात् । तस्माज्जीवः कर्ता " ।

*पञ्चदशाधिकरणमारचयति—

"कर्तृत्वं वास्तवं किंवा कल्पितं वास्तवं भवेत् ।
यजेतेत्यादिशास्त्रेण सिद्धस्याबाधितत्वतः ॥
असङ्गो हीति तद्बाधात्स्फटिके रक्ततेव[2] तत् ।
अध्यस्तं धीचक्षुरादिकरणोपाधिसंनिधेः ॥

पूर्वाधिकरणे[3] प्रतिपादितस्य कर्तृत्वस्य बाधाभावाद्वास्तवं तदिति प्राप्ते ब्रूमः— " असङ्गो ह्ययं पुरुषः " इति श्रुत्या कर्तृत्वमसङ्गो बाध्यते । यथा जपाकुसुमसंनिधिवशात्स्फटिके रक्तत्वमध्यस्तं तथाऽन्तःकरणसंनिधिवशात्कर्तृत्वमात्मन्यध्यस्यते " ।

×षोडशाधिकरणमारचयति—

"प्रवर्तकोऽस्य रागादिरीशो वा रागतः कृषौ ।
दृष्टा प्रवृत्तिर्वैषम्यमीशस्य प्रेरणे भवेत् ॥
सस्येषु वृष्टिवज्जीवेष्वीशस्याविषमत्वतः ।
रागोऽन्तर्याम्यधीनोऽत ईश्वरोऽस्य प्रवर्तकः ॥

लोके कृषीवलादीनां रागद्वेषावेव प्रवर्तकौ दृष्टौ । तदनुसाराद्धर्माधर्मकर्तुर्जीवस्यापि तावेव प्रवर्तकावभ्युपेयौ । ईश्वरस्य प्रवर्तकत्वे कांश्चिज्जीवान्धर्मे प्रवर्तयति कांश्चिदधर्म इति वैषम्यं दुर्वारम् । तस्मान्नेश्वरः प्रवर्तक इति प्राप्ते ब्रूमः—न तावदीश्वरे वैषम्यदोषप्रसङ्गः । वृष्टिवत्साधारणनिमित्तत्वात् । यथा वृष्टेः सस्याभिवृद्धिहेतुत्वेऽपि व्रीहियवादिवैषम्ये बीजानामेव निमित्तत्वम् । तथेश्वरस्य यथायथं जीवाः प्रवर्तन्तामित्यभ्यनु-

---

* यथा च तक्षोभयथा—ब्र० सू० अ० २ पा० ३ अ० १५ सू० ४० । × परात्तु तच्छ्रुतेः—ब्र० सू० अ० २ पा० ३ अ० १६ सू० ४१ ।

---

१ घ. कर्तृशक्तिर्न कल्पयितुं श° । २ घ. °तेतिवत् । ३ घ. °रणप° । ४ घ. °स्तथ-मिति । ५ घ. °त्वसंयोगो बा° । ६ घ. °स्य जी° ।

ज्ञया साधारणप्रवर्तकत्वेऽपि न वैषम्यम् । पूर्वकृतकर्मणां वासनानां च वैषम्यहेतुत्वात् । कर्मणां फलहेतुत्वमेव न कर्मान्तरहेतुत्वमिति चेत् । सत्यम् । सुखदुःखरूपस्य फलस्य प्रदानाय जीवं व्यापारयत्कर्मार्थात्कर्मान्तरमपि निष्पादयतीति दुर्वारं[1] हेतुत्वम् । वासनानां तु साक्षादेव कर्महेतुत्वम् । तथा चेश्वरस्य कुतो वैषम्यप्रसङ्गः । यत्तु रागस्य प्रवर्तकत्वदर्शनमुदाहृतं तत्तथैवास्तु[2] नैतावतेश्वरस्य प्रवर्तकत्वहानिः । सर्वान्तर्यामिणेश्वरेण रागस्यापि नियम्यमानत्वात् । तस्मादीश्वरो जीवस्य प्रवर्तकः " ।

* **सप्तदशाधिकरण**मारचयति—

"किं जीवेश्वरसांकर्यं व्यवस्था वा श्रुतिद्वयात् ।
अभेदभेदविषयात्सांकर्यं न निवार्यते ॥
अंशोऽवच्छिन्न आभास इत्यौपाधिककल्पनैः ।
जीवेशयोर्व्यवस्था स्याज्जीवानां च परस्परम् ॥

तत्त्वमस्यादिश्रुतिर्जीवेशयोरभेदं प्रतिपादयति । आत्मा द्रष्टव्य इत्यादिना द्रष्टृद्रष्टव्यरूपेण भेदः प्रतीयते । तथा च सति भेदश्रुतिबलात्तावज्जीवो नास्तीत्यपलपितुमशक्यम् । अभेदश्रुत्या चेश्वरात्पृथक्त्वेन व्यवस्थापयितुं न शक्यते । तस्माद्विद्यमानस्य जीवस्येश्वरेण सांकर्यं दुर्वारम् । परस्परं च जीवानामीश्वराभेदद्वारा सांकर्यमानुषङ्गिकम् । तस्माद्ब्रह्मवादिनो न जीवेश्वरव्यवस्थेति प्राप्ते ब्रूमः—यद्यपि गोमहिषवज्जीवेश्वरयोरत्यन्तं भेदो वास्तवो नास्ति तथाऽपि व्यवहारदशायामुपाधिकल्पितं भेदमाश्रित्य शास्त्राणि त्रेधा जीवं निरूपयन्ति । "ममैवांशो जीवलोके जीवभूतः सनातनः" इत्यंशत्वमवगम्यते । "स समानः सन्नुभौ लोकावनुसंचरति" इति श्रुतौ विज्ञानमयस्य जीवस्य विज्ञानशब्दवाच्यया बुद्ध्या समानपरिमाणनिर्देशाद्घटाकाशवदवच्छिन्नत्वं प्रतीयते ।

" एक एव तु भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् " ॥

इत्याभासत्वमवगम्यते । तस्मात्सुलभैव ब्रह्मवादिनो जीवेश्वरव्यवस्था । जीवानां च परस्परमनेकजलपात्रस्थबहुसूर्यप्रतिबिम्बवद्व्यवहारव्यवस्था सुतरामुपपद्यते । तस्मान्न कोऽपि दोष इति सिद्धम् " ।

---

* अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके—ब्र० सू० अ० २ पा० ३ अ० १७ सू० ४३ ।

---

१ घ. 'रं तद्धेतु' । २ ख. 'ध हे' । ३ क. ख ङ. 'त्तथाऽस्तु ४ घ. 'स्तु न ता' । ५ क ग. ङ. 'त्यन्तभे' । ६ घ. इत्येवमंश' ।

जीवस्य लोकान्तरगमनरूपः संसारप्रकारस्तृतीयाध्यायस्य प्रथमपादे षड्भिरधिकरणैर्विचारितः। तत्र *प्रथमाधिकरणमारचयति—

" अवेष्टितो वेष्टितो वा भूतसूक्ष्मैः पुमान्व्रजेत्।
भूतानां सुलभत्वेन यात्यवेष्टित एव सः॥
बीजानां दुर्लभत्वेन निराधारेन्द्रियागतेः॥
पञ्चमाहुत्यवृत्तेश्च जीवस्तैर्याति वेष्टितः॥

पूर्वपादप्रतिपादितः प्राणोपाधिको जीवः शरीरान्तरप्राप्तिवेलायामितो निर्गच्छन्भाविशरीरबीजैः सूक्ष्मभूतैरवेष्टितो गच्छति। पञ्चभूतानां सर्वत्र सुलभत्वेनेतो नयनस्य निरर्थकत्वादिति प्राप्ते ब्रूमः—भूतमात्रस्य सुलभत्वेऽपि देहबीजानि न सर्वत्र सुलभानि। तस्मादितो नेतव्यानि। किंच जीवोपाधिभूतेन्द्रियाणां भूताधारत्वमन्तरेण परलोकगमनं न संभवति। जीवनदशायामदर्शनात्। श्रुतिश्चैवमाह—" पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति " इति। अस्यायमर्थः— द्युलोकपर्जन्यपृथिवीपुरुषयोषितः पञ्च पदार्था उपासनायामग्नित्वेन परिकल्पिताः। तेष्वग्निषु स्वर्गाय गच्छन्पुनरागच्छंश्च जीव आहुतित्वेन परिकल्पितः। इष्टापूर्तकारी जीवः स्वर्गमारुह्योपभोगेन कर्मणि क्षीणे पर्जन्ये पतित्वा वृष्टिरूपेण भूमिं प्राप्यान्नद्वारेण पुरुषं प्राप्य रेतोद्वारेण योषितं प्रविश्य शरीरं गृह्णाति। ततोऽप्शब्दोपलक्षितानि देहबीजानि पञ्च भूतानि जीवेन सह द्युलोकादिपञ्चसु स्थानेषु गत्वा पञ्चमे स्थाने शरीरभावं प्राप्य पुरुषशब्दवाच्यानि भवन्तीति। तस्माद्भूतैर्वेष्टित एव परलोकं गच्छति "।

+द्वितीयाधिकरणमारचयति—

" स्वर्गावरोही क्षीणानुशयः सानुशयोऽथवा।
यावत्संपातवचनात्क्षीणानुशय इष्यते॥
जातमात्रस्य भोगित्वादैकभव्यविरोधतः।
चरणश्रुतितः सानुशयः कर्मान्तरैरयम्॥

स्वर्गमुपभुज्य ततोऽवरोहन्पुरुषो निरनुशय इहाऽऽगच्छति। अनुशयो नाम कर्मशेषः। जीवमनुशेत इति व्युत्पत्तेः। न च स्वर्गादवरोहतोऽनुशयः संभवति। अनुशयफलस्य सर्वस्य तत्रैवोपभुक्तत्वात्। अत एवावरोहविषया श्रुतिः—" यावत्संपातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते " इत्याह। संपतत्यनेन कर्मणा स्वर्गमिति संपातः

* तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्—ब्र० सू० अ० ३ पा० १ अ० १ सू० १। + कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च—ब्र०सू०अ० ३ पा० १ अ० २ सू० ८।

१ ग. घ. °पादे प्र°। २ घ. °लोके ग°। ३ क. ग. घ. ङ. लोके ग°। ४ क, ख, ङ. °हा यथेत°। ५ ख. °नरावर्तने " इ°।

कर्मसमूहः संपातमनतिक्रम्य यावत्संपातं निःशेषं कर्मफलं भोक्तुं तत्रोषित्वेत्यर्थः। तस्मात्कर्मशेषरहितोऽवरोहतीति प्राप्ते ब्रूमः—स्वर्गार्थमनुष्ठितस्य कर्मणः साकल्येनोपभोगेऽप्यनुपभुक्तानि संचितानि पुण्यपापानि बहून्यस्य विद्यन्ते। अन्यथा सद्यःसमुत्पन्नस्य बालस्येह जन्मन्यनुष्ठितयोर्धर्माधर्मयोरभावात्सुखदुःखयोर्न स्यात्। यदत्र कौश्चिदुच्यते—एकस्मिञ्जन्मन्यनुष्ठितः कर्मसमूह उत्तरस्मिन्नेकस्मिन्नेव जन्मन्युपभोगेन क्षीयत इति। तदसत्। इन्द्रादिपदप्रापकाणामश्वमेधादीनां विड्वराहादिदेहप्रापकाणां पापानां च युगपदुपभोगासंभवेनैकभाविकः कर्मानुशय इतिमतस्य विरुद्धत्वात्। ततश्चैकस्मिञ्जन्मन्यनुष्ठितानां मध्ये ज्योतिष्टोमादिकर्मणि भुक्तेऽपि कुतो न कर्मान्तराण्यवशिष्येरन्। यावत्संपातशब्दश्च स्वर्गप्रदकर्मविषयो न त्वितरकर्मविषयः। **श्रुतिश्च** स्वर्गादवरुह्य पञ्चम्यामाहुतौ शरीरं गृह्णतां पुरुषाणां च तद्भेदत्वोः पुण्यपापयोः सद्भावं दर्शयति—"य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्ब्राह्मणयोनिं वा क्षत्रियजयोनिं वा वैश्ययोनिं वा। अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरञ्श्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वा" इति। रमणीयचरणाः सुकृतकर्माणः कपूयचरणाः पापकर्माणः। अभ्याशो ह यदित्यव्ययसमुदायस्य क्षिप्रत्वमर्थः। तदेवं सानुशया अवरोहन्तीति स्थितम्"।

***तृतीयाधिकरण**मारचयति—

"चन्द्रं याति न वा पापी ते सर्व इति वाक्यतः।
पञ्चमाहुतिलाभार्थं भोगाभावेऽपि यात्यसौ॥
भोगार्थमेव गमनमाहुतिर्व्यभिचारिणी।
सर्वश्रुतिः सुकृतिनां याम्ये पापिगतिः श्रुता॥

"ये[1] वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" इति **श्रवणाच्चान्द्रमसाख्ये** स्वर्गे पापिनोऽपि गतिरस्ति। यद्यपि पापिनस्तत्र भोगो न संभवति तथाऽपि पुनरागत्य शरीरग्रहणे पञ्चमाहुतिलाभाय स्वर्गगतिरभ्युपेयेति प्राप्ते ब्रूमः—भोगार्थमेव स्वर्गगमनं न पञ्चमाहुतिलाभार्थं पञ्चमाहुतेर्व्यभिचारित्वाद्द्रोणादीनां योषिदाहुतेरभावात्सीतादीनां पुरुषाहुतेरप्यभावात्। "ते सर्वे" इति **श्रुतिस्तु** सुकृतिविषया। पापिनां तु यमलोके गतिः **श्रुता**—"वैवस्वतꣳ संगमनं जनानां यमꣳ राजानꣳ हविषा दुवस्यत" इति। पापिजनैर्गन्तव्यं यमं प्रीणयतेत्यर्थः। तस्मान्न पापिनां स्वर्गे गतिः"।

---

* अनिष्टादिकारिणामपि च श्रुतम्—ब्र० सू० अ० ३ पा० १ अ० ३ सू० १२।

---

१ ब, ये के। २ क, ग, °पापज°।

***चतुर्थाधिकरणमारचयति—**

"वियदादिस्वरूपत्वं तत्साम्यं वाऽवरोहिणः।
वायुर्भूत्वेत्यादिवाक्यात्तत्तद्भावं प्रपद्यते॥
खवत्सूक्ष्मो वायुवशो युक्तो धूमादिभिर्भवेत्।
अन्यस्यान्यस्वरूपत्वं न मुख्यमुपपद्यते॥

स्वर्गादवरोहेप्रकार एवं श्रूयते—" अथैतमेवाध्वानं पुनर्निवर्तन्ते। यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवति। अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति" इति। यथेतं यथा गतं तथेत्यर्थः। तत्र स्वर्गादवरोहतो जीवस्याऽऽकाशादिस्वरूपत्वं भवति। वायुर्भूत्वेत्यादिना तत्तद्भावप्रतिपत्तेः श्रुतत्वादिति प्राप्ते ब्रूमः—अन्यस्यान्यरूपत्वासंभवादाकाशप्राप्तिर्नामाऽऽकाशवत्सौक्ष्म्यं विवक्षितम्। वायुभावो वायुवशता। धूमादिभावो धूमादिभिः संपर्क इति निर्णयः"।

+पञ्चमाधिकरणमारचयति—

"व्रीह्यादेः प्राग्विलम्बेन त्वरया वाऽवरोहति।
तत्रानियम एव स्यान्नियामकविवर्जनात्॥
दुःखं व्रीह्यादिनिर्याणमिति तत्र विशेषितम्।
विलम्बस्तेन पूर्वत्र त्वराऽर्थादवसीयते॥

प्रवर्षणानन्तरं व्रीह्यादिभाव **आम्नायते**—" त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा जायन्ते" इति। प्रागेतस्मादव्रीह्यादिभावादाकाशादौ विलम्बत्वरयोर्नियामकत्वाभावादनियम इति प्राप्ते ब्रूमः—व्रीह्यादिभावमभिधायानन्तरम्—" अतो वै खलु दुर्निष्प्रपतरम्" इति व्रीह्यादिभावान्निर्गमनं दुःखमिति ब्रुवती श्रुतिर्व्रीह्यादौ विलम्बं विशेषयति। ततोऽर्थात्पूर्वत्र त्वरेत्यवसीयते"।

***षष्ठाधिकरणमारचयति—**

"व्रीह्यादौ जन्म तेषां स्यात्संश्लेषो वा जनिर्भवेत्।
जायन्त इति मुख्यत्वात्पशुहिंसादिपापतः॥
वैधान्न पापसंश्लेषः कर्मव्यापृत्यनुक्तितः।
श्वविप्रादौ मुख्यजनौ चरणव्यापृतिः श्रुता॥

---

* साभाव्यापत्तिरुपपत्तेः—ब्र० सू० अ० ३ पा० १ अ० ४ सू० २२। + नातिचिरेण विशेषात्—ब्र० सू० अ० ३ पा० १ अ० ५ सू० ६। *अन्याधिष्ठिते पूर्ववदभिलापात्—ब्र० सू० अ० ३ पा० १ अ० ६ सू० २४।

---

१ घ. °ह ए°। २ घ. अत्र। ३ घ. °न्यस्वरू°। ४ घ. °यतिरिति। ५ घ. दुःशकमि°। ६ घ. विलम्बनं। ७ घ. °त्पूर्वं त्व°।

आकाशादावेवं तिलव्रीह्यादौ न संश्लेषमात्रं किंतु व्रीह्यादिरूपेण मुख्यं जन्म विवक्षितम्। जायन्त इति श्रवणात्। न च स्वर्गे सुकृतफलमनुभूयावरोहतः पापफलरूपस्य स्थावरजन्मनोऽसंभवः। तद्धेतोः पशुहिंसादेर्विद्यमानत्वात्। तस्मान्मुख्यं जन्मेति प्राप्ते ब्रूमः—वैधत्वान्न पशुहिंसादिपापमतो जायन्त इति श्रुत्या संश्लेषमात्रं विवक्षितम्। न तु मुख्यं जन्म कर्मव्यापारानभिधानात्। यत्र तु मुख्यं जन्म विवक्षितं तत्र कर्मव्यापारमभिधत्ते- "रमणीयचरणाः कपूयचरणाः" इति। तस्मात्स्वर्गादवरोहतां व्रीह्यादौ संश्लेषमात्रमिति स्थितम्"।

तत्रैव द्वितीयपादे चतुर्भिराधिकरणैः स्वप्नाद्यवस्था विचारिताः। तत्र * **प्रथमाधिकरणमारचयति**—

"सत्या मिथ्याऽथवा स्वप्नदृष्टिः सत्या श्रुतीरणात्।
जाग्रद्देशाविशिष्टत्वादीश्वरेणैव निर्मिता॥
देशकालाद्यनौचित्याद्बाधितत्वाच्च सा मृषा।
अभावोक्तेर्द्वैतमात्रसाम्याज्जीवानुवादतः॥

"अथ रथान्रथयोगान्पथः सृजते" इति श्रुत्या स्वप्ने रथादीनां सृष्टिरीरिता। अतो वियदादिसृष्टिवद्व्यवहारदशायां सत्या भवितुमर्हति। न च जाग्रद्देशस्य स्वप्नदेशस्य च कंचिद्विशेषं पश्यामः। तत्काले भोजनादीनां तृप्त्याद्यर्थक्रियाकारित्वात्। अतो विमता सृष्टिः सत्येश्वरकर्तृकत्वाद्वियदादिसृष्टिवदिति प्राप्ते ब्रूमः—स्वप्नसृष्टिर्मृषा। कुतः। उचितदेशकालाद्यसंभवात्। न हि केशसहस्रांशपरिमिते नाडीमध्ये गिरिनदीसमुद्रादीनामुचितो देशोऽस्ति। न हि निशीथे शयानस्य सूर्यग्रहणोचितः कालोऽस्ति। नाप्यनुपनीतस्य बालस्य पुत्रोत्सवादिहर्षनिमित्तान्युचितानि। किंच स्वप्नोपलब्धानां पदार्थानां स्वप्न एव बाधो दृश्यते। कदाचित्तरुत्वेनावसीयमानः पदार्थस्तदैव गिरित्वेनावैसितो भवति। यदुक्तं स्वप्नसृष्टिं श्रुतिर्ब्रूत इति तत्रापि सा श्रुतिरभावपूर्विकामेव सृष्टिमाह—"न तत्र रथा रथयोगा न पन्थानो भवन्ति। अथ रथान्रथयोगान्पथः सृजते" इति वस्तुतोऽसन्तो रथाद्याः शुक्तिकारजतवदवैभासन्त इति श्रुतेरभिप्रायः। यदपि जाग्रत्साम्यमुक्तं तदप्यप्रयोजकम्। अनुचितदेशकालादेर्भूयसो वैलक्षण्यस्योक्तत्वात्। यदपीश्वरनिर्मितत्वमुक्तं तदप्यसत्। "एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः" इति जीवस्यैव स्वप्नभोगनिर्मातृत्वेन श्रुत्याऽप्युच्यमानत्वात्। तस्मात्स्वप्नसृष्टिर्मृषा"।

---

* संध्ये सृष्टिराह हि—ब्र० सू० अ० ३ पा० २ अ० १ सू० १।

---

१ घ. °व ब्री°। २ ख. मुख्यज°। ३ व. °पस्था°। ४ घ. °वसीयते। य°। ५ घ. °वदेव भा°। ६ घ. °व स्वाप्न°।

* द्वितीयाधिकरणमारचयति—

" नाडीपुरीतद्ब्रह्माणि विकल्पन्ते[1] सुषुप्तये ।
समुच्चितानि वैकार्थ्याद्विकल्पन्ते[2] यवादिवत् ।
समुच्चितानि नाडीभिरुपसृप्य[3] पुरीतति ।
हृत्स्थब्रह्माणि यात्यैक्यं विकल्पे त्वष्टदोषता ।

" आसु तदा नाडीषु सृप्तो[4] भवति " इति श्रुतौ सुषुप्तिकाले नाडीप्रवेशो गम्यते । " ताभिः प्रत्यवसृप्य पुरीतति शेते " इति श्रुतौ पुरीतदाश्रितत्वं प्रतीयते । " य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेते " इति श्रुत्यन्तरे[5]दाकाशशब्दवाच्यब्रह्माश्रितत्वं प्रतीयते । तान्येतानि नाड्यादिस्थानानि विकल्पितानि भवितुमर्हन्ति । एकप्रयोजनत्वात् । यथा व्रीहिभिर्यजेत यवैर्वा यजेतेत्यत्र पुरोडाशनिष्पादकत्वस्य प्रयोजनस्यैकत्वेन विकल्प आश्रितस्तथाऽत्रापि सुषुप्त्याख्यं प्रयोजनमेकम् । तस्मात्कदाचित्पुरीतति स्वपिति कदाचिन्नाडीषु स्वपिति [illegible] नाड्यादीनां विकल्पे प्राप्ते ब्रूमः—एकप्रयोजनत्वमसिद्धम् । पृथगुपयोगस्य सुवचत्वात् । तथा हि नाड्यस्तावच्चक्षुरादीन्द्रियेषु संचरतो जीवस्य हृदयनिष्ठं ब्रह्म गन्तुं मार्गभूता भविष्यन्ति । अत एव श्रुत्यन्तरे ताभिः प्रत्यवसृप्येति तृतीयया साधनत्वं नाडीनां श्रुतम् । हृदयवेष्टनरूपं तु पुरीतत्प्रासादादिवदावरकं भविष्यति । ब्रह्म तु मञ्चकवदाधारः । अतो यथा द्वारेण प्रविश्य प्रासादे पर्यङ्के शेते तथा नाडीभिः प्रत्यवसृप्य पुरीतति ब्रह्मणि जीवः शयिष्यत इत्युपकारभेदान्नाड्यादीनां समुच्चयः । सुषुप्तौ ब्रह्मणि जीवावस्थाने कुत आधाराधेयभावो न प्रतिभातीति चेदेकीभावादिति ब्रूमः । यथा सोदकः कुम्भस्तटाकजले प्रक्षिप्तो मग्नः सन्पृथङ्न प्रतिभाति तथाऽन्तःकरणोपाधिको जीव आवरकाज्ञानसहितो ब्रह्मणि मग्नत्वान्न पृथगवभासते । अत एव श्रुत्यन्तरं सुषुप्तौ जीवस्य ब्रह्मणा सह तादात्म्यसंपत्तिमाह—" सता सोम्य तदा संपन्नो भवति " इति । यस्तु विकल्पस्त्वयोक्तः सोऽष्टदोषग्रस्तत्वादनुपपन्नः । तथा हि—यदा जीवो नाडीषु शेते तदा पुरीतद्ब्रह्मवाक्ययोः प्राप्तं प्रामाण्यं परित्यक्तं स्यात् । अप्राप्तं चाप्रामाण्यं स्वी क्रियेत । यदा पुनः पुरीतद्ब्रह्मणोः शेते तदा पुरीतद्ब्रह्मवाक्ययोः पूर्वत्यक्तं प्रामाण्यं स्वी क्रियेत । पूर्वस्वीकृतं चाप्रामाण्यं परित्यज्येतेति प्राप्तपरित्याऽप्राप्तस्वीकारस्त्यक्तस्वीकारः स्वीकृ-

---

* तदभावो नाडीषु तच्छ्रुतेरात्मनि च—ब्र० सू० अ० ३ पा० २ अ० २ सू० ७ ।

---

१ क. ङ. °कल्पन्ते । २ क. घ. ङ °कल्पयन्ते । ३ ख. ङ सृप्ता । ४ ग. °रात्त्वाका° । ५ ख. °त्वप्र° । ६ क. ग. ङ. °पदेशस्य । ७ घ. संचरन्त्यो । ८ ख. घ. °सादवदावं । ९ क. ख. ङ. °धारम् । अतो । १० घ. प्रतीयत इति । ११ ख. घ. स्तडागज° । १२ ख. मग्नो न पृथक्प्रति° । घ. मग्नो न पृथग्भाति । १३ क. ग. घ. ङ °हिते ब्र° ।

तपरित्यागश्चेतिदोषचतुष्टयं पुरीतद्ब्रह्मवाक्यकोटौ । तथा नाडीवाक्यकोट्यामपि दोषचतुष्टये योजिते सत्यष्टौ दोषाः संपद्यन्ते । तस्मात्समुच्चय एव ग्राह्यो न तु विकल्पः " ।

*तृतीयाधिकरणमारचयति—

" यः कोऽप्यनियमेनात्र बुध्यते सुप्त एव वा ।
उदबिन्दोरिवाशक्तेर्नियन्तुं कोऽपि बुध्यते ॥
कर्माविद्यापरिच्छेदादुदबिन्दुर्विलक्षणः ।
स एव बुध्यते शास्त्रात्तदुपाधेः पुनर्भवात् ॥

यथा समुद्रे प्रक्षिप्तो जलबिन्दुः स एव नियमेन पुनरुद्धर्तुमशक्यस्तथा सुषुप्तौ ब्रह्मप्राप्तो यो जीवः स एव बुध्यत इति नियन्तुमशक्यत्वाद्यः कोऽपि बुध्यत इति प्राप्ते ब्रूमः—विषम उपन्यासः । चिद्रूपो जीवः कर्माविद्यावेष्टितो ब्रह्मणि निमज्जति । उदबिन्दुस्त्ववेष्टित इति वैषम्यम् । यथा गङ्गोदकपरिपूर्णः पिहितद्वारः काँचकुम्भः समुद्रे निक्षिप्तः पुनरुद्ध्रियते, तत्रत्यं गङ्गाजलं तदेव पुनर्विवेक्तुं शक्यते । तथा स एव जीवः प्रतिबुध्यताम् । अत एव श्रुतिराह—"व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तत्तत्तदा भवन्ति " इति । व्याघ्रादयो ये जीवाः सुप्तेः पूर्वं यच्छरीरं प्राप्य वर्तन्ते त एव जीवाः सुप्तेरुपरि प्रतिबुध्यमानास्तदेव शरीरं प्राप्नुवन्तीत्यर्थः । न च सुषुप्तौ ब्रह्मप्राप्तस्य जीवस्य मुक्तवत्पुनरुद्भवानुपपत्तिः । तदवच्छेदकस्योपाधेः सत्त्वेन तदुद्भवे जीवोद्भवसंभवात् । तस्माद्यः सुप्तः स एव प्रतिबुध्यते " ।

+चतुर्थाधिकरणमारचयति—

" किं मूर्छैका जाग्रदादौ किंवाऽवस्थान्तरं भवेत् ।
अन्यावस्था न प्रसिद्धा तेनैका जाग्रदादिषु ॥
न जाग्रत्स्वप्नयोरेका द्वैताभावान्न सुप्तता ।
मुखादिविकृतेस्तेनावस्थाऽन्या लोकसंमता ॥

जाग्रत्स्वप्नसुषुप्तिभ्योऽन्यस्या अवस्थाया अप्रसिद्धत्वान्मूर्छाया जाग्रदादावन्तर्भावे प्राप्ते ब्रूमः—परिशेषादवस्थान्तरमभ्युपेयम् । न तावज्जाग्रत्स्वप्नयोरन्तर्भावो द्वैतप्रतीत्यभावान्नापि सुषुप्तौ विलक्षणत्वात् । सुषुप्तः पुमान्प्रसन्नवदनः समश्वासो निष्कम्पशरीरो भवति । मूर्छितस्तु विकृतमुखो विषमश्वासः शरीरकम्पादियुक्तो भवति । यद्यपि जाग्र-

* स एव तु कर्मानुस्मृतिशब्दविधिभ्यः—ब्र० सू० अ० ३ पा० २ अ० ३ सू० ९ । + मुग्धेऽर्धसंपत्तिः परिशेषात्—ब्र० सू० अ० ३ पा० २ अ० ४ सू० १० ।

१ ख. ग. काञ्चनकुम्भः । २ ग. घ. °न्ति तदा भवन्तीति । ३ ख. घ. सुषुप्तेः । ४ घ. °दायन्त° ।

दादिवद्दैनंदिनत्वाभावान्न मूर्छाया बालकादिषु प्रसिद्धिरस्ति तथाऽपि कादाचित्कीं मूर्छावस्थां विज्ञाय वृद्धाश्चिकित्सन्ते। तस्मादन्येयमवस्था। तदेवमधिकरणचतुष्टयेन त्वंपदार्थः शोधितः। तत्र स्वप्नसृष्टेर्मिथ्यात्वेन सुखदुःखकर्तृत्वाद्यवभासेऽपि जीवोऽसङ्ग एवेति शोधितः। सुप्तौ ब्रह्मैक्येन तदेवासङ्गत्वमनुभावितम्। तस्यैव पुनः प्रतिबोधेनानित्यत्वशङ्का निराकृता। मूर्छाविचारेण श्वासादिसर्वव्यवहारलोपेऽपि मरणे जीवविनाशो न शङ्कनीय इति दर्शितम्"।

तदनुप्रविश्य। सच्च त्यच्चाभवत्। निरुक्तं चानिरुक्तं च। निलयनं चानिलयनं च। विज्ञानं चाविज्ञानं च। सत्यं चानृतं च सत्यमभवत्।

परमात्मनो देहे भोक्तृजीवरूपेण प्रवेशमुपजीव्य सद्भावं साधयित्वा भोग्यद्रव्याकारेणाप्येतत्साधयितुं तदाकारपरिणामं प्रदर्शयति—तदनुप्रविश्येत्यादिना। तत्सृष्टं देहजातं भोक्तृरूपेणानुप्रविश्यानन्तरं सदादिभोग्यवस्त्वाकारेण ब्रह्म परिणतमभूत्। सच्छब्देन प्रत्यक्षगम्यं पृथिव्यप्तेजोरूपं भूतत्रयमुच्यते। त्यच्छब्देन परोक्षं वाय्वाकाशरूपं भूतद्वयम्। बृहदारण्यके मूर्तामूर्तब्राह्मणे—"तदेतन्मूर्तं यदन्यद्वायोश्चान्तरिक्षाच्च" इति वाय्वाकाशव्यतिरिक्तस्य पृथिव्यादिभूतत्रयस्य मूर्तत्वमभिधाय "एतत्सत्" इति सच्छब्दवाच्यत्वं तस्योक्तम्। अथामूर्ते—"वायुश्चान्तरिक्षं च" इत्यभिधाय "एतत्त्यत्" इति त्यच्छब्दस्तत्र प्रयुक्तः। अतश्चाक्षुषत्वपरोक्षत्वाभ्यां विभक्तं यज्जगदस्ति तत्सर्वमत्र शब्दद्वयेनोपलक्ष्यते। चकारद्वयेन तयोरुभयोरभावौ समुच्चीयेते। एतच्चतुष्टयरूपेण ब्रह्म परिणतमभूत्। निःशेषेण वक्तुं शक्यं निरुक्तम्। घटोऽयं पुरोदेशवर्ती पृथुबुध्नोदराकारो मृन्मयः स्थूलो जलाधारक्षम इत्यादिना निःशेषेण वक्तुं शक्यते। तद्विपरीतमनिरुक्तम्। इक्षुक्षीरादिमाधुर्यावान्तरभेदः केतकीचम्पकादिगन्धावान्तरभेद इत्यादिकं सामान्याकारेणोच्यते। न तु निःशेषेण वक्तुं शक्यते। चकारौ पूर्ववत्। निलयनं नीडमाधारः पुष्पगुडादिः। तद्विपरीतमनिलयनम्। आधेयो गन्धरसादिः। विज्ञानं चेतनं गवाश्वादि। तद्विपरीतमविज्ञानमचेतनं काष्ठकुड्यपाषाणादि। सत्यं लोकव्यवहारे बाधरहितं शुक्तिरज्जुस्थाण्वादि। अनृतं तु व्यवहारदशायामारोपितं रजतसर्पचोरादि। एतैरुदाहरणैः शीतोष्णसुखदुःखमानावमानादिकः सर्वोऽपि जैगद्विभाग उपलक्ष्यते। उपरितनसत्यशब्देन ब्रह्मोच्यते। सत्यं ज्ञानमित्यादिवाक्ये ब्रह्मणः सत्यश

---

१ ख. ङ. °स्मिन्। त°। २ ख. स्वाभाभा° ३ ख °त्यत्वाज° ४ °ओ नाऽऽश°। ५ ग. °गविदं त°। ६ ख. °श्चादिः। त°। ७ ङ. °णादिः। स°। ८ ख. °रादिः। ए°। ९ ग. जगद्व्यवहार। १० ग. ङ. °लभ्यते।

ब्दार्थत्वावगमात् । सच्च त्यच्चेत्यादिजगद्विभागरूपेण ब्रह्मैव परिणतमभूत् । ब्रह्म सद्रूपं भवितुमर्हति भोग्याकारेण परिणतत्वात्क्षीरादिवदिति श्रुतेरभिप्रायः ।

यदिदं किंच । तत्सत्यमित्याचक्षते ।

ब्रह्मणः सद्भावं युक्तिभिः साधयित्वा विद्वदनुभवेनापि साधयति—यदिदं किंचेत्यादिना । भोक्तृभोग्यरूपं यत्किंचिदिदं जगद्दृश्यते तद्वस्तुतो जगन्न भवति किंतु सत्यमबाध्यं ब्रह्मेति विवेकिन आचक्षते । तस्माद्विद्वदनुभवसिद्धस्य ब्रह्मणोऽसत्त्वमयुक्तम् ।

तदप्येष श्लोको भवति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके ऽष्टमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

अथ सप्तमोऽनुवाकः ।

असद्वा इदमग्र आसीत् । ततो वै सदजायत । तदात्मानꣳ स्वयमकुरुत । तस्मात्तत्सुकृतमुच्यत इति ।

यथोक्तब्रह्मसद्भावप्रकाशकं मन्त्रमुदाहरति—तदप्येष इत्यादिना । इदं नामरूपाभ्यामभिव्यक्तं जगदुत्पत्तेः पूर्वमसदेवानभिव्यक्तमेवाऽऽसीत् । ततो वै तस्मादेवानभिव्यक्तनामरूपाद्ब्रह्मणः सदजायताभिव्यक्तनामरूपं जगदुत्पन्नम् । न चात्र पितुर्विभक्तः पुत्र इव ब्रह्मणो विभक्तं जगत् । किंतु तद्ब्रह्माऽऽत्मानं सच्चिदानन्दैकरसस्वरूपं स्वयं कर्त्रन्तरनैरपेक्ष्येणाकुरुत जगदाकारेण कृतवत् । न खलु जगदुपादानं मृत्तिकास्थानीयं कुलालस्थानीयं निमित्तं च किंचिद्ब्रह्मव्यतिरिक्तमस्ति किंतु ब्रह्मैवोभयस्थानीयम् । यस्मादेवं तस्मात्तद्ब्रह्म सुकृतमित्यनेन शब्देनोच्यते । सुशब्दोऽत्र स्वयंशब्दपर्यायः । कृतशब्दः कर्तृशब्दपर्यायः । सुकृतं स्वयं कर्तृ ब्रह्मेत्येवं शास्त्रीविद्वद्भिरुच्यते । नीवास्तु न स्वयं कर्तारः किं त्वन्तर्यामिप्रेरिताः कुर्वन्ति " य आत्मानमन्तरो यमयति " " एष त आत्माऽन्तर्याम्यमृतः " " एष एव साधु कर्म कारयति " " केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि " इत्यादिश्रुतिस्मृतिभ्यः ।

यद्वै तत्सुकृतम् । रसो वै सः । रसꣳ ह्येवायं लब्ध्वाऽऽनन्दी भवति ।

स्वयंकर्तृत्वप्रसिद्धिरपि ब्रह्मणः सद्भावं साधयति । * अतः प्रकारान्तरेण तं साधयि-

* एतदपेक्षयाऽन्यप्रकारेत्यर्थः ।

तुमानन्दरूपतामाह—यद्वैतदित्यादिना। यदेतत्पूर्वोक्तं सुकृतशब्दवाच्यं ब्रह्मास्ति स ब्रह्मपदार्थो रस एव। लोकेऽपि तृप्तिलक्षणस्याऽऽनन्दस्य हेतुर्मधुरादिपदार्थो रस इत्युच्यते। ब्रह्मापि कृतकृत्यत्वादिलक्षणस्य तत्त्वविदामानन्दस्य हेतुत्वाद्रसो भवति। रसनीयवेदान्तवाक्यजनितमनोवृत्तिज्ञानेनाऽऽस्वादनीयमिति ब्रह्मणो रसत्वम्। प्रीतिपुरःसरं रसग्रहणमास्वादनम्। ब्रह्म च जिज्ञासुभिः प्रीतिपूर्वकमेव गृह्यते। प्रीतिश्चाऽऽनन्दमन्तरेण न संभवति। तस्माद्रसशब्देन ब्रह्मण आनन्दरूपत्वमुच्यते। नन्वानन्दरूपत्वाभावेऽपि धर्मो जिज्ञासुभिः प्रीतिपूर्वकमेव गृह्यते। नैवम्। धर्मे मुख्यप्रीत्यभावात्। स्वर्गलक्षणसुखसाधनत्वोपाधिनैव हि धर्मे प्रीतिः। ब्रह्म तु स्वस्मादुत्तमस्य कस्यचित्सुखस्य साधनं न भवति। ततो मुख्यप्रीतिविषयत्वादानन्दरूपं ब्रह्म। तदेतदानन्दरूपं रसं हीत्यादिनोपपाद्यते। अयं तत्त्ववित्पुरुषो रसं लब्ध्वा साक्षात्कृत्य धन्योऽस्मीत्येवमानन्दवान्भवति। तत्त्वविदो लौकिकः परितोषहेतुः स्वकचन्दनवनितादिलाभो न भवति। किं त्वात्मलाभ एव। विरक्तस्य स्वगादौ लाभबुद्ध्यभावात्। "आत्मलाभान्न परं विद्यते" इत्यादिशास्त्रात्। तस्माद्विद्वत्परितोषहेत्वानन्दरूपत्वादपि ब्रह्मणः सत्त्वमभ्युपेयम्। हिशब्देन विद्वत्प्रसिद्धिरेव प्रदर्शिता।

को ह्येवान्यात्कः प्राण्यात्। यदेष आकाश
आनन्दो न स्यात्। एष ह्येवाऽऽनन्दयाति।

किंच देहादिचेष्टाविषयिकानन्दहेतुत्वादपि ब्रह्मास्तीत्यभिप्रेत्य तदुभयहेतुत्वं दर्शयति—को ह्येवान्यादित्यादिना। आकाश इति सप्तम्यन्तः प्रथमान्तो वा। सप्तमीपक्षे गुहायां परमे व्योमन्नित्यत्राभिहितो योऽर्थः स एवात्रापि द्रष्टव्यः। प्रथमान्तत्वपक्षे त्वा समन्तात्काशते स्वप्रकाशत्वेनावभासते इत्याकाशः। तथाविध एष पूर्ववाक्ये रसत्वेनोक्त आत्मरूप आनन्दो यदि न स्यात्तदानीं को ह्येव को नाम कर्ता देहस्यान्तरन्याद्वागादीन्द्रियैश्चेष्टेत। अन चेष्टायामिति शातुः। को वा प्राण्यात्प्राणनकर्म श्वासं कुर्यात्। चक्षुरादीन्द्रियसाधनक्रियाकर्तृत्वमात्मन आथर्वणिका आमनन्ति—"एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः" इति। लोके प्राणसदसद्भावयोर्जन्ममरणदर्शनात्प्राण एवाऽऽत्मेति मूढप्रसिद्धिस्तामेवोपजीव्य बृहदारण्यके प्राणात्मत्ववादी बालाकिर्ब्रह्मात्मवादिनाऽजातशत्रुणा सह संवादं चकार। ततोऽत्र दर्शनादिक्रियाणां कर्ता प्राण इति भ्रमं वारयितुं कः प्राण्यादिति पृथगुक्तिः। आनन्दात्मनोऽसत्त्वे प्राणेन साधनेन श्वासक्रियां कः कुर्यात्। प्राणस्य श्वासक्रियां प्रति करणत्वमेव कर्तृत्वं त्वात्मन इत्ययमर्थ उषस्तिब्राह्मणेऽपि स्पष्टमाम्नातः—"यः

१ घ. °नीयं वे°। २ ख. °स्मीत्यान°। ३ घ. °त्ववत्वा°।

प्राणेन प्राणिति स त आत्मा सर्वान्तरः " इति । यद्यप्यसङ्गस्याऽऽनन्दात्मन इन्द्रियादिचेष्टाकर्तृत्वं स्वतो न संभवति तथाऽपि विज्ञानमयकोशोपाधिकस्य तत्संभवति । अतश्चेष्टाहेतुत्वादस्ति ब्रह्म । योऽयं चेष्टाहेतुरानन्दोऽस्त्येष एव सर्वान्प्राणिन आनन्दयाति पारितोषयति । अभीष्टविषयलाभे सति मनो विषयाभिमुख्यं परित्यज्य विषयान्तराभिलाषोदयात्पूर्वमन्तर्मुखं प्रत्यगात्मानन्दमनुभवति । सोऽयं लोके विषयानन्द इत्युच्यते । अत्र विवेकिजनप्रसिद्धिद्योतनार्थो हिशब्दः । अतस्तद्धेतुत्वादपि ब्रह्मास्तीत्यभ्युपगन्तव्यम् ।

यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति ।

इत्थं कामयितृत्वादिभिर्हेतुभिर्ब्रह्मणः सद्भावसाधनादस्ति नास्ति वेत्ययं संशयो निराकृतः । अथ क्रमप्राप्तमविद्वद्विषयं संशयं बहुवक्तव्यसद्भावात्तावदवस्थाप्याऽऽदौ विद्वद्विषयं ब्रह्मप्राप्तिसंशयमपाकरोति—यदा ह्येवेत्यादिना । एष जिज्ञासुरेतस्मिन्सद्भावसाधनेन प्रवर्तते स्वानुभवगम्ये ब्रह्मणि प्रतिष्ठां स्वात्मत्वबुद्धिदार्ढ्यं यदा लभते, अथ तदानीं स विद्वानभयं जन्ममरणादिभयरहितं मुक्तिपदं प्राप्नोति । एवशब्देन कालविलम्बो व्यावर्त्यते । यदा जानाति तदैव प्राप्नोति । अस्मिन्नर्थे विद्वत्प्राप्तिसिद्धिं हिशब्दो दर्शयति । अदृश्यादिविशेषणैश्चतुर्भिर्ब्रह्म विशिष्यते । चक्षुरादीन्द्रियैरगम्यत्वाददृश्यम् । अत एव कठैराम्नायते—" नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा " इति । आत्म्यमात्मीयं लिङ्गं तद्रहितमनात्म्यमनुमानेनाप्यगम्यमित्यर्थः । एतदप्यन्यत्राऽऽम्नातम्—"निर्विकल्पमनन्तं च हेतुदृष्टान्तवर्जितम् " इति । यद्यपि शरीरत्रयं जीवात्मसंबन्धिलिङ्गं जगत्कर्तृत्वमीश्वरलिङ्गं तथाऽपि निष्प्रपञ्चब्रह्मात्मतत्त्वस्य साधने न किंचिल्लिङ्गमस्ति । निःशेषेण वक्तुं शक्यं निरुक्तं तद्विपरीतमनिरुक्तम् । न ब्रह्मतत्त्वस्याभिधायकः कश्चिच्छब्दोऽस्ति " यतो वाचो निवर्तन्ते " इति श्रुतेः । अदृश्यत्वादिभिस्त्रिभिर्विशेषणैः प्रत्यक्षानुमानागमगम्यत्वं निराकृतम् । तावता कृत्स्नकार्यप्रपञ्चवैलक्षण्यं सिद्धम् । अनिलयनमनाधारम् "स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि" इति श्रुत्यन्तरात् । मूलाज्ञानस्य प्रमाणत्रयगम्यत्वाभावेऽपि ब्रह्मण्याश्रितत्वात्साधारत्वमस्तीति तद्वैलक्षण्यार्थमनिलयनमित्युच्यते । अभयं प्रतिष्ठामित्यभयशब्देन द्वैतराहित्यमित्युच्यते । बिभेत्यस्मादितिव्युत्पत्त्या भयं ब्रह्मव्यतिरिक्तं वस्तु कथ्यते " द्वितीयाद्वै भयं भवति " इति श्रुत्यन्तरात् । अहमन्यो ब्रह्मान्यदित्येतादृशं द्वैतं भयं तद्रहितमभयं तद्यथा भवति तथा प्रतिष्ठां लभत इति योजनीयम् ।

---

१ घ. °गान° । २ ख. °त्मनु° । ३ घ. प्राप्तो भवति । ४ ग. °णग° । ५ क. ख. घ. ङ. °त्यमुच्य° ।

यदा ह्येवैष एतस्मिन्नुदरमन्तरं
कुरुते । अथ तस्य भयं भवति ।

विदुषो ब्रह्मप्राप्तिनिश्चयेन यथा संशयो निराकृत एवमविदुषो ब्रह्मप्राप्त्यभावनिश्चयेन संशयमपाकरोति—यदा ह्येवैष इत्यादिना । उच्छब्दोऽपिशब्दार्थे वर्तते । अरशब्दोऽल्पवाची । अन्तरशब्दो भेदवाची । एष लौकिकः पुमानेतस्मिन्ब्रह्मण्यल्पमपि भेदं स्वातिरिक्तत्वं यदा कुरुते । स्वस्माद्भेदेन ब्रह्म पश्यति तदैव तस्य जन्ममरणादिसंसारभयं भवति । जीवब्रह्मभेदस्य वास्तवत्वाभावाभिप्रायेणाल्पमपीत्युक्तम् । भेददर्शिनः संसारप्राप्तौ श्रुत्यन्तरसिद्धिं हिशब्देन दर्शयति । " मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति " " ब्रह्म तं परादाद्योऽन्यत्राऽऽत्मनो ब्रह्म वेद " इत्याद्याः श्रुतयो द्रष्टव्याः ।

ननु यः पुमान्कर्मकाण्डार्थमुपास्यं सगुणं ब्रह्म वा जानाति तस्यापि विद्यावत्त्वेन निर्गुणब्रह्मज्ञानिवन्मुक्तिः स्यादित्याशङ्क्य निराचष्टे—

तत्त्वेव भयं विदुषोऽमन्वानस्य, इति ।

तुशब्दो मुक्तिशङ्कां निवर्तयति । विदुषोऽप्यमन्वानस्य ब्रह्मतत्त्वमजानतो भेददर्शित्वात्तदेव भयमत्यन्तमूढस्येव जन्ममरणसंसारभयं भवति ।

तदप्येष श्लोको भवति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकेऽष्टमप्रपाठके
सप्तमोऽनुवाकः ॥ ७ ॥

अथाष्टमोऽनुवाकः ।

भीषाऽस्माद्वातः पवते । भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चम इति ।

विद्यान्तरयुक्तस्यापि ब्रह्मतत्त्वज्ञानरहितस्य भयमित्यस्मिन्नप्यर्थे श्लोकमुदाहरति—तदप्येष इत्यादिना । यः पूर्वजन्मनि प्रकृष्टे ज्ञानकर्मणी अनुष्ठायास्मिञ्जन्मनि वायुदेवत्वेनोत्पन्नः सोऽयं तथाविधमहिमोपेतोऽपि देवोऽपि सन्नस्मादन्तर्यामिरूपाद्ब्रह्मणो भीषा भयेन पवते । निरन्तरमनलसः संचरति । एवं सूर्यादिषु योजनीयम् । अग्निरिन्द्रश्च स्वव्यापारं कुरुत इति शेषः । उक्तदेवताचतुष्टयापेक्षया मृत्योः पञ्चमत्वम् । स च क्षीणायुषः प्राणिनो मारयितुं तत्र तत्र सदा धावति । यद्यप्यसङ्गस्य निर्गुणस्य ब्रह्मणो भयहेतुत्वं नास्ति तथाऽपि मायोपाधिकस्यान्तर्यामित्वेन तत्संभवति ।

तदुक्तं **वार्तिकारैः**—" नियम्यकार्यमापेक्ष्य नियन्तैष तमोवधिः " इति । **श्रुत्यन्तरं** च—" यो वायुमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः । एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः " इत्यादिकमुदाहार्यम् ।

अस्य च भयहेतोर्नियामकस्यान्तर्यामिणो ब्रह्मत्वं **प्रथमाध्यायस्य द्वितीयपादे*** चिन्तितम्—

" प्रधानं जीव ईशो वा कोऽन्तर्यामी जगत्प्रति ।
कारणत्वात्प्रधानं स्याज्जीवो वा कर्मणो मुखात् ॥
जीवैकत्वामृतत्वादेरन्तर्यामी परेश्वरः ।
द्रष्टृत्वादेर्न प्रधानं न जीवोऽपि नियम्यतः ॥

बृहदारण्यके पञ्चमाध्याये याज्ञवल्क्य उद्दालकं प्रत्याह—" यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः " इति । तत्र पृथिव्यादिजगत्प्रति योऽन्तर्यामी श्रूयते तस्मिंस्त्रेधा संशये सति प्रधानमिति प्राप्तम् । तस्य सकलजगदुपादानत्वेन स्वकार्यं प्रति नियामकत्वसंभवात् । अथवा जीवोऽन्तर्यामी । स हि धर्माधर्मरूपं कर्मानुष्ठितवान् । तच्च कर्म स्वफलदानाय फलभोगसाधनं जगदुत्पादयति । अतः कर्मद्वारा जगदुत्पादकत्वाज्जीवोऽन्तर्यामीति प्राप्ते ब्रूमः—" एष त आत्माऽन्तर्याम्यमृतः " इत्यन्तर्यामिणो जीवतादात्म्यममृतत्वं च श्रूयते । तथा पृथिव्यन्तरिक्षादिषु सर्ववस्तुष्वन्तर्यामित्वोपदेशेन सर्वज्ञात्मित्वं प्रतीयते । तेभ्यो हेतुभ्योऽन्तर्यामी परमेश्वरः । न च प्रधानस्यान्तर्यामित्वं संभवति " अदृष्टो द्रष्टाऽश्रुतः श्रोता " इति द्रष्टृत्वश्रोतृत्वाद्यवगमात् । अचेतनस्य प्रधानस्य तदसंभवात् । नापि जीवोऽन्तर्यामी " य आत्मानमन्तरो यमयति " इति जीवस्य नियम्यत्वश्रवणात् । तस्मादन्तर्यामी परमेश्वरः । एतस्माद्भयमज्ञानिन एव । न तु तत्त्वविदः " ।

तदेवं सर्वेषां प्रश्नानामुत्तरं संपन्नम् । पूर्वत्र यदुक्तं " सोऽश्नुते सर्वान्कामान्सह " इति, यदपि "रसो वै सः" इत्यानन्दरूपत्वं सूत्रितं तदुभयं निर्णेतुं विचारमवतारयति—

सैषाऽऽनन्दस्य मीमांसा भवति, इति ।

तच्छब्देन मीमांसायाः श्रुत्यन्तरप्रसिद्धिः प्रदर्श्यते । **बृहदारण्यके** हि—" स यो मनुष्याणां राद्धः समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यकैर्भोगैः संपन्नतमः स मनुष्याणां परम आनन्दः " इत्यादिनाऽऽनन्दनिर्णयः प्रपञ्चितः । राद्धो देहेन्द्रिया-

* अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्—ब्र० सू० अ० १ पा० २ अ० ५ सू० १८ ।

१ ग. तस्य । २ ख. °रमारभति । घ. °रय° । ३ ख. °त्यान° ।

दिषाटवलक्षणसिद्धयुपेतः। समृद्धो विद्यादिगुणसंपन्नः। एतच्छब्देनानन्तरग्रन्थे वक्ष्यमाणतां दर्शयति। किमयं ब्रह्मानन्दो लौकिकानन्दवद्विषयविषयिसंबन्धेन जन्यत आहोस्वित्स्वाभाविक इत्येषा मीमांसा प्रवर्तते।

तत्र स्वाभाविकं ब्रह्मानन्दं विवेक्तुं द्वारभूता अन्ये विषयानन्दाः क्रमेणोपन्यस्यन्ते। एतेषां ब्रह्मानन्दलेशत्वान्निश्चयद्वारत्वमुपपन्नम्। तल्लेशत्वं चैवं द्रष्टव्यम्। अविद्यया विवेके तिरस्क्रियमाणे सत्युत्कृष्यमाणायां चाविद्यायां हिरण्यगर्भमारभ्य मनुष्यपर्यन्तेषु जीवेषु ब्रह्मानन्दस्तत्तत्कर्मवशाद्विषयादिसाधनसंबन्धवशाच्च यथाविज्ञानं भाव्यमानतयाऽपक्षीयमाणश्चलो व्यवस्थितो लौकिकः संपद्यते। स एव पुनरविद्याकामकर्मप्रकर्षेण मनुष्यगन्धर्वादिषु हिरण्यगर्भपर्यन्तमुत्तरोत्तरभूमिषु शतगुणोत्कर्षयुक्तोऽकामहतविद्वच्छ्रोत्रियप्रत्यग्लो विभाव्यते। विद्यया त्वविद्याकृते विषयविषयिविभागे निवृत्ते सति स्वाभाविकः पारिपूर्ण्य एक एवाऽऽत्मानन्दोऽवतिष्ठते। तस्य द्वारभूतेषु विषयानन्देष्वस्मत्प्रसिद्धमानन्दमादौ तावद्दर्शयति—

युवा स्यात्साधुयुवाऽध्यायकः। आशिष्ठो दृढिष्ठो बलिष्ठः। तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्। स एको मानुष आनन्दः, इति।

मनुष्यस्य बाल्ये विषयगुणानभिज्ञत्वात्स्वकचन्दनवनितादिविषयानन्दो नास्ति। वार्धके तदभिज्ञत्वेऽपि भोक्तुमसमर्थत्वादसौ नास्ति। अतो यौवनमेव परिशिष्यत इत्यभिप्रेत्य युवा स्यादित्युक्तम्। यौवनेऽपि कुरूपत्वक्रोधादिग्रस्तस्य दुःखबाहुल्यात्तदभावाय साधुयुवेत्युच्यते। तादृशस्यापि चतुःषष्टिकलासु चतुर्दशविद्यास्वेकस्याः अप्यभावे दुःखं भवेदिति तव्यावृत्त्यर्थमध्यायक इत्युक्तम्। विद्यावतोऽपि कार्येषु मन्दप्रवृत्तेरग्निमान्द्यादिना भोजनादौ रुचिहीनस्य वा सुखं न भवतीति तन्निवृत्त्यर्थमाशिष्ठ इत्युक्तम्। आशुतमः सर्वकार्येषु शीघ्रं प्रवर्तत इत्यर्थः। यद्वा सर्वेषु भोज्यद्रव्येषु रुचिबाहुल्येनाऽऽशितृतमः। ईदृशस्यापि मनोदार्ढ्याभावे सति न युद्धादौ धृतिः स्यादिति तद्वारणाय दृढिष्ठ इत्युक्तम्। धैर्ययुक्तोऽपि शारीरबलहीनोऽश्वारोहणादावक्षमः स्यादिति तद्वारयितुं बलिष्ठ इत्युक्तम्। एतावता भोक्तृत्वसंपत्तिरुक्ता। तस्येयमिति भोग्यसंपत्तिरुच्यते। चतुर्दिक्षु समुद्रवेष्टिता या पृथिवी सा सर्वाऽपि वित्तस्य पूर्णा भोग्यद्रव्यजातेन पूरिता। एतच्चान्येषामधिपतिरित्यादिकस्य श्रुत्यन्तरोक्तस्योपलक्षणम्। यदि कस्यचित्सार्वभौमस्यैतत्सर्वं संभवेत्तदानीमयं मानुष आनन्दो भवति। इतोऽर्वाचीनास्तु दुःखमिश्रत्वादानन्दा एव न संभवन्ति। न खलु कश्चिदपि मनुष्यो यथोक्तसा-

---

१ ग. °त्यक्ति°। २ क. ङ °लोऽव°। ३ ख. °पको°। ४ ख. °यासु चैक°। ५ ग. तद्वारणाय।

र्वभौमादन्यः क्वचिदपि सर्वतस्तृप्तिमानुपलभ्यते । आनन्दो नाम तृप्तिः । तस्याः काश्चिद्विषयाभिलाषो विरोधी । स चालब्धे विषये कस्यचित्कस्मिंश्चिद्वश्यं संभवत्येव । सार्वभौमस्य तु सर्वविषयाणां मनुष्यलोकवर्तिनां लब्धत्वेन विरोध्यभावान्निर्विघ्ना तृप्तिरभिव्यज्यते ।

एवं च सति यावद्यावदभिलाषनिवृत्तिरुत्कृष्टा भवति तावत्तावदानन्दोऽप्युत्कृष्यते । एतदेवाभिप्रेत्य पूर्वोक्तादानन्दादधिकमुदाहरति—

ते ये शतं मानुषा आनन्दाः (१) । स एको मनुष्यगन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य, इति ।

ते पूर्वोक्ताः सार्वभौमनिष्ठा **मानुषा आनन्दाः** शतसंख्याका **ये** सन्ति **सोऽयमानन्दसंघो मनुष्यगन्धर्वाणामेक आनन्दो** भवति । शतसंख्याकेषु सार्वभौमेषु यावती तृप्तिस्तावती मनुष्यगन्धर्वस्यैकस्य विद्यते । अस्मिन्कल्पे मनुष्याः सन्तो विद्याकर्मविशेषानुष्ठानेन गन्धर्वत्वं प्राप्ता मनुष्यगन्धर्वाः । ते ह्यन्तर्धानादिशक्तियोगेन मनुष्येभ्य उत्कृष्टाः ।

स चोत्कर्षो वार्तिके दर्शितः—

" सुगन्धिनः कामरूपा अन्तर्धानादिशक्तयः ।
नृत्यगीतादिकुशला गन्धर्वाः स्युर्नृलौकिकाः " ॥ इति ।

ततस्तेषां मनुष्यवदानन्दप्रतिघातः प्रायेण नास्ति । कदाचित्प्रसक्तस्यापि परिहाराय साधनसंपत्तिरस्ति । तथा सति चित्तप्रसादविशेषात्सुखविशेषाभिव्यक्तिरुपपद्यते । सार्वभौमस्य मनुष्यत्वेन तदीयस्याऽऽनन्दस्यास्माभिरपेक्षितुं शक्यत्वान्न तत्र श्रोत्रिय उदाहृतः । मनुष्यगन्धर्वास्त्वन्तरिक्षलोकवासिनः " यक्षगन्धर्वाप्सरोगणसेवितमन्तरिक्षम् " इति श्रुत्यन्तरात् । अतस्तदीयस्याऽऽनन्दस्याप्रसिद्धत्वात्तत्प्रसिद्धिं मनुष्यलोके दर्शयितुं **श्रोत्रिय** उदाह्रियते । " श्रोत्रियश्छन्दोऽधीते " इति पाणिनिना सूत्रितत्वात् । स हि सर्वेषु लोकेषु वर्तमानस्याऽऽनन्दहेतोर्विषयस्य भोगे प्रयाससाध्यत्वसातिशयत्वानित्यत्वदोषाञ्शास्त्रानुभवाभ्यां निश्चित्य तत्र निष्कामो भवति । तथा सति मनुष्यगन्धर्वलोकगतान्विषयान्भुञ्जानस्य यावानानन्दस्तावानकामहतत्वेद्विच्छ्रोत्रियस्यापि विद्यते । अकामहतत्वं तु गन्धर्वलोकानभिज्ञस्य मूढस्येदानीं विद्यमानमपि कालान्तरेण शास्त्रादभिजानानस्य तल्लोकभोगेच्छायामुत्पन्नायां निवर्तते । श्रोत्रियस्य तु तद्दोषदर्शिनः कदाचिदपि कामानुत्पत्तेरकामहतत्वं सुस्थितम् । ननु गन्धर्वस्य नृत्यगीतादिभिस्तदा कदाचित्तद्वृत्त्युल्लासलक्षणो हर्षशब्दाभिधेय आनन्द उपप-

---

१ म. घ. नृत्तगी° । २ ग. ङ. नृत्तगी° ।

द्यते। न त्वसावकामहतस्य श्रोत्रियस्य विद्यत इति चेन्मा भूदयं हर्षः। तस्य क्षणिकत्वेन चित्तविकारत्वेन च मुख्यानन्दत्वाभावाद्विषयप्राप्त्या तदिच्छायां निवृत्तायां हर्षादिविकारेषु च शान्तेषु या तृप्तिर्भङ्गिरनुगच्छत्यसौ च मुख्यानन्दः।

तथा च स्मर्यते—

"यच्च काममुखं लोके यच्च दिव्यं महत्सुखम्।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्" ॥ इति।

तृप्तिरूपश्चाऽऽनन्दो गन्धर्वेण समानोऽकामहतस्य श्रोत्रियस्य विद्यते। यथोक्तपर्यायद्वयमुत्तरेष्वपि पर्यायेषु चित्तस्य प्रसादातिशयमनुसृत्य तृप्तिलक्षणस्याऽऽनन्दस्याऽऽविर्भावातिशयो व्याख्येयः।

तत्र तृतीयपर्यायमाह—

ते ये शतं मनुष्यगन्धर्वाणामानन्दाः। स एको देवगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य, इति।

सृष्टिकाल एव देवलोके समुत्पन्ना गायका देवगन्धर्वाः।

चतुर्थं पर्यायमाह—

ते ये शतं देवगन्धर्वाणामानन्दाः। स एकः पितृणां चिरलोकलोकानामानन्दः। श्रोत्रियस्य चाकामहतस्य, इति।

चिरकालस्थायी यो लोकस्तमालोकयन्त इति चिरलोकलोकाः।

पञ्चमं[3] पर्यायमाह—

ते ये शतं पितृणां चिरलोकलोकानामानन्दाः।
स एक आजानजानां देवानामानन्दः।
(२)। श्रोत्रियस्य चाकामहतस्य, इति।

पितृलोकादूर्ध्वभावी कश्चिदाजानाख्यो देवलोकविशेषस्तत्रोत्पन्ना आजानजाः।

षष्ठं पर्यायमाह—

ते ये शतमाजानजानां देवानामानन्दाः। स एकः कर्मदेवानां देवानामानन्दः। ये कर्मणा देवानपियन्ति। श्रोत्रियस्य चाकामहतस्य, इति।

---

१ ख. °भङ्ग्यनु°। २ ग. घ. °च्छति सैव मु°। ३ ख. घ. °श्चमप°।

आजानैजदेवभोगादप्युत्तमं भोगं प्राप्तुं ये वैदिकं कर्मविशेषमनुष्ठाय देवान्प्राप्नुवन्ति ते कर्मदेवाख्या देवाः ।

सप्तमं पर्यायमाह—

ते ये शतं कर्मदेवानां देवानामानन्दाः । स एको देवानामानन्दः । श्रोत्रियस्य चाकामहतस्य, इति ।

त्रयस्त्रिंशद्धविर्भुजोऽत्र देवशब्देन विवक्षिताः ।

अष्टमं पर्यायमाह—

ते ये शतं देवानामानन्दाः । स एक इन्द्रस्याऽऽनन्दः (३) । श्रोत्रियस्य चाकामहतस्य, इति ।

इन्द्रो हविर्भुजां स्वामी ।

नवमं पर्यायमाह—

ते ये शतमिन्द्रस्याऽऽनन्दाः । स एको बृहस्पतेरानन्दः । श्रोत्रियस्य चाकामहतस्य, इति ।

बृहस्पतिरिन्द्रस्याऽऽचार्यः ।

दशमं पर्यायमाह—

ते ये शतं बृहस्पतेरानन्दाः । स एकः प्रजापतेरानन्दः । श्रोत्रियस्य चाकामहतस्य, इति ।

प्रजापतिर्विराट्पुरुषः ।

एकादशं पर्यायमाह—

ते ये शतं प्रजापतेरानन्दाः । स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्य (४), इति ।

ब्रह्मा हिरण्यगर्भः कृत्स्नसंसारमण्डलव्यापी समष्टिव्यष्टिरूपः सूत्रात्मा । स च शरीरिणां मध्ये प्रथमः " हिरण्यगर्भः समवर्तताग्रे " इति श्रुतेः ।

" स वै शरीरी प्रथमः स वै पुरुष उच्यते ।
आदिकर्ता स भूतानां ब्रह्माऽग्रे समवर्तत " ॥ इति स्मृतेश्च ।

तेन सांसारिक आनन्दोत्कर्षस्तत्र विश्राम्यति । उक्तरीत्या श्रोत्रिये सर्वेषामानन्दानां सद्भावेन सोऽश्नुते सर्वान्कामान्सहेत्ययमर्थ उपपादितो भवति ।

---

१ क ख. घ. ङ. °नदे° । २ घ. अतः ।

तदेवं परमानन्दद्वारभूतः सांसारिक आनन्दोत्कर्ष आगमेन श्रोत्रियप्रत्यक्षेण चोदाहृतः । अथ बोधनीयं ब्रह्मानन्दं दर्शयति—

स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः, इति ।

पुरुषशब्देन बुभुत्सुर्मनुष्यो विवक्षितः । तस्मिन्कश्चिदानन्दो विद्यते । तत्सद्भावे यौक्तिकप्रसिद्धिरनुभवप्रसिद्धिश्च सोऽयमित्येताभ्यां पदाभ्यां क्रमेण निर्दिश्यते । तत्र यौक्तिकप्रसिद्धिः श्रुत्यन्तरे प्रपञ्चिता—" आत्मनस्तु कामाय सर्वं प्रियं भवति " इति प्रतिज्ञाय पुत्रवित्तादिरूपस्य सर्वस्य भोग्यजातस्याऽऽत्मशेषतया प्रियत्वे सत्यात्मनः परप्रीतिविषयत्वेनाऽऽनन्दरूपत्वमुपपादितं भवति । तथा सर्वदाऽहं भूयासं कदाचिदपि ममासत्त्वं मा भूदित्येवमात्मन आनन्दरूपत्वं सर्वैः प्राणिभिरनुभूयते । चकारो बुभुत्सुसजातीयप्राण्यन्तर्गतानन्दसमुच्चयार्थः । तेनाऽऽध्यात्मिक आधिभौतिकश्च सर्वोऽप्यानन्दः संगृहीतो भवति । वेदे प्रायेणास्माल्लोकादमुं लोकमित्यादाविदमदःशब्दौ प्रत्यक्षपरोक्षवाचकौ । ततोऽत्राप्यस्माकं परोक्ष आदित्यदेहेऽवस्थित आनन्दोऽसावित्यनेन शब्देन विवक्षितः । चकार आदित्यसजातीयदेवतान्तरगतानन्दसमुच्चयार्थः । तेनाऽऽधिदैविकः सर्वोऽप्यानन्दः संगृहीतो भवति । एवं च सत्यध्यात्ममधिभूतमधिदैवं च सर्वेषूपाधिषु योऽयमानन्दोऽस्ति स सर्वोऽपि स्वरूपेणैक एव न तु भिद्यते । मानुषानन्दो देवानन्द इत्येवमुपाधिपरामर्शपूरःसरमेव हि भेदः प्रतीयते । यथा घटाकाशो मठाकाश इत्येवमुपाधिपरामर्शादेव तारतम्यलक्षणो भेदस्तद्वत्सर्वोऽयमखण्डैकरसो ब्रह्मानन्दस्तदीयो हिरण्यगर्भादिस्थावरान्तोपाधिकृतश्च भेदः श्रुत्यन्तरे विस्पष्टमाम्नातः—" एषोऽस्य परम आनन्द एतस्यैवाऽऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति " इति । यस्यार्खण्डैकरसस्यास्य समुद्रस्थानीयस्याऽऽनन्दस्य बिन्दुस्थानीया हिरण्यगर्भाद्यानन्दाः सोऽयमेक आनन्दो बुभुत्सुभिर्बोद्धव्य इत्येवं मीमांसया निर्णयः संपन्नः ।

यथोक्तानन्दवेदनस्य फलं दर्शयति—

स य एवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रामति । एतं प्राणमयमात्मानमुपसंक्रामति । एतं मनोमयमात्मानमुपसंक्रामति । एतं विज्ञानमयमात्मानमुपसंक्रामति । एतमानन्दमयमात्मानमुपसंक्रामति, इति ।

यः पुमानेवमुक्तप्रकारेण निजानन्दं वेत्ति स पुमाननेनैव क्रमेण तमानन्दं प्राप्नोति । सत्यज्ञानादिलक्षणं ब्रह्म स्वकीयमायाशक्तिवशादाकाशादिकमस्मद्देहान्तं जगत्सृष्ट्वा

१ ग. °त्वेना° । २ ख. °खण्डर° ।

देहादिपञ्चकोशरूपायां गुहायां प्रविष्टमिवाभ्यन्तरे निरुपाधिकरूपेण साक्षात्कारयोग्यं सदवतिष्ठते । तच्चाखण्डैकरसं परमानन्दस्वरूपमित्ययमुक्तप्रकारः । तेन प्रकारेण विदितवत आनन्दप्राप्तौ क्रमोऽभिधीयते । भोक्ता भोग्यं चेति द्विविधं जगद्ब्रह्मणा सृष्टम् । तत्र प्रत्यक्चैतन्यरूपमात्मानमारभ्य देहपर्यन्तोऽहंप्रत्ययगम्यो जगद्भागो भोक्ता । देहाद्बहिरिदंप्रत्ययेनावलोक्यमानः पुत्रभार्यादिरूपो जगद्भागो भोग्यः । तत्र यद्यप्यात्मव्यवहारोऽस्ति तदीयसुखदुःखयोरहं सुखी दुःखीत्येवं सर्वैरभिगम्यमानत्वात्, तथाऽपि पुत्रादिषु स्वस्माद्भेदस्य विस्पष्टं भासमानत्वाद्गौणमेवाऽऽत्मत्वं न तु मुख्यमित्यभिप्रेत्य श्रुतिस्तत्राऽऽत्मत्वबुद्धिं निवारयितुमन्नमयमात्मानमुपादिदेश । बुभुत्सुरपि तदेतदवगम्यास्माल्लोकादिदंप्रत्ययेनावलोक्यमानात्पुत्रादेः प्रेत्य प्रत्यावृत्य तत्र निरपेक्षो भूत्वाऽन्नमयं श्रुतिबोधितमेतमुपसंक्रामति प्राप्नोति । पुत्रादिसुखदुःखयोः स्वकीयत्वाभिमानं परित्यज्यान्नमयमात्रे पर्यवस्यतीत्यर्थः । एवं क्रमेण प्राणमयाद्युपसंक्रमणं द्रष्टव्यम् । आनन्दमयमुपसंक्रम्य तत्रापि प्रियादिचतुष्टयं क्रमेण परित्यज्य ब्रह्म पुच्छमित्युक्तेऽखण्डैकरसानन्दे पर्यवस्यतीत्यर्थः । नन्वेवंविच्छब्देन किं परमात्मा विवक्षितः किंवा ततोऽन्यः कश्चित् । नाऽऽद्यः । तस्य वेदितव्यत्वेन वेदितृत्वानुपपत्तेः । न द्वितीयः । तत्त्वमस्यादिश्रुतिविरोधात् । नैष दोषः । परमात्मन एव देहेन्द्रियाद्युपाधिविशिष्टत्वाकारेण वेदितृत्वमखण्डैकरसानन्दरूपत्वेन वेद्यत्वमित्युभयोपपत्तेः । ननु य एवंवित्स उपसंक्रामतीति श्रूयते । संक्रमणं नाम दृढसंयोगरूपप्राप्तिः । जलूका तृणे संक्रामतीत्यादौ तथा दृष्टत्वात् । न हि देहेन्द्रियाद्युपाधिविशिष्टस्य वेदितुरन्नमयादिषु यथोक्तसंक्रमणं संभवतीति चेन्न । संक्रमशब्देनात्र भ्रान्तिविनाशलक्षणस्य विद्याफलस्य विवक्षितत्वात् । तथा च भाष्यकारैरुक्तम्— "एतस्मिन्नविद्याविभ्रमनाशे संक्रमशब्द उपचर्यते" इति । न हि मुख्यसंक्रमणस्य वेदनमात्रं साधनं भवति । कज्जलमयमित्यादिज्ञानमात्रेण तत्संक्रमणादर्शनात् । अस्माल्लोकात्प्रेत्येत्यनेनैव वाक्येन प्रथमपर्याये बाह्यपुत्रादिविषयभ्रान्तिनाशोऽभिहित इति चेदेवं तर्ह्यन्नमयसंक्रमणोक्त्या पुत्रादिभ्रमस्य पुनरनुत्पत्तिर्विवक्ष्यताम् । अत एवास्माभिर्देहमात्रे पर्यवस्यतीति संक्रमणाभिप्रायोऽभिहितः । अनेनैव न्यायेन प्राणमयात्मवेदने सत्यन्नमयात्मत्वभ्रमस्य विनष्टस्य पुनरनुत्पत्तिः प्राणमयसंक्रमणम् । एवमुत्तरत्रापि द्रष्टव्यम् । अन्नमयादिषु मुख्यात्मत्वाभावेऽप्यहंप्रत्ययगम्यत्वलक्षणं भ्रान्तिप्रतीतमात्मत्वमभ्युपेत्यान्नमयमात्मानमित्यात्मशब्दः प्रयुक्तः । आनन्दमयकोशगतस्य प्रियाद्यवयवचतुष्टयस्याऽऽनन्दे मुख्यानन्दब्रह्मण्यवाङ्मनसगोचरत्वमभिप्रेत्य विद्यमानमपि तत्संक्रमणं श्रुत्या नोक्तम् ।

---

१ ब, स्पर्शं । २ घ. °योः स्वीकृतत्वा° । ३ ख °मणश° । ४ म, °मणे त्वया प° ।

अथाभिप्रेतमवाङ्मनसगोचरत्वं स्पष्टीकर्तुं श्लोकमुदाहरति—

तदप्येष श्लोको भवति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकेऽष्टमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

अथ नवमोऽनुवाकः ।

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कुतश्चनेति, इति ।

मनोमयप्रस्तावश्लोके व्याख्यातं तदनुसंधेयम् । किंच **वाचो**ऽभिधायकाः शब्दास्ते च सविकल्पेषु वस्तुषु व्युत्पन्नाः । प्रयोक्तृभिस्तु वस्तुत्वसामान्यान्निर्विकल्पेऽपि ब्रह्मणि प्रकाशनाय प्रयुज्यमाना अप्यनभिधाय **निवर्तन्ते** । स्वकीयादभिधानसामर्थ्याद्धीयन्ते । **मनश्चातीन्द्रियार्थे** शब्दानुसारेण सर्वत्र प्रवर्तते न तु स्वातन्त्र्येण । तथा सत्यत्र शब्देषु निवृत्तेषु **तैः** सह स्वयमपि **निवर्तते** । अतो ब्रह्मानन्दस्य हिरण्यगर्भानन्दादाधिक्यादेतावदिति वक्तुमवगन्तुं वा न शक्यते । तादृशं **ब्रह्मणः** स्वरूपभूतमानन्दं लक्षणावृत्त्या शब्देष्वेव बोधयत्सु तथैव **मनसा** यः पुमान्वेत्ति स पुमान्कुतोऽपि **न बिभेति** । पूर्वत्र प्रस्तावानुसारेण मनोमयोपाधिविशिष्टं ब्रह्मोपासीनस्येह जन्मनि जन्मान्तरे वा कदाचिदपि भीतिर्नास्ति । प्रसक्तायाः भीतेः प्रतीकारसद्भावादित्यभिप्रेत्योक्तम् । इह त्वद्वितीयब्रह्मानन्दं प्रमाणेन विजानतो भयकारणमेव नास्तीत्यभिप्रेत्य **कुतश्चनेत्युक्तम्** । "द्वितीयाद्वै भयं भवति" इति श्रुत्या स्वातिरिक्तं वस्तु भयकारणम् । तच्चाद्वितीये ब्रह्मणि नास्तीत्यभिप्रायः ।

यदुक्तं वाक्यवृत्तिकारैः—

"त्वमर्थमेवं निश्चित्य तदर्थं चिन्तयेत्पुनः ।
अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन चैं" ॥ इति ।

तत्र सत्यं ज्ञानमनन्तं ब्रह्मेत्येतद्विधिमुखम् । एतस्मिन्विधिरूपे बोधे गुणानामानन्दस्वयंज्योतिष्ट्वादीनामुपसंहारः पूर्वमुदाहृतः । **यतो वाचो निवर्तन्त** इत्यतद्व्यावृत्तिरूपम् । तस्मिन्नस्थूलमनण्वह्रस्वमित्यादीनामुपसंहारस्तृतीयाध्यायस्य तृतीयपादे * चिन्तितः—

" निषेधानामसंहारः संहारो वा न संहृतिः ।
आनन्दादिवदात्मत्वं नैषां संभाव्यते यतः ॥

---

* अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम्—ब्र० सू० अ० ३ पा० ३ अ० २० सू० ३३ ।

---

१ घ. 'न्नस्याऽऽहि° । २ ग. °ब्देष्वत्रबो° । ३ घ, °सक्तभी° । ४ घ. °च्चाद्वये । ५ ग. वा । ६ क. ख. ग. ङ. °खम् । तं ।

श्रुतानामाहृतानां च निषेधानां समा यतः ।
[illegible] तस्माद्दार्ढ्यायास्तूपसंहृतिः ॥

अस्थूलमनण्वह्रस्वमित्यादिना ब्रह्मबोधनाय **गार्गीब्राह्मणे** केचिन्निषेधाः श्रुताः । तथा **कठवल्लीषु**—"अशब्दमस्पर्शमरूपमव्ययम्" इति । एवमन्यत्राप्युदाहार्यम् । तत्र निषेधानां परस्परमुपसंहारो नास्त्यानन्दसत्यत्वादिधर्मवदात्मस्वरूपत्वभावेनोपसंहारे प्रयोजनाभावादिति प्राप्ते ब्रूमः—यथा **स्वशाखायां** श्रूयमाणानां निषेधानामात्मस्वरूपत्वाभावेऽप्यात्मोपलक्षकत्वं तथा **शाखान्तरेभ्य** उपसंहृतानां निषेधानामपि तत्समानम् । न च स्वशाखोक्तनिषेधैरेवोपलक्षणसिद्धावितरोपसंहारवैयर्थ्यं दार्ढ्याधिक्यार्थत्वात् । अन्यथा स्वशाखायामपि द्वित्रि(त्र)प्रतिषेधमात्रेण तत्सिद्धावितरवैयर्थ्यं प्रसज्येत । तस्मान्निषेधा उपसंहर्तव्याः" ।

उपसंहृते नेति नेतीतिनिषेधे काश्चिद्विशेषस्तत्रैव **द्वितीयपादे** * चिन्तितः—

" ब्रह्मापि नेति नेतीति निषिद्धमथवा नहि ।
द्विरुक्त्या ब्रह्मजगती निषिध्येते उभे अपि ॥
वीप्सेयं नेतिशब्दोक्ता सर्वदृश्यनिषिद्धये ।
अनिदं सत्यसत्यं च ब्रह्मैकं शिष्यतेऽवधि ॥

" द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च " इत्येतस्मिन्**ब्राह्मणे** महता प्रबन्धेन पृथिव्यग्नेर्लक्षणं मूर्तरूपं [illegible] च रूपं प्रपञ्च्यान्ते ब्रह्मोपदेष्टुमिदमुक्तम्—" अथात आदेशो नेति नेति " इति । अस्यायमर्थः । रूपद्वयकथनानन्तरं रूपिणो ब्रह्मणो वक्तव्यत्वान्नेति नेतीत्ययं ब्रह्मोपदेश इति पूर्वपक्षी मन्यते । जगत एकस्यैवैकेन नेतिशब्देन निषिद्धत्वे द्वितीयो नेतिशब्दो निरर्थकः स्यात् । अतो नकारेण द्वितीयेन ब्रह्मापि निषिध्यत इति प्राप्ते ब्रूमः—न तावद्द्वितीयस्य निषेधस्य वैयर्थ्यं वीप्सार्थत्वात् । सत्यां च वीप्सायां यद्यदृदृश्यत इतिशब्दनिर्देशार्हं च तत्सर्वं ब्रह्म न भवतीति निषिद्धं भविष्यति । अन्तरेण तु वीप्सामेकेनैव नकारेण मूर्तामूर्तयोः प्रकृतत्वेनेतिशब्दनिर्देशार्हयोर्निषेधे सति मूर्तादिभावस्य मूलाज्ञानस्य चानिषिद्धत्वात्तयोर्ब्रह्मत्वं प्रसज्येत । ननु सत्यामपि वीप्सायामस्त्येव दोषः । वीप्साया निरङ्कुशत्वाद्ब्रह्मापि निषिध्यत इति तन्न । ब्रह्मणो दृश्यत्वाभावेन निषेध्यसमर्पकेतिशब्दानर्ह-

* प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः—ब्र० सू० अ० ३ पा० २ अ० ६ सू० २२ ।

१ ख. °क्षणता । २ घ. गार्गिब्रा° । ३ क. ग. घ. ङ. क्यात् । अ० । ४ क. ख. ग. ङ. निषेधेते । ५ ग. निषेध्यत्वे । ६ क. ख. ग. ङ. °केन नं° । ७ क. ग. ङ. °निषेधान्त° । ८ क. ख. ङ. °णो निषेधत्वा° ।

त्वात्। किंचाथात आदेश इति महता संरम्भेण ब्रह्मोपदेष्टुं प्रतिज्ञाय तदेव ब्रह्म निषेधन्ती श्रुतिः कथं न व्याहन्येत। वाक्यशेषश्च न ब्रह्मनिषेधे संगच्छेत। वाक्यशेषे च सत्यस्य सत्यमित्यादिना विवक्षितस्य ब्रह्मणो लौकिकसत्याद्रिरिनदीसमुद्रादेरधिकमान्यन्तिकं सत्यत्वं सूचयितुं नाम निर्दिष्टम्। सर्वनिषेधपक्षे सर्वमप्येतत्कदर्थितं स्यात्। तस्मान्न ब्रह्म निषिध्यते"।

ननु न बिभेति कुतश्चनेति यदुक्तं तदसत्। धर्माधर्मजनितसंतापस्य भयहेतोर्विद्यमानत्वादित्याशङ्क्याऽऽह—

एतꣳ ह वाव न तपति। किमहꣳ साधु नाकरवम्। किमहं पापमकरवमिति, इति।

मरणकाले प्रत्यासन्ने सति सर्वेषां प्राणिनां मनस्येतादृशी चिन्ता संतापं जनयति। कीदृशी चिन्तेति चेत्साऽभिधीयते—पुरा यौवने देहेन्द्रियादिपाटवे सति द्रव्यादिसाधनसंपत्तौ च सत्यामहं **साधु** स्वर्गलोकादिसाधनं यागदानादिकं पुण्यं कर्म किमिति न कृतवानस्मि। नरकसाधनं परद्रव्यापहारादिकं **पापं** कर्म किमिति कृतवानस्मीति। सेयं चिन्ता सर्वेषां संतापहेतुरप्येतं ब्रह्मविदमेकमेव पुरुषं **न तपति**।

तापाभावे हेतुमाह—

स य एवं विद्वानेते आत्मानꣳ स्पृणुते, इति।

यः पुमानेते पुण्यपापकर्मणी **एवं** संतापहेतुत्वेन **विद्वान्**भवति शास्त्रोपपत्तिभ्यो जानाति स पुमान्कर्मप्रयुक्तसंतापनिवारणायाऽऽत्मानं **स्पृणुते** प्रीणयति बलयति च। स्पृ प्रीतिबलयोरिति धातुः। अयमात्मा साक्षी न तु [illegible] कर्तेत्येवं निश्चयेन संतापरहितः प्रीतो भवति। ब्रह्माहमितिनिश्चयेन धर्माधर्मतत्फलादिकृत्स्नसंसारहेतोरविद्याया अपि निवृत्तत्वात्प्रबलो भवति। नास्य धर्मा[illegible] पराजयः कदाचिदपि भवतीत्यर्थः।

नन्वात्मनोऽकर्तृत्वे ब्रह्मत्वे वाऽवगतेऽपि प्रवर्तमानैर्देहेन्द्रियैः पुण्यपापे अवश्यं निष्पद्येते पूर्वानुष्ठिते अपि विद्येते एवेत्याशङ्क्याऽऽह—

उभे ह्येवैष एते आत्मानꣳ स्पृणुते। य एवं वेद, इति।

यः पुमानेवं पुण्यपापयोस्तापहेतुत्वमात्मज्ञानस्य च तापनिवारकत्वं **वेद**। **एते उभे** पुण्यपापे **आत्मानमेव स्पृणुते** पश्यति। धातूनामनेकार्थत्वमिति हि **वैयाकरण-**

---

१ क. ख. ङ. °धतीतिश्रु°। २ ख. ङ. °सत्यगिरि°। ३ क. ख. ङ. °न्तिकस°। ४ घ. ङ मर्दि°। ५ ग. पुण्यक°। ६ ख. °धर्मङ्°।

न्यायः । शास्त्रदृष्ट्या तयोः पुण्यपापयोः परमात्मस्वरूपत्वमेवानुसंदधाति । न तु मायाकल्पितं पुण्यपापरूपत्वम् । अस्मिन्नर्थे तत्त्ववित्प्रसिद्धिं दर्शयितुं हिशब्दः प्रयुक्तः । यदा ब्रह्मविदः स्वात्मव्यतिरेकेण पूर्वानुष्ठिते पश्चादनुष्ठास्यमाने च पुण्यपापे स्वरूपेणैव न स्तस्तदा तच्चिन्ताकृतस्तापो नास्तीति किमु वक्तव्यमित्यभिप्रायः ।

पापराहित्यं चतुर्थाध्यायस्य प्रथमपादे*चिन्तितम्—

"ज्ञानिनः पापलेपोऽस्ति नास्ति वाऽनुपभोगतः ।
अनाश इति शास्त्रेषु घोषाल्लेपोऽस्य विद्यते ॥
अकर्त्रात्मधिया वस्तुमहिम्नैव न लिप्यते ।
अश्लेषनाशावप्युक्तावज्ञे घोषस्तु सार्थकः ॥

" नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि " इति भोगमन्तरेण पापाविनाशस्य सर्वशास्त्रप्रसिद्धत्वाद्ब्रह्मज्ञानिनोऽप्यस्ति पापलेप इति प्राप्ते ब्रूमः—तत्र तावन्निर्गुणब्रह्मात्मतत्त्वविदः पापलेपशङ्काऽपि नोदेति । नाकार्षं न करोमि न करिष्यामीतिकालत्रयेऽप्यकर्तृब्रह्मस्वरूपेण निश्चितत्वात् । न ह्यकर्तुर्लेपं च मन्दा अपि शङ्कन्ते । नापि सगुणब्रह्मविदो लेपोऽस्ति । अश्लेषविनाशयोः श्रुतत्वात् । ब्रह्मसाक्षात्कारादूर्ध्वं देहेन्द्रियव्यवहारवशात्संभावितस्य पापस्याश्लेषः श्रूयते—" तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते " इति । साक्षात्कारात्पूर्वं त्विह जन्मनि जन्मान्तरेषु च संचितस्य पापसंघस्य विनाशः श्रूयते—" तद्यथेषीकातूलमग्नौ प्रोतं च प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते " इति । नाभुक्तमित्यादिशास्त्रं तु सगुणनिर्गुणब्रह्मज्ञानरहितविषयम् । तस्मान्नास्ति ज्ञानिनः पापलेपः " इति ।

पुण्यराहित्यं च तत्रैव ×चिन्तितम्—

"पुण्येन लिप्यते नो वा लिप्यतेऽसौ श्रुतत्वतः ।
न हि श्रौतेन पुण्येन श्रौतं ज्ञानं विरुध्यते ॥
अलेपो वस्तुसामर्थ्यात्समानः पुण्यपापयोः ।
श्रुतं पुण्यं पापतया तरणं च समं श्रुतम् ॥

मा भूत्पापलेपः पुण्यलेपस्तु विद्यते । पुण्यस्य श्रौतत्वेन श्रौतब्रह्मज्ञानेन सह विरोधाभावादिति प्राप्ते ब्रूमः—अकर्ताऽऽत्मा वस्तुसामर्थ्यात्पापवत्पुण्येनापि न लिप्यते । सगुणज्ञानिनस्तूपासनव्यतिरिक्तं काम्यं पुण्यं पापवदधमजन्मदेहहेतुत्वात्पापैसममेवेति

---

* तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्—ब्र० सू० अ० ४ पा० १ अ० ९ सू० १३ । × इतरस्याप्येवमसंश्लेषः पाते तु—ब्र० सू० अ० ४ पा० १ अ० १४ सू० १९ ।

---

१ ग. पापरहितत्वं । २ ग. घ. °ति पा° । ३ ग. °णब्रह्मवि° । ४ घ. °पमे° ।

मत्वा पापत्वेनैव दहरविद्यावाक्यशेषे श्रुतिः परामृशति—"सर्वे पाप्मानोऽतो निवर्तन्ते" इति । अस्यायमर्थः । सुकृतं दुष्कृतं तत्फलं च पूर्ववाक्ये यद्यदनुक्रान्तं ते सर्वे पाप्मानोऽस्मादुपासकान्निवर्तन्ते । किंच—"उभे ह्येवैष एते तरति" इति श्रुतिः पुण्यपापयोरुभयोर्ज्ञानिना तरणं समभेव ब्रूते । तस्मात्पापवत्पुण्येनापि न लिप्यते" ।

प्रारब्धयोरविनाशस्तत्रैव* चिन्तितः—

"आरब्धे नश्यतो नो वा संचिते एव नश्यतः ।
उभयत्राप्यकर्तृत्वं तद्बाधः सदृशः खलु ॥
आदेहपातं संसारश्रुतेरनुभवादपि ।
इषुचक्रादिदृष्टान्तान्नैवाऽऽरब्धे विनश्यतः ॥

ज्ञानात्पूर्वं संचिते पुण्यपापे द्विविधे । आरब्धे अनारब्धे च । तयोरकर्तृत्वमात्मनः समानं तद्बाधश्च समः । ततोऽनारब्धवदारब्धयोरपि ज्ञानोदयसमय एव विनाश इति प्राप्ते ब्रूमः—श्रुत्यनुभवयुक्तिभ्य आरब्धयोरविनाशो गम्यते "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये" इति श्रुतेः । अस्यायमर्थः । तस्य तत्त्वविदो मुक्तिर्विलम्बमानाऽपि नात्यन्तं विलम्बते । किंतु गर्भाधानकाले कल्पस्याऽऽयुषः क्षयाभावेन यावद्देहः प्राणैर्न विमोक्ष्यते तावदेव विलम्बते । अथ देहप्राणवियोगे सति ब्रह्म संपद्यत इति । यथाऽऽनया श्रुत्या तत्त्वविदोऽप्यादेहान्तं संसारोऽङ्गीकृतस्तथा विद्वदनुभावोऽप्यस्मिन्नर्थे स्फुटः । युक्तिश्चोच्यते । यथा लोके तूणनिष्ठेषु बाणेषु धानुष्कस्य स्वीकारपरित्यागयोः स्वातन्त्र्येऽपि मुक्ते बाणे स्वातन्त्र्यं न दृश्यते । स तु बाणो वेगे क्षीणे स्वयं पतति । एवं कुलालचक्रभ्रमणमुदाहर्तव्यम् । तथा दार्ष्टान्तिके ब्रह्मज्ञानस्याप्यनारब्धकर्मनाशकत्वे स्वातन्त्र्यमस्तु न त्वारब्धे कर्मणि । आरब्धस्य प्रवृत्तफलत्वात् । यद्येतैः श्रुत्यादिभिरारब्धस्थितिर्नाभ्युपगम्येत तदोपदेष्टुरभावाद्विद्यासंप्रदाय उच्छिद्येत । न तावदविद्वानुपदेष्टेति वक्तुं शक्यम् । विद्वांस्तु ज्ञानसमय एव मुच्यत इति को नामोपदेष्टा संभवति । तस्मान्नाऽऽरब्धयोर्नाशः" ।

नित्यकर्मणो नाशाभावस्तत्रैव+ चिन्तितः—

"नश्येन्नो वाऽग्निहोत्रादि नित्यं कर्म विनश्यति ।
यतोऽयं वस्तुमहिमा न क्वचित्प्रतिहन्यते ॥

---

* अनारब्धकार्ये एव तु पूर्वे तदवधेः—ब्र० सू० अ० ४ पा० १ अ० ११ सू० १५ ।
+ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्—ब्र० सू० अ० ४ पा० १ अ० १२ सू० १६ ।

---

१ ब. °देहपातं सं° । २ क. ग. ङ. °न्तिकव° । ३ क. ग. घ. ङ. °र्मसु ना° । ४ ख. °र्मणां ना° ।

अनुषक्तफलांशस्य नाशोऽप्यन्यो न नश्यति ।
विद्यायामुपयुक्तत्वाद्धान्यश्लेषस्तु काम्यवत् ॥

ज्ञानात्पूर्वमिह जन्मनि जन्मान्तरे वाऽनुष्ठितं यदग्निहोत्रादि नित्यं कर्म तस्यापि काम्यकर्मवदकर्त्रात्मवस्तुबोधमहिम्ना नाशोऽभ्युपेय इति प्राप्ते ब्रूमः —द्वावंशौ नित्यकर्मण एकोंऽशः प्राधान्येन चित्तशुद्धिप्रदः । अपरोंऽशोऽनुषङ्गेण स्वर्गादिफलप्रदः । तस्य नाशोऽस्तु नाम । चित्तशुद्धिप्रदस्य तु विद्यायामुपयुक्तत्वान्न नाशो वर्णयितुं शक्यः । न हि लोके भोगेनोपक्षीणं व्रीह्यादिकं नष्टं मन्यते । यत्तु ज्ञानादूर्ध्वं नित्यं कर्म तस्य काम्यवदश्लेषः " ।

अङ्गावबद्धोपास्तिरहितस्यापि नित्यकर्मणो विद्यायामुपयुक्तत्वं तत्रैव* चिन्तितम्—

"किमङ्गोपास्तिसंयुक्तमेव विद्योपयोग्युत ।
केवलं च प्रशस्तत्वात्सोपास्त्येवोपयुज्यते ॥
केवलं वीर्यवद्विद्यासंयुक्तं वीर्यवत्तरम् ।
इति श्रुतेस्तारतम्याद्दुभयं ज्ञानसाधनम् ॥

विद्यासाधनं नित्यं कर्म द्विविधं संभाव्यते । अङ्गावबद्धोपास्तिसहितं तद्रहितं च । तत्र सोपासनस्य कर्मणः प्रशस्तत्वात्तदेव विद्यासाधनं न तूपास्तिरहितमिति प्राप्ते ब्रूमः— " यदेव विद्यया करोति तदेव वीर्यवत्तरं भवति " इति श्रुतिः सोपासनस्य कर्मणोऽतिशयेन वीर्यमस्तीति वदन्ती निरुपासनस्यापि वीर्यमात्रमभ्यनुजानाति । अन्यथा तरप्प्रत्ययानुपपत्तेः । तस्मात्सोपासननिरुपासनयोस्तारतम्येन विद्यासाधनत्वम् " ।

ज्ञानिनो मुक्तिनियमस्तृतीयाध्यायस्य तृतीयपादे+ चिन्तितः—

" ब्रह्मतत्त्वविदो मुक्तिः पाक्षिकी नियताऽथवा ।
पाक्षिक्यपान्तरतमःप्रभृतेर्जन्मवर्णनात् ॥
नानादेहोपभोक्तव्यमीशोपास्तिफलं बुधाः ।
भुक्त्वाऽधिकारपुरुषा मुच्यन्ते नियता ततः ॥

पुराणेषु—वेदप्रवर्तक **आचार्योऽपान्तरतमा विष्णोराज्ञया द्वापरान्ते कृष्णद्वैपायनरूपेण शरीरान्तरं जग्राहेति स्मर्यते । तथा सनत्कुमारः स्कन्दरूपेणैव पार्वतीपरमेश्वराभ्यामजायत । एवमन्येऽपि वसिष्ठादयस्तत्त्वज्ञानिन एव सन्तस्तत्र तत्र शापाद्वा वराद्वा स्वेच्छया वा शरीरान्तराणि जगृहुरितिस्मरणान्मुक्तिस्तत्त्वविदां पाक्षि-

* यदेव विद्ययेति हि—ब्र० सू० अ० ४ पा० १ अ० १३ सू० १८ । + यावदधिकारमवस्थितिराधिकारिकाणाम्—ब्र० सू० अ० ३ पा० ३ अ० १९ सू० ३२ ।

१ ग. घ. मन्यन्ते । २ ग. घ. °म्यदर्शना° । ३ घ. °भोक्तृत्वमी°।

र्कीति प्राप्ते ब्रूमः—य एते त्वयोदाहृताः पुरुषास्ते सर्वे जगन्निर्वाहकारिणः । ते च पूर्वस्मिन्कल्पे महता तपसा परमेश्वरमुपास्यास्मिन्कल्पे नानादेहोपभोग्यमधिकारपदं लेभिरे । क्षीणे च प्रारब्धे कर्मणि मोक्ष्यन्ते । तथाऽनारब्धकर्मणां तत्त्वज्ञानेन दाहस्य निवारयितुमशक्यत्वात्तत्त्वविदो मुक्तिर्नियतैव " ।

एतस्यार्थस्याऽऽक्षेपसमाधानरूपा चिन्ता चतुर्थाध्यायस्य* प्रथमपादे कृता —

" बहुजन्मप्रदारब्धयुक्तानां नास्त्युताऽस्ति मुक् ।
विद्यालोपे कृतं कर्म फलदं तेन नास्ति मुक् ॥
आरब्धं भोजयेदेव न तु विद्यां विलोपयेत् ।
सुप्तबुद्धवदश्लेषतादवस्थ्यात्कुतो न मुक् ॥

अधिकारिपुरुषाणां मुक्तिर्नास्ति प्रारब्धभोगाय बहुषु जन्मसु स्वीकृतेषु तत्र पूर्वार्जितविद्यायां लुप्तायां यत्कर्म क्रियते तस्य फलप्रदत्वे सत्युत्तरोत्तरजन्मपरम्पराया अवश्यंभावित्वादिति प्राप्ते ब्रूमः—आरब्धं कर्म स्वफले सुखदुःखे भोजयेत् । तदर्थमेव प्रवृत्तत्वात् । न हि विद्यौविलोपार्थं किंचित्कर्म पूर्वमनुष्ठितम् । येन कर्मवशाद्विद्यालोप आशङ्क्येत । न च मरणव्यवधानमात्रेण विद्यालोपः सुषुप्तिव्यवधाने तल्लोपादर्शनात् । अतो विद्यायामवस्थितायां बहुजन्मभिरपि क्रियमाणैः कर्मभिरश्लेषादस्त्यधिकारिणां मुक्तिः " ।

यद्यप्येतद्वुणोपसंहारे निर्णीतं तथाऽपि तस्यैवाऽऽक्षेपसमाधाने इत्यनवद्यम् । अनुवाकार्थमुपसंहरति—

इत्युपनिषत् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकेऽष्टमप्रपाठके नवमोऽनुवाकः समाप्तः ॥ ९ ॥

ब्रह्मविदिदमेकाविंशतिरन्नादन्नरसमयात्प्राणो व्यानोऽपान आकाशः पृथिवी पुच्छं षड्विंशतिः प्राणं यजुर्ऋक्साम आऽऽदेशोऽथर्वाङ्गिरसः पुच्छं द्वाविंशतिर्यतः श्रद्धर्तꣳ सत्यं योगो महोऽष्टादश विज्ञानं प्रियं मोदः प्रमोद आनन्दो ब्रह्म

---

* भोगेन त्वितरे क्षपयित्वा संपद्यते—ब्र० सू० अ० ४ पा० १ अ० १४ सू० १९ ।

---

१ ख. तत्पूर्वा° । २ ख, घ °द्यालो° । ३ क ग. घ, ङ. °ह्मिं° । ४ ग. °दमय-मिदमे° ।

पुच्छं द्वाविंशतिरसमेवाष्टाविंशतिरसस्षोडश भीषाऽस्मादेक-
पञ्चाशद्यतः कुतश्चैकादश * ।

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ।

हरिः ॐ ।

+ इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके सप्तमोऽध्यायः
समाप्तः ॥ ८ ॥

ब्रह्मविदाप्नोति परमित्यादि य एवं वेदेत्यन्तेन ग्रन्थेन या प्रतिपादिता सेय-
मितिशब्देन परामृश्यते । सा चोपनिषद्रहस्यविद्या । उपनिषण्णमस्यां परं श्रेय इति
व्युत्पत्तेः । तादृशी विद्याऽभिहितेति शेषः ॥

इति श्रीमत्सायणाचार्यविरचिते श्रीबुक्कणसाम्राज्यधुरंधरमाधवविद्यारण्यपरमेश्व-
रसंबन्धिवेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये वारुण्यपरनामधेय-
सांहित्यामुपनिषदि ब्रह्मवल्ल्याख्यो द्वितीयोऽनुवाकः ॥ २ ॥
*समाप्तोऽयमष्टमः प्रपाठकः ।

---

* ग. पुस्तक एतदग्रे—" ब्रह्मविद्य एवं वेदेत्युपनिषत् " इत्यधिकम् । + अत्राप्यध्यायप-
रिसमाप्तिर्वैदिकमतानुसरणेनैव । भाष्यकारमतेन तु भृगुर्वै वारुणिरित्यारभ्य "इत्यपनिषत्" इत्युन्तोऽ-
स्यैव प्रपाठकस्य तृतीयोऽनुवाकोऽस्यतो भाष्यकाराणां मतेन " अम्भस्य पारे " इत्यादिर्नारायणोप-
निषदेव नवमप्रपाठकरूपा । तेषां मतेनाऽऽरण्यकस्य नव प्रपाठका एवेत्यूहनीयं विपश्चिद्भिः । *अत्र
भाष्यकारमतेन प्रपाठकसमाप्तिर्नास्तीत्युल्लेख उपरिगतटिप्पणे कृतः स तत्र ज्ञातव्यः ।

---

१ ग. °स्मान्मानुषो मनुष्यगन्धर्वाणां देवगन्धर्वाणां पितॄणां चिरलोकलोकनामाजा-
नजानां कर्मदेवानां देवानामिन्द्रस्य बृहस्पतेः प्रजापतेर्ब्रह्मणः स यश्च संक्रामत्येक° ।
२ ग. °तः कुतश्चनैका° ।

*

*अथ तैत्तिरीयारण्यके नवमप्रपाठकस्याऽऽरम्भः ।

तत्र प्रथमोऽनुवाकः ।

हरिः ॐ ।

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्ति शान्तिः ।

भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति ।

द्वितीयानुवाके ब्रह्मविद्या निरूपिता । अथ तृतीयानुवाके तत्साधनानि निरूप्यन्ते । यद्यपि सांहित्युपनिषदि बहिरङ्गसाधनानि कर्माण्युपासनानि चाभिहितानि तथाऽपि विचाररूपमन्तरङ्गसाधनं नोक्तमिति तदत्राभिधीयते । तस्मिन्नभिहिते तदङ्गानि मननादीन्यप्यभिहितानि भविष्यन्ति । तत्राऽऽदौ विद्यास्तुत्यर्थमुपाख्यानमाह—भृगुरित्यादिना । अस्ति कश्चिन्महर्षिर्भृगुर्नाम गोत्रप्रवर्तकः । वैशब्देन मन्त्रब्राह्मणगता तत्प्रसिद्धिः स्मर्यते । "भृगूणां त्वाऽङ्गिरसां व्रतपते व्रतेनाऽऽदधामि" इति "भृग्वाङ्गिरसामादध्यात्" इति हि मन्त्रब्राह्मणे आम्नायेते । स च भृगुर्वरुणस्य पुत्रः पितरं वरुणं गुरुत्वेनोपसन्नवान् । गुरूपसत्तिश्च श्रुत्यन्तरेऽभिहिता—"तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" इति । अधीहीत्यादिगुरूपसत्तिमन्त्रः । हे भगवो भगवन्पूज्यस्वरूप गुरो ब्रह्माधीहि अधिकं स्मर चित्तेन स्मृत्वोपदिशेत्यर्थः ।

ईदृशानामुपाख्यानानां विद्यास्तुत्यर्थत्वं तृतीयाध्यायस्य चतुर्थपादे+ चिन्तितम्—

"पारिप्लवार्थमाख्यानं किंवा विद्यास्तुतिः स्तुतेः ।
ज्यायोऽनुष्ठानशेषत्वं तेन पारिप्लवार्थता ॥
मनुर्वैवस्वतो राजेत्येवं तत्र विशेषणात् ।
अत्र विद्यैकवाक्यत्वभावाद्विद्यास्तुतिर्भवेत् ॥

"अर्धं ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः" "जनको ह वैदेह आसांचक्रे" इत्या-

* भाष्यकारमतेनायं नवमप्रपाठको नास्ति किं त्वष्टमस्यैवायं तृतीयोऽनुवाक इतीदमप्युक्तं गतपृष्ठोल्लिखितदिशा ।
+पारिप्लवार्था इति चेन्न विशेषितत्वात्—ब्र० सू० अ० ३ पा० ४ अ० ४ सू० २३ ।

१ क. ख. ङ. 'त्यामुप' । २ क. ख. ङ. 'न्यर्थाभि' । ३ क. ख. ङ. भगन्ति । ४ घ. 'भानाद्वि' । ५ ख. 'थ या' ।

दिकमुपनिषदि श्रूयमाणमाख्यानं पारिप्लवार्थं भवितुमर्हति। अश्वमेधयागे रात्रिषु राजानं सकुटुम्बमुपवेश्य तस्याग्रे वैदिकान्युपाख्यानान्यन्यानि पुण्यान्यध्वर्युणा वक्तव्यानि। तदिदं पारिप्लवाख्यं कर्म "पारिप्लवमाचक्षीत" इतिवाक्येन विहितम्। तदर्थत्वे सत्यौपनिषदाख्यानान्यनुष्ठानायोपयुज्येरन्। ज्यायोऽनुष्ठानं विद्यास्तुतेस्तस्मात्पारिप्लवार्थमिति प्राप्ते ब्रूमः—प्रथमेऽहनि मनुर्वैवस्वतो राजा द्वितीयेऽहनि यमो वैवस्वतो राजेत्येवमाद्याख्यानानां पारिप्लवार्थानां विशेषितत्वादौपनिषदानामाख्यानानां तच्छेषत्वं न संभवति। संनिहितविद्यास्तावकत्वे तु विद्यावाक्यैरेकवाक्यता लभ्यते। तस्माद्विद्यास्तावकमाख्यानम्"।

ब्रह्मबोधद्वारोपदेशं दर्शयति—

तस्मा एतत्प्रोवाच। अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचामिति, इति।

तस्मै समन्त्रकमुपसन्नाय भृगव **एतदन्नादिकं** बोधद्वारमुक्तवान्। अन्नमयप्राणमयमनोमयानां कोशानामुपादानकारणान्यन्नप्राणमनांसि **चक्षुःश्रोत्रवाचोऽपि** मनोवद्द्वारभूताः। इतिशब्दोऽनुक्तानां त्वगादिज्ञानेन्द्रियाणां पाणिपादादिकर्मेन्द्रियाणां च प्रदर्शनार्थः। शाखाग्रे चन्द्र इत्यत्र यथा चन्द्रदर्शने [illegible] वृक्षशाखा लक्षकत्वेन द्वारं तथा गुहाहितब्रह्मदर्शने तदुपलक्ष[illegible] द्वाराणि। तद्द्वारत्वं च **बृहदारण्यके** विस्पष्टमाम्नातम्—"प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमुतान्नस्यान्नं मनसो ये मनो विदुः। ते निचिक्युर्ब्रह्म पुराणमग्र्यम्" इति। प्राणादिकल्पनाधिष्ठानतया प्राणादिरूपं ब्रह्म प्राणादिद्वारेण वेदितुं सुशकम्। अहंबुद्धिगम्येष्वन्नप्राणादिषु मध्ये ब्रह्मान्वेषणीयमित्यभिप्रायः।

तꣳ होवाच। यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति।

अथ ब्रह्मलक्षणस्य तद्बोधहेतोर्विचारस्य चोपदेशं दर्शयति—**तꣳ हेत्यादिना**। द्वारं श्रुत्वाँ तदवबोधायात्यन्तमुत्सुकं तं भृगुमवेक्ष्याऽऽसत्वातिशयेन तदीयं[4] प्रश्नं विना स्वयमेव वरुणः पुनरप्युवाच। हशब्द औत्सुक्यप्रसिद्धिद्योतनार्थः। **इमान्याकाशादीनि पञ्च महाभूतानि** भौतिकदेहोपेता हिरण्यगर्भादिस्तम्बान्ताः सर्वे प्राणिनश्च **यतो** वस्तुनो

---

१ ग. घ. °वानां २ ग. घ °कयैक°। ३ क. ख. ङ. °ते ऽऽत्व° । ४ क, ख. ग. ङ, °दीयप°।

जायन्ते। वैशब्दः "स इमाँल्लोकानसृजत" इत्यादिश्रुत्यन्तरप्रसिद्धिद्योतनार्थः। उत्पन्नानि च भूतानि **येन** वस्तुना **जीवन्ति** स्थितिं लभन्ते। **प्रयान्ति** नाशं प्रतिपद्यमानानि भूतानि यद्वस्त्वभिसंविशन्ति साकल्येन प्रविशन्ति, यथा फेनतरङ्गबुद्बुदादीनामुत्पत्तिस्थितिलयाः समुद्रे भवन्ति तद्वत्, जगदुत्पत्तिस्थितिलयकारणं वस्तु विचारय, **तदेव** वस्तु त्वया पृष्टं **ब्रह्म**। इतिशब्द उत्तरसमाप्त्यर्थः।

विचारकर्तव्यता च **प्रथमाध्यायस्य प्रथमपादे*** चिन्तिता—

"अविचार्यं विचार्यं वा ब्रह्माध्यासानिरूपणात्।
असंदेहाफलत्वाभ्यां न विचारं तदर्हति॥
असाध्योऽहंबुद्धिसिद्धोऽसङ्गं ब्रह्म श्रुतीरितम्।
संदेहान्मुक्तिभावाच्च विचार्यं ब्रह्म वेदतः"॥ इति।

"आत्मा वा अरे द्रष्टव्यः श्रोतव्यः" [बृह० २। ४। ५] इत्यत्राऽऽत्मदर्शनं फलमुद्दिश्य तत्साधनत्वेन श्रवणं विधीयते। श्रवणं नाम वेदान्तवाक्यानां ब्रह्मणि तात्पर्यं निर्णेतुमनुकूलो न्यायविचारः। तदेताद्विचारविधायकं वाक्यं विषयः। न चायं विषयः श्लोकेन संगृहीतः। संदेहसंग्रहेणैवार्थात्तत्संग्रहप्रतीतेः। ब्रह्मविचारात्मकन्यायनिर्णायकं शास्त्रमनारभ्यमारभ्यं वेति संदेहः। पूर्वोत्तरपक्षयुक्तिद्वयं सर्वत्र संदेहे बीजमुन्नेयम्। तत्रानारभ्यमिति तावत्प्राहम्। विषयप्रयोजनयोरभावात्। संदिग्धं हि विचारस्य विषयो भवति। ब्रह्म त्वसंदिग्धम्। तथा हि तार्किं ब्रह्माकारेण संदिह्यते वा। नाऽऽद्यः। "सत्यं ज्ञानमनन्तं ब्रह्म" [तैत्ति० २। १। १] इत्यादिवाक्येन ब्रह्माकारस्य निश्चयात्। न द्वितीयः। अहंप्रत्ययेनाऽऽकारस्यापि निश्चयात्। अध्यस्तात्मविषयत्वेन भ्रान्तोऽहंप्रत्यय इति चेन्न, अध्यासानिरूपणात्। तमःप्रकाशवद्विरुद्धस्वभावयोर्जडाजडयोर्देहात्मनोः शुक्तिकारजतवदन्योन्यतादात्म्याध्यासो न निरूपयितुं शक्यते। तस्मादभ्रान्ताभ्यां श्रुत्यहंप्रत्ययाभ्यां निश्चितस्यासंदिग्धत्वान्न विचारस्य विषयोऽस्ति। नापि प्रयोजनं पश्यामः। उक्तप्रकारेण ब्रह्मात्मनि निश्चितेऽपि मुक्त्यदर्शनात्। तस्माद्ब्रह्म न विचारमर्हतीति शास्त्रमनारम्भणीयमिति **पूर्वपक्षः**। अत्रोच्यते—शास्त्रमारम्भणीयं विषयप्रयोजनसद्भावात्। श्रुत्यहंप्रत्ययोर्विप्रतिपत्त्या संदिग्धं ब्रह्मात्मवस्तु। "अयमात्मा ब्रह्म" [बृह० २। ५। १९] इति श्रुतिरसङ्गं ब्रह्माऽऽत्मत्वेनोपदिशति। अहं मनुष्य इत्याद्यहंबुद्धिर्देहादितादात्म्याध्यासेनाऽऽत्मानं गृह्णाति। अध्यासस्य च दुर्निरूपत्वमलंकाराय।

* अथातो ब्रह्मजिज्ञासा—ब्र० सू० अ० १ पा० १ अ० १ सू० १।

तस्मात्संदिग्धं वस्तु विषयः । तन्निश्चयेन च मुक्तिलक्षणं प्रयोजनं श्रुत्या विद्वदनुभवेन च प्रसिद्धम् । तस्माद्वेदान्तवाक्यविचारमुखेन(ण) ब्रह्मणो विचारार्हत्वाच्छास्त्रमारम्भणीयमिति सिद्धान्तः ।

विचारो हि लक्षणप्रमाणाभ्यां वस्तुतत्त्वनिर्णयावधिकः । लक्षणं च तत्रैव* चिन्तितम्—

"लक्षणं ब्रह्मणो नास्ति किंवाऽस्ति नहि विद्यते ।
जन्मादेरन्यनिष्ठत्वात्सत्यादेश्चाप्रसिद्धितः ॥
ब्रह्मनिष्ठं कारणत्वं स्याल्लक्ष्म स्वगभुजंगवत् ।
लौकिकान्येव सत्यादीन्यखण्डं लक्षयन्ति हि ॥

"यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति" [तैत्ति० ३ । १ । १] इति । "सत्यं ज्ञानमनन्तं ब्रह्म" [तैत्ति० २ । १ । १] इति च वाक्यद्वयं विषयः । प्रयन्ति म्रियमाणानीत्यर्थः । अत्र श्रूयमाणं ब्रह्मलक्षणं घटते न घटते वेति संशये न घटते । तथा हि किं जन्मादिकं ब्रह्मलक्षणमुत सत्यादिकम् । नाऽऽद्यः । तस्य जगन्निष्ठत्वेन ब्रह्मसंबन्धाभावात् । द्वितीयेऽपि लोकप्रसिद्धसत्यज्ञानादिस्वीकारे भिन्नार्थत्वादखण्डं ब्रह्म न सिध्येत् । अप्रसिद्धस्य तु सत्यादेर्लक्षणत्वमयुक्तम् । तस्मात्तटस्थलक्षणं स्वरूपलक्षणं च न विद्यते । अत्रोच्यते—जन्मादेरन्यनिष्ठत्वेऽपि तत्कारणत्वं ब्रह्मणि कल्पनया संबद्धं तटस्थलक्षणं भविष्यति । यो भुजंगः सा स्रगितिवत् । यज्जगत्कारणं तद्ब्रह्मेति कल्पितेनापि वस्तुनो लक्षयितुं शक्यत्वात् । भिन्नार्थानामपि पितृसुतभ्रातृजामात्रादिशब्दानामेकदेवदत्तपर्यवसायित्वे यथा न विरोधः, तथा लोकसिद्धभिन्नार्थवाचिसत्यादिशब्दानामखण्डब्रह्मपर्यवसायित्वे स्वरूपलक्षणासिद्धिरित्युभयमुपपन्नम्" ।

तल्लक्षणोपपादनाय वेदकर्तृत्वं तत्रैव+चिन्तितम्—

"न कर्तृ ब्रह्म वेदस्य किंवा कर्तृ न कर्तृ तत् ।
विरूपनित्यया वाचेत्येवं नित्यत्ववर्णनात् ॥
कर्तृनिःश्वसिताद्युक्तेर्नित्यत्वं पूर्वसाम्यतः ।
सर्वावभासिवेदस्य कर्तृत्वात्सर्वविद्भवेत् ॥

---

* जन्माद्यस्य यतः—ब्र० सू० अ० १ पा० १ अ० २ सू० २ । + शास्त्रयोनित्वात्—ब्र० सू० अ० १ पा० १ अ० ३ सू० ३ वर्णकम् १ ।

---

१ क. ख. ङ. न्द्धिम् । २ घ. ङ. ति वा° । ३ ख °शयो न । ४ क. ग. घ. ङ. °स्य स°।

" अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदः " (बृह० २। ४। १०) इति वाक्यं विषयः। यदृग्वेदादिकमस्ति तदेव तस्य नित्यसिद्धस्य ब्रह्मणो निःश्वास इवाप्रयत्नेन सिद्धमित्यर्थः। ब्रह्म वेदं न करोति करोति वेति संदेहः। न करोति, वेदस्य नित्यत्वात्। वाचा विरूप नित्ययेत्येतस्मिन्मन्त्रे विरूपेति देवतां संबोध्य नित्यया वाचा स्तुतिं प्रेरयेत्येवं प्रार्थ्यते। नित्या वागृगादिवेद एव।

"अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः" ॥ इति स्मृतेः।

अतो न वेदकर्तृ ब्रह्मेति प्राप्ते ब्रूमः—ब्रह्म वेदस्य कर्तृ भवितुमर्हति। कुतः। निःश्वसितन्यायेनाप्रयत्नोत्पत्त्यवगमात्। "तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे" इति सर्वैर्यज्ञैर्हूयमानाद्यज्ञशब्दवाच्याद्ब्रह्मणो विस्पष्टमेव वेदोत्पत्तिश्रवणाच्च। अप्रयत्नोत्पत्त्यैवार्थं बुद्ध्वा रचितैः कालिदासादिवाक्यैर्वैलक्षण्यादपौरुषेयत्वम्। प्रतिसर्गं पूर्वसाम्येनोत्पत्तेः प्रवाहरूपेण नित्यता। सर्वजगद्व्यवस्थावभासिवेदकर्तृत्वनिरूपणेन ब्रह्मणः सर्वज्ञत्वं निरूपितं भवति"।

लक्षणमुपपाद्याऽऽगमव्यवस्थापनं **तत्रैव*** चिन्तितम्—

"अस्त्यन्यमेयताऽप्यस्य किंवा वेदैकमेयता।
घटवत्सिद्धवस्तुत्वाद्ब्रह्मान्येनापि मीयते॥
रूपलिङ्गादिराहित्यान्नास्य मान्तरयोग्यता।
तं त्वौपनिषदेत्यादौ प्रोक्ता वेदैकमेयता॥

" तं त्वौपनिषदं पुरुषं पृच्छामि " इति **शाकल्यं** प्रति **याज्ञवल्क्येनोक्ते** वाक्ये परब्रह्मरूपस्य पुरुषस्योपनिषद्वेद्यत्वं प्रतीयते। तद्वाक्यं विषयः। तत्र ब्रह्मणः प्रत्यक्षादिगम्यत्वमस्ति नवेति संशयः। पूर्वपक्षस्तु विस्पष्टः। रूपरसाद्यभावान्नेन्द्रिययोग्यता। लिङ्गसादृश्यादिराहित्याच्च नानुमानोपमानादियोग्यता। उपनिषत्स्वेवाधिगम्यत इति व्युत्पत्त्या " नावेदविन्मनुते तं बृहन्तम् " इत्यन्यनिषेधश्रुत्या च वेदैकमेयत्वम्। **भाष्यकारैर्जन्मादिसूत्रे**—"श्रुत्यादयोऽनुभवादयश्च यथासंभवमिह प्रमाणम्" इत्यन्यमेयत्वमङ्गीकृतमिति चेत्। बाढम्। प्रथमतः श्रुत्यैव प्रमिते ब्रह्मणि पश्चादनुवादरूपेणानुमानानुभवयोरङ्गीकारात्। अतो वेदैकमेयं ब्रह्म"।

---

* ब्र० सू० अ० १ पा० १ अ० ३ सू० ३ द्वितीयं वर्णकम्।

---

१ ग. संशयः। २ क. ग. घ. ङ. °येत्यस्मि°। ३ घ. ततः। ४ ख. °त्पत्तौ चार्थं। ५ घ. विचारितम्। ६ घ. °सादिराहित्यान्ने°।

वेदस्य तु ब्रह्मप्रमाणत्वं तत्रैव* चिन्तितम्—

"वेदान्ताः कर्तृदेवादिपरा ब्रह्मपरा उत ।
अनुष्ठानोपयोगित्वात्कर्त्रादिप्रतिपादकाः ॥
भिन्नप्रकरणाल्लिङ्गषट्काच्च ब्रह्मबोधकाः ।
सति प्रयोजनेऽनर्थहानेऽनुष्ठानतोऽत्र किम् ॥

स्पष्टौ विषयसंदेहौ । जीवप्रकाशकवाक्यानि कर्तृपराणि ब्रह्मप्रकाशकवाक्यानि देवतापराणि सृष्टिप्रकाशकवाक्यानि साधनपराणि । तथा सति वेदान्तानामनुष्ठानोपयोगित्वं भविष्यति । ब्रह्मपरत्वे त्वनुष्ठानासंभवान्निष्प्रयोजनत्वं स्यात् । तस्माद्वेदान्ताः कर्तृदेवतासाधनप्रतिपादकाः । अत्रोच्यते—ब्रह्मपरा वेदान्ताः । कुतः । भिन्नप्रकरणपठितानां तेषां कर्त्रादिप्रतिपादकतया कर्मशेषत्वासंभवात्तात्पर्यनिश्चयहेतुलिङ्गषट्केन ब्रह्मपरत्वसंभवाच्च"।

लिङ्गषट्कं च पूर्वाचार्यैर्निरूपितम्—

"उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिश्चये" ॥ इति ।

"सदेव सोम्येदमग्र आसीत्" इत्युपक्रमः । "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि" इत्युपसंहारः । तयोर्ब्रह्मविषयत्वेनैकरूप्यमेकं लिङ्गम् । असकृत्तत्त्वमसीत्युक्तिरभ्यासः । मानान्तरानवगम्यत्वमपूर्वत्वम् । एकविज्ञानेन सर्वविज्ञानं फलम् । सृष्टिस्थितिप्रलयप्रवेशनियमनानि पञ्चार्थवादाः । मृदादिदृष्टान्ता उपपत्तयः । एतैर्लिङ्गैर्ब्रह्मपरत्वं निश्चेयम् । न चानुष्ठानमन्तरेण प्रयोजनाभावः । नायं सर्प इत्यादाविव बोधादनर्थनिवृत्तेः संभवात् ।

वेदान्तानां विधिपरत्वाभावस्तत्रैव+ चिन्तितः—

"प्रतिपत्तिं विधित्सन्ति ब्रह्मण्यवसिता उत ।
शास्त्रत्वात्ते विधातारो मननादेश्च कीर्तनात् ॥
नाकर्तृतन्त्रेऽस्ति विधिः शास्त्रत्वं शंसनादपि ।
मननादिः पुरा बोधाद्ब्रह्मण्यवसितास्ततः ।

एकदेशी मन्यते—ब्रह्मपरत्वेऽपि वेदान्ता न ब्रह्मण्येव पर्यवस्यन्ति । किं तर्हि

---

* तत्तु समन्वयात्—ब्र० सू० अ० १ पा० १ अ० ४ सू० ४ प्रथमं वर्णकम् १ । + अ० १ पा० १ अ० ४ सू० ४ द्वितीयं वर्णकम् ।

---

१ ब. °र्थहे° । २ ग. घ. °राग° । ३ ख. निर्णेयम् । ४ घ. शासनादपि । ५ ख. °नादि पु° ।

पारोक्ष्येण ब्रह्मतत्त्वं प्रतिपाद्य पश्चादपरोक्षप्रतिपत्तिं विदधति। तथा सति वेदान्तानां शासनाच्छास्त्रत्वमुपपद्यते। किंच "श्रोतव्यः" इति श्रवणं[1] शाब्दज्ञानात्मकं विधाय "मन्तव्यो निदिध्यासितव्यः" इत्यनुभवज्ञानात्मकं मननादिकं स्पष्टमेव विधीयते। तस्मात्प्रतिपत्तेर्विधातारो वेदान्ता इति प्राप्ते ब्रूमः—न प्रतिपत्तेर्विधिः संभवति। कर्तुमकर्तुमन्यथा कर्तुमशक्यत्वेनापुरुषतन्त्रत्वात्। शास्त्रत्वं तु नानुष्ठेयशासनादेव नियतम्। सिद्धवस्तुशंसनेनापि तदुपपत्तेः। न चैं शाब्दज्ञाने[3] जाते पश्चादनुभवात्मकं मननादिकं विधीयत इति वक्तुं युक्तम्। दशमस्त्वमसीतिवच्छब्दस्यैवापरोक्षानुभवजनकत्वेन शाब्दबोधात्पुरैवासंभावनाविपरीतभावनानिवृत्तये व्यापाररूपस्य कर्तृतन्त्रस्य मननादेर्विधानात्। तस्मात्तत्त्वमसीत्यादयो वेदान्ता ब्रह्मण्यवसिताः" इति।

योऽयं वेदान्तमुखेन ब्रह्मतत्त्वनिर्णयफलको विचारः सोऽयं तद्विजिज्ञासस्वेत्यनेन वाक्येन विहितः। **शाखान्तरेऽप्ययं** विधिः श्रूयते—"श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति। तदर्थ एवं **स्मर्यते**—

"श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।
मत्वा च सततं ध्येय एते दर्शनहेतवः"॥ इति।

पुराणेऽपि पठ्यते—

"[2]तावन्मुनिश्रेष्ठाः श्रवणं नाम केवलम्।
उपक्रमादिभिर्लिङ्गैः शक्तितात्पर्यनिर्णयः॥
सर्ववेदान्तवाक्यानामाचार्यमुखतः प्रियात्।
वाक्यानुग्राहकन्यायशीलनं मननं भवेत्॥
निदिध्यासनमैकाग्र्यं श्रवणे मननेऽपि च।
उत्पत्तावन्तरङ्गं हि ज्ञानस्य श्रवणं बुधाः॥
तटस्थमन्यव्यावृत्त्या मननं चिन्तनं तथा।
इतिकर्तव्यकोटिस्थाः शान्तिदान्त्यादयस्तथा"॥ इति।

एतान्येव श्रवणमननिदिध्यासनानि **कहोलब्राह्मणे** पाण्डित्यबाल्यमौनशब्दैर्व्यवहृत्य विहितानि—"ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्। बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः" इति। निर्विद्य निःशेषेण संपाद्यार्थं त्रितयानुष्ठानादूर्ध्वं ब्रह्मस्वरूपत्वाविर्भावान्मुख्यब्राह्मणो भवतीत्यर्थः। अत्र मननोपयुक्तधीशुद्धिपरेण बाल्यशब्देन मननमुपलक्ष्यते।

---

१ ग. 'णं शब्द'। २ ङ. तु। ३ क. घ. ङ. शब्दज्ञाने। ४ ख. °थ तृतीया°।

धीशुद्धिपरत्वं च तृतीयाध्यायस्य चतुर्थपादे* चिन्तितम्—

"बाल्यं वयः कामचारो धीशुद्धिर्वा प्रसिद्धितः ।
वयस्तस्याविधेयत्वात्कामचारोऽस्तु नेतरत् ॥
मननस्योपयुक्तत्वाद्भावशुद्धिर्विवक्षिता ।
अत्यन्तानुपयोगित्वाद्विरुद्धत्वाच्च न द्वयम् ॥

" बाल्येन तिष्ठासेत् " इत्यत्र बालस्य भावो बाल्यमिति प्रसिद्ध्या वयो भवेत् । अथ तस्य विध्यनर्हत्वम् । तर्हि बालस्य कर्मेति व्युत्पत्त्या कामचारवादादिकमस्तु । सर्वथाऽपि न धीशुद्धिर्बाल्यमिति प्राप्ते ब्रूमः—पाण्डित्यमौनाख्ययोः श्रवणनिदिध्यासनयोर्मध्ये मननं विधेयत्वेन श्रुत्या विवक्षितम् । तस्य च भावशुद्धिरुपयुक्ता । रागद्वेषमानावमानादिदोषग्रस्तत्वेन बहिष्प्रवृत्तिमपरित्यज्य मन्तुमशक्यत्वात् । बालस्य कर्मेति व्युत्पत्तिस्तु बालेच्छाचारे भावशुद्धौ च समाना । वयःकामचारौ तु मननस्यात्यन्तमनुपयुक्तौ प्रत्युत विरोधिनौ मूढस्य बहिष्प्रवृत्तस्य वा मनसो मननविनाशकत्वात् । तस्माद्भावशुद्धिरेव बाल्यं नेतरदुभयम् " ।

मुनित्वस्य विधिकल्पनं तत्रैव+ चिन्तितम्—

"अविधेयं विधेयं वा मौनं किं न विधीयते ।
प्राप्तं पाण्डित्यतो मौनं ज्ञानवाच्युभयं यतः ॥
निरन्तरज्ञाननिष्ठा मौनं पाण्डित्यतः पृथक् ।
विधेयं तद्भेददृष्टिप्राबल्ये तन्निवृत्तये ॥

कहोलब्राह्मणे श्रूयते—"तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् । बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः " इति । अस्यायमर्थः । यस्माद्ब्रह्मभावः परमः पुरुषार्थस्तस्माद्ब्रह्म बुभूषुरुपनिषत्तात्पर्यनिर्णयरूपं पाण्डित्यं निःशेषेण संपाद्य बालवन्नीरागद्वेषत्वेन युक्तोऽसंभावनानिराकरणाय युक्तीरनुचिन्तयन्नवस्थातुमिच्छेत् । ततः पाण्डित्यबाल्ये निःशेषेण संपाद्याथ मुनिरिति । तत्र भवेदिति विध्यश्रवणान्मुनित्वं न विधेयम् । न च विधिः कल्पयितुं शक्यः । पाण्डित्यशब्देन प्राप्तस्य मौनस्यापूर्वार्थत्वाभात् । पाण्डितस्य विदुषो भावः । पाण्डित्यमिति ज्ञानवाचकोऽयं शब्दः । तथा मुनिशब्दोऽपि मन ज्ञान इत्यस्माद्धातोस्तन्निष्पत्तेः । तस्मात्प्राप्तस्य मौनस्य न विधि-

---

* अनाविष्कुर्वन्नन्वयात्—ब्र०सू० अ० ३ पा० ४ अ० १५ सू० ५० । + सहकार्यन्तरविधिः पक्षेण तृतीयं तत्त्वतो विध्यादिवत्—ब्र० सू० अ० ३ पा० ४ अ० १४ सू० ४७ ।

---

१ ग. °त्वं तृ° । २ ग. °ध्याये च° । ३ ख. °था न । ४ ख. °योर्मन° । ५ ग. घ. °वृत्तिं प° । ६ ग. घ °स्तु भा° । ७ ख तत्र ; ८ ग. ङ. बाल्यव° ।

कल्पनमिति प्राप्ते ब्रूमः—पूर्वोक्तस्य पाण्डित्यस्य पुनर्मुनिशब्देनाभिधाने प्रयोजनाभावान्निरन्तरज्ञाननिष्ठापूर्वार्थो मुनिशब्देन विवक्षितः। ततस्तिष्ठासेदितिपदानुवृत्त्या विधिर्लभ्यते। अस्ति च ज्ञाननैरन्तर्येण प्रयोजनम्। प्रबलभेदवासनावासितस्य तन्निवृत्त्यर्थत्वात्। तस्मान्निदिध्यासनात्मकं मौनं विधेयम्"।

यथोक्तश्रवणाद्यावृत्तिश्चतुर्थाध्यायस्य प्रथमपादे* चिन्तिता—

"श्रवणाद्याः सकृत्कार्या आवृत्त्या वा सकृद्यतः।
शास्त्रार्थस्तावता सिध्येत्प्रयाजादौ सकृत्कृते॥
आवृत्त्या दर्शनान्तास्ते तण्डुलान्तावघातवत्।
दृष्टेऽत्र संभवत्यर्थे नादृष्टं कल्प्यते बुधैः॥

"सकृत्कृते कृतः शास्त्रार्थः" इतिन्यायेन श्रवणादीनां प्रयोजादिवत्सकृदेवानुष्ठानमिति प्राप्ते ब्रूमः—उक्तन्यायस्यादृष्टफलविषयत्वादत्र ब्रह्मसाक्षात्कारलक्षणस्य दृष्टफलस्य संभवात्। "दृष्टे संभवत्यदृष्टं न कल्पनीयम्" इतिन्यायेनावघातवत्फलसिद्धिपर्यन्तं श्रवणाद्या आवर्तनीयाः"।

आवृत्तेन विचारादिना यतो वा इत्यादिलक्षणलक्षितं ब्रह्म साक्षात्क्रियते। तस्मिंश्च लक्षणवाक्ये यत इत्येतस्मिन्पदे यदित्येतत्प्रातिपदिकं सर्वनामत्वेऽपि जन्मादिसंनिधिबलात्तदपेक्षितं कारणत्वं ब्रूते। तत्र पञ्चम्यौ उपादानार्थत्वे निमित्तं ब्रह्मव्यतिरिक्तमपेक्ष्येत। तन्निमित्तार्थत्वे [illegible] चेन्न। उपादानार्थत्वात् "जनिकर्तुः प्रकृतिः" "×हेतौ च" इति सूत्रद्वयेनोभयत्र पञ्चमीविधानात्। ननु यतो जायन्ते तद्ब्रह्मेत्येतावतैव लक्षणसिद्धौ स्थितिप्रलयश्रवणं व्यर्थमिति चेन्नैवम्। =कुविन्दवत्केवलं निमित्तत्वं व्युदसितुं स्थितिहेतुत्वम्। तन्तुसंयोगवत्केलमसमवायित्वं व्युदसितुं लयहेतुत्वम्। ततो जन्मस्थितिलयैर्निमित्तासमवाय्युपादानत्वानि सिध्यन्ति। ननु भूतानामुत्पत्त्यदर्शनाद्भौतिकानां भूतकार्यत्वान्न ब्रह्मो[illegible] चेन्न। भूतोत्पत्तेरागमसिद्धत्वात्। अस्ति पृथिवी सन्त्याप इत्येवं भूतानां सदनुरक्तत्वेन प्रतिभासात्सद्वस्तु भूतोपादानम्। तच्च वस्तु ब्रह्म। भौतिकोत्पत्तौ भूतानि मृदः पिण्ड इव सतोऽवान्तरावस्थारूपाणि। उपादानं तु मृदिव सद्वस्त्वेव। सन्घटः सच्छरीरामित्येवं सदनुरक्तत्वेनैव भौतिकानां प्रतिभासात्। यथा प्राकृतानां पामराणां दग्धतन्त्वनुरक्तस्य पटस्य तन्तव उपादानं तद्वत्। आकाशकालादय उत्पद्यन्ते विभक्तत्वाद्घटशरावादिवत्। इत्येवं तन्नित्यत्व-

* आवृत्तिरसकृदुपदेशात्—ब्र० सू० अ० ४ पा० १ अ० १ सू० १। × इदं चिन्त्यम्। अष्टाध्याय्यां हेतौ चेतिसूत्रानुपलब्धेः। अथवा हेतौ चेतिशब्देन हेताविति[illegible]म्यन्तपदानुवृत्तियुक्तं विभाषा गुणेऽस्त्रियामितिसूत्रमुपलक्षणीयम्। = पटकारवत्।

१ ख. °नं प्रबलम्। भे°। २ ग. घ. °म्या अपा°। ३ ग. घ. °पेक्षते।

वादिनं प्रति प्रयोक्तव्यम् । सृज्यस्य सर्वजगतो विचित्रत्वात् । तदन्यथानुपपत्त्या स्रष्टुर्ब्रह्मणः सर्वज्ञत्वं सर्वशक्तित्वं च सिध्यति । न हि विचित्रप्रासादविषयज्ञानशक्तिभ्यां विना तन्निर्मातृत्वं कस्यचिद्दृष्टम् । यद्यपि निरिन्द्रियब्रह्मणः सर्ववस्तुज्ञानकारणानि प्रत्यक्षप्रमाणानि न सन्ति तथाऽपि श्रुतियुक्तिभ्यां सर्वज्ञत्वमभ्युपेयम् । " यः सर्वज्ञः सर्ववित् " इति **श्रुतिः** । युक्तिश्चैवं द्रष्टव्या— सर्वविषयाकारधारिषु मायापरिणामेषु प्रतिबिम्बितं चैतन्यं सर्वानुभव इत्युच्यते । तस्य च विषयैराध्यासिकसंबन्धाद्वर्तमानसर्वज्ञानं तावत्सिद्धम् । [illegible] तदवच्छिन्नमायावृत्तीनां च निवृत्तौ तत्संस्कारा अस्मदादिवदतीतविषयाः स्मृतिरूपा [illegible] भवन्ति । तत्प्रतिबिम्बितानुभवेनातीतसर्वज्ञानमपि सिध्यति । तथा सृष्टेः प्रागपि स्रक्ष्यमाणपदार्थविधारगस्य कुलालादिषु दृष्टत्वादागामि सर्वज्ञानमपि स्वमायापरिणामवशात्सिध्यति । तस्माद्युक्तं सर्वज्ञत्वम् । सर्वशक्तयश्च **श्रुतिस्मृति**प्रसिद्धाः । " पराऽस्य शक्तिर्विविधा " इति **श्रुतिः** ।

"शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः ।
यतो हि ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः " ॥ इति **स्मृतिः** ।

ईदृशस्य सर्वशक्तेर्ब्रह्मणो [illegible] लक्षणम् । जन्मादेर्जगन्निष्ठत्वेऽपि तत्प्रतियोगिकस्य कारणत्वस्य ब्रह्मणि वर्तमानतया लक्षणत्वं संभवति । न च क्रियावैशात्मकत्वरूपस्य कारणतया लक्षणतया प्रकृष्टप्रकाशश्चन्द्र इत्यादाविव लक्ष्यस्वरूपान्तर्भावे ब्रह्मणः कूटस्थत्वस्य हीयेतेति वाच्यम् । काकाश्रयत्ववदौपाधिकत्वेन तटस्थत्वात् । काकवन्तो देवदत्तस्य गृहा इत्यत्र काकाधिकरणत्वं न गृहेऽन्तर्भवति । काकविगमेऽपि गृहैकदेशभङ्गबुद्ध्यभावात् । अतो गृहस्य काकावस्थानोपाधिकधर्मत्वात्काकाधिकरणत्वं यथा तटस्थलक्षणं तथा जन्माद्युपाधिकधर्मकारणत्वं तटस्थलक्षणम् । तस्य च लक्षणस्य मिथ्यात्वान्नाद्वैतहानिः । यः सर्पः स रज्जुर्यद्रजतं सा शुक्तिरित्यत्र मिथ्याभूतोऽपि सर्पो रजतं चाऽऽध्यासिकसंबन्धवशाद्यथा रज्जोर्लक्षणं तथा कारणत्वमपि लक्षणं भविष्यति । कारणत्वेऽपि ब्रह्मणोऽधिष्ठानमात्रत्वाद्विकारांशे मायाया एव प्रयोजकत्वान्नासङ्गत्वहानिः । सर्वस्मिञ्जगति सत्तास्फूर्त्याकारे ब्रह्मणोऽनुगतत्वाद्विक्रियमाणत्वाकारेण मायाया अप्यनुगतत्वादुभयं मिलित्वोपादानम् । तत्र गुणप्राधान्यविवेके विवक्षानुसारेण द्विसूत्रन्यायो वा शक्तिशक्तिमन्न्यायो वाऽधिष्ठानारोप्यन्यायो वा योजनीयः । यथा सूत्रद्वयनिर्मितरज्ज्वा संयुक्तं सूत्रद्वयं समप्रधानभावेनोपादानं तथा जगतो ब्रह्म माया चेत्युभयप्राधान्यं **केचिदाहुः** । **अन्ये** त्वेवं मन्यन्ते—यथा शक्तिमानग्निर्दहतीत्यत्र शक्तेर्दाहनिर्वाहकत्वेऽपि शक्तिर्मत्पारतन्त्र्या-

---

१ ख. श्रुतेः । २ ख. °धारिषु । ३ ग °क्तिम° । ४ ख. °मत. स्यात° ।

दग्नेः प्राधान्यं तथा मायायाः शक्तित्वेनोपसर्जनत्वाच्छक्तिमतो ब्रह्मण एव प्राधान्यमिति । अपरे त्वेवमाहुः—यथा रज्ज्वतिरेकेण सर्पस्य शरीराभावेऽपि भ्रान्तिकाले रज्ज्वतिरस्कारेण व्यवहियमाणतया सर्पप्राधान्यं तथा मायायाः प्राधान्यमिति ।

स तपोऽतप्यत । स तपस्तप्त्वा ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके नवमप्रपाठके

प्रथमोऽनुवाकः ॥ १ ॥

अथ द्वितीयोऽनुवाकः ।

अन्नं ब्रह्मेति व्यजानात् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभिसंविशन्तीति ।

सर्वथाऽपि श्रूयमाणं जगत्कारणत्वं मायाविशिष्टस्य ब्रह्मण उपपन्नम् । जगत्कारणत्वरूपेण तटस्थलक्षणेनोपलक्षितस्य ब्रह्मणो विज्ञाने विचारः साधनमित्येवं श्रुतवतो भृगोः प्रथमपर्याये संपन्नं निश्चयं दर्शयति—**स तप इत्यादिना** । तपःशब्देनाऽऽश्रमचतुष्टयधर्मो विवक्षितः । तस्य ब्रह्मज्ञानहेतुत्वात् । अनाश्रमिधर्मस्य जपादेरपि तद्धेतुत्वं यद्यपि निर्णीतं तथाऽप्याश्रमिणां धर्मोऽतिप्रशस्तः । तथा च **बादरायणेन** सूत्रितम्—" अतस्त्वितरज्यायो लिङ्गाच्च " (ब्र० सू० अ० ३ पा० ४ सू० ३९) इति । आश्रमधर्मेऽपि तपःशब्दः **श्रुतिस्मृत्योः** प्रयुज्यते । " तपो हि स्वाध्यायः " इति ब्रह्मचारिधर्मः । " एतत्खलु वाव तप इत्याहुर्यः स्वं ददाति " इति गृहस्थधर्मः । " तपो नानशनात्परम् " इति वनस्थधर्मः ।

"मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः ।
तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते" ॥ इति यतिधर्मः ।

तत्र स्वाध्यायेन ब्रह्मावबोधे प्रमाणं संपादितं भवति । दानेन विविदिषोत्पद्यते । "विविदिषन्ति यज्ञेन दानेन " इति **श्रुतेः** । अनशनस्येन्द्रियदर्पनिवारकत्वं प्रसिद्धम् । ऐकाग्र्यस्य साक्षादेव ज्ञानहेतुत्वं " दृश्यते त्वग्र्यया बुद्ध्या " इत्यामातम् । अतः **स भृगुः** स्वाध्यायपूर्वकमैकाग्र्यरूपं तपः कृतवान् । तेनैकाग्र्येण युक्तो विचार्य जगज्जन्मस्थितिलयहेतुत्वलक्षणयोजनेनान्नस्य ब्रह्मत्वं निश्चितवान् । भूतशब्देन स्थूलदेहा विवक्षिताः । तेषामन्नादुत्पत्तौ लोकप्रसिद्धिद्योतनाय हिशब्दः । गर्भाशयस्थितान्नरसात्मकत्वेन शुक्रशोणितव्यतिरिक्तं कारणं व्यावर्तयितुमेवकारः । " अन्नात्पुरुषः " इत्यादिश्रौतप्रसिद्ध्यर्थः **खलु**शब्दः । यद्यप्याकाशादिभूतानि स्वरूपेणान्नान्नोत्पद्यन्ते

१ ख. घ. ंमः । यत्तत्र° । २ क. ख. घ° ङ. ंत्मत्वे° । ३ ग. ङ. शुक्रशो° ।

तथाऽपि देहाकारपरिणतानां तेषां जन्मान्नाधीनामित्यन्नस्य जगद्धेतुत्वमभिप्रेतम् । अत्र तपःशब्देनोर्ध्वरेतसामाश्रमाणां धर्मो विवक्षितः ।

तेषां सद्भावस्तृतीयाध्यायस्य **चतुर्थपादे*** चिन्तितः—

"नास्त्यूर्ध्वरेताः किंवाऽस्ति नास्त्यसावविधानतः ।
वीरघातो विधेः कल्पसावन्धपङ्गवादिगा स्मृतिः ॥
अस्त्यपूर्वविधेः कल्पसेर्वीरहाऽनग्निको गृही ।
अन्धादेः पृथगुक्तत्वात्स्वस्थानां श्रूयते विधिः ॥

पूर्वाधिकरणे स्वतन्त्रमात्मविज्ञानमित्युक्तम् । तस्य चाऽऽत्मज्ञानस्योर्ध्वरेतःस्वाश्रमेषु सुलभत्वादाश्रमसद्भावश्चिन्त्यते । तत्र नास्त्यूर्ध्वरेता इति प्राप्तम् । कुतः । विध्यभावात् । **छान्दोग्ये**—" त्रयो धर्मस्कन्धाः । यज्ञोऽध्ययनं दानमिति प्रथमः । तप एव द्वितीयः । ब्रह्मचार्याचार्यकुलवासी तृतीयः " इत्यत्र यज्ञाद्युपलक्षितगार्हस्थ्यस्य तपःशब्दलक्षितवानप्रस्थत्वस्य नैष्ठिकब्रह्मचर्यस्य च परामर्शमात्रं गम्यते । न तु विधिरुपलभ्यते । न चापूर्वार्थत्वेन विधिः कल्पयितुं शक्यः । " वीरहा वा एष देवानां योऽग्निमुद्वासयते " इत्यग्न्युद्वासनलक्षणस्य गार्हस्थ्यपरित्यागस्य निन्दितत्वात् । " चत्वार आश्रमाः " इति **स्मृतिस्तु** गार्हस्थ्यधर्मानधिकृतान्धपङ्गवादिविषया भविष्यति । न ह्यन्धस्याऽऽज्यावेक्षणाद्युपेते कर्मण्यधिकारोऽस्ति । नापि पङ्गोर्विष्णुक्रमणाद्युपेते कर्मण्यधिकारः । तस्माच्चक्षुरादिपाटवयुक्तस्याऽऽत्मज्ञानोपयुक्त ऊर्ध्वरेता आश्रमो नास्तीति प्राप्ते ब्रूमः—अस्त्यूर्ध्वरेता आश्रमः । विध्यश्रवणेऽप्यपूर्वार्थत्वेन कल्पयितुं शक्यत्वात् । न च वीरघातदोषः । उत्सन्नाग्निकगृहिविषयत्वाद्वीरहत्यायाः । यत्त्वन्धादिविषयत्वं स्मृतेरुक्तम् । तदसत् । " अथ पुनरव्रती वा व्रती वा स्नातको वाऽस्नातको वोत्सन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेत् " इति विरक्तानां गार्हस्थ्यानधिकृतानां पृथक्संन्यासविधानात् । न च चक्षुरादिपाटववतामाश्रमान्तरविधिः कल्पनीयः । **जाबालश्रुतौ** प्रत्यक्षविध्युपलम्भात्—" ब्रह्मचर्यं समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेत् " इति । तस्मादस्त्याश्रमान्तरम् " ।

आश्रमाणामवरोहाभावस्तत्रैव= चिन्तितः—

" अवरोहोऽस्त्याश्रमाणां न वा रागात्स विद्यते ।
पूर्वधर्मश्रद्धया वा यथाऽऽरोहस्तथैच्छिकः ॥

---

* परामर्शं जैमिनिरचोदनां चापवदति हि—ब्र० सू० अ० ३ पा० ४ अ० २ सू० १८ वर्णकम् १ । × जायामरणेन नष्टाग्निरुत्सन्नाग्निः । पूर्वमेवाग्निपरिग्रहरहितोऽनग्निः । = तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः—ब्र० सू० अ० ३ पा० ४ अ० १० सू० ४० ।

---

१ ब. इति ।

रागस्यातिनिषिद्धत्वाद्विहितस्यैव धर्मता।
आरोहनियमोक्त्यादेर्नावरोहोऽस्ति शास्त्रतः॥

"ब्रह्मचर्यं समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेत्" इत्याश्रमाणामारोह इच्छाधीनो यथा भवति तथा पारिव्राज्याद्वानप्रस्थ इत्याद्यवरोहोऽपि क्वचिद्रागवशात्क्वचित्पूर्वाश्रमश्रद्धावशाच्च युक्त इति प्राप्ते ब्रूमः—रागस्तावन्मिथ्याज्ञानमूलत्वान्निषिद्धः। न च पूर्वाश्रमधर्मश्रद्धा युज्यते। उत्तराश्रमिणं प्रत्यविहितत्वेन धर्मत्वाभावात्। न हि यो येनानुष्ठातुं शक्यते श्रद्धीयते च स तस्य धर्मो भवति। किं तर्हि यो यं प्रति विहितः स तस्य धर्मः। किंच "ततो न पुनरेयात्" इत्यवरोहनिषेधेनाऽऽरोहो नियम्यते। न चाऽऽरोहवदरोहे शिष्टाचारो दृश्यते। तस्मान्नास्त्यवरोहः"।

आश्रमभ्रंशे प्रायश्चित्तं तत्रैव*चिन्तितम्—

"भ्रष्टोर्ध्वरेतसो नास्ति [illegible] वा।
अदर्शनोक्तेर्नास्त्येतद्व्रतिनो गर्दभः पशुः॥
उपपातकमेवैतद्व्रतिनो मधुमांसवत्।
प्रायश्चित्ताच्च संस्काराच्छुद्धिर्यत्नपरं वचः।

नैष्ठिकब्रह्मचर्यादूर्ध्वरेतस्त्वं प्राप्य पुनः स्त्रीप्रसङ्गेन भ्रष्टस्य प्रायश्चित्तं नास्ति।

"आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः।
प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा"॥

इति प्रायश्चित्तादर्शनवचनात्। "अथ यो ब्रह्मचारी स्त्रियमुपेयात्स गर्दभं पशुमालभेत" इत्यस्ति प्रायश्चित्तमित्युच्येत। तन्न। तस्य व्रतिविषयत्वात्। उपकुर्वाणस्यो यो वेदाध्ययनाङ्गत्वेन ब्रह्मचर्यव्रतमनुतिष्ठति तद्विषयमिदं प्रायश्चित्तवचनम्। तस्मादूर्ध्वरेतस्त्वाद्भ्रष्टस्य नास्ति प्रायश्चित्तमिति प्राप्ते ब्रूमः—यथोपकुर्वाणस्य मधुमांसभक्षणमुपपातकमिति प्रायश्चित्तपुनःसंस्कारौ विद्येते तद्वदूर्ध्वरेतसोऽपि गुरुदारादिभ्योऽन्यत्र प्रवृत्तिरुपपातकमेवैं तत्। न तु महापातकम्। ततः प्रायश्चित्तात्पुनःसंस्काराच्च शुद्धिर्भवति। यदि महापातकेष्वपरिगणितत्वेनोपपातकत्वमाश्रित्य प्रायश्चित्तमुच्येत तर्ह्यदर्शनवचनस्य का गतिरिति चेद्यत्नपरं तद्वाक्यमिति ब्रूमः। अत एव प्रायश्चित्तं न पश्यामीत्याह। न तु नास्तीति। प्रायश्चित्तं तु गर्दभपशुरेव ब्रह्मचारित्वस्य समत्वात्। तथा वनस्थपरिव्राजकयोरपि भ्रंशे प्रायश्चित्तं स्मर्यते—"वानप्रस्थो दीक्षाभेदे कृच्छ्रं द्वादशरात्रं चरित्वा

---

* न चाऽऽधिकारिकमपि पतनानुमानतदयोगात्—ब्र० सू० अ०३ पा०४ अ० ११ सू० ४१।

---

१ क. ख. ग. ङ. °त्तमाश्र°। २ क. ख. ङ. येन स्वनु°। ३ घ. °स्त्येव व्रति°। ४ क. [illegible]। ५ क. ग. ङ. °ज्झिरिति। ६ घ. °त्वेन तदुप°। ७ घ. समानत्वा°।

महाकक्षं वर्धयेत् । भिक्षुर्वनस्थवत्सोमवृद्धिवर्जम्" इति । कक्षवृद्धिर्वनावापः सोमवृद्धिरपि स एव" ।

प्रायश्चित्तेनाऽऽमुष्मिकमात्रशुद्धिस्तत्रैव* दर्शिता—

"शुद्धः शिष्टैरुपादेयस्त्याज्यो वा दोषहानितः ।
उपादेयोऽन्यथा शुद्धिः प्रायश्चित्तकृता वृथा ॥
आमुष्मिक्येव शुद्धिः स्यात्ततः शिष्टास्त्यजन्त्यमुम् ।
प्रायश्चित्तादृष्टिवाक्यादशुद्धिस्त्वैहिकीष्यते ॥

पूर्वोक्तप्रायश्चित्तापादितशुद्ध्यन्यथानुपपत्त्या कृतप्रायश्चित्तस्य शिष्टैः सह व्यवहारोऽस्तीति प्राप्ते ब्रूमः—आमुष्मिकशुद्धिसद्भावेऽपि प्रायश्चित्तादर्शनवचनादैहिकशुद्ध्यभावाच्छिष्टैरेष न व्यवहार्यः" ।

एतेष्वाश्रमेषु लोकविशेषप्राप्तिहेतोः प्रवृत्तिलक्षणस्य तपसो ज्ञानसाधनत्वाभावान्निवृत्तिलक्षणस्यैकाग्र्यादिरूपस्य तपसो ज्ञानहेतुत्वं तत्रैव+ चिन्तितम्—

"लोककाम्याश्रमी ब्रह्मनिष्ठामर्हति वा न वा ।
यथावकाशं ब्रह्मैव ज्ञातुमर्हत्यवारणात् ॥
अनन्यचित्तता ब्रह्मनिष्ठाऽसौ कर्मठे कथम् ।
कर्मत्यागी ततो ब्रह्मनिष्ठामर्हति नेतरः ॥

"त्रयो धर्मस्कन्धाः" इत्याश्रमानधिकृत्य "सर्व एते पुण्यलोका भवन्ति" इत्याश्रमानुष्ठायिनां पुण्यलोकफलमभिधाय " ब्रह्मसंस्थोऽमृतत्वमेति " इति मोक्षसाधनत्वेन ब्रह्मनिष्ठा प्रतिपाद्यते । सेयं ब्रह्मनिष्ठा पुण्यलोककामिन आश्रमिणोऽपि संभाव्यते । आश्रमकर्माण्यनुष्ठाय यथावकाशं ब्रह्मनिष्ठायाः कर्तुं सुशकत्वात् । न हि लोककामी ब्रह्म न जानीयादिति निषेधोऽस्ति । तस्मात्सर्वस्याऽऽश्रमिणोऽस्ति ब्रह्मनिष्ठेति प्राप्ते ब्रूमः—ब्रह्मनिष्ठा नाम सर्वव्यापारपरित्यागेनानन्यचित्ततया ब्रह्मणि समाधिः । न चासौ कर्मशूरे संभवति । कर्मानुष्ठानत्यागयोः परस्परविरोधात् । तस्मात्कर्मत्यागिन एव ब्रह्मनिष्ठा" ।

तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके नवमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

* बहिस्तूभयथाऽपि स्मृतेराचाराच्च—ब्र० सू० अ० ३ पा० ४ अ० १२ सू० ४३ । + अ० ३ पा० ४ द्वितीयाधिकरणस्य द्वितीयं वर्णकम् ।

१ ख. स्मरं वि° ।

अथ तृतीयोऽनुवाकः ।

प्राणो ब्रह्मेति व्यजानात् । प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते । प्राणेन जातानि जीवन्ति । प्राणं प्रयन्त्यभिसंविशन्तीति ।

अथ भृगोर्द्वितीयपर्याये संपन्नं[1] निश्चयं दर्शयति–**तद्विज्ञायेत्यादिना** । तत्पूर्वोक्तमन्नस्य ब्रह्मत्वं **विज्ञाय** लक्षणसद्भावाद्विशेषेण निश्चित्य तस्मिन्नपरितुष्टो बुभुत्सति संशयवशात् । पुनरपि मन्त्रपुरःसरं गुरुमुपससारैव न त्वालस्यं कृतवान् । अपरितुष्टस्य भृगोरयमाशयः । **वाजसनेयिनस्तावदेवमामनन्ति**–– " अन्नं ब्रह्मेत्येवमाहुः । तन्न तथा पूयति वा अन्नमृते प्राणात् " इति । अन्नस्य पूतिगन्धस्तत्कार्ये देहे स्पष्टमुपलभ्यते । **विष्णुपुराणेऽप्यसौ** दर्शितः–––

" स्वदेहाशुचिगन्धेन न विरज्येत यः पुमान् ।
विरागकारणं तस्य किमन्यदुपदिश्यते" ॥ इति ।

तस्माद्देहोत्पत्तिस्थितिलयकारणस्याप्यन्नस्य ब्रह्मत्वमयुक्तमिति । **तस्योपसन्नस्य** भृगोर्वरुणः पूर्वोक्तमैकाग्र्यरूपं **तप** एव साधनत्वेनोपदिदेश । तस्य च तपसो ब्रह्मसाक्षात्कारं प्रत्यन्तरङ्गत्वाविवक्षया **तपो ब्रह्मेत्यभेद** उपचारितः । सत्यज्ञानादिस्वरूपलक्षणवाक्येन ब्रह्मण्युपदिष्टे सत्यागमप्रमेयत्वेन धर्माधर्मवत्परोक्षमेव ब्रह्मावगम्येत । ऐकाग्र्यबुद्ध्या द्रष्टुं शक्यमित्यभिप्रेत्य ब्रह्मस्वरूपमनुक्त्वा वरुणस्तप एवोक्तवान् । भृगुश्चैकाग्र्याचित्तेन पूर्वोक्तं जगत्कारणत्वलक्षणं योजयित्वा **प्राणस्य** ब्रह्मत्वं निश्चितवान् । **ऐतरेयिणः** प्राणस्य देहोत्पत्तिनिमित्तत्वं व्यतिरेकमुखेणाऽऽमनन्ति—" न ह वा ऋते प्राणाद्रेतः सिच्यते यद्वा ऋते प्राणाद्रेतः सिच्येत पूयेन्न संभवेत् " इति । कश्चिज्जीवो लिङ्गदेहयुक्तः स्वर्गान्नरकाद्वा वृष्टिद्वारेणाऽऽगत्यान्नेन सह पुरुषं प्रविश्य रेतसा सह योषिद्गर्भं यदा प्रविशति तदा तद्रेतस्त्वन्तःप्रविष्टेन प्राणवायुना शोषं प्राप्य पिण्डादिक्रमेण देहमुत्पादयति । प्राणाभावे तु देहं नोत्पादयतीत्यर्थः । यथोत्पत्तिहेतुत्वं तथा जीवनहेतुत्वमपि **कौषीतकिभिराम्नायते**—" यावदस्मिञ्शरीरे प्राणो वसति तावदायुः " इति । प्राणोत्क्रान्तौ देहस्य मरणं प्रसिद्धम् । तस्मादुपादानत्वाभावेऽपि जन्मादिन्नितयनिमित्तत्वात्प्राणो ब्रह्मेति भृगोर्निश्चयः ।

तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो

---

१ क. ख. ङ. °पपन्न° ।

ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ।
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके नवमप्रपाठके
तृतीयोऽनुवाकः ॥ ३ ॥

अथ चतुर्थोऽनुवाकः ।

मनो ब्रह्मेति व्यजानात् । मनसो ह्येव खल्वि-
मानि भूतानि जायन्ते । मनसा जातानि
जीवन्ति । मनः प्रयन्त्यभिसंविशन्तीति ॥

अथ तृतीयपर्याये संपन्नं निश्चयं दर्शयति—**तद्विज्ञायेत्यादिना** । प्राणस्य जडत्वाद्ब्रह्मत्वमयुक्तम् । " प्रज्ञानं ब्रह्म विज्ञानमानन्दं ब्रह्म " इत्यादौ ब्रह्मणश्चेतनत्वं प्रतीयते । **मनश्च** ज्ञानशक्तित्वाच्चेतनम् । जन्मादिकारणत्वं लक्षणं च मनसि विद्यते । यथा पूर्वत्र गर्भे प्राणप्रवेशस्य देहोत्पत्तिनिमित्तत्वमुक्तम्, तथा प्राणप्रवेशोऽपि मनोधीनतया तत्प्रश्नोत्तरवाक्ययो**राथर्वणिकै**राम्नायते—' कथमायात्यस्मिञ्शरीरे ' इति **गार्ग्यस्य** प्रश्नः । " मनोकृतेनाऽऽयात्यस्मिञ्शरीरे " इति **पिप्पलादस्योत्तरम्**। मनोकृतो मनःकृत ईदृशं देहं प्राप्स्यामीत्येवंविधो मरणकालीनः कर्मप्रेरिते मनसि जायमानः संकल्पः । तेन संकल्पेन पूर्वदेहावसानजनितेन तत्रत्यः प्राणोऽस्मिञ्शरीरे समायाति । अयमर्थस्तस्यामेव श्रुतौ विस्पष्टमाम्नायते—" इन्द्रियैर्मनसि संपद्यमानैर्यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः सहाऽऽत्मना यथासंकल्पितं लोकं नयति" इति । मरणकाले मनसि वृत्तिलयं प्राप्नुवद्भिर्वागादीन्द्रियैः सहितो जीवो यस्मिन्भाविदेहोचितवृत्तियुक्तो भवति तेन भाविदेहविषयज्ञानेन सहैष जीवः प्राणमायाति प्राणप्रधानो भवति । स च [illegible] भाविदेहध्यानलक्षणेन युक्तो लिङ्गदेहं सर्वं जीवात्मना सह संकल्पानुसारिणं लोकं प्रापयति । तत्र दृष्टान्तो **बृहदारण्यके** समाम्नातः—" तद्यथा तृणजलायुका तृणस्यान्तं गत्वाऽन्यमाक्रममाक्रम्याऽऽत्मानमुपसंहरत्येवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वाऽन्यमाक्रममाक्रम्याऽऽत्मानमुपसंहरति " इति । [यथा] तृणेषु संचरन्ती जलूका तृणान्तं प्राप्य प्रथमं मुखेन तृणान्तरमवलम्ब्य ततः पृष्ठभागं तृणान्तरं नयति तथा जीवात्मा मरणकाले [illegible] त्यागेनेदं वर्तमानशरीरमविद्यां गमयित्वा चैतन्यराहित्यमापाद्य मनसा देहान्तरं भावयित्वा कृत्स्नदेहं लिङ्गविशिष्टं स्वात्मानं देहान्तरं नयति । तस्माद्देहविशिष्टाः प्राणिनो **मनसो** जायन्ते । कृषिवाणिज्यादे-

---

१ क. ख. ग. ङ. °या प्रश्नो° । २ घ. °देहे चित्तवृ° ।

जीवनोपायस्य मनसा विचार्य संपादयत्वान्मनसो जीवनहेतुत्वम्। उक्तरीत्या मनसाऽभिमानपरित्यागेन मरणाहयहेतुत्वं च। तस्माल्लक्षणसद्भावान्मनसो ब्रह्मत्वं निश्चितम्।

तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तप्तस्तप्त्वा॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके नवमप्रपाठके चतुर्थोऽनुवाकः॥ ४॥

अथ पञ्चमोऽनुवाकः।

विज्ञानं ब्रह्मेति। व्यजानात्। विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते। विज्ञानेन जातानि जीवन्ति। विज्ञानं प्रयन्त्यभिसंविशन्तीति।

अथ चतुर्थपर्याये संपन्नं निश्चयं दर्शयति—तद्विज्ञायेत्यादिना। मनसश्चक्षुरादिवत्करणत्वेन कर्तृपरतन्त्रत्वान्न ब्रह्मत्वं युक्तम्। विज्ञानस्य तु कर्तृत्वं "विज्ञानं यज्ञं तनुते" इति स्पष्टमेवाऽऽम्नातम्। तल्लक्षणं च तत्र सुलभम्। कर्मद्वारा देहोत्पत्तिहेतुत्वात्। "यत्कर्म कुरुते तदभिसंपद्यते। पुण्यो वै पुण्येन कर्मणा पापः पापेन" इत्यादिश्रुतेः। लौकिककृष्यादेः कर्तृत्वेन जीवनहेतुत्वं मरणकारणयुद्धादिप्रवृत्त्या लयहेतुत्वं च। तस्माल्लक्षणलक्षितस्य विज्ञानस्य ब्रह्मत्वं युक्तम्।

तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तप्तस्तप्त्वा॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके नवमप्रपाठके पञ्चमोऽनुवाकः॥ ५॥

अथ षष्ठोऽनुवाकः।

आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति।

अथ पञ्चमपर्याये संपन्नं निश्चयं दर्शयति—तद्विज्ञायेत्यादिना। कर्तृत्वस्य क्लेशा-

---

१ घ. °क्तरीत्या। २ ब. °नत्या। ३ क. ब. °र्यायस।

त्मकत्वान्न विज्ञानस्य ब्रह्मत्वं युक्तम् । किंचान्नादिविज्ञानान्तानां चतुर्णामपि न सर्वभूतोत्पत्तिहेतुत्वमस्ति । आकाशादिभूतानामन्नादिभ्यो भौतिकेभ्यो जन्मासंभवात् । आनन्दस्य तु क्लेशरहितत्वात्स्वरूपेण सर्वाभीष्टतया परमपुरुषार्थत्वादाकाशादिसर्वभूतकारणत्वाच्च ब्रह्मत्वं मुख्यमेव संभवति । तस्याऽऽनन्दस्य स्वरूपं **छन्दोगा** आमनन्ति— "यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखम्" इति । द्वौ हि पदार्थौ भूमाऽल्पं चेति । तत्र बहोर्भावो भूमेति व्युत्पत्तेर्बाहुल्यात्मको यः पदार्थस्तदेव सुखं न तु भूम्न उपरितनेऽल्पपदार्थे सुखमस्ति । भूमा तु सुखं भवत्येव । तयोर्भूमाल्पयोर्लक्षणभेदस्तत्रैवाऽऽम्नात.—"यत्र नान्यत्पश्यति स भूमा । अथ यत्रान्यत्पश्यति तदल्पम्" इति । अन्यो द्रष्टा स्वातिरिक्तमन्यद्द्रष्टव्यं पश्यतीत्यादयस्त्रिपुटयो यस्मिन्नद्वैतपदार्थे न सन्ति सोऽयमद्वैतपदार्थो भूमा । त्रिपुटीरूपं द्वैतं यस्मिञ्जगत्यस्ति तज्जगदल्पम् । तयोर्भूमाल्पयोर्नित्यत्वानित्यत्वे च तत्रैवाऽऽम्नायेते— "यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्" इति । द्वैतावस्थयोर्जाग्रत्स्वप्नरूपयोर्दुःखमेव प्रायेणानुभूयते । यदि क्वचित्कदाचित्सुखं स्यात्तदपि साधनप्रयासतारतम्यविनाशित्वदोषैरुपेतत्वाद्दुःखमेव ।

तदुक्तं **श्रेयोमार्गकारैः**—

"इह बत दुर्लभलाभाः सुखलेशा[1] भङ्गिनो यतः शरीरभृताम् ।
तेऽपि च दुःखायातो दुःखानि पुनस्ततोऽपि दुःखानि" ॥ इति।

अनेनाभिप्रायेण नाल्पे सुखमस्तीत्युक्तम् । अद्वैतावस्थयोस्तु सुषुप्तिसमाध्योः सुखमेव स्वप्रकाशमवतिष्ठते । न च तस्य दुःखाभावत्वं शङ्कनीयम् । अभावस्य स्वप्रकाशत्वासंभवात् । प्रमाणेन विना भासमानत्वात्स्वप्रकाशत्वम् । न खल्वद्वैतं प्रमाणेन तदा प्रमीयते । तथा सति द्वैतापत्त्या सुषुप्तिभङ्गप्रसङ्गात् । भासमानत्वं विप्रतिपत्त्यभावादवगन्तव्यम् । यदा जाग्रत्स्वप्नौ विप्रतिपत्तिमकृत्वा जनोऽभ्युपगच्छति तदा सुषुप्तिसमाधी अप्यविप्रतिपत्त्याऽभ्युपसंगच्छत्येव । तस्मात्साधनमन्तरेण भासमानतया स्वप्रकाशत्वादद्वैतस्य न दुःखाभावत्वम् । + विषयलाभवत्सुषुप्तिसमाध्योः प्रीतिविषयत्वादद्वैतं सुखरूपम् । सर्वे जना असति कर्तव्यान्तरे सौषुप्तं सुखं काङ्क्षन्तः शेरते । तत्त्वज्ञानिनश्च सुखाभिलाषेणैव निर्विकल्पं समाधिं कुर्वन्ति । उभयेऽप्युत्तरकाले सुखमहमस्वाप्सं सुखमहं समाहितवानस्मीति तत्सुखमनुस्मरन्ति । आभ्यां सुषुप्तिसमाधिदृष्टान्ताभ्यां द्वैतसृष्टेः प्राचीनमप्यद्वैतं सुखमित्यवगन्तव्यम् । तस्मादद्वैतरूपादानन्दादेवेमान्याकाशादीनि हिरण्यगर्भादीनि च द्वैतरूपाणि भूतान्युत्पद्यन्ते । ननु द्वैताद्वैतरूपौ

+ किं तर्हीत्यादिः ।

१ ग संभवन्ति, २ ग, च. °लेशभ° ।

सृष्टिप्रलयावहोरात्रवत्क्रमेण पुनः पुनः पर्यावर्तते । तथा सत्येकस्य वस्तुनः परस्परविरुद्धरूपद्वयासंभवादेकस्य स्वाभाविकत्वमितरस्याऽऽगन्तुकत्वं च वक्तव्यम् । तत्र कस्य स्वाभाविकत्वं कस्य वाऽऽगन्तुकत्वं युक्तम् । उच्यते । साधनैरपेक्ष्यत्वमद्वैतस्य सुषुप्तौ संप्रतिपन्नम् । द्वैतरूपं तु जागरणमहि विषयादिबहुसाधनसापेक्षम् । तस्मात्स्वाभाविकाद्वैतरूप आनन्दो जगत आगन्तुकस्य द्वैतरूपस्योपादानम् । यथा समुद्र एकः फेनतरङ्गबुद्बुदादीनामनेकेषामुत्पत्तिस्थितिलयहेतुस्तद्वत् । तदेतज्जगत्कारणत्वलक्षणेन लक्षितमानन्दमद्वैतरूपं ब्रह्मैकाग्र्यलक्षणेन तपसा भृगुः साक्षात्कृतवान् । तस्मात्तदेव तपो मुख्यं साधनम् । तस्य चैकाग्र्यरूपस्य परमतपसः संपादनाय बहुविधा उपायाः **पातञ्जलादियोगशास्त्रे** प्रपञ्चिताः ।

यथोक्ताख्यायिकायां जगत्कारणत्वेन विचारितस्य ब्रह्मण आनन्दरूपस्य साक्षात्कारे चित्तैकाग्र्यरूपं तपोऽन्तरङ्गसाधनमित्युक्तम् । अन्नादिभ्यो विज्ञानान्तेभ्यश्चतुर्भ्योऽतिरिक्तमानन्दरूपं यथा तत्त्वं तथैवाऽऽनन्दादप्यधिकं तत्त्वान्तरमिति शङ्कां वारयितुं विद्यामुपसंहरति—

सैषा भार्गवी वारुणी विद्या । परमे व्योमन्प्रतिष्ठिता, इति ।

तच्छब्देन श्रुत्यन्तरप्रसिद्धिरुच्यते । " ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता । स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह " इत्येका श्रुतिः । " अथाऽऽश्वलायनो भगवन्तं परमेष्ठिनं परिसमेत्योवाच । अधीहि भगवन्ब्रह्मविद्यां वरिष्ठाम् " इत्यपरा श्रुतिश्च । एतच्छब्द एकाग्रचित्तजन्यानुभवप्रसिद्धिमाचष्टे । भृगुणा लब्धा **भार्गवी** । वरुणेन प्रोक्ता **वारुणी** । तादृशी **विद्या परमे व्योमनि** ब्रह्मतत्त्वे परिसमाप्ता । " तस्माद्वा एतस्मादात्मन आकाशः संभूतः " इति **यदुक्तं** तदेतदपरं व्योम । " एतस्मिन्नु खल्वक्षरे गार्गि आकाश ओतश्च प्रोतश्च " इति यदव्याकृतं श्रुतं तदेतन्मध्यमं व्योम । ऋचो अक्षरे परमे व्योमन्निति श्रुतमविनश्वरमृगादिकल्पनाधिष्ठानमृग्वेदादिप्रतिपाद्यं यद्ब्रह्मतत्त्वं तदेतदुत्तमं व्योम । न ह्येतस्मादधिकं किंचिद्वेद्यमस्ति । तथा च **श्वेताश्वतरा** आमनन्ति—" एतज्ज्ञेयं नित्यमेवाऽऽत्मसंस्थं नातः परं वेदितव्यं हि किंचित् " इति । तस्मादस्मिन्ब्रह्मणि विद्या समाप्ता ।

एकाग्रचित्तस्योत्तमाधिकारिणः सेयं विद्या सुलभा । यस्तु सांसारिकफलकामनया चञ्चलचित्तस्तस्य तत्फलसाधनोक्तिव्याजेन चित्तैकाग्र्यहेतुमुपासनं विधत्ते—

स य एवं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महा-

---

१ ख. °स्परं वि° । २ क. ख. ग. ङ. °पेक्षत्वम् । ३ ख. °विकोऽद्वै° । ४ घ. °क्षणल° ।

न्भवति । प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके नवमप्रपाठके
षष्ठोऽनुवाकः ॥ ६ ॥

अथ सप्तमोऽनुवाकः ।

अन्नं न निन्द्यात् । तद्व्रतम्, इति ।

एवंशब्दः प्रकृतं परामृशति । **अन्नं ब्रह्मेत्यारभ्याऽऽनन्दो ब्रह्मेत्येतदन्तं** प्रकृतम् । तत्र ब्रह्मज्ञानं प्रत्यन्नस्य प्रथमद्वारत्वात्तस्मिन्प्रतीके ब्रह्मदृष्टिं विधत्ते—**यः** पुमानन्नं ब्रह्मेत्युपास्ते स पुमान्मनश्चाञ्चल्यराहित्येन प्रतिष्ठितो भवति । किंच प्रभूतान्नयुक्तस्तदन्नमत्तुं समर्थो रोगादिरहितो भवति । पुत्रपौत्रादिप्रजया गवाश्वादिपशुभिर्वेदशास्त्राभ्यासरूपेण **ब्रह्मवर्चसेन** तत्तद्विषयजनितकीर्त्या च समृद्धो भवति । यस्मादन्नेन द्वारभूतेनोपासितेन ब्रह्मज्ञानं लभते तस्मादयमुपासको गुरुमिवान्नं **न निन्द्यात्** । **तद्व्रत**मिति तदेतदनिन्दनमस्योपासकस्य व्रतं नियमेन संपादनीयम् । तदतिक्रमे सत्युपासनमङ्गविकलं स्यात् ।

अथोपासनान्तरं [illegible] दर्शयति—

प्राणो वा अन्नम् । शरीरमन्नादम् । **प्राणे**
शरीरं प्रतिष्ठितम् । शरीरे **प्राणः** प्रति-
ष्ठितः । तदेतदन्नमन्ने प्रतिष्ठितम्, इति ।

यथा शरीरस्यान्तरे भुक्तमन्नं भवति तथा शरीरमध्येऽवस्थानात्**प्राण** एवान्नम् । मध्यवर्तिनस्तस्य प्राणरूपस्यान्नस्य [illegible]रमन्नादं भोक्तृरूपं गृहमध्यवर्तिस्तम्भवद्देहमध्यवर्तिप्राणस्य देहधारित्वात्**प्राणे शरीरं प्रतिष्ठितं** भवति । प्राणस्य देहधारणत्वं **प्राणसंवादे** श्रूयते—" अहमेवैतत्पञ्चधाऽऽत्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामि " इति । शरीरस्य च [illegible] प्रत्यक्षम् । [illegible]रीरयोरन्योन्याधारत्वं चिन्तनीयम् । किंच प्राणस्यान्तरवस्थानेनान्नत्वं पूर्वमुक्तम् । देहस्यान्नकार्यत्वादन्नत्वम् । तथा सत्युभयोरन्नत्वात्पूर्वोक्तरीत्या परस्पराधारत्वा**च्चान्नमेवान्ने प्रतिष्ठितमि**त्यपि चिन्तनीयम् ।

उपास्यमभिधाय तदुपासनं विधत्ते —

स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो

---

१ क. ख. ग. ङ. रोगरहितो । २ ख. °मे तदुपा° । ३ ख. °रीरान्त° । ४ ग. °रूपान्न° । ५ घ. ङ. °क्तनीत्या ।

भवति। महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान्कीर्त्या॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके नवमप्रपाठके
सप्तमोऽनुवाकः॥ ७॥

अथाष्टमोऽनुवाकः।

अन्नं न परिचक्षीत। तद्व्रतम्, इति।

अथान्यदुपास्यं दर्शयति—

आपो वा अन्नम्। ज्योतिरन्नादम्। अप्सु ज्योतिः प्रतिष्ठितम्।
ज्योतिष्यापः प्रतिष्ठिताः। तदेतदन्नमन्ने प्रतिष्ठितम्, इति।

पीतानामपामुदराग्निना जीर्णत्वादपामन्नत्वम्। ज्योतिषश्चान्नादत्वम्। वृष्ट्यादके विद्युता(द)ग्निदर्शनाद्देहसंतापेन स्वेददर्शनाच्च जलज्योतिषोरन्योन्यप्रतिष्ठितत्वम्। अत एव परस्परान्नत्वम्।

उपासनं विधत्ते—

स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतिति-
ष्ठति। अन्नवानन्नादो भवति। महान्भवति
प्रजया पशुभिर्ब्रह्मवर्चसेन। महान्कीर्त्या॥
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके नवमप्रपाठकेऽ-
ष्टमोऽनुवाकः॥ ८॥

अथ नवमोऽनुवाकः।

अन्नं बहु कुर्वीत। तद्व्रतम्, इति।

पूर्वत्र भोजनकाले प्राप्तमन्नमसम्यक्त्वबुद्ध्या न परिहरणीयमित्युक्तम्। इह त्वतिथिभ्यो दातुं बहुसंपादनमुच्यते।

पुनरप्यन्यदुपास्यं दर्शयति—

पृथिवी वा अन्नम्। आकाशोऽन्नादः। पृथिव्या-
माकाशः प्रतिष्ठितः। आकाशे पृथिवी प्रति-
ष्ठिता। तदेतदन्नमन्ने प्रतिष्ठितम्, इति।

अधस्तादुपरिष्टाच्च वर्तमानस्याऽऽकाशस्य मध्येऽवस्थानात्पृथिव्या अन्नत्वमाकाशस्य चान्नादत्वम्। मुग्धदृष्ट्योपरिष्टादाकाशस्योपलब्धेस्तयोराधाराधेयभावः। विचारदृष्ट्या त्वाकाश आधारः। तयोः परस्परान्नत्वं चिन्तनीयम्।

उपासनं विधत्ते—

स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥

इतिकृष्णयजुर्वेदीयतैत्तिरीयारण्यके नवमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

अथ दशमोऽनुवाकः ।

न कंचन वसतौ प्रत्याचक्षीत । तद्व्रतम् , इति ।

निवासार्थं स्वगृहे समागतं कमपि न निवारयेत् ।

यथोक्तव्रतनिर्वाहकमुपायं प्रसङ्गाद्विधत्ते—

तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्, इति ।

यस्मादभ्यागताय निवासे दत्ते सत्यन्नमपि दातव्यमन्यथा प्रत्यवायश्रवणात् । "एतद्वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन्वसति ब्राह्मणो गृहे" [काठ० वल्ली० १] इत्यदातुरैहिकामुष्मिककृत्स्नफलवर्जनमाम्नायते तस्मादन्नं दातुं याजनाध्यापनप्रतिग्रहाणां मध्ये येन केनापि प्रकारेणान्नसमृद्धिं संपादयेत् ।

अत्र शिष्टाचारं दर्शयति—

अराध्यस्मा अन्नमित्याचक्षते, इति ।

यो गृहे समागच्छति तस्मा आगतायान्नमराधि संपन्नमित्येवान्नवन्तो विद्वांस आचक्षते, न तु परिहरन्ति ।

बह्वन्नसंपादने फलातिशयाय दानविशेषे फलविशेषं दर्शयति—

एतद्वै मुखतोऽन्नꣳ राद्धम् । मुखतोऽस्मा अन्नꣳ राध्यते । एतद्वै मध्यतोऽन्नꣳ राद्धम् । मध्यतोऽस्मा अन्नꣳ राध्यते । एतद्वा अन्ततोऽन्नꣳ राद्धम् । अन्ततोऽस्मा अन्नꣳ राध्यते (१) । य एवं वेद, इति ।

यदन्नं संपादितमस्त्येतदेवान्नं मुखतो राद्धं भवति । मुख्ये देशे तीर्थक्षेत्रविशेषे मुख्यकाले संक्रान्त्यमावास्यादिरूपे मुख्यायाभ्यागताय वेदशास्त्रतदध्ययनानुष्ठानपराय मुख्यया वृत्त्या श्रद्धाप्रणिपातसत्कारादिरूपया मुख्येन दात्रा सात्त्विकेन दत्तमित्यर्थः ।

एतत्सात्त्विकदानं भगवतोदाहृतम्—

" दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् " ॥ इति।

यः पुमानेवं सात्त्विकं दानप्रकारं वेद विदित्वाऽनुतिष्ठति। अस्मै जन्मान्तरे मुख्यक्रमेणैवान्नं संपद्यते। मध्यतोऽन्तत इति वाक्यद्वयं राजसतामसदानपरत्वेन व्याख्येयम्।

तच्च भगवता दर्शितम्—

" यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।
दीयते च परिक्लिष्टं तद्राजसमुदाहृतम् ॥
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् " ॥ इति।

फलवाक्यमपि तदनुसारेण व्याख्येयम्। उपासनाङ्गभूतव्रतप्रसङ्गेन दानानुसारी फलविशेषोऽभिहितः।

क्षेम इति वाचि। योगक्षेम इति प्राणापानयोः।
कर्मेति हस्तयोः। गतिरिति पादयोः। विमु-
क्तिरिति पायौ। इति मानुषीः समाज्ञाः।

अथोपासनान्येव कानिचिद्विधत्ते—क्षेम इतीत्यादिना। यद्वागिन्द्रियरूपं प्रतीकमस्ति तस्मिन्ब्रह्म क्षेमरूपेणावस्थितमित्युपासीत। क्षेमो रक्षणम्। प्राणापानयोरुच्छ्वासनिश्वासयोः प्रतीकयोः क्रमाद्योगरूपेण क्षेमरूपेण च ब्रह्मावस्थितम्। अप्राप्तस्य धनादेः प्राप्तिर्योगः। तस्य परिरक्षणं क्षेमः। कर्मशब्देन होमयुद्धादिव्यापारा विवक्षिताः। ब्राह्मणस्य हस्तयोर्होमादिव्यापारः। क्षत्रियस्य हस्तयोर्युद्धादिव्यापारः। अन्यत्रापि यथायोगं द्रष्टव्यम्। ईदृशकर्मरूपेण हस्तयोः प्रतीकयोर्ब्रह्मावस्थितम्। गमनरूपेण पादयोरवस्थितम्। मलविमोचनरूपेण पायुद्वारेऽवस्थितम्। इत्येवमुक्ताः क्षेम इति वाचीत्यादिका विमुक्तिरिति पायावित्यन्ता मानुषीर्मनुष्यदेहावयवेषु संपादिताः समाज्ञा उपासनाः। सम्यगा समन्ताक्रियमाणाः क्रियाः समाज्ञाः। बहुवचननिर्देशादेकैका पृथगुपासनेत्यवगम्यते।

अथ दैवीः। तृप्तिरिति वृष्टौ। बलमिति विद्युति
(२)। यश इति पशुषु। ज्योतिरिति नक्षत्रेषु।

---

१ व. °त्त्विकं दा°। २ व. °त्त्विकदा°।

प्रजातिरमृतमानन्द इत्युपस्थे । सर्वमित्याकाशे ।

उपासनान्तराणि विधत्ते—**अथ दैवीरित्यादिना** । **अथ** मनुष्यावयवगतपञ्चोपास्तिकथनानन्तरं दैवीर्देवशरीरगता उपासनाः कथ्यन्ते । **वृष्ट्यभिमानिदेवतायां तृप्ति**रूपेणावस्थितं ब्रह्म । **विद्युद** [illegible] **बल**रू[illegible] । **पशुदेवतासु यशो**रूपेणावस्थितम् । **नक्षत्रदेवतासु ज्योतीरूपेणावस्थितम्** । **प्रजातिः** पुत्रोत्पादनम् । **अमृतं** योषिता सह क्रीडा । **आनन्दो** गुह्येन्द्रियजन्यः परकीयावयवसंयोगरूपो व्यापारः । अनेन रूपत्रयेणोपस्थाभिमानिदेवतायामवस्थितम् । त्रयस्य गुह्येन्द्रियविषयत्वं **कौषीतकिन** आमनन्ति—"प्रज्ञयोपस्थं समारुह्योपस्थेनाऽऽनन्दं रतिं प्रजातिं चाऽऽप्नोति" इति । भूतभौतिकरूपं यज्जगदस्ति तेन **सर्वेण** रूपेणाऽऽकाशाभिमानिदेवतायां ब्रह्मावस्थितम् । एतेषु क्षेम इति वाचीत्यादिषूपासनेषु यथोपासनं फलं द्रष्टव्यम् " तं यथा यथोपासते तदेव भवति " इति श्रुतेः ।

तत्प्रतिष्ठेत्युपासीत । प्रतिष्ठावान्भवति । तन्महे
इत्युपासीत । महान्भवति । तन्मन इत्युपासीत ।
मानवान्भवति (३)। तन्नम इत्युपासीत । नम्य-
न्तेऽस्मै कामाः । तद्ब्रह्मेत्युपासीत । ब्रह्मवान्भवति ।
तद्ब्रह्मणः परिमर इत्युपासीत । पर्येणं म्रियन्ते
द्विषन्तः सपत्नाः । परि येऽप्रिया भ्रातृव्याः, इति ।

एतच्छ्रुत्यर्थमेवाभिप्रेत्य कानिचित्फलसहितान्युपासनान्युदाहरति—**तत्प्रतिष्ठेती**त्यादिना । **तद्ब्रह्म प्रतिष्ठाः** स्थितिहेतुरित्युपासीनेऽशनाच्छादनादिजीवनस्थितिहेतुमान्भवति । **महो** महत्त्वगुणोपेतम् । **महान्धनादिभिः** समृद्धः । **मनो** मननशक्त्युपेतम् । **मानवान्मननशक्तिमान्** । **नमो** नमनं नमनेन वशीकरणेनोपेतम् । **अस्मा** उपासकाय **कामा नम्यन्ते** स्वाधीना भवन्ति । **ब्रह्म** वेदः । **ब्रह्मवान्स्वाधीनवेदः** । **ब्रह्मणो** ब्राह्मणस्य **परिमरः** परितो वर्तमानस्य द्वेष्यस्य मृत्युरूपः । **एनं पर्येतस्यो**पासकस्य परितो वर्तमाना **द्वेषं** कुर्वन्तः शत्रवो **म्रियन्ते** । एते द्वेषमकुर्वन्तोऽप्यप्रिया [illegible] अपि शत्रवः परितो म्रियन्ते ।

स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः
(४)। स य एवंवित् । अस्माल्लोकात्प्रेत्य । एत-

---

१ क. ख. ग. ङ. °र्वेणाऽऽका° । २ क. ख. ङ. °सीताश° ।

मन्नमयमात्मानमुपसंक्रम्य। एतं प्राणमयमात्मानमुपसंक्रम्य। एतं मनोमयमात्मानमुपसंक्रम्य। एतं विज्ञानमयमात्मानमुपसंक्रम्य। एतमानन्दमयमात्मानमुपसंक्रम्य। इमाँल्लोकान्कामान्नी कामरूप्यनुसंचरन्। एतत्साम गायन्नास्ते।

यथोक्तोपासनैरस्मिञ्जन्मनि जन्मान्तरे वा चित्तैकाग्र्यं प्राप्तस्य यद्वेदनीयं यच्च वेदनफलं तदुभयं दर्शयति—**स यश्चेत्यादिना। स यश्चायं पुरुष इत्यारभ्यैतमानन्दमयमात्मानमुपसंक्रम्येत्यन्तस्यार्थः पूर्वानुवाकेऽभिहितोऽप्यत्र नानाविधोपासनसाध्यस्य चित्तैकाग्र्यरूपस्य तपसः परम [illegible] दर्शयितुं पुनरप्यभिहितः। आनन्दमयकोशे ब्रह्म पुच्छमित्यभिहितस्याखण्डकरसस्याऽऽनन्दस्याऽऽत्मत्वेन साक्षात्कृतत्वात्प्रियमोदादिचतुर्षु कोशावयवेषु ततः पूर्वेषु च कोशेषु बन्धहेतुषु सर्वेषु स्वात्मत्वभ्रमस्य निःशेषेण परित्यक्तत्वादयं मुक्त एव। तथाऽपि [illegible] लोकैर्व्यपदिश्यते। देहेन्द्रियादीनां लोकैर्दृश्यमानत्वात्। अतो लोकदृष्ट्या जीवनात्मत्वदृष्ट्या मुक्तत्वाच्चासौ जीवन्मुक्तः। स च [illegible] मानमुपसंक्रम्य यावद्देहपातमितरपुरुषवदास्ते। किं कुर्वन्। **कामान्नी कामरूपी** भूत्वा **लोकानिमाननुक्रमेण संचरन्कामत इच्छातोऽन्नमत्तीति**। भोज्याभोज्यविभागप्रतिपादकविधिनिषेधशास्त्रातिवर्तित्वाद्वस्य कस्यापि गृहे भुङ्क्ते। तथा च **श्रूयते**—"सार्ववर्णिकं [illegible] " इति। "निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः" इत्युक्तत्वाच्च। कामत इच्छातो रूपं वेषधारणमस्यास्तीति **कामरूपी** "अव्यक्तलिङ्गा अव्यक्ताचाराः" इति **श्रुतेः**। इमे लोकाः काशीद्वारवत्यादिभूप्रदेशविशेषास्तेषु क्रमेण संचरति। न तु क्वचिद्गृहं कृत्वा निवसति "अनिकेतवास्यप्रयत्नः" इति **श्रुतेः**। यद्वा—"ब्रह्मादिस्थावरान्ता ये प्राणिनो मम पूः स्मृताः" इत्येवमुपदेशसाहस्र्यामभिहितेन प्रकारेण सर्वात्मत्वनिश्चये ये पुरुषा येषु येषु लोकेष्वनुसंचरन्ति तत्सर्वं स्वकीयमित्येव परितुष्यन्नवतिष्ठत इत्यर्थः। पुनरपि किं कुर्वन्—**एतत्साम गायन्नेतदनन्तरमेव वक्ष्यमाणं साम गीत्यात्मकं मन्त्रम्**। यद्वा समत्वप्रतिपादकं मन्त्रम् "सर्वेण समस्तेन साम" इति **श्रुतेः**। सर्वदा समस्तेन सामेत्यपि श्रुतं गायन्सामवेदोक्तक्रमेण गीतं[1] कुर्वञ्शिष्यान्प्रति स्वकीयसर्वात्मत्वप्रकटनं गानस्य फलम्।

हा३वु हा३वु हा३वु (५)। अहमन्नमहमन्नमहमन्नम्।

---

१ ग, घ. गीतिं। २ घ. °कीयं सार्वात्म्यप्र°।

अहमन्नादोऽ३हमन्नादोऽ३हमन्नादः । अहꣳश्लोक-
कृदहꣳ श्लोककृदहꣳ श्लोककृत् । अहमस्मि
प्रथमजा ऋताऽ३स्य । पूर्वं देवेभ्यो अमृतस्य
नाऽ३भायि । यो मा ददाति स इदेव माऽ३ऽऽ-
वाः । अहमन्नमन्नमदन्तमाऽ३द्मि । अहं विश्वं
भुवनभ्यभवाऽ३म् । सुवर्न ज्योतीः, इति ।

अथ सामस्वरूपं दर्शयति—हाऽ३वु हाऽ३वु इत्यादिना । अहोशब्दस्याऽऽश्चर्यवाचकस्यात्र गानार्थे वर्णविकारे सति हावुशब्दो निष्पद्यते । अतिशयद्योतनार्थं त्रिरावृत्तिः । पूर्वं देहमात्रवर्तिनो मम गुरुशास्त्रप्रसादलब्धज्ञानमात्रेण सर्वात्मकब्रह्मस्वरूपता प्राप्तेति यदस्ति तदिदमत्याश्चर्यमित्यर्थः । **अहमन्नमि**त्यादिना सर्वात्मकत्वानुभवः प्रकटी क्रियते । यद्यदन्नं व्रीहियवगोधूमादिनिष्पाद्यं तत्सर्वमहमेव तस्मिन्नन्ने नामरूपभागस्य मिथ्यात्वादधिष्ठानभागस्य सच्चिदानन्दरूपस्य वस्तुनो मत्स्वरूपत्वात् । एवमन्नाद**श्लोककृ**तावपि द्रष्टव्यौ । ब्राह्मणक्षत्रियगवाश्वादिश्चेतनोऽन्नादः । श्लोकशब्दः संघवाची पद्यवाची वा । सैन्यादिरूपं संघं करोति संपादयतीति **श्लोककृ**द्राजादिः । यद्वा काव्यादिग्रन्थेषु पद्यं करोतीति **श्लोककृ**द्विद्वान् । अत्र कृत्स्नान्नकृत्स्नभोक्तृकृत्स्नविद्वत्संग्रहार्थं वाक्येषु वीप्सा । तत्राप्येतत्सर्वात्मकत्वमावश्यकम् । सत्य इव [illegible] त्रिरुक्तिः । तस्याश्च विश्वासहेतुत्वं लोके वेदे च प्रसिद्धम् । "त्रिर्वः शपथयाम्यहम्" इत्यादिलोकप्रसिद्धिः । " त्रिषत्या हि देवाः " इति वैदिकप्रसिद्धिः । ऋतास्य ऋतस्य ब्रह्मणः **प्रथमजाः** प्रथमकार्यभूतो योऽस्ति हिरण्यगर्भः । हिरण्यगर्भकल्पनाधिष्ठानत्वात् । **देवेभ्य** इन्द्रादिभ्यः **पूर्वमेवाहमस्मि** । इन्द्रादीनामात्मना सृष्टत्वात् । सा च सृष्टिर्बृहदारण्यके पठ्यते—" तच्छ्रेयोरूपमत्यसृजत क्षत्रं [illegible] देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः " इत्यादिः । **अमृतस्य** मोक्षस्य चक्रनाभिवदाश्रयोऽस्मि । यथा रथचक्रस्य नाभिररानां नेमेश्चाऽऽश्रयस्तद्वदहमपि मोक्षस्याऽऽश्रयः " तरति शोकमात्मवित् " इत्यात्मज्ञानेन मुक्तिश्रवणात् । य आचार्यो **मामे**वंविधपरमात्मानं **ददाति** शिष्येभ्य उपदिशति **स इत्स एवा**ऽऽचार्य एवमुक्तप्रकारेण परमात्मतां बोधयित्वा शिष्यानवति । अथवा यः पुमानुदारः सन्मामन्नरूपं ब्राह्मणादिभ्यो ददाति स इत्स एवान्नस्य दाता पुरुषो ब्राह्मणादिरूपमावा वक्ष्यमाणप्रकारेणावति । "अन्नात्प्राणा भवन्ति"

---

१ ग. °र्दिसं° । २ क. ङ. °रूपसं° । ३ क. ख. ङ. °त्वमवश्यम् । ४ ग. °नाय । ५ क. ख. ङ. °त्रा क्षा ।° । ६ ख. ङ. °रुणं सो° । ७ ख. रुद्रमित्या° । ८ ग. 'मन्न° ।

इत्यादिना कार्यपरम्परामन्नजन्यामाम्नाय—"तस्मादन्नं ददन्सर्वाण्येतानि ददाति "तीइ याज्ञिक्यामुपनिषादि वक्ष्यते । बोधयितव्यः परमात्मरूपो दातव्यान्नरूपश्चाहमेवास्मीत्यर्थः । अहमन्नदेवतारूपः सन्दानमन्तरेण स्वयमेवान्नं भक्षयन्तं लोभयुक्तमतिकृपणं पुरुषमग्नि भक्षयामि । महारौरवादिनरकपातेन विनाशयामीत्यर्थः । " केवलाघो भवति केवलादी " इति श्रुतेः । " भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् " इतिस्मृतेश्च । अहं विश्वं सर्वं भुवनं लोकजातमभ्यभवमभिभूतवान् । अहमेवेश्वररूपः सन्प्रलयकाले संहृतवानस्मि । सुवःशब्दः स्वर्गस्थमादित्यमुपलक्षयति । नशब्द उपमानार्थः । आदित्यो यथा प्रकाशान्तरनैरपेक्ष्येण स्वयमेव स्वप्रकाशरूपस्तथैवाहं चक्षुरादिनिरपेक्षः सन्नेव चैतन्यज्योतिरस्मि ।

अनेन साम्ना प्रतिपादितः सर्वात्मत्वानुभवः कस्य फलमित्याशङ्क्याऽऽह—

य एवं वेद , इति ।

ब्रह्म पुच्छमितिवाक्येनोक्तमखण्डैकरसमानन्दात्मानं यः पुमानन्नमयादिद्वारेण साक्षात्करोति तस्यैतत्फलम् । यद्यपि स य एवंविदिति फलभाग्विद्वान्पूर्वमेव निर्दिष्टस्तथाऽपि विदुष एव फलं नेतरस्याविदुषः । विदुषस्त्ववश्यं फलं भवत्येवेति द्विर्विधनियमार्थं य एवं वेदेति पुनराम्नातम् ।

अनुवाकार्थमुपसंहरति—

इत्युपनिषत् (६) , इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके नवमप्रपाठके
दशमोऽनुवाकः ॥ १० ॥*

भृगुर्वै वारुणिरित्यारभ्य य एवं वेदेत्यन्तेन ग्रन्थेन प्रतिपादिता येयं विद्या सेयमितिशब्देन परामृश्यते । सा चोपनिषच्छब्दवाच्या । तच्छब्दनिर्वचनं तु पूर्वमेव प्रपञ्चितम् । एषोपनिषत्समाप्तेति वाक्यशेषः ॥

+ इति नवमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

---

* एतदग्रे ग. पुस्तके—" राध्यते विद्युति मानवान्भवत्येको ह वै य एवं वेदैकं च " इत्याधिकम् । + एतत्प्रपाठकस्याऽऽदौ—प्रपाठकानुवाकयोर्वैपरीत्यकारणस्योल्लेखंदिष्प्रण्यां कृतोऽस्ति स तत्रावलोकनीयः ।

---

१ ध. ङनन्दमात्मा° ।

[*भृगुस्तस्मै यतो विशन्ति तद्विजिज्ञासस्व त्रयो-
दशान्नं प्राणो मनो विज्ञानं द्वादश द्वादशाऽऽ-
नन्दो दशान्नं न निन्द्यादन्नं न परिचक्षीतान्नं
बहु कुर्वीतैकादशैकादश] न कंचनैकषष्टिर्दश ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः + ।

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके नवमः प्रपा-
ठकः समाप्तः ॥ ९ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥
-- ° --ो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमत्सायणाचार्यविरचिते श्रीबुक्कणसाम्राज्यधुरंधरमाधवविद्यारण्यपरमेश्व-
रसंबन्धिवेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये वारुण्यपरनामधेय-
सांहित्यामुपनिषदि ब्रह्मवल्ल्याख्यस्तृतीयोऽनुवाकः ॥ ३ ॥

समाप्तेयं वारुण्यपरनामधेयवती सांहित्युपनिषत् ।

---

*एतच्चिह्नान्तर्गतग्रन्थस्थाने ग. पुस्तकेऽन्यथा पाठः । स यथा—"भृगुस्तस्मै यतो वै विशन्ति तद्विजिज्ञासस्व तत्त्रयोदशान्नं प्राणो मनो विज्ञानं तद्विज्ञाय तं तपसा द्वादश द्वादशाऽऽनन्द इति सैषा दशान्नं न निन्द्यात्प्राणः शरीरमन्नं न परिचक्षीताऽऽपो ज्योतिरन्नं बहु कुर्वीत पृथिव्यामाकाश एकादशैकादश" इति ।

+ एतदग्रे ग. पुस्तके—"भृगुस्त्युपनिषत् । शं नो मित्रः । आवीद्वकारम् । ॐ शान्तिः" इत्यधिकम् ।

कृष्णयजुर्वेदीयं तैत्तिरीयारण्यकम् ।

*अथ दशमः प्रपाठकः ।

अथ नारायणोपनिषत् ।

(तत्र प्रथमोऽनुवाकः ।)

हरिः ॐ ।

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

इति शान्तिः ।

वागीशाद्याः सुमनसः [illegible] मे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे [illegible] ॥ २ ॥
वारुण्युपनिषद्युक्ता ब्रह्मविद्या ससाधना ।
याज्ञिक्यां खिलरूपायां सर्वशेषोऽभिधीयते ॥ ३ ॥

यथा बृहदारण्यके सप्तमाष्टमाध्यायौ खिलकाण्डत्वेनाऽऽचार्यैरुदाहृतौ, तथेयं नारायणीयाख्या याज्ञिक्युपनिषदपि खिलकाण्डरूपा [illegible] । कर्मोपासन-ब्रह्मकाण्डेषु त्रिष्वपि यद्यद्वक्तव्यमवशिष्टं तस्य सर्वस्याभिधानेन प्रकीर्णरूपत्वं खिलत्वम् । बृहदारण्यके सप्तमाध्याये—" पूर्णमदः पूर्णमिदम् " इत्यादिना ब्रह्मतत्त्वमभिहितम् । " ॐ खं ब्रह्म " इत्यादिभिरष्टमाध्यायगतैश्च " यो ह वै ज्येष्ठं च श्रेष्ठं च वेद " इत्यादिभिर्वाक्यैर्नानाविधान्युपासनान्यभिहितानि । " स यः कामयेत महत्प्राप्नुयाम् " इत्यादिना मन्थाख्यं कर्माभिहितम् । तथा पुत्रविशेषादिकामनायुक्तानां तत्कर्माण्यभिहितानि । एवमत्राप्यम्भस्य पार इत्यादिना ब्रह्मतत्त्वमभिहितम् । " आदित्यो

* अयमेव दशमः प्रपाठक उपनिषत्पञ्चकान्तर्गतनारायणोपनिषदितिनामधेयवान् । इयमेव याज्ञिक्युपनिषत्खिलकाण्डरूपेति भाष्यकृता स्पष्टीकृतम् ।

१ ङ सनातना । २ ग. णीया वाख्या ३ ख. च. झ. यद्व°। ४ ख. ग. च. °णीकरूपं ति° ५ ख. °मतैः स यो । ६ ख. ग. महान्प्राप्नु° । ७ ख. तत्पुत्र° । ८ च. नां तु त° ।

वा एष एतन्मण्डलम्" इत्यादिनोपासनमभिहितम्। "भूरन्नमग्नये पृथिव्यै स्वाहा" इत्यादिना कर्माण्यभिहितानि। तत्र कर्मणां बाहुल्याद्याज्ञिकीत्युच्यते। तदीयपाठसंप्रदाय उपक्रमे ब्रह्मतत्त्वाभिधानादुपसंहारे च ब्रह्मज्ञानसाधनानां सत्यादीनां संन्यासान्तानामभिधानादुपनिषदित्युच्यते। तदीयपाठसंप्रदायस्तु देशविशेषेषु बहुविध उपलभ्यते। तत्र यद्यपि शाखाभेदः कारणं तथाऽपि तैत्तिरीयशाखाध्यापकैस्तत्तद्देशनिवासिभिः शिष्टैरादृतत्वात्सर्वोऽपि पाठ उपादेय एव। तत्र द्रविडानां चतुःषष्टचनुवाकपाठः। आन्ध्राणामशीत्यनुवाकपाठः। कर्णाटकेषु केषांचिच्चतुःसप्ततिपाठः। अपरेषां नवाशीतिपाठः। तत्र वयं पाठान्तराणि यथासंभवं सूचयँस्तश्चतुःषष्टिपाठं प्राधान्येन व्याख्यास्यामः। तत्र प्रथमानुवाकस्याऽऽदौ काश्चिदृचो ब्रह्मतत्त्वं प्रतिपादयन्ति। तासु प्रथमामृचमाह—

अम्भस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान्।
शुक्रेण ज्योतीꣳषि समनुप्रविष्टः प्रजापतिश्चरति गर्भे अन्तः, इति।

अम्भस्य बहुविधसमुद्रमध्यवर्तिजलस्य **पारे** परतीरे यो महान्प्रौढो लोकालोकपर्वतादिस्ततोऽपि **महीयान्**महत्तरोऽयं परमेश्वरः। **भुवनस्य** पृथिव्यादिलोकस्य **मध्ये** यो महान्मेर्वादिस्ततोऽपि महत्तरः। **नाकस्य पृष्ठे** स्वर्गस्योपरि यो महान्ब्रह्मलोकादिस्ततोऽपि **महत्तरः**। तथा च **छन्दोगा** आमनन्ति—"ज्यायान्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः" इति। "स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरतः स एवेदꣳ सर्वम्" इति च। स परमेश्वरः **शुक्रेण** भासकेन जीवचैतन्यरूपेण ज्योतींषि निर्मलत्वेन भासकान्यन्तःकरणानि **सम्यगनुप्रविष्टः**। "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेः। **गर्भे** ब्रह्माण्डरूपेऽन्तर्मध्ये **प्रजापतिर्विराड्रूपो** भूत्वा **चरति** वर्तते। विराड्रूपमाथर्वणिका आमनन्ति—"अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः। वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी" इत्यादि। अग्निः प्रकाशयुक्तो द्युलोकः। सर्वव्यापी परमेश्वरो वस्तुतस्तथाविध एव सन्मायावशाद्देहेषु जीवरूपेण ब्रह्माण्डे च विराड्रूपेणावस्थित इत्यर्थः।

द्वितीयामृचमाह—

यस्मान्निदꣳ सं च वि चैति सर्वं यस्मिन्देवा अधि विश्वे निषेदुः।
तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन्, इति।

---

१ ग. च. झ. °ते। उ°। २ ख. च. °भेदाः का°। ३ ख. °यकशा°। ४ ग. च. झ. °यन्तोऽशीति°। ५ च. °रः। तथा भु°। ६ ख. ग. °था छन्दो°। ७ ख. वाग्वृत्ताश्च। ८ च. °वृत्ताश्च°।

इदं सर्वं जगद्यस्मिन्नव्याकृते मूलकारणे **समेति** च **व्येति** च। सृष्टिकाले समुत्पन्नं सत्संगतमपि भवति। शं चेति पाठे सुखमपि प्राप्नोतीति व्याख्येयम्। व्यत्ययेन वा संगतमिति द्रष्टव्यम्। संहारकाले विलीनं सद्विगतमपि भवति। **अध्यधिका हिरण्यगर्भविराडादयोऽग्नीन्द्रादयश्च विश्वे** सर्वे **देवा यस्मिन्नव्यक्ते** मूलकारणे **निषेदुर्निनितरामाश्रित्यावस्थिताः**। **तदेव** सृष्टिसंहारयोर्देवानां चाऽऽधारभूतमव्याकृतमेव। **भूतमतीतं** जगत्। **भव्यं** [illegible], **इदं** वर्तमानमपि जगत्, **तदु** तदेवाव्याकृतम्। **आ** इत्याश्चर्ये। आसीदिति प्रसिद्धिर्वा तस्यार्थः। **तत्तादृशमव्याकृतमक्षरे** विनाशरहिते **परम** उत्कृष्टे **व्योमन्नाकाशवदमूर्ते** परमात्मनि वर्तत इति शेषः।

तृतीयामृचमाह—

येनाऽऽवृतं खं च दिवं महीं च येनाऽऽदित्यस्तपति तेजसा भ्राजसा च।
यमन्तः समुद्रे कवयो वयन्ति *तदक्षरं परमे प्रजाः, इति।

वाजसनेयिनो गार्गिब्राह्मणे परमात्मन्याश्रितं यदव्याकृतमभिधीयते—"एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च" इति, तत्पूर्वस्यामृच्यभिहितम्। अस्यां तु तेनाव्याकृतेनोपहितं जगत्कारणं चैतन्यमभिधीयते। **येन** सच्चिद्रूपेण कारणेन **खमन्तरिक्षलोको दिवं** द्युलोको **महीं** महीलोक इत्येतत्सर्वमावृतं व्याप्तम्। चकाराभ्यां तत्तल्लोकवासिनो देहाः समुच्चीयन्ते। तेऽपि कारणेन व्याप्ताः। अत एवोक्ताः सर्वेऽपि सद्रूपतया भासन्ते। **येन** परमेश्वरेणानुगृहीत **आदित्यस्तेजसा** स्वकीयमण्डलान्तर्गतभास्वररूपेण **भ्राजसा च** प्रसारितरश्मिरूपया दीप्त्या च **तपति** सर्वमिदं जगदभितप्तं प्रकाशितं च करोति। **कवयस्तत्त्वविदो** यं परमात्मानं **समुद्रेऽन्तः** समुद्रोपलक्षितस्य कृत्स्नस्य जगतो मध्ये **तन्तूनिव वयन्ति** यथा पटस्वरूपे तन्तवोऽनुगतास्तथा जगति ब्रह्मतत्त्वमनुगतं पश्यन्ति। **तच्च** ब्रह्मतत्त्वमक्षरे विनाशरहिते **परम** उत्कृष्टे निजस्वरूपेऽवस्थाय **प्रजा** उत्पादयतीति शेषः। स्वरूपेऽवस्थानं **छन्दोगाः** प्रश्नोत्तराभ्यामामनन्ति—"स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि" इति। आधारान्तरराहित्यमेव स्वस्मिन्नवस्थानम्। +यदक्षर इति पाठेऽपि तच्छब्दार्थत्वेनैव व्याख्येयम्।

* यदक्षर इति ख. च. झ. पुस्तकपाठः। + ख. पुस्तके तदक्षर इति पाठः।

१ ग. च. वा गतमि। २ ख. °व्याकृते मू°। ३ ख. °दिव प्र°। ४ ग. °र्वा। तस्मान्नगतं तादृ°। ५ ख. °न्यारते यत्तद°। ६ झ. °मधी°। ७ ग. °हितम। तेन कारणेन व्याप्ता आ। ८ ग. °ण्डलया भा°। च झ. °ण्डलदीप्त्या। भा°। ९ ग. °स्वद्रूपे°। १० ग. °च्छब्दोऽर्थत्वेन व्या°। ११ ग. व्याख्येयः।

चतुर्थीमृचमाह—

यतः प्रसूता जगतः प्रसूती तोयेन जीवान्व्यचसर्ज भूम्याम् ।
यदोषधीभिः पुरुषान्पशूंश्च विवेश भूतानि चराचराणि, इति ।

पूर्वमन्त्रे जगत्कारणमव्याकृतोपहितं यच्चैतन्यमुक्तं तस्यात्र जगदुपादानत्वं प्रपञ्च्यते । "आत्मन आकाशः संभूतः" इत्यारभ्य "अन्नात्पुरुषः" इत्यन्तेन ग्रन्थेन पूर्वमभिहिता **जगतः प्रसूती प्रसूतिः** सृष्टिरुत्पत्तिर्यस्मादव्याकृतोपहिताच्चैतन्यात्प्रसूता प्रवृत्ता, तच्चैतन्यं कारणभूतं **तोयेन** जलोपलक्षितेन भूतपञ्चकेन **जीवान्**मनुष्यानादीञ्जीवदेहान्**व्यचसर्ज भूम्यां** जगत्यां विशेषेणोत्सृ(णास्)जत् । व्यसर्जेति पाठेऽपि तथैव व्याख्येयम् । तथा यच्चैतन्यरूपं मायाविशिष्टं कारण**मोषधीभिर्व्रीहियवादिभिरुपलक्षितमन्नं** भूत्वा **मनुष्यान्पशूंश्च** तदुपलक्षितस्थावरजङ्गमशरीराणि सर्वाण्यपि **प्रविवेश** वृक्षादिषु स्थावरेषु वृष्टिजलरूपेण प्रवेशः । तेन चैतन्येन सर्वं जगत्कवलितमिति शेषः ।

पञ्चमीमृचमाह—

अतः परं नान्यदणीयसꣳ हि परात्परं यन्महतो महान्तम् ।
यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्, इति ।

पूर्ववाक्योक्तेन जगत्कारणत्वौकारेणोपलक्षितं शुद्धं वस्त्वत्र निरूप्यते । **यद्वस्तु परादुत्कृष्टाद्धिरण्यगर्भादेरपि परमत्यन्तमुत्कृष्टम् । यच्च महत** आकाशादेर्**महान्तं** महत् । **यदप्येकं** सजातीयविजातीयस्वगतभेदरहितम् । **अव्यक्तमिन्द्रियागम्यम् । अनन्तरूपं** देशकालवस्तुपरिच्छेदशून्यम् । **विश्वं** जगदात्मकम् । **पुराणमनादिसिद्धम् । तमसः परस्तादज्ञानात्पृथग्वर्तते । अतो** वस्तुनोऽन्यद्**ह्यस्त्वणीयसमत्यन्तदुर्लक्ष्यं परमुत्कृष्टं नास्ति ।**

विश्वविशेषणेन यत्सर्वजगदात्मकत्वमुक्तं तदेतत्षष्ठीसप्तमीभ्यामृग्भ्यां प्रपञ्चयति—

तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम् । इष्टापूर्तं
बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः ॥
तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः ।
तदेव शुक्रममृतं तद्ब्रह्म तदापः स प्रजापतिः, इति ।

---

१ ख. 'दुत्पादनत्वं च प्र°। ग. च. दुत्पादनं च प्र°। - ग. °सूति । प्रसूतिः सृतिरु°, ३ ख. ग च. °न्व्यसस° । ४ च. झ. °त्यग्याम् । व्य° । ५ ख. ग. व्यवस° । ६ ख. °गत्पादि° । ग. °गत्पादिलि° । ७ ख. °त्वात्कारणो° । ८ ग. च. झ. °यर° । ९ ग. °ढरूपम् । १० ख. °श्वं सर्वज° । ११ ख. यस्य सर्व° । १२ ग. च. °त्सर्व ज° । १३ ख देव षष्ठी° । १४ ख. °मीभ्यां प्र° । १५ ख. °दापस्त-पज° ।

मनसा यथावस्तुचिन्तनमृतम् । वाचा तदुच्चारणं सत्यम् । एतदुभयमपि तदेवाधिष्ठानरूपं ब्रह्मैव । कर्वीनां वेदशास्त्रपारं गतानां परममुत्कृष्टं प्रमाणत्वेनाऽऽदरणीयं यद्ब्रह्म वेदरूपं वस्तु तदपि स्वाधिष्ठानभूतपरब्रह्मात्मकमेव । इष्टं दर्शपूर्णमासादि श्रौतं कर्म । पूर्तं वापीकूपादि स्मार्तं कर्म । तदुभयमपि तदेव ब्रह्म । तथा बहुधा जातं पूर्वकल्पतत्पूर्वकल्पादिरूपेण बहुप्रकारमुत्पन्नमिदानीमपि तथा जायमानं विश्वं सर्वं जगद्भुवनस्य नाभिश्चक्रनाभिवत्सर्वस्य लोकस्याऽऽधारभूतः परमात्मा विभर्ति । अत आधेयं सर्वमधिष्ठानस्वरूपमेव । अग्निवायुसूर्यचन्द्रमसोऽपि तदेव । तथा शुक्रं दीप्यमानं नक्षत्रादिकममृतं देवैः सेव्यं पीयूषमेतदुभयमपि तदेवाधिष्ठानरूपमेव। यद्ब्रह्म हिरण्यगर्भरूपं तदपि तदधिष्ठानात्मकमेव । या आपो जलोपलक्षितानि पञ्च भूतानि यश्च प्रजापतिर्विराड्रूपस्तदुभयमप्यधिष्ठानरूपमेव । यद्यज्जगदविद्यादृष्ट्या नानाविधं प्रतीयते तत्सर्वं विद्यादृष्ट्याऽखण्डैकरसं ब्रह्मैव । अत एव दृष्टिद्वयमभिप्रेत्य वाजसनेयिन आमनन्ति—"यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति" इत्यविद्यादृष्टिः, "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्" इति विद्यादृष्टिः ।

ननु—" प्रकृतिः पुरुषश्चैव नित्यौ कालश्च सत्तम " इति विष्णुपुराणे कालस्य नित्यत्वाभिधानाद्विद्यादृष्ट्याऽपि ब्रह्मरूपत्वं नास्तीत्याशङ्क्य पुराणस्याविद्यादृष्टिविषयत्वमभिप्रेत्य विद्यादृष्ट्या कालस्य ब्रह्मत्वविवक्षया ब्रह्मणः सकाशादुत्पत्तिमष्टमीनवमीभ्यां दर्शयति—

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि ।
कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः ॥
अर्धमासा मासा ऋतवः संवत्सरश्च +कल्पताम् ।
स आपः प्रदुधे उभे इमे अन्तरिक्षमथो सुवः, इति ।

निमिर्नाम जनकस्य पूर्वज आद्यो मिथिलेश्वर आसीदित्युपनिषदि वर्तते । देववरप्रसादाद्येष्वक्षिपक्ष्मपातेषु स वर्तते ते निमिषाः, त एव निमेषा इत्युच्यन्ते । पक्ष्मपातपरिमिताः सूक्ष्माः कालविशेषा इत्यर्थः । ते सर्वेऽपि विद्युतः । स्वयंप्रकाशमानात्पुरुषात्परिपूर्णात्परमेश्वरादधिजज्ञिरे आधिक्येनोत्पन्नाः । निमेषेभ्योऽप्यधिकाः कालविशेषाः काष्ठाः । ताभ्योऽप्यधिकाः कलाः । ततोऽप्यधिका मुहूर्ताः । तेभ्योऽप्यधिका अहोरात्राः ।

+ ख. ग. च. पुस्तकेषु कल्पन्तामिति पाठः ।

१ ग. 'मधि । २ ग. त्तमः ॥ इति । ३ ख. 'धे इ' । ४ ख. ग. झ सूक्ष्मकां' । ५ ग. 'लाः । ताभ्योऽधि' ।

तथा च पूर्वग्रन्थकारैरुक्तम्—

" अष्टादश निमेषास्तु काष्ठा त्रिंशत्तु ताः कला ।
तास्तु त्रिंशत्क्षणस्ते तु मुहूर्तो द्वादशास्त्रियाम् ॥
ते तु त्रिंशदहोरात्रः पक्षस्ते दश पञ्च च "॥ इति ।

चकारावनुक्तसमुच्चयार्थौ । तदेव **सर्वश** इत्यनेन स्पष्टी क्रियते । लवत्रुटयादिकाः सर्वे कालविशेषाः समुत्पन्ना इत्यर्थः ।

लवत्रुट्योः स्वरूपं **पूर्वाचार्यैरुक्तम्**—

" नलिनीपत्रसंहत्यां सूक्ष्मसूच्याऽभिभेदने ।
दले दले तु यः कालः स कालो लववाचकः ॥
लवैस्त्रुटिः स्याद्त्रिंशद्भिः " इति ।

अर्धमासाः शुक्लकृष्णपक्षरूपाः । **मासाश्चैत्रवैशाखाद्याः** । **ऋतवो** वसन्तग्रीष्माद्याः । ते सर्वेऽपि परमेश्वरादधिजज्ञिरे । तथा **संवत्सरश्च** प्रभवविभवादिरूपः **कल्पतां** परमेश्वरादुत्पन्नः । अत एव स्वप्रयोजनसमर्थो भवति । कल्पन्तामिति बहुवचनपाठे सर्वेऽपि कालविशेषाः स्वस्वप्रयोजनसमर्था इति योज्यम् । **स** परमेश्वरः स्वनिर्मितेन कालविशेषेणोपहितः संस्तत्तत्कालौचित्येनाऽऽपः **प्रदुघे** । जलोपलक्षितां पृथिवीं दुग्धवान् । प्राणिनामपेक्षितं भोग्यजातं पृथिव्यां संपादितवानित्यर्थः । तथैवान्तरिक्षमेकं स्थानम**थो** अपि च **सुवः** स्वर्गोऽपरं स्थान**मिमे उभे** स्थाने **प्रदुघे** । तयोरपि स्थानयोर्भोग्यवस्तूनि संपादितवानित्यर्थः ।

ननु काललोकादिसर्वकारणस्य सर्वत्रानुगतत्वात्कुतः प्राणिभिरसौ न गृह्यत इत्याशङ्क्य तस्य परमात्मन ऊर्ध्वत्वाद्याकारविशेषाभावाद्रूपाद्यभावाच्चेति मन्त्रद्वयेन दर्शयति—

नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ।
न तस्येशे कश्चन तस्य नाम महद्यशः ॥
न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
हृदा मनीषा मनसाऽभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति, इति ।

कश्चिदपि पुरुष **एनं** परमात्मानं स्तम्भवदूर्ध्वाकारमुपरिस्थितशालावंशवत्तिर्यगाकारं वा गृहान्तर्वर्तिदेवदत्तवत्कचिन्मध्येऽवस्थितं वा **न परिजग्रभत्** । नैव परिगृह्णाति । ऊर्ध्वाद्याकाराणां तस्मिन्नभावात् । किंच **तस्य** परमात्मनः **कश्चन** कोऽपि

---

१ च. झ. °मूच्यभिभेदने २ ग. °ण्रूपाः पक्षा. । मा° । ३ ग. °शालीवं° ।

पुरुषो नेशे नेष्टे मम ग्रहणसौकर्यार्थमीदृग्रूपो भवेति नियन्तुं न समर्थः । अत एव तस्य परमात्मनो **महद्यश** इति **नाम** संपन्नम् । अत्यन्तस्वतन्त्रत्वेन तदीयं[1] यशसोऽभ्यधिकत्वात् । किंचास्य परमात्मनो **रूपं** नीलपीतादिकं **संदृशे** प्राणिनां दृष्टिविषये **न तिष्ठति** । "अशब्दमस्पर्शमरूपम्" इत्यादिश्रुतेः । अतः **कश्चन** कुशलोऽपि पुमानत्यन्तपटुना **चक्षुषैनं न पश्यति** । कथं तर्हि गुरुशास्त्रोपदेशयुक्तो गृह्णातीति चेत् । उच्यते । **हृदा** हृदयपुण्डरीकमध्यवर्तिना **मनीषा**[3] भौतिकवस्तुगोचराणि मैनांसीष्ट इति मनीट् तथाविधेन **मनसाऽन्तःकरणेनाभिक्लृप्तः**[4] सर्वतो निश्चितो भवति । योगयुक्तं हि मनो लौकिकीर्मनोवृत्तीर्नियमयति । तेन चान्तर्मुखेनै(णै)काग्रेण मनसा परमात्माऽनुभवितुं शक्यते । " दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः " इति **श्रुतेः** । ये पुरुषा **एनं** परमात्मानमेकाग्रेण मनसा **विदुः** साक्षात्कुर्वन्ति, **ते** पुरुषा **अमृता** मरणरहिता **भवन्ति** । देहात्प्राणानामुत्क्रान्तिर्मरणं तच्च तत्त्वविदां नास्ति । "न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते" इति **श्रुतेः** ।

उक्तार्थदार्ढ्याय प्रदेशान्तरपठितान्मन्त्रानुदाहरति—

अभ्यः संभूतो हिरण्यगर्भ इत्यष्टौ, इति ।

"अद्भ्यः संभूतः पृथिव्यै रसाच्च" इत्ययमनुवाकश्चातुर्होत्रीयचयनमन्त्रप्रकरणे समाम्नातः । तस्यानुवाकस्य प्रदर्शनार्थमद्भ्यः **संभूत** इति प्रतीकमिदं पठितम् । तस्मिन्ननुवाके "तमेवं विद्वानमृत इह भवति" इति परमात्मतत्त्वविदो मरणराहित्यमुक्तम् । "**हिरण्यगर्भः** समवर्तताग्रे" इत्याद्या अष्टावृचः संहितायाश्चतुर्थकाण्डे प्रथमप्रपाठके समाम्नाताः । ता अपि वेदितव्यस्य परमात्मन उपलक्षकत्वेन हिरण्यगर्भाद्यभिधानादत्रोपयुक्ताः ।

यथा हिरण्यगर्भादयः परमात्मोपलक्षकास्तथा परमात्मना सृष्टं दिगादिकं जङ्गद्विराण्मूर्तिश्च परमात्मानमुपलक्षयतीति मन्त्रद्वयेन दर्शयति—

एष हि देवः प्रदिशोऽनु सर्वाः पूर्वो हि जातः स उ गर्भे अन्तः ।
स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः ॥
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् ।
सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी जनयन्देव एकः, इति ।

---

१ ख. च. झ 'यस्य य' । २ ख. 'देशो गृ' । ३ ख झ. 'षा लौकिक' । ४ ग. मनसेष्ट । ५ ख. 'कविषयान्निवृत्तं भवति । ६ झ. 'वनीय' । ७ ग. 'ठितत्वान्म' । ८ च, झ इत्यष्टा' । ९ ख च झ. 'र्यां चतु' । १० ग 'द्धिरण्यमूर्ति' ।

एष विद्वद्भिरनुभूयमानो देवः स्वप्रकाशः परमात्मा **प्रदिशः** प्रकृष्टाः प्राच्याद्या दिश आग्नेय्याद्या विदिशश्च **सर्वा अनुप्रविश्यावस्थितः** । प्रवेशस्य श्रुत्यन्तरप्रसिद्ध्यर्थो हिशब्दः । तथा **पूर्वो जातो** हिरण्यगर्भस्वरूपत्वेनायमेव प्रथममुत्पन्नः । **हि**शब्देन "हिरण्यगर्भः समवर्तत" इति **मन्त्रप्रसिद्धिः** सूच्यते । **स उ स** एव परमेश्वरो **गर्भे अन्तर्ब्रह्माण्डरूपस्य** गर्भस्य मध्ये वर्तते । **स** एव **विजायमानो** देवातिर्यगादिरूपेणेदानीं जायते । इतः परमपि **जनिष्यमाणः स** एव । स च **प्रत्यङ्**, अन्नमयादिकोशेभ्य आन्तरः । **मुखा** देहेन्द्रियाध्यक्षत्वेन मुख्यः । विश्वतः सर्वतो मुखानि रूपाद्युपलब्धिद्वाराणि चक्षुरादीनि यस्यासौ **विश्वतोमुखः** । तादृशोऽयं जगदधिष्ठानत्वेन **तिष्ठति** । स च ब्रह्माण्डरूपं देहं धृत्वा सर्वप्राणिदेहस्वरूपत्वात्तदीयैः सर्वैश्चक्षुरादिभिर्युक्त इति विश्वतश्चक्षुरित्यादिपदैरभिधीयते । तत्तल्लोकनिवासिनां प्राणिनां चक्षूंषि तत्र तत्र स्थितान्येवैतदीयानि भवन्ति । अतोऽस्य सर्वत्र चक्षुष्मत्त्वम् । एवं विश्वतोमुखत्वादिकमपि द्रष्टव्यम् स च परमेश्वरो **बाहुभ्यां संनमति** बाहुसदृशाभ्यां धर्माधर्माभ्यां निमित्तकारणाभ्यां सर्वं जगद्वशी करोति । तथा पतत्रैः पतनशीलैः पञ्चीकृतपञ्चमहाभूतैः **संनमति** सर्वं जगदुत्पादयति । एवमयं **देवो द्यावापृथिव्यादिकं** कृत्स्नं जगदुत्पादयन्नेक एवावतिष्ठते ।

उक्तार्थे श्रद्धातिशयमुत्पादयितुं मन्त्रद्वयेन गन्धर्ववृत्तान्तं दर्शयति—

वेनस्तत्पश्यन्निश्चा भुवनानि विद्वान्यत्र विश्वं भवत्येकनीडम् ।
यस्मिन्निदꣳ सं च वि चैकꣳ स ओतः प्रोतश्च विभू प्रजासु ॥
प्र तद्वोचे अमृतं नु विद्वान्गन्धर्वो नाम निहितं गुहासु ।
त्रीणि पदा निहिता गुहासु यस्तद्वेद सवितुः पिता सत्, इति ।

वेनो नाम गन्धर्वः [illegible] **गुहासु** बुद्धिषु **निहितममृतं** विनाशरहितं **तद्वस्तु** स्वानुभवेन **विद्वान्प्रवोचे नु** शिष्येभ्यः प्रोवाच खलु । कीदृशो वेनः । **यत्र** यस्मिन्परमात्मवस्तुनि **विश्वं** सर्वं जगदेकनीडं भवत्येकत्वेन विश्वमवस्थितं सत्तादात्म्यं प्राप्नोति **तद्वस्तु** गुरुशास्त्रप्रसादेन **पश्यन्**साक्षात्कुर्वन्**विश्वा भुवनानि** सर्वानपि लोकान्**विद्वा**ञ्ज्ञानन्वर्तते । आत्मसाक्षात्कारे हि सर्वं जगत्तदात्मकमित्यवगतिर्भवति । किंच तेन दृष्टे **यस्मिन्**वस्तुनि परमात्मनीदं जगत्**सं च वि च** समुत्पद्यते विलीनं च

---

१ झ °त्मा प्रकृ° । २ ख. ग. च, °द्या आ° । ३ ख. ग. °द्याश्च वि° । च. °द्याश्च दि° । ४ ख. ग °दिशः स° । ५ ख. °हत्वात्सर्वप्र णिनां । ६ ग. °त्र चाक्षुष्यत्व° । ७ ग. °शत्यमु° । ८ ग. °नीडम् । ९ झ. चैत्येक° । १० ग. विभुः । ११ ख. च. °नीळं भ° । १२ ख. °द्वान्विजान° । १३ ख. °गदेकात्म° । १४ च. झ. वेनेन । १५ झ. वि चैति स° ।

भवति। **एकमद्वितीयतत्त्वरूपः स** परमात्मा **विभुर्व्यापी सन्प्रजासु** सर्वासु दीर्घतन्तुव-**दोतस्तिर्यक्तन्तुवत्प्रोतश्चावतिष्ठते**। **गुहासु** प्राणिनां बुद्धिषु **त्रीणि पदा** जाग्रत्स्वप्न-सुषुप्तिरूपाणि त्रीणि स्थानानि **निहिताऽवस्थितानि**। **योऽयं** गन्धर्वस्तज्जागराद्यधि-ष्ठानं **वेद स** गन्धर्वः **सवितुरुत्पादकस्य** स्वकीयजनकस्यापि **पिता** ऋज्जनको भवति। लोकप्रसिद्धः पिता पुत्रस्य देहमात्रं जनयति। ब्रह्मतत्त्वाभिज्ञस्तु परमात्मरूपेण सर्वज-गदुत्पादकत्वाल्लोकप्रसिद्धस्य स्वजनकस्यापि समुत्पादको भवति। "**यस्ता विजाना-त्सवितुः पिता सत्**" **इतिश्रुत्यन्तरात्**।

तस्य परमेश्वरस्य व्यवहारकाले सर्वप्राण्युपकारकत्वं परमार्थदर्शिनो मुक्तिप्रदत्वं च मन्त्रद्वयेन दर्शयति—

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।
यत्र देवा अमृतमानशानास्तृतीये धामन्यध्यैरयन्त॥
परि द्यावापृथिवी यन्ति सद्यः परि लोकान्परि दिशः परि सुवः।
ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्प्रजासु, इति।

स परमेश्वरो **नो**ऽस्माकं सर्वेषां **बन्धुः**। अस्मदनुष्ठितसुकृतानुसारेण हितकारि-त्वात्। **जनितोत्पादकः**। सर्वस्रष्टृत्वात्। **स** च **विधाता** जगतो निर्माता सन्**विश्वा भुवनानि** सर्वानुत्तमाधमलोकान्**धामानि** तेषु लोकेषु देवादीनां योग्यानि स्थानानि च **वेद** जानाति। **यत्र तृतीये** लोके स्वर्गाख्ये **देवा** इन्द्रादयोऽ**मृतमानशानाः** सुधां पिबन्तो **धामानि** स्वकीयस्थानान्यभ्यैरयन्त सर्वतः प्राप्तवन्तः। तत्सर्वं विदित्वा तत्त-दनुष्ठितकाम्यकर्मानुसारेण फलं प्रयच्छतीत्यर्थः। ये तु मुमुक्षवस्ते सर्वे विदिततत्त्वाः सन्तो **द्यावापृथिवी** लोकद्वयं **सद्यः परियन्ति** बोधक्षण एव सर्वतो व्याप्नुवन्ति। तथा **लोकान**वशिष्टानन्तरिक्षादीन्**परियन्ति**। **दिशः** प्राच्याद्याः **परियन्ति**। **सुवः** स्वर्गलो-कभोगं **परियन्ति**। सर्वात्मकत्वेन सर्वव्याप्तिरुक्ता। **ऋतस्य** सत्यस्य परब्रह्मणस्तन्तु-र्मा विच्छेदेनावस्थानं **विततं** विस्तीर्णं यथा भवति तथा **विचृत्य** गुरुशास्त्रमुखान्निश्चित्य **तद्ब्रह्मतत्त्वमपश्यद्यः** साक्षात्कृतवान्स एव **प्रजासु** मध्ये **तद्ब्रह्मतत्त्वमभवत्**। तथाच **श्रुत्यन्तरम्**—"**ब्रह्म वेद ब्रह्मैव भवति**" इति।

अम्भस्य पार इत्यादिना **तदभवत्प्रजास्वित्यन्तेन** ग्रन्थेन प्रतिपादितां ब्रह्मविद्या-मुपसंहरति—

परीत्य लोकान्परीत्य भूतानि परीत्य सर्वाः प्रदिशो दिशश्च।

ख च ञ पि स्वयम्। २ च. ञ. यस्तं वि°। ३ ख ञ. °त्स पितुः। ४ ग. विवृत्य। ५ ग. ञ. ततः सर्वं। ६ ञ. °च्छन्तीत्य°। ७ ग. तस्य। ८ ग. °भवच्छे°। ९ ग. विवृत्य। १० ग. °ब्रह्मविद्ब्रह्म°।

प्रजापतिः प्रथमजा ऋतस्याऽऽत्मनाऽऽत्मानमभिसंबभूव, इति ।

ऋतस्य सत्यस्य ब्रह्मणः **प्रथमजाः** प्रथमकार्यभूतः **प्रजापतिर्हिरण्यगर्भो लोकान्भूरादीन्भूतानि** देवमनुष्यादिप्राणिदेहान्प्रादिश आग्नेय्याद्या **दिशश्च** प्राच्याद्याः **परीत्य** सर्वतो व्याप्य सृष्टिकाले सृष्ट्वा पुनरपि **परीत्य** स्थितिकाले रक्षित्वाऽऽत्मना स्वस्वरूपेण तद्विषयकतत्त्वज्ञानेनेत्यर्थः । **आत्मानं** सत्यज्ञानादिलक्षणमभिसंबभूव सर्वतः सम्यक्प्राप्तवान् ।

तदेवं ब्रह्मविद्या प्रतिपादिता । अथ तत्प्राप्तिसाधनभूताः सोपाधिकब्रह्मध्यानजपस्नानादिकर्माङ्गभूता मन्त्राः कर्मकाण्डे पूर्वमनुक्ता अस्मिन्खिलकाण्डेऽभिधीयन्ते । तत्रैकेन मन्त्रेण ब्रह्मप्राप्त्यर्थमन्तर्यामिणं प्रार्थयते—

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिं मेधामयासिषम्, इति ।

सीदत्यस्मिन्नव्याकृते कारणे सर्वं जगदिति **सदः** । तस्य **पतिं** पालकमन्तर्यामिण**मयासिषमहं** प्राप्तवानस्मि । शीघ्रं प्राप्तवानित्यनया विवक्षया भूतार्थनिर्देशः । कीदृशं सदसस्पतिम् । **अद्भुत**माश्चर्यरूपम् । मनसाऽप्यचिन्त्यरचनारूपस्य जगतोऽनायासेन [illegible]तत्वम् । **इन्द्रस्य** देवराजस्यापि **प्रियम्** । सोऽप्यन्तर्यामिणं कदा प्राप्स्यामीत्येवमाशास्ते । अत एव सर्वैरन्यैः **काम्यम**पेक्षणीयम् । **सनिं** कर्मफलस्य दातारम् । **मेधां** श्रुताधीतग्रन्थधारणशक्तिं प्रयच्छन्तमिति शेषः ।

अथ बह्व्युपाधिकं परमेश्वरं [illegible] प्रार्थयते—

उदीष्यस्व जातवेदोऽपनुन्निर्ऋतिं मम ।
पशूंश्च मह्यमावह जीवनं च दिशो दिश, इति ।

जाते प्राणिशरीरे जाठरादिस्वरूपेण विद्यतेऽवतिष्ठत इति जातवेदाः । अथवा जातानुत्पन्नान्यजमानांस्तत्तत्फलदानाय वेत्ति स्वचित्ते [illegible] जातवेदाः । हे **जातवेदो** मदनुग्रहार्थमुत्कर्षेण **दीप्यस्व** । किं कुर्वन् । **ममानिष्टकारिणीं निर्ऋतिं** पापदेवतामपनुन्निनाशयन् । तां विनाश्य ततो [**मह्यं**] मदर्थं **पशून्**गवादीन्**जीवनं** दीर्घायुष्यं चकाराभ्यामन्यदपि सर्वं भोग्यजातमावह संपादय । ततः सुखनिवासार्थं दिशः प्राच्याद्या निवासयोग्यानि तत्तद्दिग्गतस्थानानि **दिश** देहि ।

संपादितानां गवाश्वादीनामविनाशं प्रार्थयते—

मा नो हिंसीज्जातवेदो गामश्वं पुरुषं जगत् ।

---

१ ख. °व्याद्याः °। २ ख. °तार्थंऽयं नि°। ३ ग. च. झ. °द्दिग्गतस्था°

अविभ्रदग्न आगहि श्रिया मा परिपातय, इति।

हे **जातवेदस्त्वत्प्रसादान्मदीयं** गवादिकं निर्ऋतिर्मा हिंसीन्मा विनाशयतु। जगच्छब्देन गवादिव्यतिरिक्तं गृहक्षेत्रादिकं विवक्षितम्। हेऽग्ने **त्वमविभ्रदधारयच्चरमदपराधं** मनस्यधारयित्वाऽऽगहि अस्म[1] । ततो मां **श्रिया** धनधान्यादिसंपदा **परिपातय** सर्वतः प्रापय।

इत ऊर्ध्वं तेषु तेषु देशेषु श्रुतिपाठा अत[2] । तत्र **विज्ञानात्मप्रभृतिभिः पूर्वैर्निबन्धकारैर्द्राविडपाठस्याऽऽदृतत्वाद्व्याख्यामपि** तमेवाऽऽदृत्य व्याख्यास्यामः। *तत्र षड्[3] आत्मप्राप्तिद्वारभूता देवताविशेषाः प्रार्थ्यन्ते। तत्राऽऽदौ विश्वरूपधरं रुद्रं प्रार्थयते——

पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य
धीमहि। तन्नो रुद्रः प्रचोदयात्, इति।

"[4] पुरुषः" इत्यादिमन्त्रोक्तो विराट्पुरुषः सहस्राक्षः, तस्य पुरुषस्य स्वरूपं **विद्म** जानीमहि लभेमहि वा। तदर्थं **तस्य** विराट्पुरुषस्य **महादेवस्य** स्वरूपं **धीमहि** ध्यायेम। **तत्तत्र** ध्याने **नोऽस्मान्रुद्रो** विराट्पुरुषो महादेवः **प्रचोदयात्**प्रचोदयतु प्रेरयतु।

अथ "बिभ्रद्दोर्भिः कुठारं मृगमभयवरौ सुप्रसन्नो महेशः" इत्याद्यागमप्रसिद्धमूर्तिधरं रुद्रं प्रार्थयते—

तत्पुरुषाय विद्महे महादेवाय धीमहि।
तन्नो रुद्रः प्रचोदयात्, इति।

[5] पुरुषाकारं महादेवं जानीमो ध्यायेम च। तत्तस्मिन्ध्यानेऽस्मान्रुद्रः प्रेरयतु।

"बीजापूरगदेक्षुकार्मुक" इत्यागमप्रसिद्धमूर्तिधरं विनायकं प्रार्थयते——

तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि।
तन्नो दन्तिः प्रचोदयात्, इति।

गजसमानवक्त्रत्वेन दीर्घस्य तुण्डस्य रत्नकलशादिधारणार्थं वक्रत्वम्। दन्तिर्महादन्तः।

---

* तत्रशब्दानन्तरं—"द्वादशगायत्रीणां मध्ये" इत्यधिकं च. पुस्तके प्रक्षिप्तम।

१ च. झ. अत। २ ख. ग. न्धनरा। ३ ग च. ध्यायेम। ४ क. °याम:। त°। ५ ख °त्यागा°।

पुराणादिषु प्रसिद्धं पक्षिराजमूर्तिधरं देवं प्रार्थयते—

तत्पुरुषाय विद्महे सुवर्णपक्षाय
धीमहि। तन्नो गरुडः प्रचोदयात्, इति।

शोभनपतनसाधनपक्षोपेतः **सुवर्णपक्षः*** ।

"हेमप्रख्यामिन्दुखण्डाङ्कमौलिम्" इत्यागमप्रसिद्धमूर्तिधरीं दुर्गां प्रार्थयते—

कात्यायनायै विद्महे कन्यकुमारि धीमहि।
तन्नो दुर्गिः प्रचोदयात्, इति।

कृत्तिं वस्त इति कौत्यो रुद्रः। स एवायनमधिष्ठानमुत्पादको यस्या दुर्गायाः सा कौत्यायनी। कुत्सितमनिष्टं मारयति निवारयतीति कुमारी। कन्या चासौ कुमारी चेति **कन्यकुमारी**। दुर्गिर्दुर्गा। लिङ्गादिव्यत्ययः सर्वत्र च्छान्दसो द्रष्टव्यः।

"अर्कौघाभं किरीटान्वितमकरलसत्कुण्डलम्" इत्याद्यागमप्रसिद्धमूर्तिधरं देवं प्रार्थयते—

नारायणाय विद्महे वासुदेवाय धीमहि।
तन्नो विष्णुः प्रचोदयात्, इति।

नरशरीराणामुपादानरूपाण्यन्नादिपञ्चभूतानि नारशब्देनोच्यन्ते। तेषु भूतेषु या आपो मुख्यास्ता अयनमाधारो यस्य विष्णोः सोऽयं **नारायणः**। समुद्रजलशायीत्यर्थः।

तथा च स्मर्यते—

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
अयनं तस्य ताः प्रोक्तास्तेन नारायणः स्मृतः" इति॥

स च कृष्णावतारे वसुदेवस्य पुत्रत्वाद्वासुदेवः। स च स्वकीयेन वास्तवेन परब्रह्मरूपेण व्यापित्वाद्विष्णुः। ता एता गायत्र्यश्चित्तशुद्ध्यर्थं ध्यानपुरःसरं जपितव्याः।

अथ स्नानाङ्गभूता मन्त्रा उच्यन्ते। तत्र शिरसि मृत्तिकया सह दूर्वां धारयितुं दूर्वाभिमन्त्रणमन्त्रमाह—

सहस्रपरमा देवी शतमूला शताङ्कुरा। सर्वं

---

* एतदनन्तरं च. पुस्तके प्रथमं नारायणगायत्रीभाष्यं ततो दुर्गागायत्रीभाष्यमिति क्रमः। तत्र नारायणगायत्रीभाष्यसमाप्त्यनन्तरम्—"अथाऽऽम्नायपाठे गायत्रीपाठः। वज्रनखेति। भास्करेति। वैश्वानरेति। एता उपेक्षिताः" इत्यधिकं प्रक्षिप्तम्।

---

१ ख. °नखा°। २ ख. °ण्डान्तमौ°। ३ ग. °मारी धी°। ४ ग. कार्त्यो। ५ ग. झ. कार्त्याय°। ६ झ. °रीपा°। ७ झ. °र्यं देवताध्या°।

हरतु मे पापं दूर्वा दुःस्वप्ननाशिनी, इति ।

येयं [illegible] देवता सा मे पापं सर्वं हरतु । कीदृशी, सहस्रसंख्याकेभ्यः पावनहेतुभ्यो द्रव्येभ्यः परमोत्कृष्टा । सा च देवी द्योतनात्मिका । शतसंख्याकानि मूलानि यस्याः सा शतमूला । तथा शताङ्कुरा । शतशब्देन बहुत्वमात्रमुपलक्ष्यते । दुःस्वप्नकृतमनिष्टफलं नाशयतीति दुःस्वप्ननाशिनी ।

अथ मृत्तिकाभिमन्त्रणमन्त्राः, तत्र प्रथममन्त्रमाह—

अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुंधरा ।
*शिरसा धारिता देवी रक्षस्व मां पदे पदे, इति ।

येयं भूमिस्तामश्वाः शुद्धिहेतवः स्वपदैराक्रामन्ति, तादृशी भूमिरश्वक्रान्ता । अग्निचयन उखानिर्माणार्थं भूखननप्रदेशस्याश्वाक्रमणविधानादश्वपादानां मृच्छुद्धिहेतुत्वं गम्यते । तथा रथक्रान्ता रथसंचरणेन क्षुण्णा सती शुद्धा भवति । तथा त्रिविक्रमावतारे विष्णुः स्वपदेन भूमिमाक्रामति ततोऽपि शुद्धत्वम् । अश्वरथविष्णुभिराक्रान्ते शुद्धे हे भूमे वसुंधरा सर्वाणि वसूनि धारयन्ती सती स्नानकर्मण्येतस्मिन्मदीयशिरसा धारिता देवी द्योतमाना त्वं मां स्नानार्थं जलमध्ये गच्छन्तं पदे पदे रक्षस्व ।

द्वितीयमन्त्रमाह—

उद्धृतासि वराहेण कृष्णेन शतबाहुना ।
भूमिर्धेनुर्धरणी लोकधारिणी, इति ।

हे मृत्तिके त्वं भूमिरूपा सती कृष्णवर्णेन शतसंख्याकबाहुयुक्तेन वराहावतारेण पूर्वमुद्धृताऽसि । कीदृशी भूमिः । धेनुः कामधेनुवत्प्रीणयित्री । धरणी सस्यानां धारयित्री । लोकधारिणी [illegible] धारयित्री ।

तृतीयमन्त्रमाह—

मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम् ।
+त्वया हतेन पापेन जीवामि शरदः शतम्, इति ।

स्पष्टोऽर्थः ।

---

* एतत्पदद्वयमनिश्चितस्वरकम् । + इदमर्धमज्ञातस्वरकम् ।

---

१ ख, °तमाना° । २ ख. °ङ्कुराऽऽसि श° । ३ ख. च. °त्रमुर° । ४ ग. झ. धारयिष्यामि र° । ५ झ. °श्वाक्राम° । ६ ग. स्वयं प° । ७ ख. °ती तथा स्ना° । ८ ख. °तीयं म° । ९ ख. झ, °तीयं म° ।

पादद्वयात्मकं चतुर्थं मन्त्रमाह—

मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम्, इति ।

यद्यत्पुष्टिसाधनं यवगो[illegible] तत्सर्वं हे मृत्तिके त्वयि **प्रतिष्ठितम्** । तस्मान्मह्यं **पुष्टिं देहि** ।

पञ्चममन्त्रमाह—

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीꣳ सर्वभूतानां तामिहोपह्वये श्रियम्, इति ।

तां मृत्ति[illegible] देवताभिह[illegible]ये सामीप्येनाऽऽह्वयामि । कीदृशीम् । **गन्धद्वारां** घ्राणग्राह्यो गन्ध उपलब्धिद्वारं यस्याः सा गन्धद्वारा । अत एव गन्धवती पृथिवीति **तार्किका** लक्षणमाहुः । **दुराधर्षां** प्रतिकूलैः पुरुषैरसुरादिभिराधर्षितुं तिरस्कर्तुमशक्याम् । **नित्यपुष्टां** सर्वदा व्रीह्यादिधान्यैः परिपूर्णाम् । **करीषिणीं** बहुलेन गोमयेन युक्तां गोमहिष्यादिपशुयुक्तामित्यर्थः । **सर्वभूतानां** देवतिर्यङ्मनुष्यरूपाणां [illegible]मुत्पादकत्वेन नियन्त्रीम् । **श्रियं** सर्वैः सेव्याम् ।

नाभिदघ्ने जले प्रविश्य जलाभिमन्त्रणमन्त्रमाह—

सुमित्रा न आप ओषधयः सन्तु दुर्मित्रास्तस्मै
भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः, इति ।

या एता **आपस्ता** एतास्तज्जन्या व्रीहियवाद्योषधयश्च **नोऽस्मान्प्रति सुमित्राः** स्नानपानभोजनादौ[2]नुकूलाः **सन्तु** । यः शत्रुरस्मासु द्वेषं करोति यस्मिंश्च **वयं** द्वेषं कुर्म उभयविधाय **तस्मै** शत्रवे **दुर्मित्राः** प्रतिकूला **भूयासुः** स्नानपानभोजनादौ ज्वराजीर्णादिकमुत्पादयन्तु ।

एतैर्मन्त्रैरभिमन्त्रितां मृत्तिकामनुलिप्य नद्यादिजलप्रदेशे [illegible] मन्त्रद्वयमाह—

हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः ।
यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः ॥
यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम् ।
तन्न इन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनः पुनः, इति ।

---

१ ख. °श्चमं म° । २ झ. देवीभि° । ३ ग. व्रीहिधा° । झ. व्रीहियवादि° । ४ ग. °हिषादि । ५ झ. °नादिष्नु° । ६ ख. ग °नभो° ।

सुवर्णमयशृङ्गवदुपर्यवस्थितं मुकुटं यस्यासौ हिरण्यशृङ्गः, तादृशं **वरुणं** जलाधिपतिं **प्रपद्येऽनुग्रहार्थं** प्राप्नोमि । तादृशो वरुणस्त्वं मया **याचितः** प्रार्थितः संस्तीर्थमवतरणस्थानं **मे देहि** । किंचासाधूनां पापिनां गृहे मया **यद्दुष्कृतं** तथा **पापेभ्यः** पापिनां सकाशात्**प्रतिग्रहश्च** यः कृतोऽन्यदपि **यद्दुष्कृतं कृतं** मानसं वाचिकं कायिकं वाऽनुष्ठितं **मे** मदीयं **तत्सर्वमिन्द्रादयो** देवास्तदा तदा **पुनन्तु** शोधयन्तु ।

जलावस्थितदेवान्प्रति नमस्कारमन्त्रं दर्शयति—

नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरु-
णाय नमो वारुण्यै नमोऽद्भ्यः, इति ।

आपो यस्याग्नेः सन्ति सोऽयमप्सुमान्, जलमध्ये निगूढ इत्यर्थः । तथाविधायाग्नय इन्द्राय **वरुणाय वारुण्यै** वरुणपत्न्यै जलाभिमानिदेवताभ्यश्च नमस्कारोऽस्तु ।

निमज्जनप्रदेशे दुष्टजलापनयनमन्त्रमाह—

यदपां क्रूरं यदमेध्यं यदशान्तं तदपगच्छतात्, इति ।

अपां संबन्धि **यत्क्रूरं** रूपं [illegible] **यच्चामेध्यं** निष्ठीवनादिदुष्टं **यदप्यशान्तं** वात(न्त)श्लेष्मादिजनकं **तत्सर्वमस्मान्निमज्जनप्रदेशादपगच्छतु** ।

निमज्जनमन्त्रावाह—

अत्याशनादतीपानाद्यच्च उग्रात्प्रतिग्रहात् ।
य(त)न्मे वरुणो राजा पाणिना हस्तमर्शतु ॥
सोऽहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः ।
नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्मसलोकताम्, इति ।

देवर्षितृमनुष्यादियज्ञमतीत्य भुक्तमत्याशनम्, दे[illegible]त्य पीतमुदकमतीपानम्[1], अशास्त्रवर्ती यः पुमांस्तस्माद्यो धनप्रतिग्रहः, एतैरत्यशनातिपानदुष्प्रतिग्रहैः संपादितं **यत्पापं मे** मदीयं **तत्सर्वं वरुणो राजा** जलस्वामी स्वकीयेन **पाणिना**ऽपनयतु । ततः पापरहितः सोऽहं रजोगुणरहितः संसारकारणर[illegible]पाभिर्मुक्तोऽत एवानु[illegible]पापरहितः स्वर्गस्योपरिभागशारुह्य ब्रह्मणा हिरण्यगर्भेण समानलोकत्वं गच्छेद्गच्छेयम् ।

---

१ ख. मंश्नु । २ ख. पं मरं । ३ ख. 'मस्यग्नि' । ४ ग. ङ. 'तं । त्नो व' । ५ ख. वक्रांषि । ६ ग. ङ 'म्, उग्रात्प्रति' । ७ ख. 'रुष्यतांश' । ८ ख. 'नातीपा' ।

तीर्थभूतानां गङ्गादिनदीनामावाहनमन्त्रमाह—

इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमꣳ सचता परुष्ण्या ।
असिक्न्या मरुद्वृधे वितस्तयाऽऽर्जीकीये शृणुह्या सुषोमया, इति ।

हे गङ्गाद्या नद्यो यूयं परुष्ण्यादिभिर्नदीभिः सह मे मदीयमिमं **स्तोमं** स्तोत्रं **शृणुहि** शृणुत । श्रुत्वा **तत्राऽऽसचताऽऽ**गत्य जले तद्द्वारेण मयि च समवेता भवत । गङ्गा-यमुनासरस्वत्यः प्रसिद्धाः । **शुतुद्री**ति नद्यन्तरस्य संबोधनम् । **मरुद्वृध आर्जीकीय** इत्यन्ययोर्नद्योः संबोधनद्वयम् । **परुष्णियाऽसिक्न्या वितस्तया सुषोमये**ति पद-चतुष्टयं तृतीयान्तं नदीचतुष्टयवाचकम् ।

जले निमग्नस्य [illegible] —

ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत । ततो रात्रिरजायत ततः समुद्रो अर्णवः । समुद्रादर्णवादधि संवत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथिवीं चान्तरिक्षमथो सुवः, इति ।

ऋतं मानसं यथार्थसंकल्पनम् । **सत्यं** वाचिकं [illegible] । चकाराभ्यामन्यदपि शास्त्रीयं धर्मजातं समुच्चीयते । तत्सर्वमभीद्धादभितः प्रकाशमानात्परमात्मन उत्पन्नम् । कदा समुत्पन्नमित्युच्यते । **तपसोऽधि** [illegible] ऊर्ध्वम् । "स तपस्तप्त्वा । इदꣳ सर्वमसृजत" इति श्रुत्यन्तरात् । "यस्य ज्ञानमयं तपः" इति श्रुत्यन्तराच्च । **ततः** स्वप्रकाशात्परमेश्वराद्रात्रिरुत्पन्ना । अह्नोऽप्येतदुपलक्षणम् । **ततः** तस्मात्परमेश्वरात्**समुद्र** उत्पन्नः । सामान्योक्तस्य लवणोदक्षीरोददध्यादिविशेषमभिप्रेत्यार्णवशब्देन पुनर्विशेष्यते । अवान्तरभेदयुक्तात्**समुद्रा**दध्यूर्ध्वं संवत्सरोपलक्षितः कृत्स्नः कालः समुत्पन्नः । स चोत्पादकः परमेश्वरोऽहोरात्रोपलक्षितान्सर्वान्कालविशेषान्**विदधत्सृजन्मिषतो** [illegible] **विश्वस्य** सर्वस्य प्राणिजातस्य **वशी** स्वामी भूत्वा वर्तते । स तादृशो **धाता** परमेश्वरः सूर्यादिदेवान्पृथिव्यादिलोकांश्च **यथापूर्व**मतीतसृष्टौ यस्य यादृशं रूपं तादृशमनतिक्रम्याकल्पयत्संकल्पमात्रेण संपादितवान् । **दिवं** चेत्युपात्तत्वात्सुवःशब्देन भोगविशेषो विवक्षितः ।

---

१ ख. श्रुतुद्रि । २ ख. °थार्थं सं° । ३ ख. °थार्थं भा° । ४ ख. °मिति तदुच्य° ५ ख. ग. °नक्ष° । ६ ख. °भः । स समात्तस्य । ७ ख. °न्नः । तस्याप्युपा° । ८ ख. °धदसृज°

अघमर्षणं कृत्वा तत ऊर्ध्वमवगाहनार्थास्तिस्र ऋचो दर्शयति—

यत्पृथिव्याꣳ रजः स्वमान्तरिक्षे विरोदसी । इमाꣳस्तदापो वरुणः पुनात्वघमर्षणः । एष भूतस्य मध्ये भुवनस्य गोप्ता । एष पुण्यकृतां लोकानेष मृत्योर्हिरण्मयम् । द्यावापृथिव्योर्हिरण्मयꣳ सꣳश्रितꣳ सुवः । स नः सुवः सꣳशिशाधि, इति ॥

पृथिव्यां वर्तमानानामस्माकं **स्वं रजः** स्वकीयं पापं **यदस्ति** । **आन्तरिक्षे** सर्वतोऽन्तरिक्षलोके **विरोदसी** विशेषेण रोदस्योर्द्यावापृथिव्योर्यत्पापमस्ति । अत्र रोदस्योः पृथगुक्तत्वात्पृथिव्यामितिपदेन भूमेरधस्ताद्वर्तमानः पाताललोको विवक्षितः । सर्वेष्वपि लोकेषु तत्तज्जन्मान्यनुभवतामस्माकं यत्पापमासीत्तत्सर्वं पापं तदनुष्ठातॄनिमानस्मांश्च **वरुणः पुनातु** शोधयतु । पापं विनाश्य शुद्धानस्मान्करोतु । कीदृशो वरुणः । **आपो** जलस्वामित्वेन तद्रूपः । अघानि मर्षयति विनाशयतीत्यघमर्षणः । तादृश **एष** वरुणो **भूतस्यातीतस्य भुवनस्य** प्राणिजातस्य **गोप्ता** रक्षिता । तथा +भाव्यस्य भविष्यतोऽप्यग्रतो **गोप्ता** । **एष** वरुणः **पुण्यकृतां** ज्योतिष्टोमादिकारिणां **लोकान्प्रयच्छ**तीति शेषः । **एष** वरुणो **मृत्योः** सर्वप्राणिमारकस्य यमस्य संबन्धिनं **हिरण्मयं** लोकविशेषं पापिनां प्रयच्छतीति शेषः । यत्र **हिरण्मयं** ब्रह्माण्डरूपं **सुवः** स्वर्गशब्दाभिधेयं **द्यावापृथिव्योर्द्युलोकभूलोकयोः संश्रितं** प्रवर्तते । हे वरुण **स** त्वं **नोऽ**स्मान्प्रति **सुवस्तादृशं** स्वर्गलोकं **संशिशाधि** सम्यगनुगृहाण ।

इति तिसृभिर्ऋग्भिः स्नातवतः पुरुषस्याऽऽचमनार्थं मन्त्रमाह—

आर्द्रं ज्वलति ज्योतिरहमस्मि । ज्योतिर्ज्वलति ब्रह्माहमस्मि । योऽहमस्मि ब्रह्माहमस्मि । अहमस्मि ब्रह्माहमस्मि । अहमेवाहं मां जुहोमि स्वाहा, इति ॥

यदेतदुदकरूपमार्द्रं तदेतत्स्वाधिष्ठानचैतन्येन **ज्वलति** प्रकाशते । तच्चाधिष्ठानचैतन्यरूपं **ज्योतिरहमस्मि** । देहेन्द्रियादिभ्यो विवेचितस्य **मम** तदेव जलाधिष्ठान

+ मध्येपदस्य व्याख्यानमेतत् । मध्येपदस्थाने भाव्यस्येति वा पाठः कल्पनीयः ।

---

१ ख. °तोऽप्यागामिनोऽपि गो° । २ ख. ब्रह्मलोकं । ३ ख °ण । ति° । ४ ग. ङ. °नरू° । ५ ग. ङ. °देशाधि° ।

चैतन्यं स्वरूपमित्यर्थः। तदेवोपपाद्यते— यज्ज्योतिर्ज्वलतीत्युक्तं तज्ज्योतिर्ब्रह्मैव। अतो ज्योतिरहमस्मीति वाक्येन ब्रह्माहमस्मीत्युक्तं भवति। न च पूर्वसिद्धं जीवात्मनः स्वरूपं विनाश्य रूपान्तरस्य ब्रह्मत्वलक्षणस्य प्राप्तिर्भवति। किंतु योऽहं पुरा जीवोऽस्मि स एवेदानीमहं ब्रह्मास्मि। वस्तुतो ब्रह्मण्येव मयि पूर्वमज्ञानाज्जीवत्वमारोपितमासीत्। तस्मिन्नज्ञाने विवेकेनापनीते सति वस्तुतः पूर्वसिद्धमेव ब्रह्मस्वरूपमिदानीमनुभविताऽस्मि, नतु नूतनं किंचिद्ब्रह्मत्वमागतम्। तस्मादहमेवाहं ब्रह्मभावानुभववेलायामपि पूर्वसिद्धोऽहमेव न तु योषित्यग्निध्यानवदुपचरितं ब्रह्मत्वम्। तादृशोऽहं जलरूपं मां जुहोमि उदराग्नौ प्रक्षिपामि। हविष्प्रदानवाची स्वाहाशब्दः। मदेहवर्तिभ्यो देवेभ्यो जलरूपं हविर्दत्तमित्यर्थः।

आचमनादूर्ध्वं पुनरपि स्नाने मन्त्रमाह—

अकार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः।
वरुणोऽपामघमर्षणस्तस्मात्पापात्प्रमुच्यते, इति॥

अकार्यं शास्त्रप्रतिषिद्धं कलञ्जभक्षणादिकं तत्कर्तुं शीलं यस्यासावकार्यकारी। प्रतिषिद्धस्त्रीगमनवानवकीर्णी। ब्राह्मणसुवर्णहर्ता स्तेनः। वेदवेदाङ्गविद्ब्राह्मणो गर्भो वा भ्रूणस्तं हन्तीति भ्रूणहा। गुरुदारगामी तु गुरुतल्पगः। एतादृशपापकारिणमपि मामघमर्षणः पापविनाशकोऽपां स्वामी वरुणस्तस्मात्सर्वस्मात्पापात्प्रमुच्यते मोचयति।

रहस्यपापक्षयार्थं स्नानमन्त्रमाह—

रजोभूमिस्त्व मा२ रोदयस्व प्रवदन्ति धीराः।
*पुनन्तु ऋषयः पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः, इति॥

रजो रजसः पापस्य भूमिः स्थानभूतोऽहमतो हे देव त्वं तत्पापफलभूतयाऽतनया मां रोदयस्व। यद्यप्येतत्तवोचितं तथाऽपि धीरा बुद्धिमन्तः शास्त्रपारं गता मामनुगृह्णन्त एवं प्रवदन्ति। तदीयं वाक्यमुदाहियते—ऋषयो वसिष्ठादिमुख्या एनं स्नानकारिणं पुनन्तु शोधयन्तु। तथा वसवोऽष्टसंख्याका एनं पुनन्तु। वरुणोऽप्येनं पुनातु। अघमर्षणः पापविनाशकोऽन्योऽपि देव एनं पुनातु। एवं धीरैर्महद्भिरनुगृहीतत्वादप्यादिभिः पूतं मां त्वमपि यमदेव मा बाधस्व किंत्वनुगृहाणेत्यर्थः।

---

* पदद्वयमनिश्चितस्वरकम्।

---

१ ख. ग. 'ते। ज्योति°। २ ग. 'सिद्धजी°। ३ ख. 'ह्मात्मस्व°। ४ ख. °ह्मत्वानु°। ५ ख. 'र्णी क्षत्रव्रतः। ब्रा'। ६ ख. 'ह्मणस्तद्गर्भो। ७ ख. °ति मोचयतु। र'। ८ ग. मिस्त्वं मा२। ९ ख. °यात'। १० ग. वशिष्ठम°। ११ ख. ग. 'स्व, अनु°।

स्नानादूर्ध्वं जप्यं मन्त्रमाह—

आक्रान्त्समुद्रः प्रथमे विधर्मञ्जनयन्प्रजा भुवनस्य राजा।
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे सुवान इन्दुः, इति॥

समुद्रवत्प्रौढत्वात्संमोदाख्यपरमानन्दस्वभावत्वाद्वा समुद्रः परमात्मा। स च सर्वं जगदाक्रानाक्रान्तवान्व्याप्तवान्। किं कुर्वन्। प्रथमे सृष्टेरादिकाले प्रजा जनयन्। कीदृशे प्रथमकाले विधर्मन्प्राणिभिः पूर्वकल्पेऽनुष्ठिता विविधा धर्मा यस्मिन्काले स्वफलदानार्थमुद्बोध्यन्ते सोऽयं विधर्मा तस्मिन्। स च परमात्मा भुवनस्य पालकत्वाद्राजा। स्वभक्तानां कामानां वर्षणहेतुत्वाद्वृषा। ईदृशः सर्वत्र व्याप्तवान्। किंच सानो सानौ पर्वतपार्श्वभागे, श्रुत्यन्तरे—"तं ब्रह्मगिरिरित्याचक्षते" इति श्रवणाद्ब्रह्मावबोधयोग्यो देहो गिरिस्तदवयवः सानुर्हृदयपुण्डरीकं तच्च पवित्रं बाह्यदेहावयववदुच्छिष्टस्पर्शादिदोषाभावाच्छुद्धमधि पुरुषार्थहेतुध्यानस्थानत्वादितरावयवेभ्योऽप्यधिकमत एव ध्यातृणामवनस्य पालनस्य हेतुत्वादव्यम्। हिमवत्पुत्र्या गौर्या ब्रह्मविद्याभिमानिरूपत्वाद्गौरीवाचक उमाशब्दो ब्रह्मविद्यामुपलक्षयति। अत एव तलवकारोपनिषदि ब्रह्मविद्यामूर्तिप्रस्तावे ब्रह्मविद्यामूर्तिः पठ्यते—"बहुशोभमानामुमां हैमवतीं तां होवाच" इति। तद्विषयः परमात्मा तयोमया सह वर्तमानत्वात्सोमः, स च सानौ हृदयपुण्डरीके बृहद्ब्रह्म यथा भवति तथा वावृधे वृद्धिं प्राप्तः। पूर्वमविद्यावृतत्वेन संकुचितो जीवो भूत्वा तस्यामविद्यायां विद्यया ऽपनीतायां [illegible] इव भासत इत्यर्थः। स च सोमः सुवानो जीवानां धर्माधर्मयोः प्रेरकः। इन्दुः फलदानेन चन्द्रवदाह्लादहेतुः।

अथानिष्टपरिहारार्थत्वेन जप्या मन्त्रा उच्यन्ते। तत्रैकामृचमाह—

जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः, इति॥

वेदांसि वेदनानि ज्ञानानि तानि जातान्युत्पन्नानि यस्मादग्नेः सोऽयं जातवेदाः, आधानेन संस्कृतेऽग्नौ पश्चात्तदा तदा कर्तव्यविषयाणि ज्ञानान्युत्पद्यन्ते। तस्मै जातवेदसे यागकाले लतात्मकं सोमं सुनवामाभिषुतं करवाम। स्वयं सर्वं वेत्तीति वेदोऽग्निः। स चारातीयतोऽस्मास्वरातित्वं शत्रुत्वमिच्छतः पुरुषान्निदहाति नितरां भस्मी करोति। किंच सोऽग्निर्नोऽस्माकं विश्वा दुर्गाणि सर्वा आपदोऽतिपर्षदतिशयेन नाशितवानित्यर्थः। किंच यथा लोके नावा सिन्धुं समुद्रं नाविकस्तारयति तथाऽग्निर्दुरितानि पापान्यतिशयेन तारयतीति शेषः।

---

१ ब्र. °त्वात्समोदत्वात्पर° २ ब्र. हृदया। ३ ब्र. °त्वं कर्तुमि°।

द्वितीयामृचमाह—

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीꣳ शरणमहं प्रपद्ये सुतरसि तरसे नमः, इति ॥

येयं नवदुर्गाकल्पादिषु मन्त्रशास्त्रेषु प्रसिद्धा तां दुर्गां देवीमहं शरणं प्रपद्ये । कीदृशीम् । अग्निसमानवर्णाम् । तपसा स्वकीयेन संतापेन ज्वलन्तीमस्मच्छत्रून्दहन्तीम् । विशेषेण रोचते स्वयमेव प्रकाशत इति विरोचनः परमात्मा, तेन दृष्टत्वाद्वैरोचनीम्, कर्मफलेषु स्वर्गपशुपुत्रादिषु निमित्तभूतेषु जुष्टामुपासकैः सेविताम् । हे सुतरसि सुष्ठु संसारतरणे हेतो देवि तरसे तारयित्र्यै तुभ्यं नमोऽस्तु ।

तृतीयामृचमाह—

अग्ने त्वं पारया नव्यो अस्मान्त्स्वस्तिभिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः, इति ॥

हेऽग्ने नव्यः स्तोतव्यस्त्वमस्मान्स्वस्तिभिः क्षेमकारिभिरुपायैर्विश्वा दुर्गाण्यति सर्वा आपदोऽतिशयेन लङ्घयित्वा पारय संसारस्य परतीरं नय । नोऽस्माकं त्वत्प्रसादात्पूश्च या निवासयोग्या पुरी साऽपि पृथ्वी विस्तीर्णा भवतु । उर्वी सर्वस्य निष्पादनयोग्या भूमिरपि बहुला भवतु । त्वं च तोकाय तनयायास्मदपत्याय तदीयपुत्राय च शंयोर्भव सुखस्य मिश्रयिता भव ।

चतुर्थीमृचमाह—

विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरितातिपर्षि ।
अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम्, इति ॥

हे जातवेदो दुर्गहा सर्वासामापदामपहन्ता त्वं विश्वानि दुरिता सर्वाणि पापानि नावा सिन्धुं न समुद्रमिव नोऽस्मानतिपर्षि अतिशयेन तारयसि । हेऽग्नेऽत्रिवदाध्यात्मिकादितापत्रयरहितत्वेनात्रिशब्दवाच्यो जीवन्मुक्तो महर्षिः "आत्मौपम्येन भूतानां दयां कुर्वीत मानवः" इत्येतच्छास्त्रमनुसृत्य "सर्वे च सुखिनः सन्तु सर्वे सन्तु निरामयाः" इत्येवं मनसा यथा सर्वदा भावयति तथा त्वमपि मनसा गृणानो गृणन्नुच्चारयन्भावयन्नस्माकं तनूनामविता रक्षिता भूत्वा बोधि बुध्यस्व सावधानो भवेत्यर्थः ।

पञ्चमीमृचमाह—

पृतनाजितꣳ सहमानमुग्रमग्निꣳ हुवेम परमात्सधस्थात् ।

---

१ ङ ञ सस्यानि' २ ख. °णान उच्चा° । ३ ख. ग. °नो गुणानुच्चा° ।

स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरितात्यग्निः, इति ॥

पृतनाः परकीयसेना जयतीति पृतनाजित्तमत एव सहमानं शत्रूनभिभवन्तमुग्रं भीतिहेतुमग्निं परमादुत्कृष्टात्सधस्थात्स्वकैर्भृत्यैः सहावस्थानदेशाद्धवेमाऽऽह्वयाम। स न इत्यादि पूर्ववत्। किंचाग्निर्देवः क्षामदस्मदपराधान्क्षममाणोऽतिदुरितातिशयितानि पातकानि ब्रह्महत्यादीन्यतिलङ्घयतीति शेषः।

षष्ठीमृचमाह—

प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि।
स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि प्रथमोऽनुवाकः ॥ १ ॥

हेऽग्ने त्वमध्वरेषु यागेष्वीड्यः स्तुत्यः सन्कं सुखं प्रत्नोषि प्रतनोषि विस्तारयसि। सनाच्च कर्मफलस्य दाताऽपि सन्होता होमनिष्पादकः, नव्यः स्तुत्योऽपि भूत्वा सत्सि सीदसि यागदेशे तिष्ठसि। अतो हेऽग्ने स्वां च स्वकीयामपि तनुवं पिप्रयस्वास्मदीयहविषा प्रीणय। ततोऽस्मभ्यं च सौभगं शोभनभाग्योपेतत्वमायजस्व सर्वतो देहि ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि प्रथमोऽनुवाकः ॥ १ ॥

=====

अथ द्वितीयोऽनुवाकः।

अथ होमार्थान्महाव्याहृतिसंज्ञकान्मन्त्रानाह—

भूरग्नये पृथिव्यै स्वाहा भुवो वायवेऽन्तरिक्षाय स्वाहा सुवरादित्याय दिवे स्वाहा भूर्भुवः सुवश्चन्द्रमसे दिग्भ्यः स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवरोम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि द्वितीयोऽनुवाकः ॥ २ ॥

भूर्भुवः सुवरोमिति त्रीणि पदान्यव्ययानि । तानि च व्यस्तरूपेण समस्तरूपेण च तत्तच्चतुर्थ्यन्तरूपतां प्रतिपद्यान्यादिदेवताप्रतिपादकानि । तथा सत्ययमर्थः संपद्यते । भूरित्यनेन मन्त्रेण प्रतिपाद्यायाग्नये तन्मन्त्रप्रतिपाद्याय पृथिव्यै च स्वाहा सुहुतमिदं द्रव्यमस्त्विति । एवमुत्तरेष्वपि त्रिषु मन्त्रेषु योज्यम् । अत्र द्रव्यविशेषस्यानुक्तत्वात्सर्वहोमसाधारणमाज्यमेव द्रव्यमित्यवगन्तव्यम् । फलविशेषस्यानुक्तत्वात्पापक्षयोऽत्र साधारणं फलं द्रष्टव्यम् । चतुर्भिर्मन्त्रैर्यथाशक्ति हुत्वाऽन्ते प्राङ्मुखो नमो देवेभ्य इति मन्त्रेणोपतिष्ठेत । पश्चादक्षिणाभिमुखः स्वधा पितृभ्य इति मन्त्रेणोपतिष्ठेत । स्वधाशब्दः पितृप्रियं नमस्काराद्युपचारं ब्रूते । भूर्भुवः सुवरिति लोकत्रयेऽपि पापरहितो भवामि । ओमित्ययं शब्दोऽङ्गीकारवाचित्वात्तत्र तत्रोचितार्थाङ्गीकारं प्रतिपादयति । नारायणाख्येनेश्वरेण मुनिना वा दृष्टत्वादयं प्रपाठको नारायणीयः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि द्वितीयोऽनुवाकः ॥ २ ॥

अथ तृतीयोऽनुवाकः ।

अन्नसमृद्धिकामस्य तैष्वेव मन्त्रेषु पाठान्तरमाह—

भूरन्नमग्नये पृथिव्यै स्वाहा भुवोऽन्नं वायवेऽन्तरिक्षाय स्वाहा सुवरन्नमादित्यायं दिवे स्वाहा भूर्भुवः सुवरन्नं चन्द्रमसे दिग्भ्यः स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवरन्नमोम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणीयापनिषदि तृतीयोऽनुवाकः ॥ ३ ॥

अन्नद्रव्यं स्वाहुतमस्तु । समृद्धमन्नमों प्राप्नोमीत्येतावानेव विशेषः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि तृतीयोऽनुवाकः ॥ ३ ॥

---

१ क. °यपरतां । २ ब. क. °त्तिपाद्या° । ३ ग. °द्याग्न° ।

अथ चतुर्थोऽनुवाकः ।

पूजाकामस्य पुनरप्यन्यपाठमाह—

भूरग्नये च पृथिव्यै च महते च स्वाहा भुवो वायवे
चान्तरिक्षाय च महते च स्वाहा सुवरादित्याय च
दिवे च महते च स्वाहा भूर्भुवः सुवश्चन्द्रमसे च
नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा नमो देवेभ्यः
स्वधा पितृभ्यो भूर्भुवः सुवर्महरोम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि चतुर्थोऽनुवाकः ॥ ४ ॥

महते प्रौढाय पूज्याय वा हिरण्यगर्भाय । चकारैस्तत्तद्देवतानां सेवका देवाः परिगृह्यन्ते । तेभ्योऽपि स्वाहुतमित्युक्तं भवति । महरों पूजां प्राप्नवानि ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेयोपनिषदि चतुर्थोऽनुवाकः ॥ ४ ॥

अथ पञ्चमोऽनुवाकः ।

पूर्वत्र भूरग्नय इत्यनुवाके सर्वसाधारणाः पापक्षयार्था होममन्त्रा उक्ताः । अथ प्रतिबन्धनिवारणेन मुमुक्षोर्ज्ञानप्राप्त्यर्था होममन्त्रा उच्यन्ते—

पाहि नो अग्न एनसे स्वाहा । पाहि नो विश्ववेदसे स्वाहा ।
यज्ञं पाहि विभावसो स्वाहा । सर्वं पाहि शतक्रतो स्वाहा, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणीपनिषदि पञ्चमोऽनुवाकः ॥ ५ ॥

हेऽग्ने नोऽस्मानेनसो ज्ञानप्रतिबन्धकात्पापात्पाहि रक्ष । तुभ्यमिदं स्वा[हा]हुतमस्तु नोऽस्माकं विश्ववेदसे कृत्स्नतत्त्वज्ञानसिद्ध्यर्थं पाहि तत्साधनसंपादनेन पालय । तदर्थं तुभ्यमिदं स्वा[हा]हुतमस्तु । विशेषेण भानं दीप्तिर्विभा सैव वसु धनं

यस्याग्नेः सोऽयं विभावसुः । हे **विभावसो** यज्ञं विविदिषाहेतुत्वेनास्माभिरनुष्ठीयमानं **पाहि** निर्विघ्नेन समाप्तिं नीत्वा पालय । शतसंख्याकाः क्रतवो येनाग्निना निष्पाद्यन्ते सोऽयं शतक्रतुः । हे **शतक्रतो** सर्वं ज्ञानसाधनं गुरुशास्त्रादिकं **पाहि** ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि पञ्चमोऽनुवाकः ॥ ५ ॥

अथ षष्ठोऽनुवाकः ।

अथ ज्ञानप्रतिपादककृत्स्नवेदान्तप्राप्तिकामेन जप्यं मन्त्रमाह—

यश्छन्दसामृषभो विश्वरूपश्छन्दोभ्यश्छन्दाꣳ-
स्याविवेश । सतांꣳ शिक्यः प्रोवाचोपनिषदिन्द्रो
ज्येष्ठ इन्द्रियाय ऋषिभ्यो नमो देवेभ्यः
स्वधा पितृभ्यो भूर्भुवः सुवरोम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि षष्ठोऽनुवाकः ॥ ६ ॥

यः प्रणवश्छन्दसां वेदानां मध्य **ऋषभः** श्रेष्ठः, **विश्वरूपः** सर्वजगदात्मकः, एतद्वेदसारत्वं विश्वरूपत्वं च **सांहित्यामुपनिषदि** प्रपञ्चितम् । तादृशः प्रणवश्छन्दोभ्यो वेदेभ्यः प्रादुर्भूत इति शेषः । वेदसारत्वेन प्रजापतेः प्रत्यभादित्यर्थः । स पुनश्छन्दांसि गायत्र्यादीन्याविवेश । छन्दोभिरुपलक्षितेषु मन्त्रेषु प्रयोक्तव्यः । तथाच **प्रपञ्चसारे**ऽभिहितम्—"अस्य तु वेदादित्वात्सर्वमनूनां प्रयुज्यते ह्यादौ" इति । तेन प्रणवेन प्रतिपाद्य **इन्द्रः** परमैश्वर्ययुक्तः परमात्मोपनिषत्प्रोवाचोपनिषदं ब्रह्मविद्यां सर्ववेदान्तासिद्धामुक्तवान् । कीदृश इन्द्रः । **सतां शिक्यः** साद्भिः कर्मानुष्ठायिभिरुपासकैर्ज्ञानिभिश्च प्राप्तुं शक्यः, **ज्येष्ठः** कारणत्वेन सर्वस्मात्प्रथमः । किमर्थं विद्यामुक्तवानित्युच्यते—**ऋषिभ्य** ऋषीणामन्तर्मुखाणां जिज्ञासूनामिन्द्रियाय ज्ञानसामर्थ्यार्थम् । अतोऽहं तत्प्रतिबन्धनिवारणाय **देवेभ्यः पितृभ्यश्च नमस्करोमि** । **भूर्भुवः सुवरों** लोकत्रयाव-

---

१ म. सचा२ । २ ख. ग. °क्तः पुरोवा° । ३ ग. घ. °यश्छन्द ओम् । ४ ख. °द्धान्तमेवमु° । म. °द्धान्तमु° । ङ. °निति तदुच्य° । ६ ग. घ. °र्थाय । अ° ।

स्थितान्प्राप्नोमि । देवा(वेदा)निति शेषः । एतदेवाभिप्रेत्य केचिद्भूर्भुवः सुवश्छन्द ओमिति पठन्ति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि षष्ठोऽनुवाकः ॥ ६ ॥

अथ सप्तमोऽनुवाकः ।

अथ लब्धानां [illegible] जप्यं मन्त्रमाह—

नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता
भूयासं कर्णयोः श्रुतं मा च्योढ्वं ममामुष्य ओम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि सप्तमोऽनुवाकः ॥ ७ ॥

ब्रह्मणे जगत्कारणाय **नमोऽस्तु** तत्प्रसादान्मदीये चित्ते ग्रन्थतदर्थयोर्धारणमस्तु । [अनिराकरणं] **निराकरणं** विस्मरणं यथा न भवति तथा **धारयिता भूयासम्** । **अमुष्येत्थं** प्रार्थ्यमानस्य **मम कर्णयोर्**मध्ये[illegible]दिकं यदा कदाचिदपि **श्रुतमासीत्तत्सर्वं हे देवा मा च्योढ्वं** मा विनाशयत । ततोऽहमो प्राप्नुयां स्थिरं धारणमिति शेषः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नार[illegible]युक्तायां याज्ञिक्यामुपनिषदि सप्तमोऽनुवाकः ॥ ७ ॥

अथाष्टमोऽनुवाकः ।

अथ ज्ञानसाधनं [illegible] च ह्येकाग्र्यं परमं तपः" इति श्रुतेः । तत्तपः श्रौतैस्मार्तसर्वकर्मस्वरूपतया प्रशंसति । यद्वा तथाविधतपःसिद्ध्यर्थं जप्यं मन्त्रमाह—

ऋतं तपः सत्यं तपः श्रुतं तपः शान्तं तपो दानं

---

१ ख. ङ. °स्तु । त्वत्प्र° । २ ग. ङ. देव । ३ ग. ङ. °य । ततोऽ° । ४ ङ. स्मृतेः । ५ ग. ङ. °पो दमस्तपः शमस्तपो दा° ।

तपो यज्ञं तपो भूर्भुवः सुवर्ब्रह्मैतदुपास्स्यैतत्तपः, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्यष्टमोऽनुवाकः ॥ ८ ॥

ऋतं मनसा यथार्थवस्तुचिन्तनम् । सत्यं वाचा यथार्थभाषणम् । श्रुतं वेदस्य पूर्वोत्तरभागार्थावबोधयोर्मीमांसयोः श्रवणम् । शान्तं शान्तिर्बाह्येन्द्रियाभ्यन्तरेन्द्रियोपरतिः । दानं धनेषु स्वत्वनिवृत्तिः परस्वत्वापादनपर्यन्ता । यज्ञोऽग्निहोत्रादिः । तदेतत्सर्वमर्वाचीनं तपः । भूरादिलोकत्रयात्मकं विराड्देहरूपं यद्ब्रह्मास्ति हे मुमुक्षो एतद्ब्रह्मोपास्स्व विजातीयप्रत्ययरहितं सजातीयप्रत्ययप्रवाहं कुरु । तदेतदुपासनमुत्तमं तपः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषद्यष्टमोऽनुवाकः ॥ ८ ॥

अथ नवमोऽनुवाकः ।

अथ विहितानुष्ठानरूपं पुण्यं ज्ञानसाधनतया प्रशंसति । निषिद्धाचरणं ज्ञानप्रतिबन्धकतया निन्दति—

यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वाति यथाऽसिधारां कर्तेऽवहितामधक्कामेद्यद्युषे हुवे ह वा विह्वदिष्यामि कर्त पातिष्यामीत्येवमेनृतादात्मानं जुगुप्सेत्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि नवमोऽनुवाकः ॥ ९ ॥

लोके यथा वृक्षस्योद्यानादौ स्थितस्य चम्पकपाटलकेतकीपुंनागादेः संपुष्पितस्य सम्यग्विकसितपुष्पोपेतस्य यो गन्धः सुरभिरस्ति सोऽयं दूरादेशाद्वाति वायुना सहाऽऽगच्छति एवं पुण्यकर्मणो ज्योतिष्टोमादेः सत्कीर्तिः सुगन्धसमाना दूराद्वाति मनुष्यलोकात्स्वर्गे गच्छति । तस्मात्पुण्यमनुष्ठेयम् । अथ पापस्य दृष्टान्त उच्यते—यथा लोके र[illegible] विनोदाय प्रवृत्तो वंशाग्रवृत्तादिदुर्घटव्यापारेऽत्यन्तकुशलमनाः कश्चित्कर्ते कूपादावगाधे कस्मिंश्चिद्वर्तविशेषेऽवहितां प्रसारितामः

१ ख. झ. यज्ञस्तपो । २ ग. °पास्स्वैत° । ३ ख. °पास्य वि° । ४ ख. °रणरूपं तु शा° ५ ख. झ. युवे । ६ झ °ह्वयिष्या° । ७ ख. °ममृता° ।

सिधारां खड्गधारामवक्रामेत्पादाभ्यां धाराया उपरि गन्तुं प्रवर्तते । तदानीमसौ मनस्येवं विचारयति । यद्यदि युवे हुवे हकारो व्यत्ययेन यकारस्थाने पठितः । अत एव केचिद्युवे युव इति पठन्ति । यौमि यौमि पुनः पुनः पादमसिधारया मिश्रयामीत्यर्थः । तदाऽहं विह्वलिष्यामि कर्तं वा पतिष्यामि । अहमित्येतमर्थं हशब्दो ब्रूते । लकारस्थाने व्यत्ययेन दैकारः । असिधारायां पादस्य दृढस्पर्शे पादच्छेदेनाहं विह्वलितो विवशो भविष्यामि दृढस्पर्शाभावे त्वधोवर्तिन्यगाधे गर्ते पतिष्यामीति । एवं पापे वर्तमानः पुरुषो विचारयेत् । यद्यहं पापं प्रकटं कुर्यां तदानीमिह लोके निन्दितो भविष्यामि तत्परिहारायाप्रकटं कुर्यां तदाऽपि नरके [illegible] । ईदृग्विचारयुक्तः पुरुषोऽनृतात्पापादात्मानं जुगुप्सेद्धिङ्मां लोकद्वयभ्रंशहेतुमिति निन्दित्वा पापान्निवारयेत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि नवमोऽनुवाकः ॥ ९ ॥

*इति प्रथमखण्डः समाप्तः ।

अथ दशमोऽनुवाकः ।

यथोक्तप्रशंसोपेतपुण्यानुष्ठानेन निषिद्धाचरणवर्जितेन शुद्धान्तःकरणस्य पुरुषस्य तत्त्वमुपदेष्टुमयमनुवाक आरभ्यते । तत्र प्रथमामृचमाह—

अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्, इति ॥

सच्चिदानन्दैकरसः परमेश्वरः सर्वाधिष्ठानत्वेन सर्वस्य जगतः स्वरूपत्वादात्मशब्देनोच्यते । आत्मशब्दश्च स्वरूपवाचीति प्रसिद्धम् । मायाकार्यभूते लौकिकव्यवहारे सूक्ष्मत्वेन प्रसिद्धः परमाणुर्द्व्यणुकादिरणुशब्दवाच्यः । तस्मादप्ययमात्माऽतिशयेन सूक्ष्मत्वादणीयान् । आकाशादिगादयः परिमाणाधिक्यत्वाल्लोके महच्छब्दवाच्याः । ततोऽप्ययमात्माऽतिशयेनाधिकत्वान्महीयान् । परमाणुव्द्यणुकादीनामस्मदादिप्रत्यक्षगम्यत्वाभावेऽपि योगिजनचक्षुर्गम्यत्वमस्ति तदप्यात्मनो नास्तीत्यभिप्रेत्याणीयस्त्व-

* ख. पुस्तके नास्त्येतत् ।

१ ग. झ. °दानीमं । २ झ. यकारः । ३ ग. यदि पा° । ४ ख. °मि । अथ त° । ५ ग. °धिष्ठत्वे । ६ झ. °णुश्यणु° । ग. °न सर्वसु° ।

मुक्तम्। आकाशादिगादीनामेकब्रह्माण्डवर्तित्वात्तादृशब्रह्माण्डलक्षकोट्यधिष्ठानत्वमभिप्रेत्य महीयस्त्वमुक्तम्। तादृशः परमात्माऽस्य देवमनुष्यादिरूपस्य **जन्तोर्गुहायां निहितः**। गुहाशब्देन हृदयपुण्डरीकमध्यवर्तिनी बुद्धिरुच्यते। गुहू संवरण इत्यस्माद्धातोरुत्पन्नो गुहाशब्दः। बुद्धिश्च हृदयपुण्डरीकेण संवृता तन्मध्यवर्तित्वात्। तस्यां बुद्धावस्य परमात्मनो निहितत्वं नाम विद्ययोपलभ्यमानत्वं न तु बुद्धावाधेयत्वम्। सर्वजगदाधारस्य तदसंभवात्। तं तथाऽवस्थितमीशं शमादिगुणयुक्तोऽधिकारी पुरुषः **पश्यति** साक्षात्करोति। स चाधिकारो **धातुः प्रसादादुपजायते**। धाता जगतो विधाता **परमेश्वरः**, तस्य प्रसादोऽनुग्रहः।

तथा च **पूर्वाचार्यैरुक्तम्**—

" ईश्वरानुग्रहादेषां पुंसामद्वैतवासना।
महाभयकृतत्राणा द्वित्राणामेव जायते " इति।

कीदृशमीशम्। **अक्रतुं** संकल्परहितम्। रुग्यन्नपानादिभोगजातं समीचीनमिति संकल्पनं जीवस्यैव न त्वीशस्य। संकल्पहेतुभूतान्तःकरणोपाधेरभावात्। अतो निरुपाधिकत्वान्**महिमानमतिशयेन** महान्तम्। ईदृशं परमेश्वरं साक्षात्कृत्य **वीतशोको** जन्ममरणादिशोकरहितो भवति।

द्वितीयामृचमाह—

सप्त प्राणाः प्रभवन्ति तस्मात्सप्तार्चिषः समिधः सप्त जिह्वाः।
सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया निहिताः सप्त सप्त, इति॥

शुद्धान्तःकरणैर्ज्ञातव्यो यः परमात्मोक्तस्तस्य शाखाचन्द्रन्यायेनोपलक्षणार्थं जगत्कारणत्वमुच्यते। **तस्मात्**परमात्मनो मायाशक्तिविशिष्टात्**सप्त प्राणा भवन्ति**। अन्यत्र—"सप्त वै शीर्षण्याः प्राणाः" इत्युक्तत्वात्, शिरोवर्तिसप्तच्छिद्रगताः सप्तसंख्याकाश्चक्षुरादयः प्राणाः परमेश्वरादुत्पद्यन्ते। द्वे चक्षुषी द्वे श्रोत्रे द्वे नासिके वागेकेति सप्तत्वम्। तेषां चक्षुरादीनां स्वस्वविषयप्रकाशनशक्तयः **सप्तार्चिषः**। तैरर्चिर्भिर्गृह्यमाणत्वेन सप्तसंख्याका विषयाः **समिधः**। विषयैर्हीन्द्रियाणि समिध्यन्ते प्रकाशयुक्तानि क्रियन्ते। यथैकस्यापि चक्षुरिन्द्रियस्य गोकलभेदेन द्वित्वं तथा रूपस्याप्येकस्य वामदक्षिणरूपग्राहकचक्षुर्वृत्तिभेदाद्द्वित्वं द्रष्टव्यम्। एवं शब्दगन्धयोर्द्वित्वे सति विषयाः सप्त संपद्यन्ते। अथवा समिच्छब्देन सप्तसंख्या न संबध्यते किंतु जिह्वाशब्देन। अग्निजिह्वानां च सप्तत्वमाथर्वणिकैराम्नातम्—

---

१ ख. °ण्डमध्ये व° २ ग. °र्तिनीत्वा°। ३ ख. शमदमा°। ४ ख. ग. °त्राणां यदि जा°। ५ ख. °ण्या. प्राणाः प्रा°। ६ ग. °के मु-मेकमिति।

कालो करालो च मनोजवा च सुलोहिता चापि सुधूम्रवर्णा।
स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः" इति।

ताश्च परमेश्वरात्प्रभवन्ति। इमे भूरादयः सप्तसंख्याका लोकास्तस्मात्प्रभवन्ति। येषु सप्तसु लोकेषु देवमनुष्यादिशरीरवर्तिनः प्राणाश्चरन्ति, तादृशा लोका उत्पन्ना इति पूर्वत्रान्वयः। गुहा बुद्धिस्तस्यां शेत उपलभ्यत इति गुहाशयः परमेश्वरस्तस्मादुत्पन्नाः सप्तर्षयः सप्त समुद्रा इत्यादिकाः सप्तसंख्याकाः पदार्थविशेषा निहितास्तत्र तत्रावस्थापिताः।

तृतीयामृचमाह—

अतः समुद्रा गिरयश्च सर्वेऽस्मात्स्यन्दन्ते सिन्धवः सर्वरूपाः।
अतश्च विश्वा ओषधयो रसाश्च येनैष भूतस्तिष्ठत्यन्तरात्मा, इति॥

क्षीरोदधिप्रभृतयः समुद्रविशेषा मेरुप्रभृतयो गिरिविशेषाश्चास्मात्परमेश्वरात्सर्वे प्रभवन्ति। गङ्गागोदावर्यादयः सर्वरूपा बहुविधा नद्योऽस्मात्परमेश्वरादुत्पन्नाः स्यन्दन्ते प्रवहन्ति। व्रीहियवाद्या विश्वाः सर्वा ओषधयश्च मधुराम्लादयो रसाश्चातः परमेश्वरात्प्रभवन्ति। एषोऽहंप्रत्ययेन गम्यमानोऽन्तरात्मा स्थूलदेहचिदात्मनोर्मध्यवर्ती लिङ्गदेहो येनौषधिरसेन भूतः संबद्धः सञ्शरीरे तिष्ठति, तादृशो रस उत्पन्न इति पूर्वत्रान्वयः।

चतुर्थीमृचमाह—

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम्।
श्येनो गृध्राणाꣳ स्वधितिर्वनानाꣳ सोमः पवित्रमत्येति रेभन्, इति॥

अन्तर्बहिर्वर्तिनां प्राणसमुद्रादीनामचेतनानां सृष्टिमुक्त्वा चेतनेषु परमेश्वरस्योत्कृष्टरूपेणावस्थानमुच्यते। देवानामग्नीन्द्रादीनां मध्ये ब्रह्मा चतुर्मुखो भूत्वा परमेश्वरो नियामकत्वेनावतिष्ठते। तथा कवीनां काव्यनाटकादिकर्तॄणां पुरुषाणां मध्ये पदवीभूत्वाऽवतिष्ठते। व्याकरणे निष्पन्नः सुशब्दविशेषः पदं तद्वेत्ति गच्छतीति पदवीः शब्दसामर्थ्याभिज्ञो व्यासवाल्मीक्यादिरूप इत्यर्थः। विप्राणां वैदिकमार्गवर्तिनां ब्राह्मणानां मध्य ऋषिस्तत्तद्गोत्रप्रवर्तको वसिष्ठादिरूपो बभूव। मृगाणां चतुष्पदां मध्ये शक्त्याधिक्येन युक्तो महिषो बभूव। गृध्रोपलक्षितानां सर्वेषां पक्षिणां मध्ये प्रबलः श्येनो बभूव। वनानां वृक्षसमूहरूपाणां मध्ये छेदनार्थः स्वधितिः परशुर्बभूव। यागहेतुभू-

१ ख. °ता या च सु°। २ ग. घ. तेषु। ३ ङ. °ष्टरू°।

तबल्यात्मकः सोमो भूत्वा रेभन्मन्त्रशब्दयुक्तः सन्पवित्रं शुद्धिकारणं गङ्गाजलकुशदर्भादिद्रव्यजातं सर्वमत्येति ।

पञ्चमीमृचमाह—

अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीꣳ सरूपाम् ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः, इति ॥

व्यवहारदशायां परमेश्वरस्य चतुर्मुखब्रह्मादिशरीरेषु विशेषेणावस्थानमभिधाय यथोक्तजगत्सृष्टेर्मूलकारणभूतां मायाशक्तिमुपजीव्य बुद्धमुक्तपुरुषव्यवस्था प्रदर्श्यते । न जायत इत्यजा मूलप्रकृतिरूपा माया। न ह्यनादेस्तस्या जन्म संभवति । सा च मायैका, इतरस्य सर्वस्य जगतस्तत्कार्यत्वात् । यदाऽसौ तेजोबन्नानि त्रीणि भूतान्युत्पाद्य तद्रूपाऽवतिष्ठते तदानीं लोहितशुक्लकृष्णवर्णैरुपेता भवति । तथा च च्छन्दोगा आमनन्ति—"यदग्ने रोहितꣳ रूपं तेजस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य" इति । अन्नशब्देनात्र पृथिव्युपलक्ष्यते । रजःसत्त्वतमोगुणा वा लोहितादिशब्दैरुपलक्ष्यन्ते । गुणत्रयात्मिका मायेत्युक्तं भवति । सा च देवतिर्यङ्मनुष्यादिरूपां गुणत्रयात्मकत्वेन सरूपां बहुविधां प्रजां जनयति । न जायत इत्यजो जीवः, तस्यापि मायावदनादित्वादुत्पत्तिर्नास्ति। तादृशो जीवो द्विविधः—आसक्तो विरक्तश्चेति। तयोर्मध्य एक आसक्तो योऽजो जीवः पूर्वोक्तामजां मायां जुषमाणः प्रीतिपूर्वकं सेवमानोऽनुशेते तदनुसारेणैव वर्तते । विषयानेव भुञ्जानो विवेकरहितो जन्ममरणप्रवाहरूपेण संचरतीत्यर्थः । अन्योऽजो विरक्तो जीवो भुक्तभोगामेनां मायां जहाति परित्यजति । विरक्तेः प्रागेव भोगान्भुक्त्वा(गा भुक्ता) न तूपरिष्टाद्भोक्ष्यन्ते तादृशैर्भोगैर्युक्ता माया भुक्तभोगा तां मायां तत्त्वविवेकेन बाधत इत्यर्थः ।

षष्ठीमृचमाह—

हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्, इति ॥

यः पुमान्विवेकेन मायां परित्यजति तस्य सर्वमपि जगद्ब्रह्मरूपेणावभासत इत्ययमन्त्रो(त्रा)र्थः प्रदर्श्यते । तदर्थमादौ जगदनूद्यते हन्ति सर्वदा गच्छतीति हंस आदित्यः । स च शुचौ शुद्धे मण्डले ज्योतिर्मये सीदतीति शुचिषत्, सूत्रात्मरूपेण

---

१ ख. ङ्गि रूपाण्युत्पा° । २ ङ. °न्ते । सा गु° । ३ ग. °यात्मिक° । ४ ख. ङ. जनयन्ती । ५ ग. °रणं प्र° । ६ ङ. संसर° । ७ ङ. °क्ष्यते ता° । ८ ङ. बाधिष्यामित्य° । ९ ग. इत्येवमात्रोऽर्थोऽत्र प्रदृश्यते । ङ. इत्येवं मन्त्रार्थोऽत्र प्र° । १० ख. प्रदिश्यते ।

जगन्निवासहेतुत्वात् । वसुर्वायुः, तद्रूपः सन्नन्तरिक्षे सीदतीत्यन्तरिक्षसत् । होमनिष्पादक आहवनीयाद्यग्निर्होता तद्रूपेण सोमयागाद्यङ्गभूतायां वेद्यां सीदतीति वेदिषत् । अमावास्यादितिथिविशेषमनपेक्ष्य भोजनयाच्ञार्थं तत्र तत्र गच्छन्पुरुषो वैदेशिकोऽतिथिः, तद्रूपेण दुरोणेषु गृहेषु परकीयेषु सीदतीति दुरोणसत् । नृषु मनुष्येषु कर्माधिकारिजीवरूपेण सीदतीति नृषत् । वरे श्रेष्ठे क्षेत्रे काशीद्वारावत्यादौ पूजनीयदेवरूपेण सीदतीति वरसत् । ऋते सत्ये वैदिके कर्मणि फलरूपेण सीदतीति ऋतसत् । व्योम्न्याकाशे नक्षत्रादिरूपेण सीदतीति व्योमसत् । अद्भ्यो नदीसमुद्रादिगताभ्यः शङ्खमकरादिरूपेण जायत इत्यब्जाः । गोभ्यः क्षीरादिरूपेण जायत इति गोजाः । ऋतं सत्यवचनं तस्मात्कीर्तिरूपेण जायत इति ऋतजाः । अद्रिभ्यः पर्वतेभ्यो वृक्षादिरूपेण जायत इत्यद्रिजाः । हंस इत्यारभ्याद्रिजा इत्यन्तेनोक्तं यज्जगदस्ति तज्जगद्दृत्तं सत्यं बृहद्ब्रह्म, अज्ञानिदृष्ट्या जगद्रूपेण भासमानं सर्वं ज्ञानिदृष्ट्या ब्रह्मैवेत्यर्थः ।

सप्तमीमृचमाह—

*यस्माज्जाता न परा नैव किंचनाऽऽस य आविवेश भुवनानि विश्वा ।
प्रजापतिः प्रजया संविदानस्त्रीणि ज्योतींषि सचते स षोडशी, इति ॥

हंसादेः सर्वस्य जगतो ब्रह्मरूपत्वं यदुक्तं तदत्र प्रतिपाद्यते । ब्रह्मव्यतिरिक्तं वस्तु किंचिदस्तीति वदन्वादी प्रष्टव्यः । किमचेतनं जगद्ब्रह्मव्यतिरिक्तमाहोस्विच्चेतनो जीवः । अचेतनत्वपक्षेऽपि किं सृष्टेरूर्ध्वभावि वस्तु ब्रह्मव्यतिरिक्तमुत पूर्वभावि । न तावदूर्ध्वभाविनो व्यतिरिक्तत्वमित्युच्यते । जाता सृष्टेरूर्ध्वमुत्पन्ना प्रजा यस्मात्परमेश्वरात्परा व्यतिरिक्ता न भवति । नापि पूर्वभाविनो व्यतिरिक्तत्वमित्युच्यते सृष्टेः पूर्वं किंचन किमपि ब्रह्मव्यतिरिक्तं वस्तु नैवाऽऽस । "एकमेवाद्वितीयम्" इति श्रुत्यन्तरात् । नापि चेतनस्य जीवस्य ब्रह्मव्यतिरिक्तत्वमित्युच्यते । यः परमेश्वरो विश्वा भुवनानि सर्वलोकवर्तीनि शरीराण्याविवेश जीवरूपेण प्रविवेश । "अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य" इति श्रुत्यन्तरात् । स प्रजापतिः प्रजापालकः परमेश्वरः प्रजया स्वस्मादुत्पन्नया देवातिर्यगादिरूपया संविदानः संसर्गं तादात्म्यं लभमानो वर्तते । स परमेश्वरस्त्रीणि ज्योतींष्यग्न्यादित्यचन्द्ररूपाणि सचते समवैति तादात्म्यसंबन्धं प्राप्नोति । कीदृशः परमेश्वरः । षोडशी प्रश्नोपनिषत्प्रोक्तषोडशकलोपेतः । तत्र हि प्राणश्रद्धादिकं कृत्स्नमपि जगत्षोडशावयवरूपं परमात्मा

* एतदर्धमनिश्चितस्वरकम् ।

१ ख. घ. 'द्वारव' । २ ख. 'संगीता' ।

सर्सर्जेति श्रुतम् । तथा सति मृद्घटन्यायेन कार्यकारणयोरव्यतिरेकात्षोडशकलारूपेण जगता सह तादात्म्यसंबन्धादयं षोडशीत्युच्यते ।

अष्टमीमृचमाह —

*[२]विधर्तारꣳ हवामहे वसोः कुविद्वनाति नः ।

+सवितारं नृचक्षसम्, इति ॥

यथोक्तब्रह्मतत्त्वज्ञानलाभाय परमेश्वरप्रार्थनारूपाः केचिन्मन्त्रा इत अरभ्योच्यन्ते । वसोर्धनस्य ब्रह्मज्ञानरूपस्य [३]विधर्तारं विशेषेण संपादयितारं परमेश्वरं हवामहेऽस्मदनुग्रहार्थमाह्वयामः । नोऽस्माकं तादृशानां कुवित्प्रभूतं तत्त्वज्ञानरूपं धनं वनाति संभजते स परमेश्वरो ददातीत्यर्थः । कीदृशं [४]विधर्तारम् । सवितारमस्मद्बुद्धेः प्रेरकम् । नृचक्षसं नृणां मनुष्याणामधिकारिणामाचार्यरूपेण तत्त्वविद्याप्रवक्तारम् ।

नवमीमृचमाह—

अद्या नो देव सवितः प्रजावत्सावीः सौभगम् ।

परा दुष्ष्वप्न्यꣳ सुव , इति ॥

हे सवितः प्रेरक देवाद्यास्मिन्दिने नोऽस्माकं विद्यार्थिनां प्रजावच्छिष्यप्रशिष्यादिप्रजोपेतं सौभगमाचार्यरूपं भाग्यं सावीः प्रेरय प्रयच्छेत्यर्थः । दुष्ष्वप्न्यं दुष्टस्वप्नसदृशं द्वैतप्रतिभासं परासुव निराकुरु ।

दशमीमृचमाह—

विश्वानि देव सवितर्दुरितानि परासुव ।

यद्भद्रं तन्म आसुव , इति ।

हे सवितः प्रेरक देव दुरितानि ज्ञानप्रतिबन्धकानि पापानि विश्वानि सर्वाणि परासुव पराकुरु । भद्रं कल्याणमसंभावनाविपरीतभावनारहितं तत्त्वज्ञानं यदस्ति तन्मे मह्यमुपासकायाऽऽसुव साकल्येन प्रयच्छ ।

एकादशीमृचमाह—

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।

माध्वीर्नः सन्त्वोषधीः , इति ॥

ऋतायत ऋतं परं ब्रह्म तदिच्छते मह्यं वाता वायवो मधु माधुर्योपलक्षितं सुखं

---

* एतत्पदद्वयमनिश्चितस्वरकम् । × एतत्पदद्वयमनिश्चितस्वरकम् ।

---

१ ग °सर्ज वै' इति श्रुत्यन्तरात् । त° । २ क्ष. विधातार° । ३ क्ष. विधातारं । ४ क्ष. विधातार° । ५ ख. °म्ह तोप्र(तत्प्र)त्ययते गच्छ° ।

यथा भवति तथा वान्त्विति शेषः। प्रबले तु वायौ रोगोत्पत्त्या तत्त्वज्ञानविघ्नः संपद्येत। अतः स मा भूदिति वायोरानुकूल्यं प्रार्थ्यते। एवमुत्तरत्रापि तत्तदानुकूल्यं द्रष्टव्यम्। **सिन्धवो** नद्यो **मधु क्षरन्ति** मधुरमारोग्यकरमुदकं संपादयन्त्वित्यर्थः। **ओषधीर्व्रीहियवादयोऽपि नोऽस्माकं माध्वीर्मधुराः** पथ्यरूपाः **सन्तु**।

द्वादशीमृचमाह—

मधु नक्तमुतोषसि मधुमत्पार्थिवꣳ रजः।
मधु द्यौरस्तु नः पिता, इति॥

नक्तं रात्रावुतापि **चोषसि** प्रभाते दिवसेऽपि विद्यार्थिनो **मधु** मधुरमनुकूलं सुखमस्तु कालकृतोऽपि विघ्नो मा भूदित्यर्थः। **पार्थिवं रजः** पृथिव्यामवस्थितं शयनादिस्थानगतं रजोऽपि **मधुमन्माधुर्योपेतं** कण्टकपाषाणादिराहित्येनानुकूलमस्तु। **नोऽस्माकं पिता** पितृसदृशी **द्यौरपि मध्वस्तु**, अतिवृष्ट्यादिप्रातिकूल्यरहिताऽस्तु। "द्यौः पिता पृथिवी माता" इति मन्त्रान्तराद्द्यौः पितृत्वम्।

त्रयोदशीमृचमाह—

मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः।
माध्वीर्गावो भवन्तु नः, इति॥

वनस्पतिश्चूतपनसादिर्नोऽस्मान्प्रति मधुमान्मधुरफलोपेतो जीवनहेतुरस्तु। **सूर्योऽपि** प्रभूतं संतापमकृत्वा **मधुमान्माधुर्येणानुकूलप्रकाशनेन** युक्तोऽस्तु। **गावोऽपि नोऽस्मान्प्रति माध्वीर्जीवनहेतुमधुरक्षीरोपेता भवन्तु**।

चतुर्दशीमृचमाह—

घृतं मिमिक्षिरे घृतमस्य योनिर्घृते श्रितो घृतमुवस्य धाम।
अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम्, इति॥

भोग्यजातस्य ज्ञानयोग्यदेहानुकूल्यं प्रार्थ्य ज्ञानसाधनयागादिकर्महेतोरग्नेरानुकूल्यं प्रार्थ्यते। पूर्वे यजमाना अग्नावाहवनीयादिरूपे **घृतं मिमिक्षिरे** सिक्तवन्तः। मिह सेचन इति धातुः। तद्**घृतमस्याग्नेर्योनिरुत्पत्तिकारणम्**। घृतेन ज्वालाभिवृद्धिदर्शनात्। **अतोऽयमग्निर्घृते श्रितो** घृतमाश्रित्यावस्थितः। **घृतमेवास्याग्नेर्धाम** स्थानं तेजोहेतुर्वा। **हेऽग्नेऽनुष्वधं** स्वधामन्वस्मदीयं हविःस्वरूपमनुसृत्याऽऽवह देवानत्राऽऽनय। आनीय

---

१ ख. °था भवन्त्वि°। २ ख. °विघ्नाः सं°। ३ ख. °द्यन्ते। अ°। ४ ख. सुपथ्यरूपाः। ५ ख. °योग्यं दे°। ६ ख. °तमु वा°।

च मादयस्व हृष्टान्कुरु । हे वृषभ श्रेष्ठ स्वाहाकृतं स्वाहाकारेणास्माभिर्दत्तं हव्यं वहि वह देवान्प्रापय ।

पञ्चदशीमृचमाह—

समुद्रादूर्मिर्मधुमाꣳ उदारदुपाꣳशुना समममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः, इति ॥

समुद्रवदतिप्रभूतात्परमात्मन ऊर्मिरूर्मिसदृशो जडप्रपञ्चो मधुमान्भोग्यत्वेन माधुर्ययुक्त उदारदुदगच्छत् । उत्पन्न इत्यर्थः । यथा लोके समुद्रात्तरङ्गा उत्पद्यन्त एवं हि चिदेकरसात्परमात्मनो जडं भोग्यजातं सर्वमुत्पन्नम् । घृ क्षरणदीप्त्योरिति धातोरुत्पन्नो घृतशब्दः । घृतं दीप्तं स्वप्रकाशं ब्रह्मेत्यर्थः । तस्य ब्रह्मणो यन्नाम प्रणवरूपं गुह्यं सर्ववेदेषु गोप्यमस्ति । तथा च कठैराम्नातम्—" सर्वे वेदा यत्पदमामनन्ति " इति प्रस्तुत्य " तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् " इति । तेन प्रणवरूपेणोपांशुना ध्यानकाले शनैरुच्चार्यमाणेनामृतत्वमुत्पत्तिविनाशरहितं ब्रह्मतत्त्वं समानट्सम्यगानशे प्राप्नोतीत्यर्थः । तच्च प्रणवाख्यं नाम देवानां जिह्वा देवैर्ध्यानपरैर्निरन्तरमुच्चार्यमाणत्वेन जिह्वेव सर्वदा मुखमध्ये वर्तते । किंचेदं प्रणवरूपं नामामृतस्य विनाशरहितस्य मोक्षस्य नाभी रथचक्रस्य नाभिरिवाऽऽश्रयभूतम् । अनेन हि मुक्तिरूपं फलं प्राप्यते । अत एव कठैराम्नातम्—"एतदेवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् " इति । एतस्यामृचि प्रणवस्य मोक्षसाधनत्वमुक्तम् ।

षोडशीमृचमाह—

वयं नाम प्रब्रवामा घृतेनास्मिन्यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत्, इति ॥

वयं ज्ञानार्थिनः पुरुषा अस्मिञ्ज्ञानयज्ञे घृतेन दीप्तेन स्वप्रकाशेन ब्रह्मणा निमित्तभूतेन प्रणवरूपं नाम प्रब्रवाम सर्वदा ध्यायन्त उच्चारयाम । ततो नमोभिर्नमस्कारैर्युक्ता वयं चित्ते ब्रह्मतत्त्वं सर्वदा धारयाम । ज्ञानस्य यज्ञत्वं भगवतोक्तम्—" स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः " इति । शस्यमानमस्माभिः प्रणवेन स्तूयमानमुपशृणवत्पार्श्ववर्तिभिस्तत्त्ववेदिभिः स्तूयमानमेतद्ब्रह्मतत्त्वं चतुःशृङ्गोऽकारोकारमकारनादरूपशृङ्गचतुष्टयोपेतो गौरः श्वेतः प्रणवाख्य ऋषभोऽवमीद्वान्तवान्, ब्रह्मतत्त्वं प्रत्यपादयदित्यर्थः । अकारादीनां प्रणवमात्राणां शृङ्गत्वमुत्तरतापनीये श्रुतम्—" शृङ्गेष्वशृङ्गं संयोज्य " इति । निष्कामैरनुष्ठेयत्वेन निर्मलत्वात्प्रणवस्य

१ ग. °ममृ° । २ ख. °र्मिस° ।

गौरत्वम्। वृषभत्वं च संहितोपनिषद्याम्नातम्—"यश्छन्दसामृषभो विश्वरूपः" इति। एवमनेन प्रतिपादनमुपलक्ष्यते।

सप्तदशीमृचमाह—

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश, इति॥

शृङ्गा प्रणवस्य यान्यकारादीनि शृङ्गाणि तानि चत्वारि। अस्य प्रणवप्रतिपाद्यत्वेन प्रणवरूपस्य ब्रह्मणस्त्रयः पादाः; पद्यते गम्यते [illegible] पादाः। अध्यात्मं विश्वतैजसप्राज्ञाः। अधिदैवं विराड्धिरण्यगर्भाव्याकृतानि। द्वे शीर्षे उत्तमाङ्गस्थानीये चिदचिद्रूपे द्वे शक्ती। तथैवास्य ब्रह्मणो भूरादयः सप्त लोका हस्तासो हस्तस्थानीयाः। त्रिधा बद्धोऽकारोकारमकारेषु विश्वतैजसप्राज्ञैर्विर[illegible] त्रिप्रकारेण संबद्धो वृषभः प्रणवो महस्तेजोरूपं ब्रह्मतत्त्वं रोरवीति, अतिशयेन प्रतिपादयति। तदेव प्रतिपाद्यं स्पष्टी क्रियते—देवः परमेश्वरो मर्त्यान्मनुष्यदेहानाविवेश सर्वतः प्रविष्टः "स एष इह प्रविष्ट आ नखाग्रेभ्यः" इति श्रुत्यन्तरात्।

अष्टादशीमृचमाह—

त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन्।
इन्द्र एकꣳ सूर्य एकं जजान वेनादेकꣳ स्वधया निष्टतक्षुः, इति॥

त्रिधा हितं शरीरे विश्वतैजसप्राज्ञाख्येन त्रिप्रकारेण ब्रह्माण्डे विराड्धिरण्यगर्भाव्याकृताख्येन च त्रिः(त्रि)प्रकारेणावस्थितं घृतं दीप्तं स्वप्रकाशं ब्रह्मतत्त्वं देवासो देववत्साधिका अन्तर्मुखाः पुरुषा गवि वाचि तत्त्वमस्यादिवेदरूपायामन्वविन्दन्नुक्रमेण लब्धवन्तः। कीदृशं घृतम्। पणिभिर्गुह्यमानम्। पण व्यवहारे स्तुतौ चेति धातुः। पणिभिः स्तोतृभिरुपदेष्टृभिराचार्यैः परमरहस्यत्वेन गोप्यमानम्। त्रिधा हितमित्येतदेव विविच्यते। इन्द्रः परमैश्वर्ययुक्तो विराट्पुरुष एकं जागरणरूपं जजानोत्पादितवान्। सूर्यशब्दस्तेजस्त्वेन हिरण्यगर्भमुपलक्षयति। स च हिरण्यगर्भ एकं स्वप्नरूपं जजान। वेने(वे?)ति धातुः कान्तिकर्मा। वेनान्सर्वदुःखराहित्येन कमनीयादव्याकृतादेकं सुषुप्तरूपं निष्पन्नमिति शेषः। स्वस्मिन्नेव धीयतेऽवस्थाप्यत इत्याश्रयान्तररहिता ब्रह्मरूपा चित्स्वधाशब्देनोच्यते "स भगवः कस्मिन्प्र-

---

१ ख. °ति। चत्वारि शृ°। २ ख. घ. °दैवतं वि°। ३ ग. °श्च त्रिःप्र°। ४ घ. त्रिभिः प्र°।

तिष्ठित इति स्वे महिम्नि " इति श्रुत्यन्तरात् । तया **स्वधया** ब्रह्मरूपया चिता पूर्वोक्ता इन्द्रसूर्यवेना **निष्टतक्षुर्**जागरणादिकं निष्पादितवन्तः । एताभ्यां द्वाभ्यामृग्भ्यां प्रणवतत्प्रतिपाद्यार्थौ प्रपञ्चितौ ।

एकोनविंशीमृचमाह—

यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः ।
हिरण्यगर्भं पश्यत जायमानꣳस नो देवः शुभया स्मृत्या संयुनक्तु, इति ॥

यो देवो **हिरण्यगर्भं पश्यत** साक्षात्करोति । कीदृशं हिरण्यगर्भम् । **देवानां प्रथममग्नीन्द्रादीनां** मध्य आदिभूतम् । **पुरस्ताज्जायमानमग्नीन्द्राद्युत्पत्तेः** पूर्वमेवोत्पद्यमानम् । अनेन प्राथम्यं स्पष्टीकृतम् । कीदृशो देवः । **विश्वाधिको** विश्वस्य जगतः कारणत्वेन तस्मादधिकः । **रुद्रो** रुद्वैदिकः शब्दस्तं द्रवति प्राप्नोति । वेदप्रतिपाद्य इत्यर्थः । **महर्षिर्**ऋषीणामतीन्द्रियद्रष्टृणां मध्ये महान् । " यः सर्वज्ञः सर्ववित् " इत्यादिश्रुतिप्रतिपाद्य इत्यर्थः । **स** देवस्तादृशः परमेश्वरो **नोऽस्माञ्शुभया स्मृत्या** सर्वसंसारानिवर्तकत्वेन शोभनया ब्रह्मतत्त्वानुस्मृत्या **संयुनक्तु** संयुक्तान्करोतु । सोऽयं मन्त्रो ब्रह्मविद्यालब्धये जपितव्य इति मन्त्रलिङ्गादवगम्यते ।

विंशीमृचमाह—

यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् ।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्, इति ॥

यदुक्तं शुभया स्मृत्या संयुनक्त्विति तत्र स्मरणीयं तत्त्वमत्र निर्दिश्यते—**यस्माद्**ब्रह्मतत्त्वात्परमुत्कृष्टमपरं निकृष्टं वा वस्तु **किंचिदपि नास्ति** । **यस्माद्**ब्रह्मतत्त्वादणीयोऽत्यल्पं वस्तु **नास्ति** । **ज्यायोऽधिकमपि काश्चिकिंचिदपि** वस्तु नास्ति । परापरशब्दाभ्यां गुणोत्कर्षनिकर्षौ विवक्षितौ । ज्यायोणीयःशब्दाभ्यां परिमाणोत्कर्षापकर्षौ । सर्वप्रकारोत्कर्षापकर्षनिषेधेनाद्वितीयत्वं सिध्यति । यथा लोके **वृक्षो** गमनागमनरहित एकत्रैव **स्तब्धोऽवतिष्ठते** तद्वदयमद्वितीय **एकः** परमेश्वरः **स्तब्धो** निर्विकारो **दिवि** द्योतनात्मके स्वप्रकाशस्वरूपे **तिष्ठति** । **तेन पुरुषेण** पूर्णेन चिदेकरसेन परमात्मना **सर्वमिदं** जगत्**पूर्णम्** । जगदाकारो नास्ति ब्रह्मतत्त्वमेवावस्थितमित्यर्थः ।

एकविंशीमृचमाह—

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।

---

१ ख. °पयोपरि । २ ङ. °को यो रु° । ३ ख. च । ४ ख. °ण चि° ।

परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति, इति ॥

यथोक्तब्रह्मतत्त्वानुस्मरणस्यान्तरङ्गं सर्वत्यागरूपं साधनमत्रोच्यते । अग्निहोत्रादिकं सहस्रसंवत्सरसत्रान्तं यत्कर्म तेन कर्मणा तदमृतत्वं न लभ्यते । " प्रजया पितृभ्यः " इति श्रुतेः पितृविषयाद्दणाद्विमोचनहेतुर्या पुत्रादिरूपा प्रजा तयाऽप्यमृतत्वं न लभ्यते। "दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदन्ति " इति श्रुतेर्धनदानस्य बहुविधफलसाधनत्वावगमोत्तस्य दानस्य निष्पादकं यद्धनमस्ति तेन धनेनाप्यमृतत्वं न लभ्यते । किं तर्हि कर्मप्रजादीनां सर्वेषां लौकिकवैदिकव्यापाराणां त्यागेनैके केचिदेवान्तर्मुखा अमृतत्वमानशुः प्राप्नुवन्ति। यदमृतत्वं यतय इन्द्रियनियमनशीला विशन्ति प्राप्नुवन्ति तदमृतत्वं नाकं परेण स्वर्गादप्युत्कृष्टं सद्गुहायां स्वकीयबुद्धावेकाग्रायां निहितमवस्थितं सद्विभ्राजते विशेषेण दीप्यते । अन्तर्मुखैरनुभूयत इत्यर्थः ।

द्वाविंशीमृचमाह —

वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे, इति ॥

पूर्वस्यामृचि त्यागस्य मोक्षसाधनत्वमुक्तम् । अन्यत्र—"तरति शोकमात्मवित् " "ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यते" इत्यादिश्रुतिस्मृतिषु ज्ञानस्यैव मोक्षहेतुत्वमुच्यते । अतोऽस्यामृचि विरोधपरिहाराय ज्ञानसंन्यासयोर्मोक्षे पृथगुपयोग उच्यते । वेदान्ता उपनिषद्वाक्यानि तैरुत्पन्नं सर्वसंसारनिवर्तकत्वेन विशिष्टं ज्ञानं यदस्ति तेन निश्चितो जीवब्रह्मैक्यलक्षणोऽर्थो यैः पुरुषैस्ते वेदान्तविज्ञानसुनिश्चितार्थाः । संन्यासयोगात्संन्यासः पूर्वोक्तः प्रजादित्यागस्तत्पूर्वको योगः, प्रमाणविपर्ययविकल्पनिद्रास्मृतिरूपाणां पञ्चानां चित्तवृत्तीनां निरोधो योगः, "योगश्चित्तवृत्तिनिरोधः" इति पतञ्जलिना सूत्रितत्वात् । तस्माद्योगात् । शुद्धसत्त्वा विषयभोगव्यावृत्तचित्ताः । अत एव यतयो नियमनशीलाः । एतेन ज्ञानं तत्त्वप्रकाशनेनाविद्यानिवर्तकं त्यागस्तु विषयभोगनिवृत्तिद्वारा चित्तशुद्धिहेतुरिति पृथगुपयोग उक्तो भवति । ब्रह्मणो लोको दर्शनं साक्षात्कारः, तस्मिन्नुत्पन्ने सति संसारिविलक्षणास्ते पुरुषाः । वैलक्षण्यद्योतनार्थस्तुशब्दः । तादृशाः पुरुषाः सर्वे परिमुच्यन्ति । ज्ञानिषु देवमनुष्यत्वादिकृत उत्तमाधमभावोऽप्रयोजक इति विवक्षया सर्व इत्युक्तम् । कदा मुच्यन्त इत्याशङ्क्य परान्तकाल इत्युक्तम् । सत्यज्ञाने यो देहपातावसरः सोऽयमपरान्तकालः । पुनर्देहस्य

---

१ ब्र. °जदेतय° । २ ख. °माद्दान° । ३ ग. °जाधनादी° । ४ ख ब्र. °न्यासः । ५ ग. तेन । ६ ब्र. °च्यन्ते । ज्ञा° । ७ ग. °मानुत्तम° ।

विद्यमानत्वात् । नष्टे त्वज्ञाने यो देहपाताव्यवसरः सोऽयं परान्तकालः । पुनर्देहग्रहणरहितत्वात् । तस्मिन्परान्तकाले संसारबन्धान्मुच्यन्ते । नन्वज्ञानिनोऽपि प्रलयकाले स्थूलसूक्ष्मशरीरद्वयलक्षणाद्बन्धान्मुच्यन्त एवेत्याशङ्क्य परामृतादित्युक्तम् । जगत्कारणत्वेनोत्कृष्टं परम् । तत्त्वज्ञानमन्तरेण विनाशरहितत्वादमृतं तादृशात्परामृतादव्याकृताद्ज्ञानिनः प्रलयकालेऽपि न मुच्यन्ते । ज्ञानिनस्तु देहपाताव्यवसर एव तादृशादव्याकृतादपि मुच्यन्त इति विशेषः ।

त्रयोविंशमृचमाह—

दहं विपापं वरवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम् ।
तत्रापि दहे गगनं विशोकं तस्मिन्यदन्तस्तदुपासितव्यम्, इति ॥

तत्त्वं ज्ञातुमसमर्थस्याशेषासनमुच्यते । यदेतत्पुण्डरीकमष्टदलं हृदयकमलमस्ति । कीदृशम् । दहमल्पमङ्गुष्ठमात्रपरिमितत्वात् । विपापं चित्तैकाग्र्यस्थानत्वेन पापरहितम् । वरवेश्मभूतं वरस्य श्रेष्ठस्य परमात्मन उपलब्धिस्थानत्वेनोपास्तिस्थानत्वेन च गृहरूपम् । पुरमध्यसंस्थं हस्तपादादिभिः सर्वैरवयवैः पूर्यत इति पुरं तस्य मध्ये कुसुमरस इवान्तराऽवस्थितम् । तत्रापि तस्मिन्नपि पुण्डरीके दहेऽल्पप्रदेशे गगनमाकाशवदमूर्तं ब्रह्मरूपमस्ति । ब्रह्मणः सर्वज्ञतत्वेऽपि हृदाकाशवत्पुण्डरीकस्थानापेक्षयाऽल्पत्वमुपन्यस्यते । तथा च श्रुत्यन्तरम्—" अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः " इति । दहराकाशस्य च ब्रह्मत्वं दहराधिकरणे निर्णीतम् । अत एव विशोकं शोकरहितं गगनशब्दवाच्यं ब्रह्म । एवं सति तस्मिन्पुण्डरीकेऽन्तर्मध्ये यद्ब्रह्मतत्त्वमस्ति तदुपासितव्यं विजातीयप्रत्ययरहितेन सजातीयप्रत्ययप्रवाहेण चिन्तनीयम् ।

चतुर्विंशमृचमाह—

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि दशमोऽनुवाकः ॥ १० ॥

वेदानाम् " अग्निमीळे पुरोहितम् " " इषे त्वोर्जे त्वा " इत्यादीनामादिरुत्पन्नः, तस्मिन्नुपक्रमे यः स्वरो यो वर्णः प्रणवरूपोऽस्ति स च स्वरः प्रणवो वेदान्ते चोपनिष-

---

१ ख. °रल° । २ ग. घ. °भूतत्वम् त्रा° । ३ ग. दहरं । ४ ग. विद्यादव । ५ ग. शोकस्तस्मि° । ६ घ. °र्थस्य पूत्रो° । ७ ग दहरम° । ८ ग. घ. कुक्ष्युरसोरन्त° । ९ घ. विवेचनीयम् ।

ओमित्येतदक्षरमिदं सर्वमित्यादिकायां प्रतिष्ठितः प्रतिपादितः, स च स्वरः प्रणवो ध्यानकाले प्रकृतावव्याकृते जगत्कारणे लीनो भवति। [illegible] विराड्हिरण्यगर्भव्याकृतानि ध्यात्वा विराड्रूपमकारमुकारे प्रविलाप्य तं चोकारं हिरण्यगर्भरूपं मूलप्रकृतिरूपे मकारे प्रविलापयेत्। तस्यं च प्रकृतौ लीनस्य प्रणवस्य यः परश्चतुर्थमात्रारूपेण नादे ध्यातव्य उत्कृष्टोऽस्ति, सोऽयं महेश्वरो विज्ञेयः। अनेन मन्त्रेण पूर्वोक्तं गगनशब्दवाच्यं वस्तु प्रपञ्चितम्।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि दशमोऽनुवाकः॥ १०॥

अथैकादशोऽनुवाकः।

पूर्वानुवाकान्ते हृदयपुण्डरीक उपास्यं यन्महेश्वरस्वरूपं निर्दिष्टं तस्मिन्नुपास्यगुणविशेषा अस्मिन्ननुवाके विशेषेण प्रदर्श्यन्ते। तत्र प्रथममृचमाह—

सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम्।
विश्वं नारायणं देवमक्षरं परमं प्रभुम्, इति॥

देवं पूर्वोक्तं महेश्वरं ध्यायेदिति शेषः। कीदृशं देवम्। सहस्रशीर्षं सहस्रशब्देनापरिमितत्वमुपलक्ष्यते। अनन्तशिरस्कमित्यर्थः। सर्वजगदात्मकं विराड्रूपं महेश्वरस्य देहः। तथा सत्यस्मदादिशिरांसि सर्वाण्यपि तदीयान्येवेत्यनन्तशिरस्त्वम्। अनेनैव न्यायेन विश्वानि सर्वाण्यस्मदीयान्यक्षाणीन्द्रियाणि तदीयान्येवेति विश्वाक्षत्वम्। विश्वस्य सर्वस्य जगतः शं सुखमस्माद्भवतीति विश्वशंभुः(भूः), तादृशम्। उक्ते सहस्रशीर्षे विराड्रूपे देहेऽवस्थितस्य महेश्वरस्य निजस्वरूपं द्वितीयार्धेनोच्यते। विश्वं जगदात्मकम्। आरोपितस्य जगतोऽधिष्ठानव्यतिरेकेण वास्तवरूपाभावात्। नारायणशब्दस्य निर्वचनं पुराणेषु दर्शितम्—

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
अयनं तस्य ताः प्रोक्तास्तेन नारायणः स्मृतः" इति।

जगत्कारणेषु पञ्चभूतेष्ववस्थितं इत्यर्थः। यद्वा प्रकृतेः प(तिर्ने)रः। तस्माज्जातानि

---

१ म. °वाचय°। २ ख. विस्तरेण। ३ झ. °रस्कत्वम्। ४ ग. °चनम्। ५ ग. झ. °तमित्य°। ६ ख. °र्थः। स°।

यानि तानि नारशब्देनोच्यन्ते । तान्येतान्येवायनं स्थानं यस्य स नारायणः । स एवेन्द्रमित्रादिरूपेणावस्थितत्वाद्देव इत्युच्यते । तथा च शाखान्तरे मन्त्र आम्नातः—"इन्द्रं मित्रं वरुणमग्निमाहुः" इति । न क्षरतीत्यक्षरः, अश्नुत इति वा तस्याक्षरत्वम् । कारणत्वेनोत्कर्षात्परमत्वम् । नियन्तुं समर्थत्वात्प्रभुत्वम् ।

द्वितीयामृचमाह—

विश्वतः परमं नित्यं विश्वं नारायणꣳ हरिम् ।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति, इति ॥

विश्वतो जगतो जडवर्गात्परममुत्कृष्टम् । ऋग्वेदेन पुनरुक्तिपरिहारो द्रष्टव्यः । यद्वा स्तुतिरूपत्वादनेन रूपेण ध्यातव्यत्वाच्च नास्ति पुनरुक्तिदोषः । विनाशरहितत्वान्नित्यत्वम् । सर्वात्मकत्वाद्विश्वत्वम् । नारायणत्वं पूर्वमेवोक्तम् । पापस्याज्ञानस्य च हरणाद्धरित्वम् । यदिदं विश्वमिदानीमज्ञानदृष्ट्या प्रदृश्यते तत्सर्वं वस्तुतत्त्वदृष्ट्या पुरुषः परमात्मैव । स च परमात्मा तद्विश्वमुपजीवति स्वस्य व्यवहारार्थमाश्रयति ।

तृतीयामृचमाह—

पतिं विश्वस्याऽऽत्मेश्वरꣳ शाश्वतꣳ शिवमच्युतम् ।
नारायणं महाज्ञेयं विश्वात्मानं परायणम्, इति ॥

विश्वस्य जगतः पालकत्वात्पतिः । आत्मनां जीवानां नियामकत्वादीश्वरः । निरन्तरं वर्तमानत्वाच्छाश्वतः । परममङ्गलत्वाच्छिवः । न च्यवत इत्यच्युतः । नारायणत्वं पूर्वमुक्तम् । ज्ञेयेषु तत्त्वेषु मध्ये प्रौढत्वान्महाज्ञेय[त्व]म् । जगदुपादानत्वेन तदभेदाद्विश्वात्मत्वम् । उत्कृष्टाधारत्वात्परायणत्वम् । सर्वमप्यारोपितं जगदधिष्ठाने वर्तते ।

चतुर्थीमृचमाह—

*नारायणः परं ब्रह्म तत्त्वं नारायणः परः ।
नारायणः परो ज्योतिरात्मा नारायणः परः, इति ॥

---

* ग. पुस्तके पूर्वार्धोत्तरार्धव्यत्यासो वर्तते—"नारायणः परो ध्याता ध्यानं नारायणः परः" इत्यधिकं च ।

---

१ ख. °त्यश्नुत । २ झ. °रः, न च्युत । ३ ख. झ.° रमां नि° । ४ ग. °ख्यः । स्तु° । ५ ख. °ज्ञानादृदृश्य° । ६ ग. झ. °त्पतिम् । आ° । ७ ग. °श्वरं नियन्तारम् । नि° । ८ ग. झ. °श्वतम् । प° । ९ ग. झ. °च्छिवम् । न । १० ग. °च्युतम् । ना । ११ ख. °रकत्वं परा° । १२ ख. °यणं प° । १३ ख. °यणप° ।

पुराणेषु नारायणशब्देन व्यवहियमाणो यः परमेश्वरः स एव परमुत्कृष्टं सत्यज्ञानानन्दादिवाक्यैः प्रतिपाद्यस्य ब्रह्मणस्तत्त्वम्। अतो नारायणः पर एवाऽऽत्मा न त्वपरो मूर्तिविशेषः। तथा परो ज्योतिर्यदेतदुत्कृष्टं ज्योतिश्छन्दोगैः—"परं ज्योतिरुपसंपद्य" इत्याम्नातं तदपि नारायण एव। तस्मान्नारायणः परमात्मा।

पञ्चमीमृचमाह—

यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः, इति।

अस्मिन्वर्तमाने जगति यत्किंचित्समीपवर्ति वस्तुजातं दृश्यते। अपि वा दूरस्थं श्रूयते। तत्सर्वं वस्तुजातमयं नारायणोऽन्तर्बहिश्च व्याप्यावस्थितः। यथा कटकमुकुटाद्याभरणस्योपादानकारणं सुवर्णमन्तर्बहिर्व्याप्यावतिष्ठते तद्वत्।

षष्ठीमृचमाह—

अनन्तमव्ययं कविꣳ समुद्रेऽन्तं विश्वशंभुवम्।
पद्मकोशप्रतीकाशꣳ हृदयं चाप्यधोमुखम्, इति।

अत्र पूर्वार्धेन नारायणस्य वास्तवस्वरूपं संक्षिप्योपन्यस्यते। अनन्तं देशपरिच्छेदरहितम्। अव्ययं विनाशरहितम्। कविं चिद्रूपेण सर्वज्ञम्। समुद्रेऽतिबहुलत्वेन समुद्रसदृशे संसारेऽन्तमवसानरूपम्। यदा नारायणस्य स्वरूपं जानाति तदा संसारः क्षीयत इत्यर्थः। विश्वशंभुवं सर्वस्य संसारसुखस्योत्पत्तिकारणरूपम्। "एतस्यैवाऽऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुत्यन्तरात्। ईदृशं नारायणस्वरूपमुपासीतेति शेषः। उत्तरार्धेनोपासनस्थानमुच्यते—पद्मकोशप्रतीकाशं यथा लौकिकेऽष्टदलकमलस्य कोशो मध्यच्छिद्रं तत्सदृशं तच्च हृदयशब्दवाच्यम्। लौकिकं पद्ममूर्ध्वाभिमुखं हृदयपद्मं त्वधोमुखमिति विशेषः।

सप्तमीमृचमाह—

अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति।
+हृदयं तद्विजानीयाद्विश्वस्याऽऽयतनं महत्, इति।

---

* जगत्यस्मिन्निति पाठो भाष्यानुरोधी, स च वर्तते क्वचिदिति ग. पुस्तकटिप्पणीतो ज्ञायते।
+ पदत्रयमनिश्चितस्वरकम्।

---

१ ख. °नाद्वि°। २ ख. °वाक्यप्र°। ३ ख. °पमस्तीति शे°। ४ ख. झ. °नमु°। ५ झ. लोके शतद्°। ६ ग. °तस्था तु ना°। ७ ग. °ति। जालमालाकुलं भाति विश्व°।

निष्टिग्र्यावबन्धः, तस्या अधस्ताद्वर्तते । तत्रापि **नाभ्यामुपरि** नाभिदेशस्योर्ध्वभागे **वितस्त्यान्ते** द्वादशाङ्गुलपरिमिता वितस्तिस्तस्यामतीतायामुपरि **तिष्ठति** । **तदेतन्निष्टि**नाभ्योर्मध्यदेशवर्ति कमलं **हृदयमिति विजानीयात्** । तच्च हृदयं **विश्वस्य** सर्वस्य जगतो **महदायतनम्** । मनस्तावद्धृदयपुण्डरीके वर्तते " चन्द्रमा मनो भूत्वा हृदयं प्राविशत् " इति श्रुत्यन्तरात् । तेन च मनसा स्वप्नवत्सर्वमिदं जगत्कल्पितम् । " मनोमूलमिदं द्वैतं यत्किंचित्सचराचरम् " इति संप्रदायविद्भिरुक्तत्वात् ।

अष्टमीमृचमाह—

संततꣳ शिलाभिस्तु लम्बत्याकोशसंनिभम् ।
तस्यान्ते सुषिरꣳ सूक्ष्मं तस्मिन्त्सर्वं प्रतिष्ठितम्, इति ।

आकोशः पद्मस्य मुकुलं तत्सदृशं हृदयकमलं लम्बति शरीरमध्येऽधोमुखत्वेनावलम्बते । तच्च शिराभिर्नाडीभिः संततं परितः सम्यग्व्याप्तम् । " शतं चैका च हृदयस्य नाड्यः " इति श्रुत्यन्तरात् । तस्य हृदयस्यान्ते समीपे **सूक्ष्मं सुषिरं** छिद्रं सुषुम्नानाडीनालं तिष्ठति तस्मिन्सुषिरे सर्वमिदं जगत्प्रतिष्ठितमाश्रितम् । तत्र मनसि प्रविष्टे सति सर्वजगदाधारस्य ब्रह्मणोऽभिव्यज्यमानत्वात् ।

नवमीमृचमाह—

तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः ।
सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः*, इति ।

तस्य सुषुम्नानालस्य **मध्ये महान्प्रौढोऽग्निर्वर्तते** । स च **विश्वार्चिर्**बहुज्वालोपेतः । अत एव ज्वालाविशेषैः परितोऽवस्थितासु सर्वासु नाडीषु संसरणाद्विश्वतोमुखो बहुविधेश्वररूपः । **सोऽग्निरग्रभुक्**, स्वस्य पुरतः प्राप्तमन्नं भुङ्क्त इत्यग्रभुक् । स च भुक्तमाहारं शरीरे सर्वावयवेषु **विभजन्**प्रसारयंस्तिष्ठन्, अवस्थित इत्यर्थः ।

तथा च भगवतोक्तम्—

" अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् " इति ॥

तस्माद्भुक्तमन्नमसौ जरयति न तु स्वयं जीर्यत इत्यजरः । अत एव **कविरभिज्ञः** कुशल इत्यर्थः ।

---

* एतदग्रे ग. पुस्तके मूले " तिर्यगूर्ध्वमधःशायी रश्मयस्तस्य संततास्तासां " इत्यधिकम् ।

---

१ ग. °र्ध्वदेशभा° । २ ग. °तस्त्यां द्वा° । ३ ख. °स्यामु° । ४ ग. शिराभि° । ५ ग. कोशः । ६ ग. °मलमा° । ७ ग. °ष्मणा° । ८ ग. °ष्णा° । ९ ख. °विधे स्थिर° । ग विश्वे° ।

दशमीमृचमाह—

संतापयति स्वं देहमापादतलमस्तकम् ।
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थिता, इति ।

पादतलमारभ्य मस्तकपर्यन्तं कृत्स्नमपि स्वकीयं देहं सर्वदा संतापयति । सोऽयं शरीरगतः संतापोऽग्निसद्भावे लिङ्गम् । तस्य ज्वालाविशेषैः कृत्स्नदेहव्यापिनोऽग्नेर्मध्ये वह्निशिखा काचिज्ज्वालाऽणीयाऽत्यन्तसूक्ष्मोर्ध्वा सुषुम्नानाडीनालेनोर्ध्वं ब्रह्मरन्ध्रपर्यन्तं प्रसृत्य व्यवस्थिता विशेषेणावस्थिता ।

एकादशीमृचमाह—

नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा ।
नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा, इति ।

तोयमुदकं ददातीति तोयदो मेघः, स च वर्षितुं जलपूर्णत्वान्नीलवर्णः । तादृशस्य मेघस्य मध्ये स्थिता विद्युल्लेखेव । सेयं पूर्वोक्ताऽग्निशिखा भास्वरा प्रभावती नीवारस्य शूकं दीर्घं पुच्छं यथा तनु भवति तद्वदियं शिखा तन्वी बाह्यवह्निशिखेव पीता भास्वती पीतवर्णा दीप्तियुक्ता भवेत् । सा चाणूपमा लौकिकानां तनूनां सूक्ष्मवस्तूनामुपमा भवितुं योग्या ।

द्वादशीमृचमाह—

तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ।
स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्येकादशोऽनुवाकः ॥ ११ ॥

तस्याः पूर्वोक्ताया वह्निशिखाया मध्ये जगत्कारणभूतः परमात्मा विशेषेणावस्थितः । तस्योपासनार्थमल्पस्थानत्वेऽपि न स्वयमल्पः, किंतु सर्वदेवात्मकः । ब्रह्मा चतुर्मुखः, शिवो गौरीपतिः, इन्द्रः स्वर्गाधिपतिः, अक्षरो जगद्धेतुर्मायाविशिष्टोऽन्तर्यामीश्वरः " क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते " इति भगवतोक्तत्वात् । परमो मायारहितः शुद्धश्चिद्रूपः । अत एव पारतन्त्र्याभावात्स्वराट्स्वयमेव राजा ।

---

१ ङ. °स्तकः । त° । २ ख. °द्भावो लि° । ३ ख. °मध्येऽपि व° । ४ ग. °पुभ्गाना° । ५ ङ. °ह्निज्वालेव । ६ ग. °किकीनां । ७ ख, ङ. ब्रह्म । ८ ग. ङ. °वः स हरिः से° । ९ ङ, °द्धचिद्रू° ।

सहस्रशीर्षमित्यादिवाक्यप्रतिपाद्यं तत्त्वं पद्मकोशप्रतीकाशमित्यादिवाक्योक्तप्रकारेण ध्यायेदिति तात्पर्यार्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषद्येकादशोऽनुवाकः ॥ ११ ॥

अथ द्वादशोऽनुवाकः ।

पूर्वोक्तप्रकारेणोपासीनस्य पुरुषस्योपास्यदेवतानमस्कारार्थमेकामृचमाह—

ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि द्वादशोऽनुवाकः ॥ १२ ॥

यदेतत्परं ब्रह्म तत्सत्यमबाध्यम् । सत्यं च द्विविधम्, व्यावहारिकं पारमार्थिकं च । हिरण्यगर्भादिकं रूपं व्यावहारिकं सत्यं तन्निवारणेन परमार्थिकसत्यं प्रदर्शयितुमृतं सत्यमिति विशेष्यते । अत्यन्तसत्यमित्यर्थः । तादृशं ब्रह्म स्वभक्तानुग्रहायोमामहेश्वरात्मकं पुरुषरूपं भवति । तत्र दक्षिणे महेश्वरभागे कृष्णवर्णः । उमाभागे वामे पिङ्गलवर्णः । स च योगेन स्वकीयं रेतो ब्रह्मरन्ध्रे धृत्वौर्ध्वरेता भवति । त्रिनेत्रत्वाद्विरूपाक्षः । तादृशं परमेश्वरमनुरमृत्येति शेषः । विश्वरूपाय जगत्कारणत्वेन सर्वजगदात्मकाय विरूपाक्षाय पुरुषायैव नमस्कारोऽस्तु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि द्वादशोऽनुवाकः ॥ १२ ॥

अथ त्रयोदशोऽनुवाकः ।

इदानीमादित्यमण्डले परब्रह्मोपासनमाह—

आदित्यो वा एष एतन्मण्डलं तपति तत्र ता ऋचस्तद्दचा

---

१ ग. ङ. वै नमो नः । २ ख ङ. सत्यत्वं च । ३ ख. ङ. °र्थिकं सत्यत्वं पः । ४ ङ. °त्मकपु° । ५ ग. ङ. °नुमृत्ये° । ६ ख. °षाय नः । ७ ख. °ब्रह्मण उमा° ।

मण्डलꣳ स ऋचां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिर्दीप्यते तानि सामानि स साम्नां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिषि पुरुषस्तानि यजूꣳषि स यजुषा मण्डलꣳ स यजुषां लोकः सैषा त्रय्येव विद्या तपति य एषोऽन्तरादित्ये हिरण्मयः पुरुषः, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि त्रयोदशोऽनुवाकः ॥ १३ ॥

नारायणशब्दवाच्यो यः परमेश्वरः पूर्वानुवाकेऽभिहितः स **एष** आदित्यो वै सोपाधिकः सन्नादित्यरूपेणैव वर्तते । तस्य चाऽऽदित्यस्यैतदस्माभिर्दृश्यमानं **मण्डलं** वर्तुलाकारमुष्णं तेजस्तपति संतापं करोति । **तत्र** तस्मिन्मण्डले **ता** अध्यापकप्रसिद्धा "अग्निमीळे" इत्यादिका **ऋचो** वर्तन्ते । **तत्तस्मात्कारणान्मण्डलमृचा** निष्पादितमिति शेषः । **स** मण्डलभाग ऋग्भिर्निष्पादित ऋचामृगभिमानिदेवतानां **लोको** निवासस्थानम् । एवमृगात्मकत्वं मण्डलस्य ध्यात्वाऽथानन्तरं सामात्मकत्वं तत्र ध्यातव्यम् । कथमिति तदुच्यते—**एतस्मिन्मण्डले य एष** यदेतदर्चिर्दीप्यते भास्वरं तेजः प्रकाशते **तान्यर्चिः**स्वरूपाणि बृहद्रथंत[1]ध्यायेत् । **सोऽर्चिर्भागः साम्नां** सामाभिमानिदेवतानां **लोको** निवासस्थानम् । **अथ** सामध्यानानन्तरं यजुरात्मकं ध्यातव्यम् । कथमिति तदुच्यते—**य एष** शास्त्रप्रसिद्ध **एतस्मिन्**दृश्यमाने **मण्डले** तदीयेऽर्चिषि[3] च **पुरुषो** देवतात्मा वर्तते । **तानि** देवतास्वरूपाणि **यजूंषि** "इषे त्वोर्जे त्वा" इत्यादीनि ध्यायेत् । **स** यजुरात्मक पुरुषो **यजुषा** निष्पादितं **मण्डल**मिति ध्यायेत् । **स** यजुर्भागो **यजुषां** यजुरभिमानिदेवतानां **लोको** निवासस्थानम् । **सैषा** मण्डलतदर्चिस्तत्रत्यपुरुषरूपा **त्रय्येव**र्ग्यजुःसामात्मिकैव **विद्या तपति** प्रकाशते । **यः पुरुषोऽत्राभिहित एषोऽन्तरादित्य** आदित्यमण्डलमध्ये हिरण्मयो वर्तते । हिरण्मयत्वं चैं शाखान्तरे प्रपञ्चितम्—"अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः" ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि त्रयोदशोऽनुवाकः ॥ १३ ॥

---

१ ख. °रभूतं ते° । २ ग. घ. °षः । म । २ ग, °षि पु । ४ ग. घ. च श्रुत्यन्त° । ५ ख. ग. °प्रनखा° ।

अथ चतुर्दशोऽनुवाकः ।

पूर्वोक्तस्यैवाऽऽदित्यपुरुषस्य सर्वात्मकत्वलक्षणमवशिष्टमुपास्यगुणं दर्शयति—

आदित्यो वै तेज ओजो बलं यशश्चक्षुः श्रोत्रमात्मा मनो
मन्युर्मनुर्मृत्युः सत्यो मित्रो वायुराकाशः प्राणो लोक-
पालः कः किं कं तत्सत्यमन्नमायुरमृतो जीवो विश्वः
कतमः स्वयंभूः *प्रजापतिरिति संवत्सरोऽसावादित्यो
य एष पुरुष एष भूतानामधिपतिः, इति ।

योऽयमादित्य उपास्यत्वेनोक्तः स एव तेजआद्यधिपत्यन्तसर्वजगदात्मकः । तेजो दीप्तिः । ओजो बलकारणम् । बलं शरीरशक्तिः । यशः कीर्तिः । चक्षुःश्रोत्रे बाह्येन्द्रिये । आत्मा देहः । मनोऽन्तःकरणम् । मन्युस्तद्धर्मः कोपः । मनुः स्वायंभुवादिः । मृत्युर्यमः । सत्यादयः सत्यवचनाद्यभिमानिनो देवताविशेषाः । कः प्रजापतिः । किमित्यनेन वाचा विशेषानिर्देश्यानर्हं वस्तुजातं विवक्षितम् । कं सुखम् । तच्छब्देन परोक्षं वस्तु विवक्षितम् । सत्यमनृतवर्जनम् । अन्नं व्रीहियवादिकम् । आयुः शतसंवत्सरादिकम् । अमृतो मरणरहितः । जीवश्चिदात्मा । स च विश्वः शरीरभेदेनानेकविधः । कतमोऽतिशयेन सुखस्वरूपः । स्वयंभूः कारणान्तरादनुत्पन्नः प्रजापतिः । प्रजापतिः प्रजापालको राजादिः । इतिशब्दः प्रदर्शनार्थः । इत्यादिकं सर्वमुदाहरणीयमित्यर्थः । तत्र संवत्सररूपस्य कालस्याऽऽदित्येन निष्पादितत्वात्संवत्सर आदित्यस्वरूपः । य एष सर्वात्मकः पुरुषः स एष भूतानां प्राणिनामधिपतिः स्वामी ।

उपास्यगुणानभिधाय फलं दर्शयति—

ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोत्येतासामेव देवतानाꣳ
सायुज्यꣳ सार्ष्टितासमानलोकतामाप्नोति य एवं वेद, इति ।

यः पुमानेवमुक्तप्रकारेण वेदोपास्ते स पुमान्सायुज्यादिफलमाप्नोति । द्विविधमुपासनं हिरण्यगर्भोपासनं तदवयवभूतदेवतोपासनं चेति । तत्र हिरण्यगर्भोपास्तौ भावनाधिक्ये सति ब्रह्मणो हिरण्यगर्भस्य सायुज्यं सहभावं तादात्म्यं प्राप्नोति ।

---

*पदषट्कमनिश्चितस्वरकम् ।

---

१ ख. °त्मम्मु° । २ ग. °यंभु ब्रह्मैतन्मृत एष पुरु° । ३ ख. °ष आदित्ये पु° । ४ ग. °यंभु का° । ५ ग. °भावता ।

भावनामान्ये सलोकतां हिरण्यगर्भेण सहैकलोकनिवासं प्राप्नोति । देवतोपास्तावपि भावनाधिक्ये सत्येतासामेवेन्द्रादीनां देवतानां सायुज्यं प्राप्नोति । भावनाया मध्यमत्वे सति सार्ष्टितां समानैश्वर्यतां प्राप्नोति । मान्ये तु समानलोकतां प्राप्नोति ।

उत्तरमन्त्रजपविवक्षयोपास्तिप्रकारमुपसंहरति—

इत्युपनिषत्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि चतुर्दशोऽनुवाकः ॥ १४ ॥

इत्येवं पूर्वोक्तैरनुवाकैरुक्तोपनिषद्रहस्यभूता विद्या समाप्तेति शेषः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि चतुर्दशोऽनुवाकः ॥ १४ ॥

अथ पञ्चदशोऽनुवाकः

उपासनायामसमर्थस्याऽऽदित्यदेवताविषयं जप्यं मन्त्रमाह—

घृणिः सूर्य आदित्यो(त्यस्तो)मर्चयन्ति *तपः
सत्यं मधु क्षरन्ति तद्ब्रह्म तदाप आपो ज्योती
रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि पञ्चदशोऽनुवाकः ॥ १५ ॥

घृणिर्दीप्तिमान्सूर्य एतन्नामक आदित्योऽदितिदेवतायाः पुत्रः । एतादृशोऽहमस्मि । ईदृशमादित्यं फलार्थिनः सर्वेऽप्यर्चयन्ति । तथा तमादित्यमुद्दिश्य तप श्चरन्तीति शेषः । सत्यमनृतवर्जनम् । अनुतिष्ठन्तीति शेषः । मधु क्षरन्ति मधुरं क्षीरादिकं नैवेद्यरूपेण समर्पयन्ति । तदादित्यरूपं ब्रह्म वेदात्मकं परं ब्रह्म वा । तथा तदादित्यरूपमापः, आपो जलरूपं वृष्टिनिष्पादकत्वात् । तथा समुद्रादिगता या

* एतदादि तदाप इत्यन्तमभिधितस्वरकम् ।

१ ग. °मेव दे° । २ ग. °त्यो न प्रभावात्यक्षरम् । मधु क्षरन्ति तद्ब्रसम् । सत्यं वै तद्रसमापो ।

आपो यच्चान्यादिकं ज्योतिर्योऽपि मधुरादिरसो यच्च देवैः पातव्यममृतं यदपि ब्रह्म मन्त्रजातं ये च भूर्भुवः सुवस्त्रयो लोकास्तत्सर्वमोमादित्यरूपं भवतीत्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि पञ्चदशोऽनुवाकः ॥ १५ ॥

अथ षोडशोऽनुवाकः ।

रुद्रदेवताकं मन्त्रमाह—

सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु । पुरुषो वै रुद्रः सन्महो नमो नमः । विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् । सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि षोडशोऽनुवाकः ॥ १६ ॥

यो रुद्रः पार्वतीपतिः पुराणेषु प्रसिद्धः स एव सर्वो जीवरूपेण सर्वशरीरेषु प्रविष्टत्वात्तस्मै सर्वात्मकाय रुद्राय नमोऽस्तु । प्रकृतिपुरुषयोर्मध्ये जडात्मिकां प्रकृतिमपोह्य चिदात्मकः पुरुषो यो विद्यते स एव भक्तानुग्रहाय रुद्रमूर्तिरूपेणावभासते । तस्माद्धेतोः स रुद्रः सन्महः "सदेव सोम्येदमग्र आसीत्" इत्यादिप्रतिपाद्यमवाधितं सद्रूपं तेजः । तादृशाय रुद्राय पुनः पुनर्नमस्कारोऽस्तु । यज्जडं विश्वमस्ति यच्च भूतं चेतनं प्राणिजातमस्ति, इत्थं चेतनाचेतनरूपेण विचित्रं यद्भुवनं जगत्तत्रापि यज्जगज्जातं पूर्वमेवोत्पन्नं यच्चेदानीं जायमानं स सर्वोऽपि प्रपञ्च एष रुद्रो हि तव्यतिरेकेण वास्तवस्य जगतो निरूपयितुमशक्यत्वात् । तादृशाय सर्वात्मकाय रुद्राय नमस्कारोऽस्तु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि षोडशोऽनुवाकः ॥ १६ ॥

अथ सप्तदशोऽनुवाकः ।

रुद्रदेवताकं द्वितीयं मन्त्रमाह—

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम शंतमं

हृदे । सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु , इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि सप्तदशोऽनुवाकः ॥ १७ ॥

कत्थ श्लाघायामितिधातोरुत्पन्नः कच्छब्दः प्रशंसामाह । ततः कद्रुद्रः प्रशस्तो रुद्रः, तस्मै । प्रचेतसे प्रकृष्टज्ञानयुक्ताय मीढुष्टमाय मिह सेचन इति धातुः । अभीष्टानां कामानामतिशयेन सेक्त्रे, कामप्रदायेत्यर्थः । तव्यसेऽत्राऽऽदौ सकारस्य च्छान्दसो लोपः । स्तव्याय स्तोतुं योग्यायेत्यर्थः । हृदे हृदयवर्तित्वेन तद्रूपाय । शंतममतिशयेन सुखकरं स्तुतिरूपवाक्यं वोचेम कथयाम । सर्वो हीति पूर्ववत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि सप्तदशोऽनुवाकः ॥ १७ ॥

अथाष्टादशोऽनुवाकः ।

पुनरपि तद्देवताकं मन्त्रान्तरमाह—

नमो *हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतय उमापतये नमो नमः, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्यष्टादशोऽनुवाकः ॥ १८ ॥

बाहुशब्दस्य सर्वावयवोपलक्षणत्वाद्धिरण्यबाहवे भक्तानुग्रहाय सुवर्णमयकृत्तशरीरयुक्ताय । हिरण्यपतयेऽस्मदीयहिरण्यपालकाय । अम्बिका जगन्माता पार्वती तस्याः +पतये भर्त्रे । तस्या एवाम्बिकाया ब्रह्मविद्यात्मको देह उमाशब्देनोच्यते । तादृश्या उमायाः पतये स्वामिने रुद्राय पुनः पुनर्नमस्कारोऽस्तु । अनेनानुवाकत्रयेणोक्तानां मन्त्राणां त्वरितरुद्राख्या मन्त्रकल्पेषु प्रसिद्धा । तद्विनियोगस्तु रुद्राध्यायजपशेषत्वेन कल्पेषु द्रष्टव्यः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषद्यष्टादशोऽनुवाकः ॥ १८ ॥

* ख. पुस्तक एतदग्रे—हिरण्यवर्णायेति ग. पुस्तके—हिरण्यवर्णाय हिरण्यरूपायेति चाधिकं तद्भाष्यासंमतम् । + अत्राग्रे च पत्य इति युक्तं पठितुम् ।

१ ग. ङ. °न रुद्ररूपत्वेन च शं° । २ ग. ङ. °ये पशुपतये न° । ३ ख. °जपे शे° ।

अथैकोनविंशोऽनुवाकः ।

अथाग्निहोत्रकर्मणि होमसाधनद्रव्यस्य[1] कारणभूतं वृक्षविशेषं विधत्ते—

यस्य वैकङ्कत्यग्निहोत्रहवणी भवति *प्रतिष्ठिताः ।
प्रत्येवास्याऽऽहुतयस्तिष्ठन्त्यथो प्रतिष्ठित्यै, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्येकोनविंशोऽनुवाकः ॥ १९ ॥

अग्निहोत्रे हविर्हूयते यया दर्व्या सेयमग्निहोत्रहवणी । सा च वैकङ्कती विकङ्कतारूयेन वृक्षेण निष्पादिता यस्याग्निहोत्रिणो भवति, अस्याग्निहोत्रिण आहुतयः प्रतिष्ठितास्तयाऽग्निहोत्रहवण्या प्रक्षिप्ताः सत्यः प्रतितिष्ठन्त्येव फलप्रदा भवन्त्येव । अथो अपि च प्रतिष्ठित्या अनुष्ठातुश्चित्तशुद्धिद्वारा तत्त्वज्ञानप्रतिष्ठार्थं संपद्यन्ते । मुमुक्षोश्चित्तशुद्धिद्वारा वेदोक्तानां कृत्स्नकर्मणां मोक्षसाधनत्वं द्योतयितुमुपलक्षणत्वेन कर्माङ्गभूतो विकङ्कतवृक्षोऽत्र विहितः[3] ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषद्येकोनविंशोऽनुवाकः ॥ १९ ॥

=====

अथ विंशोऽनुवाकः ।

अथ चित्तशुद्धिहेतूनां कर्मणां संग्रहेणोपयोगमस्मिन्मोक्षप्रकरणे सूचयित्वा प्रतिबन्धकनिवारकान्रक्षोघ्नमन्त्राङ्गत्वेन विधत्ते—

कृणुष्व पाज इति पञ्च, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि विंशोऽनुवाकः ॥ २० ॥

संहितायाः प्रथमकाण्डे द्वितीयप्रपाठकस्यान्तिमानुवाके समाम्नाताः " कृणुष्व पाजः " इत्याद्या ऋचः पञ्च जपितव्या इति शेषः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि विंशोऽनुवाकः ॥ २० ॥

=====

* एतत्पदमनिश्चितस्वरकम् ।

१ ग. °स्य क°। २ ख. ग. °ति प्रत्ये°। ३ ख. ग. विवक्षितः।

अथैकविंशोऽनुवाकः ।

जीवनहेतुक्षेत्रलाभद्वारा मुक्तिहेतुं पृथिवीदेवताकं मन्त्रमाह—

अदितिर्देवा गन्धर्वा मनुष्याः पितरोऽसुरास्तेषाꣳ
सर्वभूतानां माता मेदिनी महती मही सावित्री
गायत्री जगत्युर्वी पृथ्वी बहुला विश्वा भूता
कतमा काया सा सत्येत्यमृतेति वसिष्ठः, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्येकविंशोऽनुवाकः ॥ २१ ॥

अदितिशब्दोऽखण्डितेति व्युत्पत्त्या भूमिमाचष्टे । अत एव निघण्टुकारेण पृथिवीनामसु पठितः । देवादयः पञ्च जातिविशेषा अदितिरूपाः । एते च सर्वप्राणिदेहानामुपलक्षकाः । अतस्तेषां सर्वभूतानां देहोपादानत्वादियमदितिर्माता जननी । मेदिनी मधुकैटभमेदसा जाता । अथवा मेदस्विनी कठिनेत्यर्थः । महती गुणाधिका, तच्च सर्वप्राणिकृतोपद्रवसहिष्णुत्वेनावगन्तव्यम् । मही पूज्या । सावित्री सवितुः प्रेरकस्यान्तर्यामिणः संबन्धिनी । गायत्री गायकान्स्वोपासकांस्त्रायते रक्षतीत्यर्थः । जगती जगदाश्रयभूता । उर्व्यनेकसस्याढ्या । पृथ्व्यनेकविस्तारवती । बहुला निबिडावयवा । विश्वा सर्वात्मिका । भूता प्राणिदेहोत्पत्तेः पूर्वमेव विद्यमाना । कतमाऽतिशयेन सुखरूपा । काया सर्वप्राणिदेहरूपेण परिणता । सा प्रसिद्धा । सत्या व्यवहारदशायां बाधरहिता । इत्येवं वसिष्ठो महामुनिराह । तथैवामृता मरणरहिता चतुर्युगपर्यावर्तनेऽप्यवस्थितेत्येतमप्यर्थं वसिष्ठ एवाऽऽह । अतोऽस्य मन्त्रस्य वसिष्ठ ऋषिरित्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषद्येकविंशोऽनुवाकः ॥ २१ ॥

अथ द्वाविंशोऽनुवाकः ।

वृष्ट्यभावकृतोपद्रवपरिहारेणोपकारिणमब्देवताकं मन्त्रमाह—

आपो वा इदꣳ सर्वं विश्वा भूतान्यापः । प्राणा
वा आपः पशव आपोऽन्नमापोऽमृतमापः सम्रा-

१ ख. महता । २ ङ °हारि° । ३ ग °पहारि° ।

आपो विराडापः स्वराडापश्छन्दाꣳस्यापो
ज्योतीꣳष्यापो यजूꣳष्यापः सत्यमापः सर्वा
देवता आपो भूर्भुवः सुवराप ओम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि
द्वाविंशोऽनुवाकः ॥ २२ ॥

यदिदं जगदस्ति तत्सर्वमापो वै जलमेव । कथमिति तदेव प्रपञ्च्यते—**विश्वा भूतानि** सर्वाणि प्राणिशरीराण्यापो जलं रेतोरूपेण तदुत्पादकत्वात् । **प्राणा वै** शरीरवर्तिवायवोऽप्यापः, उदकपानेन प्राणानामाप्यायनात् । अत एव **च्छन्दोगा** आमनन्ति—"आपोमयः प्राणो न पिबतो विच्छेत्स्यते" इति । **पशवो** गवादयोऽप्यापः क्षीरस्वरूपेण तत्र परिणतत्वात् । * **अन्नं** व्रीहियवादिकमापः । जलस्यान्नहेतुत्वं प्रसिद्धम् । **अमृतं** देवैरुपजीव्यं वस्त्वापः । तद्रूपेणापि परिणतत्वात् । **सम्यग्राजत** इति सूत्रात्मा हिरण्यगर्भः **सम्राट्** । विस्पष्टं राजत इति ब्रह्माण्डदेहः पुरुषो **विराट्** । इन्द्रियादिनैरपेक्ष्येण स्वयमेव राजत इत्यव्याकृताभिमानीश्वरः **स्वराट्** । **छन्दांसि** गायत्र्यादीनि । **ज्योतींष्यादित्यादीनि** । **यजूंष्यनियताक्षरा मन्त्राः** । **सत्यं** यथार्थकथनम् । **सर्वा देवता** इन्द्रादयः । **भूर्भुवः** स्वस्त्रयो लोकाः । सम्राडादिलोकत्रयान्तपदार्थरूपेणाऽऽपः स्तूयन्ते । एताश्चाऽऽपो मूलकारणं परमात्मरूपेण प्रणवप्रतिपाद्या इति वक्तुमोंकारः पठितः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि द्वाविंशोऽनुवाकः ॥ २२ ॥

==========

अथ त्रयोविंशोऽनुवाकः ।

माध्याह्निकसंध्यानुष्ठानेऽभिमन्त्रितजलपानार्थं मन्त्रमाह—

आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् ।
पुनन्तु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु माम् ।
यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम । सर्वं पुनन्तु

* ख. घ. पुस्तकयोरन्नामृतशब्दयोर्व्याख्याने व्यत्यासो वर्तते ।

मामापोऽसतां च प्रतिग्रहꣳ स्वाहा, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि त्रयोविंशोऽनुवाकः ॥ २३ ॥

या आपः सन्ति ताः पृथिवीं पुनन्तु प्रक्षालनेन शोधयन्तु। सा च पृथिवी पूता शुद्धा सती मामनुष्ठातारं पुनातु शोधयतु। तथा ब्रह्मणो वेदस्य पतिः पतिं प्रतिपालकमाचार्यमेता आपः पुनन्तु। तेनाऽऽचार्येणोपदिष्टं ब्रह्म वेदस्वरूपं पूता स्वयं पूतं सन्मां पुनातु। अन्यभुक्तावशिष्टरूपमुच्छिष्टं यदस्ति यच्चाभोज्यं भोक्तुमयोग्यं तादृशं कदाचिन्मया भुक्तं यद्वा दुश्चरितमन्यदपि प्रतिषिद्धाचरणरूपं मम किंचित्संपन्नं तत्सर्वं परिहृत्येति शेषः। ततो मामापः पुनन्तु। तथाऽसतां शूद्रादीनां प्रतिग्रहं च मया कृतं पुनन्तु। तदर्थमिदमभिमन्त्रितमुदकं स्वाहा मदीयवक्त्राग्नौ स्वाहुतमस्तु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि त्रयोविंशोऽनुवाकः ॥ २३ ॥

=====

अथ चतुर्विंशोऽनुवाकः।

सायंसंध्याकाले जलपानार्थं मन्त्रमाह—

अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षन्ताम्। यदह्ना पापमकार्षम्। मनसा वाचा हस्ताभ्याम्। पद्भ्यामुदरेण शिश्ना। अहस्तदवलुम्पतु। यत्किंच दुरितं मयि। इदमहं माममृतयोनौ। सत्ये ज्योतिषि जुहोमि स्वाहा, इति।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि चतुर्विंशोऽनुवाकः ॥ २४ ॥

योऽयमग्निरस्ति यश्च मन्युः क्रोधाभिमानी देवः, ये च मन्युपतयः क्रोधस्वामिनस्तन्नियामका देवाः सन्ति ते सर्वेऽपि मन्युकृतेभ्यो मदीयकोपनिष्पादितेभ्यः पापेभ्यो मा मां रक्षन्तां पापिनं मां तत्पापविनाशनेन पालयन्तु। किं चातीते-

नाह्ना तस्मिन्नहनि यत्पापमकार्षं कृतवानस्मि । केन साधनेन मनआदिभिः शिश्नान्तैरवयवैः । तत्सर्वं पापमहरवलुम्पतु, अहरभिमानी देवो विनाशयतु । परहिंसादिचिन्तनं मानसं पापम् । अप्रियानृतादिभाषणं वाचिकम् । अभिचारमोहा(होमा)दिकं हस्तकृतम् । पादेन गोब्राह्मणस्पर्शादिकं पादकृतम् । अभोज्यभोजनमुदरकृतम् । अगम्यागमनं शिश्नकृतम् । अथवा किमनेन परिमितगणनेन यत्किमापि दुरितं मयि निष्पन्नमिदं पापजातं सर्वं तत्कर्तारं मां च लिङ्गशरीररूपममृतयोनौ मरणरहिते जगत्कारणे सत्ये बाधरहिते ज्योतिषि स्वयंप्रकाशे वस्तुनि जुहोमि प्रक्षिपामि, अहमनेन होमेन तत्सर्वं भस्मी करोमीत्यर्थः । तदर्थमिदमभिमन्त्रितं जलं स्वाहा मदीयवक्त्राग्नौ स्वाहुतमस्तु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि चतुर्विंशोऽनुवाकः ॥ २४ ॥

==========

अथ पञ्चविंशोऽनुवाकः ।

प्रातःसंध्याकाले जलपानार्थं मन्त्रमाह—

सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः । पापेभ्यो रक्षन्ताम् । यद्रात्रिया पापमकार्षम् । मनसा वाचा हस्ताभ्याम् । पद्भ्यामुदरेण शिश्ना । रात्रिस्तदवलुम्पतु । यत्किंच दुरितं मयि । इदमहं माममृतयोनौ । सूर्ये ज्योतिषि जुहोमि स्वाहा, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि पञ्चविंशोऽनुवाकः ॥ २५ ॥

सूर्येऽहर्निष्पादके सूर्योपाधिके । अन्यत्सर्वं पूर्ववद्व्याख्येयम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि पञ्चविंशोऽनुवाकः ॥ २५ ॥

==========

अथ षड्विंशोऽनुवाकः।

संध्यात्रये मार्जनादूर्ध्वं गायत्र्या आवाहनमन्त्रमाह—

आयातु वरदा देवी अक्षरं ब्रह्म संमितम्। गायत्री छन्दसां माता इदं ब्रह्म जुषस्व नः। ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धामनामाऽसि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरों गायत्रीमावाहयामि, इति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि षड्विंशोऽनुवाकः॥ २६॥

वरदाऽस्मदभीष्टवरप्रदा देवी गायत्रीछन्दोभिमानिनी देवताऽक्षरं विनाशरहितं संमितं सम्यग्वेदान्तप्रमाणेन निश्चितं ब्रह्म जगत्कारणं परतत्त्वमुद्दिश्याऽऽयात्वागच्छत्वस्माकं ब्रह्मतत्त्वं बोधयितुमागच्छात्वित्यर्थः। अयमेवार्थ उत्तरार्धेन स्पष्टी क्रियते—छन्दसां गायत्रीत्रिष्टुबादीनां वेदानां वा माता जननी देवता गायत्री गायत्रीशब्दाभिधेया नोऽस्मानिदं ब्रह्म वेदान्तप्रतिपाद्यं तत्त्वं जुषस्व जोषयतु, उपादिशत्वित्यर्थः। हे गायत्रि देवि त्वमोजोऽसि बलहेतुभूताष्टमधातुरूपाऽसि। सहोऽसि शत्रूणामभिभवनशक्तिरसि। बलमसि शरीरगतव्यवहारसामर्थ्यरूपाऽसि। भ्राजोऽसि दीप्तिरूपाऽसि। देवानामग्नीन्द्रादीनां धाम तेजो यदस्ति तन्नामाऽसि तदेव तव नामेत्यर्थः। विश्वं सर्वजगद्रूपं त्वमेवासि। विश्वायुः संपूर्णायुःस्वरूपाऽसि। उक्तस्यैव व्याख्यानं सर्वमसि सर्वायुरिति। अभिभूः सर्वस्य पापस्य तिरस्कारहेतुरों प्रणवप्रतिपाद्यः परमात्माऽसि। तादृशीं गायत्रीं मदीये मनस्यावाहयामि॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि षड्विंशोऽनुवाकः॥ २६॥

अथ सप्तविंशोऽनुवाकः।

गायत्र्या आवाहनादूर्ध्वं प्राणायामार्थं मन्त्रमाह—

ओं भूः। ओं भुवः। ओꣳ सुवः। ओं महः। ओं जनः। ओं तपः। ओꣳ सत्यम्। ओं तत्सवितुर्वरेण्यं

---

१ ख. ग. °यत्रीं छ°। २ ख. ग. मातेदं। ३ ख. ग. मे। ४ ग. °द्वप्र°।

भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ।
ओमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि सप्तविंशोऽनुवाकः ॥ २७ ॥

भूरादयः सत्यान्ता लोकप्रतिपादिकाः सप्त व्याहृतयः । तेषां च लोकानां प्रणवप्रतिपाद्यब्रह्मस्वरूपत्वविवक्षया प्रत्येकं प्रणवोच्चारणम् । तत्सवितुरित्यादिको गायत्रीमन्त्रः । तत्प्रतिपाद्यस्य ब्रह्मत्वविवक्षया तदादौ प्रणवोच्चारणम् । मन्त्रस्य चायमर्थः— सवितुः प्रेरकस्यान्तर्यामिणो देवस्य वरेण्यं वरणीयं श्रेष्ठं तद्भर्गस्तेजो धीमहि ध्यायेम । यः सविता परमेश्वरो नोऽस्मदीया धियो बुद्धिवृत्तीः प्रचोदयात्प्रकर्षेण तत्त्वबोधे प्रेरयतु । तस्य तेजो ध्यायेमेति पूर्वत्रान्वयः । आपो ज्योतिरित्यादिको गायत्र्याः शिरोमन्त्रः, तस्याऽऽद्यन्तयोः प्रणवद्वयं पूर्ववदुच्चार्यते । या आपो नदीसमुद्रादिगताः सन्ति । यच्च ज्योतिरादित्यादिकमस्ति । योऽपि रसो मधुराम्लादिः षड्विधोऽस्ति । यदपि अमृतं देवैः पातव्यमस्ति । तत्सर्वमों प्रणवप्रतिपाद्यं ब्रह्म । किं च भूर्भुवः सुवरित्यभिहिता ये त्रयो लोकाः सन्ति तेऽप्योंप्रणवप्रतिपाद्यं ब्रह्म । अस्य च मन्त्रस्य प्राणायामाङ्गत्वममृतनादोपनिषदि प्रतिपाद्यते—

"सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते" ॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि सप्तविंशोऽनुवाकः ॥ २७ ॥

अथाष्टाविंशोऽनुवाकः ।

तस्मिन्नेव प्राणायामे विकल्पितं मन्त्रान्तरमाह—

ॐ भूर्भुवः सुवर्महर्जनस्तपः सत्यं तद्ब्रह्म तदाप आपो
ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्यष्टाविंशोऽनुवाकः ॥ २८ ॥

पूर्ववद्व्याख्येयम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषद्यष्टाविंशोऽनुवाकः॥ २८॥

अथैकोनत्रिंशोऽनुवाकः।

पुनरपि विकल्पितं मन्त्रान्तरमाह—

ओं तद्ब्रह्म। ओं तद्वायुः। ओं तदात्मा*।
ओं तत्सर्वम्। ओं तत्पुरोनमः, इति।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्येकोनत्रिंशोऽनुवाकः॥ २९॥

ओं प्रणवप्रतिपाद्यं तत्सर्ववेदान्तप्रसिद्धं **ब्रह्म** तत्त्वम्। तथा **वायुः** सूत्रात्मरूपो हिरण्यगर्भ **ओं** तत्प्रणवप्रतिपाद्यं वेदान्तप्रसिद्धं ब्रह्मैव। तथैवाऽऽत्मा जीवोऽपि। **ओं** तदिति पूर्ववत्। **सर्वं** जगदों तदिति पूर्ववत्। **पुरः** पुराणि स्थूलसूक्ष्मकारणशरीराणि। **ओं** तदिति पूर्ववत्। तादृशाय ब्रह्मणे **नमोऽस्तु**। प्राणायामे शक्तितारतम्यमनुसृत्य विकल्पितं मन्त्रत्रयमुक्तम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषद्येकोनत्रिंशोऽनुवाकः॥ २९॥

अथ त्रिंशोऽनुवाकः।

जपादूर्ध्वं गायत्रीदेवताया विसर्जनमन्त्रमाह—

उत्तमे शिखरे *देवी भूम्यां पर्वतमूर्धनि।
ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखम्, इति।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि त्रिंशोऽनुवाकः॥ ३०॥

* एतदग्रे ग. ङ. झ. पुस्तकयोः 'ओं तत्सत्यम्' इत्यधिकम्। + एतत्पदमनिश्चितस्वरकम्।

१ झ. 'त्पुरो नमः'।

भूम्यामवस्थितो यः पर्वतो मेरुनामकस्तस्य मूर्धन्युपरिभागे यदुत्तमं शिखरमस्ति तस्मिन्नियं गायत्री देवी तिष्ठति। तस्मात्कारणाद्धे देवि ब्राह्मणेभ्यस्त्वदुपासकेभ्यस्त्वदनुग्रहेण परितुष्टेभ्योऽनुज्ञानमभिव्याप्य यथासुखं स्वकीयसुखमनतिक्रम्य स्वस्थाने तस्मिन्नुत्तमशिखरे गच्छ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि त्रिंशोऽनुवाकः ॥ ३० ॥

अथैकत्रिंशोऽनुवाकः ।

गायत्रीदेव्या विसर्जनादूर्ध्वं तत्त्वानुस्मरणभूतस्य ब्रह्मण उपस्थानमन्त्रमाह—

ओमन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु ।
त्वं यज्ञस्त्वं विष्णुस्त्वं वषट्कारस्त्वं
रुद्रस्त्वं ब्रह्मा त्वं प्रजापतिः, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्येकत्रिंशोऽनुवाकः ॥ ३१ ॥

विश्वमूर्तिषु देवमनुष्यगन्धर्वादिनानाशरीरयुक्तेषु भूतेषु प्राणिषु गुहायां बुद्धावन्तर्मध्य ओं प्रणवप्रतिपाद्यः परमात्मा चरति वर्तते। हे परमात्मन्यो यज्ञो ज्योतिष्टोमादिः स त्वमेव। यश्च विष्णुर्जगत्पालको योऽपि वषट्कारो हविष्प्रदानमन्त्रो यश्च रुद्रः संहर्ता यश्च ब्रह्मा जगत्स्रष्टा यश्च प्रजापतिर्दक्षादिः प्रजापालकः स सर्वोऽपि त्वमेव ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषद्येकत्रिंशोऽनुवाकः ॥ ३१ ॥

अथ द्वात्रिंशोऽनुवाकः ।

अथ भोजनादावपां प्राशने मन्त्रमाह—

अमृतोपस्तरणमसि, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि द्वात्रिंशोऽनुवाकः ॥ ३२ ॥

पीयमान हे जल त्वममृतं विनाशरहितं प्राणदेवताया उपस्तरणमसि। यथा शयानस्य पुंसो मञ्चकस्योपरितनं पटादिकमुपस्तीर्यते तद्वत्प्राणदेवताया इदमुपस्तरणम्। तथा च वाजसनेयिनः प्राणविद्यायां प्राणदेवतायां जलवस्त्रत्वमामनन्ति—" तस्माद्-शिष्यन्नाचामेदाशित्वाऽऽचामेदेतमेव तदन्नमनन्नं कुरुते " इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि द्वात्रिंशोऽनुवाकः ॥ ३२ ॥

अथ त्रयस्त्रिंशोऽनुवाकः।

जलप्राशनादूर्ध्वं प्राणाहुतिमन्त्रान्दर्शयति—

प्राणे निविष्टोऽमृतं जुहोमि। प्राणाय स्वाहा।
अपाने निविष्टोऽमृतं जुहोमि। अपानाय स्वाहा।
व्याने निविष्टोऽमृतं जुहोमि। व्यानाय स्वाहा।
उदाने निविष्टोऽमृतं जुहोमि। उदानाय स्वाहा।
समाने निविष्टोऽमृतं जुहोमि। समानाय स्वाहा।
ब्रह्मणि म आत्माऽमृतत्वाय, इति।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि त्रयस्त्रिंशोऽनुवाकः ॥ ३३ ॥

पञ्चसु शरीरगतवायुभेदेषु मध्ये प्रथमे प्राणनामके वायौ निविष्ट आदरयुक्तोऽहममृतं स्वादुभूतमिदं हविर्जुहोमि प्रक्षिपामि। तच्च प्राणदेवतायै स्वाहा स्वाहुतमस्तु। एवमपानादिषु योज्यम्। एताभिः पञ्चभिराहुतिभिरमृतत्वाय मोक्षाय मे मदीय आत्मा जीवो ब्रह्मणि परमात्मनि एकी भवत्विति शेषः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि त्रयस्त्रिंशोऽनुवाकः ॥ ३३ ॥

१ क्ष. ° या ब्रह्मणस्तत्त्वमा° । २ ख. °तद्° । ३ ख. कुर्वन्ति ।

अथ चतुस्त्रिंशोऽनुवाकः ।

प्राणाहुतिष्वेव [illegible] मन्त्रान्तराणि दर्शयति—

प्राणे निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । प्राणाय स्वाहा । अपाने निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । अपानाय स्वाहा । व्याने निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । व्यानाय स्वाहा । उदाने निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । उदानाय स्वाहा । समाने निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । समानाय स्वाहा । ब्रह्मणि म आत्माऽमृतत्वाय, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि चतुस्त्रिंशोऽनुवाकः ॥ ३४ ॥

हूयमान हे द्रव्यविशेष त्वं शिवः शान्तो भूत्वा मां प्रविश । किमर्थम् । अप्रदाहाय क्षुत्संपादितदाहशान्त्यर्थम् । अन्यत्पूर्ववद्व्याख्येयम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि चतुस्त्रिंशोऽनुवाकः ॥ ३४ ॥

अथ पञ्चत्रिंशोऽनुवाकः ।

भोजनादूर्ध्वमपां प्राशने मन्त्रमाह—

अमृतापिधानमसि, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि पञ्चत्रिंशोऽनुवाकः ॥ ३५ ॥

पीयमान हे जल त्वममृतमविनश्वरमपिधानमाच्छादकमसि ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि पञ्चत्रिंशोऽनुवाकः ॥ ३५ ॥

अथ षट्त्रिंशोऽनुवाकः।

भुक्तस्यानुमन्त्रणे मन्त्रमाह—

श्रद्धायां प्राणे निविश्यामृतꣳ हुतम्। प्राणमन्नेनाऽऽप्यायस्व। अपाने निविश्यामृतꣳ हुतम्। अपानमन्नेनाऽऽप्यायस्व। व्याने निविश्यामृतꣳहुतम्। व्यानमन्नेनाऽऽप्यायस्व। उदाने निविश्यामृतꣳ हुतम्। उदानमन्नेनाऽऽप्यायस्व। समाने निविश्यामृतꣳ हुतम्। समानमन्नेनाऽऽप्यायस्व ब्रह्मणि म आत्माऽमृतत्वाय, इति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि षट्त्रिंशोऽनुवाकः॥ ३६॥

वैदिके कर्मणि विश्वासातिशयः श्रद्धा, तस्यां सत्यां प्राणवायौ निविश्याऽऽदरातिशयं कृत्वाऽमृतमविनश्वरं स्वादुभूतमिदं हविर्मया हुतम्। हे प्राणाभिमानिदेव हुतेनान्नेनाऽऽप्यायस्व वर्धयस्व। स्पष्टमन्यत्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि षट्त्रिंशोऽनुवाकः॥ ३६॥

अथ सप्तत्रिंशोऽनुवाकः।

अनुमन्त्रणादूर्ध्वं हृदयाभिमर्शने मन्त्रमाह—

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः। तेनान्नेनाऽऽप्यायस्व, इति।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि सप्तत्रिंशोऽनुवाकः॥ ३७॥

हे हृदयवर्तिन्नहंकार त्वं वायुरूपाणामिन्द्रियरूपाणां च प्राणानां ग्रन्थिरसि परस्परमविश्लेषाय ग्रथनहेतुरसि। तादृशस्त्वं रुद्रस्त्वदभिमानिदेवतारूपोऽन्तको दुःखस्य

विनाशको भूत्वा मा मां विश मच्छरीरे प्रविष्टो भव । तेन मद्भुक्तेनान्नेनाऽऽप्यायस्व मामभिवर्धय ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि सप्तत्रिंशोऽनुवाकः ॥ ३७ ॥

=====

अथाष्टात्रिंशोऽनुवाकः ।

क्षुधादिजनितचित्तविक्षेपशान्तेरूर्ध्वं भोक्तुर्जीवस्य परमेश्वररूपत्वानुसंधाने हेतुभूतं मन्त्रं दर्शयति—

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः ।
ईशः सर्वस्य जगतः प्रभुः प्रीणातु[1] विश्वभुक्[2], इति ।
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्यष्टात्रिंशोऽनुवाकः ॥ ३८ ॥

हृदयमध्यगत आकाशः स्वाङ्गुष्ठपरिमितः । तत्र वर्तमाना बुद्धिरपि तावती । तयाऽवच्छिन्नो जीवरूपः पुरुषोऽप्यङ्गुष्ठमात्रः । स च स्वकीयया ज्ञानक्रियाशक्त्याऽङ्गुष्ठं समाश्रितः । चकारान्मस्तकं चाऽऽश्रितः । आपादमस्तकव्यापीत्यर्थः । स चोपाधिसंबन्धमन्तरेण स्वकीयेन वास्तवेन रूपेण सर्वस्य जगत ईशो नियन्ता । अत एव विश्वभुक्सर्वं जगद्भुङ्क्ते । तादृशः स प्रभुरीश्वरः प्रीणातु[3], अनेन भोजनेन प्रीतो भवतु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषद्यष्टात्रिंशोऽनुवाकः ॥ ३८ ॥

=====

अथैकोनचत्वारिंशोऽनुवाकः ।

जीवात्मन ईश्वरेणाभेदज्ञानं यदस्ति तस्य ज्ञानस्य नैरन्तर्येण साधनं मेधाधीनमतो मेधाभिमानिदेवतां प्रार्थयितुमेकामृचमाह—

मेधा देवी जुषमाणा न आगाद्विश्वाची भद्रा
सुमनस्यमाना । त्वया जुष्टा जुषमाणा दुरु-

---

१ ग. °धानहेतुं म° । २ ग. ङ. प्रीणाति । ३ ग. प्रसन्नो ।

क्तान्बृहद्वदेम विदथे सुवीराः, इति ।

ग्रन्थतदर्थयोर्धारणशक्तिर्मेधा, तदभिमानिनी देवी जुषमाणा प्रीयमाणा सती नोऽस्मान्प्रत्यागादागच्छतु । कीदृशी देवी । विश्वमञ्चतीति विश्वाची सर्वावगाहनक्षमेत्यर्थः । अत एव भद्रा कल्याणी । सुमनस्यमाना शोभनं मनोऽस्मदनुग्राहकमिच्छन्ती । हे देवि त्वया जुष्टाऽनुगृहीता वयं दुरुक्ताञ्जुषमाणाः पुरुषार्थानुपयोगिनो वेदबाह्याञ्शब्दान्सेवमाना वेदैकनिष्ठाः सुवीराः शोभनपुत्रशिष्यादिरूपा विदथे यज्ञेऽनुष्ठिते सति शुद्धान्तःकरणा भूत्वा बृहद्वदेम परब्रह्मतत्त्वं कथयाम ।

तत्रैव द्वितीयामृचमाह—

त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्माऽऽगतश्रीरुत त्वया । त्वया जुष्टश्चित्रं विन्दते वसु नो जुषस्व द्रविणेन मेधे, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्येकोनचत्वारिंशोऽनुवाकः ॥ ३९ ॥

हे देवि मेधाख्ये त्वया जुष्टः सेवितोऽनुगृहीतः पुरुष ऋषिरतीन्द्रियदर्शी भवति । तथा त्वया जुष्टः पुरुषो ब्रह्मा हिरण्यगर्भो भवति । उतापि च त्वया जुष्टः पुरुष आगतश्रीः प्राप्तसंपद्भवति । अत एव त्वया जुष्टः पुरुषश्चित्रं गवाश्वभूहिरण्यधान्यादिकं विविधं वसु धनं विन्दते लभते । हे मेधे देवि सा तादृशी त्वं नोऽस्मान्द्रविणेन धनेन जुषस्व सेवस्वानुगृहाणेत्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषद्येकोनचत्वारिंशोऽनुवाकः ॥ ३९ ॥

अथ चत्वारिंशोऽनुवाकः ।

मेधाप्रदानिन्द्रादीन्प्रार्थयते—

मेधां म इन्द्रो ददातु मेधां देवी सरस्वती । मेधां मे अश्विनावुभौ देवावाधत्तां पुष्करस्रजौ, इतिः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि चत्वारिंशोऽनुवाकः ॥ ४० ॥

योऽयमिन्द्रो देवो या च सरस्वती देवी यौ च पुष्करस्रजौ पद्ममालायुक्तावुभावश्विनौ देवौ ते सर्वे मे मह्यं मेधां प्रयुच्छन्तु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि चत्वारिंशोऽनुवाकः ॥ ४० ॥

अथैकचत्वारिंशोऽनुवाकः ।

मेधाप्रदं मन्त्रान्तरं दर्शयति—

अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः । दैवी मेधा
*मनुष्यजा सा मां मेधा सुरभिर्जुषताम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्येकचत्वारिंशोऽनुवाकः ॥ ४१ ॥

अप्सरासु देवस्त्रीषु या मेधा प्रसिद्धा वर्तते गन्धर्वेषु च देवगायकेषु यन्मनो मेधात्मकमस्ति दैवी हिरण्यगर्भादिदेवेषु स्थिता या मेधा विद्यते मनुष्यजा मनुष्येषु वेदशास्त्रवित्सु या मेधाऽस्ति सा सर्वा मेधा सुरभिः शोभनगन्धा सर्वकामदुघा वा भूत्वा मां जुषतां सेवताम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषद्येकचत्वारिंशोऽनुवाकः ॥ ४१ ॥

अथ द्विचत्वारिंशोऽनुवाकः ।

पुनरपि मेधार्थं मन्त्रान्तरमाह—

आ मां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या ।
ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषताम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि द्विचत्वारिंशोऽनुवाकः ॥ ४२ ॥

* एतत्पदमनिश्चितस्वरकम् ।

१ ख. ग. दैवी । २ ग. षताम् । ३ ग. जुषन्ताम् ।

मेधाशक्तिर्मां प्रत्यागच्छत्विति शेषः । कीदृशी मेधा, **सुरभिः** शोभनगन्धा कामदुघा वा । **विश्वरूपा** सकलवेदशास्त्रधारणक्षमत्वेन बहुरूपा । **हिरण्यवर्णा** देवताशरीरे हिरण्यसमानवर्णोपेता । **जगती** सर्वत्र वर्तमानत्वेन जगदात्मिका । **जगम्या** पुरुषार्थकामैर्भृशं गन्तुं योग्या । **ऊर्जस्वती** बलवती **पयसा** गोक्षीरादिरसेन **पिन्वमानाऽस्मान्प्रीणयन्ती** । **सा** तथाविधगुणयुक्ता **मेधा सुप्रतीका** सुमुखी भूत्वा **मां जुषतां** सेवताम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि द्विचत्वारिंशोऽनुवाकः ॥ ४२ ॥

अथ त्रिचत्वारिंशोऽनुवाकः ।

मेधाविनः पुरुषस्य ज्ञानोत्पादनाय महादेवसंबन्धिषु पञ्चवक्त्रेषु मध्ये पश्चिमवक्त्रप्रतिपादकं मन्त्रमाह—

सद्योजातं प्रपद्यामि सद्योजाताय वै[1] नमः ।
भवे भवे नातिभवे भँजस्व[2] माम् । भवोद्भवाय[3] नमः[4], इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि त्रिचत्वारिंशोऽनुवाकः ॥ ४३ ॥

सद्योजातनामकं यत्पश्चिमवक्त्रं तद्रूपं परमेश्वरं **प्रपद्यामि** प्राप्नोमि । तादृशाय **सद्योजाताय वै नमोऽस्तु** । हे सद्योजात **भवे भवे** तत्तज्जन्मनिमित्तं **मां न भँजस्व** न प्रेरयेत्यर्थः । किं तर्ह्यतिभवे जन्मातिलङ्घननिमित्तं **भँजस्व** तत्त्वज्ञानाय प्रेरय । **भवोद्भवाय** भवात्संसारादुद्धर्त्रे सद्योजाताय **नमोऽस्तु** ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि त्रिचत्वारिंशोऽनुवाकः ॥ ४३ ॥

अथ चतुश्चत्वारिंशोऽनुवाकः ।

उत्तरवक्त्रप्रतिपादकं मन्त्रमाह—

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय

१ क्ष. जुषन्ताम् । २ ख. क्ष. वै नमो नः । ३ क्ष. भवैस्व । ४ क्ष. भवस्व । ५ क्ष. भवस्व ।

नमः कलविकरणाय नमो बलविकरणाय नमो बलप्रमथनाय
नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि चतुश्चत्वारिंशोऽनुवाकः ॥ ४४ ॥

उत्तरवक्त्ररूपो वामदेवस्तस्यैव विग्रहविशेषा ज्येष्ठादिनामकाः । एते च महादेवपीठशक्तीनां वामादीनां नवानां पतयः पुरुषाः । तेभ्यो नवभ्यो नमस्कारोऽस्तु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि चतुश्चत्वारिंशोऽनुवाकः ॥ ४४ ॥

अथ पञ्चचत्वारिंशोऽनुवाकः ।

दक्षिणवक्त्रप्रतिपादकं मन्त्रमाह—

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।
सर्वतः शर्व सर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि पञ्चचत्वारिंशोऽनुवाकः ॥ ४५ ॥

अघोरनामको दक्षिणवक्त्ररूपो देवस्तस्य विग्रहा अघोराः सात्त्विकत्वेन शान्ताः । अन्ये तु **घोरा** राजत्वेनोग्राः । अपरे तु तामसत्वेन घोरादपि घोरतराः । हे **शर्व** परमेश्वर ते त्वदीयेभ्यः पूर्वोक्तेभ्यस्त्रिविधेभ्यः **सर्वेभ्यो रुद्ररूपेभ्यः सर्वतः** सर्वेषु देशेषु **सर्वेषु** च कालेषु **नमोऽस्तु** ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि पञ्चचत्वारिंशोऽनुवाकः ॥ ४५ ॥

अथ षट्चत्वारिंशोऽनुवाकः ।

प्राग्वक्त्रप्रतिपादकं मन्त्रमाह—

तत्पुरुषाय विद्महे महादेवाय धीमहि ।

---

१ ग. म. °मो बलाय नमो ब° । २ ख. सर्वेभ्यः स सर्वेभ्यः सर्व शर्व° ।

तन्नो रुद्रः प्रचोदयात्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि षट्चत्वारिंशोऽनुवाकः ॥ ४६ ॥

प्राग्वक्त्रदेवस्तत्पुरुषनामकः। द्वितीयार्थे चतुर्थी। तत्पुरुषं देवं **विद्महे** गुरुशास्त्रमुखाज्ज्ञानीमः। ज्ञात्वा च **महादेवाय** तं महादेवं **धीमहि** ध्यायेम। **तन्नस्मात्कारणाद्रुद्रो** देवो **नोऽस्मान्प्रचोदयाज्ज्ञानध्यानार्थं** प्रेरयतु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि षट्चत्वारिंशोऽनुवाकः ॥ ४६ ॥

अथ सप्तचत्वारिंशोऽनुवाकः।

ऊर्ध्ववक्त्रप्रतिपादकं मन्त्रमाह—

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि सप्तचत्वारिंशोऽनुवाकः ॥ ४७ ॥

योऽयमूर्ध्ववक्त्रो देवः सोऽयं **सर्वविद्यानां** वेदशास्त्रादीनां चतुःषष्टिकलाविद्यानामी**शानो** नियामकः। तथा **सर्वभूतानामखिलप्राणिनामीश्वरो** नियामकः। **ब्रह्माधिपतिर्**वेदस्याधिकत्वेन पालकः। तथा **ब्रह्मणो** हिरण्यगर्भस्याधिपतिः, तादृशो यो **ब्रह्माऽस्ति** प्रवृद्धः परमात्मा सोऽयं **मे** ममानुग्रहाय **शिवः** शान्तोऽस्तु। **सदाशिवो** स एव सदाशिव ओमहं भवामि ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि सप्तचत्वारिंशोऽनुवाकः ॥ ४७ ॥

अथाष्टचत्वारिंशोऽनुवाकः।

इत्थं तत्त्वज्ञानस्योत्पादकाः पञ्चवक्त्रप्रतिपादकाः पञ्च ब्रह्ममन्त्रा उक्ताः। अथ ज्ञानप्रतिबन्धकब्रह्महत्यादिपापनिवृत्तिहेतवस्त्रिसुपर्णनामका मन्त्रा वक्तव्याः, तत्र प्रथमं मन्त्रमाह—

ब्रह्ममेतु माम्। मधुमेतु माम्। ब्रह्ममेव मधुमेतु माम्।

१ क्ष. °नो नायक नि°।

यास्ते सोम प्रजा वत्सोऽभि सो अहम् । दुष्ष्व-
ग्रहन्दुरुष्षह । यास्ते सोम प्राणास्तान्जुहोमि, इति ।

ब्रह्मं परब्रह्मतत्त्वं मामेतु प्राप्नोतु । मधुं परमानन्दलक्षणमाधुर्योपेतं वस्तु मामेतु प्राप्नोतु । न चात्र ब्रह्ममधुशब्दयोरत्यन्तमर्थभेदः, किं तर्हि ब्रह्ममेव मधुं शब्दद्वयप्रतिपाद्यमखण्डैकरसं वस्तु मामेतु प्राप्नोतु । हे सोम, उमा ब्रह्मविद्या तया सह वर्तमान परमात्मंस्ते तव याः प्रजा देवमनुष्यादयः सन्ति ता अभिलक्ष्य सो अहं स तादृशस्त्वत्सेवकोऽहं वत्सो बाल एतासां त्वदीयप्रजानां मध्ये बालवदहं त्वदीयकरुणायोग्यः । अतो हे दुष्ष्वग्रहन्संसाररूपस्य दुःस्वप्नस्य घातक परमेश्वर दुरुष्षह दुःखमुत्कर्षेणाभिभव । वर्णविकारश्छान्दसः । हे सोम परमात्मंस्ते त्वदीयाः प्राणवृत्तयो याः सन्ति तान्वृत्तिप्राणांस्त्वयि जुहोमि प्रक्षिपामि मदीयमनोवागादयः प्राणास्त्वया निर्मितत्वात्त्वदीया अतस्त्वय्येवोपसंहरामि विषयेभ्य इन्द्रियाणि निरुध्य त्वदेकचित्तो भवामीत्यर्थः ॥

उक्तस्य त्रिसुपर्णमन्त्रस्य माहात्म्यं ब्राह्मणरूपेण वाक्येन दर्शयति—

त्रिसुपर्णमयार्चितं ब्राह्मणाय दद्यात् । ब्रह्महत्यां वा
एते घ्नन्ति । ये ब्राह्मणास्त्रिसुपर्णं पठन्ति । ते सोमं
प्राप्नुवन्ति । आसहस्रात्पङ्क्तिं पुनन्ति । ओम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्यष्टचत्वारिंशोऽनुवाकः ॥ ४८ ॥

विद्यान्तराणि सर्वाणि "नापृष्टः कस्यचिद्ब्रूयात्" इतिशास्त्रमनुसृत्य शिष्येण याच्ञायां कृतायां पश्चादुपदिशन्ति । इमं तु त्रिसुपर्णमन्त्रं शिष्ययाच्ञामन्तरेणैव ब्राह्मणायोपदिशेत् । तेनोपदेशेन ये ब्राह्मणास्त्रिसुपर्णं पठन्ति त्रिसुपर्णमन्त्रं सर्वदा जपन्ति, एते पुरुषा ब्रह्महत्यां विनाशयन्ति । ततस्ते निष्पापाः सन्तः सोमयागं प्राप्नुवन्ति । ते यस्यां ब्राह्मणपङ्क्तौ भोजनार्थमुपविशन्ति तां पङ्क्तिं सहस्रब्राह्मणपर्यन्तां पुनन्ति शुद्धां कुर्वन्ति । तस्मादों प्रणवप्रतिपाद्यः परमात्मैव त्रिसुपर्णमन्त्रस्य देवतेत्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषद्यष्टचत्वारिंशोऽनुवाकः ॥ ४८ ॥

==========

१ ख. ङ. ब्रह्म । २ ख. ङ. मधु । ३ ख. ङ. मधु । ४ ङ. ततो । ५ ङ. °दीया म° ।

अथैकोनपञ्चाशत्तमोऽनुवाकः ।

द्वितीयं त्रिसुपर्णमन्त्रमाह—

ब्रह्म मेधया । मधु मेधया । ब्रह्ममेव मधु मेधया । अद्या नो देव सवितः प्रजावत्सावीः सौभगम् । परा दुष्ष्वप्न्यꣳ सुव । विश्वानि देव सवितर्दुरितानि परा सुव । यद्भद्रं तन्म आसुव । मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः । मधु नक्तमुतोषसि मधुमत्पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः , इति ।

यद्ब्रह्म जगत्कारणं सर्ववेदान्तवेद्यं तन्मेधया गुरूपदिष्टमहावाक्यतदर्थधारणशक्त्या लभ्यतामिति शेषः । मध्वित्यादि पूर्ववत् । अद्या नो देवेत्यादिकमृक्पञ्चकमणोरणीयानित्यनुवाके व्याख्यातम् ।

अस्य त्रिसुपर्णमन्त्रस्य महिमानं दर्शयति—

य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् । भ्रूणहत्यां वा एते घ्नन्ति । ये ब्राह्मणात्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति । आसहस्रात्पङ्क्तिं पुनन्ति । ओम्, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्येकोनपञ्चाशत्तमोऽनुवाकः ॥ ४९ ॥

ब्राह्मणगर्भस्य राजगर्भस्य वा वधो भ्रूणहत्या । अन्यत्पूर्ववत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषद्येकोनपञ्चाशत्तमोऽनुवाकः ॥ ४९ ॥

=====

अथ पञ्चाशत्तमोऽनुवाकः ।

तृतीयं त्रिसुपर्णमन्त्रमाह—

ब्रह्म मेधवा । मधु मेधवा । ब्रह्ममेव मधु मेधवा ।

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम्। श्येनो गृध्राणाꣳस्वधितिर्वनानाꣳसोमः पवित्रमत्येति रेभन्। हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्, इति।

मेधवा मेधो यज्ञः सोऽस्यास्तीति मेधवत्। यज्ञदानादिसाध्यविविदिषापूर्वकत्वाद्ब्रह्मज्ञानलाभस्य ब्रह्म मेधवदित्युच्यते। अन्यत्पूर्ववत्। "ब्रह्मा देवानां" "हꣳसः शुचिषत्" इत्यादिके द्वे ऋचावणोरणीयानित्यनुवाके व्याख्याते।

अस्य त्रिसुपर्णमन्त्रस्य महिमानं दर्शयति—

य इदं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात्। वीरहत्यां वा एते घ्नन्ति। ये ब्राह्मणास्त्रिसुपर्णं पठन्ति। ते सोमं प्राप्नुवन्ति। आसहस्रात्पङ्क्तिं पुनन्ति। ओम्, इति।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि पञ्चाशत्तमोऽनुवाकः॥ ९०॥

वेदशास्त्रतदनुष्ठानपरो ब्राह्मणोऽभिषिक्तो राजा वा वीरः। अन्यत्पूर्ववत्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि पञ्चाशत्तमोऽनुवाकः॥ ९०॥

=====

अथैकपञ्चाशत्तमोऽनुवाकः।

ब्रह्मज्ञानप्रतिबन्धकानि यानि महापातकानि तन्निवृत्तये जप्यास्त्रिसुपर्णमन्त्रास्त्रयोऽभिहिताः। तत्र ब्राह्मणजातिमात्रवधो ब्रह्महत्या पञ्चसु महापातकेषु मध्ये प्रबलं महापातकम्। ततोऽप्यधिकं भ्रूणहननम्। तस्मादप्यधिकं वीरहननम्। ईदृशानामपि निवर्तको यावज्जीवं त्रिसुपर्णजपस्तत्रार्वाचीनानां सुरापानादिपातकानां निवर्तक इति किमु वक्तव्यम्। इत्थं प्रतिबन्धनिवृत्त्युपायमुक्त्वा ज्ञानयोग्यतायै स्वावयवशुद्ध्यर्थं होमार्थानेकादश मन्त्रानेकादशस्वनुवाकेषु क्रमेण विवक्षुराद्यं मन्त्रमाह—

प्राणापानव्यानोदानसमाना मे शुध्यन्तां ज्योति-

---

१ क. वृत्त्यपेक्षया त्रित्व°।

रहं विरजा विपाप्मा भूयासꣳ स्वाहा, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्येकपञ्चाशत्तमोऽनुवाकः ॥ ९१ ॥

प्राणादयः पञ्च वायवः प्रसिद्धाः । ते सर्वेऽप्यनेनाऽऽज्यहोमेन शुद्धा भवन्तु । ततोऽहं विपाप्मा प्रतिबन्धकोपपातकरहितो विरजाः पापकारणभूतरजोगुणेनापि रहितः सन्यज्ज्योतिर्जगत्कारणं परं ब्रह्म तद्भूस्तु भूयासं तदर्थमिदमाज्यं स्वाहुतमस्तु ॥

इति [illegible]चिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषद्येकपञ्चाशत्तमोऽनुवाकः ॥ ९१ ॥

अथ द्विपञ्चाशत्तमोऽनुवाकः ।

द्वितीयं मन्त्रमाह—

वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणरेतो बुद्ध्याकूतिः संकल्पा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि द्विपञ्चाशत्तमोऽनुवाकः ॥ ९२ ॥

वागादीनीन्द्रियाणि । रेतो गुह्येन्द्रियम् । मनःशब्दवाच्यस्यान्तःकरणस्यैव निश्चयात्मिका वृत्तिर्बुद्धिः । अनिश्चयरूपा वृत्तिराकूतिः । इदं समीचीनमितिकल्पनारूपा वृत्तिः संकल्पः । अन्यत्पूर्ववत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि द्विपञ्चाशत्तमोऽनुवाकः ॥ ९२ ॥

अथ त्रिपञ्चाशत्तमोऽनुवाकः ।

तृतीयं मन्त्रमाह—

शिरःपाणिपादपार्श्वपृष्ठोरूदरजङ्घाशिश्नोपस्थपायवो मे शुध्यन्तां

---

१ क. °कूतिसं° । २ ग. °यभूता वृ° ।

ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि त्रिपञ्चाशत्तमोऽनुवाकः ॥ ५३ ॥

पूर्वाभ्यामनुवाकाभ्यां सूक्ष्मशरीरशुद्धिरुक्ता । अत्र स्थूलशरीरावयवानां शिरःपाण्यादीनां शुद्धिरुच्यते । लिङ्गाण्डभेदविवक्षया शिश्नोपस्थशब्दौ द्वौ द्रष्टव्यौ । अन्यत्पूर्ववत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि त्रिपञ्चाशत्तमोऽनुवाकः ॥ ५३ ॥

अथ चतुष्पञ्चाशत्तमोऽनुवाकः ।

चतुर्थं मन्त्रमाह—

त्वक्चर्ममाꣳसरुधिरमेदोमज्जास्नायवोऽस्थीनि मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि चतुष्पञ्चाशत्तमोऽनुवाकः ॥ ५४ ॥

अत्र स्थूलशरीरगतानां धातूनां शुद्धिरुच्यते । एकस्यैव धातोर्बाह्यान्तर्भागविवक्षया त्वक्चर्मशब्दौ प्रयुक्तौ । अन्यत्पूर्ववत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि चतुष्पञ्चाशोऽनुवाकः ॥ ५४ ॥

अथ पञ्चपञ्चाशोऽनुवाकः ।

पञ्चमं मन्त्रमाह—

शब्दस्पर्शरूपरसगन्धा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि पञ्चपञ्चाशत्तमोऽनुवाकः ॥ ५५ ॥

१ ग. °रीरे स्थिता° २ ग. °रस्थिता° ।

शरीरोपादानपञ्चमहाभूतेष्वाकाशादिषु वर्तमाना गुणाः शब्दादयः । अन्यत्पूर्ववत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि पञ्चपञ्चाशत्तमोऽनुवाकः ॥ ९५ ॥

=====

अथ षट्पञ्चाशोऽनुवाकः ।

षष्ठं मन्त्रमाह—

पृथिव्यप्तेजोवायुराकाशा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि षट्पञ्चाशत्तमोऽनुवाकः ॥ ९६ ॥

शरीरस्योपादानकारणानि पञ्च महाभूतानि पृथिव्यादीनि । अन्यत्पूर्ववत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि षट्पञ्चाशत्तमोऽनुवाकः ॥ ९६ ॥

=====

अथ सप्तपञ्चाशत्तमोऽनुवाकः ।

सप्तमं मन्त्रमाह—

अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि सप्तपञ्चाशत्तमोऽनुवाकः ॥ ९७ ॥

अन्नमयादयः पञ्च कोशा वारुण्यामुपनिषद्युक्ताः । अन्यत्पूर्ववत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि सप्तपञ्चाशत्तमोऽनुवाकः ॥ ९७ ॥

=====

---

१ ख. ग. °मयमानन्दमयमात्मा मे ।

अथाष्टपञ्चाशत्तमोऽनुवाकः ।

अष्टमं मन्त्रमाह—

विविदृष्टये स्वाहा, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्यष्टपञ्चाशत्तमोऽनुवाकः ॥ ५८ ॥

" विष्लृ व्याप्तौ " इति धातोरुत्पन्नोऽयं शब्दः । विशेषेण विष्टिर्व्याप्तिर्यस्य ब्रह्मणस्तद्विविष्टिः । छान्दसः षकारस्य टकारः । तादृशं ब्रह्मोद्दिश्य स्वाहुतमिदमस्तु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषद्यष्टपञ्चाशत्तमोऽनुवाकः ॥ ५८ ॥

अथैकोनषष्टितमोऽनुवाकः ।

नवमं मन्त्रमाह—

कषोत्काय स्वाहा, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्येकोनषष्टितमोऽनुवाकः ॥ ५९ ॥

कष शिष करण इति धातुः । कष्यते क्रियत इति कषो नामरूपकर्मात्मकः कार्यप्रपञ्चः, तस्मिन्नुत्कस्तत्क(स्तं क)र्तुमुत्सुकः कषोत्कः परमेश्वरः, तादृशाय सृष्टयभिमुखाय परमेश्वराय स्वाहा स्वाहुतमिदमस्तु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषद्येकोनषष्टितमोऽनुवाकः ॥ ५९ ॥

अथ षष्टितमोऽनुवाकः ।

दशमं मन्त्रमाह—

उत्तिष्ठ पुरुष हरितं लोहित पिङ्गलाक्षि देहि देहि ददापयिता मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि षष्टितमोऽनुवाकः ॥ ६० ॥

१ ग. °त पिङ्गललोहिताक्षि ।

विविष्टिशब्दाभिधेयं यद्ब्रह्म तदेव कारणोपाधिकं कषोत्कशब्दाभिधेयम् । पुनरपि बहिःशरीरोपाधिविशिष्टमत्र पुरुषशब्दाभिधेयम् । तत्र पूर्वाभ्यां मन्त्राभ्यां निरुपाधिकं कारणोपाधिकं तद्ब्रह्म प्रार्थ्य शुद्धिहेतुत्वेनात्र सर्वकर्मनिष्पादकबहिःशरीरोपाधिकं प्रार्थ्यते । पुरुष पुरि बहिःशरीरे शयान हे परमात्मन्भक्तिस्थैर्यौदासीन्यं पारित्यज्य मदनुग्रहार्थमुद्युक्तो भव । संबुद्ध्यन्तपुरुषशब्दस्यैव हरितादीनि त्रीणि पदानि विशेषणानि । हे हरित प्रति-बन्धकहरणकुशल हे लोहित रक्तवर्ण हे पिङ्गलाक्षि पिङ्गलनयन देहि देहि पुनः पुनः शुद्धिं मे प्रयच्छ । ददापयिताऽऽचार्यमुखात्तत्त्वज्ञानस्यातिशयेन दापयिता भवेति शेषः । तस्य दापयितव्यस्य ज्ञानस्योत्पत्तये मे मदीयाश्चित्तवृत्तयः शुध्यन्ताम् । ज्योतिरित्यादि पूर्ववत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि षष्टितमोऽनुवाकः ॥ ६० ॥

अथैकषष्टितमोऽनुवाकः ।

एकादशं मन्त्रमाह—

ॐ *स्वाहेति, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्येकषष्टितमोऽनुवाकः ॥ ६१ ॥

ओं प्रणवप्रतिपाद्यं वस्तु भवामि तदर्थमिदं स्वाहुतमस्तु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषद्येकषष्टितमोऽनुवाकः ॥ ६१ ॥

अथ द्विषष्टितमोऽनुवाकः ।

ज्ञानप्रतिबन्धकमहापातकोपपातकपरिहारेण ज्ञानयोग्यतालक्षणां शुद्धिमुक्त्वा योग्यस्य पुरुषस्यापेक्षितेषु ज्ञानसाधनेषु संन्यासस्य निरतिशयोत्कर्षं वक्तुं सत्यादीन्येकादशोत्कृष्टसाधनानि प्रतियोगित्वेन वक्तव्यानि । तत्र प्रथमं साधनमुपन्यस्यति—

सत्यं परं परꣳ सत्यꣳ सत्येन न सुवर्गाल्लोकात्प्रच्यवन्ते

* अनिश्चितस्वरकमिदम् ।

१ ग. घ. प्राप्त्यर्थं शु° । २ म °त्यज्ञ म° । ३ ख. ग. °तस्य ।

कदाचन सताꣳ हि सत्यं तस्मात्सत्ये रमन्ते— , इति ।

यद्वस्तु प्रमाणेन यथा दृष्टं तस्य तथैवाभिवदनं **सत्यं** तच्च **परं** पुरुषार्थसाधनेषूत्कृष्टम् । तत्राऽऽदरार्थं **परं सत्यमिति** पुनर्वचनम् । यद्वा परं ब्रह्म सत्यमबाध्यं तद्बाध्यार्थवचनमपि बाधरहितमिति व्यावहारिकबाधराहित्येनोत्कर्षं विवक्षित्वा दृष्टान्तेन **परं सत्यमित्युक्तम्** । **सत्येन** यावज्जीवं यथार्थकथनेन **स्वर्गलोकात्कदाचिदपि न प्रच्यवन्ते** । अनृतवादिनस्तु केनचित्पुण्येन स्वर्गं प्राप्याप्यनृतवदनदोषेण कर्मफलं संपूर्णतयाऽननुभूयैव स्वर्गात्प्रच्यवन्ते । किंच हि यस्मात्कारणात्**सतां** सन्मार्गवर्तिनामृष्यादीनां संबन्धि यथार्थवादित्वं **तस्मात्**कारणात्सतामिदमिति व्युत्पत्तिमाश्रित्य सत्यवादित्वमेव परमं मोक्षसाधनमिति केचिन्महान्तो वदन्तस्तस्मिन्नेव **सत्ये रमन्ते** क्रीडन्ति ।

एकं मतमुक्त्वा द्वितीयं मतमाह—

तप इति तपो नानशनात्परं यद्धि परं तपस्तदु-
र्धर्षं तदुराधर्षं तस्मात्तपसि रमन्ते— , इति ।

तपः परं मोक्षसाधनमिति केषांचिन्मतम् । तीर्थयात्राजपहोमादीनि यद्यपि बहूनि तपांसि सन्ति तथाऽपि तेषु सर्वेष्व*नशनादुपवासैकभक्तादिरूपादशनवर्जनात्**परमुत्कृष्टं तपो नास्ति** । यद्धचनशनरूपं कृच्छ्रचान्द्रायणादिकं **परं तपोऽस्ति** तद्दुर्धर्षं धर्षितुं सोढुमशक्यम् । अत एवाऽऽ समन्तात्सर्वेषां प्राणिनां तत्तपो दुर्धर्षं दुःशकमित्यनुभूयते । **तस्मात्**करणात्केचन श्रद्धालवः कृच्छ्रचान्द्रायणादिके **तपसि रमन्ते** ।

तृतीयं मतमाह—

दम इति नियतं ब्रह्मचारिणस्तस्माद्दमे रमन्ते— , इति ।

वाक्चक्षुरादीन्द्रियाणां बाह्यानां निषिद्धेभ्यो विषयेभ्यो निवृत्तिर्दमः, स एवोत्तमो मोक्षहेतुरिति +मन्यमाना नैष्ठिक[1]ब्रह्मचारिणो **नियतं** सर्वदा वदन्ति । **तस्माद्दमे रमन्ते** ।

चतुर्थं मतमाह—

शम इत्यरण्ये मुनयस्तस्माच्छमे रमन्ते— , इति ।

अन्तःकरणस्य क्रोधादिदोषराहित्यं शमः, स एवोत्तमो मोक्षहेतुरित्यरण्ये वर्तमाना **मुनयो** वानप्रस्था मन्यन्ते । **तस्मात्ते शमे रमन्ते** ।

---

* अत्र सकलादर्शपुस्तकेष्वनशनमित्येव पाठः । + मन्यमाना इत्यधिकम् । यद्वा मन्यमाना इति परित्यज्य वदन्तीत्यस्य स्थाने मन्यन्त इति पाठ्यम् ।

---

१ ख. °ष्ठिका ब्र° ।

पञ्चमं मतमाह—

दानमिति सर्वाणि भूतानि प्रशꣳसन्ति
दानान्नातिदुष्करं तस्माद्दाने रमन्ते—, इति ।

गोहिरण्यादीनां स्वकीयानां शास्त्रोक्तवर्त्मना स्व[स्व]त्वपरित्यागपुरःसरं परस्वत्वापादनं **दानं** तदेवोत्तमं मोक्षसाधनं मत्वा सर्वे प्राणिनः **प्रशंसन्ति** । **दानादतिशयितं दुष्करं नास्ति** । धनरक्षणार्थं प्राणानपि परित्यजतां पुरुषाणामुपलम्भात् । **तस्माद्गोभूम्यादिदाने रमन्ते** ।

षष्ठं मतमाह—

धर्म इति धर्मेण सर्वमिदं परिगृहीतं धर्मान्नातिदुश्चरं तस्माद्धर्मे रमन्ते— ,इति ।

स्मृतिपुराणप्रतिपाद्यो वापीकूपतडागादिनिर्माणरूपोऽत्र **धर्मो** विवक्षितः । स एवोत्तमो मोक्षहेतुरिति राजामात्यादयः प्रभवो मन्यन्ते । तडागादिरूपेण **धर्मेण सर्वमिदं** जगत्परिगृहीतम् । *सर्वेऽपि मनुष्यपश्वादयः स्नानपानादिना तुष्यन्ति । तादृशाद्धर्मादन्यदतिदुश्चरं **नास्ति** । **तस्मात्कारणाद्धर्मे रमन्ते** प्रभवः ।

सप्तमं मतमाह—

प्रजन इति भूयाꣳसस्तस्माद्भूयिष्ठाः प्रजायन्ते
तस्माद्भूयिष्ठाः प्रजनने रमन्ते—, इति ।

प्रजनः पुत्राद्युत्पादनं तस्यैवोत्त+मसाधनत्वं **भूयांसो**ऽतिबहवः प्राणिनो **मन्यन्ते** । धनिकैर्दरिद्रैः शिष्टैर्नेष्टैः पण्डितैश्च सर्वैरपि पुत्रोत्पादनायातिशयेन =प्रयत्यमानत्वात् । **तस्मादेकैकस्य** पुरुषस्य **भूयिष्ठा**[1] द्वित्राः पञ्चषा इत्येवं बहवोऽपत्यविशेषा उत्पद्यन्ते । **तस्मात्कारणाद्भूयिष्ठा** अतिबहवः प्राणिनः प्रजोत्पादने **रमन्ते** ।

अष्टमं मतमाह—

अग्नय इत्याह तस्मादग्नय आधातव्याः—, इति ।

---

* अस्य यत इत्यादिः । + मोक्षं प्रतीत्यार्थिकः शेषः । = प्रयात्यमानत्वादिति पाठ्यम् । ह्रस्वपाठस्तु प्रामादिकः । वाक्यस्यासाधुत्वापत्तेः । धनिकादीनां सर्वेषामित्यार्थिकोऽध्याहारः । तथा च येऽन्यान्प्रयोजयन्ति ते स्वयं कुर्वन्तीति किमु वक्तव्यम् । तेषां च पुत्राद्युत्पादनस्य मुख्यसाधनत्वग्रहाभावे स्वयं तत्प्रयत्नं न कुर्युः परैश्च तं न कारयेयुः । तस्मात्पूर्वोक्तो ग्रहोऽस्त्येव तेषामित्याशयः । प्रयत्नस्याऽऽदृतत्वादिति वा पाठः कल्पनीयः । धनिकादिपदेषु षट्सु षष्ठ्यन्ततां प्रकल्प्य ख. पुस्तकस्थः प्रयतमानत्वादिति शोधितपाठ एव वा स्वीकार्यः ।

---

१ ग. स्वत्वोपा(त्पा)द्° । २ ख. °यत्न(त)मा° । ३ ग. °ष्ठा भूरिशो द्वि° । ङ. °ष्ठा भूरिशः प° ।

अग्नयो गार्हपत्यादय उत्तमा मुक्तिहेतव इति कश्चिद्वेदार्थपर आह । तस्माद्गृहस्थैरग्नय आधातव्या भवन्ति ।

नवमं मतमाह—

अग्निहोत्रमित्याह तस्मादग्निहोत्रे रमन्ते—, इति ।

आहितेष्वग्निषु सायं प्रातश्चानुष्ठेयो होमोऽग्निहोत्रं तदुत्तमं मोक्षसाधनमित्यपरः कश्चिद्वेदार्थपर आह । तस्मात्केचिदग्निहोत्रे रमन्ते ।

दशमं मतमाह—

यज्ञ इति यज्ञेन हि देवा दिवं
गतास्तस्माद्यज्ञे रमन्ते—, इति ।

दर्शपूर्णमासज्योतिष्टोमादिको यज्ञ उत्तमो मोक्षहेतुरित्यपरे वेदार्थपरा मन्यन्ते यस्मादिदानीं वर्तमाना देवाः पूर्वानुष्ठितेन यज्ञेन दिवं गताः स्वर्गलोकं प्राप्ताः, तस्मात्कारणात्केचन वैदिका विद्वांसो यज्ञे रमन्ते ।

एकादशं मतमाह—

मानसमिति विद्वांसस्तस्माद्विद्वांस एव मानसे रमन्ते—, इति ।

मनसैव निष्पाद्यमुपासनं मानसं तदेवोत्तमं साधनमिति विद्वांसः सगुणब्रह्मविदो मन्यन्ते । तस्मात्कारणात्केचन विद्वांसो वेदगैतोपास्तिभागतात्पर्यविदो मानस एवोपासने रमन्ते ।

द्वादशं मतमाह—

न्यास इति ब्रह्मा ब्रह्मा हि परः परो
हि ब्रह्मा तानि वा एतान्यवराणि
तपांस्यसि न्यास एवात्यरेचयत्—, इति ।

पूर्वकाण्डोक्तानामग्निहोत्रादिकर्मणामारुणिजाबालाद्युपनिषदुक्तप्रकारेण परित्यागो न्यासः, स एवोत्तमो मोक्षहेतुरिति ब्रह्मा हिरण्यगर्भो मन्यते । स च ब्रह्मा परो हि परमात्मरूपो हि । नतु पूर्वोक्तमतानुसारिण इव जीवः । यद्यप्यसौ हिरण्यगर्भो देहधारी तथाऽपि परो हि परमात्मैव ब्रह्मा हिरण्यगर्भ इति वक्तुं शक्यते, तस्यापि तत्त्वेन तत्समानज्ञानत्वात् । अत एव श्वेताश्वतरा आमनन्ति—"यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति । यानि पूर्वोक्तसत्यादीनि मानसान्तानि तान्येतानि तपांसि भवन्त्येव तथाऽपि संन्यासमपेक्ष्यावराणि निकृष्टानि ।

---

१ ग. °स्तपौर्व° । २ ग. झ. °मर्षोपा° । ३ स. परा४सि ।

संन्यास एक एव सर्वाण्यत्यरेचयत्, अतिक्रान्तवान् । उत्तमत्वतारतम्यं तत्र विश्रान्तमित्यर्थः ।

उक्तमुत्तमसाधनमुपसंहरति—

य एवं वेदेत्युपनिषत् , इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि द्विषष्टितमोऽनुवाकः ॥ ६२ ॥

यः पुमानेवमुक्तप्रकारेण संन्यासस्यान्येभ्यः सर्वेभ्यः साधनेभ्य उत्तमत्वं वेद तस्य विदुष इत्युक्ता विद्योपनिषद्रहस्यभूता भवति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तार्थाख्यायिक्यामुपनिषदि द्विषष्टितमोऽनुवाकः ॥ ६२ ॥

अथ त्रिषष्टितमोऽनुवाकः ।

पूर्वोक्तं मोक्षसाधनसमूहमुपपादयितुमाख्यायिकामाह—

प्राजापत्यो हाऽऽरुणिः सुपर्णेयः प्रजापतिं पितरमुपससार किं भगवन्तः परमं वदन्तीति तस्मै प्रोवाच—, इति ।

प्रजापतेः पुत्रः प्राजापत्यः, स चाऽऽरुणिनामकः । स एव सुपर्णाख्यायाः *स्त्रिया अपत्यत्वात्सुपर्णेय इत्युच्यते । तादृशः पुरुषः स्वकीयं पितरं प्रजापतिमुपससार । उत्तमसाधनजिज्ञासयोपसन्नवान् । उपसद्य चैवं पप्रच्छ । हे प्रजापते भगवन्तः पूज्या महर्षयो मोक्षसाधनेषु किं साधनं परममुत्कृष्टं वदन्ति । एवं पृष्टः प्रजापतिस्तस्मा आरुणये प्रोवाच ।

तदुक्तेषु साधनेषु प्रथमं दर्शयति—

सत्येन वायुरावाति सत्येनाऽऽदित्यो रोचते दिवि सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं तस्मात्सत्यं परमं वदन्ति—, इति ।

योऽयं वायुरिदानीमन्तरिक्षे वाति सोऽयं पूर्वजन्मनि मनुष्यः सन्सत्यवादित्वं परिपाल्य तेन सत्येन वायुदेवतात्वं प्राप्येदानीं लोकानुग्रहायान्तरिक्षे वाति । तथैवाऽऽदित्योऽपि पूर्वजन्मानुष्ठितेन सत्येन दिवि रोचते द्युलोके प्रकाशते । यदेत-

---

*अत्र सकलादर्शपुस्तकेषु स्त्रियोऽपत्यत्वादिति पाठः । स तु लेखकप्रमादमात्रमूलक इति ज्ञेयम् ।

त्सत्यं तदेतद्वाचो वागिन्द्रियस्य प्रतिष्ठा स्थिरावस्थानम्। अनृतं तु वाचोक्तमपि परैर्निराक्रियत इति न वाचः प्रतिष्ठा। तथा सति लोके सत्ये भाषणे सर्वं प्रामाणिकव्यवहारजातं प्रतिष्ठितं तस्मात्कारणात्सत्यमेव परमं साधनमित्येवं केचिदनुष्ठातारो वदन्ति।

तत्राऽऽरुणेर्मुखविकासराहित्यलक्षणमपरितोषं दृष्ट्वा द्वितीयं साधनमाह—

तपसा देवा देवतामग्र आयन्तपसर्षयः सुवरन्वविन्दन्तपसा सपत्नान्प्रणुदामारातीस्तपसि सर्वं प्रतिष्ठितं तस्मात्तपः परमं वदन्ति—, इति।

इदानीं स्वर्गे वर्तमाना अग्नीन्द्रादयो देवा अग्रे पूर्वजन्मन्यनुष्ठितेनाशनपरित्यागरूपेण कृच्छ्रचान्द्रायणादितपसा देवतामायन्निदानींतनं देवतात्वं प्राप्ताः। तथा वसिष्ठादयो महर्षयः पूर्वानुष्ठितेन तपसा सुवरन्वविन्दन्स्वर्गलोकमनुक्रमणे लब्धवन्तः। तथा वयमपीदानीमभिचाररूपेण तपसा सपत्नाञ्शत्रूनरातीरस्मदीयद्रव्यलाभविरोधिनः पुरुषानपि प्रणुदाम निराकुर्मः। अन्यदपि सर्वं फलजातं तपसि प्रतिष्ठितम्। तस्मादनशनरूपं तपः परमं मोक्षसाधनमिति केचिद्वदन्ति।

अत्रापि पूर्ववदपरितोषं दृष्ट्वा तृतीयं साधनमाह—

दमेन दान्ताः किल्बिषमवधून्वन्ति दमेन ब्रह्मचारिणः सुवरगच्छन्दमो भूतानां दुराधर्षं दमे सर्वं प्रतिष्ठितं तस्माद्दमः परमं वदन्ति—, इति।

दान्ता बाह्येन्द्रियनियमयुक्ताः पुरुषास्तेन दमेन स्वकीयं पापं विनाशयन्ति। तथा नैष्ठिकब्रह्मचारिणो दमेन स्वर्गमगच्छन्। स च दमो भूतानां प्राणिनां दुराधर्षमाधर्षितुं सर्वतः सोऽडुं दुःशकः। तस्मिंश्च दमे सर्वमपेक्षितं फलं प्रतिष्ठितम्। तस्मात्कारणाद्दमः परमं मुक्तिसाधनमिति केचिद्वदन्ति। अत्र सर्वत्र पूर्वसाधने परितोषराहित्यादुत्तरसाधनोक्तिर्द्रष्टव्या।

चतुर्थं साधनमाह—

शमेन शान्ताः शिवमाचरन्ति शमेन नाकं मुनयोऽन्वविन्दञ्छमो भूतानां दुराधर्षः शमे

---

१ ख. सत्यभाषणोक्तं स°। २ ग. °र्मः। तस्मिंस्तपसि सर्वमपेक्षितं फलं प्रति°। ३ ख. °त्र पूर्वत्र सा°। ४ ख. म. शमे।

सर्वं प्रतिष्ठितं तस्माच्छमः परमं वदन्ति—, इति।

शान्ता अन्तःकरणक्रोधादिरहिताः पुरुषास्तेन शमेन शिवं मङ्गलं पुरुषार्थमाचरन्ति। नारदाद्या मुनयः शमेन स्वर्गमलभन्त। अन्यत्पूर्ववत्।

पञ्चमं साधनमाह—

दानं यज्ञानां वरूथं दक्षिणा लोके दातारꣳ सर्वभूतान्युपजीवन्ति दानेनारातीरपानुदन्त दानेन द्विषन्तो मित्रा भवन्ति दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदन्ति—, इति।

गोहिरण्यादिदानं यज्ञानां संबन्धिनी दक्षिणा भवति, तस्माद्वरूथं श्रेष्ठम्। लोकेऽपि दातारं पुरुषं वेदशास्त्रविदो मूढाश्च सर्वेऽपि पुरुषा उपजीवन्ति। तथा योद्धॄणां भटानां धनदानेनारातीः शत्रूनपानुदन्त राजानो निराकृतवन्तः। ये तु प्रबला द्विषन्तस्तेऽपि दानेन तुष्टा मित्राणि भवन्ति। अन्यत्पूर्ववत्।

षष्ठं साधनमाह—

धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति धर्मेण पापमपनुदति धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदन्ति—, इति।

तडागप्रपादिनिर्माणरूपो धर्मो विश्वस्य जगतः सर्वस्य प्राणिजातस्य प्रतिष्ठाऽऽश्रय इत्येतत्प्रसिद्धम्। तथा लोके धर्मिष्ठमतिशयेन धर्मे वर्तमानं पुरुषं प्रजाः सर्वा उपसर्पन्ति धर्माधर्मनिर्णयार्थमुपगच्छन्ति। किंच प्रायश्चित्तरूपेण धर्मेण पापं विनाशयन्ति। अन्यत्पूर्ववत्।

सप्तमं साधनमाह—

प्रजननं वै प्रतिष्ठा लोके साधु प्रजायास्तन्तुं तन्वानः पितृणामनृणो भवति तदेव तस्यानृणं तस्मात्प्रजननं परमं वदन्ति—, इति।

प्रजननं पुत्रोत्पादनं यदस्ति तदेव गृहस्थानां प्रतिष्ठा पुत्रस्य गृहकृत्यनिर्वाहकत्वात्। "सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा" इति श्रुतेः। किंच प्रजायाः पुत्रपौत्रादिरूपायास्तन्तुं परम्परां साधु तन्वानः शास्त्रीयमार्गो यथा भवति

---

१ ख. ग. मित्रा। २ ग. °दन्ति ध°। ३ ङ. पितृणा°। ४ ग. तस्य। ङ. तस्यानृ°।

तथा विस्तारयन्पितॄणां मृतानां पितृपितामहादीनामनृणो भवति तदीयमृणं पुत्रिणा प्रत्यर्पितं भवति । यत्प्रजननं तदेवं तस्य पुत्रिण ऋणापाकरणहेतुः । अन्यत्पूर्ववत् ।

अष्टमं साधनमाह—

अग्नयो वै त्रयीविद्या देवयानः पन्था गार्हपत्य ऋक्पृथिवी रथंतरमन्वाहार्यपचनं यजुरन्तरिक्षं वामदेव्यमाहवनीयः साम सुवर्गो लोको बृहत्तस्मादग्नीन्परमं वदन्ति— , इति ।

गार्हपत्यो दक्षिणाग्निराहवनीय इति येऽग्नयः सन्ति त एव त्रयीविद्या वेदत्रयात्मिका वेदत्रयोक्तकर्मसाधनत्वाद्वेदविहितत्वाच्च देवयानो यागद्वारेण देवत्वप्रापको मार्गश्च । किंच तेषामग्नीनां मध्ये गार्हपत्योऽग्निर्ऋग्वेदात्मकः पृथिवीलोकस्वरूपो रथंतरसामात्मकश्चेति प्रशस्यते । अन्वाहार्यपचनो दक्षिणाग्निर्यजुर्वेदान्तरिक्षलोकवामदेव्यसामात्मकः । आहवनीयाग्निस्तु सामवेदस्वर्गलोकबृहत्सामात्मकः । अन्यत्पूर्ववत् ।

नवमं साधनमाह—

अग्निहोत्रꣳ सायं प्रातर्गृहाणां निष्कृतिः स्विष्टꣳ सुहुत यज्ञक्रतूनां प्रायणꣳ सुवर्गस्य लोकस्य ज्योतिस्तस्मादग्निहोत्रं परमं वदन्ति— , इति ।

सायं प्रातश्चानुष्ठितमग्निहोत्रं गृहाणां निष्कृतिः क्रयसाधनं मूल्यम् , अग्निहोत्राभावे क्षुधितोऽग्निर्गृहान्दहेत् । किंचाग्निहोत्रं स्विष्टं शोभनयागरूपं सुहुतं शोभनहोमरूपम् । देवतामुद्दिश्य द्रव्यत्यागो यागः । तस्य द्रव्यस्याग्नौ प्रक्षेपो होमः । किंच तद्यज्ञक्रतूनां प्रायणं प्रारम्भः । अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणं चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञाः । क्रतुशब्दो यूपवस्सु सोमयागेषु रूढः । अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्यामश्चेति सप्त सोमसंस्थाः क्रतवः । तेषां सर्वेषां यज्ञक्रतूनां प्रारम्भकमग्निहोत्रम् । अत एव स्वर्गस्य लोकस्य ज्योतिः प्रकाशकम् । अन्यत्पूर्ववत् ।

दशमं साधनमाह—

यज्ञ इति यज्ञेन हि देवा दिवं गता यज्ञेनासुरानपानुदन्त यज्ञेनं द्विषन्तो मित्रा भवन्ति यज्ञे

---

१ ग. झ. °न्पतृ° । २ ख. ग. °चनी य° । ३ ग. झ. °ईपीर्ण° ।

सर्वं प्रतिष्ठितं तस्माद्यज्ञं परमं वदन्ति— , इति ।

यज्ञ उत्तमं साधनमिति केचिदाहुः । यज्ञो हि देवानां प्रियः । ते हि देवाः पूर्वानुष्ठितेन यज्ञेन स्वर्गं प्राप्ताः । किंच यज्ञेनैव तदा तदा देवा असुरान्विनाशितवन्तः । किंच सर्वकामप्राप्तिसाधनेन ज्योतिष्टोमेन द्वेषशान्तिकामस्य पूर्वं द्वेषं कुर्वन्तोऽपि शत्रवो मित्रा [मित्राणि] भवन्ति । अन्यत्पूर्ववत् ।

एकादशं साधनमाह—

मानसं वै प्राजापत्यं पवित्रं मानसेन मनसा साधु
पश्यति मानसा ऋषयः प्रजा असृजन्त मानसे
सर्वं प्रतिष्ठितं तस्मान्मानसं परमं वदन्ति— , इति ।

मनसा निष्पाद्यं मानसमुपासनं यदस्ति तदेव प्राजापत्यं प्रजापतिपदप्राप्तिसाधनम्, अत एव पवित्रं चित्तशुद्धिकारणम् । मानसेनोपासनेन युक्तं मनोऽन्तःकरणं यदस्ति तेनैकाग्रेण मनसा साधु पश्यति, अतीतानागतव्यवहितादिवस्तुजातं योगी सम्यक्साक्षात्करोति । एतच्च योगशास्त्रे पतञ्जलिना बहुधा प्रपञ्चितम् । मानसा एकाग्रमनोयुक्ता विश्वामित्रादय ऋषयः स्वसंकल्पमात्रेण बर्ह्याः प्रजा असृजन्त । अन्यत्पूर्ववत् ।

द्वादशं साधनमाह—

न्यास इत्याहुर्मनीषिणो ब्रह्माणम्— , इति ।

न्यास इत्युक्तो यो मोक्षहेतुः, तं ब्रह्माणं हिरण्यगर्भरूपं मनीषिणो बुद्धिमन्तो महर्षयः स्मृतिकर्तार आहुः । तथा च " संन्यासाद्ब्रह्मणः स्थानम् " इति स्मर्यते । हिरण्यगर्भप्राप्तेरन्तरङ्गसाधनत्वात्तद्रूपत्वम् ।

तमेव संन्यासं स्तोतुं तत्प्राप्यस्य हिरण्यगर्भस्य स्वरूपं प्रपञ्चयति—

ब्रह्मा विश्वः कतमः स्वयंभूः प्रजापतिः संवत्सर इति— , इति ।

यो ब्रह्मा हिरण्यगर्भः सोऽयं विश्वः सर्वजगदात्मकः । कतमोऽतिशयेन सुखस्वरूपः । स्वयंभूरुत्पादकाभ्यां मातापितृभ्यां विना स्वयमेवोत्पन्नः । प्रजापतिः प्रजानां पालकः । संवत्सरः कालात्मकः । इतिशब्दः प्रदर्शनार्थः । इत्यादिसर्वस्वरूपत्वमुन्नेयमित्यर्थः ।

पुनरपि संन्यासस्तुतये हिरण्यगर्भावयवस्य संवत्सरस्य माहात्म्यं दर्शयति—

संवत्सरोऽसावादित्यो य एष आदित्ये

---

१ ख. ङ. संन्यास । २ ग. स्वयंभुः । ३ ख. ग. °यंभुरु° ।

पुरुषः स परमेष्ठी ब्रह्माऽऽत्मा— , इति ।

योऽयं संवत्सरः काल उक्तः सोऽसावादित्यस्वरूप एव । आदित्यगत्यभ्या*सेन निष्पादित्वात् । य एष तस्मिन्नादित्यमण्डले पुरुषः स एव परमेष्ठी हिरण्यगर्भरूपः, आदित्यमण्डलद्वारेण हिरण्यगर्भस्य प्राप्यत्वात् । स च परमेष्ठी ब्रह्म सर्वजगत्कारणं वस्तु । तथैवाऽऽत्मा सर्वेषां प्रत्यगात्मभूतः ।

एवमादित्यादिद्वारा संवत्सरं प्रशस्य तमादित्यमण्डलद्वारेण सर्वव्यवहारहेतुतया प्रशंसति—

याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति पर्जन्येनौषधिवनस्पतयः प्रजायन्त ओषधिवनस्पतिभिरन्नं भवत्यन्नेन प्राणाः प्राणैर्बलं बलेन तपस्तपसा श्रद्धा श्रद्धया मेधा मेधया मनीषा मनीषया मनो मनसा शान्तिः शान्त्या चित्तं चित्तेन स्मृतिꣳ स्मृत्या स्मारꣳ स्मारेण विज्ञानं विज्ञानेनाऽऽत्मानं वेदयति तस्मादन्नं ददꣳस्सर्वाण्येतानि ददात्यन्नात्प्राणा भवन्ति भूतानां प्राणैर्मनो मनसश्च विज्ञानं विज्ञानादानन्दो ब्रह्म योनिः—,इति ।

अयमादित्यो याभिरुष्णस्वरूपाभी रश्मिभिस्तपति प्रभूतं संतापं करोति, ताभिस्तीव्ररश्मिभिर्भूमिगतं जलमादाय पर्जन्यो भूत्वा वर्षति । तेन च पर्जन्येन वृष्टिजनकेन व्रीह्याद्या ओषधयोऽश्वत्थपनसाद्या वनस्पतयश्च प्रकर्षेणोत्पद्यन्ते । ओषधिभिर्वनस्पतिभिश्च भोज्यमन्नं संपद्यते । तेन चान्नेन प्राणाः पोषिता भवन्ति । तैश्च पुष्टैः प्राणैः शरीरे बलं संपद्यते । तेन बलेन कृच्छ्रचान्द्रायणादिरूपं तपः संपद्यते । तेन च तपसा शुद्धचित्तस्य तत्त्वज्ञानविषया श्रद्धा जायते । तया च श्रद्धया पुरुषार्थैकाग्र्यचित्तस्य मेधा गुरूपदिष्टग्रन्थतदर्थधारणशक्तिरुत्पद्यते, तया च मेधया मनीषा तैत्त्वविषया बुद्धिरुत्पद्यते । तथा च मनीषया मनो निरन्तरं तत्त्वविषयं मननमुपजायते । तेन च मनसा मननेन कामक्रोधादिदोषस्यावसरामावाच्छान्तिरुपजायते । तया च शान्त्या विक्षेपरहितस्य चित्तं चेतनं तत्त्वविषयं प्रमाणजनितं ज्ञानमुपजायते तेन च चित्तेन ज्ञानेन निद्रादिव्यवहारव्यवधानेऽपि तत्त्वविषयां स्मृतिं प्राप्नोति । तया च निद्राद्यनन्तरभाविन्या स्मृत्या स्मारं निरन्तरं-

* अभ्यास आवृत्तिः ।

१ ग. °दत्त्वा° । २ ख. °रूपर° । ३ ग. घ. संपाद्यते । ४ ख. °या अ° । ५ ग. °या युक्तस्यै° । ६ ग. °रणाश° । ७ घ. तत्त्वविदुषी । ८ ख. °न क्रो° । ९ ख. °न्तरं स्मं°।

स्मरणं प्राप्नोति। तेन च स्मारेण विज्ञानं विजातीयप्रत्ययव्यवधानराहित्येन विशिष्टं संततं ज्ञानं प्राप्नोति। तेन च विज्ञानेन संततेनाऽऽत्मानं वेदयति। परमात्मानं सर्वदाऽनुभवति। यस्मादन्नस्योक्तप्राणबलादिपरम्परया परमात्मानुभवहेतुत्वं तस्मादीदृशमन्नं ददन्पुरुषः सर्वाण्येतानि प्राणादीन्यात्मानुभवान्तानि वस्तूनि ददाति। अन्नदानस्य सर्वदानरूपत्वं विस्पष्टयितुमुक्तमेवार्थं पुनरप्यन्नात्प्राणा भवन्तीत्यादिवाक्येन संक्षिप्योपन्यस्यते। प्राणादिपरम्परयोत्पन्नाद्विज्ञानादानन्दः परमानन्दरूपो भूत्वा ब्रह्म वेदान्तप्रतिपाद्यं योनिर्जगत्कारणम्। यद्वा ब्रह्मणो वेदस्य योनिः कारणं तादृग्रूपः स्वयं भवति।

यथोक्तं संन्यासमेव स्तोतुं तेन संन्यासेन प्राप्ततत्त्वज्ञानं पुरुषं प्रशंसति—

स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं प्रोतं
पृथिवी चान्तरिक्षं च द्यौश्च दिशश्चावान्तरदिशाश्च स वै
सर्वमिदं जगत्स स भूतꣳ स भव्यं जिज्ञासक्लृप्त ऋतजा
रयिष्ठाः श्रद्धा सत्यो *महस्वान्तमसोपरिष्टात्–, इति।

यः पुरुषः संन्यासपुरःसरं तत्त्वज्ञानं संपादयति स एवैष पुरुषः सर्वात्मकः सन्पञ्चधा पञ्चभिः प्रकारैः पञ्चात्मा पञ्चविधवस्तुस्वरूपो भवति। शब्दस्पर्शादिकं गुणपञ्चकं पृथिव्यादिकं भूतपञ्चकं चक्षुःश्रोत्रादिकं ज्ञानेन्द्रियपञ्चकं वाक्पाण्यादिकं कर्मेन्द्रियपञ्चकं प्राणापानादिकं वायुपञ्चकमेतावतां वस्तूनां स्वरूपभूत इत्यर्थः। यद्वा पञ्चभिरात्मभिर्युक्तः पञ्चधा वर्तते।

तथा च पुराणेऽभिहितम्—

"भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा भवान्।
आत्मा च परमात्मा च त्वमेकः पञ्चधा स्थितः" ॥ इति।

येन ब्रह्मस्वरूपेण पुरुषेण सर्वमिदं जगत्सूत्रे मणिगणा इव प्रोतं प्रकर्षेण स्यूतं व्याप्तमित्यर्थः। तदेव सर्वं पृथिवी चेत्यादिना प्रपञ्च्यते। स एव पृथिव्यादिवस्तुव्यापी पुरुषः सर्वमिदं वर्तमानं जगत्, तत्त्वदृष्ट्यौ व्यतिरेकेणाभावात्। तथा भूतमतीतं च जगत्स एव। भव्यं भविष्यदपि जगत्स एव। ननु तत्त्ववित्पुरुषो मूढवद्धस्तपादादियुक्तदेहरूप एव दृश्यते, न तु सर्वजगत्स्वरूप इति चेत्। मैवम्। यतोऽयं जिज्ञासक्लृप्तो जिज्ञासया वेदान्तविचारेण सर्वात्मकतया निश्चितो भवति। ऋतजा ऋतेन सत्येन प्रामाणिकेन ज्ञानेन सर्वात्मा जातः, जिज्ञासाकाले भ्रान्तिज्ञानरूपेषु पूर्व-

* १ ग. पुस्तके महस्वांस्तमसो वरिष्ठादिति पाठः।

१ ख. °वत्पुरु°। २ ख. 'दिशश्च। ३ ख. 'ष्ट्या तद्व्याप्ति°।

पक्षेषु निराकृतेषु प्रामाणिकेन सिद्धान्तज्ञानेन तादृशो ज्ञातो भवति । स च रयिष्ठा रयिर्धनं गुरूपदेशस्तत्रैव तिष्ठति । न तूपदेशरहितानां प्रतीयत इत्यर्थः । ईदृशस्वरूपविज्ञानस्य श्रद्धया लभ्यत्वादसौ श्रद्धारूपः । " श्रद्धावाल्लभते ज्ञानम् " इति स्मृतेः । सत्यमबाध्यं यद्ब्रह्म तत्स्वरूपत्वादयं सत्यः । महस्वांस्तेजस्वान्स्वयंप्रकाश इत्यर्थः । अत एव तमसा संसारकारणेनाज्ञानेन वियुक्तत्वादुपरिष्टाद्वर्तते ।

इत्थं संन्यासपूर्वकज्ञानयुक्तं पुरुषं प्रशस्य ज्ञानफलं दर्शयति—

ज्ञात्वा तमेवं मनसा हृदा च भूयो
न मृत्युमुपयाहि विद्वान्— , इति ।

हे, आरुणे त्वं तं परमात्मानं हृदा हृत्पुण्डरीकनियमितत्वाद्धृदयरूपेण मनसैवं पूर्वोक्तसंन्यासरूपसाधनप्रकारेण ज्ञात्वा विद्वांस्तेन ज्ञानेन युक्तः सन्भूयः पुनर्मृत्युं नोपयाहि मा प्राप्नुहि । ज्ञानिनो वर्तमानदेहपाते सति जन्माभावात्पुनर्मृत्युर्नास्तीत्यर्थः ।

बहुधा प्रशस्तं संन्यासमुपसंहरति—

तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः— , इति ।

यस्मात्परमपुरुषार्थस्यान्तरङ्गं साधनं तस्मादेषां सत्यादीनां तपसां मध्ये संन्यासमतिरिक्तमत्युत्कृष्टं साधनं मनीषिण आहुः ।

संन्यासादूर्ध्वं प्रणवेनाऽऽत्मनि समाधिर्विधेयः । तस्मिन्समाधौ विघ्नपरिहारार्थमादावन्तर्यामिणः सर्वकारणत्वेन स्तुतिं दर्शयति—

वसुरण्वो विभूरसि प्राणे त्वमसि संधाता ब्रह्मन्त्वमसि विश्वसृत्तेजोदास्त्वमस्यग्नेरसि वर्चोदास्त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चन्द्रमस उपयामगृहीतोऽसि ब्रह्मणे त्वा महसे— , इति ।

हे ब्रह्मन्नन्तर्यामिन्वसुरण्वो वसुनो वस्तुतत्त्वस्य रण्वो रमिता कथयिताऽस्मदनुग्रहार्थमुपदेष्टाऽसि । तथा विभूर्हिरण्यगर्भविराडादिविविधरूपेणोत्पन्नोऽसि प्राणे वायुरूपे जीवात्मनः संधाता संयोजयिता त्वमसि । विश्वं सरति प्राप्नोतीति विश्वसृत्सर्वजगद्व्यापी त्वमसि । भूलोकवर्तिनोऽग्नेस्तेजोदाः प्रकाशप्रदस्त्वमसि । द्युलोकवर्तिनः

---

१ ख. 'नेनेवृ° । २ ग. °शो भ° । ३ ङ. °ति । तदुप° । ४ ङ. °नां तथा न प्र° । ५ ग. श्रुतेः । ६ ङ. ग. °काशत इ° । ७ ङ. °रीकेण । °नि° । ८ ङ. °श्वसृक्तेजो° । ९ ख. °स्यग्नि° । १० ङ. °ग्नेर्वर्चो° । ११ ख. जीवात्मभिः । १२ ङ. °श्वसृत्सर्व° ।

सूर्यस्य वर्चोदाः प्रकाशप्रदस्त्वमसि । तथा **चन्द्रमसो द्युम्नोदाः** प्रकाशरूपधनप्रदस्त्वमसि । तथा यागेषु सोमरूपः सन्नुपयामेन[1] पार्थिवेन मृन्मयदारुमयपात्रेण गृहीतोऽसि । उपयामशब्दस्य पृथिवीपरत्वं षष्ठकाण्डे मन्त्रव्याख्याने समाम्नातम्—उपयामगृहीतोऽसीत्याहेयं वा उपयामः" इति । उक्तप्रकारं सर्वकर्तारमन्तर्यामिणं त्वा **महसे ब्रह्मणे** चैतन्यज्योतिःस्वरूपब्रह्मतत्त्वाभिव्यक्त्यर्थं भजामीति शेषः ।

अनेन[2] प्रकारेणान्तर्यामिणं स्तुत्वा परिहृतविघ्नस्य संन्यासिनः समाधिं विधत्ते—

ओमित्यात्मानं युञ्जीत—, इति ।

प्रिमात्रं[3] प्रणवमुच्चारयन्सर्ववेदान्तेषु निर्णीतं परमात्मानं स्वरूपत्वेन[4] चित्ते समादध्यात्[5] ।

समाधिसाधनमोंकारं प्रशंसति—

एतद्वै महोपनिषदं देवानां गुह्यम्—, इति ।

यत्प्रणवस्वरूपमस्त्येतदेव **महोपनिषदं** महत्यो बह्व्य उपनिषदः प्रतिपादिका यस्य परमात्मवाचकस्य प्रणवरूपस्य तन्महोपनिषदम् । अकारान्तत्वं छान्दसम् । "सर्वे वेदा यत्पदमामनन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्" इति प्रणवस्य सर्वोपनिषत्प्रतिपाद्यत्वं कठवल्लीषु श्रुतम् । तच्च प्रणवरूपं निर्गुणतत्त्वप्रतिपादकं **देवानामिन्द्रादीनां गुह्यं** गोप्यम् । ते हि शमदमाद्यधिकारसंपत्तिरहिताय प्रणवं नोपदिशन्ति ।

यथोक्तप्रणवसमाधिजनितस्य तत्त्ववेदनस्य फलं दर्शयति—

य एवं वेद ब्रह्मणो महिमानमा-
प्नोति तस्माद्ब्रह्मणो महिमानम्—, इति ।

यः पुमान्संन्यासादूर्ध्वं प्रणवेन ब्रह्मतत्त्वसमाधिं कुर्वन्नेवं वेदान्तमहावाक्योक्तप्रकारेण वेद ब्रह्मतत्त्वं जानाति, असौ ज्ञानी स्वस्मिन्नविद्याकल्पितं जीवत्वापादकं परिच्छेदमपहाय देशकालवस्तुपरिच्छेदशून्यस्य **ब्रह्मणो महिमानं** महत्त्वमाप्नोति । तत्त्ववेदनेन जीवत्वभ्रमो निवर्तते ब्रह्मत्वस्वभाव आविर्भवति ततो जीवन्मुक्तो भवतीत्यर्थः । तस्य जीवन्मुक्तस्य प्रारब्धभोगक्षयेण देहपाते सति तस्मात्कृत्स्नाविद्यानिवर्तकाद्वेदनादविद्यातत्कार्यवासनालेशरहितस्य मुख्यस्य **ब्रह्मणो महिमानं** प्राप्नोति । विदेहमुक्तिर्भवतीत्यर्थः ।

---

१ ख. °न मृन्मयेन मु° । २ ख. °णं च स्तु° । ३ ख. °मात्रप्र° । ४ ग. घ. चिद्रूपत्वेन । ५ ग. °त् । ६ मादिसा° । ६ ग. °ःकृतभ्र° । ७ ख. म. °र्यतद्वास° ।

संन्यासपुरःसरां तत्त्वविद्यामुपसंहरति—

इत्युपनिषत्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि त्रिषष्टितमोऽनुवाकः ॥ ६३ ॥

इत्येवमतीतेन ग्रन्थेन प्रोक्ता येयं विद्या सेयमुपनिषद्रहस्यविद्या ।

अथ मीमांसा । तत्र संन्यासरूपस्य चतुर्थाश्रमस्य सद्भावस्तृतीयाध्यायस्य चतुर्थपादे चिन्तितः—

"नास्त्यूर्ध्वरेताः किंवाऽस्ति नास्त्यसावविधानतः
वीरघ्नतो विधेः क्लृप्तावन्धषङ्ग्वादिगा स्मृतिः ॥
अस्त्यपूर्वविधेः क्लृप्तेर्वीरहाऽनग्निको गृही ।
अन्धादेः पृथगुक्तत्वात्स्वस्थानां श्रूयते विधिः ॥

पूर्वाधिकरणे स्वतन्त्रमात्मविज्ञानं कर्मनैरपेक्ष्येण पुरुषार्थसाधनमित्युक्तम् । तस्य चाऽऽत्मज्ञानस्योर्ध्वरेतःस्वाश्रमेषु सुलभत्वादाश्रमसद्भावश्चिन्त्यते । तत्र नास्त्यूर्ध्वरेता इति प्राप्तम् । कुतः विध्यभावात् । त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीय इत्यत्र यज्ञाद्युपलक्षितगार्हस्थ्यस्य तपःशब्दलक्षितवानप्रस्थत्वस्य नैष्ठिकब्रह्मचर्यस्य च परामर्शमात्रं गम्यते, न तु विधिरुपलभ्यते । न चापूर्वार्थत्वेन विधिः कल्पयितुं शक्यः । "वीरहा वा एष देवानां योऽग्निमुद्वासयते" इत्यग्न्युद्वासनलक्षणस्य गार्हस्थ्यपरित्यागस्य निन्दितत्वात् । चत्वार आश्रमा इति स्मृतिस्तु गार्हस्थ्यकर्मानधिकृतान्धपङ्ग्वादिविषया भविष्यति । न ह्यन्धस्याऽऽज्यावेक्षणत्वोपेते कर्मण्यधिकारोऽस्ति । नापि पङ्गोर्विष्णुक्रमणाद्युपेते कर्मण्यधिकारः । तस्माच्चक्षुरादिपाटवयुक्तस्याऽऽत्मज्ञानोपयुक्त ऊर्ध्वरेता आश्रमो नास्तीति प्राप्ते ब्रूमः । अस्त्यूर्ध्वरेता आश्रमः । विध्यश्रवणेऽप्यपूर्वार्थत्वेन कल्पयितुं शक्यत्वात् । न च वीरघ्नतदोषः । उत्सन्नाग्निकगृहिविषयत्वाद्वीरहत्यायाः । यत्त्वन्धादिविषयत्वं स्मृतेरुक्तं तदसत् । "अथ पुनरव्रती वा व्रती वा स्नातको वाऽस्नातको वोत्सन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेत्" इति विरक्तानां गार्हस्थ्यानधिकृतानां पृथक्संन्यासविधानात् । न च चक्षुरादिपाटववतामाश्रमान्तरविध्यभावः । जाबालश्रुतौ प्रत्यक्षविध्युपलम्भात् "ब्रह्मचर्यं समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेत्" इति । तस्मादस्त्याश्रमान्तरम्" ।

---

१ ग. °त्र न्या° । २ ग. घ्न. 'घातौ वि° । ३ ग. घ्न. °न्त्रवि° । ४ ग. घ्न. °न क° । ५ ख. °ति । तच्चेत्या° । ६ ख. °रो नास्ति । ७ ग. घ्न. °घातादिवो° । ८ ग. 'ग्निवि° । घ्न. °ग्निहोत्रवि° । ९ घ्न. घा ऽऽ° ।

तत्रैवान्यच्चिन्तितम्—

"लोककाम्याश्रमी ब्रह्मनिष्ठामर्हति वा नवा ।
यथावकाशं ब्रह्मैव ज्ञातुमर्हत्यवारणात् ॥
अनन्यचित्तता ब्रह्मनिष्ठाऽसौ कर्मठे[1] कथम् ।
कर्मत्यागी ततो ब्रह्मनिष्ठामर्हति नेतरः" ॥

त्रयो धर्मस्कन्धा इत्यत्राऽऽश्रमानधिकृत्य सर्व एते पुण्यलोका भवन्तीत्याश्रमानुष्ठायिनां पुण्यलोकफलमभिधाय ब्रह्मसंस्थोऽमृतत्वमेतीति मोक्षसाधनत्वेन ब्रह्मनिष्ठा प्रतिपाद्यते । सेयं ब्रह्मनिष्ठा पुण्यलोककामिन आश्रमिणोऽपि संभाव्यते । आश्रमकर्माण्यनुष्ठाय यथावकाशं ब्रह्मनिष्ठायाः कर्तुं शक्यत्वात् । नहि लोककामी ब्रह्म न जानीयादिति निषेधोऽस्ति । तस्मादस्ति सर्वस्याप्याश्रमिणो ब्रह्मनिष्ठेति प्राप्ते ब्रूमः । ब्रह्मनिष्ठा नाम सर्वव्यापारपरित्यागे सत्यनन्यचित्ततया ब्रह्मणि परिसमाप्तिः । न चासौ कर्मशूरे संभवति । कर्मानुष्ठानत्यागयोः परस्परविरोधात् । तस्मात्कर्मत्यागिन एव ब्रह्मनिष्ठेति स्थितम् । अस्मिन्नर्थे श्रुतिस्मृतिवाक्यानि संक्षिप्य प्रदर्श्यन्ते—

"त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमम् ।
त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदम् ॥
मुक्तेश्च बिभ्यतो देवा मोहेनापिदधुर्नरान् ।
ततस्ते कर्मसूद्युक्ताः प्रवर्तन्तेऽविचक्षणाः ॥
अतः संन्यस्य सर्वाणि कर्माण्यात्मावबोधतः ।
हत्वाऽविद्यां धियैवेयात्तद्विष्णोः परमं पदम्" ॥

इति भाल्लविशाखायामामनन्ति ।

"साशिखं वपनं कृत्वा बहिः सूत्रं त्यजेद्बुधः ।
यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेत् ॥
ज्ञानशिखिनो ज्ञाननिष्ठा ज्ञानयज्ञोपवीतिनः ।
ज्ञानमेव परं तेषां पवित्रं ज्ञानमुच्यते ॥
अग्नेरिव शिखा नान्या यस्य ज्ञानमयी शिखा ।
स शिखीत्युच्यते विद्वान्नेतरे केशधारिणः" [ब्रह्मोप०] ॥

इत्याथर्वणिका आमनन्ति ।

"कुटुम्बपुत्रदारांश्च वेदाङ्गानि च सर्वशः ।
यज्ञं यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिः" ॥

---

१ ग कर्मठे । २ ग. घ. दुःखं पु° ।

इति बाष्कलशाखायामामनन्ति । *सशिखान्केशान्निराकृत्य विसृज्य यज्ञोपवीतं भूः स्वाहेत्यप्सु जुहुयात् ।

"त्रिदण्डं कुण्डिकां शिक्यं त्रिविष्टब्धमुपानहौ ।
शीतोपघातिनीं कन्थां कौपीनस्य तु च्छादनम् ॥
पवित्रं स्नानशाटीं च उत्तरासङ्गमेव च ।
यज्ञोपवीतं वेदांश्च सर्वं तद्वर्जयेद्यतिः" ॥

इति संन्यासोपनिषद्यधीयते । "अथ परिव्राड्विवर्णवासा मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भवति" इति जाबाला आमनन्ति । "अथ परिव्राडेकशाटीपरिवृतो मुण्डोदरपात्र्यरण्यनित्यो भिक्षार्थी ग्रामं प्रविशेदासायं प्रदक्षिणेनाविचिकित्सन्सार्ववर्णिकं भैक्षचरणमभिशस्तपतितवर्जमयज्ञोपवीती शौचनिष्ठः काममेकं वैणवं दण्डमाददीत" इति मैत्रायणशाखायामभिहितम् । "कन्थाकौपीनोत्तरासङ्गादीनां त्यागिनो यथाजातरूपधरा निर्ग्रन्था निष्परिग्रहाः" इति संवर्तश्रुतिः । "गृहस्थो ब्रह्मचारी वानप्रस्थो वा लौकिकाग्नीनुदराग्नौ समारोपयेद्गायत्रीं च स्ववाचाऽग्नौ समारोपयेदुपवीतं भूमौ वाऽप्सु वा विसृजेत्" इत्यादिरारुणिश्रुतिः ॥

"यथोक्तान्यपि कर्माणि परिहाप्य द्विजोत्तमः ।
आत्मज्ञाने शमे च स्याद्वेदाभ्यासेन यत्नवान् ॥
एतद्द्विजन्मसाफल्यं ब्राह्मणस्य विशेषतः ।
प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा ॥
यदा तु विदितं तत्स्यात्परं ब्रह्म सनातनम् ।
तदैकदण्डं संगृह्य उपवीतं शिखां त्यजेत्" ॥

इत्यादयः स्मृतय उदाहार्याः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि त्रिषष्टितमोऽनुवाकः ॥ ६३ ॥

* एतदादि जुहुयादित्यन्तं संन्यासोपनिषदि नोपलभ्यते । अनन्तरोक्तौ श्लोकद्वयं तु किंचिद्भिन्नानुपूर्वीकं वर्तते ।

१ ग. ङ. °शाखीया आम° । २ ङ. °ञ्जिकृत्य वि° । ३ ग. ङ. °पीनाच्छादनं तथा । प° । ४ ग. ङ. टीश्च उ° । ५ ख. °ति कक्षा अधी° । ६ ख. °रितो । ७ ख. ग. °शस्तं प° । ८ ङ. °यणीशा° । ९ ख. °भिधीयते । क° । १० ख. ङ. °दिर्वारुणी श्रु° । ११ ग. ङ. तत्त्वं परं ।

अथ चतुःषष्टितमोऽनुवाकः।

संन्यासस्यैव ब्रह्मज्ञानं प्रत्यन्तरङ्गसाधनत्वाज्जिज्ञासोः संन्यास एव युक्तो न तु कर्मानुष्ठानमित्युक्तम्। तर्हि निष्पन्ने तत्त्वसाक्षात्कारे कर्माण्यनुष्ठीयन्तामित्येतां शङ्कां निवारयितुमत्र तत्त्वज्ञानिव्यवहाराणां लौकिकानां सर्वेषां यागरूपत्वमुच्यते। न हि यागस्य यागाधिकारशङ्काऽस्ति। अतोऽस्मिन्ननुवाके पूर्वभागेन(ण) योगिनोऽवयवा यज्ञाङ्गद्रव्यत्वेनाऽऽम्नायन्ते—

तस्यैवं विदुषो यज्ञस्याऽऽत्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निर्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीत्, इति।

तस्य पूर्वोक्तस्य संन्यासिन एवं विदुषः पूर्वोक्तप्रकारेण ब्रह्मणो महत्त्वं साक्षात्कृतवतो जीवन्मुक्तस्य संबन्धी यो यज्ञोऽस्ति तस्य यज्ञस्य देहेन्द्रियादिसाक्षी य आत्मा स एव यजमानसदृशः, तस्य स्वामित्वात्। या तु तदन्तःकरणे श्रद्धारूपा चित्तवृत्तिः सा पत्नी। यच्च शरीरं तदिध्मम्। एवमुरआद्यवयवानां वेद्यादिरूपत्वोपचारो योजनीयः। यस्तु दमाख्यः शमयिता सर्वेन्द्रियोपशमकारी चित्तवृत्तिविशेषः, तस्य दक्षिणारूपत्वमुन्नेयम्। वागादीनां होत्राद्यृत्विग्रूपत्वमुन्नेयम्।

अथास्यानुवाकस्य द्वितीयभागेन योगिव्यवहारस्य ज्योतिष्टोमावयवक्रियारूपत्वं दर्शयति—

यावद्ध्रियते सा दीक्षा यदश्नाति तद्धविर्यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदो यत्संचरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो या व्याहृतिराहुतिर्दस्य विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति तत्समिधं यत्प्रातर्मध्यंदिनꣳ सायं च तानि सवनानि, इति।

यावन्तं कालं भोजनमकृत्वा ध्रियते विदुषा धार्यते सा धृतिर्दीक्षाख्यसंस्काररूपा। एवं भोजनादौ हविरादिरूपत्वमुन्नेयम्।

---

१ ग. ङ. ञ. °मुत्तरत्राप्यव° । २ ग. °यः । दमस्तु दमाख्यस्तु श° । ङ. °यः । दमस्तु श° । ३ ग. सा वृत्तिर्दी° ।

अथास्यानुवाकस्य तृतीयभागेन जीवन्मुक्तस्य संबन्धिनां कालविशेषाणां नानाविधयागरूपत्वमाह—

ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च ते चातुर्मास्यानि य ऋतवस्ते पशुबन्धा ये संवत्सराश्च परिवत्सराश्च तेऽहर्गणाः सर्ववेदसं वा एतत्सत्रं यन्मरणं तदवभृथः, इति ।

संवत्सराश्च परिवत्सराश्चेति चकाराभ्यामिदावत्सरानुवत्सरेद्वत्सराः समुच्चीयन्ते । प्रभवादिषु षष्टिसंवत्सरेष्वेकैकं पञ्चकं युगशब्दाभिधेयं तस्मिंश्च युगे पञ्चापि क्रमेण संवत्सरपरिवत्सरेदावत्सरानुवत्सरेद्वत्सरसंज्ञका द्रष्टव्याः ।

तथाच **कालनिर्णये** संग्रहकारेणोदाहृतम्—

"चान्द्राणां प्रभवादीनां पञ्चके पञ्चके युगे ।
संपरीदान्विदित्येतच्छब्दपूर्वास्तु वत्सराः" इति ॥

अहर्गणा द्विरात्रत्रिरात्रादयः । **सर्ववेदसं** सर्वस्वदक्षिणाकम् । अत्रैतच्छब्देन प्रकृताहोरात्रादिपरिवत्सरान्तसर्वकालसमष्ट्युपलक्षितं योगिन आयुर्विवक्ष्यते । यदायुस्तत्पर्वस्वदक्षिणोपेतं **सत्रमित्यर्थः** ।

अस्यानुवाकस्य चतुर्थभागेन सर्वयज्ञात्मकं योगिन उपासीनस्य क्रममुक्तिलक्षणं फलमाह—

एतद्वै जरामर्यमग्निहोत्रꣳ सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वाऽऽदित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं गच्छत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानमित्युपनिषत्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि चतुःषष्टितमोऽनुवाकः ॥ ६४ ॥

जरामरणावधिकं यद्योगिचरितमस्ति तदेतद्वेदोक्ताग्निहोत्रादिसंवत्सरसत्रान्तकर्मस्व-

---

१ ख. ग. °र्वद्° । २ म. °स्य कर्मणु° । ३ ग. झ. °युज्यꣳसलोकतामग्नि त्ये° । ४ ग. जननम° ।

रूपमित्येवं यः पुमान्विद्वानुपासीन उत्तरायणे म्रियते, स उपासको देवानामिन्द्रादीनां महिमानमैश्वर्यं प्राप्य तदूर्ध्वमादित्यस्य सायुज्यं सहवासं तादात्म्यं वा भावनातारतम्येन प्राप्नोति। अथ पूर्वोक्तवैलक्षण्येन य उपासको दक्षिणायने म्रियते स उपासकः पितृणामग्निष्वात्तादीनामैश्वर्यं प्राप्य चन्द्रमसः सायुज्यं पूर्ववत्प्राप्नोति य एवमेतौ सूर्याचन्द्रमसोर्महिमानावनुभवन्ब्राह्मणस्त(णः स त)त्र सगुणब्रह्मरूपं हिरण्यगर्भं विद्वांस्तल्लोकवासिनामुपदेशिनामुपासीनोऽभिजयति। हिरण्यगर्भसाक्षात्काररूपं प्राप्नोति। तस्मात्साक्षात्कारात्तल्लोकवासिदेहपातादूर्ध्वं हिरण्यगर्भलोकं गत्वा तत्र ब्रह्मणो हिरण्यगर्भस्य महिमानमैश्वर्यं प्राप्नोति। तत्रोत्पन्नब्रह्मतत्त्वसाक्षात्कारस्तस्माज्ज्ञानाद्ब्रह्मलोकविनाशादूर्ध्वं सत्यज्ञानादिलक्षणस्य ब्रह्मणो महिमानं महत्त्वं च प्राप्नोति। इत्युपनिषदितिवाक्येन यथोक्तविद्यायास्तत्प्रतिपादकग्रन्थस्य चोपसंहारः क्रियते।

अथ मीमांसा। तृतीयाध्यायस्य तृतीयपादे चिन्तितम्—

"पुंविद्यैका विभिन्ना वा तैत्तिरीयकताण्डिनोः।
मरणावभृथत्वादिसाम्यादेकेति गम्यते॥
बहूनां रूपभेदेन किंचित्साम्यस्य बाधनात्।
न विद्यैक्यं तैत्तिरीये ब्रह्मविद्याप्रशंसनात्॥

अस्ति तैत्तिरीये पुरुषविद्या—"तस्यैवं विदुषो यज्ञस्याऽऽत्मा यजमानः" इति। तथा ताण्डिनां शाखायामपि श्रूयते—"पुरुषो वाव यज्ञः" इति। सेयमेकैव पुरुषविद्या। यन्मरणं तदवभृथो मरणमेवावभृथ इत्युभयत्र समानधर्मश्रवणात्प्रातःसवनादीनां च समानत्वादिति प्राप्ते ब्रूमः। वेद्यस्वरूपस्य भूयान्भेद उपलभ्यते। तथाहि—विदुषो यो यज्ञस्तस्य यज्ञस्याऽऽत्मेति तैत्तिरीयके व्यधिकरणे षष्ठ्यौ। अन्यथाऽऽत्मा यजमान इति व्याघातात्। विद्वानेव यज्ञः स एव यजमान इति कथं न व्याहन्येत। ताण्डिनां तु पुरुषयज्ञयोः सामानाधिकरण्यं श्रुतमित्येको रूपभेदः। आत्मयजमानादिकं च सर्व[म]त्र श्रुतं ताण्डिशाखायां नोपलभ्यते। यत्तु ताण्डिनामुपलभ्यते त्रेधा विभक्तस्याऽऽयुषः सवनत्रयत्वमित्यादि न तत्किंचिदपि तैत्तिरीयके पश्यामः। अतो मरणावभृथत्वाद्यल्पसाम्यबाधाद्विद्ययोर्भेदं उचितः। अपि च न तैत्तिरीयाणामुपासनमिदं किं तर्हि ब्रह्मविद्याप्रशंसा। तस्यैवं विदुष इति ब्रह्मविदोऽनुक-

---

१ ग. ङ. °पासकानामि°। २ ख. ङ. °लोके ग°। ३ ङ. °क्तब्रह्मवि°। ४ ग. ङ. °सायां तृ°। ५ ग. ङ. °म्—" इयं विद्यैका भि°। ६ ग. ङ. °देऽपि किं। ७ ख. ङ. °ण्डिशा°। ८ क. °ति। एवमे°। ९ ख. ग. भूयानभे°। १० ङ. °द एवोचि°। ११ ख. °नुत्कर्ष°। ङ °नुक्रमणा°।

र्षणात् । तस्मान्न विद्यैक्यशङ्कायामप्यवकाशोऽस्ति[1] " क्रममुक्तिस्त(स्त्व)स्मिन्ननुवाके तत्त्वज्ञानिसेवानिमित्ताऽभिहितेत्यशेषमतिमङ्गलम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमप्रपाठके चतुःषष्टितमोऽनुवाकः ॥ ६४ ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ।

हरिः ॐ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमः प्रपाठकः समाप्तः ॥ १० ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कणभूपालसाम्राज्यधुरंधरेण श्रीमत्सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये दशमः प्रपाठकः समाप्तः ॥ १० ॥

समाप्तमिदं कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्यम् ।

१ क. °वैक्यश° । २ ग. घ. °स्ति । एतस्मि° ।

*

*अथ परिशिष्टम् ।

कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमः प्रपाठकः ।

नारायणोपनिषत् ।

तत्र प्रथमोऽनुवाकः ।

हरिः ॐ ।

+सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ।

ॐ शान्तिः शान्तिः शान्तिः ॥

इति शान्तिः ।

विचार्य सर्ववेदान्तैः संचार्य हृदयाम्बुजे ।
प्रचार्य सर्वलोकेषु आचार्यं शंकरं भजे ॥ १ ॥
पद्मपादो विश्वरूपो हस्तामलकत्रोटकौ ।
अद्वैतदीक्षागुरवः साचार्याः पञ्च पान्तु माम् ॥ २ ॥
एतानि पद्मपत्राणि चत्वारि हृदयाम्बुजे ।
मामकीने प्रकाशन्तां भुक्तिमुक्तिप्रसिद्धये ॥ ३ ॥
नमो नमः कारणकारणात्मने नमो नमो मङ्गलमङ्गलात्मने ॥
नमो नमो वेदविदां मनीषिणामुपासनीयाय नमो नमस्ते ॥ ४ ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ॥
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ ५ ॥
वारुण्युपनिषद्युक्ता ब्रह्मविद्या सनातना ॥
याज्ञिक्यां फ(खि)लरूपायां सर्वशेषोऽभिधीयते ॥ ६ ॥

यथा बृहदारण्यके सप्तमाष्टमाध्यायौ खिलकाण्डत्वेनाऽऽचार्यैरुदाहृतौ तथेयं नारा-

---

* परिशिष्टसंगृहीतमेतन्नारायणोपनिषद्भाष्यं केन प्रणीतमिति न जानिमः, परं चास्य पुस्तकद्वयमुपलब्धम् । भाष्यं चैतदशीत्यनुवाकात्मकैतद्देशीयवैदिकपाठप्रसिद्धमूलानुरोध्यस्त्यतोऽत्र परिशिष्टरूपेण समूलं संगृहीतम् । अस्मिंश्च भाष्य उपक्रमे प्रायः सायणाचार्यकृतभाष्यस्यैवोल्लेखो दृश्यते । अग्रेऽपि यत्र सायणाचार्यभाष्यानुरोधि मूलं वर्तते तत्र प्रायः सायणाचार्यकृतभाष्योल्लेखो दृश्यते ।
× अत्र ङ. पुस्तके मूले ॐ शं नो मित्रः शं वरुणः । ०अवतु वक्तारम् । ॐ शान्तिः ॥ ३ ॥ इत्यधिकम् ।

यणीयाख्या याज्ञिक्युपनिषदपि खिलकाण्डरूपा, तल्लक्षणोपेतत्वात् । कर्मोपासनाब्रह्मतत्त्वज्ञानेषु किंचिदवशिष्टं तस्य सर्वस्याभिधानेन प्रकीर्णरूपत्वं खिलत्वम् । बृहदारण्यके सप्तमाध्याये—"पूर्णमदः पूर्णम्" इत्यादिना ब्रह्मतत्त्वमभिहितम् । "ॐ खं ब्रह्म" इत्यादिभिरष्टमाध्यायगतैश्च " यो ह वै ज्यैष्ठ्यं(ज्येष्ठं) च श्रैष्ट्यं(श्रेष्ठं) च वेद" इत्यादिभिर्वाक्यैर्नानाविधान्युपासनान्यभिहितानि । " अथ यः कामयेत महत्प्राप्नुयाम्" इत्यादिना मन्थाख्यं कर्माभिहितम् । तथा पुत्रविशेषादिकामनायुक्तानां तु तत्तत्कर्माण्यभिहितानि । एवमत्रापि "अम्भस्य पारे" इत्यादिना ब्रह्मतत्त्वमभिहितम् । "आदित्यो वा एष एतन्मण्डलम्" इत्यादिनोपासनमभिहितम् । "भूरन्नमग्नये पृथिव्यै स्वाहा" इत्यादिना कर्माण्यभिहितानि । तत्र कर्मणां बाहुल्याद्याज्ञिकीत्युच्यते । उपक्रमे ब्रह्मतत्त्वाभिधानात्[*उपसंहारे च तत्साधनानां सत्यादीनां संन्यासान्तानामभिधानात्]दुपनिषदित्युच्यते । तदीयपाठसंप्रदायस्तु देशविशेषेषु बहुविध उपलभ्यते । तत्र यद्यपि शाखाभेदः कारणं तथाऽपि तैत्तिरीयशाखाध्यायकैस्तत्तद्देशनिवासिभिः शिष्टैरादृतत्वात्सर्वोऽपि पाठ उपादेय एव । तत्र द्राविडानां चतुःषष्टयनुवाकक्रमपाठः । कर्णाटकेषु केषांचिच्चतुःसप्ततिः(ति) पाठः । अपरेषां चाशीतिपाठः । तत्र वयं पाठान्तराणि सूचयन्तश्चतुःषष्ट्य(न्तोऽशीत्य)नुवाकपाठं प्राधान्येन व्याख्यास्यामः । [तत्र] प्रथमानुवाकस्याऽऽदौ काश्चिदृचो ब्रह्मतत्त्वं प्रतिपादयन्ति, तासु प्रथमामृचमाह—

ॐ अम्भस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान् ।
शुक्रेण ज्योतींषि समनुप्रविष्टः प्रजापतिश्चरति गर्भे अन्तः, इति ।

अम्भस्य बहुविधसमुद्रवार्तिजलस्य **पारे** परतीरे यो महान्प्रौढो लोकालोकपर्वतादिस्ततोऽपि **महीयान्**महत्तरोऽयं महे(परमे)श्वरः । तथा **भुवनस्य** भूगोलस्य **मध्ये** महान्मेर्वादिस्ततोऽपि महत्तरः । **नाकस्य पृष्ठे** स्वर्गस्योपरि यो महान्ब्रह्मलोकादिस्ततोऽपि महत्तरः । तथा च **छन्दोगा** आमनन्ति—" ज्यायान्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः " इति । " स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरतः स एवेदꣳ सर्वम्" इति(च) । स परमेश्वरः **शुक्रेण** जीवचैतन्यरूपेण भासकेन **ज्योतींषि** निर्मलत्वेन भासकान्यन्तःकरणानि सम्यगनुप्रविष्टः । " तत्सृष्ट्वा तदेवानुप्राविशत् " इति श्रुतेः । **गर्भे** ब्रह्माण्डरूपेऽन्तर्मध्ये **प्रजापतिर्विराड्रूपो भूत्वा चरति** प्रवर्तते । विराड्रूपमाथर्वणिका आमनन्ति—"अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः । वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी " इत्यादि । अग्निः प्रकाशयुक्तो द्युलोकः ।

---

* त्रुटितमिदं चतुःषष्टयनुवाकानुरोधिभाष्यात्संगृहीतम् । प्रकृते तस्यास्य च तौल्यात् ।

सर्वव्यापी परमेश्वरो वस्तुतस्तथाविध एव सन्मायावशाद्देहेषु जीवरूपेण ब्रह्माण्डे च विराड्रूपेणावस्थित इत्यर्थः।

द्वितीयामृचमाह—

यस्मिन्निदꣳ सं च वि चैति सर्वं यस्मिन्देवा अधि विश्वे निषेदुः।
तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन्, इति।

इदं सर्वं जगद्यस्मिन्नव्याकृते मूलकारणे **समेति च** [व्येति च।] सृष्टिकाले समुत्पन्नं सत्संगतमपि भवति। शं चेति पाठे सुखमपि प्राप्नोतीति व्याख्येयम्। व्यत्ययेन वा समिति द्रष्टव्यम्। संहारकाले विलीनं सद्विगतमपि भवति। **अध्यधिका हिरण्यगर्भविराडादयो देवा विश्वे** सर्वेऽ(र्वे य)स्मिन्नव्याकृते मूलकारणे **निषेदुर्नितरामाश्रित्यावस्थिताः, तदेव** सृष्टिसंहारयोर्देवानां चाऽऽधारभूतमव्याकृतमेवेत्यर्थः। [*भूतमतीतं जगत्। भव्यं भविष्यज्जगदिदं वर्तमानमपि जगत्तदु तदेवाव्याकृतम्।] **आ** इत्याश्चर्ये। प्रसिद्धिर्वा तस्यार्थः। तत्तादृशमव्याकृतमक्षरे विनाशरहिते **परम** उत्कृष्टे **व्योमन्नाकाशवदमूर्ते** परमात्मनि वर्तत इति शेषः।

तृतीयामृचमाह—

येनाऽऽवृतं खं च दिवं महीं च येनाऽऽदित्यस्तपति तेजसा भ्राजसा च।
यमन्तः समुद्रे कवयो वयन्ति यदक्षरे परमे प्रजाः, इति।

वाजसनेयिनो गार्गिब्राह्मणे परमात्मन्याश्रितं यदव्याकृतमधीयते—"एतस्मिन्खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च" इति तत्पूर्वस्यामृच्यभिहितम्। अस्यां तु तेनाव्याकृतेनोपहितं जगत्कारणं चैतन्यमभिधीयते। **येन** सच्चिद्रूपेण कारणेन **खमन्तरिक्षलोको दिवं** द्युलोको **महीं** भूलोक इत्येतत्सर्वमावृतं व्याप्तम्। चकाराभ्यां तत्तल्लोकवासिनो देहाः समुच्चीयन्ते। तेऽपि कारणेन व्याप्ताः। अत एवोक्ताः सर्वेऽपि तद्रूपतया भासन्ते। येन परमेश्वरेणानुगृहीत **आदित्यस्तेजसा** स्वकीयमण्डलान्तर्गतभास्वररूपेण **भ्राजसा च** प्रसारितरश्मिरूपया दीप्त्या च **तपति** सर्वमिदं जगदभितप्तं प्रकाशितं च करोति। **कवयः** तत्त्वविदो **यं** परमात्मानं **समुद्रेऽन्तः** समुद्रोपलक्षितस्य कृत्स्नस्य जगतो मध्ये तन्तूनिव **वयन्ति**। यथा पटस्वरूपे तन्तवोऽनुगतास्तथा जगति ब्रह्मतत्त्वमनुगतं पश्यन्ति। तच्च ब्रह्मतत्त्वमक्षरे विनाशरहिते **परम** उत्कृष्टे निजस्वरूपेऽवस्थाय **प्रजा** उत्पादयतीति शेषः। स्वरूपेऽवस्थानं छन्दोगाः प्रश्नोत्तराभ्यामामनन्ति—

---

* चतुःषष्ठ्यनुवाकानुरोधिभाष्यात्संगृहीतं त्रुटितत्वात्प्रकृते तेनास्य विरोधाभावात्।

"स भगवन्कस्मिन्प्रतिष्ठित इति स्वे महिम्नि" इति । आधारान्तरराहित्यमेव स्वस्मिन्नवस्थानम् । यदक्षर इति *पाठेऽपि तच्छब्दार्थत्वेनैव व्याख्येयम् ।

चतुर्थीमाह—

यतः प्रसूता जगतः प्रसूती तोयेन जीवान्व्यचसर्ज भूम्याम् ।
यदोषधीभिः पुरुषान्पशूश्च विवेश भूतानि चराचराणि, इति ।

पूर्वमन्त्रे जगत्कारणमव्याकृतोपहितं यच्चैतन्यमुक्तं तस्य त्रिजगदुत्पाद(पादा)नत्वं प्रपञ्च्यते । आत्मन आकाशः संभूत इत्यारभ्यान्नात्पुरुष इत्यन्तेन ग्रन्थेन पूर्वमभिहिता **जगतः** [**प्रसूती**] प्रसूतिः सृष्टिरुत्पत्तिर्यतो यस्मादव्याकृताच्चैतन्यात्**प्रसूता** प्रवृत्तां तच्चैतन्यं क(का)रणभूतं **तोयेन** जलोपलक्षितेन भूतपञ्चकेन **जीवान्**मनुष्यगवादीञ्जीवदेहान्**भूम्यां** भूमौ **व्यचसर्ज** विशेषेणासृजत् । व्यससर्जेति पाठेऽपि तथैव व्याख्येयम् । तथा च चै(**यच्चै**)तन्यरूपं मायाविशिष्टं कारण**मोषधीभि**र्व्रीहियवादिभिरुपलक्षितमन्नं भूत्वा **पुरुषान्**मनुष्यान्**पशूंश्च** तदुपलक्षितानि स्थावरजङ्गमशरीराण्यपि **प्रविवेश** । वृक्षादिस्थावरेषु वृष्टिजलरूपेण प्रवेशः । तेन चैतन्येन सर्वं जगत्पालितमिति शेषः ।

पञ्चमीमृचमाह—

अतः परं नान्यदणीयसꣳ हि परात्परं यन्महतो महान्तम् ।
यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् (१), इति ।

पूर्ववाक्योक्तेन जगत्कारणत्वाकारेणोपलक्षितं शुद्धं वस्त्वत्र निरूप्यते । यद्वस्तु परादुत्कृष्टाद्धिरण्यगर्भादेरपि **परमत्यन्तमुत्कृष्टम्** , **यच्च महत** आकाशादेर्**महान्तं महत्** , **यदप्येकं** सजातीयविजातीयस्वगतभेदरहितम् , **अव्यक्तम्**इन्द्रियागम्यम् , **अनन्तरूपं** देशकालवस्तुपरिच्छेदशून्यं, **विश्वं** जगदात्मकं 'पुराणमनादिसिद्धं' **तमसः परस्ताद**ज्ञानात्पृथग्वर्तते । **अतो** वस्तुनोऽन्यद्वस्त्वणीयसमत्यन्तदुर्लक्ष्यं परमुत्कृष्टं **नास्ति** ।

विश्वविशेषणेन यत्सर्वजगदात्मकत्वमुक्तं तदेतत्षष्ठीसप्तमीभ्यामृग्भ्यां प्रपञ्चयति—

तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम् ।
इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः ॥
तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः ।
तदेव शुक्रममृतं तद्ब्रह्म तदापः स प्रजापतिः ॥

---

* पाठे सत्यमिति यौज्यम् ।

मनसा यथावस्तु चिन्तनमृतं वाचा तदुच्चारणं सत्यमेतदुभयमपि तदेवाधिष्ठानं ब्रह्मैव। कवीनां वेदशास्त्रपारं गतानां परमुत्कृष्टं प्रमाणत्वेनाऽऽदरणीयं यद्ब्रह्म वेदरूपं वस्तु तदपि स्वाधिष्ठानवस्तु(भूत)परब्रह्मात्मकमेव। इष्टं दर्शपूर्णमासादि श्रौतं कर्म पूर्तं वापीकूपादि स्मार्तं कर्म तदुभयमपि तदेव ब्रह्म। तथा बहुधा जातं पूर्वकल्पतत्पूर्वकल्पादिरूपेण बहुप्रकारमुत्पन्नमिदानीमपि तथा जायमानं विश्वं सर्वं जगद्भुवनस्य नाभिश्चक्रनाभिवत्सर्वलोकस्याऽऽधारभूतः परमात्मा बिभर्ति। अत आधेयं सर्वमधिष्ठानस्वरूपमेव। अग्निवायुसूर्यचन्द्रमसोऽपि तदेव। तथा शुक्रं दीप्यमानं नक्षत्रादिकममृतं देवैः सेव्यं पीयूषमेतदुभयमपि तदेवाधिष्ठानरूपमेव। यद्ब्रह्म हिरण्यगर्भरूपं तदेतदधिष्ठानात्मकमेव। याश्चाऽऽपो जलोपलक्षितानि पञ्च भूतानि यश्च प्रजापतिर्विराड्रूपस्तदुभयमप्यधिष्ठानरूपमेव। यद्यज्जगदविद्यादृष्ट्या नानाविधं प्रतीयते तत्सर्वं विद्यादृष्ट्याऽखण्डैकरसं ब्रह्मैव। अत एव दृष्टिद्वयमभिप्रेत्य वाजसनेयिनः समामनन्ति—" यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति " इत्यविद्यादृष्टिः। " यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् " इति विद्यादृष्टिः।

ननु—" प्रकृतिः पुरुषश्चैव नित्यौ कालश्च सत्तम " इति विष्णुपुराणे कालस्य नित्यत्वाभिधानाद्विद्यादृष्ट्याऽपि ब्रह्मरूपत्वं नास्तीत्याशङ्क्य पुराणस्याविद्यादृष्टिविषयत्वमभिप्रेत्य विद्यादृष्ट्या कालस्य ब्रह्मत्वविवक्षया ब्रह्मणः सकाशादुत्पत्तिमष्टमीनवमीभ्यां दर्शयति—

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि।
कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः॥
अर्धमासा मासा ऋतवः संवत्सरश्च कल्पन्ताम्।
स आपः प्रदुघे उभे इमे अन्तरिक्षमथो सुवः, इति।

निमिर्नाम जनकस्य पूर्वज आद्यो मिथिलेश्वर आसीदित्युपनिषदि वर्तते। देवप्रसादाद्येष्वक्षिपक्ष्मपातेषु [स] वर्तते [ते निमिषाः।] त एव निमेषा उच्यन्ते। पक्ष्मपातपरिमिताः सूक्ष्माः कालविशेषा इत्यर्थः। ते सर्वे विद्युतः स्वयंप्रकाशमानात्पुरुषात्परमेश्वरादधिजज्ञिरे आधिक्येनोत्पन्नाः। निमेषेभ्योऽप्यधिकाः कालविशेषाः काष्ठास्ताभ्योऽप्यधिकाः कलास्ततोऽप्यधिका मुहूर्तास्तेभ्योऽप्यधिका अहोरात्राः।

तथा च पूर्वग्रन्थकारैरुक्तम्—

" अष्टादश निमेषास्तु काष्ठा त्रिंशत्तु ताः कला।
तास्तु त्रिंशत्क्षणस्ते तु मुहूर्तो द्वादशास्त्रियाम्॥
ते तु त्रिंशदहोरात्रः पक्षस्ते दश पञ्च च।

चकारस्वनुक्तसमुच्चयार्थौ । सर्वेऽपि कालविशेषाः समुत्पन्ना इत्यर्थः । लवत्रुट्यादिस्वरूपं पूर्वाचार्यैरुक्तम्—

" नलिनीपत्रसंहत्याः सूक्ष्मसूच्यभिभेदने ।
दले दले तु यः कालः स कालो लववाचकः ॥
लवैस्त्रुटिः स्यात्त्रिंशद्भिः " इति ।

अर्धमासाः शुक्लकृष्णरूपा **मासाश्चैत्रवैशाखाद्या ऋतवो** वसन्तग्रीष्माद्याः सर्वेऽपि परमेश्वरादधिजज्ञिरे । तथा **संवत्सरश्च** प्रभवादिरूपः **कल्पन्तां** परमेश्वरादुत्पन्नः * । अत एव स्वप्रयोजनसमर्थो भवति । कल्पन्तामिति + बहुवचनपाठे कालविशेषाः स्वस्वप्रयोजनयोग्या इति योज्यम् । [स] परमेश्वरः स्वनिर्मितेन कालविशेषेणोपलक्षितः संस्ततः कालौचित्येनाऽऽपः **प्रदुघे** जलोपलक्षितां पृथिवीं दुग्धवान् । प्राणिनामपेक्षितं भोग्यजातं पृथिव्यां संपादितवानित्यर्थः । तथैवान्तरिक्षमेकं स्थानमथो अपि च **सुवः** स्वर्गोऽपरं स्थानमिमे **उभे** अपि स्थाने **प्रदुघे,** तयोरपि स्थानयोर्भोग्यं वस्तु संपादितवानित्यर्थः ।

ननु काललोकादिसर्वकारणस्य सर्वत्रानुगतत्वात्कुतः प्राणिभिरसौ न गृह्यत इत्याशङ्क्यैतस्य परमात्मन ऊर्ध्वाद्याकारविशेषाभावाद्रूपाद्यभावाच्चेति मन्त्रद्वयेन दर्शयति—

नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ।
न तस्येशे कश्चन तस्य नाम महद्यशः (२) ॥
न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
हृदा मनीषा मनसाऽभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति, इति ।

कश्चिदपि पुरुष **एनं** परमात्मानं स्तम्भवदूर्ध्वाकारमुपरिस्थितकाशावलम्बवत्तिर्यगाकारं वा गृहान्तर्वर्तिदेवदत्तवत्कुचिन्मध्ये वा स्थितं **न परिजग्रभत्,** [न परिगृह्णाति] ऊर्ध्वत्वाद्याकाराणां तस्मिन्नभावात् । किंच तस्य परमात्मनः **कश्चन** कोऽपि पुरुषो **नेशे** नेष्टे नामग्रहणे सौकर्यार्थमीदृग्भवेति नियन्तुं न समर्थः । अत एव **तस्य** परमात्मनो **महद्यश इति नाम** संपन्नम् । अत्यन्तस्वतन्त्रत्वेन तदीययशसोऽभ्यधिकत्वात् । किंचास्य परमात्मनो **रूपं** नीलपीतादिकं **संदृशे** प्राणिनां दृष्टिविषये **न तिष्ठति** । "अशब्दमस्पर्शमरूपम्" इत्यादिश्रुतेः । **कश्चन** कुशलोऽपि पुमानत्यन्तं पटुना **चक्षुषैनं** [न] **पश्यति** । कथं तर्हि गुरुशास्त्रोपदेशयुक्तो गृह्णातीति चेदुच्यते— **हृदा**

---

* एकवचनस्थाने व्यत्ययेन बहुवचनमित्यभिप्रायेणेदम् । + कल्पन्तामिति यथाश्रुतं बहुवचनमेवेति स्वीकारेऽपि बाधकाभाव इति वक्तुमाह ।

हृदयपुण्डरीकमध्यवर्तिना **मनीषा** लौकिकवस्तुगोचराणि मनांसीष्ट इति मनीट्तथाविधेन **मनसाऽन्तःकरणेनाभिक्लृप्तः** सर्वतो निश्चितो भवति । योगयुक्तं हि मनो लौकिकीर्मनोवृत्तीर्नियमयति । तेन चान्तर्मुखेनै(णै)काग्रेण मनसा परमात्माऽनुभवितुं शक्यते । "दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" इति **श्रुतेः ये** पुरुषा **एनं** परमात्मानं मनसा **विदुः** साक्षात्कुर्वन्ति **ते** पुरुषा **अमृता** मरणरहिता भवन्ति । देहात्प्राणानामुत्क्रान्तिर्मरणं तच्च तत्त्वविदां नास्ति "न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते" इति **श्रुतेः** ।

उक्तार्थदाढर्च्याय प्रदेशान्तरपठितान्मन्त्रानुदाहरति—

अद्भ्यः संभूतो हिरण्यगर्भ इत्यष्टौ, इति ।

अद्भ्यः संभूतः पृथिव्यै रसाच्चेत्ययमनुवाकश्चातुर्होत्रि(त्री)यचयनमन्त्रप्रकरणे समाम्नातः, तस्यानुवाकस्य [प्र]दर्शनार्थमद्भ्यः संभूत इति [illegible] पठितम् । तस्मिन्ननुवाके तमेवं विद्वानमृत इह भवतीति परमात्मतत्त्वविदो मरणराहित्यमुक्तम् । "हिरण्यगर्भः समवर्तताग्रे" इत्यष्टावृचः **संहितायाश्चतुर्थकाण्डे** प्रथमप्रपाटके समाम्नाताः * ।

---

* एतदग्रेऽधिको ग्रन्थो वर्तते स यथा—

(अद्भ्यः संभूतः पृथिव्यै रसाच्च ।
विश्वकर्मणः समवर्तताधि । तस्य त्वष्टा विदधद्रूपमेति ॥
तत्पुरुषस्य विश्वमाजानमग्रे, इति ।

अद्भ्य उदकेभ्यः पृथिव्यै पृथिव्याः । व्यत्ययो बहुलमिति पाणिनीयस्मरणादत्र विभक्तिव्यत्ययः । रसशब्दः क्षीराज्याति(दिषु) प्रसिद्धः । आज्यस्य तेजस्त्वं "तेजो वा आज्यम्" इति श्रुतेः । अनया रीत्या रसात्तेजस इत्यर्थः संपद्यते । पृथिव्यप्तेजसां ग्रहणं वाय्वाकाशयोरुपलक्षणम् । तथा चायमर्थः । विश्वकर्मणो विश्वं ब्रह्माण्डं कर्म कार्यं यस्य तस्माद्विश्वकर्मणः पञ्चभूतद्वारा संभूत उत्पन्नः । यद्वा रसशब्दः परमात्मनो विशेषणं "रसो वै सः" इति वारुण्युपनिषद्युक्तत्वात् । आब्रह्मस्तम्बपर्यन्तानां देवतिर्यङ्मनुष्याणां [illegible] पाञ्चभौतिकत्वं प्रसिद्धम् । किंचैवंभूत आदित्यश्चन्द्रनक्षत्रग्रहतारकादितेजस्विदेवताभ्य इन्द्रादीतरदेवताभ्यश्चाध्यधिकस्तेजसोत्कृष्टः समवर्तत बभूव । अपि च त्वष्टा देदीप्यमान आदित्यस्तस्य परमात्मनो रूपं तेजो विदधद्धरन्नेत्युदेत्युदयाचलमारोहतीत्यर्थः । सूर्यादिषु यत्तेजस्तत्परमात्मसंबन्धीति सर्ववेदान्तडिण्डिमः । य एवंविधः सविता तस्य पुरुषस्य पूर्णस्याग्रे दृष्टिपथे तत्प्रसिद्धमा समन्ताज्जायत इत्याजानं समस्तं विश्वं वर्तत इति शेषः । निखिलजगत्प्रतिभानं भगवदादित्याधीनामित्यभिप्रायः ।

द्वितीयमन्त्रमाह—

वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् ।
तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय, इति ।

कश्चन सूर्योपासकः स्वानुभवं प्रकटयति। एनमाकाशमण्डले दृश्यमानं पुरुषं पूर्णमादित्यस्य वर्ण इव वर्णः कान्तिर्यस्य तमादित्यवर्णमादित्यस्य समानोपमाभावात् सो(त्वो)पमानं स्तु(श्रु)त्या प्रयुक्तं तमसोऽन्धकारात्परस्ताद्दूरे वर्तमानं भगवन्तं सवितारमहं वेद जानामि। किंच तं पूर्वोक्तविशेषणविशिष्टमेवं पूर्वोक्तविधया वक्ष्यमाणविधया च विद्वाञ्जानन्नमृतो भवति। अयनाय मोक्षमार्गायान्यः पन्था न विद्यते।

तृतीयमन्त्रमाह—

प्रजापतिश्चरति गर्भे अन्तः। अजायमानो बहुधा विजायते।
तस्य धीराः परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति वेधसः, इति।

प्रजानां पतिः पालको गर्भे रोदस्योर्मध्ये चरति संचरति। किंच स्वयमजायमानोऽनुत्पद्यमानो बहुधा चराचररूपेण विजायते। सूर्य एव सर्वात्मको जायत इत्यर्थः। ये पुण्यपुरुषा गुरुप्रकारस्य कर्तारो मरीचीनां वेदविशेषाणां पदं स्थानमिच्छन्ति ते धीरा वेधसो जगतां विधातुस्तस्य सूर्यस्य योनिं कारणं परमात्मानं परितः सर्वत्र पूर्णत्वेन जानन्ति जानीयुरित्यर्थः।

चतुर्थमन्त्रमाह—

यो देवेभ्य आतपति। यो देवानां पुरोहितः।
पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये, इति।

यो देवेभ्यः कर्मानुष्ठानद्वारा देवानामुपकारार्थमातपति यो देवानां पुरोऽग्रे हितो हितकारी यः समस्तदेवेभ्यः पूर्वः प्रथमं जात उत्पन्नः सर्वदेवज्येष्ठस्तस्मै रुचाय देदीप्यमानाय ब्रह्मणः परमात्मनः पुत्रो ब्राह्मिस्तस्मै ब्राह्मये सूर्यदेवाय नमोऽस्तु।

पञ्चमं मन्त्रमाह—

रुचं ब्राह्मं जनयन्तः। देवा अग्रे तदब्रुवन्।
यस्त्वेवं ब्राह्मणो विद्यात्। तस्य देवा असन्वशे, इति।

देवा देवः परमात्माऽग्रे महान्सर्गादावृचमृग्वेदरूपं ब्राह्मं ब्रह्मणो देव(वेद?)स्य संबन्धिनं सर्ववेदान्तवेद्यमित्यर्थः। सूर्यं जनयन्त उत्पादयंस्तद्वक्ष्यमाणं वाक्यमब्रुवन्नब्रवीत्। पूज्यत्वात्परमात्मन एकवचने बहुवचनप्रयोगो वेदेन कृतः। ननु देवा इति बहुवचनमिन्द्रादिदेवतापरं किमर्थं न भवतीति चेन्न। तेषां सूर्यजनकत्वे मानाभावात्। पूर्वो यो देवेभ्य इत्यत्रेन्द्रादिभ्यः पूर्वं सूर्योत्पत्तिश्रवणाच्च। तद्वक्ष्यमाणवचनं दर्शयति—यो ब्राह्मणः। तुशब्द एवकारार्थः। एवं पूर्वोक्तरीत्या विद्याज्ञानाति तस्य ब्राह्मणस्य वशे स्वाधीने देवाः शचीपतिप्रमुखा असन्भवन्ति। इति सूर्यनारायण[स्य] स्वरूपेण परिज्ञाने सर्वदेववशीकारः फलमिति भावः।

षष्ठमन्त्रमाह—

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे। नक्षत्राणि रूपम्।
अश्विनौ व्यात्तम्। इष्टं मनिषाण। अमुं मनिषाण। सर्वं मनिषाण, इति।

पूर्वमन्त्रे सूर्यं परोक्षतया स्तुत्वैतन्मन्त्रेऽपरोक्षतयाऽभिष्टवीति। भो भगवन्नादित्य निखिलजगत्संजीवन ते तव लक्ष्मीरिन्दिरा ह्रीर्हरति सौन्दर्येण मनांसीति ह्रीर्मनोहराऽतिसुन्दरी भारती। अनयैव व्युत्पत्त्या ह्रीशब्दः पार्वतीवाचकोऽपि द्रष्टव्यः। सरस्वती लक्ष्मीः पार्वती च पत्न्यौ भार्याः।

सूर्यस्य [illegible], त्रिमूर्त्यात्मकत्वेन प्रसिद्धत्वात् । [अहोरात्रे पार्श्वे । स्पष्टम्] । नक्षत्राणि रूपमाकारः । अश्विनौ व्यात्तं मुखम् । चकाराभ्यां सर्वं ब्रह्माण्डं तदवयभूतमित्यर्थः । एवमभिष्टुतो भगवाञ्श्रीसूर्यो भक्ताय प्रत्यक्षो भूत्वा ब्रवीति । भो भक्तेष्टमभीष्टं मन्मत्त इषाणेच्छ प्रार्थय । अमुं परलोकमिषाण । यद्यन्मनसि वर्तते तत्सर्वमिषाण । अत्र दैर्घ्यं छान्दसम् । अनित्यतन्त्र एकतवर्गनिष्टत्वात्तकारस्थाने नकारप्रयोगश्छान्दसः । एवं सूर्येणोक्तो भक्तस्तत्सर्वं प्रार्थितवान् । सूर्योऽपि दत्तवान् । अयमपि कृतार्थो जातः ।

[अथ] प्रथमामृचमाह—

हिरण्यगर्भः समवर्तताग्रे । भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम, इति ।

यस्मात्परमात्मनः सकाशाद्धिरण्यगर्भश्चतुर्मुखो ब्रह्माऽग्रे सृष्ट्यादौ समवर्तत संभूतो जातः । स च यत्प्रसादाद्भूतस्य भुवनजातस्यैक एव पतिरासीत् । स परमात्मा पृथिवीं द्यामिमां प्रत्यक्षामुतापि दाधार धृतवान् । तं परमात्मानं विनाऽन्यस्मै कस्मै हविषा हविष्मता यज्ञेन विधेम विध्यनुष्ठानं कुर्मो न कस्मैचित्किंतु तस्यैव प्रीत्यर्थं सर्वं श्रौतं स्मार्तं कर्म कुर्मः ।

द्वितीयामाह—

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम, इति ।

यः परमात्मा प्राणतः प्राणवतो निमिषतो निमिषवतो जङ्गमस्य स्थावरस्य च महित्वेन(नो) महत्पूजायामेक इदेक एव राजा बभूव । यः परमात्माऽस्य ब्रह्माण्डस्य मध्ये विद्यमानान्द्विपदो मनुष्यपक्ष्यादींश्चतुष्पदो गोमहिष्यादीनीशे शिक्षयति सर्वप्राणिहृदयपुण्डरीके स्थित्वाऽन्तर्यामितया जगत्सर्वं पुण्यपापेषु प्रेरयति, तं परमात्मानं विनेत्यादि पूर्ववत् ।

तृतीयामाह—

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्यच्छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम, इति ।

य आत्मानं जीवरूपं ददातीत्यात्मदो बलमन्नादिपुष्टिं ददातीति बलद उभयत्र दैर्घ्यं छान्दसम् । यस्य परमात्मनः प्रशिषमाज्ञां विश्वे सर्वे मनुष्याः सर्वेऽपि देवा उपासते मूर्ध्ना परिपालयन्ति । यस्य परमात्मनश्छायाऽऽश्रयः शरणागतत्वममृतं मोक्षहेतुर्यस्याशरणागतत्वं मृत्युर्मरकहेतुः । तं परमात्मानं विनेत्यादि पूर्ववत् ।

चतुर्थीमाह—

यस्येमे हिमवन्तो महित्वा यस्य समुद्रꣳ रसया सहाऽऽहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम, इति ।

इमे भूमण्डले विद्यमाना हिमवन्तो हिमवत्पर्वतप्रभृतिमहामेरुविन्ध्यसह्यत्रिकूटाचलप्रभृतिपर्वताः, यस्य परमात्मनो महित्वा महित्वानि विभूतयः । हिमवन्त इत्यत्र हिमाचलस्य सर्वपर्वतराजन्यत्वात्तन्नामपूर्वकं छत्रिन्यायेतरेषां ग्रहणम् । यतो जगन्माता भागीरथी च तदुत्तरे (तत्र स्थिता?) तस्मादित्यर्थः । किंच रसाशब्दो नदीवाची । जातावेकवचनम् । रसया नद्या गङ्गादिसर्वनदीभिः

[सह] समुद्रं लवणादिसमुद्रान्यस्य परमात्मनो विभूतिमाहुर्वेदाः कथयन्ति । इमाश्चतस्रः प्राच्यादिदिशो यस्य परमात्मनोऽवयवाः । प्रदिशो विदिश आग्नेय्याद्या यस्य परमात्मनो बाहू । अनया रीत्या गिरिनदीवृक्षादि सर्वं परमात्मनो विभूतिरित्युक्तम् । तं परमात्मानं विनेत्यादि पूर्ववत् ।

अथ पञ्चमी—

यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधि सूर उदितौ व्येति कस्मै देवाय हविषा विधेम, इति ।

यत्र ययोर्द्यावापृथिव्योरध्यन्तराले सूरः सूर्य उदितः सन्व्येति शिशुमारचक्रं परितो भ्राम्यति । ते द्यावापृथिव्यौ कीदृश्यौ, क्रन्दसी अतिवृष्टिविद्युत्पातादिना प्रलयाधारत्वेन च क्रन्दनस्य प्राणिरोदनस्य हेतुभूते । एतेन लयकारणत्वमुक्तम् । किंचावसा रक्षकेणान्नेन तस्तभाने जीवानां स्थितिं कुर्वाणे । एतेन जीवनहेतुत्वमुक्तम् । एतदुपलक्षणमुत्पत्तेरपि । जगदुत्पत्तिस्थितिलयकारणभूते । रेजमाने विराजमाने । एवंविधे रोदस्यौ यं परमात्मानं मनसा निर्मलमनोवृत्त्याऽभितः सर्वत[ऐक्षेता-] माध्यायतः । तं परमात्मानं विनेत्यादि पूर्ववत् ।

अथ षष्ठी—

येन द्यौरुग्रा पृथिवी च दृढे येन सुवः स्तभितं येन नाकः ।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम, इति ।

उग्राऽशनिपातादिना क्रूरा द्यौः पृथिवी च येन परमात्मना[दृढे] दृढीकृते सर्वप्राणिधारणपोषणक्षमे कृते । येन परमात्मना सुवरादित्यमण्डलं स्तभितमन्तरिक्षे निराधारं स्थापितम् । अत एव भूमौ न पतति । येन परमात्मना नाकः स्वर्गविशेषः पुण्यात्मनामुपभोगाय निर्मितः । यः परमात्माऽन्तरिक्षे भुवर्लोके रजसो वृष्टिरूपोदकस्य विमानो निर्माणकर्ता तं परमात्मानं विनेत्यादि पूर्ववत् ।

अथ सप्तमीमाह—

आपो ह [illegible] दक्षं दधाना जनयन्तीरग्निम् ।
ततो देवानां निरवर्तताऽसुरेकः कस्मै देवाय हविषा विधेम, इति ।

यदा जगतीं निर्मातुं संकल्पितवांस्ततस्तदा परमात्माऽऽप उदकानि निरवर्ततोत्पादयामास । आप इत्यत्र प्रथमाया द्वितीयायां तात्पर्यम् । आपः कीदृशीर्महतीः पूज्याः समुद्रादिरूपेण महापरिमाणा वा । पुनः कीदृशीरा समन्तादयः शुभावहो विधिर्यस्य तदायं दक्षं समस्तप्राणिधारणपोषणक्षमं विश्वं दधाना धारयन्तीः । अग्निं जनयन्तीः । परमात्मा कीदृश एकोऽद्वितीयो देवादीनामसुब्रह्मादीनां प्राणभूतो ह किल । निरवर्ततेत्यत्रान्तर्णिच्प्रत्ययार्थो बोध्यः । तं परमात्मानं विनेत्यादि पूर्ववत् ।

अथाष्टमीमाह—

यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीरग्निम् ।
यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम, इति ।

दर्श श्रौतस्मार्तकर्मानुष्ठानक्षममग्निं दधाना अग्निं जनयन्तीः । वडवाग्नेः समुद्रोदके विद्यमानत्वात् । आप उदकानि विविदूपो यः परमात्मा महिना महिम्ना । मलोपश्छान्दसः । पर्यपश्यन्निखिलजीवजीवने साधनत्वेनापश्यत् । यः परमात्मा सर्वेषु देवेष्वप्यधिकत्वेनैको देव आसीत् । त परमात्मानं विना कस्मै देवाय हविषा विधेम न कस्मैचित्किंतु तत्प्रीत्यर्थमेव । सप्त पाकयज्ञाः सप्त हविर्यज्ञाः सप्त सोमसंस्था आहत्यैकविंशतिसंस्था अन्यत्पूर्तवापीकूपतटागोदानभूदानादि चानुष्ठाय समर्पयामः । व्याख्यातमन्यद्यत्किंचित् ।)

अथेदानीं यथा हिरण्यगर्भादयः परमात्मन उपलक्षकास्तथा परमात्मना सृष्टं दिगादिकं जगद्विस्फूर्तिश्च परमात्मानमुपलक्षयतीति मन्त्रद्वयेन दर्शयति—

एष हि देवः प्रदिशोऽनु सर्वाः पूर्वो हि जातः स उ गर्भे अन्तः ।
स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः ॥
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् ।
सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी जनयन्देव एकः, ॥

[एष] विद्वद्भिरनुभूयमानो देवः स्वप्रकाशः परमात्मा प्रदिशः प्रकृष्टाः प्राच्याद्या आग्नेय्याद्याश्च दिशः सर्वा अनुप्रविश्यावस्थितः । प्रवेशस्य श्रुत्यन्तरप्रसिद्धत्वादिहोक्तिः । हिशब्दः । तथा पूर्वो जातो हिरण्यगर्भरूपत्वेनायमेव प्रथममुत्पन्नः । हिशब्देन हिरण्यगर्भः समवर्ततेतिमन्त्रप्रसिद्धिः सूच्यते । स उ स एव परमेश्वरो गर्भेऽन्तर्ब्रह्माण्डरूपस्य गर्भस्य मध्ये वर्तते । स एव विजायमानो देवतिर्यगादिरूपेणेदानीं जायते । इतः परमपि जनिष्यमाणः स एव । स च प्रत्यङ्ङन्नमयादिकोशेभ्य आन्तरः । मुखा देहेन्द्रियाध्यक्षत्वेन मुख्यः । विश्वतः सर्वतो मुखानि रूपाद्युपलब्धिद्वाराणि चक्षुरादीनि यस्यासौ विश्वतोमुखस्तादृशोऽयं जगद्[illegible] तिष्ठति । स च ब्रह्माण्डरूपदेहवत्त्वात्सर्वप्राणिनां च तद्देहस्वरूपत्वात्तदीयैः [illegible] भिर्युक्त इति विश्वतश्चक्षुरित्यादिभिः परमेश्वरः प्रतिपाद्यते तत्तल्लोकनिवासिनां प्राणिनां चक्षूंषि तत्र तत्र स्थितान्येवैतदायानि भवन्ति । अतोऽस्य सर्वतश्चक्षुष्मत्त्वम् । एवं विश्वतोमुखत्वादिकं द्रष्टव्यम् । स च परमेश्वरो बाहुभ्यां संनमति बाहुस्थानाभ्यां धर्माधर्माभ्यां निमित्तकारणाभ्यां सर्वं जगद्वशी करोति । तथा संपतत्रैः पतनशीलैः पक्षीकृतपञ्चमहाभूतैः संनमति सर्वं जगदुत्पादयति । एवमयं द्यावापृथिव्यादिकं कृत्स्नं जगदुत्पादयन्नेक एवावतिष्ठते ।

उक्तार्थे श्रद्धातिशयमुत्पादयितुं मन्त्रद्वयेन गन्धर्ववृत्तान्तं दर्शयति—

वेनस्तत्पश्यन्निश्वा भुवनानि विद्वान्यत्र विश्वं भवत्येकनीडम् ।
यस्मिन्निदꣳ सं च वि चैकꣳ स ओतः प्रोतश्च विभू प्रजासु ॥

प्र तद्वोचे अमृतं नु विद्वान्गंधर्वो नाम निहितं गुहासु ॥
त्रीणि पदा निहिता गुहासु यस्तद्वेद सवितुः पिता सत् (३), इति ।

वेनो नाम गन्धर्वः सर्वप्राणिनां गुहासु बुद्धिषु निहितममृतं विनाशरहितं तद्वस्तु स्वानुभवेन विद्वान्प्रवोचे नु शिष्येभ्यः प्रोवाच खलु। कीदृशो वेनः। यत्र यस्मिन्परमात्मवस्तुनि विश्वं जगदेकनीलं(ळं) भवत्येकत्वेन विश्वमवस्थितं सत्तादात्म्यं प्राप्नोति तद्वस्तु गुरुशास्त्रप्रसादेन पश्यन्साक्षात्कुर्वन्विश्वा भुवनानि सर्वानपि लोकान्विद्वाज्ज्ञानन्वर्तते । आत्मसाक्षात्कारे हि सर्वं जगत्तदात्मकमित्यवगतिर्भवति । किंच वेनेन दृष्टे यस्मिन्वस्तुनि परमात्मनीदं जगत्सं[च वि]चैति स्वयमुत्पद्यते विलीनं च भवति । एकमद्वितीयतत्त्वरूपः [स] परमात्मा विभुर्व्यापी सन्प्रजासु दीर्घतन्तुवदोतस्तिर्यक्तन्तुवत्प्रोतश्चावतिष्ठते । गुहासु प्राणिनां बुद्धिषु त्रीणि पदा जाग्रत्स्वप्नसुषुप्तिरूपाणि त्रीणि स्थानानि निहिताऽवस्थितानि । योऽयं गन्धर्वस्तज्जागराद्यनु(धि)ष्ठानं वेद स गन्धर्वः सवितुरुत्पादकस्य स्वकीयजनकस्यापि पिता सज्जनको भवति । लोकप्रसिद्धः पिता पुत्रस्य देहमात्रं जनयति ब्रह्मतत्त्वाभिज्ञस्तु परमात्मरूपेण सर्वजगदुत्पादकत्वाल्लोकप्रसिद्धस्य स्वजनकस्यापि स्वयमुत्पादको भवति । "यस्ता विजानात्सवितुः पिता सत्" इति श्रुत्यन्तरात् ।

तस्य परमेश्वरस्य व्यवहारकाले सर्वप्राण्युपकारकत्वं परमात्मदर्शिनो मुक्तिप्रदत्वं च मन्त्रद्वयेन दर्शयति—

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा ।
यत्र देवा अमृतमानशानास्तृतीये धामन्यध्यैरयन्त ॥
परि द्यावापृथिवी यन्ति सद्यः परि लोकान्परि दिशः परि सुवः ।
ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्प्रजासु, इति ॥

स परमेश्वरो नोऽस्माकं सर्वेषां बन्धुः । अस्मदनुष्ठितसुकृतानुसारेण हितकारित्वात् । जनितोत्पादकः । भोक्तृ (स्रष्टृ) त्वात् । स च विधाता जगतो निर्माता सन्विश्वा भुवनानि सर्वानुत्तमाधमलोकान्धामानि तेषु देवादीनां योग्यानि स्थानानि च वेद जानाति । यत्र तृतीये लोके देवा इन्द्रादयोऽमृतमानशानाः सुधां पिबन्तो धामानि स्वकीयस्थानान्यध्यैरयन्त सर्वतः प्राप्तवन्तः । तत्सर्वं विदित्वा तत्तदनुष्ठितकाम्यकर्मानुसारेण फलं प्रयच्छतीत्यर्थः । इह तु मुमुक्षवस्ते सर्वे विदिततत्त्वाः सन्तो द्यावापृथिवी लोकद्वयं सद्यः परियन्ति , बन्धमोक्ष (बोधक्षण) एव सर्वतो व्याप्नुवन्ति । तथा लोकानव[शिष्टा]नन्तरिक्षादीन्परियन्ति । दिशः प्राच्याद्याः परियन्ति । सुवः स्वर्गलोकभोगं परियन्ति । सर्वात्मकत्वेन सर्वव्याप्तिरुपपन्ना । ऋतस्य

सत्यस्य परब्रह्मणस्तन्तुमविच्छेदेनावस्थानं विततं विस्तीर्णं यथा भवति तथा [विचृत्य] विवृत्य गुरुशास्त्रमुखान्निश्चित्य तद्ब्रह्मतत्त्वमपश्यद्यः साक्षात्कृतवान्स एव प्रजासु मध्ये तद्ब्रह्मतत्त्वमभवत् । तथा च श्रुत्यन्तरम्— " ब्रह्मविद्ब्रह्मैव भवति " इति ।

अम्भस्येत्यादिना तदभवत्प्रजास्वित्यन्तेन ग्रन्थेन प्रतिपादितां ब्रह्मविद्यामुपसंहरति—

परीत्य लोकान्परीत्य भूतानि परीत्य सर्वाः प्रदिशो दिशश्च ।
प्रजापतिः प्रथमजा ऋतस्याऽऽत्मनाऽऽत्मानमभिसंबभूव, इति ।

ऋतस्य सत्यस्य ब्रह्मणः प्रथमजाः प्रथमकार्यभूतः प्रजापतिर्हिरण्यगर्भो रूपा- (लोका) न्भूरादीन्भूतानि देवमनुष्यादिप्राणिदेहान्प्रदिश आग्नेय्याद्या दिशश्च प्राच्याद्याः [परीत्य] सर्वतो व्याप्य सृष्टिकाले सृष्ट्वा पुनरपि परीत्य स्थितिकाले रक्षित्वाऽऽत्मना स्वस्वरूपेण तद्विषयतत्त्वज्ञानेनेत्यर्थः । आत्मानं सत्यज्ञानादिलक्षणमभिसंबभूव सम्यक्सर्वतः प्राप्तवान् ।

तदेवं ब्रह्मविद्या प्रतिपादिता । अतस्तत्प्राप्तिसाधनभूताः सोपाधिकब्रह्मज्ञानजपध्यानादिकर्माङ्गभूता मन्त्राः कर्मकाण्डे पूर्वमनुक्ता अस्मिन्खिलकाण्डेऽभिधीयन्ते । तत्रैकेन मन्त्रेण ब्रह्मप्राप्त्यर्थं [* मन्तर्यामिणं प्रार्थयते—

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिं मेधामयासिषम्, इति ।

सीदत्यस्मिन्नव्याकृते कारणे सर्वं जगदिति सदः, तस्य पतिं पालकमन्तर्यामिणमयासिषमहं प्राप्तवानस्मि । शीघ्रं प्राप्तवानित्यनया विवक्षया भूतार्थ] निर्देशः । कीदृशं सदसस्पतिमद्भुतमाश्चर्यरूपम् । मनसाऽप्यचिन्त्यरचनारूपस्य जगतोऽनायासेन निर्मातृत्वमद्भुतत्वम् । इन्द्रस्य देवराजस्यापि प्रियम् । सोऽप्यन्तर्यामिणं कदा प्राप्स्यामीत्येवमाशास्ते । अत एव सर्वैरन्यैः काम्यमपेक्षणीयम् । सनिं कर्मफलस्य दातारम् । मेधां श्रुत्यादि (ताधीत)ग्रन्थधारणशक्तिं प्रयच्छन्तामिति शेषः ।

अथ बह्न्युपाधिकं परमेश्वरं प्रतीष्टप्राप्तिं प्रार्थयते—

उदीप्यस्व जातवेदोऽपघ्नन्निर्ऋतिं मम (४)
पशूꣳश्च मह्यमावह जीवनं च दिशो दिश, इति ।

जाते प्राणिशरीरे जाठराग्निरूपेण विद्यतेऽवतिष्ठत इति [जातवेदाः । हे] जातवेदो मदनुग्रहार्थमुत्कर्षेण दीप्यस्व । किं कुर्वन् । ममानिष्टकारिणीं निर्ऋतिं पापदेवताम-

* एतच्चिह्नान्तर्गतं चतुःषष्टयनुवाकभाष्यात्संगृहीतम् । प्रकृते तस्यास्य च साम्यात् ।

पशून्विनाशयन् । तां विनाश्य ततो [मह्यं] मदर्थं पशून्गवाश्वादीञ्जीवनं दीर्घायुष्यं चकाराभ्यामन्यदपि सर्वं * गजाश्वादीनां भोगजातमावह संपादय । ततः सुखनिवासार्थं दिशः प्राच्याद्या निवासयोग्यानि तत्तद्दिगादिस्थानानि दिश्च देहि ।

संपादितानां गवाश्वादीनामविनाशं प्रार्थयते—

मा नो॑ हिꣳसीज्जातवेदो॒ गामश्वं॑ पुरुषं॑ जगत्॑ ।
अवि॑भ्रदग्न आग॑हि श्रि॒या मा॑ परिपातय, इति ।

हे जातवेदस्त्वत्प्रसादान्नोऽस्मदीयं गवादिकं गृहक्षेमा(त्रा)दिकं च मा हिंसीन्मा विनाशयतु । जगच्छब्देन गवादिव्यतिरिक्तं गृहक्षेत्रादिकं विवक्षितम् । हेऽग्ने त्वमविभ्रदधारयन्नस्मदपराधं मनस्यधारयित्वाऽऽगहि, अस्मदनुग्रहार्थमागच्छ । ततो मां श्रिया धनधान्यादिसंपदा परिपातय सर्वतः प्रापय ।

इत ऊर्ध्वमेका(र्ध्वं द्वा)दशभिर्गायत्रीमन्त्रैः परब्रह्मसाक्षात्कारद्वारभूतास्तत्तच्छक्त्युक्ता देवता मुमुक्षुरभ्यर्थयते । तत्राऽऽदौ विश्वरूपधरं रुद्रं प्रार्थयते—

पुरु॑षस्य विद्म सहस्रा॒क्षस्य॑ महा॒देव॑स्य धीमहि ।
तन्नो॑ रुद्रः प्रचो॒दया॑त्, इति ।

विश्वतश्चक्षुरित्यादिमन्त्रोक्तो विराट्पुरुषः सहस्राक्ष[स्त]स्य पुरुषस्य स्वरूपं विद्म जानीमहि लभेमहि वा । तदर्थं तस्य विराड्रूपस्य महादेवस्य स्वरूपं धीमहि ध्यायेम । त[च्च]त्र ध्याने नोऽस्मान्रुद्रो विराड्रूपो महादेवः प्रचोदयात्प्रचोदयतु प्रेरयतु ।

अथ "बिभ्रद्दोर्भिः कुठारं मृगमभयक(व)रौ सुप्रसन्नो महेशः" इत्यागमेन(मप्र)सिद्धमूर्तिधरं महेशं प्रार्थयते—

तत्पुरु॑षाय विद्महे॑ महादे॒वाय॑ धीमहि ।
तन्नो॑ रुद्रः प्रचो॒दया॑त्, इति ।

सर्वत्र गायत्रीमन्त्रेषु बहुलं लिङ्गादिव्यत्ययः । तत्पुरुषाय तमागम[प्र]सिद्धं पुरुषाकारं महादेवं जानीमो ध्यायेम । तत्तस्मिन्ध्याने ऽस्मान्रुद्रः प्रेरयतु ।

"बीजापूरगदेषु(क्षु)कार्मुकः" इत्यागम[प्र]सिद्धमूर्तिधरं विनायकं प्रार्थयते—

तत्पुरु॑षाय विद्महे॑ वक्रतु॒ण्डाय॑ धीमहि ।
तन्नो॑ दन्तिः प्रचो॒दया॑त्, इति ।

---

* इदं पदमधिकप्रायम् ।

गजसमानवक्त्रत्वेन दीर्घस्य तुण्डस्य रत्नकलशादिधारणार्थं वक्रत्वम् । दान्तिर्महादन्तः ।

[नन्दिकेश्वरं प्रार्थयते—]

तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि (५)।

तन्नो नान्दिः प्रचोदयात्, इति ।

तद्यं परमशिववाहनरूपं नन्दिकेश्वरं वयं विद्महे [धीमहि च]। कथंभूतम्। पुरुषाय पुरुषं कामरूपित्वाज्जातुचित्स्वेच्छया तिर्यक्त्वं परिहाय च्छ(धृ)तदिव्यपुरुषविग्रहम्। पुनश्चक्रतुण्डाय चक्रतुण्डं चक्रमिव तुण्डं यस्य यथा चक्रायुधं विष्णुप्रयुक्तं समु[द्य]द्रक्षांसि हन्ति तथा स्वारूढपरमशिवस्य रक्षोभिः सह संगरप्रसङ्गे स्वमुखेन तान्यंत्तीत्यर्थः। तत्स नान्दिर्नन्दी नः प्रचोदयात्।

[षडाननं प्रार्थयते—]

तत्पुरुषाय विद्महे महासेनाय धीमहि।

तन्नः षण्मुखः प्रचोदयात्, इति।

तद्यं वयं विद्महे धीमहि च तत्स षण्मुखः तिल(कार्ति)कस्वामी नः प्रचोदयात्। यं कथंभूतम्। पुरुषाय पुरुषम्। अनया(न्तर्या)मितया सर्वासु पूर्षु पूर्णत्वात्। [महासेनाय] महती देवसेना यस्य तस्यै। तमित्यर्थः।

[गरुडं प्रार्थयते—]

तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि।

तन्नो गरुडः प्रचोदयात्, इति।

स्पष्टोऽयं मन्त्रः।

[ब्रह्म प्रार्थयते—]

वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि।

तन्नो ब्रह्म प्रचोदयात्, इति।

त(च) ब्रह्म नः(नः) पुण्यापुण्येषु कर्मसु प्रेरयति तद्वयं विद्महे, गुरुकुले स्थित्वा वेदान्तश्रवणादिना जानीमहे। ज्ञात्वा च निदिध्यासनयं वयं (नार्थत्वाधि)यां सततं धीमहि, अखण्डं तदेवाहमिति दिवानिशं मामृते(?) ध्यायामः। तत्कथंभूतम्। वेदात्मनाय वर्णात्मत्वेन वेदात्मकाय, शाखोपशाखोपेतसर्ववेदस्वरूपमित्यर्थः। हिरण्यगर्भाय चतुर्मुखब्रह्मस्वरूपमित्यर्थः। वेदहिरण्यगर्भयोरुपलक्षकत्वेन सर्वात्मकमिति यावत्। सेयं परमगायत्री।

[नारायणं प्रार्थयते—]

नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात्, इति ।

ततो(द्यो) विष्णुर्नः प्रचोदयति तं विद्महे धीमहि च । कथंविधम् । भक्तानां नराणां समूहो नारं तस्यायनमाधार[स्त]म् । वसुदेवस्यापत्यं पुमान्वासुदेवस्तम् ।

[नरसिंहं प्रार्थयते—]

वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि (६) ।
तन्नो नारसिंहः प्रचोदयात्, इति ।

नरसिंह एव नारसिंहः । वज्रनखाय तीक्ष्णदंष्ट्राय तस्मै प(येत्येवंतत्प)दयोजना पूर्ववत्सेयम् (ज्ञेया) । अयसा (कस्मा)त्स्तम्भादवतीर्य स्वनखैर्हिरण्यकशिपुजठरभेत्तुः कृत(त्त!)तदीयान्त्रयज्ञोपवीतस्य भगवतो नरकण्ठीरवगाय(रूपस्य) [वज्रनखत्वं तीक्ष्णदंष्ट्रत्वं च युक्तमेव] ।

[आदित्यं प्रार्थयते—]

भास्कराय विद्महे महद्युतिकराय धीमहि ।
तन्नो आदित्यः प्रचोदयात्, इति ।

अदितेर्देवमातुरयमादित्यः । भा भूर्लोकावे(क ए)व दीप्तिस्तत्कर्ता भास्करः । महती त्रिलोकीगोचरा द्युतिर्महद्युतिस्तत्कर्ता महद्युतिकरः । आन्महत इत्यादिना प्राप्तस्याऽऽ[त्वस्य] लोपश्छान्दसः । अन्यदतीतवद्योजयितव्यम् ।

अग्निं प्रार्थयते—

वैश्वानराय विद्महे लालीलाय धीमहि ।
तन्नो अग्निः प्रचोदयात्, इति ।

स्वस्मिन्दत्तानि हव्यानि यथाभागं स्वयमश्नन्यदेवताभ्यो नयतीत्यग्निः । विश्वेभ्यो नरेभ्यो हितो वैश्वानरः । लौकिकवैदिकव्यापारानुकूल्येन सर्वप्राणिहित इति यावत् । लालीलायेत्यत्र पृषोदरादेराकृतिगणत्वाद्ध इति णणो(वर्णो) लुप्यते । [हे] लालीलायेत्यर्थः । हेला स्या(स्वा)कुटुम्बिकी क्रीडा लीला सर्वदेवताग्रगण्यत्वलक्षणा च क्रीडा यस्य(स्या)[स्ति] स हेलाली[ल]स्तस्मै हेलालीलाय । यद्वा वैश्वानराय विद्म हेलालीलायेत्यक्ता(त्येवं) पदच्छेदः । तथा च मन्त्रान्तरप्रयोगः । यद्वा वा सत्यमुत यज्ञ विद्मेति । पूर्वत्राऽऽत्मनेपदमत्र परस्मैपदम । उभयत्र बहवचनमेवात एवार्थैक्यम । अन्यदतिक्रान्तवद्योजयितव्यम् ।

आदिशक्तिं प्रार्थयते—

कात्यायनायं विद्महे कन्यकुमारिं धीमहि ।
तन्नो दुर्गिः प्रचोदयात्, इति ।

छान्दसप्रयोगं लोकानुसारेण व्याख्यास्यामः । दाक्षायणी सती किल दक्षस्य पितुर्याज्ञिके पावके भाविगिरिराजन्यभागधेयोदयवशेन दिव्यं परममङ्गलास्पदं कायं तिरश्चक्रे । ततः परमयोगिन्यां मेनकायां प्रालेयाचलादाविश्चक्रे । जनित्वाऽऽदौ (१) कन्या चासौ प्राक्परिणयात्कुमारी चेति कन्यकुमारी तत्संबुद्धौ हे कन्यकुमारि । [यद्वा] कनति देदीप्यत इति कन्या । कन कान्तौ । कुत्सितं प (पा)रतन्त्रा(न्त्र्या)दिलक्षणं बाल्यं मारयति, क्रीडावशेन करपल्लवाभ्यां पदपङ्कजाभ्यां च कुं भूमिं मारयतीति वा कुमारी । हे कन्यकुमारि भो हैमवति भो मैनकेयि त्वां विद्महे, हरिहराविरिञ्च्यादिभिराराध्यां सर्वत उत्कृष्टां भक्त्यैकसुलभां जानीमहे । विदित्वा च रात्रिंदिवं धीमहि । भुक्तिमुक्तिप्रदात्रीमिति शेषः । कस्मै, कात्यायनाय स्वपित्रे । यथा रामकृष्णादिरूपेणावतीर्णस्य भगवतो बहवो मातापितरस्तथा भगवत्या अपि देवकार्यचिकीर्षया ज[ग]द्दनुजिघृक्षया चावतीर्णायाः । द्राक्षसैर्दुःखेन गम्या दुर्गा(र्गिः) । इकारान्तत्वं छान्दसम् ।

एवं द्वादश गायत्र्यो व्याख्याताः । अथ स्नानाङ्गभूता मन्त्रा उच्यन्ते । तत्र शिरसि मृत्तिकया सह दूर्वां धारयितुं दूर्वाभिमन्त्रणमन्त्रानाह—

सहस्रपरमा देवी शतमूला शताङ्कुरा ।
सर्वं हरतु मे पापं दूर्वा दुःस्वप्ननाशिनी, इति ।

येयं दूर्वाभिमानिनी देवता सा मे पापं सर्वं हरतु । कीदृशी । सहस्रसंख्याकेभ्यः पावनहेतुभ्यो द्रव्येभ्यः परमोत्कृष्टा । सा च देवी द्योतनात्मिका । शतसंख्याकानि मूलानि यस्याः सा शतमूला । तथा शताङ्कुरा । शतशब्देन बहुत्वमात्रमुपलक्ष्यते । दुःस्वप्नकृतमनिष्टं नाशयतीति दुःस्वप्ननाश(शि)नी ।

काण्डात्काण्डात्प्ररोहन्ती परुषः परुषः परि (७) ।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च, इति ॥

काण्डादिति । दूर्वति हिनस्ति पातकमिति दूर्वा तत्संबुद्धौ हे दूर्वे । दुर्वी हिंसायाम् । हे तृ[णा]विशेष त्वं नोऽस्माञ्शतेन सहस्रेण च पौत्रदौहित्राद्यनेकप्रकारैः प्रतनु प्रकृष्टं सर्वोत्कृष्टं यथा [भवति तथा] विस्तारय । त्वं किंभूता । परुषः [परुषः] परि प्रतिपर्व परितः प्ररोहन्ती । काण्डात्काण्डात्प्रतिमूलात्सकाशाच्च प्ररोहन्तीति

१ ष. ङ. नाशनी ।

[संबन्धः]।(*अयमभिप्रायः।) दूर्वाया एष स्वभावः। प्रतिपर्व भूसंपर्कवशात्पादप्रसारः। पादेषु प्रसृतेषु तदेव पर्व मूलं भवति तस्मादेव मूलात्पुनरङ्कुरोदयस्त एवाङ्कुराः पुनर्दूर्वालतायन्ते ताभ्यो लताभ्यः पुनः पर्वपरम्परेति। एवा, एवं प्रकारेणोत्पद्यमानेत्यर्थः। एवमित्यव्ययविभक्तेराङादेशश्छान्दसः। [अयमभिप्रायः—] हे दूर्वे यथा पूर्वोक्तभङ्ग्या त्वद्वंशवृद्धिस्तथाऽस्मद्वंशं वर्धयेति।

या शतेन प्रतनोषि सहस्रेण विरोहसि।
तस्यास्ते देवीष्टके विधेम हविषा वयम्, इति।

या शतेनेति। हे देवि पिशङ्गया कान्त्या देदीप्यमाने। इष्टैर्मन्त्रैर्भक्तैः कायते शब्द्यते स्तूयत इतीष्टका तत्संबुद्धौ हे इष्टके। कै गै शब्दे सूत्वा(?)। ते तव संबन्धिनीं परिचर्यां वयं हविषा हविष्प्रदानैर्विधेम कुर्मः। ते किंविधायास्तस्याः। सा का या त्वं शतेन स्वान्वयं प्रतनोषि सहस्रेण च विरोहस्युत्पथसे। एतद्भावार्थः पूर्वमन्त्रे प्रपञ्चितः।

अथ मृत्तिकाभिमन्त्रणमन्त्राः। तत्र प्रथममन्त्रमाह—

अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुंधरा।
शिरसा धारयिष्यामि रक्षस्व मां पदे पदे, इति।

येयं भूमिस्तामश्वाः शुद्धिहेतवः स्वपदैराक्रामन्ति तादृशी भूमिरश्वक्रान्ता। अग्निचयन उखानिर्माणार्थमृत्स्था[प]नप्रदेशस्था(स्या)श्वाक्रमणविधानादश्वपदानां मृच्छुद्धिहेतुत्वं गम्यते। तथा रथक्रान्ता रथचरणेन क्षुण्णा सती शुद्धा भवति। तथा त्रिविक्रमावतारे विष्णुः स्वपदेन भूमिमाक्रामति ततोऽपि शुद्धत्वम्। अश्वरथविष्णुभिः क्रान्ते शुद्धे हे भूमे वसुं रा सर्वाणि वसूनि धारयतीति तथा [तादृशीं त्वां] स्नानकर्मण्येतस्मिन्मदीयशिरसा [धारयिष्यामि] धारिता देवी [च] द्योतमाना [सती] त्वं मां स्नानार्थं गच्छन्तं पदे [पदे] रक्षस्व।

द्वितीयमन्त्रमाह—

भूमिर्धेनुधरणी लोकधारिणी।
उद्धृताऽसि वराहेण कृष्णेन शतबाहुना, इति।

हे मृत्तिके त्वं प्रलयकाले एकार्णवीभूतायां सप्तार्णव्यां निमग्ना सती कृष्णवर्णेन शतसंख्याकबाहुयुक्तेन वराहावतारेण पूर्वमुद्धृताऽसि। कीदृशी भूमिः, धेनुः कामधेनुवत्प्रीणयित्री। धरणी सस्यानां धारयित्री। लोकधारिणी प्राणिनामपि धारयित्री।

* धनुश्चिह्नान्तर्गतो ग्रन्थोऽधिकः।

तृतीयमन्त्रमाह—

मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम् ।
मृत्तिके ब्रह्मदत्ताऽसि काश्यपेनाभिमन्त्रिता ।
मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् (८), इति ।

षट्पादेयमृङ्महापङ्क्तिच्छन्दस्का । हे मृत्तिके प्रशस्तमृद्यन्मया दुष्कृतमकर्तव्यं पापं कृतं तद्धन विनाशय । किंच यतस्त्वं ब्रह्मणा परमात्मना दत्ता भूमिरूपेण स्थापिता ब्रह्मदत्ताऽसि । ननु मामेवमभिमन्त्र्य कः स्नाति स्मेत्यत आह—काश्यपेन तदुपलक्षितैः परमर्षिभिः स्नानादिकालेऽभिमन्त्रिता तद्दुष्कृतं च हतवत्यसि । अतः शिष्टाचारप्राप्तत्वाद्वयम[प्य]भिमन्त्रयाम इति भावः । किंच मे मह्यं पुष्टिं देहि । यतः पृथिवीरूपायां त्वयि सर्वं चतुर्विधं भूतजातं प्रतिष्ठितं वर्तते । अतस्त्वय्यधिष्ठिताय मह्यं पुष्टिं देहीत्यर्थः । अनन्यपदेन संबुद्धित्रयं भक्त्यतिशयप्रयोजनम् ।

चतुर्थमन्त्रमाह—

मृत्तिके प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके ।
तया हतेन पापेन गच्छामि परमां गतिम् , इति ।

प्रतितिष्ठन्ति प्राणिनोऽस्यामिति प्रतिष्ठिता तत्संबुद्धौ हे प्रतिष्ठिते मृत्तिके मे मत्सबन्धि तत्प्रसिद्धं सर्वं पापं निर्णुद विनाशय । हे मृत्तिके तया प्रसिद्धया त्वया पापेन हतेन सता सति तृतीया । पापे हते सतीत्यर्थः । परमां गतिमपवर्गं गच्छामि ।

एवं दूर्वां मृत्तिकां च दक्षिणहस्ते गृहीत्वा मन्त्रैरभिमन्त्र्याथेन्द्रादप्यभयादिकं प्रार्थ्यते द्वाभ्यां मन्त्राभ्याम् । [तत्र प्रथमं मन्त्रमाह—]

यत इन्द्र भयामहे ततो नो अभयं कृधि ।
मघवञ्छग्धि तव तन्न ऊतये विद्विषो विमृधो जहि, इति ।

हे इन्द्र मघवन्यतोऽस्मा पाप्मनो रिपोर्निरयाद्व(च्च व)यं भयामहे बिभेम ततः पापादिभ्यः सकाशान्नोऽस्मभ्यमभयं कृधि कुरु । निष्पापा निःशत्रवो निर्निरयाश्च त्वत्प्रसादाद्भविष्याम इति भावः । न केवलं पाप्मादित्रितयान्नभयप्रदानमपि तु तत्पाप्मादित्रितयं शग्धि शातय विनाशयेति यावत् । किंच भक्तत्वेन तव संबन्धिनां नोऽस्माकमूतये रक्षणाय विद्विषोऽन्तर्बहिः शत्रून्जहि संहर । कथंभूतान् । विमृध्नन्ति पीडयन्तीति विमृधस्तान् । क्विपि द्वितीयाबहुवचनम् ।

[द्वितीयं मन्त्रमाह]

स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी ।
वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयंकरः, इति ।

इन्द्रः स्नानार्थमुद्युक्तानां **नोऽस्माकं पुरः** पुरस्तात्समक्षमेतु रक्षितुमागच्छतु । कथंभूतः । स्वस्तीहलोकसंबन्धिसौख्यं ददातीति **स्वस्तिदाः(दा)** । सोराजा(डा)देशः । **विशो** भक्तायाः प्रजायाः **पतिः** पालकः । वृत्रं हन्तीति **वृत्रहा** । **विमृधः** शत्रून्वशति स्वाधीनी करोतीति **वशी** वशीकृतरक्षःसंघ इत्यर्थः । वृषति पुष्करावर्तकादीन्मेघानाज्ञाप्य सिञ्चति भूमिमिति **वृषा** । स्वस्ति परलोकसंबन्धि कल्याणं ददातीति **स्वस्तिदाः** । ददातेः क्विप् । **अभयंकरः** स्पष्टम् ।

अथैकेन मन्त्रेणेन्द्रादिभ्यः स्वस्तिपोषो याच्यते स्नानावसरे नक्रग्रहादिजन्या पीडा मा भूदिति—

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु, इति ।

इन्द्रो नोऽस्मभ्यं स्वस्तिं दधातु पोषयतु । किंविधः, **वृद्धश्रवाः** समृद्धयशाः । **पूषा नः स्वस्ति** दधातु । किंविधः , **विश्ववेदा** बहुज्ञानो बहुधनो वा । **तार्क्ष्यो** गरुडो **नः स्वस्ति** दधातु । किंविधः, **अरिष्टनेमिः** । द्राघीयसा पथा गमनेऽपि राक्षसैर्वाऽनुपहिंसितरथः । रथैकदेशवाचिना नेमिशब्देन [रथ] उपलक्ष्यते । **बृहस्पतिरिन्द्रपुरोधा नः स्वस्ति** दधातु । निगदव्याख्यानम् ।

अथैकेन मन्त्रेण सोमेन्द्रौ प्रार्थ्येते—

आपान्तमन्युस्तृपलप्रभर्माधुनिः शिमीवाञ्छरुमाꣳ ऋजीषी ।
सोमो विश्वान्यतसा वनानि नार्वागिन्द्रं प्रतिमानानि देभुः, इति ।

सोमश्चन्द्रमा विश्वानि सर्वाणि **वनान्योषधीवनस्पतीन्पुष्णातीति** शेषः । वनशब्देनात्रोद्भिज्जमात्रं लक्ष्यते । केन साधनेन पुष्णाति । **अतसा,** गगनमण्डले स्वकीयसंततगमनेन । अत सातत्यगमने । सोमः कथंभूतः । **आपान्तमन्युः** । नुमागमस्याऽऽर्षत्वादापातमन्युः । उपर्युपरि क्रोधवानित्यर्थः । यथा मातापित्रादयः शिशुषु वाचा व्याकुप्यन्ति जातुचित्कायेन च नतु कदाचिदप्यन्तरङ्गेण, तथा भगवान्क्षत्रवल्लभोऽपि भक्तेष्वनुजिघृक्षयैतादृक्कोप आपान्तमन्युरित्युच्यते । अहो इदमापातरमणीयमित्यादावापातशब्द उपर्युपरि पर्यायतया प्रयुज्यते । पुनः कथंभूतः । तृपलानां चन्द्रकान्तशिलानां प्रभेव प्रभा यस्य स **तृपलप्रभः** । मधुनो माक्षिकादेः प्रियो **माधुनिः(?)** ।

मधोर्वसन्तस्य वा । वसन्ते खलु रोहिणीनायकः सम्यगवभासते । पर्जन्यस्य पटलहिमादेस्तदानीमभावात् । शमीवृक्षो यस्य प्रियत्वेन वर्तते [स शिमीवान्] । शमीवानिति वक्तव्ये शिमीवानिति प्रयोगश्छान्दसो द्रष्टव्यः । यथा बिल्ववृक्षः शैवस्तथा शमीवृक्षोऽपि शैव इति हेतोर्बिल्वपत्रवच्छमीपत्राण्यपि चन्द्रशेखरमस्तके समर्प्यन्त इति शमीचन्द्रयोरेकाधिकरणत्वादन्योन्यप्रियत्वम् । तथा शरुमान्बहुसौख्यवान् । तथर्जीषी, [illegible] । एवं सोमं स्तुत्वेन्द्रं स्तौति—अर्वाग्वचनव्यत्ययः । अर्वाञ्चि । इन्द्रापेक्षया यान्यर्वाचीनानि प्रतिमानान्युपमानानि [तानि] गुणपराक्रमादिभिरिन्द्रं न देभुः । दम्भु हिंसायाम्, अस्माल्लिटि *बहुवचनम् । न पीडयन्ति स्मेत्यर्थः । लोके खलु स्वस्यान्यदुपमानं दुःखावहं मत्तुल्यं वर्तत इति चिन्तासंपादकत्वात् । तदभावे मत्सदृशो नास्तीति निरतिशयमहिमप्राप्तेः । एवमनुपमानोऽनन्यतुल्यः शचीपतिरस्मानवत्विति वाक्यशेषः ।

अथैकेन परात्मा प्रार्थ्यते—

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।
स बुध्निया उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः, इति ।

परं (रं) ब्रह्म त्रिलोकाचित्रिया (कान्प्रति व्या) वः स्वप्रकाशेन विवृतानकरोत् । " व्यवहिताश्च " इत्युपसर्गक्रिययोर्व्यवधानम् । लोकान्कीदृशः । सुतरां रोचन्ते श्लोभन्त इति सुरुचस्तान् । ब्रह्म कीदृक् । प्रथमं सर्वदेवतादिमम् । पुरस्तात्प्राच्यां दिशि सूर्यरूपेण जज्ञानं जायमानम् । विराजादिजनेः पुरस्तात्प्राग्धिरण्यगर्भरूपेण वा जज्ञानम् । जनेः शानचि शपः श्लौ सति जज्ञानमिति रूपम् । तथा वेनः । व्यत्ययेन वेनं सर्वकमनीयम् । " वी कान्त्यादौ " । किमारभ्य सीमतः । द्वितीयायां तसिल् (यान्तात्तसिः) । सीमानं मर्यादाम् । भूलोकमध्यभागमारभ्य सुरुचस्त्रीँल्लोकान्व्यावः प्रकाशितवानि (वदि) ति भावः । वी कान्त्यादावस्माद्याङ्पूर्वाल्लु (ल्लु) ङि मध्यमैकवचनेऽपि व्यत्ययेन प्रथमपुरुषो ग्राह्यः । त्रैलोक्यप्रकाशमेव स्फुटी करोति । स व्यत्ययेन तद्ब्रह्म बुध्नियाः प्राच्याद्या दिशः सतो विद्यमानस्य घटपटादेर्योनिं स्थानमसतोऽमूर्तस्य वाय्वादेश्च योनिं प्रभवं विवः प्रकाशयति । × वृणोतेः शपि लुप्ते लगुणे (?) च विवरिति रूपम् । अमाङ्योगेऽपि तिङोऽडप्राप्तिश्छान्दसी । बुध्नियाः कीदृशः । उप समीपे मान्ति तिष्ठन्ति भूतानि यासु ता उपमाः सावकाशा इत्यर्थः । माङ्माने वर्तने चेति धातुपाठः । अत एवास्य जगतो विष्ठा विविधस्थानभूताः । विविधं

* प्रथमपुरुषस्येति शेषः । × वेवेतेर्लङि शपि लुप्ते द्वित्वेऽत्वेऽगुणे चेति वक्तुं युक्तम् ।

१ ङ. °रब्रह्मदेवत्या त्रिष्टुब्याज्ञवल्क्यो दृष्ट्वा (द्रष्टा) ब° ।

तिष्ठन्ति यास्विति व्युत्पत्तिः । अम्बाम्बगोभूमीत्यादिना षत्वम् । एताहग्बुध्न्यायाः सह सधोनिं च ब्रह्मैव प्रकाशयति " तस्य भासा सर्वमिदं विभाति " इति मन्त्रान्तरादिति भावः । बुध्ना (बुध्निया) वै दिश इति श्रुतेः (तिः) ।

अथ पुनर्द्वाभ्यां पुनर्गृहीतमृत्तिकाशुद्ध्यर्थं पृथिवी प्रार्थ्यते । [तत्र प्रथममन्त्रमाह]—

स्योना पृथिवि भवानृक्षरा निवेशनी ।
यच्छा नः शर्म सप्रथाः, इति ।

हे पृथिवि विशाले भूमे त्वं नोऽस्मभ्यं स्योना । षोऽन्तकर्मणि । दुःखान्तकर्त्री भव । शर्मैहिकामुष्मिकसुखमपि यच्छ देहि । छान्दसं दीर्घत्वम् । कथंभूता । नृन्मनुष्यांस्तदुपलक्षितचतुर्विधभूतग्रामं क्षारयत्युत्पादयतीति नृक्षरा । उत्पादितान्ग्रामारण्यादिस्थानेषु निवेशयति यथायथं स्थापयतीति निवेशनी । प्रथया मलमूत्रगण्डूषनिष्ठीवनादिसहिष्णुतालक्षणया कीर्त्या सह वर्तमाना सप्रथाः ।

द्वितीयमाह—

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीꣳ सर्वभूतानां तामिहोपह्वये श्रियम्, इति ।

या पूर्वोक्तरीत्या मयाऽभिष्टुता तां भूदेवतामिहास्मिन्स्नानकर्मण्युपह्वये समीपमाह्वयामि । कथंभूताम् । श्रीयते चतुर्विधैर्जनुष्मद्भिरिति श्रीस्तां श्रियम् । गन्धो द्वारमनुमापकलिङ्गं यस्याः सा गन्धद्वारा ताम् । इयं पृथिवी भवितुमर्हति गन्धवत्त्वादित्यनुमानगम्यामित्यर्थः । दुराधर्षां कुद्दालखननाद्युपायसहस्रैरप्यप्रकम्प्याम् । नित्यं नानाविधैः सस्यैर्नगरग्रामादिभिर्गिरिनदीसमुद्रद्वीपादिभिश्च पुष्टा नित्यपुष्टा नित्या चासौ पूर्वोक्तैः पुष्टेति वा ताम् । करीषिणीं कृषीवलैर्बीजावापाय कृष्यमाणाम् । करीषं गोमयमस्यामस्तीति करीषिणी ताम् । करिणो (करीषा) [लक्षणया] गवादिपशवो यस्यां सन्ति सा करीषिणी तामिति वा । नानाविधचतुष्पाद्वतीमित्यर्थः । सर्वभूतानामीश्वरीम् । स्पष्टम् ।

एतैर्मन्त्रैरभिमन्त्रितां मृत्तिकामापादतलमस्तकमुपलिप्य जलप्रवेशनार्थान्प्रार्थयन्त्रानाह—

श्रीर्मे भजतु । अलक्ष्मीर्मे नश्यतु । विष्णुमुखा वै
देवाश्छन्दोभिरिमाँल्लोकानानपजय्यमभ्यजयन् ।
महाꣳ इन्द्रो वज्रबाहुः षोडशी शर्म यच्छतु (१०), इति ।

---

१ छ. °भ्यां परिगृही° ।

मे मां श्रीर्गजान्तलक्ष्मीर्भजतु । मे मत्संबन्धिन्यलक्ष्मीर्ज्येष्ठा देवी नश्यतु । अस्मत्तोऽस्मत्कुलीनतोऽस्मद्बन्धुवर्गतोऽस्मद्ग्रामतोऽस्मद्राष्ट्रतो बहुयोजनान्तरितं दुरिष्ट(दूरी भ)वत्वित्यर्थः । किंच ये विष्णुमुखा लक्ष्मीपतिप्रधाना देवाश्छन्दोभिर्वेदविहितैः साधनैरिमानृ(न)ध्यक्षांश्चतुर्दशसंख्याकाँल्लोकानभ्यजयन् । चिरायोपभोगाय लेभिरे । अभिपूर्वो जयतिर्लब्धिकर्मा । कथम् । अनपजय्यं रक्षोनायकैरपजेतुमशक्यं यथा तथा । ते ना(चा)भीष्टप्रदा भूयासुरिति वाक्यशेषः । वै प्रसिद्धौ । अपि च वज्रबाहुरिन्द्रोऽपि नः शर्म यच्छतु । कीदृशः । महांस्त्रिलोकीपूज्यः । षोडश कला अस्य सन्तीति षोडशी राकाचन्द्रः । लुप्तोपमा, स यथा सर्वाभीष्ट [प्रद]स्तथेन्द्र इति । यद्वा षोडशीति षोडशाक्षरा श्रीविद्योच्यते तज्जयीय(पस्य)पूर्वक[तृ]त्वादिन्द्रोऽपि षोडशी तज्जपप्रभावादेवपतिरैन्द्रीं पदवीमाजगामेति प्रसिद्धेः ।

स्वस्ति नो मघवा करोतु हन्तु पाप्मानं योऽस्मान्द्वेष्टि, इति ।

स्वस्तीति । यजुः । मघवा शचीपतिर्नः स्वस्ति करोतु । यः पाप्माऽस्मान्द्वेष्टि तं पाप्मानं हन्तु ।

सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजम् ।

शरीरं यज्ञशमलं कुसीदं तस्मिन्त्सीदतु योऽस्मान्द्वेष्टि, इति ।

सोमानमिति हे ब्रह्मणस्पते शाखोपशाखासहितानां वेदानां परिपालक हे परमात्मन्मां सोमानं सोमलताभिषोतारं स्वरणं सर्वशाखासूदात्तादिस्वरनेतारं च कृणुहि कुरुष्व । त्वदनुग्रहात्स्वरादियुक्तं वेदानधीत्य सोमादिक्रतून्करिष्यामीत्यर्थः । किंच । उशिक्नाम माता तस्या अपत्यं पुमानौशिजः । नामतः [कक्षीवन्तं] कक्षीवान् । विभक्तिव्यत्ययः । यः परमर्षिः स मम शरीरं यज्ञशमलं यज्ञक्रतुविषयं [शमं]श्रमं श्रमसहिष्णुत्वं लाति स्वी करोतीति यज्ञशमलं [तादृशं] करोतु । किंच यः शत्रुरस्मान्द्वेष्टि स तस्मिन्सीदतु चिरकालं तिष्ठतु । कस्मिन्यत्कुसीदं नरकम् । कुत्सितं यथा तथा सीदन्ति यत्रिनोऽस्मिन्निति व्युत्पत्तिः ।

जानुदघ्ने जले प्रविश्य जप्त्वौ मन्त्रावाह—

चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि ।

तेन पवित्रेण शुद्धेन पूता अति पाप्मानमरातिं तरेम, इति ।

अनेन मन्त्रेण लक्ष्मीपतिचरणारविन्दं स्तूयते । तेन वैष्णवेन चरणेन पूताः पवित्रान्तःकरणा वयमरातिं नरकहेतुत्वेन शत्रुभूतं पाप्मानमतितरेम । तेन कीदृशेन ।

---

१ छ. तज्जापीय° ।

पवित्रेण शुद्धेन स्पष्टम् । तेन केन **येन पूतो** मर्त्यो दुष्कृतानि तराति । य **चरणं पवित्रम्** । विततं विस्तृतम्, भूम्यन्तरिक्षस्वर्गाणामाक्रान्तत्वात् । **पुराणं** पुर तनम् । विष्णोः पुराणपुरुषत्वात्तद्वयवानामपि पुराणत्वम् । अयमेव मन्त्रो ब्राह्मणच णक्षालनेऽपि विनियुज्यते ।

सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहञ्छूर विद्वान् ।
जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः, इति ।

सजोषा इति । हे वृत्रहन्हे शूर हे इन्द्रास्मदधिकृतेष्वग्निष्टोमादिकतुषु समागत्यास्मौ हूयमानं **सोमं पिब** । त्वं कथंभूतः । समानाऽऽस्थान्तःकरणवृत्त्यनुरूपा जोषा प्रीतिर्यस्यासौ **सजोषाः** । गणैः स्वकीयपरिचारकैः सह वर्तत इति **सगणः** । विद्वान्सर्वज्ञः । कैः सह, **मरुद्भिः** सह देवताभिः सह । मरुच्छब्दोऽत्र देवतामात्रवचनः । अपि(जहि) **शत्रूँरप मृध** इत्यत्र " दीर्घादटि समानपादे " इति नस्य रुत्वं पूर्वस्य सानुनासिकत्वं च । तथा च शत्रून[प]मृध इति पदच्छेदः । **शत्रूञ्जहि** । **मृधः** किपि द्वितीयाबहुवचनम् । सङ्ग्रामानपनुदस्व विनाशय । अथानन्तरं **नोऽस्मभ्यं विश्वतः** सर्वतोऽभयं **कृणुहि** ।

नाभिद्वयसजले स्थित्वा मध्यान्मन्त्रानाह—

सुमित्रा न आप ओषधयः सन्तु दुर्मित्रास्तस्मै
भूयासुर्योऽस्मान्द्वेष्टि यं वयं द्विष्मः, इति ।

नोऽस्मान्प्रत्याप ओषधयश्च सुमित्राः सुहृदः सन्तु । योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तस्मै **दुर्मित्रा** दुर्हृदो **भूयासुः** । अस्मभ्यं सुखं शत्रुभ्यो दुःखं चाब्देवता ओषधिवनस्पतिदेवताश्च कुर्वन्वित्यभिप्रायः ।

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन (११), ।
महे रणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः । तस्मा अरं गमाम वो
यस्य क्षयाय जिन्वथ । आपो जनयथा च नः, इति ।

आप इति । हि ष्ठेत्यत्र 'हि' 'स्थ' इति पदच्छेदः । हे आपो हि यस्मात्कारणाद्या यूयं **मयोभुवः स्थ** स्नानपानादिहेतुत्वेन सुखं प्रापयित्र्यो भवथ तस्मात्कारणाद्यू(त्ता यू)यं **नो** युष्मद्भक्तानस्मान्दधातन पोषयत । कस्मै प्रयोजनाय, **चक्षसे** परमात्मदर्शनाय । कथंभूताय । **रणाय** रमणीयाय । तथा मह्यते पूज्यत इति मट्तस्मै **महे**

१ ङ. सुखदा° ।

मोक्षरूपफलत्वान्महते, *भुक्तिमुक्तिप्रयोजनायास्मान्पोषय । अन्यथा जीवनं व्यर्थमित्यभिप्रायः । किंच हे आपो **वो** युष्माकं **यः शिवतमः** कल्याणतमो **रसो** माधुर्यलक्षणोऽस्ति **तस्येहास्यां** भुवि विद्यमानान्**नोऽस्मान्भाजयत** पवित्रयत(पात्रयत) स्थानं कुरुतेत्यर्थः । यथा भाजने जलं तिष्ठति तथा युष्मदीयो रसोऽस्मासु तिष्ठत्विति भावः । अत्र निदर्शनं प्रदर्शयति । **[मातर]** इव यथा मातरः स्वापत्यमुत्तमगुडादि **प्रापयन्ति** तथा । कथंभूताः । उशतीरुशत्योऽपत्यवृद्धिं ———— : । पुत्रदुहित्रादिस्नेहवत्य इति यावत् । किंच हे आपो **वो** युष्मान्वयमर[मल]मत्यर्थं शरणं **गमाम** प्राप्नुमः । **कस्मै** प्रयोजनाय शरणीकरणम्, यस्माद(यस्या)स्मदीयस्य पापजालस्य **क्षयाय** विप्रणाशाय यूयं **जिन्वथ** प्रीतिं कुरुथ, **म(त)स्मै** तत्क्षयार्थमेव । युष्माभिरपि मक्त[प्रिय]त्वादस्मत्पापक्षयार्थमेव यत्नः क्रियतेऽस्माभिरप्येतदर्थमेव युष्मच्चरणं शरणं क्रियते । अन्यथा कथमस्मत्पापक्षयार्थे युष्माभिरुद्यम्यतामित्यभिप्रायः । किंच भो **अम्बेवता नोऽस्माञ्जनयथ** पुत्रदुहित्रादिजननसमर्थान्कुरुथ ।

इतःपरं द्वाभ्यां मन्त्राभ्यां वरुणाभिधानामधिष्ठानदेवतां प्रार्थयते—

हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः ।
यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः ॥
यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम् ।
तन्न इन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनः पुनः, इति ।

सुवर्णमयशृङ्गवदुपर्यवस्थितं मुकुटं यस्यासौ **हिरण्यशृङ्गः**स्तादृशं **वरुणं** जलाधिपतिं **प्रपद्ये** । अनुग्रहार्थं प्राप्नोमि । तादृशो वरुणस्त्वं [मे] मया **याचितः** प्रार्थितः संस्तीर्थमावरणस्थानं **देहि** । किंचासाधूनां पापिनां गृहे **मया यद्भुक्तम्**, तथा **पापेभ्यः** पापिनां सकाशात्**प्रतिग्रहश्च** यः कृतः, अन्यदपि **यद्दुष्कृतं** मानसं वाचिकं कायिकं चानुष्ठितं **मे** मदीयं तत्सर्वमिन्द्रादयो देवास्तदशेषं (दा तदा) **पुनन्तु** शोधयन्तु ।

जलावस्थितदेवान्प्रति नमस्कारमन्त्रं दर्शयति—

नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरुणाय
नमो वारुण्यै नमोऽद्भ्यः (१२), इति ।

आपो यस्याग्नेः सन्ति सोऽयमप्सुमाञ्जलमध्ये निगूढ इत्यर्थः । [तथाविधायाग्नय] **इन्द्राय वरुणाय वारुण्यै** वरुणपत्न्यै जलाभिमानिदेवताभ्यश्च **नमस्कारोऽस्तु** ।

---

* अत्र शुक्लयजुषोऽधिक इव भाति ।

निमज्जनप्रदेशे दुष्टजलापनयन[मन्त्र]माह—

यदपां क्रूरं यदमेध्यं यदशान्तं तदपगच्छतात्, इति ।

अपां संबन्धि यत्क्रूरं रूपं मरणकारणमावर्तादिकं यच्चामेध्यं निष्ठीवनादिदुष्टं यदप्यशान्तं वातश्लेष्मादिजनकं तत्सर्वमस्मान्निमज्जनप्रदेशादपगच्छतु ।

निमज्जनमन्त्रानाह—

अत्याशनादतीपानाद्यच्च उग्रात्प्रतिग्रहात् ।
तन्नो वरुणो राजा पाणिना ह्यवमर्शतु ॥
सोऽहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः ।
नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्म सलोकताम्, इति ।

देवर्षिपितृमनुष्यादियज्ञमतीत्य भुक्तमत्याशनम् । देवर्षिपितृतर्पणमतीत्य पीतमुदकमतिपानम् । इच्छावतीं यः पुमांस्तस्माद्यो धनप्रतिग्रहः स उग्रः । एतैर [त्य]शनातिपानदुष्प्रतिग्रहैः संपादितं यत्पापं मदीयं तत्पू(त्स)र्वं वरुणो राजा जलस्वामी स्वकीयेन पाणिनाऽपनयतु । ततः पापरहितः सोऽहं रजोगुणरहितः संसारकारणरागद्वेषादिदोषान्निर्मुक्तोऽत एवानुष्ठिता(ष्ठास्यमाना)त्यशनातिपानपापरहितः स्वर्गस्योपरिभागमारुह्य ब्रह्मणा हिरण्यगर्भेण समानलोकत्वं गच्छे[द्गच्छे]यम् ।

यश्चाप्सु वरुणः स पुनात्वघमर्षणः, इति ।

यश्चेति । यजुः । अप्सु सप्तसमुद्रोदकेषु नानाविधमहानदीनददीर्घिकाकूपाद्युदकेषु च यो वरुणोऽधिष्ठितः सन्वर्तते स नः पुनातु । कथंविधः । अघं महापातकमपि कर्षति(मर्षयति) विनाशयतीत्यघमर्षणः ।

तीर्थभूतानां गङ्गादीनामावाहनमन्त्रमाह—

इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमꣳ सचता परुष्ण्या ।
असिक्न्या मरुद्वृधे वितस्तयाऽऽर्जीकीये शृणुह्या सुषोमया, इति ।

हे गङ्गे विश्वनाथराजधानीसमीपस्थे भागीरथि हे यमुन आदित्यतनये हे सरस्वति नदीरूपेण विद्यमाने ब्रह्मपत्नि हे शुतुद्येतन्नामसरिद्वरे हे आर्जीकीय एतन्नाम्ना सरिद्वरे हे मरुद्वृध एतन्नामसरिद्वरे यूयं मे व्यत्ययेन मयेमं मनःपूर्वकं वाचा पठ्यमानं स्तोमं स्तुतिरूपमन्त्रसमुदायं शृणुहि व्यत्ययेन शृणुत । श्रुत्वा च युष्मद्युष्मत्स्थानेभ्य आसचत । उपसर्गव्यवधानं सचतेर्दैर्घ्यं च च्छान्दसम् । आगच्छत । मां पावयितुं यथावाञ्छितं दातुं च प्रकृतस्नानस्थानजलमध्यभागं ×प्रतीति शेषः । संनिधद्ध्वं च ।

+ प्रति संनिधद्ध्वं चेति शेष इत्यादिपाठो युक्तः ।

कामिः सह । परुष्णी नाम नदी तया परुष्णिया । असिक्नी नाम नदी तयाऽसिक्निया । उभयत्र तृतीयायामक्षरविश्लेषश्छान्दसः । वितस्त्वा(स्ता) नाम नदी तया वितस्तया सह । सुषोमा नाम नदी तया सुषोमया सह । प्रार्थयितुरयमाशयः— यद्यप्यहमेतन्मन्त्रोक्तानामनुक्तानां च महानदीनां रोधांसि गत्वा चिरकालं स्थित्वा स्नात्वा पीत्वा च दिवसानपनेतुमक्षमस्तथाऽप्यहं यत्र कुत्रचिद्ध्रदकूपाद्युदकेन स्नानं कुर्वाण एतेन मन्त्रेण गङ्गाद्या नदीरुपतिष्ठ उपस्थिताश्चाऽऽगत्य संनिदधतां संनिधाय च मदीयानां महतामप्येनसां विनाशं विदधतां विधाय चैवं मामभिदधतां पूतोऽसि शुद्धोऽसि भुङ्क्ष्व भौमान्भोगान्सकुटुम्बः सपरिवारः साश्रितवर्गश्च भुक्त्वा चान्ते यथेच्छं पुण्यकृतां लोकानाप्नुहीति ।

जले निमग्नस्य प्राणायामार्थमघमर्षणसूक्तमाह—

ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत ।
ततो रात्रिरजायत ततः समुद्रो अर्णवः (१३), ।
समुद्रादर्णवादधि संवत्सरो अजायत ।
अहोरात्राणि *विदधद्विश्वस्य मिषतो वशी ॥
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।
दिवं च पृथिवीं चान्तरिक्षमथो सुवः, इति ।

तिसृणामृचामेकैव पदयोजना । अभित इद्धोऽभीद्धः । ञिइन्धी दीप्तौ । सर्वतो देदीप्यमानः परमात्मा । तस्मादभीद्धात्परमात्मनः सकाशादृतं यावज्ज्ञानोदयस्तावत्तथ्यं पृथिव्यादिभूतपञ्चकमजायतोत्पन्नम् । किंच सत्यं यावज्ज्ञानोदयस्तावत्तथ्यं भुवनचतुर्दशकमजायतोत्पन्नम् । पञ्चभूतानां चतुर्दशभुवनानां च सत्यत्वस्य ज्ञानोदयावधित्वात् । ज्ञानोत्तरकालं मिथ्यात्वाङ्गीकारात् । चकारद्वयं [illegible] समुच्चिनोति । ननु भूतपञ्चकं भुवनचतुर्दशकं च कदा समुत्पन्नमिति चेच्छृणु । तपसोऽधि पर्यालोचनादूर्ध्वम् । अहं ब्रह्माण्डमेवमेवमुत्पादयामीत्थमित्थं जीवयामीतिपर्यालोचनानन्तरमजायतेत्यर्थः । तथाच श्रुतिः—"सोऽकामयत बहु स्यां यदिदं किंच" इति । तप पर्यालोचन इति धातुपाठादत्र तपःशब्देन पर्यालोचनमुच्यते । लोकानुभवोऽपि कुलालो घटमुत्पादयामीत्यालोच्य घटमुत्पादयति [शरावमुत्पादयामी]त्यालोच्य शरावमुत्पादयतीत्यादिः । ततो भूतभुवनोत्पत्त्यनन्तरं रात्रिस्त्रियामाऽजायत । [illegible] ह]रण्यजायतेति मन्तव्यम् ततोऽह उत्पत्तिमनु समुद्रः सप्तधा भिन्नः पारावारोऽजायत । अर्णस्य-

१ विदधदित्यपि पाठः प्रसिद्धो वैदिकेषु ।

१ क. °नारण्यं ना ।

म्भांसि विद्यन्तेऽस्मिन्नित्यर्णवो वापीकूपतटाकादिरजायत । **समुद्रादर्णवादधि समुद्रा**
र्णवजन्मनः पश्चात्संवत्सर एकादशमासात्मको द्वादशमासात्मकस्त्रयोदशमासात्मकश्चा
जायत । संवत्सरः कथंभूतः । **अहोरात्राणि** औपलक्षण्येन घटिकामुहूर्तप्रहरादि(र्दी)**न्**
विदधद्विदधानः कुर्वाण इति यावत् । पुनः कथंभूतः । **वशी** स्वाधीनकर्ता । **कस्य**
विश्वस्य जगतः । कथंभूतस्य, **मिषतो** निमेषं कुर्वतः । उपलक्षणमेतदनिमिषत इत्य
त्र(स्य) । व्यापारं कुर्वतोऽकुर्वतश्चराचरात्मकस्येति भावः । संवत्सरात्मा कालः **परमा**
त्मनः सकाशादुत्पन्नः सन्सर्वं जगद्वशी करोतीत्यभिप्रायः । नन्वाधाराधेयभावेन विद्य
मानं सर्वं ब्रह्माण्डं परमात्मोत्पादयामासेत्युक्तं तत्कथमाकारमुत्पादयामासेत्यत्राऽऽह
धाता परमेश्वरः **सूर्याचन्द्रमसौ** पुष्पवन्तौ **पृथिवीमन्तरिक्षं दिवं सुवर्लोकञ्चयस्यं**
भोग्यजातम् । **अथो** अध इत्येतस्मिन्नर्थ ओदन्तमव्ययम् । अधस्ताद्विद्यमानं लोकसप्त
कमपि **यथापूर्वं** पूर्वपूर्वकल्पेषु यथा यथाऽकल्पयदजनयत्तथा तथेदानींतने कल्पेऽप्य
कल्पयदित्यर्थः । चकारावुक्तमनुक्तं समुच्चिन्वाते । केचित्तु ऋतं यथार्थभाषणं सत्यं
यथार्थे संकल्पनामिति व्याचक्षते । तेषां व्याख्याने भूतभुवनोत्पत्त्यनन्तरमित्यादावध्याह-
र्तव्यम् । अन्यथा भूतानि भुवनानि च नोत्पन्नानि चेत्कुतः प्राणिनः कुतो वा वाङ्मन-
सादिव्यापारः कथं वा समुद्राद्युत्पत्तिः, अस्मदुक्तं वा श्रद्धेयम् ।

अघमर्षणं कृत्वाऽत ऊर्ध्वमवगाहनार्था ऋचो दर्शयति—

यत्पृथिव्याꣳरजः स्वमान्तरिक्षे विरोदसी ।
इमाꣳस्तदापो वरुणः पुनात्वघमर्षणः ॥
पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः ।
एष भूतस्य मध्ये भुवनस्य गोप्ता ॥
एष पुण्यकृतां लोकानेष मृत्योर्हिरण्मयम् ।
द्यावापृथिव्योर्हिरण्मयꣳ सꣳश्रितꣳ सुवः (१४), ।
स नः सुवः सꣳशिशाधि, इति ।

पृथिव्यां वर्तमानानामस्माकं [स्वं] रजः स्वकीयं पापं यदस्ति । **आन्तरिक्षे** सर्व-
तोऽन्तरिक्षलोके **विरोदसी** द्यावापृथिव्योर्यत्पापमस्ति । अत्र रोदस्यो· पृथगुक्तत्वात्पृ-
थिव्यामितिपदेन भूमेरधस्ताद्वर्तमानः पाताललोको विवक्षितः । सर्वेष्वपि लोकेषु तत्त-
ज्जन्मान्यनुभवतामस्माकं यत्पापमस्ति तत्सर्वं पापं तदनुष्ठातॄनिमानस्मांश्च **वरुणः**
पुनातु शोधयतु । पापं विनाश्य शुद्धानस्मान्करोतु । कीदृशो वरुणः । **आपो** जल-
स्वामित्वेन तद्रूपः । अघानि मर्षयति विनाशयतीत्यघमर्षणः । किंच **वसवः पुनन्तु** ।

वरुणः पुनातु । **अघमर्षणनामर्षिः पुनातु** । तादृश **एष** वरुणो **भूतस्यातीतस्य भुवनस्य** प्राणिजातस्य **गोप्ता** रक्षिता । तथा भूतस्य भव्यस्य भविष्यतोऽपि(?) जगतो गोप्ता । **एष** एव वरुणः **पुण्यकृतां** ज्योतिष्टोमादिकारिणां लोकान्प्रयच्छतीति शेषः । **एष** वरुणो **मृत्योः** सर्वप्राणिमारकस्य संबन्धिनं **हिरण्मयं** लोकविशेषं प्राणि(पापि)-नां प्रयच्छतीति शेषः । यत्तु **हिरण्मयं** ब्रह्माण्डरूपं **सुवः** स्व[र्ग]शब्दाभिधेयं **द्यावा-पृथिव्योर्द्युलोकभूलोकयोः संश्रितं** वर्तते, हे वरुण **स** त्वं **नोऽस्मान्प्रति सुवस्तादृशं** स्वर्गलोकं **संशिशाधि** सम्यगनुगृहाण ।

स्नातवतः पुरुषस्याऽऽचमनमन्त्रानाह—

आर्द्रं ज्वलति ज्योतिरहमस्मि । ज्योतिर्ज्वलति ब्रह्माहमस्मि । योऽहमस्मि ब्रह्माहमस्मि । अहमस्मि ब्रह्माहमस्मि । अहमेवाहं मां जुहोमि स्वाहा, इति ।

यदेतदुदकरूपमार्द्रं तदेतत्स्वाधिष्ठानचैतन्येन ज्वलति प्रकाशते । तच्चाधिष्ठानचैत-न्यरूपं [**ज्योतिरहमस्मि** ।] तदेवोपपाद्यते । यज्ज्योतिर्ज्वलतीत्युक्तं तज्ज्योति-र्ब्रह्मैवातो ज्योतिरहमस्मीति वाक्येन **ब्रह्माहमस्मीत्युक्तं** भवति, नतु पूर्ववज्जीवाशिवा-त्मनः स्वरूपं विनाश्य रूपान्तरस्य ब्रह्म[त्व]लक्षणस्य [illegible]। किं तर्हि **योऽहं** पुरा जीवोऽस्मि स एवेदानीमहं **ब्रह्मास्मि** । वस्तुतो ब्रह्मण्येव मयि पूर्वमज्ञा-नाज्जीवत्वमारोपितमासीत्तस्मिन्नज्ञाने विवेकेनापनीते सति वस्तुतः पूर्वसिद्धमेव ब्रह्मरूप-त्वमिदानीमनुभवतो न तु नूतनं किंचिद्ब्रह्मत्वमागतम् । अहमहमेवाहंकारसाक्ष्येव(वा)-[स्मि] न त्वहंकारस्वरूपः, **अहं ब्रह्मास्मि**, तस्मादहमेव, अहं ब्रह्मतत्त्वानुभववेला-यामपि पूर्वसिद्धोऽहमेव । नतु योषित्यग्निध्यानवदुपचरितं ब्रह्मत्वम् । तादृ-शोऽहं **जलरूपं मां जुहोमि** । आधा (उद) राग्नौ प्रक्षिपामि । हविष्प्रदानवाची **स्वाहाशब्दः** । मद्देहवर्तिभ्यः प्राणाद्यभिमानिभ्यो देवेभ्यो जलरूपं हविर्दत्तमित्यर्थः ।

आचमनादूर्ध्वं पुनरपि स्नाने मन्त्रमाह—

अकार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः । वरुणोऽपामघमर्षणस्तस्मात्पापात्प्रमुच्यते, इति ।

अकार्यं शास्त्रप्रतिषिद्धं कलञ्जभक्षणादिकं तत्कर्तुं शीलं यस्यासा**वकार्यकारी** । **प्रतिषिद्धस्त्रीगमनवानवकीर्णी** । ब्राह्मणसुवर्णहर्ता **स्तेनः** । वेदवेदाङ्गविद्ब्राह्मणो गर्भो वा [भ्रूण]स्तं हन्तीति **भ्रूणहा** । गुरुदारगामी तु **गुरुतल्पगः** । एतादृशपापका-रिणमपि **मामघमर्षणः** पापविनाशकोऽपां स्वामी **वरुणस्तस्मात्सर्वस्मात्पापात्प्रमु-च्यते** मोचयतु ।

रहस्यपापक्षयार्थं स्नानमन्त्रमाह—

रजोभूमिस्त्व मा५ रोदयस्व प्रवदन्ति धीराः, इति ।

यजुः । हे परमात्मन्नहं यद्यपि रजोभूमिः पापस्थानं तथाऽपि तु(त्व) । अनुस्वारलोपश्छान्दसः । त्वं मां न रोदयस्व । नकारोऽध्याहर्तव्यः । मदीयपापफलं मां भोजयितुं न रोदय किंतु पापं विनाश्यानुगृह्णेति धीरा धीमन्तः शास्त्रपारं गताः प्रवदन्ति । य(त)तोऽहमपि प्रवदामीत्यर्थः ।

स्नानादूर्ध्वं जप(प्यं) मन्त्रमाह—

आक्रान्त्समुद्रः प्रथमे विधर्मञ्ज-
नयन्प्रजा भुवनस्य राजा ।
वृषा पवित्रे अधि सानो अव्ये बृह-
त्सोमो वावृधे सुवान इन्दुः (१५), इति ।

पुरस्ताद्यशो गुहासु मम चक्रतुण्डाय धीमहि तीक्ष्णदꣳष्ट्राय धीमहि परि प्रतिष्ठितं देभुर्यच्छतु दधातनाद्भयोऽर्णवः सुवो राजैकं च ॥ १ ॥

रुद्रो रुद्रश्च दन्तिश्च नन्दिः षण्मुख एव च । गरुडो ब्रह्म विष्णुश्च नारसिꣳहस्तथैव च । आदित्योऽग्निश्च दुर्गिश्च क्रमेण द्वादशाम्भसि । *म मं व च म सु वे ना व भा वै कात्यायनाय ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि प्रथमोऽनुवाकः ॥ १ ॥

समुद्रवत्प्रौढत्वादसङ्गात्मनः परमानन्दस्वभावत्वाद्वा समुद्रः परमात्मा । स च सर्वं जगदा[क्राना]क्रान्तवान्व्याप्तवान् । किं कुर्वन् । प्रथमे सृष्टेरादिकाले प्रजा जनयन् । कीदृशे प्रथमे काले, विधर्मन्विधर्मणि । प्राणिभिः पूर्वकल्पेऽनुष्ठिता विविधा धर्मा यस्मिन्काले स्वफलदानार्थमुद्बोध्यन्ते सोऽयं विधर्मा तस्मिन् । स च परमात्मा भुवनस्य पालकत्वाद्राजा । स्वभक्तानां कामानां वर्षणहेतुत्वाद्वृषा । ईश्वरः(दृशः) सर्वत्र व्याप्तवान् । सानो सानौ पर्वतपार्श्वभागे । श्रुत्यन्तरे 'तं ब्रह्मगिरिरित्याचक्षते' इति श्रवणाद्ब्रह्मावबोधयोग्योऽयं देहो गिरिस्तदवयवः सानुर्हृदयपुण्डरीकम् । तच्च पवित्रं बाह्यदेहावयववदुच्छिष्टस्पर्शादिदोषाभावाच्छुद्धम् । अधि पुरुषार्थहेतुभूत[ध्यान]स्थानत्वादितरावयवेभ्योऽप्यधिकम् । अत एव ध्यातृणामवनस्य पालनस्य हेतुत्वादव्यम् । हिमवत्पुत्र्या गौर्या ब्रह्मविद्याभिमानित्वाद्गौरीवाचक उमाशब्दो ब्रह्मविद्यामुपलक्षयति । अत

* एतत्प्रभृति कात्यायनायेत्यन्तं ज. पुस्तके नास्ति ।

एव तलवकारोपनिषदि ब्रह्मविद्यामूर्तिप्रस्तावे ब्रह्मविद्यामूर्तिः पठ्यते-"बहुशोभमानामुमां हैमवतीं तां होवाच" इति। तद्विषयः परमात्मा तयोमया सह विद्यमानत्वात्सोमः, स च सानौ हृदयपुण्डरीके बृहद्ब्रह्म यथा भवति तथा वावृधे वृद्धिं प्राप्तः । पूर्वमविद्यावृतत्वेन संकुचितो जीवो भूत्वा तस्यामविद्यायां विद्ययाऽपनीतायां ब्रह्मत्वाविर्भावात्स वृद्ध इत्यवभासत इत्यर्थः। स च सोमः सुवानो जनानां धर्माधर्मयोः प्रेरकः । इन्दुः फलदानेन चाऽऽह्लादहेतुः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि भाष्ये प्रथमोऽनुवाकः ॥ १ ॥

==========

अथ द्वितीयोऽनुवाकः ।

तत्रा(अथा)निष्टपरिहारार्थत्वेन जप्या मन्त्रास्तत्र प्रथमामृचमाह—

जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः॥इति।

वेदांसि वेदनानि ज्ञानानि तानि जातान्युत्पन्नानि यस्मादग्नेः सोऽयं जातवेदाः । आधानेन संस्कृतेऽग्नौ पश्चात्कर्तव्यविषयाणि ज्ञानान्युत्पद्यन्ते तस्मै **जातवेदसे** यागकाले लतात्मकं **सोमं सुनवामाभिषुतं** करवाम । स्वयं सर्वं वेत्तीति वेदोऽग्निः, स **चारातीयतोऽस्मास्वरातित्वं** कर्तुमिच्छतः पुरुषान्निदहाति नितरां भस्मी करोति । किंच **सोऽग्निर्नोऽस्माकं विश्वा दुर्गाणि** सर्वा आपदोऽतिपर्षत्, अतिशयेन नाशितवानित्यर्थः। किंच यथा लोके **नावा सिन्धुं** समुद्रं [नाविकस्तारयति तथाऽग्निर्दुरिता दुरितानि पापान्यतिशयेन] तारयतीति शेषः ।

द्वितीयामृचमाह—

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीꣳ शरणमहं प्रपद्ये सुतरसि तरसे नमः, इति ।

येयं वन(?)दुर्गाकल्पादिषु वन(?)शास्त्रेषु प्रसिद्धा तां **दुर्गां देवीं शरणं प्रपद्ये** । कीदृशीम् । [**अग्निवर्णाम्**,] अग्निसमानवर्णाम् । **तपसा** स्वकीयेन संतापेन **ज्वलन्तीमस्मच्छत्रून्दहन्तीम्** । विशेषेण रोचते स्वयमेव प्रकाशत इति विरोचनः परमात्मा तेन दृष्टत्वाद्वैरोचनीम् । **कर्मफलेषु** स्वर्गपशुपुत्रादिषु निमित्तभूतेषु **जुष्टामुपासकैः** सेविताम् । हे **सुतरसि** सुष्ठु संसारतरणहेतो देवि **तरसे** तारयित्र्यै तुभ्यं **नमोऽस्तु** ।

तृतीयामाह—

अग्ने त्वं पारया नव्यो अस्मान्त्स्वस्तिभिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः, इति ।

हेऽग्ने नव्यः स्तोतव्यस्त्वमस्मान्स्वस्तिभिः क्षेमकारिभिरुपायैर्विश्वा दुर्गाण्यति सर्वा आपदोऽतिशयेन लङ्घयित्वा पारय संसारपारं(पर)तीरं नय । नोऽस्माकं त्वत्प्रसादात्पूश्च निवासयोग्या पुरी पृथ्वी सा विस्तीर्णा भवतु । उर्वी सस्यनिष्पादनयोग्या भूमिरपि बहुला भवतु । त्वं च तोकाय तनयायास्मदपत्याय तदीयपुत्राय च शंयोर्भव सुखस्य मिश्रयिता भव ।

चतुर्थीमाह—

विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरिताऽतिपर्षि ।
अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम्, इति ।

हे जातवेदो दुर्गहा सर्वासामापदामपहन्ता विश्वानि त्वं दुरिता सर्वाणि पापानि नावा सिन्धुं न समुद्रमिव नोऽस्मानतिपर्षि अतिशयेन तारयसि । हेऽग्नेऽत्रिवदाध्यात्मिकादितापत्रयरहितत्वेनात्रिशब्दवाच्यो जीवन्मुक्तो महर्षिः "आत्मौपम्येन भूतानां दयां कुर्वीत मानवः" इत्येतच्छास्त्रमनुसृत्य "सर्वे च सुखिनः सन्तु सर्वे सन्तु निरामयाः" इत्येवं मनसा यथा सर्वदा भवति (भावयति) तथा त्वमपि मनसा गृणान उच्चारयन्भावयन्नस्माकं तनूनामविता रक्षिता भूत्वा बोधि बुध्यस्व सावधानो भवेत्यर्थः ।

पञ्चमीमाह—

पृतनाजितꣳ सहमानमुग्रमग्निꣳ हुवेम परमात्सधस्थात् ।
स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अतिदुरिताऽत्यग्निः, (*१), ।

पृतना परकीयसेना तां जयतीति पृतनाजित्तम् । अत एव सहमानं शत्रूनभिभवन्तमुग्रं भीतिहेतुमग्निं परमादुत्कृष्टात्सधस्थात्स्वकीयैर्भृत्यैः सहावस्थानदेशाद्धुवेमाऽऽह्वयामः । स न इत्यादि पूर्ववत् । किंचाग्निर्देवः क्षामदस्मानपराधिनः क्षममाणोऽति दुरिताऽतिशयितानि पातकानि ब्रह्महत्यादीन्यति लङ्घयतीति शेषः ।

षष्ठीमृचमाह—

प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।
स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व, इति ।

---

* व. पुस्तकेऽयमङ्को नास्ति ।

---

१ क. °हुर्ता त्वं ।

हेऽग्ने त्वमध्वरेषु यागेष्वीड्यः स्तुत्यः सन्कं सुखं प्रत्नोषि प्रतनोषि विस्तारयसि । सनाच्च कर्मफलस्य दाताऽपि सन्हो[ता हो]मनिष्पादको नव्यः स्तुत्योऽपि भूत्वा सत्सि सीदसि यागदेशे तिष्ठसि । अतो हेऽग्ने स्वां च स्वकीयामपि तनुवं प्रियस्व स्वकीयहविषा प्रीणय । ततोऽरमभ्यं च सौभगं शोभनभाग्योपनीतत्वमायजस्व सर्वतो देहि ।

सप्तमीमृचमाह—

गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनुसंचरेम ।
नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम्*[२] । इति

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि द्वितीयोऽनुवाकः ॥ २ ॥

हे इन्द्र वयं तव व्यत्ययेन त्वामनुसंचरेम । भृत्या इव त्वत्सेवका भवेमेत्यर्थः । तव कथंभूतस्य । न युज्यते पापैर्दुःखैश्चेत्ययुक्तस्यायुजः । तथा विष्णोः सर्वयागेषु व्यापकशीलस्य । किमुद्दिश्य, गोभिर्धेनुभिर्जुष्टं निषेवितममृतधाराभिर्निषिक्तं महाभाग्यमुद्दिश्येति शेषः । किंच सर्वे देवा मां मादयन्तां वाञ्छितप्रदानैर्हर्षयन्तु । कुत्र । इह लोके भूमौ । सर्वे देवाः कथंविधाः, नाकस्य पृष्ठमुपरिभागमभि सर्वतः संवसानो व्यत्ययेन संवसाना आश्रित्य विद्यमानाः । मां कथंभूतम्। वैष्णवीं विष्णुसंबन्धिनीं भक्तिं कुर्वाणामिति शेषः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये द्वितीयोऽनुवाकः ॥ २ ॥

अथ तृतीयोऽनुवाकः ।

इतः परं पापक्षयार्थद्वाराऽन्नकामस्य होममन्त्रानाह । भूसंस्काराद्याज्यसंस्कारान्तं स्वगृह्योक्तविधया कर्म कृत्वैतैर्मन्त्रैराज्यं मन्त्रलिङ्गादन्नं वा होतव्यम् । अयं प्रधानयागः स्विष्टकृदादि च पुनर्गृह्येण विधिना कर्तव्यम्—

भूरन्नमग्नये पृथिव्ये स्वाहा भुवोऽन्नं वायवेऽन्तरिक्षाय
स्वाहा सुवरन्नमादित्यायं दिवे स्वाहा भूर्भुवः सुवरन्नं

* एतदग्रे " अग्निश्चत्वारिं च " इति परिगणनं क्वचित्प्रासिद्धम् ।

चन्द्रमसे दिग्भ्यः स्वाहा नमो देवेभ्यः स्वधा
पितृभ्यो भूर्भुवः सुवरन्नमोम् (३), इति ॥
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोप-
निषदि तृतीयोऽनुवाकः ॥ ३ ॥

भूर्भुवः सुवरिति त्रीणि पदान्यव्ययानि त्रैलोक्याधिष्ठानदेवतावाचकानि च । **भूः** पृथिव्यधिष्ठानदेवता मह्यमन्नं दद्यादिति शेषः । तदर्थं च **चरुरूपमन्नं** मयाऽस्मिन्स्मार्ताग्नौ **स्वाहा** सुहुतमस्तु । कस्मै । **अग्नये** पृथिव्यधिष्ठिताय **पृथिव्या** अग्न्यधिष्ठात्र्यै च । पर्यायद्वयेऽपीत्थमेव व्याख्याप्रकारः । चतुर्थपर्याये तु **भूः, भुवः, सुवः,** एतास्तिस्रोऽधिष्ठात्र्यो मह्यमन्नं दद्युरिति शेषः । समानमन्यत् । एवं प्रधानयाग(गं) स्विष्टकृता कृत्वाऽन्ते प्राङ्मुखीभूय **नमो देवेभ्य** इति मन्त्रेण देवान्दक्षिणामुखः **स्वधा पितृभ्य** इति मन्त्रेण पितॄंश्चोपतिष्ठते । **स्वधाशब्दः** पितृप्रियं नमस्काराद्युपचारं ब्रूते । दैन्यत्वाद्धोमस्य *तु(?) । पिण्डदानादिपैतृकप्रकरणे पठितोऽयमेव स्वधाशब्दः पितॄनुद्दिश्येदं कव्यं स्वधा सुनिहितमस्त्वित्यमुमर्थं ब्रूते । ओंकारोऽभ्यनुज्ञां कथयति । अस्मत्प्रार्थितमन्नं दातुं **भूर्भुवः सुवस्तिस्रो** देवता **ओम्**, दद्यामेत्यङ्गी कुर्वन्त्वित्यर्थः ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधे-
ययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये तृतीयोऽनुवाकः ॥ ३ ॥

==========

अथ चतुर्थोऽनुवाकः ।

इतः परं केवलपापक्षयार्था मन्त्रा उच्यन्ते । आज्यमेवात्र होतव्यं नान्यन्मन्त्रलिङ्गाभावात् । आज्यस्य सर्वहोमसाधारणत्वात् । फलान्तरानुक्तेः पापक्षय एव फलम् ।

भूरग्नये पृथिव्यै स्वाहा भुवो वायवेऽन्तरिक्षाय स्वाहा सुवरा-
दित्याय दिवे स्वाहा भूर्भुवः सुवश्चन्द्रमसे दिग्भ्यः स्वाहा नमो
देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवरन्न ओम् (४), इति ॥
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोप-
निषदि चतुर्थोऽनुवाकः ॥ ४ ॥

* अयं तुशब्दोऽधिक इव भाति ।

भूरादयस्तिस्रो लोके प्रसिद्धा इदमाहुतिद्रव्यं स्वीकृत्यास्मत्पापं निवारयन्त्विति शेषः । हेऽग्ने त्वमपि मत्प्रार्थितमोम्, कर्तुमङ्गी कुरु ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये चतुर्थोऽनुवाकः ॥ ४ ॥

=====

अथ पञ्चमोऽनुवाकः ।

महत्त्वकामस्य तत्फलका होममन्त्रा उच्यन्ते—

भूरग्नये च पृथिव्यै च महते च स्वाहा भुवो वायवे चान्तरिक्षाय च महते च स्वाहा सुवरादित्याय च दिवे च महते च स्वाहा भूर्भुवः सुवश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवर्महरोम्, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि पञ्चमोऽनुवाकः ॥ ५ ॥

तिस्रो देवता महर्महत्त्वं सर्वपूज्यत्वं दद्युरिति शेषः । महत इत्यग्न्यादीनां विशेषणं वचनलिङ्गविपरिणामेना[न्यत्राप्य]न्वेतव्यम् । एतत्सर्वं मान्त्रिक्यो देवता ओमङ्गी कुर्वन्तु । समानमन्यत् ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये पञ्चमोऽनुवाकः ॥ ५ ॥

=====

अथ षष्ठोऽनुवाकः ।

पूर्वत्र भूरग्नय इत्यनुवाके सर्वसाधारणाः पापक्षयार्था होममन्त्रा उक्ताः । अथ प्रतिबन्धनिवारणेन मुमुक्षोर्ज्ञानप्राप्त्यर्थं होममन्त्रा उच्यन्ते—

पाहि नो अग्न एनसे स्वाहा । पाहि नो विश्ववेदसे स्वाहा ।
यज्ञं पाहि विभावसो स्वाहा । सर्वं पाहि शतक्रतो स्वाहा, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि षष्ठोऽनुवाकः ॥ ६ ॥

---

१ ब. १९ ॥ २ य. २० ॥

हेऽग्ने नोऽस्मानेनसो ज्ञानप्रतिबन्धकात्पापात्पाहि रक्ष । तुभ्यमिदं स्वाहा सुहुतमस्तु । नोऽस्माकं विश्ववेदसे कृत्स्नतत्त्वज्ञानसिद्ध्यर्थं पाहि तत्साधनसंपादनेन पालय । तदर्थं तुभ्यमिदं स्वाहा सुहुतमस्तु । विशेषेण भानं दीप्तिर्विभा सैव वसु धनं यस्याग्नेः सोऽयं विभावसुः । हे विभावसो यज्ञं विविदिषाहेतुत्वेनास्माभिरनुष्ठीयमानं पाहि, निर्विघ्नेन समाप्तिं नीत्वा पालय । शतसंख्याः क्रतवो येनाग्निना निष्पाद्यन्ते सोऽयं शतक्रतुः । हे शतक्रतो सर्वं ज्ञानसाधनं गुरुशास्त्रादिकं पाहि ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये षष्ठोऽनुवाकः ॥ ६ ॥

अथ सप्तमोऽनुवाकः ।

पुनरपि पूर्वोक्तप्रयोजनकाहुतिच तुष्टयमन्त्रा उच्यन्ते—

पाहि नो अग्न एकया । पाह्युत द्वितीयया । पाह्यूर्जं तृतीयया । पाहि गीर्भिश्चतसृभिर्वसो स्वाहा, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि सप्तमोऽनुवाकः ॥ ७ ॥

हेऽग्ने हे वसो जगन्निवासहेतो त्वमेकयर्ग्वेदलक्षणया गिराऽभिष्टुतः सन्नोऽस्मान्पाहि । तदर्थमिदमाज्यं तुभ्यं स्वाहा सुहुतमस्तु । स्वाहाशब्दः सर्वत्रानुषज्यते । उतापि च द्वितीयया यजुर्वेदरूपया गिराऽभिष्टुतः सन्नोऽस्मान्पाहि स्वाहा । किंच तृतीयया सामवेदात्मिकया गिराऽभिष्टुतः सन्नः संबन्ध्यूर्जमन्नमन्नरसं च पाहि स्वाहा। अपि चर्ग्यजुःसामाथर्वणरूपाभिश्चतसृभि[र्गीर्भिरभि]ष्टुतः सन्नः पाहि स्वाहा ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये सप्तमोऽनुवाकः ॥ ७ ॥

अथाष्टमोऽनुवाकः ।

अथ (थ) ज्ञानप्रतिपादकृत्स्नवेदान्तप्राप्तिकामेन जप्यं मन्त्रमाह—

यश्छन्दसामृषभो विश्वरूपश्छन्दोभ्यश्छन्दाँस्याविवेश । सचाँ शिक्यः पुरोवाचोपनिषदिन्द्रो ज्येष्ठ इन्द्रियाय

ऋषिभ्यो नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवश्छन्द ओम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषद्यष्टमोऽनुवाकः ॥ ८[1] ॥

यः प्रणवश्छन्दसां वेदानां मध्य ऋषभ (भो) ज्येष्ठो विश्वरूपः सर्वजगदात्मकः । एतदेवर्षभत्वं विश्वरूपत्वं च सांहित्यामुपनिषदि प्रपञ्चितम् । तादृशः प्रणवश्छन्दोभ्यो वेदेभ्यः प्रादुर्भूत इति शेषः । वेदसारत्वेन प्रजापतेः प्रत्यभादित्यर्थः । स पुनश्छन्दांसि गायत्र्यादीन्याविवेश । छन्दोभिरुपलक्षितेषु मन्त्रेषु प्रयोक्तव्यः । तथा च प्रपञ्चसारेऽभिहितम्—" अस्य [तु] वेदादित्वात्सर्वम [नूनां] प्रयुज्यते ह्यादौ " इति । तेन प्रणवेन प्रतिपाद्य इन्द्रः परमैश्वर्ययुक्तः परमात्मोपनिषत्पुरोवाच । उपनिषद्ब्रह्म (षदं ब्र) ह्म [विद्यां] वेदान्तसिद्धान्तमुक्तवान् । कीदृश इन्द्रः । सचां सतां शिक्षयः सद्भिः कर्मानुष्ठायिभिरुपासकैर्ज्ञानिभिश्च प्राप्तुं शक्यः । ज्येष्ठः कारणत्वेन सर्वस्मात्प्रथमः । किमर्थं विद्यामुक्तवान्, तदुच्यते । ऋषिभ्य ऋषीणामन्तर्मुखानां (णां) जिज्ञासूनामिन्द्रियाय ज्ञानसामर्थ्याय । अतोऽहं तत्प्रतिबन्धनिवारणाय देवेभ्यश्च पितृभ्यश्च नमस्करोमि । भूर्भुवःसुवर्लोकत्रयावस्थितं छन्दो मन्त्रब्राह्मणात्मकं वेदमों प्राप्नोति (मि) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्येऽष्टमोऽनुवाकः ॥ ८ ॥

==========

अथ नवमोऽनुवाकः ।

अथ लब्धानां वेदानामविस्मरणाय जप्यं मन्त्रमाह—

नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयासं कर्णयोः श्रुतं मा च्योढ्वं ममामुष्य ओम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमपाठके नारायणोपनिषदि नवमोऽनुवाकः ॥ ९[3] ॥

ब्रह्मणे जगत्कारणाय नमोऽस्तु । तत्प्रसादान्मदीये चित्ते ग्रन्थतदर्थयोर्धारणमस्तु । अनिराकरणं निराकरणं विस्मरणं यथा न भवति तथा धारयिता भूयासम् । अमुष्येत्थं प्रार्थयमानस्य मम कर्णयोर्यत्किंचिद्वेदशास्त्रादिकं यदा कदाचि-

---

१ व. २२ ॥ २ छ. °र्थार्थाय । अ° । ३ व. २३ ॥

दपि श्रुतमासीत्तत्सर्वं [हे] देव मा च्योद्वं मा विनाशय । ततोऽहमों प्राप्नुयां स्थिरं धारणमिति शेषः ॥

इति कृष्ण यजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये नवमोऽनुवाकः ॥ ९ ॥

अथ दशमोऽनुवाकः ।

अथ ज्ञानसाधनं चित्तैकाग्र्यरूपं तपोऽस्ति, " मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः " इति श्रुतेः । तत्तपः श्रौतस्मार्तसर्वकर्मस्वरूपतया प्रशंसति । यद्वा तथाविध-तपःसिद्ध्यर्थं जप्यं मन्त्रमाह—

ऋतं तपः सत्यं तपः श्रुतं तपः शान्तं तपो
दमस्तपः शमस्तपो दानं तपो यज्ञं तपो
भूर्भुवः सुवर्ब्रह्मैतदुपास्यैतत्तपः, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि दशमोऽनुवाकः ॥ १०* ॥

ऋतं मनसा यथार्थवस्तुचिन्तनम् । सत्यं वाचा यथार्थं भाषणम् । श्रुतं वेदस्य पूर्वोत्तरभागार्थावबोधायोभयोर्मीमांसयोः श्रवणम् । शान्तं शान्तिर्वा [ह्येन्द्रियाभ्यन्तरेन्द्रियोपरतिः] दमो दमनं यथोक्तोपवासादिभिः शरीरकर्षणम् । शमः शत्रुष्वपि क्रोधराहित्यम् । दानं धनेषु स्वत्वानिवृत्तिः परस्वत्वापादनपर्यन्तम् । यज्ञोऽग्निहोत्रादीनि [कर्माणि] तदेतत्सर्वमर्वाचीनं तपः । भूरादिलोकत्रयात्मकविराड्देव(ह)रूपं यद्ब्रह्मास्ति हे मुमुक्षवेतद्ब्रह्मोपास्य विजातीयप्रत्ययरहितं सजातीयप्रत्ययप्रवाहं कुरु । एतदुपासनं तपः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि भाष्ये दशमोऽनुवाकः ॥ १० ॥

अथैकादशोऽनुवाकः ।

अथ विहितानुष्ठानरूपं पुण्यं ज्ञानसाधनतया प्रशंसति । निषिद्धाचरणरूपं तु ज्ञान-प्रतिबन्धकतया निन्दति—

यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य

* अत्र घ. पुस्तके (२४) अङ्को वर्तते ।

कर्मणो दूराद्बन्धो वाति यथाऽसिधारां कर्तेऽवहि-
तामवक्रामे यद्युवे युवे हवा विह्वयिष्यामि कर्ते पति-
ष्यामीत्येवममृतादात्मानं जुगुप्सेत्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषद्ये-
कादशोऽनुवाकः ॥ ११ ॥

यथा वृक्षस्योद्यानादौ स्थितस्य चम्पकादिलक्षणस्य **संपुष्पितस्य** सम्यग्विकसितपुष्पोपेतस्य **यो गन्धः** [सुरभिरस्ति सोऽयं] **दूराद्दूरदेशाद्वाति** वायुना सहाऽऽगच्छति, **एवं पुण्यस्य कर्मणो** ज्योतिष्टोमादेः सत्कीर्तिः सुगन्धसमाना **दूराद्वाति** । मनुष्यलोकात्स्वर्गे गच्छति । तस्मात्पुण्यमनुष्ठेयम् । अथ पापस्य दृष्टान्त उच्यते— **यथा** लोके कश्चित्कदाचित्केनाचिद्धेतुना[कर्ते] गर्ते गर्तस्योपरि तिर्यक्काष्ठवद्वहिर्तां प्रसारितामसिधारामहमवक्रामे पादाभ्यामुपर्युपरि गच्छामि(मी) तीच्छति तदा] **यद्यदि युवे युवे** याम्यायामि तदाऽसिधारया पादयोर्दृढस्पर्शो भविष्यति । [ततः] पादच्छेदस्य(दः स्यात् ।) यदि दृढस्पर्शाभावः [कर्ते] कर्ते गर्ते पतिष्यामि । उभयथा दुःखमेवेति **विह्वयिष्यामि** विह्वलितो भविष्यामि तस्मादस्मात्कर्मण उपरम इति चिन्तयति *यथैवं मुमुक्षुरप्यमृतान्मोक्षप्राप्तिहेतोरात्मानमन्तःकरणं स्थिरीकृत्य पापाज्जुगुप्सेत् । यदि पापं प्रकटं करिष्यामि तदा लोकैरहं निन्द्ये यदि रहसि+ तदा नरके याम्यैरहं पीड्ये तस्माद्बुद्ध्या रहसि च न पापं करिष्य इत्युपरम्यताम् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि भाष्ये
एकादशोऽनुवाकः ॥ ११ ॥

अथ द्वादशोऽनुवाकः ।

यथोक्तप्रशंसोपेतपुण्यानुष्ठानेन निषिद्धाचरणवर्जितेन शुद्धान्तःकरणस्य पुरुषस्य तत्त्वमुपदेष्टुमयमनुवाक आरभ्यते । तत्र प्रथमामृचमाह—

अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्, इति ॥

सच्चिदानन्दरसः परमेश्वरः सर्वाधिष्ठानत्वेन सर्वस्य जगतः स्वरूपत्वादात्मशब्देनोच्यते । आत्मशब्दः स्वरूपवाचीति प्रसिद्धम् । मायाकार्यभूते लौकिकव्यवहारे सूक्ष्म-

* यथेत्याधिकम् । + करिष्यामीति संबध्यते ।

त्वेन प्रसिद्धः परमाणुद्व्यणुकादिरणुशब्दवाच्यः । तस्मादप्ययमात्माऽतिशयेन सूक्ष्मत्वादणीयान् । आकाशादिगादयः परिमाणाधिक्याल्लोके महच्छब्दवाच्याः । ततोऽप्ययमात्माऽतिशयेनाधिकत्वान्महीयान् । परमाणुद्व्यणुकादीनामस्मदादिप्रत्ययगम्यत्वाभावेऽपि योगिजनचक्षुर्गम्यत्वमस्ति तदप्यात्मनो नास्तीत्यभिप्रेत्याणीयस्त्वमुक्तम् । आकाशादिगादीनामेकब्रह्माण्डवर्तित्वात्तादृशब्रह्माण्डलक्षकोट्यधिष्ठान त्व]मभिप्रेत्य महीयस्त्वमुक्तम् । तादृशः परमात्माऽस्य देवमनुष्यादिरूपस्य जन्तोर्गुहायां निहितः । गुहाशब्देन हृदयपुण्डरीकवर्तिनी बुद्धिरुपलक्ष्यते । ' गुहू संवरणे ' इत्यस्माद्धातोरुत्पन्नो गुहाशब्दः । बुद्धिश्च हृदयपुण्डरीकेण संवृता तन्मध्यवर्तित्वात् । तस्यां बुद्धावस्य परमात्मनो निहितत्वं नाम विद्ययोपलभ्यत्वम्, नतु बुद्धावाधेयत्वम् । सर्वजगदाधारस्य तदसंभवात् । [तं] तथाविधं गुहावस्थितमीशं शमदमादिगुणयुक्तोऽधिकारी पुरुषः पश्यति । साक्षात्करोति । स चाधिकारो धातुः प्रसादादुपजायते । धाता जगतो विधाता परमेश्वरस्तस्य प्रसादोऽनुग्रहः ।

तथा च पूर्वाचार्यैरुक्तम्—

" ईश्वरानुग्रहादेषां पुंसामद्वैतवासना ।
महाभयकृतत्राणा द्वित्राणां यदि जायते " ॥

कीदृशमीशम् । अक्रतुं संकल्परहितम् । स्नानपानादिभोगजातं समीचीनमिति संकल्पनं जीवस्यैव न त्वीश्वरस्य, संकल्पहेतुभूतान्तःकरणोपाधेरभावात् । अतो निरुपाधिकत्वान्महिमानमतिशयेन महान्तमीश्वरम् । ईदृशं परमेश्वरं साक्षात्कृत्य वीतशोको जन्ममरणादिशोकरहितो भवति ।

द्वितीयामृचमाह—

सप्त प्राणाः प्रभवन्ति तस्मात्सप्तार्चिषः समिधः सप्त जिह्वाः ।
सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया निहिताः सप्त सप्त, इति ॥

शुद्धान्तःकरणैर्यो ज्ञातव्यः परमात्मोक्तस्तस्य शाखाचन्द्रन्यायेनोपलक्षणार्थं जगत्कारणत्वमुच्यते । तस्मात्परमात्मनो मायाशक्तिविशिष्टात्सप्त प्राणाः प्रभवन्ति । अन्यत्र सप्त वै शीर्षण्याः प्राणा इत्युक्त्वाच्छिरोवर्तिसप्तच्छिद्रगताः सप्तसंख्याकाश्चक्षुरादयः प्राणाः परमेश्वरादुत्पद्यन्ते । द्वे चक्षुषी द्वे ने(श्रो)त्रे द्वे नासिके मुखमेकमिति सप्तत्वम् । तेषां चक्षुरादीनां स्वस्वविषयप्रकाशनशक्तयः सप्तार्चिषः । तैरर्चिर्भिर्गृह्यमाणत्वेन सप्तसंख्याका विषयाः समिधः । विषयैरिन्द्रियाणि समिध्यन्ते प्रकाशयुक्तानि क्रियन्ते । यथैकस्यापि चक्षुरिन्द्रियस्य गोलकभेदेन द्वित्वम्, तथा रूपस्याप्येकस्य वामदक्षिणरूपनिर्वाहकचक्षुर्भेदाद्द्वित्वं द्रष्टव्यम् । एवं शब्दगन्धयोर्द्वित्वे सति विषयाः सप्त संपद्यन्ते । अथवा समिच्छब्देन सप्तसंख्या न संबध्यते किंतु जिह्वाशब्देन ।

अग्नौ(ग्नि)जिह्वानां च सप्तत्वमाथर्वणिकैराम्नातम्—

" काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः " इति ।

ताः परमेश्वरात्प्रभवन्ति । इमे भूरादयः **सप्त**संख्याका **लोकास्तस्मात्प्रभवन्ति** । **येषु** सप्तसु लोकेषु देवमनुष्यादिशरीरवर्तिनः **प्राणाश्चरन्ति** तादृशा लोका उत्पन्ना इति पूर्वत्रान्वयः । गुहा बुद्धिस्तस्यां शेत उपलभ्यत इति **गुहाशयः** परमेश्वरस्तस्मा-**न्निहिता** उत्पन्नाः सप्तर्षयः सप्त समुद्रा इत्यादिकाः **सप्त**संख्याकाः पदार्थविशेषाः ।

अथ तृतीयामाह—

अतः समुद्रा गिरयश्च सर्वेऽस्मात्स्यन्दन्ते सिन्धवः सर्वरूपाः ।
अतश्च विश्वा ओषधयो रसाच्च येनैष भूतस्तिष्ठत्यन्तरात्मा, इति ॥

[**सर्वे** क्षीरोदधिप्रभृतयः **समुद्र**विशेषा] मेरुप्रभृतयो गिरिविशेषाश्चा[तोऽ]स्मात्पर-मेश्वरादुत्पन्नाः । **सर्वरूपा** नानादिगभिमुखाः **सिन्धवः स्यन्दन्ते** प्रवहन्ति । व्रीहिय-वाद्या **विश्वाः** सर्वा **ओषधयश्चो**त्पन्नाः । कथंभूतात्परमात्मनः । **रसात्** । विद्वदनुभव-नीयात् । रसो वै स इति पूर्वमुक्तत्वात् । **एषोऽ**हंप्रत्ययेन गम्यमानः । **अन्तरात्मा** स्थूलदेहचिदात्मनोर्मध्यवर्ती यो लिङ्गदेही(हः) । **येनौषधिरसेन भूतोऽधिष्ठितः संस्ति-ष्ठति** । अत इति पूर्वेणान्वयः ।

[चतुर्थीमृचमाह—]

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनो गृध्राणाꣳ स्वधितिर्वनानाꣳ सोमः पवित्रमत्येति रेभन्, इति ॥

अन्तर्बहिर्वर्तिनां प्राणसमुद्रादीनामचेतनानां सृष्टिमुक्त्वा चेतनेषु परमेश्वरस्योत्कृष्ट-रूपेणावस्थानमुच्यते । **देवानाम**ग्नीन्द्रादीनां मध्ये **ब्रह्मा** चतुर्मुखो भूत्वा परमेश्वरो नियामकत्वेनावतिष्ठते । तथा **कवीनां** काव्यनाटकादिकर्तॄणां पुरुषाणां मध्ये **पदवी**-त्वेनावतिष्ठते । व्याकरणनिष्पन्नः सुशब्दविशेषः पदं तद्वेत्ति गच्छतीति **पदवीः** । शब्दसामर्थ्याभिज्ञो व्यासवाल्मीक्यादिरूप इत्यर्थः । **विप्राणां** वैदिकमार्गवर्तिनां ब्राह्म-णानां मध्य ऋषिस्त[त्त]द्वेत्रप्रवर्तको **वसिष्ठा**दिरूपो बभूव । **मृगाणां** चतुष्पदानां मध्ये शक्त्याधिक्ययुक्तो **महिषो** बभूव । **गृध्रो**पलक्षितानां सर्वेषां पक्षिणां मध्ये प्रबलः **श्येनो** बभूव । **वनानां** वृक्षसमूहरूपाणां छेदनार्थं **स्वधितिः** परशुर्बभूव ।

---

१ ङ. °दिव° ।

यागहेतुभूतवल्लयात्मकः सोमो भूत्वा रेभन्मन्त्रशब्दयुक्तः सन्पवित्रं शुद्धिकरणं गङ्गाजलकुशदर्भादिकद्रव्यजातं सर्वमत्येति ।

पञ्चमीमृचमाह—

अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीꣳ सरूपाम् ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः(१*),इति॥

व्यवहारदशायां परमेश्वरस्य चतुर्मुखब्रह्मादिशरीरेषु विशेषेणावस्थानमभिधाय यथोक्तजगत्सृष्टेर्मूलकारणभूतां मायाशक्तिमुपजीव्य बद्धमुक्तपुरुषव्यवस्था प्रदर्श्यते । न जायत इत्यजा मूलप्रकृतिरूपा माया । न ह्यनादेस्तस्या जन्म संभवति । सा च मायैका । इतरस्य सर्वं [स्य] जगतस्तत्कार्यत्वात् । यदाऽसौ तेजोबन्नानि त्रीणि रूपाण्युत्पाद्य तद्रूपाऽवतिष्ठते तदानीं लोहितशुक्ल[कृष्ण]वर्णैरुपेता भवति । तथा छन्दोगा आमनन्ति—"यदग्ने रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य" इति । अन्नशब्देनात्र पृथिव्युपलक्ष्यते । रजःसत्त्वतमोगुणा वा लोहितादिशब्दैरुपलक्ष्यन्ते । गुणत्रयात्मिका मायेत्युक्तं भवति । सा च देवतिर्यङ्मनुष्यादिरूपां गुणत्रितयात्मकत्वेन सरूपां बहुविधां प्रजां जनयन्ती । न जायत इत्यजो जीवस्तस्यापि मायावदनादित्वादुत्पत्तिर्नास्ति । तादृशो जीवो द्विविधः । आसक्तो विरक्तश्च । तयोर्मध्य एक आसक्तो जीवः पूर्वोक्तामजां मायां जुषमाणः प्रीतिपूर्वकं सेवमानोऽनुशेते तदनुसारेणैव वर्तते । विषयानेव भुञ्जानो विवेकरहितो जन्ममरणप्रवाहरूपेण संसरतीत्यर्थः । अन्यो विरक्तो जीवो भुक्तभोगामेनां मायां जहाति परित्यजति । विरक्तेः पूर्वमेव भोगान्भुक्त्वा (गा भुक्ता) नतूपरिष्टाद्भोक्ष्यन्ते तादृशैर्भोगैर्भुक्ता भुक्तभोगा तां मायां तत्त्वविवेकेन बाधतामि (त इ) त्यर्थः ।

षष्ठीमृचमाह—

हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्, इति ॥

यः पुमान्विवेकेन मायां परित्यजति तस्य सर्वमपि जगद्ब्रह्मरूपेणावभासत इत्यर्थमर्थोऽत्र प्रदर्श्यते । एतदर्थमादौ जगदनूद्यते । हन्ति सर्वदा गच्छतीति हंस आदित्यः । स च [शुचौ] शुद्धे मण्डले ज्योतिर्मये सीदतीति शुचिषत् । सूत्रात्मस्वरूपेण जगन्निवासहेतुत्वाद्वसुर्वायुस्तद्रूपः सन्नन्तरिक्षे सीदतीत्यन्तरिक्षसत् । होमनिष्पादक आहवनीयाद्यग्निर्होता तद्रूपेण सोमयागा[द्य]ङ्गभूतायां वेद्यां सीदतीति वेदिषत् । अमावास्यादितिथिविशेषमनपेक्ष्य भोजनयाच्ञार्थं तत्र तत्र गच्छन्पुरुषो वैदेशिकोऽतिथिस्तद्रूपेण

* अत्र घ. पुस्तके (२६) अङ्को वर्तते ।

दुरोणेषु गृहेषु परकीयेषु सीदतीति **दुरोणसत्** । नृषु मनुष्येषु कर्माधिकारिजीवरूपेण सीदतीति **नृषत्** । वरे श्रेष्ठे क्षेत्रे काशीद्वारवत्यादौ पूजनीयरूपेण सीदतीति **वरसत्** । ऋते सत्ये वैदिके कर्मणि फलरूपेण सीदतीति **ऋतसत्** । व्योम्न्याकाशे नक्षत्रादिरूपेण सीदतीति **व्योमसत्** । अद्भ्यो नदीसमुद्रादिगताभ्यः शङ्खमकरादिरूपेण जायत **इत्यब्जाः** । गोभ्यः क्षीरादिरूपेण जायत इति **गोजाः** । ऋतं सत्यं वचनं तस्मात्कीर्तिरूपेण जायत इति **ऋतजाः** । अद्रिभ्यो वृक्षादिरूपेण जायत इत्यद्रिजाः । हंस इत्यारभ्याद्रिजा इत्यन्तेनोक्तं यज्जगदस्ति तज्जगद्दृतं सत्यं बृहद्ब्रह्म । अज्ञानिदृष्ट्या जगद्रूपेण भासमानं सर्वं ज्ञानिदृष्ट्या ब्रह्मैवेत्यर्थः ।

सप्तमीमृचमाह—

घृतं मिमिक्षिरे घृतमस्य योनिर्घृते श्रितो घृतमुवस्य धाम ।
अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम्, इति ।

भोग(ग्य)जातस्य ज्ञानभो(यो)ग्यदेहानुकूल्यं प्रार्थ्य[मिति तदर्थं] ज्ञानसाधनयागादिकर्महेतोरग्नेरानुकूल्यं प्रार्थयते । पूर्वं(र्वे) यजमाना अग्नावाहवनीयादिरूपे **घृतं मिमिक्षिरे** सिक्तवन्तः । मिह सेचन इति धातुः । तद्घृतमस्याग्नेर्योनिरुत्पत्तिकारणं घृतेन ज्वालाभिवृद्धिदर्शनात् । ततोऽयमग्निर्घृते **श्रितो** घृतमाश्रित्यावस्थितः । **घृतमु** घृतमेवास्याग्नेर्धाम स्थानं तेजोहेतुर्वा । हेऽग्नेऽनुष्वधं स्वधामन्वस्मदीयं हविःस्वरूपमनुश्रु(सृ)त्याऽऽवह देवानत्राऽऽनय । आनीय च **मादयस्व** सुहृष्टान्कुरु । हे **ऋ(वृ)षभ** श्रेष्ठ **स्वाहाकृतं** स्वाहाकारेणास्माभिर्दत्तं **हव्यं वक्षि** वह देवान्प्रापय ।

अष्टमीमृचमाह—

समुद्रादूर्मिर्मधुमाꣳ उदारदुपाꣳशुना समममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः इति ,।

समुद्रात्प्रभूतात्परमात्मन **ऊर्मिसदृशः** प्रपञ्चो **मधुमान्**भोग्यत्वेन माधुर्ययुक्त **उदारदुदगच्छदुत्पन्न** इत्यर्थः । यथा लोके समुद्रात्तरङ्ग उत्पद्यत एवं चिदेकरसात्परमात्मनो जडं भोग्यजातं समुत्पन्नम् । घृ क्षरणदीप्त्योरिति धातोरुत्पन्नो घृतशब्दः । **घृतं** दीप्तं स्वप्रकाशं ब्रह्मेत्यर्थः । तस्य ब्रह्मणो **यन्नाम** प्रणवरूपं **गुह्यं** सर्ववेदेष्वस्ति । तथाच **काठकैराम्नातम्**—"सर्वे वेदा यत्पदमामनन्ति" इति प्रस्तुत्य "तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् " इति । तेन **प्रणवरूपेणोपांशुना** ध्यानकाले **शनैरुच्चार्यमाणेनामृतत्वमुत्पत्तिविनाशरहितं ब्रह्मतत्त्वं समानट्** सम्यगानशे प्राप्नोतीत्यर्थः । तच्च प्रणवाख्यं नाम **देवानां जिह्वा** देवैर्ध्यानपरैर्निरन्तरमुच्चार्यमाणत्वेन जिह्वेव सर्वदा मुखमध्ये वर्तते । किंचेदं प्रणवरूपममृतस्य विनाशरहितस्य मोक्षस्य **नाभी** रथचक्रस्य नाभिरिवाऽऽश्रय-

भूतम् । अनेन हि मुक्तिरूपं फलं लभ्यते । अत एव कठैराम्नातम्—"एतदेवाक्षरं [ज्ञात्वा] यो यदिच्छति तस्य तत्" इति । एतस्यामृचि प्रणवस्य मोक्षसाधनत्वमुक्तम् ।

नवमीमृचमाह—

वयं नाम प्रब्रवामा घृतेनास्मिन्यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत्, इति ।

वयं ज्ञानार्थिनः पुरुषा अस्मिञ्ज्ञानयज्ञे घृतेनाऽऽदीप्तेन स्वप्रकाशेन ब्रह्मणा निमित्तभूतेन प्रणवरूपं [नाम] प्रब्रवाम । सर्वदोच्चारयामः (म) । ततो नमो[भि]र्नमस्कारैर्युक्ता वयं चित्ते ब्रह्मतत्त्वं सर्वदा धारयामः(म) । ज्ञानस्य यज्ञत्वं भगवतोक्तम्—"स्वाध्यायज्ञानयज्ञाश्च यतयः शंसि(संशि)तव्रताः" [इति] । अस्यमानमस्माभिः प्रणवेन स्तूयमानमुपशृणवत्पार्श्ववर्तिभिस्तत्त्ववेदिभिः श्रूयमाणमेतद्ब्रह्मतत्त्वं चतुःशृङ्गोऽकारोकारमकारनादरूपशृङ्गचतुष्टयोपेतो गौरः श्वेतः प्रणवाख्य ऋषभोऽवमीद्वान्तवान् । ब्रह्मतत्त्वं प्रत्यपादयदित्यर्थः । अकारादीनां प्रणवमात्राणां शृङ्गत्वमुत्तरतापनीये श्रुतम्—"शृङ्गेष्वशृङ्गं संयोज्य" इति । निष्कामैरनुष्ठेयत्वेन निर्मलत्वात्प्रणवस्य गौरत्वम् । वृषभरूपत्वं च संहितोपनिषद्याम्नातम्—"यश्छन्दसामृषभो विश्वरूपः" इति । *वचनेन प्रतिपादनमुपलक्ष्यते(!) ।

दशमीमृचमाह—

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश, (२) इति ॥

शृङ्गा प्रणवस्य यान्यकारादीनि [शृङ्गाणि] तानि चत्वारि । अस्य प्रणवप्रतिपाद्यत्वेन प्रणवरूपस्य ब्रह्मणस्त्रयः पादाः । पद्यते गम्यते ब्रह्मत्वमेभिरिति पादाः । अध्यात्मं विश्वतैजसप्राज्ञाः । अधिदैवं विराड्हिरण्यगर्भाव्याकृतानि । द्वे शीर्षे उत्तमाङ्गस्थाने चि[दचि]द्रूपे द्वे शक्ती । तथैवास्य ब्रह्मणो भूरादयः सप्त लोका हस्ता[सो] हस्तस्थानीयाः । त्रिधा बद्धोऽकारोकारमकारेषु विश्वतैजसप्राज्ञैर्विराड्हिरण्यगर्भाव्याकृतैश्च त्रिप्रकारेण संबद्धो वृषभः प्रणवो महस्तेजोरूपं ब्रह्मतत्त्वं रोरवीति, अतिशयेन प्रतिपादयति । तदेव प्रतिपाद्यत्वं स्पष्टी क्रियते—देवः परमेश्वरो मर्त्यान्मनुष्यदेहानाविवेश सर्वतः प्रविष्टः । "स एष इह प्रविष्ट आ नखाग्रेभ्यः" इति श्रुत्यन्तरात् ।

* एतत्प्रभृत्युपलक्ष्यत इत्यन्तो ग्रन्थः प्रकृतानुपयोगीव भवति ॥

एकादशीमृचमाह—

त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् ।
इन्द्र एकꣳ सूर्य एकं जजान वेनादेकꣳ स्वधया निष्टतक्षुः, इति ।

त्रिधा हितं शरीरे विश्वतैजसप्राज्ञाख्येन त्रिप्रकारेण ब्रह्माण्डे विराड्हिरण्यगर्भाव्याकृताख्येव च त्रिप्रकारेणावस्थितं घृतं दीप्तं स्वप्रकाशं ब्रह्मतत्त्वं देवासो देववत्सात्त्विका अन्तर्मुखाः पुरुषा गवि वाचि तत्त्वमस्यादिवेदरूपायामेवान्वविन्दन्ननुक्रमेण लब्धवन्तः । कीदृशं घृतम् । पणिभिर्गुह्यमानम् । पण व्यवहारे स्तुतौ चेति धातुः । पणिभिः स्तोतृभिरुपदेष्टृभिराचार्यैः परमरहस्यत्वेन गोप्यमानम् । त्रिधा हितमित्येतदेवोच्यते । इन्द्रः परमैश्वर्ययुक्तो विराट्पुरुष एकं जागरणरूपं जजानोत्पादितवान् । सूर्यशब्दस्तेजःसात्त्विकत्वेन हिरण्यगर्भमुपलक्षयति । स च हिरण्यगर्भ एकं स्वप्नरूपं जजान । वेम (वे) तिधातुः कान्तिकर्मा । वेनात्सर्वदुःखराहित्येन कमनीयादव्याकृतादेकं सुषुप्तिरूपं निष्पन्नमिति शेषः । स्वस्मिन्नेव धीयतेऽवस्थाप्यत इत्याश्रयान्तररहिता ब्रह्मरूपा चित्स्वधारूपेणोच्यते । " स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि " इति श्रुत्यन्तरात् । तया स्वधया ब्रह्मरूपा (प) याऽन्विताः पूर्वमुक्ता इन्द्रसूर्यवेना निष्टतक्षुः । जागरणादिकं निष्पादितवन्तः । एताभ्यां द्वाभ्यामृग्भ्यां प्रणवतत्प्रतिपाद्यार्थौ प्रपञ्चितौ ।

द्वादशी[मृच]माह—

यो देवानां प्रथमं पुरस्ताद्विश्वाधियो रुद्रो महर्षिः ।
हिरण्यगर्भं पश्यत जायमानꣳ स नो देवः शुभया स्मृत्याः संयुनक्तु, इति ।

यो देवो हिरण्यगर्भं पश्यत साक्षात्करोति । कीदृशं हिरण्यगर्भम् । देवानां प्रथममग्नीन्द्रादीनामादिभूतम् । पुरस्ताज्जायमानमग्नीन्द्राद्युत्पत्तेः पूर्वमेवोत्पद्यमानम् । अनेन प्राथम्यं स्पष्टीकृतम् । कीदृशो देवः । विश्वाधियो विश्वस्य जगतः कारणत्वेन तस्मादधिकः* । रुद्रः । रुद्रवैदिकः शब्दस्तं द्रवति प्राप्नोति वेदप्रतिपाद्य इत्यर्थः । महर्षिर्ऋषीणामतीन्द्रियद्रष्टॄणां मध्ये महान् । यः सर्वज्ञः सर्वविदित्यादिश्रुतिप्रतिपाद्य इत्यर्थः । स देवस्तादृशः परमेश्वरो नोऽस्माञ्शुभया स्मृत्या सर्वसंसारनिवर्तकत्वेन शोभनया ब्रह्मतत्त्वानुस्मृत्या संयुनक्तु संयुक्तान्करोतु । सोऽयं मन्त्रो ब्रह्मविद्यालब्धये जपितव्य इति मन्त्रलिङ्गादवगम्यते ।

* वकारस्थाने व्यत्ययेन यकार इति भावः ।

१ ङ. °नुग्रहेण ।

त्रयोदशी[मृच]माह—

यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् ।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्, इति ।

यदुक्तं शुभया स्मृत्या संयुनक्त्विति तत्र स्मरणीयं तत्त्वमत्र निर्दिश्यते । **यस्मा**द्ब्रह्मतत्त्वात्परमुत्कृष्ट[मपरं निकृष्टं] वा वस्तु **किंचिदपि नास्ति** । [*यस्माद्ब्रह्मतत्त्वादणीयोऽत्यल्पं वस्तु **नास्ति** । तथा **ज्यायोऽधिकमपि कश्चित्किंचिदपि वस्तु नास्ति** ।] परापरशब्दाभ्यां गुणोत्कर्षनिकर्षौ विवक्षितौ । ज्यायोणीयःशब्दाभ्यां परिमाणोत्कर्षापकर्षौ विवक्षितौ । सर्वप्रकारोत्कर्षापकर्षनिषेधेनाद्वितीयत्वं सिध्यति । यथा वृक्षो गमनागमनरहित एकत्रैव स्तब्धोऽवतिष्ठते तद्वदयमेवाद्वितीय **एकः** परमेश्वरः स्तब्धो निर्विकारो **दिवि** द्योतनात्मके स्वप्रकाशरूपे **तिष्ठति** । **तेन पुरुषेण** चिदेकरसेनाऽऽ(न परमा)त्मना **सर्वमिदं** जगत्**पूर्णम्** । जगदाकारो नास्ति ब्रह्मतत्त्वमेव स्थितमेवेत्य(मित्य)र्थः ।

चतुर्दशीमृचमाह—

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।
परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति, इति ।

यथोक्तब्रह्मतत्त्वस्मरणस्यातरङ्गं[१] सर्वत्यागरूपं साधनमत्रोच्यते । अग्निहोत्रादिकं सहस्रसंवत्सरसत्रान्तं यत्कर्म तेन **कर्मणा** तदमृतत्वं **न** लभ्यते । "प्रजया पितृभ्यः" इति श्रुतेः पितृविषयादृणाद्विमोचनहेतुर्या पुत्रादिरूपा **प्रजा** तयाऽ[प्य]मृतत्वं **न** लभ्यते । दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदन्तीतिश्रुतेर्धनदानस्य बहुविधफलसाधनत्वावगमात्तस्य दानस्य निष्पादकं यद्धनमस्ति **तेन धनेनाप्यमृतत्वं न** लभ्यते । किं तर्हि कर्मप्रजाधनादीनां सर्वेषां लौकिकवैदिकव्यापाराणां **त्यागेनैके** केचिदेवान्तर्मुखा **अमृतत्वमानशुः** प्राप्नुवन्ति । यदमृतत्वं **यतय** इन्द्रियनियमनशीला **विशन्ति** प्राप्नुवन्ति त[देत]दमृतत्वं **नाकं परेण** स्वर्गादप्युत्कृष्टं सद्**गुहायां** स्वकीयबुद्धावेकाग्र्यायां **निहितमवस्थितं** सद्वि(भ्राजद्वि) भ्राजते विशेषेण दीप्यतेऽन्तर्मुखैरनुभूयत इत्यर्थः ।

पञ्चदशीमृचमाह—

वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे, इति ।

---

* त्रुटितोऽयमेतच्चिह्नान्तर्गतो ग्रन्थश्चतुःषष्ठ्यनुवाकानुरोधिभाष्यात्संगृहीतः । प्रकृतगर्भोप्यस्य तत्रान्तर्भावात् ।

१ ङ. स्मृत्या. । २ ङ. स्मरणाय ।

पूर्वस्यामृचि त्यागस्य मोक्षसाधनत्वमुक्तम्। अत्र हि (अन्यत्र)—"तरति शोकमात्मवित्" "ज्ञानादेव [तु] कैवल्यं प्राप्यते येन मुच्यते" इत्यादिश्रुतिस्मृतिषु ज्ञानस्य(स्यैव) मोक्षहेतुत्वमुच्यते। अतोऽस्यामृचि विरोधपरिहाराय ज्ञानसंन्यासयोर्मोक्षे पृथगुपयोग उच्येते। वेदान्ता उपनिषद्वाक्यानि तैरुत्पन्नं सर्वसंसारनिवर्तकत्वेन विशिष्टं ज्ञानं यदस्ति तेन सुनिश्चितो जीवब्रह्मैक्यलक्षणोऽर्थो यैः पुरुषैस्ते **वेदान्तविज्ञानसुनिश्चितार्थाः**। संन्यासः पूर्वोक्त(क्तः)प्रजादित्यागस्तत्पूर्वको [*योगः प्रमाणविपर्ययविकल्पनिद्रास्मृतिरूपाणां पञ्चानां चित्तवृत्तीनां विरोधः] "योगश्चित्तवृत्तिनिरोधः॥" [*इति **पतञ्जलिना** सूत्रितत्वात्। तस्माद्योगाच्छुद्धसत्त्वा विषयभोगव्यावृत्तचित्ताः]। अत एव **यतयो** नियमशीलाः। एतेन ज्ञानं तत्त्वप्रकाशनेनाविद्यानिवर्तकं त्यागस्तु विषययो(भो)गनिवृत्तिद्वारा चित्तशुद्धिहेतुरिति पृथगुपयोग उक्तो भवति। ब्रह्मणो लोको दर्शनं साक्षात्कारस्तस्मिन्नुत्पन्ने सति संसारिविलक्षणास्ते पुरुषाः। वैलक्षण्यद्योतनार्थस्तुशब्दः। तादृशाः पुरुषाः सर्वे [**परिमुच्यन्ति**] परिमुच्यन्ते। ज्ञानिषु देवमनुष्यत्वादिकृत उत्तमाधमभावोऽप्रयोजक इति विवक्षया सर्व इत्युक्तम्। कदा मुच्यन्त इत्याशङ्क्य **परान्तकाल** इत्युक्तम्। सत्यज्ञानेन यो देहपातावसरः सोऽयं परान्तकालः पुनर्देहग्रहणरहितत्वात्। तस्मिन्परान्तकाले संसारबन्धनाद्विमुच्यन्ते। ननु तत्त्व (त्त्वा) ज्ञानिनोऽपि प्रलयकाले स्थूलसूक्ष्मशरीरद्वयबन्धनान्मुच्यन्त एवेत्याशङ्क्य **परामृतादि** [**त्युक्तम्**।] जगत्कारणत्वेनोत्कृष्टं परं तत्त्वज्ञानमन्तरेण विनाशरहितत्वादमृतं तादृशात्परामृतादव्याकृतादज्ञानिनः प्रलयकालेऽ[पि] न मुच्यन्ते, ज्ञानिनस्तु देहपातावसर एव तादृशादव्याकृतादपि मुच्यन्त इति [वि]शेषः।

षोडशीमृचमाह—

दहं विपापं परमेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम्।
तत्रापि दहं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम्, इति।

तत्त्वं ज्ञातुमसमर्थस्य सूक्ष्मोपाय उच्यते। यदेतत्पुण्डरीकमष्टदलमस्ति। कीदृशम्। [दहं] दहरमल्पम्। **विपापं** शुद्धं शरीरसंबन्धिदोषैरपरामृष्टत्वात्। परस्याऽऽत्मनो मेश्मभूतं वकारस्थाने मकारश्छान्दसः। वेश्मभूतं गृहभूतं सर्वदा तत्रोपलभ्यत्वात्।

---

* श्रुटितोऽयमेतच्चिह्नान्तर्गतो ग्रन्थश्चतुःषष्टयनुवाकानुरोधिभाष्यात्संगृहीतः। प्रकृतग्रन्थस्य तत्रात्र चैक्यात्।

---

१ छ. °सारनिव°।

पुरस्य शरीरस्य मध्ये संस्थितं राज्ञ इव पुरमध्ये प्रासादः । तत्रापि दहरे पुण्डरीके वेश्म [दहरं] सूक्ष्मं गगनमाकाशवद्मूर्तं ब्रह्मरूपमस्ति । ब्रह्मणः सर्वगतत्वेऽपि घटाकाशवत्पुण्डरीकस्थानापेक्षया दहरत्वमुपचर्यते । तथा च श्रुत्यन्तरम्—"[अथ] यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्" इति । दहराकाशस्य च ब्रह्मत्वं दहराधिकरणे निर्णीतम् । अत एव विशोकः शोकरहितं गगनशब्दवाच्यं ब्रह्म । एवं सति तस्मिन्पुण्डरीकेऽन्तर्मध्ये यद्ब्रह्मतत्त्वमस्ति तदुपासितव्यं विजातीयप्रत्ययरहितेन सजातीयप्रत्ययप्रवाहेण चिन्तनीयम् ।

सप्तदशीमृचमाह—

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः (३), इति ।
अजोऽन्य आविवेश सर्वे चत्वारि च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि द्वादशोऽनुवाकः ॥ *१२ ॥

वेदानाम्—"अग्निमीळे पुरोहितम्" "इषे त्वोर्जे त्वा" इत्या[दीनामा]दिरुपक्रमस्तस्मिन्नुपक्रमे यः स्वरो यो वर्णः प्रणवरूपोऽस्ति [×स च स्वरः प्रणवो वेदान्ते चोपनिषद्योमित्येतदक्षरमिदं सर्वमित्यादिकायां प्रतिष्ठितः प्रतिपादितः,] स च स्वरः प्रणवो ध्यानकालेऽव्याकृते जगत्कारणे लीनो भवति । अकारोकारमकारेषु विराड्हिरण्यगर्भाव्याकृतानि ध्यात्वा विराड्रूपमकारमुकारे प्रविलाप्य तं चोकारं हिरण्यगर्भरूपं मूलप्रकृतिरूपे मकारे प्रविलापयेत् । तस्य च प्रकृतौ लीनस्य प्रणवस्य यः परश्चतुर्थमात्रारूपेण नादे ध्यातव्य उत्कृष्टोऽस्ति सोऽयं महेश्वरो विज्ञेयः । अनेन मन्त्रेण पूर्वोक्तं गगनशब्दवाच्यं वस्तु प्रपञ्चितम् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि भाष्ये द्वादशोऽनुवाकः ॥ १२ ॥

---

* अत्र घ. पुस्तके (२८) अङ्को वर्तते । × त्रुटितोऽयमेतच्चिह्नान्तर्गतो ग्रन्थश्चतुःषष्टयनुवाकानुरोधिभाष्यात्संगृहीतः । प्रकृतभाष्यस्य तत्रात्र चैक्यात् ।

अथ त्रयोदशोऽनुवाकः ।

पूर्वानुवाकान्ते हृदयपुण्डरीक उपास्यं यन्महेश्वरस्वरूपं निर्दिष्टं तस्मिन्नुपास्यगुणविशेषा अस्मिन्ननुवाके विस्तरेण प्रदर्श्यन्ते । तत्र प्रथमामृचमाह—

सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम् ।
विश्वं नारायणं देवमक्षरं परमं पदम्, इति ।

देवं पूर्वोक्तं महेश्वरं ध्यायेदिति शेषः । कीदृशं देवम् । **सहस्रशीर्षं** सहस्रशीर्षत्वेना(शब्देनात्रा)परिमितत्वमुपलक्ष्यते । अनन्तशिरस्कमित्यर्थः । सर्वजगदात्मकं विराड्रूपं महेश्वरस्य देहः । तथा सत्यस्मदादिशिरांसि सर्वाण्यपि तदीयान्येवेत्यनन्तशिरस्त्वम् । अनेनैव न्यायेन विश्वानि सर्वाण्यस्मदीयान्यक्षाणीन्द्रियाणि तदीयान्येवेति **विश्वाक्ष[स्त]म्** । विश्वस्य सर्व[स्य] जगतः शं सुखमस्माद्भवतीति **विश्वशंभुः** (भूः) तादृशम् । उक्ते सहस्रशीर्षे विराड्रूपे देहेऽवस्थितस्य महेश्वरस्य निजस्वरूपं द्वितीयार्धेनोच्यते । **विश्वं** जगदात्मकम्, आरोपितस्य जगतोऽधिष्ठानव्यतिरेकेण वास्तवरूपाभावात् ।

नारायणशब्दस्य निर्वचनं पुराणेषु दर्शितम्—

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः" इति ॥

जगत्कारणेषु पञ्चभूतेष्ववस्थितमित्यर्थः । स एवेन्द्रमित्रादिरूपेणावस्थितत्वादेव इत्युच्यते। तथा च शाखान्तरे मन्त्र आम्नातः—"इन्द्रं मित्रं वरुणमग्निमाहुः" इति । न क्षर[ती]ति, अश्नुत इति वा तस्याक्षरत्वम् । कारणत्वेनोत्कर्षात्परमत्वम् । पुनः कथंभूतम् । [पदं] पद्यते ज्ञानिभिः प्राप्यते लक्ष्यत इति पदम् ।

द्वितीयामृचमाह—

विश्वतः परमान्नित्यं विश्वं नारायणꣳ हरिम् ।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति, इति ।

विश्वतो जगतो जडवर्गात्परमाद्विभक्तित्व्यत्ययः । परममुत्कृष्टम् । ऋग्भेदेन पुनरुक्तिपरिहारो द्रष्टव्यः । स्तुतिरूपत्वादनेन प्रकारेण ध्यातव्यत्वाच्च नास्ति पुनरुक्तिदोषः । विनाशरहितत्वाच्च नित्यत्वम् । [*सर्वात्मकत्वाद्विश्वत्वम् । **नारायणत्वं**

* त्रुटितोऽयमेतच्चिह्नान्तर्गतो ग्रन्थश्चतुःषष्ठ्यनुवाकपाठानुरोधिभाष्यात्संगृहीतः । प्रकृतग्रन्थस्य तत्रात्र चैक्यात् ।

पूर्वमेवोक्तम् । पापस्याज्ञानस्य च हरणाद्धरित्वम् ।] यदिदं विश्वमिदानीमज्ञानदृष्ट्या प्रदृश्यते तत्सर्वं वस्तु तत्त्वदृष्ट्या पुरुषः परमात्मैव । स च परमात्मा तद्विश्वमुपजीवति, स्वस्य व्यवहारनिर्वाहार्थमाश्रयति ।

तृतीया[मृच]माह—

पतिं विश्वस्याऽऽत्मेश्वरꣳ शाश्वतꣳ शिवमच्युतम् ।
नारायणं महाज्ञेयं विश्वात्मानं परायणम्, इति ।

विश्वस्य जगतः पालकत्वात्पतिम् । आत्मनां जीवानां नियामकत्वादीश्वरम् । निरन्तरं वर्तमानत्वाच्छाश्वतम् । परमङ्गलत्वाच्छिवम् । [न च्यवत इत्यच्युतम् ।] नारायणत्वं पूर्वमुक्तम् । ज्ञेयेषु तत्त्वेषु मध्ये प्रौढत्वान्महाज्ञेयम् । जगदुपादानत्वेन तदभेदाद्विश्वात्मत्वम् । उत्कृष्टाधारत्वात्परायणत्वम् । सर्वमाप्यारोपितं जगदधिष्ठाने वर्तते ।

चतुर्थीमृचमाह—

नारायण परो ज्योतिरात्मा नारायणः परः ।
नारायण परं ब्रह्मतत्त्वं नारायणः परः ॥
नारायण परो ध्याता ध्यानं नारायणः परः, इति ।

पुराणेषु नारायणशब्देन व्यवह्रियमाणो यः परमेश्वरः स एव परमुत्कृष्टं सत्यज्ञानादिवाक्यप्रतिपादितस्य ब्रह्मणस्तत्त्वम् । अतो नारायणः पर एवाऽऽत्मा न त्वपरा मूर्तिविशेषः । तथा परो ज्योतिर्यदेतदुत्कृष्टं ज्योतिश्छन्दोगैः परं ज्योतिरुपसंपद्येत्याम्नातं तदपि नारायण एव । तस्मान्नारायणः परमात्मा । पुनरपि नारायणस्य सर्वात्मकत्वमुच्यते । नारायणः । छान्दसत्वात्सर्वत्र विसर्गलोपः । *परब्रह्म वेदान्तवेद्यं चिद्वस्तुतत्त्वमबाधितं यथार्थवस्तु, परः सर्वोत्कृष्टो जाड्यादिगुणव्यतिरिक्तः । ध्याता वेदान्ताधिकारी । ध्यानं प्रत्यगात्मगोचरो वृत्तिविशेषः । परः पापिनां शत्रुः । एवंविधो नारायणो ध्येय इत्यर्थः ।

पञ्चमी[मृच]माह—

यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा (१) ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः, इति ।

अस्मिन्वर्तमाने जगति यत्किंचित्समीपवर्ति वस्तुजातं दृश्यतेऽपि वा दूरस्थ

* एतदादि यथार्थवस्त्वित्यन्तं नारायणशब्दार्थस्य स्पष्टीकरणम् ।

श्रूयते तत्सर्वं वस्तुजातमयं नारायणोऽन्तर्बहिश्च व्याप्यावस्थितः। यथा कटकमुकुटाद्याभरणस्योपादानकारणं सुवर्णमन्तर्बहिर्व्याप्यावतिष्ठते तद्वत्।

षष्ठी[मृचमाह]—

अनन्तमव्ययं कविꣳ समुद्रेऽन्तं विश्वशंभुवम्।
पद्मकोशप्रतीकाशꣳ हृदयं चाप्यधोमुखम्, इति।

अत्र पूर्वार्धेन नारायणस्य वास्तवरूपं संक्षिप्योपन्यस्यते। अनन्तं देशपरिच्छेदरहितम्। अव्ययं विनाशरहितम्। कविं चिद्रूपेण सर्वज्ञम्। समुद्रेऽतिबहुलत्वेन समुद्रसदृशे संसारेऽन्तमवसानरूपम्। यदा नारायणस्य स्वरूपं जानाति तदैव संसारः क्षीयत इत्यर्थः। विश्वशंभुवं विश्वस्य संसार[सुख]स्योत्पत्तिकारणरूपम्। "एतस्यैवाऽऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुत्यन्तरात्। ईदृशं नारायणरूपमि(मु)[पासीत]ति शेषः। उत्तरार्धेनोपासनस्थानमुच्यते। पद्मकोशप्रतीकाशं यथाऽष्टदलकमलस्य कोशो मध्यच्छिद्रं तत्सदृशं, तच्च हृदयशब्दवाच्यम्। लौकिकं पद्ममूर्ध्वाभिमुखं हृदयपद्मं त्वधोमुखमिति [वि]शेषः।

सप्तमीमृचमाह—

अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति।
ज्वालमालाकुलं भाती विश्वस्याऽऽयतनं महत्, इति।

निष्ट्यीवाबन्धस्तस्या अधस्ताद्वर्तते। तत्रापि नाभ्यामुपरि नाभिदेशस्योर्ध्वभागे वितस्त्यान्ते द्वादशाङ्गुलपरिमिता वितस्तिः, [तस्या अन्तेऽवसानभूत] एवंविधप्रदेशे पूर्वोक्तं यद्धृदयपुण्डरीकं [तिष्ठति] वर्तते, तत्र महत्परब्रह्म भाति। दीर्घश्छान्दसः। कथंभूतम्। विश्वस्य ब्रह्माण्डस्याऽऽयतनमाधार[भूत]म्। ज्वाला*मालाभिः प्रकाशपरम्पराभिराकुलं युक्तम्।

अष्टमीमृचमाह—

संततꣳ शिलाभिस्तु लम्बत्याकोशसंनिभम्।
तस्यान्ते सुषिरꣳ सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितम्, इति।

आकोशः पद्ममुकुलं तत्संनिभं तत्सदृशं हृदयकमलं लम्बति हृदय(शरीर)मध्येऽधोमुखत्वेन लम्बते। तच्च शिराभिर्नाडीभिः [संततं] परितः सम्यग्व्याप्तम्। "शतं चैका च हृदयस्य नाड्यः" इति श्रुत्यन्तरात्। तस्य हृदयस्यान्ते समीपे सूक्ष्मं सुषिरं छिद्रं सुषुम्नानाडीनालं तिष्ठति। तस्मिन्सुषिरे सर्वमिदं जगत्प्रतिष्ठितमाश्रितम्। तत्र मनसि प्रविष्टे सति सर्वजगदाधारस्य ब्रह्मणोऽभि[व्यज्य]मानत्वात्।

* मूले छान्दसत्वाद्धस्व इति भावः।

नवमीमृच]माह—

तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः ।
सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः ।
तिर्यगूर्ध्वमधःशायी रश्मयस्तस्य संतता, इति ।

तस्य सुषुम्नानालस्य मध्ये महान्प्रौढोऽग्निर्वर्तते। स च **विश्वार्चिर्बहुलज्वालोपेतः** । अत एव ज्वालाविशेषैः परितोऽवस्थितासु [सर्वासु नाडीषु] संसरणाद्विश्वतोमुखो बहुविधमुखः । **सोऽग्निरग्रभुक्** । स्वस्य पुरतः प्राप्तमन्नं भुङ्क्ते इत्यग्रभुक् । स च भुक्तमाहारं शरीरे सर्वावयवेषु विभजन्प्रसारयंस्तिष्ठन्नवतिष्ठत इत्यर्थः । तथा च भगवतोक्तम्—

"अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्" इति ।

तस्मादुक्तमन्नमसौ जरयति न तु स्वयं जीर्यत इत्यजरः । अत एव **कविरभिज्ञः** कुशल इत्यर्थः । किंच **तस्याग्ने रश्मयः** किरणास्तिर्यगूर्ध्वमधः शेरत इति **[तिर्यगूर्ध्वमधःशायी]** वचनव्यत्ययः । **संतता** सर्वतो व्याप्ताः ।

दशमी[मृच]माह—

संतापयति स्वं देहमापादतलमस्तकः+ ।
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः, इति ।

[**आपादतलमस्तकं**] पादतलमारभ्य मस्तकपर्यन्तम् । वर्णव्यत्ययः । **कृत्स्नमपि** स्वकीयं देहं सर्वदा **संतापयति** । सोऽयं शरीरगतः संतापोऽग्निसद्भावे लिङ्गम् । **तस्य** ज्वालाविशेषैः कृत्स्नदेहव्यापिनोऽग्नेर्मध्ये **वह्निशिखा** काचिज्ज्वालाऽणीयाऽत्यन्तसूक्ष्मोर्ध्वा सुषुम्नानाडीनालेनोर्ध्वं ब्रह्मरन्ध्रपर्यन्तं प्रसृत्य व्यवस्थितो विशेषेणावस्थिता ।

एकादशीमृचमाह—

नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा ।
नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा, इति ।

तोयमुदकं ददातीति तोयदो मेघः । स च वर्षितुं जलपूर्णत्वान्नीलवर्णस्तादृशस्य मेघस्य मध्ये स्थिता **विद्युल्लेखेव** सेयं पूर्वोक्ताऽग्निशिखा **भास्वरा** । प्रभावती, **नीवार**बीजस्य शूकं दीर्घपुच्छं यथा तनु भवति तद्वदियं शिखा **तन्वी** सूक्ष्मा, **बहिः (बाह्य)**-

+ गकारपाठोऽपि वैदिकेषु प्रसिद्धः ।

(वह्नि) शिखेव पीता पीतवर्णा स्यात्, [भास्वती] दीप्तियुक्ता भवेत्, सा च तन्वी (चाणूपमा) * लौकिकानां तनूनां सूक्ष्मवस्तूनामुपमा भवितुं योग्या ।

द्वादशीमृचमाह—

तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ।

स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् (२), इति ।

अपि वा संतता षट्च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि त्रयोदशोऽनुवाकः ॥ १३+ ॥

तस्याः पूर्वोक्तायाः वह्निशिखायाः मध्ये जगत्कारणभूतः परमात्मा विशेषेण अवस्थितः । तस्योपासनार्थमल्पस्थानत्वेऽपि न स्वयमल्पः किंतु सर्वदेवात्मकः । ब्रह्मा चतुर्मुखः । शिवो गौरीपतिः । हरिरिन्दिरापतिः । इन्द्रः स्वर्गाधिपतिः । अक्षरो जगद्धेतुर्मायाविशिष्टोऽन्तर्यामी । " क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते " इति भगवतोक्तत्वात् । परमो मायारहितः शुद्धश्चिद्रूपः । अत एव पारतन्त्र्याभावात्स्वराट्स्वयमेव राजा । सहस्रशीर्षमित्यादिवाक्यप्रतिपादितं पद्मकोशप्रतीकाशमित्यादिवाक्योक्तप्रकारेण ध्यायेदिति तात्पर्यार्थः ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये त्रयोदशोऽनुवाकः ॥ १३ ॥

==========

अथ चतुर्दशोऽनुवाकः ।

इदानीमादित्यमण्डले परब्रह्मण उपासनामाह —

आदित्यो वा एष एतन्मण्डलं तपति तत्र ता ऋचस्तद्दचा मण्डलꣳ स ऋचां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिर्दीप्यते तानि सामानि स साम्नां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिषि पुरुषस्तानि यजूꣳषि स यजुषा मण्डलꣳ स यजुषां लोकः सैषा त्रय्येव विद्या तपति य

---

* लौकिकानामणूनामिति युक्तं पठितुम् । + अत्र घ. पुस्तके (३०) अङ्को वर्तते ।

---

१ क. °वाक्ये प्र° ।

एषोऽन्तरादित्ये हिरण्मयः पुरुषः, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि चतुर्दशोऽनुवाकः ॥ १४ ॥

नारायणशब्दवाच्यो यः परमेश्वरः पूर्वानुवाकेऽभिहितः स **एष आदित्यो वै** सोपाधिकः सन्नादित्यरूपेणैव वर्तते । तस्य चाऽऽदित्यस्यैतदस्माभिर्दृश्यमानं **मण्डलं** वर्तुलाकारमुष्णं तेजस्तपति संतापं करोति । **तत्र** तस्मिन्मण्डले **ता** अध्यापकप्रसिद्धा अग्निर्मीळ इत्यादिका **ऋचो** वर्तन्ते **तत्तस्मात्कारणान्मण्डलमृचा** निष्पादितमित्यर्थः । (ति शेषः) । **स** मण्डलभाग ऋग्भिर्निष्पादित ऋचामृगभिमानिदेवानां **लोको** निवासस्थानम् । एवमृगात्मकत्वं मण्डलस्य ध्यात्वाऽथानन्तरं सामात्मकत्वं तत्र ध्यातव्यम् । कथमिति, उच्यते । **एतस्मिन्मण्डले य एष** तदेतदर्चिर्दीप्यते भास्वरं तेजः प्रकाशते **तान्यर्चिःस्वरूपाणि** बृहद्रथंतरादि**सामानीति** ध्यायेत् । **सोऽर्चिर्भागः साम्नां** [illegible] **लोको** निवासस्थानम् । **अथ** सामध्यानानन्तरं यजुरात्मकत्वं ध्यातव्यम् । कथमित्युच्यते । **य एष** शास्त्रे प्रसिद्ध **एतस्मिन्दृश्यमाने मण्डले** तदीयेऽर्चिषि[च] **पुरुषो** देवतात्मा वर्तते **तानि** देवतारूपाणि **यजूंषीषे** त्वेत्यादीनि [ध्यायेत् । **स** यजुरात्मकः पुरुषो **यजुषा** निष्पादितं **मण्डलमिति** ध्येयः । **स**] यजुर्भागो **यजुषां** यजुरा[illegible] **लोको** निवासस्थानम् । **सैषा** मण्डलतदर्चिस्तत्रत्यपुरुषरूपा **त्रय्येवर्ग्यजुः**[illegible] **विद्या तपति** प्रकाशते । **यः पुरुषोऽत्राभिहित एषोऽन्तरादित्य** आदित्यमण्डलमध्ये **हिरण्मयो** विद्यते । हिरण्मयत्वं शाखान्तरे प्रपञ्चितम्—" अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो **दृश्यते** हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः " इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये चतुर्दशोऽनुवाकः ॥ १४ ॥

अथ पञ्चदशोऽनुवाकः ।

पूर्वोक्तस्यैवाऽऽदित्यपुरुषस्य सर्वात्मकत्वलक्षणमवशिष्टमुपास्यगुणं दर्शयति—

आदित्यो वै तेज ओजो बलं यशश्चक्षुः श्रोत्रमात्मा मनो मन्युर्मनुर्मृत्युः सन्यो मित्रो वायुराकाशः प्राणो लोकपालः कः किं कं तत्सत्यममृतं जीवो

१ व ॥ २ ॥ ३ छ °देवतानां ।

विश्वः कतमः स्वयंभु ब्रह्मैतदमृत एष पुरुष एष भूतानामधिपतिर्ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोत्येतासामेव देवतानाꣳ सायुज्यꣳ सार्ष्टितांꣳ समानलोकतामाप्नोति य एवं वेदेत्युपनिषत्, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि पञ्चदशोऽनुवाकः ॥ १५* ॥

योऽयमुपास्यत्वेनोक्त आदित्यः स एव सर्वात्मकत्वात्ते(कः । ते) **जो** दीप्तिः । **ओजो** बलकारणम् । **बलं** शरीरशक्तिः । **यशः** कीर्तिः । **चक्षुः श्रोत्रमिन्द्रिय**-[द्वय]म् । **आत्मा** देहः । **मनोऽन्तःकरणम् । मन्युः** कोपः । **मनुर्वैवस्व**-तादिः । **मृत्युर्यमः । सत्यो मित्रो** देवविशेषौ । **वायुराकाशो** भूतविशेषौ । **प्राणः** पञ्चवृत्तिः । **लोकपाल** इन्द्रादिः । **कः** प्रजापतिः । **किमनिर्वचनीयम् । कं** सुखम् । **तत्परोक्षम् । । सत्यं** यथार्थभाषणम् । **अन्नमोदनादि । अमृतो** देवसमुदायो मोक्षो वा । **जीवः** समस्तजीवकोटिः । **विश्वः** सर्वं जगद्विश्वतैजसादिर्वा । **कतमोऽ**-त्यन्तं सुखम् । **स्वयंभूत्पत्त्यादिवर्जितं ब्रह्म** । एतत्सर्वमादित्य एवेत्यर्थः । किंचामृतो नित्य **एष** आदित्यः **पुरुषः** पूर्णत्वात् । **एष** आदित्यः सर्वेषां **भूतानामधिपतिः प्रभुः** । **इतः** परमेतत्परिज्ञातुः फलमाह—**यः** पुमानेवमुक्तप्रकारेण **वेदोपास्ते** स पुमान्सायुज्यादिफलं प्राप्नोति । द्विविधमुपासनं हिरण्यगर्भोपासनं तदवयवभूतदेवतोपासनं चेति । तत्र हिरण्यगर्भोपासनाद्भावनाधिक्ये सीत **ब्रह्मणो** हिरण्यगर्भस्य **सायुज्यं** सहभावं तादात्म्यं प्राप्नोति । भावनामान्द्ये **सलोकतां** हिरण्यगर्भेण सहैकलोकनिवासं प्राप्नोति । देवतोपास्तावपि भावनाधिक्ये सत्येतासामेव भूरा(वेन्द्रा)दीनां **देवतानां सायुज्यं** प्राप्नोति । भावनायां मध्य[म]त्वे सति **सार्ष्टितां** समानैश्वर्यतां प्राप्नोति । मान्द्ये तु **समानलोकतां** प्राप्नोति । +उत्तरमन्त्रजपविवक्षयोपास्तिप्रकारमुपसंहरति । **इत्येवं** पूर्वोक्तैरनुवाकैरुक्तोपनिषद्रहस्यभूता विद्या समाप्तेति शेषः ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये पञ्चदशोऽनुवाकः ॥ १५ ॥

=====

* अत्र घ. पुस्तके(३२) अङ्को वर्तते । + उत्तरत्र जपविवक्षयेति, जपशब्दवर्जितं वा, पाठितुं युक्तम् ।

१ क. °व भा(क्रा ?)नी° ।

अथ षोडशोऽनुवाकः ।

इतः परं नूतनशिवालयादिकं कृत्वा तत्र लिङ्गप्रतिष्ठापनावसरे प्रत्यहं पार्थिवलिङ्गप्रतिष्ठापनावसरे च विनियुक्ता जपमात्रेण पापक्षयार्थाश्च पार्वतीपतिनमस्कारार्था मन्त्रा उच्यन्ते । "सर्वलिङ्गꣳ स्थापयति" "पवित्रम्" इति च मन्त्रलिङ्गात् । [तत्पाठस्तु]–

निधनपतये नमः । निधनपतान्तिकाय नमः । ऊर्ध्वाय नमः । ऊर्ध्वलिङ्गाय नमः । हिरण्याय नमः । हिरण्यलिङ्गाय नमः । सुवर्णाय नमः । सुवर्णलिङ्गाय नमः । दिव्याय नमः । दिव्यलिङ्गाय नमः । भवाय नमः । भवलिङ्गाय नमः । शर्वाय नमः । शर्वलिङ्गाय नमः । शिवाय नमः । शिवलिङ्गाय नमः । ज्वलाय नमः । ज्वललिङ्गाय नमः । आत्माय नमः । आत्मलिङ्गाय नमः । परमाय नमः । परमलिङ्गाय नमः । एतत्सोमस्य सूर्यस्य सर्वलिङ्गꣳ स्थापयति पाणिमन्त्रं पवित्रम्, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि षोडशोऽनुवाकः ॥ १६ ॥

पार्वतीपतये नमोऽस्तु । कथंभूताय । नितरां बहूनि धनानि निधनानि तेषां पतिः कुबेररूपेण तस्मै । निधनानि पातीति निधनपः । भक्तेभ्यस्तनोति विस्तारयतीति तः । निधनपश्चासौ तश्चेति निधनपतः । भक्तानां समीपत्वादान्तिकः । स चासौ स चेति पुनः कर्मधारयः, तस्मै । ऊर्ध्वायोर्ध्वलोकेषु देवतारूपेण विद्यमानायेत्यर्थः । ऊर्ध्वलिङ्गायोर्ध्वलोकेष्वपि गीर्वाणैर्लिङ्गरूपेण स्थापयित्वा पूज्यमानायेत्यर्थः । हिरण्याय सर्वात्मकत्वात्कनकरूपाय । हिरण्यलिङ्गाय कनकनिर्मितलिङ्गाकाराय । शोभनो वर्णः कान्तिर्यस्य तत्सुवर्णं रजतं [तद्रूपाय] । हिरण्यस्योक्तत्वात्सुवर्णशब्दो रूढिमुत्सृज्य योगेन रजतं वदति । सुवर्णलिङ्गाय रजतनिर्मितलिङ्गाकाराय । दिव्याय द्युलोकसुखरूपाय । दिव्यलिङ्गायेन्द्रादिसंस्थापितद्युलोकस्थलिङ्गाकाराय । भवाय संसाररूपाय, भवत्युत्पद्यते ब्रह्माण्डं यस्मादिति वा भवस्तस्मै । भवलिङ्गाय भवशब्देन भवन्तः संसारिणो लक्ष्यन्ते, तैर्भूलोके पूज्यमानशिलामयादिलिङ्गाकाराय । शृणाति प्रलये ब्रह्माण्डं हिनस्तीति शर्वस्तस्मै । शं महत्सुखं वाति गच्छति प्राप्नोतीति शर्वः,

१ ऋ. रात्रौ म० १ । ५ । ४ ॥ ३० ॥

शर्वरूपं च तल्लिङ्गं शिवलिङ्गपूजनस्य कल्याणकारित्वात्* । ज्वलाय ज्योतिर्मयत्वात् । ज्वललिङ्गाय भूलोके विद्यमानद्वादशज्योतिर्लिङ्गरूपाय । आत्माय निखिलजगदात्मकाय । लीनं सुरनरादिसर्वप्राणिगुहासु गोपितं ब्रह्म वेदान्तरूपेण गमयति विज्ञापयतीति लिङ्ग आत्मा सर्वजन्तुरूपश्चा (पः, स चा)सौ लिङ्गश्चेत्यात्मरूप(लिङ्ग)स्तस्मै । यस्मादुत्कृष्टो नास्ति स परमस्तस्मै । पाति जगदिति पः । रमते मोक्षसाम्राज्य इति रमः । स चेति कर्मधारयः । लीनं विलीनमपि सर्वज्ञत्वाद्गच्छत्यवगच्छति जानातीति लिङ्गः । परमश्चासौ लिङ्गश्चेति परमलिङ्गस्तस्मै **परमलिङ्गाय नमः** + । एतत् । वचनविभक्तिव्यत्ययः । **एतैः** पूर्वोक्तैर्मन्त्रैः **सर्वलिङ्गं** रसस्वर्णाद्यन्यतर(म)निर्मितं लिङ्गमात्रं **स्थापयति** सर्वोऽपि त्रैवर्णिको [लो]कः प्रतिष्ठापयति । लिङ्गं कथंभूतम् । **सोमस्य सूर्यस्य,** औपलक्षण्येन समस्तदेवतानां कारणभूतमिति शेषः । पाण्युपलक्षितसर्ववयवायमाना मन्त्रा वेदवाक्यविशेषा यस्य तत्**पाणिमन्त्रम्**, त्रयीमयशरीरमिति यावत् । पवित्रयति पापिनः स्मरणमात्रेणेति **पवित्रम्** ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये षोडशोऽनुवाकः ॥ १६ ॥

अथ सप्तदशोऽनुवाकः ।

अथ त्रैवर्णिकानां शास्त्राधिकारिणां ज्ञानोत्पादनाय महादेवसंबन्धिषु पञ्च[सु] वक्त्रेषु मध्ये पश्चिमवक्त्रप्रतिपादकमन्त्रमाह—

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः । भवे भवे नातिभवे भवस्व माम् । भवोद्भवाय नमः, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि सप्तदशोऽनुवाकः ॥ १७ ॥

सद्योजातनामकं यत्पश्चिमवक्त्रं तद्रूपं परमेश्वरं **प्रपद्यामि** प्राप्नोमि । तादृशाय **सद्योजाताय वै नमोऽस्तु** । हे सद्योजात **भवे भवे** तत्तज्जन्मनिमित्तं **मां न भवस्व**

*एतदग्रे " तद्रूपाय । शिवाय मङ्गलरूपाय । शिवलिङ्गाय कल्याणज्ञापकाय । " इति पठितुं युक्तम् । +नमःशब्दावृत्तिः प्रत्येकं संबन्धसूचनार्थेति युक्तं पठितुम् । = अत्र पुनः पुनर्नमोऽस्त्विति युक्तम् ।

न प्रेरयेत्यर्थः किं तर्ह्यतिभवे जन्मातिलङ्घननिमित्तं भवस्व तत्त्वज्ञानाय प्रेरय । भवोद्भवाय संसारादुद्भवर्त्रे सद्योजाताय नमोऽस्तु ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि भाष्ये सप्तदशोऽनुवाकः ॥ १७ ॥

अथाष्टादशोऽनुवाकः ।

उत्तरवक्त्रप्रतिपादकमन्त्रमाह—

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्यष्टादशोऽनुवाकः ॥ १८ ॥

उत्तरवक्त्राय नमोऽस्तु । कथंभूताय । वामं सुन्दरं च तद्देवं दीप्यमानं चेति वामदेवं तस्मै । सर्वजगदुत्पत्तेः पूर्वभावित्वाज्ज्येष्ठाय । प्रशस्ततमत्वाच्छ्रेष्ठाय । प्रलये रोदनहेतुत्वाद्रुद्राय । अत एव सर्वप्राण्यायुःक्षयहेतुत्वात्कालाय । कं सुखं लाति स्वीकरोतीति कलं विविधं जगत्क्रियते येनेति विकरणं कलं च तद्विकरणं चेति कलविकरणं तस्मै । रक्षसां बलं विकीर्यते हिंस्यते येन तद्बलविकरणं तस्मै । *सर्वाणि भूतानि दमयति शिक्षयतीति सर्वभूतदमनं तस्मै । मन्यते सर्वं जानातीति मनं सर्वज्ञमुत्कृष्टं मनमुन्मनं सर्वज्ञतमं मनं च तदुन्मनं च [मनोन्मनं] तस्मै ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि भाष्येऽष्टादशोऽनुवाकः ॥ १८ ॥

अथैकोनविंशोऽनुवाकः ।

दक्षिणवक्त्रप्रतिपादकं मन्त्रमाह—

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।

* अत्र बलाय बलप्रमथनायेति पदद्वयं त्रुटितम् । तव्याख्यानं च " बलाय सकलशक्तिप्रभवत्वात्तद्रूपाय । बलप्रमथनाय स्वेच्छया सकलशक्त्युपसंहारकाय । " इत्यादि स्यात् ।

सर्वेभ्यः सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्ये-
कोनविंशोऽनुवाकः ॥ १९ ॥

अघोरनामको दक्षिणवक्त्ररूपो [यो] देवस्तस्य विग्रहा अघोराः सात्त्विकत्वेन शान्ताः सौम्याः । अन्ये तु घोरा राजसत्वेनोग्राः । अपरे तु तामसत्वेन घोरादपि [घोरा] घोरतराः । हे *सर्व परमेश्वर ते त्वदीयेभ्यः पूर्वोक्तेभ्यस्त्रिविधेभ्यः स(श)र्वेभ्यो [लयकाले शृणन्ति हिंसन्ति तेभ्यो] रुद्ररूपेभ्यः सर्वतः (सर्वेभ्यः) सर्वेषु देशेषु सर्वेषु च कालेषु नमोऽस्तु ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां
याज्ञिक्यामुपनिषदि भाष्य एकोनविंशोऽनुवाकः ॥ १९ ॥

=====

अथ विंशोऽनुवाकः ।

प्राग्वक्त्रप्रतिपादकं मन्त्रमाह—

तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि
विंशोऽनुवाकः ॥ २० ॥

प्राग्वक्त्रदेवस्तत्पुरुषनामकः । द्वितीयार्थे चतुर्थी । तत्पुरुषं देवं विद्महे गुरुशास्त्रमुखाज्जानीमः । ज्ञात्वा च महादेवाय तं महादेवं धीमहि ध्यायामि(म) । त [त्त]स्मात्कारणाद्रुद्रदेवो नोऽस्मान्प्रचोदयात्, ध्यानज्ञानार्थं प्रचोदयतु ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां
याज्ञिक्यामुपनिषदि भाष्ये विंशोऽनुवाकः ॥ २० ॥

=====

अथैकविंशोऽनुवाकः ।

ऊर्ध्ववक्त्रप्रतिपादकं मन्त्रमाह—

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्र-

* तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुत्या सर्वान्तर्यामित्वेन परमेश्वरस्य युक्तमेव सर्वरूपत्वम् ।

१ घ. ३६ । २ घ. ३७ ।

ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्येकविंशोऽनुवाकः ॥ २१ ॥

योऽयमूर्ध्ववक्त्रो देवः सोऽयं सर्वविद्यानामीशानो नियामकः । तथा सर्वभूतानामखिलप्राणिनामीश्वरो नियामकः । ब्रह्माधिपतिर्वेदस्याधिकत्वेन पालकः । तथा ब्रह्मणो हिरण्यगर्भस्याधिपतिः तादृशो यो ब्रह्मा प्रवृद्धः परमात्मा सोऽयं मे ममानुग्रहाय शिवः शान्तोऽस्तु । सदाशिवोम्, स एव सदाशिव ओमहं भवामि ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये एकविंशोऽनुवाकः ॥ २१ ॥

अथ द्वाविंशोऽनुवाकः ।

पुनरपि तद्देवताकं मन्त्रान्तरमाह—

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नमो नमः, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि द्वाविंशोऽनुवाकः ॥ २२ ॥

नमः शिवाय । कथंभूताय पशूनामाब्रह्मस्तम्बपर्यन्तानां पतिर्नायकः पशुपतिस्तस्मै ।

"ब्रह्माद्याः स्तम्बपर्यन्ताः पशवः परिकीर्तिताः ।
तेषां हि नायको यस्माच्छिवः पशुपतिः स्मृतः" ॥

[इत्युक्तत्वात्] उमायाः पतिरुमापतिस्तस्मै । उमाशब्दः कविभिर्व्याख्यातः—"उ मेति मात्रा तपसे निषिद्धा पश्चादुमाख्यां सुमुखी जगाम" इति । अम्बिकायाः पार्वत्याः पतिरम्बिकापतिस्तस्मै । हिरण्योपलक्षितनवनिधिपालकत्वाद्धिरण्यपतिस्तस्मै । हिरण्यरूपाय तेजोमयाय । हिरण्यवदनवाप्या दुर्लभा वर्णा वेदाक्षराणि यस्मादुत्पद्यन्ते स हिरण्यवर्णः । यथा दरिद्राणां हिरण्यं दुर्लभं तद्वत्प्राणिनां गुरुकुले स्थित्वा वेदाक्षराणां दुर्लभत्वमिति भावः । हिरण्यबाहवे कनकायमानबाहूपलक्षितसर्वावयवाय नमः+ ॥

इति कृष्णयजुर्वेदीय तैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये द्वाविंशोऽनुवाकः ॥ २२ ॥

+ नमःशब्दद्वयं प्रत्येकं संबन्धद्योतनार्थमिति युक्तं पठितुम् ।

अथ त्रयोविंशोऽनुवाकः ।

पूर्वोक्तप्रकारेणोपासीनस्य पुरुषस्योपास्यनमस्कारार्थमेकामृचमाह—

ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोप-
निषदि त्रयोविंशोऽनुवाकः ॥ २३ ॥

यदेतत्परं ब्रह्म तत्सत्यमबाध्यम् । सत्यत्वं च द्विविधं व्यावहारिकं पारमार्थिकं च । हिरण्यगर्भरूपं व्यावहारिकं सत्यं तन्निराकरणेन पारमार्थिकं सत्यं प्रतिपादयितुमृतं सत्यमिति विशेष्यते । अत्यन्तं सत्यमित्यर्थः । तादृशं ब्रह्म भक्तानुग्रहायोमामहेश्वरात्मकपुरुषरूपं भवति । तत्र दक्षिणे महेश्वरभागे कृष्णवर्ण उमाभागे वामे पिङ्गलवर्णः । स च योगेन स्वकीयं रेतो ब्रह्मरन्ध्रे धृत्वोर्ध्वरेता भवति । त्रिनेत्रत्वाद्विरूपाक्षः । तादृशं परमेश्वरमनुश्रुत्येति शेषः । विश्वरूपाय जगत्कारणत्वेन सर्वजगदात्मकाय * विरूपाक्षाय पुरुषायैष नमस्कारोऽस्तु ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये त्रयोविंशोऽनुवाकः ॥ २३ ॥

अथ चतुर्विंशोऽनुवाकः ।

रुद्रदेवताकं मन्त्रमाह—

सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु ।
पुरुषो वै रुद्रः सन्महो नमो नमः ।
विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् ।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोप-
निषदि चतुर्विंशोऽनुवाकः ॥ २४ ॥

यो रुद्रः पार्वतीपतिः पुराणेषु प्रसिद्धः स एव सर्वो जीवरूपेण सर्वशरीरेषु प्रविष्टत्वात् । तस्मै सर्वात्मकाय रुद्राय नमोऽस्तु । प्रकृतिपुरुषयोर्मध्ये जडात्मिकां

* इदं पदमधिकम् ।

प्रकृतिमपोह्य चिदात्मकः पुरुषो यो विद्यते स एव भक्तानुग्रहाय रुद्रमूर्तिरूपेणावभासते, तस्माद्य (द्व) [स्तु] तः सन्महः " सदेव सोम्येदमग्र आसीत् " इति श्रुतिप्रतिपाद्यमबाध्यं रुद्ररूपं तेजः । तादृशाय रुद्राय पुनः पुनर्नमस्कारोऽस्तु । यज्जडं विश्वमस्ति यच्च भूतं चेतनं प्राणिजातमस्तीति चेतनाचेतनरूपेण विचित्रं यद्भुवनं जगत्, तत्रापि यज्जगज्जातं पूर्वमेवोत्पन्नं यच्चेदानीं जायमानं स सर्वोऽपि प्रपञ्च एष रुद्रो हि । तद्व्यतिरेकेण वास्तवस्य जगतो निरूपयितुमशक्यत्वात् । तादृशाय सर्वात्मकाय रुद्राय नमस्कारोऽस्तु ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये चतुर्विंशोऽनुवाकः ॥ २४ ॥

=====

अथ पञ्चविंशोऽनुवाकः ।

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे ।
वोचेम शंतमꣳ हृदे ॥
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि पञ्चविंशोऽनुवाकः ॥ २५ ॥

कद्रुद्रायेति । " कत्थ प्रशंसायाम् " इति धातोरुत्पन्नः कच्छब्दः प्रशंसामाह । ततः कद्रुद्रः प्रशस्तो रुद्रस्तस्मै । प्रचेतसे प्रकृष्टज्ञानयुक्ताय । [मीढुष्टमाय] " मिह सेचने " इति धातुः । अभीष्टानां कामानामतिशयेन सेचकाय । स्तोतुः कामप्रदायेत्यर्थः । तव्यसे, अत्राऽऽदौ सकारस्य च्छान्दसो लोपः । स्तव्याय स्तोतुं योग्यायेत्यर्थः । हृदे हृदयवर्तित्वेन तद्रूपाय, शंतममतिशयेन सुखकरं स्तुतिरूपं वाक्यं वोचेम कथयेम । सर्वो हीति पूर्ववत् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये पञ्चविंशोऽनुवाकः ॥ २५ ॥

=====

अथ षड्विंशोऽनुवाकः ।

अथाग्निहोत्रकर्मणि होमसाधनद्रव्यस्य कारणभूतं वृक्षविशेषं विधत्ते—

यस्य वैकङ्कत्यग्निहोत्रहवणी भवति प्रत्ये-

घास्याऽऽहुतयस्तिष्ठन्त्यथो प्रतिष्ठित्यै, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि षड्विंशोऽनुवाकः ॥ २६ ॥

अग्निहोत्रे हविर्हूयते यया दर्व्या सेयमग्निहोत्रहवणी, सा च वैकङ्कती विकङ्कतास्येन वृक्षेण निष्पादिता यस्याग्निहोत्रिणो भवत्यस्याग्निहोत्रिण आहुतयस्तयाऽग्निहोत्रहवण्या प्रक्षिप्ताः सत्यः प्रतितिष्ठन्त्येव फलप्रदा भवन्त्येव । अथो अपि च प्रतिष्ठित्यै, अनुष्ठातुश्चित्तशुद्धिद्वारा तत्त्वज्ञानप्रतिष्ठार्थं संपद्यन्ते । मुमुक्षोश्चित्तशुद्धिद्वारा वेदोक्तानां कृत्स्नकर्मणां मोक्षसाधनत्वं द्योतयितुमुपलक्षणत्वेन कर्माङ्गभूतो विकङ्कतवृक्षो विहितः ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये षड्विंशोऽनुवाकः ॥ २६ ॥

अथ सप्तविंशोऽनुवाकः ।

चित्तशुद्धिहेतूनां कर्मणां संग्रहेणोपयोगमस्मिन्मोक्षप्रकरणे सूचयित्वा प्रतिबन्धनिवारकान्रक्षोघ्नान्मन्त्राञ्जप्यत्वेनाभिधत्ते —

कृणुष्व पाज इति पञ्च, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि सप्तविंशोऽनुवाकः ॥ २७ ॥

यस्य वैकङ्कत्यग्निहोत्रहवणीत्यनुवाकान्ते कृणुष्व पाज इति पञ्चेति प्रतीकत्वेन पठिताः संहितायां प्रथमकाण्डे द्वितीयप्रपाठके पठिताः पञ्चर्चो [जापितव्या इति शेषः । ताश्च] व्याख्यास्यामः । कृणुष्व पाज इति पञ्चानुष्टुप्छन्दस्का वामदेवदृष्टा अग्निदेवताकाः । अस्मिन्नृक्पञ्चके भगवानग्निरभिष्टूयते ।

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥

कृणुष्वेति । हेऽग्नेऽस्मदीयकामक्रोधादिशत्रुसंहारार्थं पाजो बलमस्मभ्यं कृणुष्व कुरुष्व तत्र दृष्टान्तः । पृथ्वीं विस्तीर्णां प्रसितिं न प्रसितिमिव जालमिव । नकार उपमार्थः । सीयन्ते बध्यन्ते पक्षिणो यया प्रकर्षेण सा प्रसितिर्जालम् । " षिञ्बन्धने " इति धातुः । यथा पक्षिभक्षका निषादास्तद्बन्धनार्थं जालं विस्तीर्णं प्रसारयन्ति तथा भो भगवन्नग्ने बलं

१ घ. ४३ । २ घ. ४४ ।

प्रसारयेत्यर्थः । ततो राजेव नृप इवामवान्सहायवान्सन्निभेन गजेन तदुपलक्षितचतुरङ्गबलेन शत्रून्प्रति याहि गच्छ । अमन्ति भजन्ति स्वामिनमित्यमाः सेवकाः, तद्वानमवान् । यथा राजा चतुरङ्गबलसहितः सञ्शत्रून्संहर्तुं गच्छति तथा त्वमपि भो भगवन्नग्नेऽस्मदीयशत्रून्संहर्तुं गच्छेत्यर्थः । त्वं कथंभूतः । तृष्वीं प्रसितिमनु द्रूणानः । अत्र विभक्तिव्यत्ययः । तृष्व्या शीघ्रं संहारसाधनया प्रसित्या शत्रूननु पलायनकाले पश्चाद्द्रूणानो हिंसयन् । " द्रु हिंसायाम् " इति धातुः । अस्ता । " असु क्षेपे " इति धातुः । बाणानां प्रक्षेपकोऽसि । यस्मादेवं तस्माद्रक्षसो दैतेयांस्तपिष्ठैरतिसंतापहेतुभिरायुधैर्विध्य ताडय । अस्मिन्मन्त्रे बाह्याभ्यन्तरशत्रुनिवृत्तिरग्निप्रार्थनायाः फलम् ।

तव भ्रमास आशुया पतन्त्यनुस्पृश धृषता शोशुचानः ।
तपूंष्यग्ने जुह्वा पतङ्गा न संदितो विसृज विष्वगुल्काः ॥

तवेति । भो भगवन्नग्ने भ्रमासः सर्वत्र प्राणिनः पीडयितुं भ्रमणशीला आशुयाऽहोरात्रयोः शीघ्रं यान्तीतस्ततः संचरन्तीत्याशुया । जसो लोपश्छान्दसः । एवंविधा ये पिशाचाः पतन्ति । " पत्लृ गतौ " । इतस्ततो गच्छन्ति । तान्पतङ्गान्पतनशीलान्पिशाचांस्तपूंषि प्रपञ्चतपनशीलानि रक्षांसि च धृषता प्रगल्भेन । " ञिधृषा प्रागल्भ्ये " इति धातुः । तव तेजसेति शेषः । अनुस्पृश दहेत्यर्थः । त्वं कथंभूतः । शोशुचानोऽन्तर्बहिः शत्रूनतिदुःखयन् । यद्वा शोशुचानो देदीप्यमानः । "शुच दीप्तौ" इति धातुः । पुनः कथंभूतः । जुह्वा स्रुचा हूयमानघृतपुरोडाशादिरूपहविष्या(ष्मा)निति शेषः । पुनः कथंभूतः । "दो अवखण्डने" । राक्षसैः सम्यङ्न दितः खण्डितोऽसंदितः । एवंविधस्त्वं शत्रूणां बाह्यानामान्तराणां च विष्वगुपर्यधस्तिर्यक्सर्वत उल्का अलातज्वाला विसृज प्रसारयेत्यर्थः ।

प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघशंसो यो अन्त्यग्ने मा किष्टे व्यथिरादधर्षीत् ॥

प्रतीति । भो भगवन्नग्ने तूर्णितमोऽतिक्षिप्रतमस्त्वं स्पशः । "स्पश बाधने" शकारान्तो द्वितीयाबहुवचनम् । बाधकाञ्शत्रून्प्रति विसृज पाशैर्बद्ध्वा नयेत्यर्थः । किंचास्या अस्मदीयाया विश पुत्रादिप्रजायाः पायुः पाति रक्षतीति पायू रक्षको भव । किंच नोऽस्माकं दूरेऽन्त्यन्तिके च योऽघशंसोऽघं पापं शंसतीच्छतीत्यघशंसः । " शसि " इच्छायाम् । तमपि पराकुर्विति शेषः । अहमप्यदब्धः शत्रुभिरनुपहिंसितो भवामि । "दम्भु हिंसायाम्" । किं च किः कोऽपि च्छान्दसोऽयं प्रयोगः । व्यथिर्व्यथको राक्षसस्ते तव पुरस्तान्माऽऽदधर्षीन्माऽऽधृष्टो भूदित्यर्थः । अग्निदर्शनस्य राक्षसपिशाचादिपलायनहेतुत्वात् । तथा च नीतिशास्त्रम्—

"दिवा सूर्यप्रतापेन रात्रौ वह्निप्रतापतः ।
पिशाचराक्षसादीनां दूरतस्तु पलायनम् ॥
तस्माद्रात्रौ मनुष्याणां वने मार्गे गृहेऽपि वा ।
वह्निसेवनमाहात्म्यात्पिशाचादिपलायनम्" ॥ इति ।

उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्रा॰ ओषतात्तिग्महेते ।
यो नो अरातिꣳ समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥

उदेति । भो भगवन्नग्नेऽस्माननुग्रहीतुमुत्तिष्ठ । अस्मान्प्रति दयामातनुष्व । अमित्रान्कामादीन्नितरामोषताद्धस्मी कुरु । "उष दाहे" । किं च भोस्तिग्महेते भोस्तीक्ष्णायुध नोऽस्माकमुपरि यः कश्चिदरातित्वं चक्रे कृतवांस्तमस्मद्द्रोहिणं शुष्कमतसं न कक्षवृक्षादिमिव धाक्षि दग्धं कुरु। नीचा नीचैरधो नरकमार्गे च कुरु । भोः समिधान देदीप्यमान वह्ने । "ञिइन्धी दीप्तौ" । सर्वमेतदस्मदीयं कार्यं साधयेत्यर्थः

ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून् ॥

ऊर्ध्व इति । भो भगवन्नग्नेऽस्मद्विभक्तिव्यत्ययः । अस्माकं कामादीन्निरपूनध्यधिकं प्रतिविध्य ताडय। अत एव दैव्यानि देवतासंबन्धीनि सत्कर्माणि सदुपासनानि चाऽऽविष्कृणुष्व प्रकटय । अत एवोर्ध्वः सत्यलोकप्रभृत्यूर्ध्वलोकप्रदो भव। किंच यातुजूनां यातुधानानां पुण्यलोकविरोधिनां रक्षसां स्थिराणि धनूंष्यवतनुहि, अवतीर्णमौर्वीकाणि कुरु । किंच जामिमालस्यादिकं परित्यज्य प्रमृणीहि विनाशय। किंचाजामिमनालस्यं यथा भवति तथा जगत्संहर्तृमुद्युक्तान्शत्रून्प्रमृणीहि । "मृ हिंसायाम्" । जामिताऽऽलस्यपीडादावित्यभिधानात् । पञ्चानामृचामयमभिप्रायः । भो भगवन्नग्ने त्रैलोक्यनायकास्मदीयान्तर्बहिःशत्रून्निर्मूल्य सत्कर्मसु प्रवर्त्यान्तःकरणं विमलीकृत्य शतं संवत्सरान्भार्यापुत्रादिभिः सह भुक्तिं दत्त्वा मरणादूर्ध्वं सकुटुम्बाय मह्यं मुक्तिं प्रयच्छेति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये सप्तविंशोऽनुवाकः ॥ २७ ॥

अथाष्टाविंशोऽनुवाकः ।

जीवनहेतुक्षेत्रलाभद्वारा मुक्तिहेतुं पृथिवीदेवताकं मन्त्रमाह—

अदितिर्देवा गन्धर्वा मनुष्याः पितरोऽसुरास्तेषाꣳ
सर्वभूतानां माता मेदिनी महता मही सावित्री

गायत्री जगत्युर्वी पृथ्वी बहुला विश्वा भूता कृत-
मा काया सा सत्येत्यमृतेति वसिष्ठः, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्य-
ष्टाविंशोऽनुवाकः ॥ २८ ॥

अदितिशब्दोऽखण्डितेति व्युत्पत्त्या भूमिमाचष्टे । अत एव निघण्टुकारेण पृथिवी-नामसु पठितः । देवादयः पञ्च जातिविशेषा अदितिरूपाः । एते तु सर्वप्राणिदेहानामुपलक्षकाः । अतस्तेषां सर्वभूतानां देहोपादानत्वादियमदितिर्माता जननी । मेदिनी मधुकैटभमेदसा जाता । अथवा मेदस्विनी कठिनेत्यर्थः । *महती गुणाधिका धैर्ययुक्ता वा । तच्च सर्वप्राणिकृतोपद्रवसहिष्णुत्वेनावगन्तव्यम् । मही पूज्या । सावित्री सवितुः प्रेरकस्यान्तर्यामिणः संबन्धिनी । गायत्री गायकान्स्वोपासकांस्त्रायते रक्षतीत्यर्थः । जगती जगदाश्रयभूता । उर्व्यनेकसस्याढ्या । पृथ्वी, अनेकविस्तारवती । बहुला निबिडावयवा । विश्वा सर्वात्मिका । [भूता] प्राणिदेहोत्पत्तेः पूर्वमेव विद्यमाना । कृतमाऽतिशयेन सुखरूपा । काया सर्वप्राणिदेहरूपेण परिणता । सा प्रसिद्धा । सत्या व्यवहारदशायां बाधरहिता । इत्येवं वसिष्ठो महामुनिराह । तथैवामृता मरणरहिता चतुर्युगपर्यावर्तनेऽप्यवस्थितेत्येवमप्यर्थं वसिष्ठ एवाऽऽह । अतोऽस्य मन्त्रस्य वसिष्ठ ऋषिरित्यर्थः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेयोपनिषदि
याज्ञिक्यामुपनिषदि भाष्येऽष्टाविंशोऽनुवाकः ॥ २८ ॥

अथैकोनत्रिंशोऽनुवाकः ।

वृष्ट्यभावकृतोपद्रवपरिहारेणोपकारिणमब्देवताकं मन्त्रमाह —

आपो वा इदꣳ सर्वं विश्वा भूतान्यापः प्राणा वा आपः
पशव आपोऽन्नमापोऽमृतमापः सम्राडापो विराडापः
स्वराडापश्छन्दाꣳस्यापो ज्योतीꣳष्यापो यजूꣳष्यापः
सत्यमापः सर्वा देवता आपो भूर्भुवः सुवराप ओम्, इति।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषद्य-
कोनत्रिंशोऽनुवाकः ॥ २९ ॥

* महतेत्यस्य व्याख्यानमेतत् ।

यदिदं जगदस्ति **तत्सर्वमापो वै** जलमेव । कथमिति प्रपञ्च्यते । **विश्वा भूतानि** सर्वाणि शरीराण्यापो जलम् । रेतोरूपेण तदुत्पादकत्वात् । **प्राणा वै** शरीरवर्तिवा-यवोऽप्यापः । उदकेन प्राणानामाप्यायनात् । अत एव च्छन्दोगा आमनन्ति— " आपोमयः प्राणो न पिबतो विच्छेत्स्यते " इति । **पशवो** गवादयोऽप्यापः । क्षीर-रूपेण तत्र परिणतत्वात् । **अन्नं** व्रीहियवादिकमापः । जलस्यान्नहेतुत्वं प्रसिद्धम् । **अमृतमापः** । सम्यग्राजत इति सूत्रात्मा हिरण्यगर्भः **सम्राट्** । विस्पष्टं राजत इति ब्रह्माण्डदेहः पुरुषो **विराट्** । इन्द्रियादिनैरपेक्ष्येण स्वयमेव राजत इत्यव्याकृताभिमानी-श्वरः **स्वराट्** । **छदांसि** गायत्र्यादीनि । **ज्योतींष्यादित्यादीनि** । **यजूंष्यनियताक्षरा** मन्त्राः । **सत्यं** यथार्थकथनम् । **सर्वा देवता** इन्द्रादयः । **भूर्भुवः सुवरित्योः लोकाः** । सम्राडादिलोकत्रयान्तार्थरूपेणाऽऽपः स्तूयन्ते । एताश्चाऽऽपो मूलकारणपरमात्मरूपेण प्रणवप्रतिपाद्या इति वक्तुमोंकारः पठितः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये एकोनत्रिंशोऽनुवाकः ॥ २९ ॥

अथ त्रिंशोऽनुवाकः ।

माध्याह्निकसंध्यानुष्ठानेऽभिमन्त्रितजलपानार्थं मन्त्रमाह —

आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् ।
पुनन्तु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु माम् ॥
यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम ।
सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहꣳ स्वाहा, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि त्रिंशोऽनुवाकः ॥ ३० ॥

या **आपस्ताः पृथिवीं पुनन्तु** प्रक्षालनेन शोधयन्तु । सा च **पृथिवी पूता** शुद्धा सती **मामनुष्ठातारं पुनातु** शोधयतु । तथा **ब्रह्मणो** वेदस्य **पतिः** पालकमाचार्यमेता **आपः पुनन्तु** । तेनाऽऽचार्येणोपदिष्टं **ब्रह्म** [वेद] स्वरूपं **पूता** स्वयं पूतं **सन्मां पुनातु** । **अन्यभुक्तावशिष्टरूपमुच्छिष्टं** यदस्ति तदभोज्यं भोक्तुमयोग्यं तादृशं कदाचिन्मया **भुक्तम्** । **यद्वा दुश्चरितमन्यदपि** प्रतिषिद्धाचरणरूपं **मम** किंचित्संपन्नं तत्सर्वं परि-

१ व. ४७ ।

हत्येति शेषः । ततो मामापः पुनन्तु । तथाऽसतां शूद्रादीनां प्रतिग्रहं च मया कृतं पुनन्तु । तदर्थमिदमभिमन्त्रितमुदकं स्वाहा मदीयवक्त्राग्नौ सुहुतमस्तु ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये त्रिंशोऽनुवाकः ॥ ३० ॥

अथैकत्रिंशोऽनुवाकः ।

सायंसंध्याकाले जलपानार्थं मन्त्रमाह—

अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः । पापेभ्यो रक्षन्ताम् । यदह्ना पापमकार्षम् । मनसा वाचा हस्ताभ्याम् । पद्भ्यामुदरेण शिश्ना । अहस्तदवलुम्पतु । यत्किंच दुरितं मयि । इदमहं माममृतयोनौ । सत्ये ज्योतिषि जुहोमि स्वाहा, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्येकत्रिंशोऽनुवाकः ॥ ३१ ॥

योऽयमग्निरस्ति यश्च मन्युः क्रोधाभिमानी देवो ये च मन्युपतयः क्रोधस्वामिनस्तन्नियामका देवाः सन्ति, ते सर्वेऽपि मन्युकृतेभ्यो मदीयकोपनिष्पादितेभ्यः पापेभ्यो [मा मां] रक्षन्तां पापिनं मां तत्पापविनाशनेन पालयन्तु । किंचातीतेनाह्ना तस्मिन्नहनि यत्पापमकार्षं कृतवानस्मि । केन साधनेन, मनआदिभिः शिश्नान्तावयवैः । तत्सर्वं पापमहरवलुम्पतु । अहरभिमानी देवो विनाशयतु । परहिंसादिचिन्तनं मानसं पापम् । अप्रियानृतादिभाषणं वाचिकम् । अभिचारहोमादिकं हस्तकृतम् । पादेन गोब्राह्मणस्पर्शादिकं पादकृतम् । अभोज्यभोजनमुदरकृतम् । अगम्यागमनं शिश्नकृतम् । अथवा किमनेन परिमितगणनेन, यत्किमपि दुरितं मयि निष्पन्नमिदं पापजातं सर्वं तत्कर्तारं मां च लिङ्गशरीररूपममृतयोनौ मरणरहिते जगत्कारणे सत्ये बाधरहिते ज्योतिषि स्वयंप्रकाशे वस्तुनि जुहोमि । प्रक्षिपाम्यहम्, अनेन होमेन तत्सर्वं भस्मी करोमि । तदर्थमभिमन्त्रितं जलं स्वाहा मदीयमुखाग्नौ स्वाहुतमस्तु ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्य एकत्रिंशोऽनुवाकः ॥ ३१ ॥

अथ द्वात्रिंशोऽनुवाकः ।

प्रातःसंध्याकाले जलपानार्थं मन्त्रमाह—

सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः ।
पापेभ्यो रक्षन्ताम् । यद्रात्रिया पापमकार्षम् ।
मनसा वाचा हस्ताभ्याम् । पद्भ्यामुदरेण शिश्ना ।
रात्रिस्तदवलुम्पतु । यत्किंच दुरितं मयि । इदमहं
मामममृतयोनौ । सूर्ये ज्योतिषि जुहोमि स्वाहा, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि द्वात्रिंशोऽनुवाकः ॥ ३२ ॥

सूर्येऽहर्निष्पादके सूर्योपाधिके । अन्यत्सर्वं पूर्ववद्व्याख्येयम् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये द्वात्रिंशोऽनुवाकः ॥ ३२ ॥

अथ त्रयस्त्रिंशोऽनुवाकः ।

प्राणायामादिषु सर्वत्राऽऽवश्यकस्योंकारस्य प्रसङ्गादृष्यादिकमुच्यते—

ओमित्येकाक्षरं ब्रह्म । अग्निर्देवता ब्रह्म
इत्यार्षम् । गायत्रं छन्दं परमात्मं सरू-
पम् । सायुज्यं विनियोगम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि त्रयस्त्रिंशोऽनुवाकः ॥ ३३ ॥

ओमिति यदेकाक्षरमस्ति तद्ब्रह्म समस्तब्रह्माण्डोत्पत्तिस्थितिभङ्गकारणम् । तस्य देवता वाच्यभूतं वस्त्वग्निः । अग्निशब्दोऽत्र रूढ्या देवताविशेषवाचको न भवति अपि तु योगेन परमात्मवाचकः । अङ्गति सर्वं जगद्व्याप्नोतीत्यग्निः । अग्निशब्दोपलक्षितं ब्रह्मेति यत्तदार्षमृषिः । मन्त्रोऽपि ब्रह्म, ऋषिरपि ब्रह्म, देवताऽपि ब्रह्म, सर्वं स्वयमेवेत्यर्थः । गायत्रं दैवी गायत्री छन्दः । विनियोगं विनियोगः । सायुज्यं

---

१ घ. ४१ । २ घ. ५० ।

सायुज्ये परब्रह्मावासौ । कथंविधे सायुज्ये, [परमात्मं] परमात्मलक्षणे । तथा सरूपं सरूपे सर्वजगत्समानरूपे । सर्वात्मक इति यावत् । सर्वत्र व्यत्ययो बोध्यः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये त्रयस्त्रिंशोऽनुवाकः ॥ ३३ ॥

==========

अथ चतुस्त्रिंशोऽनुवाकः ।

संध्यात्रय(ये) मार्जनादूर्ध्वं गायत्र्या आवाहनमन्त्रमाह—

आयातु वरदा देवी अक्षरं ब्रह्म संमितम् । गायत्रीं छन्दसां मातेदं ब्रह्म जुषस्व मे । यदह्नात्कुरुते पापं तदह्नात्प्रतिमुच्यते । यद्रात्रियात्कुरुते पापं तद्रात्रियात्प्रतिमुच्यते । सर्ववर्णे महादेवि संध्याविद्ये सरस्वति, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि चतुस्त्रिंशोऽनुवाकः ॥ ३४ ॥

वरदाऽस्मदभीष्टवरप्रदा देवी गायत्रीछन्दोभिमानिनी देवताऽक्षरं विनाशरहितं संमितं सम्यग्वेदान्तप्रमाणेन निश्चितं ब्रह्म जगत्कारणं परं तत्त्वमुद्दिश्याऽऽयात्वागच्छतु । अस्माकं ब्रह्मतत्त्वं बोधयितुमागच्छत्वित्यर्थः । अयमेवार्थ उत्तरार्धेन स्पष्टीक्रियते । छन्दसां गायत्रीत्रिष्टुबादीनां वेदानां वा माता जननी देवता [गायत्रीं] गायत्री गायत्रीशब्दाभिधे (*ये नोऽस्माभिर्ध्ये) या नोऽस्मानि(मे ममे)दं ब्रह्म वेदान्तप्रतिपाद्यं तत्त्वं जुषस्व जोषयतु । उपदिशत्वित्यर्थः । किंच हे संध्याविद्ये सायंप्रातःसंधौ भवा संध्या तादृशी या विद्याऽनुष्ठानरूपा तत्संबुद्धौ संध्याविद्ये सरस्वति त्वद्भक्तो यदह्नाद्यस्मिन्नहनि पापं कुरुते तदह्नात्तस्मिन्नहनि तेन पापेन प्रतिमुच्यते विमुच्यतां शुद्धो भूयादिति भावः । यद्रात्रियाद्यस्यां रात्रौ । अन्यत्समानम् । एते छान्दसाः प्रयोगाः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये चतुस्त्रिंशोऽनुवाकः ॥ ३४ ॥

==========

---

* धनुश्चिह्नान्तर्गतमधिकमप्रयोजनम् ।

अथ पञ्चत्रिंशोऽनुवाकः ।

गायत्र्या आवाहनमन्त्रमाह—

ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धामनामाऽसि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरों गायत्रीमावाहयामि सावित्रीमावाहयामि सरस्वतीमावाहयामि छन्दसीनावाहयामि श्रियमावाहयामि गायत्रिया गायत्री छन्दो विश्वामित्र ऋषिः सविता देवताऽग्निर्मुखं ब्रह्मा शिरो विष्णुर्हृदयꣳ रुद्रः शिखा पृथिवी योनिः प्राणापानव्यानोदानसमाना सप्राणा श्वेतवर्णा सांख्यायनसगोत्रा गायत्री चतुर्विꣳशत्यक्षरा त्रिपदा षट्कुक्षिः पञ्चशीर्षोपनयने विनियोगः,—इति ।

हे गायत्रि त्वमोजोऽसि बलहेतुभूताष्टमधातुरूपाऽसि । सहोऽसि शत्रूनभिभवितुं शक्तिरसि । बलमसि शरीरगतव्यवहारसामर्थ्यरूपाऽसि । भ्राजोऽसि दीप्तिरूपाऽसि । देवानामग्नीन्द्रादीनां धाम तेजो यदस्ति तन्नामाऽसि तदेव त्वन्नामेत्यर्थः । देवानां[धा] मासीत्यर्थः । विश्वं सर्वजगद्रूपं त्वमेवाऽसि । विश्वायुः संपूर्णायुःस्वरूपाऽसि । उक्तस्यैव व्याख्यानं सर्वमसि सर्वायुरिति । अभिभूः सर्वस्य पापस्य तिरस्कारहेतुः । ॐ प्रणवप्रतिपाद्यपरमात्माऽसि । तादृशीं गायत्रीं मदीये मनस्येवाऽऽवाहयामि । * अन्यत्स्पष्टम् ।

* सावित्रीमावाहयामीत्यवशिष्टग्रन्थार्थो दत्तात्रेयदिगम्बरानुचरविरचितनारायणोपनिषत्प्रकाशात्संगृह्यते—"सावित्रीं सवितुर्ब्रह्म साक्षात्कारयितुर्ज्ञानप्रवाशकस्य परमात्मन इमामावाहयामि सरस्वतीं ब्रह्मजलधारणप्रद्योतनाभ्यां वेदाः सरांसि तन्मयत्वात्तद्वतीं सरस्वतीं चतुर्विंशत्यक्षरमन्त्ररूपामावाहयामि । तदङ्गानि च्छन्दर्षीन्गायत्र्याः सर्वमन्त्रमयत्वेन सर्वाणि च्छन्दांसि सर्वांश्चर्षीन्देवताश्च सर्वा आवाहयामि । श्रियं गायत्री सर्ववेदमयी तस्मात्सर्ववेदानां श्रियमावाहयामि । इत्येकगायत्र्यावाहनेनाऽऽत्मनि सर्वमावाहयामीति संकल्पं कृत्वा तामावाह्य तच्छन्दादि स्मृत्वा ध्यानमाचरेत् । तत्र मन्त्रः—गायत्रिया गायत्री छन्दो विश्वामित्र ऋषिः सविता देवताऽग्निर्मुखं ब्रह्मा शिरो विष्णुर्हृदयꣳ रुद्रः शिखा पृथिवी योनिः प्राणापानव्यानोदानसमाना सप्राणा श्वेतवर्णा सांख्यायनसगोत्रा गायत्री चतुर्विꣳशत्यक्षरा त्रिपदा षट्कुक्षिः पञ्चशीर्षोपनयने विनियोगः । इति । गायत्र्या गायत्री छन्दः । विश्वामित्र ऋषिर्मन्त्रद्रष्टा । सविता सर्वं प्रसुवानः परमात्मा देवता तन्मन्त्रत्वात् । इति च्छन्दर्षिदेवतास्मरणम् । ध्यानम्—अग्निः प्रसिद्धो मुखं मुखस्थानीयो गायत्र्या इति संबध्यते । ब्रह्मा चतुर्मुखः शिरः शिरस्थानीयः प्रथमजत्वात् । विष्णुर्हृदयं सर्वस्य(त्र) सूक्ष्मत्वेन स्थितिरतः स्थितेः कर्ता विष्णुर्हृदयम् । रुद्रः शिखा यथा शिखा सर्वावयवातीता तथा रुद्रः प्रलयकरणादतः शिखास्थानीयः ।

गायत्र्यावाहनादूर्ध्वं प्राणायामार्थं मन्त्रमाह—

ओं भूः । ओं भुवः । ओꣳ सुवः । ओं महः । ओं जनः । ओं तपः । ओꣳ सत्यम् । ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । ओमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम् , इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि पञ्चत्रिंशोऽनुवाकः ॥ ३५ ॥

भूरादि(दयः) सत्यान्त(न्ता) लोकप्रतिपादिकाः सप्त व्याहृतयः । तेषां च लोकानां प्रणवप्रतिपाद्यब्रह्मस्वरूपत्वविवक्षया प्रत्येकं प्रणवोच्चारणम् । तत्सवितुरित्यादिको गायत्री मन्त्रः । तत्प्रतिपाद्यस्य ब्रह्मत्वविवक्षया तदादौ प्रणवोच्चारणम् । मन्त्रस्य चायमर्थः । **सवितुः** प्रेरकस्यान्तर्यामिणो देवस्य **वरेण्यं** वरणीयं श्रेष्ठं तद्भर्गस्तेजो **धीमहि** ध्यायामः । **यः** सविता परमेश्वरो **नोऽस्मदीया धियो** बुद्धिवृत्तीः **प्रचोदयात्**प्रकर्षेण तत्त्वबोधे प्रेरयति तस्य तेजो ध्यायाम इति पूर्वत्रान्वयः । आपो ज्योतिरित्यादि गायत्र्याः शिरः, तस्याऽऽद्यन्तयोः प्रणवद्वयं पूर्ववदुच्चार्यते । या **आपो** नदीसमुद्रादिगताः सन्ति **यच्च ज्योतिरा**दित्यादिकमस्ति योऽपि **रसो** मधुराम्लादिः षड्विधोऽस्ति **यदप्यमृतं** देवैः पीतमस्ति तत्सर्वमों प्रणवप्रतिपाद्यं **ब्रह्म** । **भूर्भुवः सुवरों** पूर्ववद्व्याख्येयम् । अस्य मन्त्रस्य प्राणायामाङ्गत्वममृतनादोपनिषदि श्रूयते—

" सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते " इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये पञ्चत्रिंशोऽनुवाकः ॥ ३५ ॥

पृथिवी योनिर्येषां तेऽस्थानीया सर्वप्रसवहेतुत्वात् । प्राणापानव्यानोदानसमाना प्राणादयः पञ्च प्रवाहादिवायुरूपाः सन्त्यस्यां सा तथोक्ता । सप्राणा सह प्राणैरिन्द्रियैर्दे(वा)वादिभिः सप्राणा । श्वेतवर्णा प्रथमं शुद्धगुणप्रधानत्वात् । सांख्यायनसगोत्रा संख्यां गुणसंख्यानमाहुस्ते सांख्याः । सांख्यैरीयते गम्यते प्राप्यते सर्वगुणनिरासात्स सांख्यायनः परमात्मा ब्रह्म तन्मात्रं सांख्यायनेन समानमेकं गोत्रं कुलमुद्भवोऽस्याः सांख्यायनसगोत्रा, इति । देवतारूपत्वेन ध्यानमुक्त्वा मन्त्ररूपत्वेन विवक्षुः पुनर्गायत्रीमुपादत्ते—गायत्री मन्त्ररूपा चतुर्विंशत्यक्षरा चतुर्विंशतिरक्षराण्यस्याः सा तथोक्ता । तेन त्रिपदा त्रयः पादा अस्याः सा त्रिपदा । षट्कुक्षिः षड्वेदाङ्गानि कुक्षयोऽस्याः सर्ववेदरूपायाः सा षट्कुक्षिः । पञ्चशीर्षा चतुर्णां वेदानां चत्वार उपनिषद्भागा ज्ञानप्रतिपादिनः कर्मोपासनाकाण्डयोरुपरि स्थिताश्चत्वारि शीर्षाणि शिरांसि, तथेतिहासपुराणानि पञ्चमो वेदो ज्ञानप्रतिपादकत्वात्पञ्चमं शीर्षमस्याः सा पञ्चशीर्षा । इति ध्यात्वाऽनेन मन्त्रेण बटोरुपनयन उपनीतकरणे विनियोग इत्येवं स्मृत्वा पठित्वा च गायत्रीमन्त्रं जपेत् " इति ॥

अथ षट्त्रिंशोऽनुवाकः ।

जपादूर्ध्वं गायत्रीविसर्जनमन्त्रमाह—

उत्तमे शिखरे जाते भूम्यां पर्वतमूर्धनि ।
ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखम्, इति ॥

भूम्यामवस्थितो यः पर्वतो मेरुनामकस्तस्य **मूर्धन्युपरिभागे** यदुत्तमं शिखरमस्ति* ---------- गायत्री देवता तिष्ठति तस्मात्कारणाद्देवि **ब्राह्मणेभ्यस्त्व**[दुपासकेभ्यस्त्व]दनुग्रहेण परितुष्टेभ्योऽनुज्ञानमभिव्याप्य **यथासुखं** स्वकीयं सुखमनतिक्रम्य स्वस्थाने तस्मिन्नुत्तमे शिखरे **गच्छ** ।

स्तुतो मया वरदा वेदमाता प्रचोदयन्ती पवने द्विजाता ।
आयुः पृथिव्यां द्रविणं ब्रह्मवर्चसं मह्यं दत्त्वा प्रजातुं ब्रह्मलोकम्, इति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि षट्त्रिंशोऽनुवाकः ॥ ३६ ॥

स्तुत इति । पूर्वस्मिन्मन्त्रेऽपरोक्षतयोक्तोऽर्थोऽस्मिन्मन्त्रे परोक्षतया स्पष्टः क्रियते । अत्रेदं वैदिकं रहस्यम् । ब्रह्मलोक आदित्यमण्डलं चोभयमपि गायत्र्या अवस्थानं विकल्पेनान्यतरदिति केचिदाचक्षते । पु(अ)त एवास्माभिः पूर्वस्मिन्मन्त्रेणानु(न्त्रेऽनु)क्तमप्यादित्यमण्डलं गायत्रीनिवासत्वेन मत्वाऽ+ध्याहृत्य व्याख्यातम् । एतस्मिंस्तु मन्त्रे:(न्त्रे)[श्रुतिः] स्वयमेव भगवत्या गायत्र्या वसतित्वेन ब्रह्मलोकं ब्रवीति । तथाचेत्थं व्याख्या तत्र भवति । भगवती गायत्री **ब्रह्मलोकं** ब्रह्मणो भारतीपतेर्लोकं प्रयात्विति वाक्यपरिशेषः । कीदृशं ब्रह्मलोकम् । अतलादिभ्योऽधस्तनेभ्यो भूरादिभ्य ऊर्ध्वतनेभ्यः समस्तेभ्यो लोकेभ्यः प्रकृष्टत्वेन जातः परमात्मनः सकाशादुत्पन्न इति **प्रजातस्तम्** । प्रजातमिति वक्तव्ये प्रजातुमिति प्रयोगश्छान्दसः । किं कृत्वा, **दत्त्वा** । **किम्, आयुः**, शताब्दात्मकमुपजीवनम् । पुनर्द्रविणं सुवर्णमणिमुक्तादि । **पुनर्ब्रह्मवर्चसं** स्वाध्यायाध्ययनतदर्थविचारतदर्थानुष्ठापनै(ष्ठानै)र्जनितं मुखतेजः । यद्दृष्ट्वा लोका आचक्षते देदीप्यमानोऽयं साक्षाज्ज्वलन्निव पावक इति । **कस्मै मह्यम्** । कथंभूताय **पृथिव्यां** विद्यमानाय । कथंभूता गायत्री । द्विजाता द्विजातिभिस्त्रैवर्णिकैरुपास्यमाना । यद्वा द्वयोः सूर्यमण्डलब्रह्मलोकयोर्जाता प्रादुर्भूता । "जनी प्रादुर्भावे" अस्मान्निष्ठाप्रत्ययः ।

* जातपदस्य फलितव्याख्यानमस्तीत्येतत् । + पूर्वत्र त्वेवं न दृश्यते । एतदनुरोधेन तत्तत्र यावदपेक्षितं कल्पनीयम् ।

पुनः कथंभूता । प्रचोदयन्ती, अन्तर्यामिरूपेण प्राणिमात्रं प्रेरयित्री । पवने व्यत्ययेन पवनः । अत्र लुप्तोपमोपादानम् । यथा प्राणवायुश्चतुर्विधं प्राणिजातं प्रेरयतीतस्ततो गमनागमनादिकं कारयति तथेति । तथा वेदमाता चतुर्णां वेदानां जननी । वरान्स्वोपासकेभ्यो वाञ्छितार्थान्ददातीति वरदा । कथंभूता सती, मयोपासकेन स्तुतो बहुलग्रहणाद्व्यत्ययेन स्तुता सतीत्यर्थः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये षट्त्रिंशोऽनुवाकः ॥ ३६ ॥

अथ सप्तत्रिंशोऽनुवाकः ।

पूर्वोक्तोपासनास्वसमर्थस्याऽऽदित्यदेवताविषयं जप्यं मन्त्रमाह—

घृणिः सूर्य आदित्यो न प्रभा वात्यक्षरम् । मधु क्षरन्ति तद्रसम् । सत्यं वै तद्रसमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम् , इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि सप्तत्रिंशोऽनुवाकः ॥ ३७ ॥

भगवानादित्यो वाति वैहायसेन मार्गेणाहर्दिवं गच्छति लोकानुपकर्तुम् । किंविधः । जगत्प्रसवहेतुत्वात्सूर्यः । दीप्तिमत्त्वाद्घृणिः । क्षरणराहित्येन नित्यत्वादक्षरमक्षरः । केव, प्रभा न । नकार उपमार्थः । आदित्यसंबन्धिनी प्रभेव । आदित्यस्योपमानान्तराभावात् । स्वप्रभा गोलकीभूता व्योममार्गेण गच्छति चेद्यथा प्रभावान(तथाऽ)यमित्यभूतार्थमुपमानम् । अपिच तद्रसं तस्मात्पूर्वोक्तादादित्याज्जन्यं रसमुदकं मधु मधुरं यथा तथा क्षरन्ति नद्यो वहन्ति । आदित्यलब्धवृष्ट्युदकमेव नद्यो वहन्ति, अन्यथा भूमावुदकाभाव इति भावः । उत्तरार्धेनाऽऽदित्यब्रह्मणः सर्वात्मकत्वमुच्यते । तदादित्यलक्षणं ब्रह्म सत्यं यथार्थभाषणम् । रसं मधुरादिरसजातम् । आपः सिन्धुनद्यादिगतमुदकम् । ज्योतिश्चन्द्राग्न्यादि । रसः पदार्थमात्रसारः । अमृतं सुधा । ब्रह्म त्रयीविद्या । भूर्भुवः सुवरुक्तयो लोकाः । ओमोंकारः । एतत्सर्वमादित्य एवेति मनसा विभावयेदिति भावः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये सप्तत्रिंशोऽनुवाकः ॥ ३७ ॥

अथाष्टात्रिंशोऽनुवाकः ।

अथ ज्ञानप्रतिबन्धकब्रह्महत्यादिपापनिवृत्तिहेतवस्त्रिसुपर्णनामका मन्त्रा उच्यन्त । तत्र प्रथममन्त्रमाह—

ब्रह्मामेतु माम् । मधुमेतु माम् । ब्रह्मामेव मधुमेतु माम् ।
यास्ते सोम प्रजा वत्सोऽभि सो अहम् । दुष्वप्नहन्दुरुष्वह । यास्ते सोम प्राणास्ताञ्जुहोमि, इति ।

ब्रह्म परं तत्त्वं मामेतु प्राप्नोतु । मधु परमानन्दमाधुर्योपेतं वस्तु मामेतु प्राप्नोतु तदेव पुनः प्रार्थ्यते । मधुरं ब्रह्मैव मामेतु, न त्वन्यत्क्षुद्रदेवतादिकमिति भावः । हे सोमोमा ब्रह्मविद्या तया सह वर्तमान परमात्मंस्ते तव याः प्रजा देवमनुष्यादयः सन्ति ता अभिलक्ष्य स तादृशस्त्वत्सेवको वत्सो बालक एतासां त्वदीयप्रजानां मध्ये बालवदहं त्वदीयकरुणायोग्यः । अतो हे दुष्वप्नहन्संसाररूपस्य दुःस्वप्नस्य घातक परमेश्वर दुरुष्वह दुःसहं भवं विनाशयेत्यर्थः । हे सोम परमात्मंस्ते त्वदीयाः [प्राणवृत्तयो याः सन्ति तान्वृत्तिप्राणांस्त्वयि जुहोमि प्रक्षिपामि । मदीयमनोवागादयः] प्राणास्त्वया निर्मितत्वात्त्वदीया अतस्त्वय्येवोपसंहरामि । विषयेभ्य इन्द्रियाणि निरुध्य त्वदेकचित्तो भवामीत्यर्थः ।

उक्तस्य त्रिसुपर्णमन्त्रस्य माहात्म्यं ब्राह्मणरूपेण दर्शयति—

त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् । ब्रह्महत्यां वा एते घ्नन्ति । ये ब्राह्मणास्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति । आ सहस्रात्पङ्क्तिं पुनन्ति । ओम्, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्यष्टात्रिंशोऽनुवाकः ॥ ३८ ॥

विद्यान्तराणि नापृष्टः कस्यचिद्ब्रूयादिति शास्त्रमनुसृत्य शिष्येण याच्ञायां कृतायां पश्चादुपदिशन्ति । इमं तु त्रिसुपर्णमन्त्रं शिष्ययाच्ञामन्तरेणैव ब्राह्मणायोपदिशेत् । तेनोपदेशेन ये ब्राह्मणास्त्रिसुपर्णं पठन्ति सर्वदा त्रिसुपर्णमन्त्रं जपन्त्येते पुरुषा ब्रह्महत्यां विनाशयन्ति । ते सोमं* प्राप्नुवन्ति । ये तस्यां(ते यस्यां) पङ्क्ता-

---

* सोमयागफलम् ।

वञ्चन्ति तां पङ्क्तिं सहस्रपर्यन्तं पुनन्ति शुद्धां कुर्वन्ति । तस्मादों प्रणवप्रतिपाद्यः परमात्मैव त्रिसुपर्णमन्त्रस्य देवतेत्यर्थः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्येऽष्टात्रिंशोऽनुवाकः ॥ १८ ॥

अथैकोनचत्वारिंशोऽनुवाकः ।

द्वितीयं त्रिसुपर्ण[मन्त्र]माह—

ब्रह्म मेधया । मधु मेधया । ब्रह्मैव मधु मेधया । अग्ना नो देव सवितः प्रजावत्सावीः सौभगम् । परा दुष्वप्न्यꣳ सुव । विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्म आसुव । मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः । मधु नक्तमुतोषसि मधुमत्पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः, इति ।

यद्ब्रह्म सर्वजगत्कारणं सर्ववेदान्तवेद्यं तन्मेधया गुरूपदिष्टमहावाक्यतदर्थधारणशक्त्या लभ्यतामिति शेषः । मध्वित्यादि पूर्ववत् । हे सवितः प्रेरक देवाद्याभिमन्दिने नोऽस्माकं विद्यार्थिनां प्रजावच्छिष्यप्रशिष्यादिप्रजोपेतं सौभगमाचार्यरूपं भाग्यं सावीः प्रेरय यच्छेत्यर्थः । [दुष्वप्न्यं] दुःस्वाप्नियं दुःस्वप्न्यं दुष्टस्वप्नसदृशं द्वैतप्रतिभासं परासुव निराकुरु । अपि च हे सवितः प्रेरक देव दुरितानि ज्ञानप्रतिबन्धकानि पापानि विश्वानि परासुव निराकुरु । भद्रं कल्याणमसंभावनाविपरीतभावनारहितं तत्त्वज्ञानं यदस्ति तन्मे मह्यमुपासकायाऽऽसुव साकल्येन प्रयच्छ । [ऋतायते, ऋतं परं ब्रह्म तदिच्छते मह्यं] वाता वायवो मधु माधुर्योपलक्षितं सुखं यथा भवति तथा वान्तिवति शेषः । प्रबले तु वायौ रोगोत्पत्त्या तत्त्वज्ञानविघ्नः संपद्यतेऽतः स मा भूदिति वायोरानुकूल्यं प्रार्थ्यते । एवमुत्तरत्रापि तत्तदानुकूल्यं द्रष्टव्यम् । सिन्धवो नद्यो मधु क्षरन्ति मधुरमारोग्यकरमुदकं संपादयन्त्वित्यर्थः । ओषधीर्व्रीहियवादयोऽपि नोऽस्माकं माध्वीर्मधुराः पथ्यरूपाः सन्तु । नक्तं रात्रावुतापि चोषसि प्रभाते दिवसेऽपि विद्यार्थिनो मे मधु मधुरमनुकूलं सुखमस्तु । कालकृतो विघ्नो मा भूदित्यर्थः । पार्थिवं रजः पृथिव्यामधःस्थितं शयनादिस्थानगतं रजोऽपि मधुमन्माधुर्योपेतं कण्टकपाषाणादिराहित्येनानुकूलमस्तु । नोऽस्माकं पिता पितृसदृशो

द्यौरपि मधुमत्वस्तु । अतिवृष्ट्यादिप्रातिकूल्यरहिताऽस्तु । " द्यौः पिता पृथिवी माता " इति मन्त्रान्तराद्दिवः पितृत्वम् । वनस्पतिरत्र (पि) चूतपनसादिर्नोऽस्मान्प्रति मधुमान्मधुरफलोपेतो जीवनहेतुरस्तु । सूर्योऽपि प्रभूतं संतापमकृत्वा मधुमान्माधुर्येणानुकूलप्रकाशनेन युक्तोऽस्तु गावोऽपि नोऽस्मान्प्रति माध्वीर्जीवनहेतुमधुरक्षीरोपेता भवन्तु ।

अस्य त्रिसुपर्णमन्त्रस्य महिमानं दर्शयति—

य इमं त्रिसुपर्णमर्याचिनं ब्राह्मणाय दद्यात् ।
भ्रूणहत्यां वा एते घ्नन्ति । ये ब्राह्मणास्त्रिसु-
पर्णं पठन्ति । ते सोमं प्राप्नुवन्ति । आ
सहस्रात्पङ्क्तिं पुनन्ति । ओम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषद्ये-
कोनचत्वारिंशोऽनुवाकः ॥ ३९ ॥

ब्राह्मणगर्भस्य राजगर्भस्य वा हननं भ्रूणहत्या । अन्यत्पूर्ववत् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययु-
क्तायां याज्ञिक्यामुपनिषदि भाष्य एकोनचत्वारिंशोऽनुवाकः ॥ ३९ ॥

=====

अथ चत्वारिंशोऽनुवाकः ।

तृतीयं त्रिसुपर्ण[मन्त्र]माह—

ब्रह्म मेधवा । मधु मेधवा । ब्रह्ममेव मधु मेधवा ।
ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो
मृगाणाम् । श्येनो गृध्राणाꣳ स्वधितिर्वनानाꣳ सोमः
पवित्रमत्येति रेभन् । हꣳसः शुचिषद्वसुरन्तरिक्षसद्धो-
ता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा
गोजा ऋतजा अद्रिजा ऋतं बृहत्, इति ॥

मेधवा, मेधो यज्ञः सोऽस्यास्तीति * मेधवत् । यज्ञदानादिसाध्यविविदिषापूर्वकत्वा-

---

* मूले छान्दसेन डादेशेन तथा प्रयोग इत्याशयः ।

ब्रह्मज्ञानलाभस्य ब्रह्म मेधवदित्युच्यते । ब्रह्मा देवानां हंसः शुचिषदिति हे ऋचावणोरणीयानित्यस्मिन्ननुवाके व्याख्याते ।

किंच —

ऋचे त्वा * रुचे त्वा समित्स्रवन्ति सरितो न धेनाः ।
अन्तर्हृदा मनसा पूयमानाः । घृतस्य धारा अभिचाकशीमि, इति ।

त्रयः सुपर्णाः पक्षिस्थानीया ब्रह्माविष्णुमहेश्वरा विश्वतैजसप्राज्ञा वा विराड्हिरण्यगर्भेश्वरा वा यस्मादुत्पन्नाः स त्रिसुपर्णः सर्वदेवतासमीर्षि (स्वरूपी?)परमात्मा तन्महिमप्रतिपादकत्वादयं ग्रन्थोऽपि त्रिसुपर्णशब्देनोपचर्यते । तथाचायमर्थः हे भ[ग]वन्नृचे ऋग्वेदरूपाय त्वा व्यत्ययेन तुभ्यमियं समिदग्नौ निक्षिप्यत इति शेषः । त्वा त्वामुद्दिश्य, ऋच आहुतिफलीभूतर्गुपलक्षितत्रयीप्राप्त्यर्थमि[ति]यं व्याख्या । किंचाग्नौ मयाऽत्र हुता घृतस्य धारास्त्वां प्रति स्रवन्ति । का इव सरितो [न] नद्य इव । कथंभूता धाराः, धीयन्ते पीयन्ते देवैरिति धेनाः । "धेट्पाने" । पूयमानाः पवित्रायमाणाः । केन, मनसा । किंविधेन, अन्तर्हृदा हृत्कोशवर्तिना । अन्तरङ्गपूर्वकं हुतत्वात्पवित्राः । अन्यथा त्वपवित्रा भवन्तीति भावः । किंचैवंविधा आज्यधारा अभिचाकशीमि समस्ताभ्यो देवताभ्यो दास्यामीति भावः ।

हिरण्ययो वेतसो मध्य आसाम् । तस्मिन्त्सुपर्णो मधुकृत्कुलायी
भजन्नास्ते मधु देवताभ्यः । तस्याऽऽसते हरयः सप्त-
तीरे स्वधां दुहाना अमृतस्य धाराम्, इति ।

हिरण्यय इति । आसां पूर्वोक्ताज्यधाराणां मध्ये मध्यभागे तस्मिन्नाहवनीये सुपर्ण स्त्रिसुपर्ण आस्ते । किं कुर्वन् । सर्वाभ्यो देवताभ्यो मधु मधुरं हविर्भजन्विभजन्विभज्य ददानः सन् । कथंभूतस्त्रिसुपर्णः । हिरण्ययो ज्योतिर्मयः । वेतसो वर्णव्यत्ययेन वेदस्वान्बहुद्रव्यवान् । मधु मधुरं स्वर्गादिसुखं करोतीति मधुकृत् । सर्वप्राणिदेहनीडाश्रयत्वेन कुलायी । एवंविधस्य [तस्य] परमात्मनस्तीरे परितः प्रदेशेषु सप्त ऋषय आसते । कथंभूताः । हरन्ति पापानि स्मरणमात्रेणेति हरयः । तथाऽमृतस्य धारां सुधाधारायमाणां स्वधां हव्यद्रव्यपरम्परां दुहानास्तत्तद्देवेभ्यः पूरयमाणाः । एवंविधर्षिमण्डलमध्यासीनो भगवानिति यावत् । ×अस्मिंस्त्रिसुपर्णेऽवशिष्टपदव्याख्यानं पूर्ववत् ।

---

* वैदिकपाठानुरोधी घ. ज. पुस्तकस्थोऽयं पाठः स्थापितः । छान्दसत्वादकारस्य रुकारादेशः। अत्र ङ. छ. पुस्तकस्थमूले "ऋचे" इति पाठो विद्यते । × अस्मिन्नित्यादिकं पूर्ववदित्यन्तमधिकम् ।

अस्य त्रिसुपर्णमन्त्रस्य महिमानं दर्शयति—

य इदं त्रिसुपर्णमभ्यर्चितं ब्राह्मणाय दद्यात्। वीरहत्यां वा एते घ्नन्ति। ये ब्राह्मणास्त्रिसुपर्णं पठन्ति। ते सोमं प्राप्नुवन्ति। आ सहस्रात्पङ्क्तिं पुनन्ति। ओम्, इति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि चत्वारिंशोऽनुवाकः॥ ४०॥

वेदशास्त्रसंपन्नतदर्थानुष्ठानपरो ब्राह्मणोऽभिषिक्तो वा राजा धीरः। अन्यत्पूर्ववत्॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये चत्वारिंशोऽनुवाकः॥ ४०॥

==========

अथैकचत्वारिंशोऽनुवाकः।

ब्रह्मज्ञानप्रतिबन्धकानि यानि महापातकानि तान्निवृत्तये जप्यात्त्रिसुपर्णमन्त्राख्योऽभिहिताः, तत्र ब्राह्मणजातीयमात्रवधो ब्रह्महत्या पञ्चसु महापातकेषु मध्ये प्रबलं महापातकं ततोऽप्यधिकं भ्रूणहननं तस्मादप्यधिकं वीरहननमीदृशानामपि निवर्तको यावज्जीवं त्रिसुपर्णजपः। तत्रार्वाचीनानां सुरापानादीनां निवर्तक इति किमु वक्तव्यम्। इत्थं प्रतिबन्धनिवृत्त्युपायमुक्त्वा जीवात्मन ईश्वरेणाभेदज्ञानं यदस्ति तस्य ज्ञानस्य नैरन्तर्येण साधनं मेधाधीनमतो मेधाभिमानिनीं देवतां प्रार्थयितुमेकामृचमाह—

मेधा देवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना।
त्वया जुष्टा नुदमाना दुरुक्तान्बृहद्वदेम विदथे सुवीराः, इति।

अन्यतदर्थयोर्धारणशक्तिर्मेधा [तदभिमानिनी] देवी जुषमाणा [प्रीयमाणा] सती नोऽस्मान्प्रत्या[गादा]गच्छतु। कीदृशी देवी। विश्वमञ्चतीति विश्वाची सर्वावगाहनक्षमेत्यर्थः। अत एव भद्रा कल्याणी। सुमनस्यमाना शोभनं मनोऽस्मदनुग्राहकमिच्छन्ती। हे देवि त्वया जुष्टा अनुगृहीता वयं दुरुक्तान्पुरुषार्थानुपयोगिनो वेदबाह्या[ञ्शब्दा]नुदमानाः क्षिपमाणा वेदैकनिष्ठाः सुवीराः शोभनपुत्रशिष्यादिरूपा विदथे यज्ञेऽनुष्ठिते सति शुद्धान्तःकरणा भूत्वा बृहद्वदेम परब्रह्मतत्त्वं कथयामः

द्वितीयामृचमाह—

त्वया जुष्टं ऋषिर्भवति देवि त्वया ब्रह्माऽऽगतश्रीरुत त्वया।

त्वया जुष्टश्चित्रं विन्दते वसु सा नो जुषस्व द्रविणो न मेधे, इति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्येकचत्वारिंशोऽनुवाकः ॥ ४१ ॥

हे देवि मेधे मेधारूपे त्वया जुष्टः सेवितोऽनुगृहीत ऋषिरतीन्द्रियदर्शी भवति। तथा त्वया जुष्टः पुरुषो ब्रह्मा हिरण्यगर्भो भवति। उतापि च त्वया जुष्टः पुरुष आगतश्रीः प्राप्तसंपद्भवति। अत एव त्वया जुष्टः पुरुषश्चित्रं गवाश्वहिरण्यधान्यादिकं विविधं वसु धनं विन्दते लभते। हे मेधे देवि सा तादृशी त्वं नोऽस्मान्द्रविणो न द्रविणपतिरिव। द्रविणशब्देन तत्पतिर्लक्ष्यते। जुषस्व सेवस्व, अनुगृह्णेत्यर्थः। यथा धनपत्यनुगृहीतो दरिद्रः कृतार्थो भवति तद्वत्त्वयाऽनुगृहीतोऽहमिति भावः॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेयोपनिषद्युक्तायां याज्ञिक्यामुपनिषदि भाष्ये एकचत्वारिंशोऽनुवाकः ॥ ४१ ॥

अथ द्विचत्वारिंशोऽनुवाकः।

मेधाप्रदानिन्द्रादीन्प्रार्थयितुं मन्त्रान्तरमाह—

मेधां म इन्द्रो ददातु मेधां देवी सरस्वती।
मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा, इति।

योऽयमिन्द्रो या च सरस्वती देवी यौ च पुष्करस्रजौ पद्ममालायुक्तावुभावश्विनौ देवौ ते सर्वे मह्यं मेधां प्रयच्छन्तु।

मेधाप्रदं मन्त्रान्तरमाह—

अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः।
दैवीं मेधा सरस्वती सा मां मेधा सुरभिर्जुषतां स्वाहा, इति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि द्विचत्वारिंशोऽनुवाकः ॥ ४२ ॥

अप्सरासु देवस्त्रीषु या मेधा प्रसिद्धा वर्तते, गन्धर्वेषु देवगायकेषु यन्मनो मेधात्मकमस्ति, दैवीं व्यत्ययेन दैवी हिरण्यगर्भादिदेवतासु स्थिता या मेधा वर्तते, सरस्वती वेदशास्त्ररूपा याऽस्ति, सा सर्वा मेधा सुरभिः शोभनगन्धा सर्वकामदुघा वा भूत्वा मां जुषतां सेवताम्॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेयोपनिषद्युक्तायां याज्ञिक्यामुपनिषदि भाष्ये द्विचत्वारिंशोऽनुवाकः ॥ ४२ ॥

अथ त्रिचत्वारिंशोऽनुवाकः ।

पुनरपि मेधार्थं मन्त्रमाह—

आ मां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा
जगती जगम्या । ऊर्जस्वती पयसा पिन्व-
माना सा मां मेधा सुप्रतीका जुषन्ताम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि त्रिचत्वारिंशोऽनुवाकः ॥ ४३ ॥

मेधाशक्तिर्मां प्रत्या समन्तादागच्छत्विति शेषः । कीदृशी मेधा । सुरभिः शोभनगन्धा कामदुघा वा । विश्वरूपा सकलशास्त्रधारणक्षमत्वेन बहुरूपा । हिरण्यवर्णा देवताशरीरे हिरण्यसमानवर्णोपेता । जगती सर्वत्र वर्तमानत्वेन जगदात्मिका । जगम्या पुरुषार्थकामैर्भृशं गन्तुं योग्या । ऊर्जस्वती बलवती । पयसा गोक्षीरादिरसेन पिन्वमानाऽस्मान्प्रीणयन्ती । सा तथाविधगुणयुक्ता मेधा सुप्रतीका सुखी भूत्वा मां *जुषतां सेवताम् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये त्रिचत्वारिंशोऽनुवाकः । ४३ ॥

अथ चतुश्चत्वारिंशोऽनुवाकः ।

पुनरपि मेधादिसिद्धयेऽग्नीन्द्रसूर्यान्प्रार्थयते—

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि
मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां
मयि प्रजां मयि सूर्यो भ्राजो दधातु, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि चतुश्चत्वारिंशोऽनुवाकः ॥ ४४ ॥

मेधां वेदशास्त्रादिग्रन्थग्रहणधारणपटुत्वं प्रजामच्छिन्नसंततिं तेजो ब्रह्मवर्चसमग्निर्मयि दधातु निदधातु । इन्द्रियं धातुक्षयादिराहित्येन वीर्यपुष्टिम् । भ्राजो दर्शनमा-

* जुषन्तामित्यस्य व्याख्यानमेतत् । मूले व्यत्ययेन बहुवचनम् ।

त्रेणामित्रसाध्वसकरं मुखतेजः । निगदव्याख्यातमन्यत् । आदराभिद्योतिका मयिपदा-द्यावृत्तिः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये चतुश्चत्वारिंशोऽनुवाकः ॥ ४४ ॥

अथ पञ्चचत्वारिंशोऽनुवाकः ।

अनयर्चा परमात्मनः सकाशात्स्वाभीष्टं याचते —

अपेतु मृत्युरमृतं न आगन्वैवस्वतो नो अभयं
कृणोतु । पर्णं वनस्पतेरिवाभि नः शीयताꣳ
रयिः सचतां नः शचीपतिः , इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि पञ्चचत्वारिंशोऽनुवाकः ॥ ४५ ॥

हे परमात्मन्मृत्युरस्मत्तोऽपेतु दूरी भूयात् । अत एव नोऽस्मान्प्रत्यमृतं मोक्ष आगन्नागच्छतु । अत एव वैवस्वतो यमो नोऽस्मभ्यमभयं नारकदुःखाभावं कृणोतु करोतु । अपि [च] नोऽस्मदीयं पापं वनस्पतेरश्वत्थादेः पक्वपर्णमिवाभिशीयतामभितो विशीर्य नश्यतु । अपि च नोऽस्मान्रयिर्महदैश्वर्यं सचतां प्राप्नोतु । रयिः कीदृशः । शचीपतिः, इन्द्रोपभोग्य इत्यर्थः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये पञ्चचत्वारिंशोऽनुवाकः ॥ ४५ ॥

अथ षट्चत्वारिंशोऽनुवाकः ।

परा मृत्यो अनु परेहि पन्थां यस्ते स्व इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरान् , इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि षट्चत्वारिंशोऽनुवाकः ॥ ४६ ॥

परामिति । *हे मृत्यो देवयानादर्चिरादिमार्गा+त्पितृयाणमार्गाच्च य इतरोऽन्यस्ते तव स्वः स्वभूतः पन्था अस्ति तं पन्थां पन्थानमन्वनुसृत्य परेहि गच्छ । ननु देवयानपितृयाणमार्गौ प्रत्यागच्छ । अहं त्वेताभ्यामन्यतरेण वा गमिष्यामि न त्वामीक्षे त्वन्मार्गे त्वं तिष्ठेत्यभिप्रायः । कीदृशं [पन्थानम्] परम्, पूर्वोक्तमार्गद्वयादन्यम् । उतापि च नोऽस्माकं प्रजां मा रीरिषो मा हिंसय । वीरान्भृत्यानपि मा रीरिषः । नन्वहमन्धो बधिरश्च कथं प्रार्थयमानं त्वामवलोकये कथं वा त्वत्प्रार्थनां शृणोमीत्यत आह — चक्षुष्मते शृण्वते श्रोत्रवते ते तुभ्यं ब्रवीमीत्यतो मामवलोकय मत्प्रार्थनां सफलय चेति भावः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नार[illegible]
याज्ञिक्यामुपनिषदि भाष्ये षट्चत्वारिंशोऽनुवाकः ॥ ४६ ॥

अथ सप्तचत्वारिंशोऽनुवाकः ।

वातं प्राणं मनसाऽन्वारभामहे प्रजापतिं यो
भुवनस्य गोपाः । स नो मृत्योस्त्रायतां
पात्वंहसो ज्योग्जीवा जरामशीमहि ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि
सप्तचत्वारिंशोऽनुवाकः ॥ ४७ ॥

वातमिति । वयं तं प्रजापतिं परमात्मानं मनसाऽन्तरङ्गेणान्वारभामहे । कथंभूतं प्रजापतिम् । प्राणं समस्तपिण्डाण्डस्थप्राणापानादिरूपम् । वातमन्तरिक्षस्थवायुरूपम् । एतेन पिण्डाण्डब्रह्माण्डोभयविधारकत्वं प्रजापतेरुक्तं भवति । तं कम् । यः प्रजापतिर्भुवनस्य ब्रह्माण्डस्य गोपा रक्षकः । [स] प्रजापतिर्नोऽस्मान्मृत्योः सकाशात्त्रायताम् । अंहसः पापाच्च पातु । किंच ज्योग्जीवाश्चिरंजीविनाः सन्तो वयं [जरां] वार्धकावस्थामशीमहि प्राप्नुमः पूर्णपुरुषायुष. भवेमेत्यर्थः ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां
याज्ञिक्यामुपनिषदि भाष्ये सप्तचत्वारिंशोऽनुवाकः ४७ ॥

* अयं मन्त्रस्तैत्तिरीयारण्यके षष्ठप्रपाठके सप्तमानुवाके वर्तते, तत्र सायणभाष्ये पूर्वार्धव्याख्यानमन्यथाऽस्ति तद्यथा—" हे मृत्यो देवयानादितरो यः पन्थास्ते स्वस्तव स्वभूतस्तं परं पन्थां देवयानादितरं तं मार्गमनुपरेहि अनुक्रमेण प्राप्नुहि । " इति । + देवयानादित्यस्योपलक्षणत्वाभिप्रायेणेदम् ।

१ च. ६४ ।

अथाष्टचत्वारिंशोऽनुवाकः ।

अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः ।
प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषद्यष्टचत्वारिंशोऽनुवाकः ॥ ४८ ॥

अमुत्रभूयादिति । बृहतां वेदवाचां पतिः पालको बृहस्पतिस्तत्संबुद्धौ हे बृहस्पते परमात्मन्यमस्य संबन्धि यद्वयं तस्मान्मामुञ्चो मोचय । अभिशस्तेरपयशसोऽपि माममुञ्चः । एतद्द्वयान्मोचयित्वाऽथानन्तरम् । अमुत्रभूयात् । व्यत्ययः । अमुत्रभवेन परलोकभवेन सुखेन मां संयोजयेति शेषः । किंचाश्विनाऽश्विनौ देववैद्यावस्मान्मत्तः सकाशान्मृत्युं प्रत्यौहतां दूरी कुर्वाताम् । हेऽग्ने देवानां संबन्धिना भिषजा वैद्यभूतेन त्वयाऽहं रक्षणीयोऽस्मीति शेषः । शचीभिरिन्द्रपत्नीभिः संयोजयेत्यपि शेषः । हविर्नयनद्वारा देवताक्षुन्निवारकत्वादग्नेर्भिषक्त्वं द्रष्टव्यम् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्येऽष्टचत्वारिंशोऽनुवाकः ॥ ४८ ॥

अथैकोनपञ्चाशोऽनुवाकः ।

हरिꣳ हरन्तमनुयन्ति देवा विश्वस्येशानं वृषभं मतीनाम् ।
ब्रह्म सरूपमनु मेदमागादयनं मा विवधीर्विक्रमस्व ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषद्येकोनपञ्चाशोऽनुवाकः ॥ ४९ ॥

हरिमिति । हे परमात्मंस्त्वां सर्वे देवा अनुयान्ति भृत्यभावेनानुसरन्ति । त्वां कथंभूतम् । हरिं विष्णुरूपम् । तथा भक्तानां पापं हरन्तम् । विश्वस्य जगत ईशानम् । मतीनां सर्वप्राणिबुद्धीनां वृषभं श्रेष्ठत्वेन नियन्तारं पुण्यापुण्ययोः सर्वप्राणिबुद्धिप्रेरकमिति यावत् । तदुक्तम् — "धियो यो नः प्रचोदयात्" इति । किंच त(त्व)दनुग्रहाद्ब्रह्म वेदचतुष्टयं मा मामन्वागादन्वागच्छतु । कथंभूतं ब्रह्म, समान्यपशब्दादिवैषम्यरहितानि रूपाणि प्रकृतिप्रत्ययादीनि यस्य तत्सरूपम् । पुनः कथंभूतम् ।

---

१ ऋ. ५५ । २ ऋ. २३ ।

इदं सर्वैस्त्रैवर्णिकैः प्रत्यक्षत्वेनाधीयमानम् । किंचायनमस्माभिः संपादितं मोक्षमार्गं मा विवधीर्मा हिंसय । किंच दातुं विक्रमस्व पराक्रमं कुरु, दातुमुद्यमं कुर्वित्यर्थः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्य एकोनपञ्चाशोऽनुवाकः ॥ ४९ ॥

अथ पञ्चाशोऽनुवाकः ।

शल्कैरग्निमिन्धान उभौ लोकौ सनेमहम् ।
उभयोर्लोकयोर्ऋद्ध्वाऽति मृत्युं तराम्यहम् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि पञ्चाशत्तमोऽनुवाकः ॥ ९० ॥

शल्कैरिति । हे भगवञ्शल्कैः समिद्रूपैः शुष्ककाष्ठैरग्निमाहवनीयादिकमिन्धानो दीपयन्नहमुभौ लोकाविहपरलक्षणौ सनें प्राप्नुयां त्वदनुग्रहात् । एतेन लोकद्वयं सत्कर्मणा फलतीत्युक्तं भवति । अत एवोभयोर्लोकयोर्व्यत्ययेनोभौ लोकावृद्ध्वा लब्ध्वा मृत्युमहमातितराम्यमृतो भवामि । यावदायुरैहिकान्भोगान्भुक्त्वाऽन्ते देवो भवामीत्यभिप्रायः ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये पञ्चाशोऽनुवाकः ॥ ९० ॥

अथैकपञ्चाशोऽनुवाकः ।

मा छिदो मृत्यो मा वधीर्मा मे बलं विवृहो मा प्रमोषीः ।
प्रजां मा मे रीरिष आयुरुग्र नृचक्षसं त्वा हविषा विधेम ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषद्येकपञ्चाशोऽनुवाकः ॥ ९१ ॥

मेति । हे मृत्यो हे उग्र क्रूर त्वमस्मत् * त्संबुद्धिं मा छिदो मा विच्छेदय । अस्मत्सत्कर्मानुष्ठानं मा वधीर्मा हिंसय । मे मम शारीरं बलं मा विवृहो मा पीडय । अस्मदीयपरलोकसाधनं मा प्रमोषीर्मा चोरय । मे प्रजामायुश्च मा

* सम्यग्बुद्धिं सम्यग्बोधमिति यावत् ।

रीरिषो मा हिंसय । तदर्थं त्वा त्वां हविषा हविष्प्रदानेनेधेम परिचरेम । त्वा कथंभूतम् । नृन्प्राणिनश्चष्टे पुण्यपापपरीक्षायै पश्यतीति नृचक्षास्तं नृचक्षसम् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्य एकपञ्चाशोऽनुवाकः ॥ ९१ ॥

अथ द्विपञ्चाशोऽनुवाकः ।

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि द्विपञ्चाशोऽनुवाकः ॥ ९२ ॥

मा न इति । रुद्र दुष्टरोदनक*र्तर्नोऽस्माकं महान्तं गुरुप्रभृतिपूज्यवर्गं मा वधीर्मा हिंसीः । "वध बन्धनहिंसयोः" अस्माल्लुङ् । अपि चार्भकं स्तनंधयम् उक्षन्तम् । "उक्ष सेचने" अस्माच्छता सेचनपटीयसं तरुणम् । उक्षितं योनिष्वासिक्तं गर्भस्थं पिण्डं पितरं मातरं [च] मा वधीः । उतशब्दा अपिपर्याया उक्तानुक्तसमुच्चयद्योतिनः । किंच हे वृषभवाहन प्रिया अभिलषिता नस्तन्वस्तनूर्मा रीरिषः । "रिष हिंसायाम्" अस्माल्लुङि मध्यमपुरुषैकवचनम् । सर्वानस्मानस्मदीयांश्च सुखयेति भावः ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये द्विपञ्चाशोऽनुवाकः ॥ ९२ ॥

अथ त्रिपञ्चाशोऽनुवाकः ।

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि त्रिपञ्चाशोऽनुवाकः ॥ ९३ ॥

मा न इति । हे महारुद्र तोकमर्भकं तनयं तरुणं पुत्रमायुर्जीवनं गा अश्वानेतदुपलक्षितमस्मदीयं सर्वस्वं मा रीरिषः । "रिष हिंसायाम्" । मा ×हिंसीः । त्वं

* अन्तर्भावितण्यर्थोऽत्र करोतिः । णिजन्तमेव वा पाठ्यम् । × एतदग्रे "किंच वीरानस्मद्धितकारिणो वीर्यवतः पुरुषान्मा वधीर्मा हिंसीः ।" इति ग्रन्थोऽपेक्षित इति ज्ञेयम् ।

कथंभूतः सन् । भापितोऽस्मदपराधैः कारितक्रोधः । त(स्व)दर्थं हविष्मन्तो यथाविधिनिष्पादितहविर्युक्तजुहूहस्ता वयं नमसा प्रणामेन ते तवेज्यां विधेम कुर्याम ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये त्रिपञ्चाशोऽनुवाकः ॥ ५३ ॥

अथ चतुष्पञ्चाशोऽनुवाकः ।

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम् ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि चतुष्पञ्चाशोऽनुवाकः ॥ ५४ ॥

प्रजापत इति । हे प्रजापते ब्रह्मन्पार्वतीवल्लभ त्वत्त्वत्तो जातान्युत्पन्नानि विश्वा विश्वानि समस्तानि [ता] तानि प्रसिद्धान्येतान्युपलभ्यमानानि सुरनरतिर्यगादिलक्षणानि पञ्चभूतानि चतुर्दश भुवनानि नानाविधब्रह्माण्डपिण्डाण्डानि त्वत्तोऽन्यो यः कश्चिन्न परिबभूव । परिपूर्वो भवतिस्तिरस्कारार्थः । नोपसंजहारेति यावत् । औपलक्षण्येन न संजीवयति [न सृजति च] । अपि तु सृष्टिकाले त्वमेव सृजसि जीवनकाले त्वमेव जीवयसि प्रलये त्वमेव त्वय्येवोपसंहरसि नान्यः कश्चिदित्यभिप्रायः । यस्मादेवं तस्मात्ते निखिलजगदुत्पत्तिस्थितिलयकर्त्रे भगवते तुभ्यं जुहुमः । श्रौतस्मार्तानुष्ठानोपयोगिहविस्त्यागं कुर्मः । अत एव यस्मिन्कामो येषामस्माकं ते वयं यत्कामा ऐहिकामुष्मिकोपभोग्ये यद्वा(त्र) वयं जुहुमस्तद्वाञ्छितं वस्तु नोऽस्मभ्यमस्तु । श्रौतस्मार्तहोमफलत्वेन सिध्यतु । किंच तवापाङ्गालोके पतिता वयं रयीणां विद्याविनयसंपदामिहपरोपभोग्यभोगसंपदां च पतयोऽधिपतयः स्याम । अयमेव मन्त्रो ब्राह्मणभोजनादौ पार्वतीपतिप्रीतिकृदुदकदाने विनियुज्यते । तस्मिन्पक्षे जुहुमो ब्राह्मणमुखाग्नौ मिष्टान्नरूपहव्यत्यागरूपं होमं कुर्म इति व्याख्यायान्यत्सर्वमेतदनुकूलत्वेन व्याख्यायतामिति दिक् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये चतुष्पञ्चाशोऽनुवाकः ॥ ५४ ॥

अथ पञ्चपञ्चाशोऽनुवाकः ।

स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी ।
वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयंकरः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि पञ्चपञ्चाशोऽनुवाकः ॥ ९५ ॥

स्वस्तिदा इति । इतस्ततो गच्छतां नोऽस्माकं पुरः पुरस्तादौपलक्षण्येन प्रागवाक्प्रत्यगुदगूर्ध्वाधोदिक्षु पारिपालनायेन्द्र एत्वागच्छतु । सर्वतो दिक्षु वज्रहस्तेन पालिता वयं निर्भयाः स्याम इति भावः । इन्द्रः कीदृक् । स्वस्तिदा भूलोकसुखकृत् । पुनः स्वस्तिदा आमुत्रिकसुखकृत् । विशो नानाविधप्रजायाः पतिः प्रभुः । वृत्रहा स्फीतम् (स्पष्टम्) । विमृधो रक्षोजातिमथनकर्ता । वशी त्रैलोक्यवशीकारवान् । वृषा प्रावृषि वृष्टयुदकसेचकः । अभयंकरः स्वाश्रितानाम् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये पञ्चपञ्चाशोऽनुवाकः ॥ ९५ ॥

अथ षट्पञ्चाशोऽनुवाकः ।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि षट्पञ्चाशोऽनुवाकः ॥ ९६ ॥

त्र्यम्बकमिति । हे भगवन्पार्वतीपते त्वां यजामहे । त्वां कीदृशम् । त्र्यम्बकं त्रिनेत्रम् । सुगन्धिं यथा केतक्यादिसौगन्ध्यं दूरादाघ्रायते तथा तदीयदिव्यदेहसौरभ्यं सोऽयं सुगन्धिः । सुपूर्वकत्वाद्गन्धशब्दस्येषकारः । पुनः कीदृशम् । पुष्टिवर्धनं पुष्टिं लौकिकवैदिकपुष्टिं वर्धयतीति तथोक्तम् । हे भगवंस्त्वां संध्यावर्ध(न्द)नादिसत्कर्मभिर्यजि=त्वा यथोर्वारुकं कर्कट्यादेः फलं पक्वं सद्बन्धनाद्वृन्ताद्नायासेन मुच्यते तथा वयं मृत्योः सकाशान्मुक्षीय मुक्षीमहि मुक्ता भवेम । "व्यत्ययो बहुलम्" इति वचनव्यत्ययः । अमृतान्मोक्षान्मा मुक्षीमहि न वियुज्यामहे ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये षट्पञ्चाशोऽनुवाकः ॥ ९६ ॥

* गन्धस्येदुत्पूतिसुसुरभिभ्य इति सूत्रेणेति भाष्यः । = इष्ट्वेति पाठ्यम् ।

१ घ. ७२ । २ ङ, ७३ ।

अथ सप्तपञ्चाशोऽनुवाकः ।

ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे ।
तान्यज्ञस्य मायया सर्वानवयजामहे ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि सप्तपञ्चाशोऽनुवाकः ॥ ५७ ॥

य इति । हे मृत्यो मर्त्याय व्यत्ययेन[मर्त्यं] प्राणिमात्रं हन्तवे हन्तुं सहस्रमयुतमेतत्संख्याका ये ते तव पाशाः सन्ति तान्सर्वान्पाशानवयजामहे निवारयामः । अत्रोपसर्गयोगेण यजतेर्भिन्नार्थतोच्यते । केन साधनेन । यज्ञस्य सत्कर्मानुष्ठानस्य मायया मिषेण च्छद्मना । पुत्रजन्मच्छद्मना पैतृकमृणमद्या(पा)करोतीत्यादिवदयं प्रयोगो द्रष्टव्यः । यद्वा यज्ञस्य सत्कर्मानुष्ठानस्य मायया शक्त्या बलेन । मायाशब्दः शक्तिपर्यायः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये सप्तपञ्चाशोऽनुवाकः ॥ ९७ ॥

अथाष्टपञ्चाशोऽनुवाकः ।

मृत्यवे स्वाहा मृत्यवे स्वाहा ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदष्टपञ्चाशोऽनुवाकः ॥ ५८ ॥

मृत्यव इति । अथैदानीं पापमात्रनिबर्हणार्था होममन्त्रा उच्यन्ते तादर्थ्यलिङ्गप्रतीतेः । यो नानाविधपातक[घा]न्पापनिबर्हणकामवांश्च तेन स्वगृह्योक्तविधिना पञ्चभू[त]संस्काराद्याज्यसंस्कारान्तं कर्म कृत्वैतैर्वक्ष्यमाणमन्त्रैः प्रधानाहुतयः कर्तव्याः । स्विष्टकृदाद्यन्यत्समानम् । मन्त्रस्यायमर्थः । येन म्रियन्ते प्राणिनः स मृत्युस्तस्मै [मृत्यवे] स्वाहा सकृद्गृहीतमिदमाज्यं सुहुतमस्तु । आहुतिद्वयद्योतनार्था मन्त्रावृत्तिः । इदमाहुतिद्वयं मृत्युदेवत्यम् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्येऽष्टपञ्चाशोऽनुवाकः ॥ ९८ ॥

---

१ घ. ७४ । २ घ. ७५ ।

अथैकोनषष्टितमोऽनुवाकः ।

देवकृतस्यैनसोऽवयजनमसि स्वाहा । मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा । पितृकृतस्यैनसोऽवयजनमसि स्वाहा । आत्मकृतस्यैनसोऽवयजनमसि स्वाहा । अन्यकृतस्यैनसोऽवयजनमसि स्वाहा । अस्मत्कृतस्यैनसोऽवयजनमसि स्वाहा । यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि स्वाहा । यत्स्वपन्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा । यत्सुषुप्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा । यद्दिद्वाꣳसश्चाविद्वाꣳसश्चैनश्चकृम तस्यावयजनमसि स्वाहा । एनस एनसोऽवयजनमसि स्वाहा ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्येकोनषष्टितमोऽनुवाकः ॥ ५९ ॥

देवकृतस्येति । देवकृतस्यैनस इत्यादिषु यद्वो देवा इत्यतः प्राक्तनेष्वेकादशसु मन्त्रेषु हविर्ग्रहीतृदेवताया अप्रतीतेरग्निर्देवतात्वेनाङ्गीकर्तव्यः, सर्वदेवताप्रधानत्वादग्नेः । तत्र क्रमेण षड्विधुरवैश्वदेवेऽपि विनियुक्ताः । तथा चायमर्थः । हे आज्य त्वमेनसः पापस्यावयजनं निवारकमसि । अवपूर्वो यजतिर्निवारणार्थः सर्वत्र । तदर्थमिदमाज्यमग्नये स्वाहा सुहुतमस्तु । यद्वा हेऽग्ने त्वमेनसोऽवयजनं निवारकोऽसि । लिङ्व्यत्ययः । तदर्थमिदमाज्यं तुभ्यं स्वाहा सुहुतमस्तु । एवमुत्तरत्रापि वाक्यार्थः । एनसः कथंभूतस्य । देवाय कृतं देवकृतं तस्य देवकृतस्य । दैवेषु कर्मस्वङ्गवैकल्यादिरूपस्येत्यर्थः । देवैर्द्योतनशीलैरस्मदिन्द्रियैः कृतस्येति वा । मनुष्यार्थं कृतं मनुष्यकृतं तस्य धिक्कारान्नप्रदानाद्यभावरूपस्य । पितृकृतस्य पैतृकेषु कर्मस्वङ्गवैकल्यादिरूपस्य । आत्मकृतस्य स्वयंकृतस्यागम्य(म्या)गमनादेः । अन्यकृतस्यास्मद्भार्यादिकृतस्य । अस्मत्कृतस्यास्मज्ज्ञातिवर्गकृतस्य । किंच दिवा नक्तं रात्रिंदिवं यदेनश्चकृम कृतवन्तस्तस्य । स्वपन्तः स्वप्नावस्थामनुभवन्तो जाग्रतो जागरूकाश्च यदेनो नानाविधं पापं चकृम तस्य । सुषुप्तो व्यत्ययेन सुषुप्ताः सुषुप्त्यवस्थामनुभवन्तः सन्तो यदेनश्चकृम

तस्य । जाग्रदवस्थायां पापबाहुल्यस्य संभावितत्वान्मन्त्रद्वये जाग्रच्छब्दप्रयोगः । सुषुप्त्यवस्थायामपि किंचित्सूक्ष्मतरं पापं द्रष्टव्यम् । विद्वांसोऽविद्वांसश्च वय देवश्चकृम तस्व । ज्ञानाज्ञानपूर्वकृतस्येत्यर्थः । एनस उपपातकादेरप्यधिकं यदेनो महापातकादि तस्य । यद्वा—एनसो विनो लोपश्छान्दसः । एनस्विनः पुरुषात्सकाशाद्यदेनो जातं तस्य । "तत्संसर्गी तु पञ्चमः" इति शास्त्रसिद्धस्य महापापस्येत्यर्थः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्य एकोनषष्टितमोऽनुवाकः ॥ ५९ ॥

अथ षष्टितमोऽनुवाकः ।

यद्वो देवाश्चकृम जिह्वया गुरुमनसो वा प्रयुती
देवहेडनम् । अरा वायो नो अभि दुच्छुना-
यते तस्मिन्तदेनो वसवो निधेतन स्वाहा ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि षष्टितमोऽनुवाकः ॥ ६० ॥

यदिति । [वसवो वासयितारो] गुरु गम्भीरं मनो येषां ते गुरुमनसो हे गुरुमनसः सर्वे देवा वो युष्मानुद्दिश्य यद्देवहेडनं देवविडम्बनमयमधिकोऽयं न्यून इत्यादि देवगर्हणं जिह्वया वाचा वयं चकृम तदेनो यूयं तस्मिन्पूर्वोक्ते गम्भीरे युष्मदीयमनसि निधेतन । स्वार्थे तनप् । स्थापयत, न तु वाचोद्घाटयत । अस्मदपराधं सहध्वमिति यावत् । देवहेडनं कीदृशम् । प्रयुतसंख्याऽस्यास्तीति प्रयुति । दीर्घश्छान्दसः । असंख्याकमित्यर्थः । वाशब्दो निश्चये । अगुरुमनस इति वयमित्यस्य विशेषणं वा । गुरुषु जगत्पूज्येषु देवेषु भक्तियुक्तं मनो येषां ते गुरुमनसः । न गुरुमनसोऽगुरुमनसः । एवंविधाः सन्तो वयं यद्देवहेडनं चकृम । अगुरुमनस्कत्वादेव देवहेडनप्रसक्तिः । किंच हे वायो सप्तमरुत्प्रधाना हे मरुत उपवायवो नोऽस्मत्संबन्धि यदेनोऽभिदुच्छुनायतेऽभितो दुष्टशुनवदाचरति किल दुष्टशुनवदपवित्रं तदेनस्तस्मिन्नित्यादि पुनर्योजनीयम् । कथंभूतमेनः । अरा व्यत्ययेनारं मरणनिव(र्वि?)र्तकम् । तदर्थमिदमाज्यं लिङ्गोक्तदेवताभ्यः स्वाहा सुहुतमस्तु ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये षष्टितमोऽनुवाकः ॥ ६० ॥

१ ४. ७७ ।

अथैकषष्टितमोऽनुवाकः ।

कामोऽकार्षीन्नमो नमः । कामोऽकार्षीत्कामः करोति
नाहं करोमि कामः कर्ता नाहं कर्ता कामः कारयिता
नाहं कारयिता एष ते काम कामाय स्वाहा ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनि-
षद्येकषष्टितमोऽनुवाकः ॥ ६१ ॥

काम इति । हे त्रयस्त्रिंशत्कोटिदेवता युष्मभ्यं नमो नमः । पूर्वोक्तानि पापानि कामो मकरध्वजोऽकार्षीच्चकार । कामोऽकार्षीदिति पुनरुक्तिः(क्तेः) स्वकर्तृ[त्व]निवृत्तिः । काम एव करोति नाहं करोमि । काम एव कर्ता नाहं कर्ता । अत्र हेतुरुच्यते । काम एव सर्वाणि जगानि (जगन्ति) वशीकृत्य कारयिता भवति नाहं कारयिताऽस्वतन्त्रत्वान्मनुष्याणाम् । हे काम तत्पापनिवृत्त्यर्थं ते तुभ्यमेष आज्यभागः स्वाहा सुहुतोऽस्तु । कथंभूताय तुभ्यं कामाय कमनीयविग्रहाय ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां
याज्ञिक्यामुपनिषदि भाष्ये एकषष्टितमोऽनुवाकः ॥ ६१ ॥

अथ द्विषष्टितमोऽनुवाकः ।

मन्युरकार्षीन्नमो नमः । मन्युरकार्षीन्मन्युः करोति
नाहं करोमि मन्युः कर्ता नाहं कर्ता मन्युः कार-
यिता नाहं कारयिता एष ते मन्यो मन्यवे स्वाहा ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि
द्विषष्टितमोऽनुवाकः ॥ ६२ ॥

मन्युरिति । मन्युः कोपाभिमानी देवः । मन्यवे क्रोधरूपाय । अन्यत्पूर्ववत् । अत्र मीमांसा—कारयितुरेव पापं न कर्तुरनिच्छतः । * यदि स्वयमपीच्छत्यन्योऽपि कारयति तर्हुभयोरपि पापलेपः । यथा कश्चिद्यवनोऽनिच्छन्तमपि कंचित्पापमकारयत् । ननु बलात्कारितपापस्यापि धर्मशास्त्रेषु प्रायश्चित्तं श्रूयत इति चेन्न । स्व-कृतप्रायश्चित्तमपेक्ष्य (?) बलात्कारितपापस्य(स्या)+ त्यल्पत्वात् । किंचाऽऽभ्यां मन्त्राभ्यां पुरुषो हस्त-

* अस्या अग्रिमायाश्च फक्किकाया व्यत्यासेन पाठो युक्तः । + प्रायश्चित्तस्येत्यनुषङ्गः ।

मुक्तस्य सीदिति कामयन्ते बलात्पापं मां कारयतोऽनिच्छन्तमपि किं करोमि क्व गच्छामि कस्याभ्यां त्रायते मामिति । तस्माद्रोदनपश्चात्तापादिवशादेवमवगम्यते कारयितुरेव पापं न कर्तुरिति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये द्विषष्टितमोऽनुवाकः ॥ ६२ ॥

अथ त्रिषष्टितमोऽनुवाकः ।

अतः परं सर्वपापनिबर्हणार्थाः सर्वोत्कृष्टचतुर्थाश्रमकरणाङ्गभूते विरा(रा)जाख्यहोमे कर्मणि विनियुक्ता मन्त्राः पठ्यन्ते तादृग्लिङ्गप्रतिभानात् । सर्वपापनिबर्हणद्वारा संन्यासं करिष्यमाणो यथाशास्त्रोक्ताधिकारी स्वगृह्योक्तविधिना पञ्चभूतसंस्काराद्याज्यसंस्कारान्तं कर्म कृत्वैतैर्वक्ष्यमाणमन्त्रैः प्रधानाहुतीः कुर्यात् । स्विष्टकृदाद्यन्यत्समानम् । सर्वत्र हविर्ग्राहिणी देवता तु परमात्मैव । [तत्र प्रथमो मन्त्रः—]

तिलाञ्जुहोमि सरसाꣳ सपिष्टान्गन्धार मम चित्ते रमन्तु स्वाहा, इति ।

मन्त्राणाम(न्त्रस्या)यमर्थः । गन्ध उत्तमदेहसौरभ्यमस्यास्तीति गन्धारस्तत्संबुद्धौ हे गन्धार परमात्मंस्त्वदर्थं तिलाञ्जुहोमि । कथंभूतान्सरसान्स तु शुष्कान्सपिष्टान्सक्त्वादिपिष्टान्तरलेशसहितान् । किंच तद्धोमफलत्वेन त्वदीयाः परमपावना गुणा मम चित्ते रमन्तु रमन्ताम् । स्वाहेदं प्रकृतं हविस्त्वामुद्दिश्य सुहुतमस्तु । एवमेव स्वाहाशब्दार्थ उत्तरत्रापि ।

गावो हिरण्यं धनमन्नपानꣳ सर्वेषाꣳ श्रियै स्वाहा ।

गाव इति । हे परमात्मंस्त्वत्प्रसादाद्गावो हिरण्यं धनमन्नपानमेतानि मम सिध्यन्तु । किंच सर्वेषां भोग्यपदार्थानां प्राप्तिरस्तु । किंच श्रियै गजान्तलक्ष्मीसिद्ध्यर्थं हविरिदं तुभ्यं स्वाहा ।

श्रियं च लक्ष्मिं च पुष्टिं च कीर्तिं चाऽऽनृण्यताम् ।
ब्रह्मण्यं बहुपुत्रताम् । श्रद्धामेधे प्रजाः संददातु स्वाहा ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि त्रिषष्टितमोऽनुवाकः ॥ ६३ ॥

श्रियमिति । श्रियं राज्यलक्ष्मीं * लक्ष्मीं मोक्षलक्ष्मीं पुष्टिं शरीरादेः कीर्तिं त्रैलो-

* मूले छान्दसो ह्रस्व इति सूचयितुं दैर्घ्येण निर्देशः ।

कथविदितकल्याणगुणवत्त्वमानृण्यतां देवर्षिपितृऋणत्रयनिर्मुक्तत्वं ब्रह्मण्यं सर्वब्राह्मणोत्तमत्वं बहुपुत्रतां श्रद्धामेधे गुरुवेदान्तवाक्यविश्वासवेदशास्त्रार्थग्रहणधारणपटुत्वे प्रज्ञां दुहित्राद्या भगवान्परमात्मा मह्यं सम्यग्ददातु ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेयमुक्तार्या याज्ञिक्यामुपनिषदि भाष्ये त्रिषष्टि*तमोऽनुवाकः ॥ ६३ ॥

अथ चतुःषष्टितमोऽनुवाकः ।

तिलाः कृष्णास्तिलाः श्वेतास्तिलाः सौम्या वशानुगाः ।
तिलाः पुनन्तु मे पापं यत्किंचिद्दुरितं मयि स्वाहा ।

तिला इति । हे परमात्मंस्त्वदाज्ञया मम यत्किंचिद्दुरितं तत्पापं दूरीकृत्य मे मां तिलाः पुनन्तु । तदर्थमिदं हविस्तुभ्यं स्वाहा । तिलाः कथंभूताः । केचित्कृष्णाः केचिच्छ्वेताः उभयविधाः सर्वेऽपि सौम्या रोगाद्युपद्रवाप्रदाः । वशानुगा अस्मद्वशवर्तिनः । स्वधर्मोपार्जितं द्रव्यं दत्त्वा विक्रीयाऽऽनीता न त्वनुशासनचौर्यादिनाऽऽनीता इत्यर्थः । अचेतनानां तिलानां पापनाशनसामर्थ्यं त्वदाज्ञयेति भावः+ ।

चोरस्यान्नं नवश्राद्धं ब्रह्महा गुरुतल्पगः ।
गोस्तेयꣳ सुरापानं भ्रूणहत्या तिला शान्तिꣳ शमयन्तु स्वाहा ।

चोरस्येति । हे परमात्मंस्त्वदाज्ञया तिला= एतन्मन्त्रोक्तानां पापानां शान्तिं विनाशं शमयन्तु कुर्वन्तु तदर्थमिदं हविस्तुभ्यं स्वाहा । नवश्राद्धमेकोद्दिष्टाद्यन्नभोजनम् । भ्रूणो गर्भः शिशुर्वीरो वा । स्पष्टमन्यत्× ।

श्रीश्च लक्ष्मीश्च पुष्टीश्च कीर्तिं चाऽऽनृण्यताम् । ब्रह्मण्यं बहुपुत्रताम् । श्रद्धामेधे प्रज्ञा तु जातवेदः संददातु स्वाहा ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि चतुःषष्टितमोऽनुवाकः ॥ ६४ ॥

श्रीश्चेति । हे जातवेदः सर्ववेदस्य धनस्य वोत्पादक (?) हे परमात्मंस्तत्सर्वं

छ. * पुस्तकेऽत्र (६४) तमानुवाकसमाप्तिर्दृश्यते । + एतदग्रे छ. पुस्तके (६५) तमानुवाकसमाप्तिर्दृश्यते । सा चानुवाकपरिगणनविरुद्धा । = छान्दसत्वाद्विसर्गलोपो मूले । × एतदग्रे छ. पुस्तके (६६) तमानुवाकसमाप्तिर्दृश्यते । साऽनुवाकपरिगणनविरुद्धा ।

भवान्मह्यं तस्मै ददातु । किं तत् । श्रीश्चेत्यादि, पदार्था व्याख्याताः । प्रज्ञा कुशाग्रबुद्धित्वम् । तुरेवार्थे । चाः समुच्चये ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये चतुःषष्टितमोऽनुवाकः ॥ ६४ * ॥

अथ पञ्चषष्टितमोऽनुवाकः ।

प्राणापानव्यानोदानसमाना मे शुध्यन्तां
ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ।

प्राणापानव्यानोदानसमाना इति । प्राणादयः पञ्च वायवः प्रसिद्धास्ते सर्वेऽप्यनेनाऽऽज्यहोमेन शुद्धा भवन्तु । य(त)तोऽहं विपाप्मा प्रतिबन्धकपातकरहितो विरजाः पापकारणीभूतरजोगुणेनापि रहितः सन्यऽज्योतिर्जगत्कारणं परब्रह्म तद्भूस्तु भूयासम् । तदर्थमिदमाज्यं [स्वाहा] सुहुतमस्तु = ।

वाङ्मनश्चक्षुः श्रोत्रजिह्वाघ्राणरेतो बुद्ध्याकूतिः संकल्पा मे
शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ।

वागिति । वागादीनीन्द्रियाणि । रेतो गुह्येन्द्रियम् । मनःशब्दवाच्यस्यैवान्तःकरणस्य निश्चयात्मिका वृत्तिर्बुद्धिः । अनिश्चयरूपा वृत्तिराकूतिः । इदं समीचीनमितिकल्पनारूपा वृत्तिः संकल्पः । अन्यत्पूर्ववत् + ।

त्वक्चर्ममाꣳसरुधिरमेदोमज्जास्नायवोऽस्थीनि मे
शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ।

त्वक्चर्मेत्यादि । अत्र स्थूलशरीरगतानां सप्तधातूनां शुद्धिरुच्यते । एकस्यैव धातोर्बाह्यान्तरभागविवक्षया त्वक्चर्मशब्दौ प्रयुक्तौ । अन्यत्पूर्ववत् × ।

शिरःपाणिपादपार्श्वपृष्ठोरूदरजङ्घशिश्नोपस्थपायवो मे
शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ।

शिरःपाणीत्यादि । अत्रापि स्थूलशरीरावयवानां शिरःपाण्यादीनां शुद्धिरुच्यते । लिङ्ग(लिङ्काण्ड)भेदविवक्षया शिश्नोपस्थशब्दौ द्वौ द्रष्टव्यौ । अन्यत्पूर्ववत् ⊙ ।

---

* इयं चानुवाकपरिगणनानुरोधेनानुवाकसमाप्तिः । ख. पुस्तकानुरोधेन तु (६७) तमानुवाकसमाप्तिः । = ख. पुस्तकेऽत्र (६८) तमानुवाकसमाप्तिः । इयं च मूलोक्तानुवाकपरिगणनाविरुद्धा । + ख. पुस्तकेऽत्र (६९) तमानुवाकसमाप्तिः । इयं च मूलोक्तानुवाकपरिगणनाविरुद्धा । × एतदग्रे ख. पुस्तके (७०) तमानुवाकसमाप्तिर्मूलोक्तानुवाकपरिगणनाविरुद्धा । ⊙ एतदग्रे ख. पुस्तके (७१) तमानुवाकसमाप्तिः, सा च मूलोक्तानुवाकपरिगणनाविरुद्धा ।

उत्तिष्ठ पुरुष हरित पिङ्गल लोहिताक्षि देहि देहि ददापयिता
मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ।
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोप-
निषदि पञ्चषष्टितमोऽनुवाकः ॥ ६५ ॥

उत्तिष्ठेति । शुद्धिहेतुत्वेनात्र सर्वकर्मनिष्पादकं बहिश्शरीरोपाधिकं [परमात्मानं] प्रार्थयते—पुरुष पुरि [बहि]शरीरे शयान हे परमात्मन्नुत्तिष्ठ, औदासीन्यं परित्यज्य मदनुग्रहार्थमुद्युक्तो भव । संबुद्ध्यन्तपुरुषशब्दस्यैव हरितादीनि त्रीणि पदानि विशेषणानि । हे हरित प्रतिबन्धहरणकुशल । हे पिङ्गल पिङ्गलवर्ण । लोहिताक्षि रक्तनयन । देहि देहि पुनः पुनः शुद्धिं मे प्रयच्छ । ददापयिताऽऽचार्यमुखात्तत्त्वविज्ञानस्यातिशयेन दापयिता भवेति शेषः । तस्य* दापयितुर्ज्ञानस्योत्पत्तये मे मदीयाश्चित्तवृत्तयः शुध्यन्ताम् । ज्योतिरहमित्यादि पूर्ववत्+ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां
याज्ञिक्यामुपनिषदि भाष्ये पञ्चषष्टितमोऽनुवाकः ॥ ६५ ॥

==========

अथ षट्षष्टितमोऽनुवाकः ।

पृथिव्यापस्तेजो वायुराकाशा मे शुध्यन्तां ज्योतिर-
हं विरजा विपाप्मा भूयासꣳ स्वाहा ।

पृथिवीति । शरीरस्योपादानकारणानि पृथिव्यादीनि । पूर्ववदन्यत् = ।

शब्दस्पर्शरूपरसगन्धा मे शुध्यन्तां ज्योति-
रहं विरजा विपाप्मा भूयासꣳ स्वाहा ।

शब्दस्पर्शेत्यादि । शरीरोपादानपञ्चमहाभूतेष्वाकाशादिषु वर्तमाना गुणाः शब्दादयः । पूर्ववदन्यत् × ।

मनोवाक्कायकर्माणि मे शुध्यन्तां ज्योतिरहं
विरजा विपाप्मा भूयासꣳ स्वाहा ।

---

* दापयितुः सकाशात्तस्य ज्ञानस्य पूर्वोक्तत्त्वविज्ञानस्योत्पत्तय इति संबन्धः । + एतदग्रे ङ. पुस्तके (७२) तमानुवाकसमाप्तिर्वर्तते । सा च मूलोक्तानुवाकपरिगणनविरुद्धा । = एतदग्रे ङ. पुस्तके (७३) तमानुवाकसमाप्तिर्दृश्यते । सा च मूलोक्तानुवाकपरिगणनविरुद्धा । × एतदग्रे ङ. पुस्तके (७४) तमानुवाकसमाप्तिर्दृश्यते सा च मूलोक्तानुवाकपरिगणनविरुद्धा ।

मन इति । मनोवाक्कायानां कर्माणि । अन्यत्पूर्ववत् * ।

अव्यक्तभावैरहंकारैर्ज्योतिरहं विरजा
विपाप्मा भूयासꣳ स्वाहा ।

अव्यक्तभावैरिति । हे परमात्मंस्त्वत्प्रसादादहंकारैर्व्यर्थगर्वैर्विमुक्तो भूयासम् । कथंभूतैरव्यक्तभावैः । लोकानां निकटेऽप्रकटिताभिप्रायैः । पूर्ववदन्यत् + ।

आत्मा मे शुध्यन्तां ज्योतिरहं विरजा
विपाप्मा भूयासꣳ स्वाहा ।

आत्मेति । म आत्मा शरीरं शुध्यन्तां शुद्धो भवतु । प्रायःपाठात्सर्वत्र बहुवचनप्रयोगश्छान्दसः ।

अन्तरात्मा मे शुध्यन्तां ज्योतिरहं
विरजा विपाप्मा भूयासꣳ स्वाहा ।

अन्तरात्मेति । अन्तरात्माऽन्तःकरणम् । अन्यत्पूर्ववत् = ।

परमात्मा मे शुध्यन्तां ज्योतिरहं विरजा
विपाप्मा भूयासꣳ स्वाहा ।

परमात्मेति । [परमात्मा] निखिलजगत्प्रभुः । अन्यत्पूर्ववत् । ननु परमात्मनो नित्यशुद्धत्वात्कथं तच्छुद्धिः प्रार्थ्यत इति चेन्न । अविद्यादोषवशेन परमात्मनोऽप्रतिभानमशुद्धिरित्युच्यते । स्वात्मत्वेन प्रतिभानं शुद्धिरिति विशेषाङ्गीकारात् ÷ ।

क्षुधे स्वाहा ।

क्षुध इति । क्षुदधिष्ठानदेवतायै स्वाहा । एतदादिवक्ष्यमाणपञ्चमन्त्रेषु लिङ्गोक्ता देवता हविर्भुजः ।

क्षुत्पिपासाय स्वाहा ।

क्षुत्पिपासायेति । एतदधिष्ठानदेवताभ्यां स्वाहा ।

विविदुषे स्वाहा ।

---

* एतदग्रे छ. पुस्तके (७५) तमानुवाकसमाप्तिर्दृश्यते । सा च मूलोक्तानुवाकपरिगणनविरुद्धा । + एतदग्रे छ. पुस्तके (७६) तमानुवाकसमाप्तिर्दृश्यते । सा च मूलोक्तानुवाकपरिगणनविरुद्धा । = एतदग्रे छ. पुस्तके (७७) तमानुवाकसमाप्तिर्दृश्यते । सा च मूलोक्तानुवाकपरिगणनविरुद्धा । ÷ एतदग्रे छ. पुस्तके (७८) तमानुवाकसमाप्तिर्दृश्यते, सा च मूलोक्तानुवाकपरिगणनविरुद्धा ।

विविट्टया इति । "विष्लृ व्याप्तौ" इति धातोरुत्पन्नोऽयं शब्दः । विशेषेण विष्टिर्व्याप्तिर्यस्य ब्रह्मणस्तद्विविट्टिः । छान्दसः षकारस्य टकारः । तादृशं ब्रह्मोद्दिश्य स्वाहा हुतमस्तु ।

ऋग्विधानाय स्वाहा ।

ऋग्विधानायेति । ऋचो विदधाति करोत्युत्पादयतीति ऋग्विधानः परमात्मा तस्मै स्वाहा हुतमस्तु ।

कषोत्काय स्वाहा ।

कषोत्कायेति । "कष करणे" [इति] धातुः । कष्यते क्रियत इति कषो नामरूपकर्मात्मकः कार्यप्रपञ्चस्तस्मिन्नुत्क उपकर्तुमुत्सुकः कषोत्कः परमेश्वरस्तादृशाय सृष्ट्याद्युन्मुखाय परमेश्वराय स्वाहा ।

क्षुत्पिपासामलं ज्येष्ठामलक्ष्मीर्नाशयाम्यहम् ।
अभूतिमसमृद्धिं च *सर्वान्निर्णुद मे पाप्मानꣳ स्वाहा ।

क्षुत्पिपासामलमिति । हे परमात्मन्नहं त्वत्प्रसादात्क्षुत्पिपासारूपं मलं लक्ष्म्या ज्येष्ठामग्रजामलक्ष्मीरलक्ष्मीमभूतिमनैश्वर्यमसमृद्धिं धनधान्यादिसमृद्धयभावमेतान्सर्वानाशयामि । किंच त्वं मे मदीयं पाप्मानं निर्णुद विनाशय । तदर्थं स्वाहा तुभ्यं सुहुतमस्तु ।

अन्नमयप्राणमयमनोमयविज्ञानमयमानन्दमयमात्मा मे
शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि षट्षष्टितमोऽनुवाकः ॥ ६६ ॥

अन्नमयेत्यादि । अन्नमयादयः पञ्च कोशा वारुण्यामुपनिषद्युक्ताः । पूर्ववदन्यत् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये षट्षष्टितमोऽनुवाकः ॥ ६६ ॥

---

* अत्र घ. पुस्तके सर्वा निर्णुदेत्येव पाठः ।

अथ सप्तषष्टितमोऽनुवाकः ।

इतः परं वैश्वदेवकर्मणि विनियुक्ताः षड्ढोममन्त्रा व्याख्यायन्ते—

अग्नये स्वाहा । विश्वेभ्यो देवेभ्यः स्वाहा । ध्रुवाय भूमाय स्वाहा । ध्रुवक्षितये स्वाहा । अच्युत-क्षितये स्वाहा । अग्नये स्विष्टकृते स्वाहा, इति ।

अग्निविश्वे(श्व)देवध्रुवाः प्रसिद्धाः । ध्रुवा क्षितिरवस्थितिर्यस्य सोऽयं ध्रुवक्षितिः । अच्युताक्षितिरपि तादृशः । एतौ देवविशेषौ । कदाचित्प्रमादाल्स्यादिना दुरिष्टमपि कर्म स्विष्टं करोतीति स्विष्टकृत् । एतद्विशेषणोऽप्यग्निः प्रसिद्धः । एताभ्यो देवताभ्यः प्रकृतमन्नादि हविः स्वाहा सुहुतमस्तु ।

इतः परं बलिहरणकर्मणि विनियुक्ता मन्त्रा व्याख्यायन्ते—

धर्माय स्वाहा । अधर्माय स्वाहा । अद्भ्यः स्वाहा । ओषधिवनस्पतिभ्यः स्वाहा । रक्षोदेवजनेभ्यः स्वाहा । गृह्याभ्यः स्वाहा । अवसानेभ्यः स्वाहा । अवसानप-तिभ्यः स्वाहा । सर्वभूतेभ्यः स्वाहा । कामाय स्वाहा । अन्तरिक्षाय स्वाहा । यदेजति जगति यच्च चेष्टति नाम्नो भागोऽयं नाम्ने स्वाहा । पृथिव्यै स्वाहा । अन्तरिक्षाय स्वाहा । दिवे स्वाहा । सूर्याय स्वाहा । चन्द्रमसे स्वाहा । नक्षत्रेभ्यः स्वाहा । इन्द्राय स्वाहा । बृहस्पतये स्वाहा । प्रजापतये स्वाहा । ब्रह्मणे स्वाहा । स्वधा पितृभ्यः स्वाहा । नमो रुद्राय पशुपतये स्वाहा । देवेभ्यः स्वाहा । पितृभ्यः स्वधाऽस्तु । भूतेभ्यो नमः । मनुष्येभ्यो हन्त । प्रजापतये स्वाहा । परमेष्ठिने स्वाहा, इति ।

धर्माधर्मावोषधिवनस्पतिदेवताः प्रसिद्धाः । रक्षांसि[प्रसिद्धानि ।] देवजना देवानां भृत्यवर्गाः । रक्षांसि च देवजनाश्च रक्षोदेवजनाः । गृहे विद्यमाना गृह्याः कुलदेवताः । गृहप्रान्तदेशवर्तमाना देवता अवसानशब्देनोच्यन्ते* । सर्वभूतशब्देन पञ्च

* अवसानपतिशब्दस्य व्याख्यानं स्पष्टत्वादुपेक्षितम् । अवसानपतिशब्देन गृहप्रान्तदेशवर्तमा-देवतास्वामिनो ग्राह्याः ।

भूतानि भूतविशेषा वो(षाश्चो)च्यन्ते । **कामः** प्रसिद्धस्त्रिलोकीव्यामोहको रतिपतिः । अन्तरिक्षशब्देनान्तरिक्षलोकस्थवायुर्लक्ष्यते । द्वितीयान्तरिक्षशब्देन मध्यमलोकाधिष्ठानदेवता कथ्यते । वैदिकशब्दराशिवाचिकेन नामशब्देन तद्वेद्यः परमात्मा लक्ष्यते । तथा चायमर्थः—**जगति** ब्रह्माण्डे यद्वृक्षादिरूपमेजति वाय्वादिनिमित्तेन कम्पते **यच्च** मनुष्यादि चेष्टति गमनागमनादिचेष्टां करोति । औपलक्षण्येन पर्वतादिकमपि गृह्यते । अयं सर्वोऽपि पदार्थसमूहो **नाम्नः** परमात्मनो **भागो** भक्षणीयोंऽशः, प्रलयकाले सर्वस्य जगतस्तेनोपसंह्रियमाणत्वात् । सिद्धान्ते चैकस्यैव परमात्मनो निखिलजगदुत्पत्तिस्थितिलयकर्तृत्वाङ्गीकारात् । तथाच तस्मै **नाम्ने** जगत्संहर्त्रे परमात्मने **स्वाहा** । बलिहरणरूपमिदं हविर्भूमौ दत्तमस्तु । **द्यावापृथिव्यौ** प्रसिद्धे । **सूर्यचन्द्रनक्षत्रेन्द्रबृहस्पतयः** प्रसिद्धाः । **प्रजापतिब्रह्माणौ** विराड्हिरण्यगर्भौ । अग्निष्वात्तादिभ्यः **पितृभ्यः स्वधा, [स्वाहा च](?), इदमन्नं** बलिहरणकर्मार्हं दत्तमस्तु । **[रुद्राय नमः] स्वाहा** चेदमन्नं दत्तमस्तु । **कथंभूताय, पशुपतये** ब्रह्मादिस्थावरान्ताधिपतये । इन्द्रादिभ्यो **देवेभ्यः स्वाहा पितृभ्यः स्वधाऽस्तु** । भागान्तरद्योतनार्थं मन्त्रान्तरम् । भूतेभ्यो देवविशेषेभ्यो नमः । स्वाहाशब्दोऽप्यनुषञ्जनीयोऽन्नदानसिद्धये । यद्वा नमःशब्द एव भूतानामन्नदानवाचको द्रष्टव्यः । **मनुष्येभ्यो हन्त, इदमन्नं** दत्तमस्तु । स्वाहास्वधानमोहन्तकारैश्चतुर्भिर्निपातैर्देवपितृभूतमनुष्याणाम(ष्येभ्योऽ)न्नं दातव्यम् । एतच्छब्दोच्चारणपूर्वकं हि तेषामन्नदाने भूयसी तृप्तिः प्रियोक्तिपूर्वकमिव ब्राह्मणभोजनेन ब्राह्मणानाम् । **प्रजापतये स्वाहा** । भागान्तरद्योतनार्थं मन्त्रान्तरम् । परमेष्ठी चतुर्मुखो ब्रह्मा ।

यथा कूपः शतधारः सहस्रधारो अक्षितः ।
एवा मे अस्तु धान्यꣳ सहस्रधारमक्षितम् ॥
धनधान्यै स्वाहा ॥

यथेति । **यथा** येन प्रकारेण **कूप** उदकाधारविशेषः **शतधारः सहस्रधारोऽनेकोदकधारोपेतो** बहुधोदकग्रहणेऽप्यक्षितोऽक्षय्यश्च भवति, **एवैवं** मह्यं परमात्मनः प्रसादाद्धान्यमक्षितमक्षय्यमस्तु । **सहस्रधारमनेककुसूलादिपूर्णं (णं) प्रस्थादिपरम्परायुक्तं** च भूयात् । तदर्थमिदं हविः **स्वाहा** सुहुतमस्तु । कस्मै । धनानि दधाति पोषयति भक्तानामिति धनधानी काचिद्देवता तस्यै ।

ये भूताः प्रचरन्ति दिवानक्तं बलिमिच्छन्तो
वितुदस्य प्रेष्याः । तेभ्यो बलिं पुष्टिकामो
हरामि मयि पुष्टिं पुष्टिपतिर्दधातु स्वाहा ॥

ओष*धिवनस्पतिभ्यः स्वाहाऽन्तरिक्षाय स्वाहा नमो रुद्राय पशुपतये स्वाहा वितुदस्य प्रेष्या एकं च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि सप्तषष्टितमोऽनुवाकः ॥ ६७ ॥

य इति । तेभ्यो बलिं हरामि भूमौ निक्षिपामि पुष्टिकामः सन्नहम् । अत एव पुष्टिपतिर्धनधान्यादिपोषणाधिपतिर्भगवान्मायि पुष्टिं धनधान्यादिपोषं दधातु स्थापयतु । तदर्थमिदमन्नं स्वाहा भूमौ निक्षिप्तमस्तु । तेभ्यः केभ्यः । ये भूता ग्रहविशेषा बलिमाहारमिच्छन्तः सन्तो दिवानक्तं प्रचरन्ति । भूताः कथंविधाः । प्रेष्याः प्रेषणीया भृत्या इति यावत् । कस्य, विशेषेण तुदति पापिनः प्राणिनः पीडयतीति वितुदः श्मशानवासी भगवान्कालाग्निरुद्रस्तस्य वितुदस्य ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये सप्तषष्टितमोऽनुवाकः ॥ ६७ ॥

अथाष्टषष्टितमोऽनुवाकः ।

जपमात्रेण पापक्षयार्थोऽयं मन्त्रः—

ओं तत्सत्यम् । ओं तद्ब्रह्म । ओं तद्वायुः । ओं तदात्मा । ओं तत्सर्वम् । ओं तत्पुरोर्नमः । अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु । त्वं यज्ञस्त्वं वषट्कारस्त्वमिन्द्रस्त्वꣳ रुद्रस्त्वं विष्णुस्त्वं ब्रह्म त्वं प्रजापतिः । त्वं तदाप आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषद्यष्टषष्टितमोऽनुवाकः ॥ ६८ ॥

तद्वेदान्तवेद्यं वस्तु ब्रह्मातिबृहत् । तदेव वायुः । तदेवाऽऽत्मा जीवोऽपि । तदेव सत्यमवितथम् । किं बहुना, तदेव सर्वं चराचरं जगत् । तदेव पुरोर्विस्तीर्णस्य ब्रह्माण्डस्य कारणं य(णम)तस्तस्मै नमोऽस्तु । किंचैवंविधं यद्ब्रह्म तद्विश्वमूर्तिषु नाना-

---

* एतदार्धो तद्ब्रह्मेत्यस्मात्प्राग्विद्यमानं मूलं ज. पुस्तके नास्ति ।

---

१ घ. ८४ । २ ङ. °णादिनिधि° । ३ घ. ८५ ।

विधशरीरेषु भूतेषु प्राणिषु गुहायामन्तर्हृदयपुण्डरीकमध्ये चरति वर्तते । एवं परोक्षेण सर्वात्मकत्वमुक्त्वेदानीमपरोक्षेण परमात्मनः सर्वात्मकत्वं दर्शयति । हे भगवंस्त्वं यज्ञो नानाविधक्रतुरूपः । त्वमेव वषट्कारो देवान्नदायकशब्दविशेषः । औपलक्षण्येन त्वमेव स्वाहास्वधाहन्तकारादिः । त्वमेवेन्द्ररुद्रविष्णुब्रह्मरूपः । त्वमेव प्रजापतिर्विराट् । त्वमेव तत्प्रसिद्धं ब्रह्माण्डम् । त्वमेवाऽऽपो नद्यादिगताः । त्वमेवाऽऽपः पारावारगताः । त्वमेव ज्योतिः सूर्यादि । त्वमेव रसो मधुरादिः । त्वमेवामृतं सुधा । त्वमेव ब्रह्म वेदकूटम् । त्वमेव भूर्भुवः सुवस्त्रैलोक्यम् । त्वमेवोंकारः शब्दब्रह्म ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्येऽष्टषष्टितमोऽनुवाकः ॥ ६८ ॥

अथैकोनसप्ततितमोऽनुवाकः ।

अथ प्राणाहुतिमन्त्रान्दर्शयति—

श्रद्धायां प्राणे निविष्टोऽमृतं जुहोमि । श्रद्धायामपाने निविष्टोऽमृतं जुहोमि । श्रद्धायां व्याने निविष्टोऽमृतं जुहोमि । श्रद्धायामुदाने निविष्टोऽमृतं जुहोमि । श्रद्धायां समाने निविष्टोऽमृतं जुहोमि । ब्रह्मणि म आत्माऽमृतत्वाय, इति ।

वैदिककर्मणि विश्वासातिशयः श्रद्धा, तस्यां सत्यां पञ्चसु शरीरगतवायुभेदेषु मध्ये प्रथमं प्राणनामके वायौ निविष्ट आदरयुक्तोऽहममृतं स्वादुभूतमिदं हविर्जुहोमि प्रक्षिपामि । एवमपानादिषु योज्यम् । एताभिः पञ्चभिराहुतिभिरमृतत्वाय मोक्षाय मे मदीय आत्मा जीवो ब्रह्मणि परमात्मन्येकी भवत्विति शेषः ।

अथ भोजनादावपां प्राशने मन्त्रमाह—

अमृतोपस्तरणमसि, इति ।

हे पीयमान जल त्वममृतं विनाशरहितं प्राणदेवताया [उपस्तरणमसि । तथा शयानस्य पुरुषस्य मञ्चकस्योपरि तूलपटादिकमुपस्तीर्यते तद्वत्प्राणदेवताया] इदमुपस्तरणम् । तथा च वाजसनेयिनः प्राणविद्यायां प्राणदेवताया जलवस्त्रत्वमामनन्ति— "तस्मादशिष्यन्नाचामेदशित्वाऽऽचामेदेतदेव तदन्नमनन्नं कुरुते" इति ।

प्राणाहुतिष्वेव विकल्पितानि मन्त्रान्तराणि दर्शयति—

श्रद्धायां प्राणे निविष्टोऽमृतं जुहोमि । शिवो मा

विशामप्रदाहाय । प्राणाय स्वाहा । श्रद्धायामपाने निविष्टोऽमृतं जुहोमि । शिवो मा विशामप्रदाहाय। अपानाय स्वाहा । श्रद्धायां व्याने निविष्टोऽमृतं जुहोमि । शिवो मा विशामप्रदाहाय । व्यानाय स्वाहा । श्रद्धायामुदाने निविष्टोऽमृतं जुहोमि । शिवो मा विशामप्रदाहाय । उदानाय स्वाहा । श्रद्धायाꣳ समाने निविष्टोऽमृतं जुहोमि । शिवो मा विशामप्रदाहाय । समानाय स्वाहा । ब्रह्मणि म आत्माऽमृतत्वाय, इति ॥

हूयमान द्रव्यविशेष त्वं शिवः शान्तो भूत्वा मां प्राविश । किमर्थम् । अप्रदाहाय, क्षुत्संपादितदाहनाशनायेत्यर्थः । किंच हूयमानद्रव्यं प्राणदेवतायै स्वाहा सुहुतमस्तु । पूर्ववदन्यद्व्याख्येयम् ।

भोजनादूर्ध्वमपां प्राशने मन्त्रमाह—

अमृतापिधानमसि, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषद्ये-
कोनसप्ततितमोऽनुवाकः ॥ ६९ ॥

पीयमान हे जल त्वममृतमविनश्वरमपिधानमाच्छादकमसि ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्य एकोनसप्ततितमोऽनुवाकः ॥ ६९ ॥

=====

अथ सप्ततितमोऽनुवाकः ।

भुक्तस्यान्नस्याभिमन्त्रणे मन्त्रमाह—

श्रद्धायां प्राणे निविश्यामृतꣳ हुतम् । प्राणमग्नेनाऽऽप्याय-
यस्व । श्रद्धायामपाने निविश्यामृतꣳ हुतम् । अपान-
मग्नेनाऽऽप्यायस्व । श्रद्धायां व्याने निविश्यामृतꣳ

हुतम् । व्यानमन्नेनाऽऽप्यायस्व । श्रद्धायामुदाने निवि-
श्यामृतꣳ हुतम् । उदानमन्नेनाऽऽप्यायस्व । श्रद्धायाꣳ
समाने निविश्यामृतꣳ हुतम् । समानमन्नेनाऽऽप्यायस्व, इति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोप-
निषदि सप्ततितमोऽनुवाकः ॥ ७० ॥

वैदिककर्मणि विश्वासातिशयः श्रद्धा, तस्यां सत्यां प्राणवायौ निविश्याऽऽदरातिशयं कृत्वाऽमृतमनश्वरं स्वादुभूतमिदं हविर्मया हुतम् । हे प्राणाभिमानिनि देवि त्वं प्राणं मुखनासिकासंचारिणं वायुं हुतेनान्नेनाऽऽप्यायस्व वर्धय । स्पष्टमन्यत् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां
याज्ञिक्यामुपनिषदि भाष्ये सप्ततितमोऽनुवाकः ॥ ७० ॥

=====

अथैकसप्ततितमोऽनुवाकः ।

क्षुदादिजनितचित्तविक्षेपशान्तेरूर्ध्वं भोक्तुर्जीवस्य परमेश्वरस्वरूपानुसंधानहेतुं मन्त्रं दर्शयति—

अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः ।
ईशः सर्वस्य जगतः *प्रभु प्रीणाति विश्वभुक्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्येक-
सप्ततितमोऽनुवाकः ॥ ७१ ॥

हृदयमध्यगत आकाशः स्वाङ्गुष्ठपरिमितः । तत्र वर्तमाना बुद्धिरपि तावती । तयाऽवच्छिन्नो जीवरूपः पुरुषोऽप्यङ्गुष्ठमात्रः स्वाङ्गुष्ठपरिमितः । स च ज्ञानक्रियाशक्त्याऽङ्गुष्ठमाश्रितः । चकारान्मस्तकं चाऽऽश्रितः । आपादमस्तकव्यापीत्यर्थः । स चोपाधिसंबन्धमन्तरेण स्वकीयेन वास्तवरूपेण सर्वस्य जगत ईशो नियन्ता । अत एव विश्वभुक् । सर्वं जगद्भुङ्क्ते । तादृशः प्रभुरीश्वरः प्रीणाति, अनेन भोजनेन प्रीतो भवतु ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेय-
युक्तायां याज्ञिक्यामुपनिषदि भाष्य एकसप्ततितमोऽनुवाकः ॥ ७१ ॥

=====

* छान्दसो विसर्गलोपः ।

१ घ. ८७ ॥ २ घ. ८८ ॥

अथ द्विसप्ततितमोऽनुवाकः ।

इत्थं भोजनोत्तरं परमेश्वरानुसंधानप्रतिपादकं मन्त्रमुदाहृत्य भोक्तुः सर्वेषामङ्गानां स्वस्थताप्रतिपादकं मन्त्रमनुभवपूर्वकं पठति—

वाङ्मे *आसन् । नसोः प्राणः । अक्ष्योश्चक्षुः । कर्णयोः श्रोत्रम् । बाहुवोर्बलम् । ऊरुवोरोजः । अरिष्टानि विश्वान्यङ्गानि तनूः । तनुवा मे सह नमस्ते अस्तु मा मा हिꣳसीः, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि द्विसप्ततितमोऽनुवाकः ॥ ७२× ॥

हे भगवन्षड्रसमन्नमाकण्ठं भुक्तवतस्तृप्तस्य मे मम **वाग्वागिन्द्रियशक्तिस्तद्गोलक** +**आस्ये, प्राणो नसोर्नासिकयोः, चक्षुश्चक्षुरिन्द्रियशक्तिरक्ष्योरक्ष्णोस्तद्गोलकयोः, श्रोत्रं** श्रोत्रेन्द्रियं **कर्णयोस्तद्गोलकयोः, लब्धस्वास्थ्यान्यासन्** । प्राग्भोजनात्क्षुदादिवशेन विकलान्यभवन्नित्यर्थः । अत एव **बाहुवोर्बाह्वोर्बलमभूत्** । **ऊरुवोरोजो** गमनागमनसामर्थ्यमभूत् । किं बहुना, **विश्वानि** सर्वाणि **ममाङ्गान्यरिष्टान्यनुपहिंसितानि** स्वस्थान्यभूवन् । किंवा परिमितगणनया, **मे** मम **तनुवा** तन्वा लिङ्गशरीरेण **सह तनूः** स्थूलशरीरं स्वस्थी भवति स्म । अत एव भो भगवंस्त्वत्प्रसादात्सु(न्मि)ष्टान्नं लब्ध्वा =यतोऽहं तृप्तो मत्कृतं **नमस्ते** तुभ्यमस्तु । इत्थं प्रत्यहं सहकुटुम्बस्य मे तृप्तिं कृत्वा सर्वाङ्गस्वास्थ्यं च संपाद्य यावन्मरणं सहकुटुम्बं **मां मा हिꣳसीर्मा** पीडय । किंतु मृडय । मन्त्रोऽयं भोजनोत्तरं प्रत्यहं परमेश्वरकृतोपकृतिस्मृतिसिद्धये ब्राह्मणैरर्थानुसंधानपूर्वकं पठनीय इति रहस्यम् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये द्विसप्ततितमोऽनुवाकः ॥ ७२ ॥

अथ त्रिसप्ततितमोऽनुवाकः ।

एवं सर्वाङ्गस्वास्थ्यमुक्त्वा सर्वोपक्षयार्थत्वेनोत्तरोत्तरधनप्राप्त्य(प्क)त्वेन चेन्द्रसंवर्षिसंवादकं मन्त्रं जप्यत्वेनाऽऽह—

वयꣳ सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।

---

* पद्भिरित्यास्यशब्दस्याऽऽसन्नादेशे सप्तम्याः सुपां सुलुगिति लुकि रूपमिदम् । × अत्र घ, पुस्तकेऽङ्को नास्ति । + आसन्निति अस्य व्याख्यानमेतत् । =यतोऽहं तृप्तोऽत एवेति संबन्धः ।

अपध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेऽवबद्धान्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि त्रिसप्ततितमोऽनुवाकः ॥ ७३ ॥

ऋषयः सप्तसंख्याकाः कदाचिदिन्द्रं स्वर्गस्थमुपसेदुः । भूलोकात्सकाशादिन्द्रसामीप्यं जग्मुः । कथंभूता ऋषयः । **नाधमानाः** किमपि याचितुकामाः । **प्रियमेधाः** सर्वप्राणिप्रियकृतबुद्धिविशेषाः । **वय** इति विशब्दबहुवचनं पक्षिवाचकम् । **वय इव** पक्षिण इव शीघ्रगमनाः । कथंभूता वयः । **सुपर्णाः** शोभनपक्षाः । कथंभूतमिन्द्रम् । **अपध्वान्तमपगतहृदयान्धकारम्** । इन्द्रमुपेत्य यदूचिरे तदुच्यते । हे भगवन्निन्द्रा**स्मानूर्णुहि** दिव्यदुकूलादिप्रदानेनाऽऽच्छादय । अस्माकं चक्षुः **पूर्धि**, उत्तमसौन्दर्यादिमत्पदार्थप्रदर्शनप्रदानाभ्यां पूरय । **अस्मान्सर्वेभ्यः** पापेभ्यो **मुमुग्धि** मोचय । किंचा**स्मान्निधयेऽवबद्धानासक्तान्कुरु** । अनेकधनरत्नवन्निधियुक्तानस्मान्कुर्वित्यर्थः । एवमृषियाचितेनेन्द्रेण दत्तैर्भाग्यैः सुखिताः सन्त ऋषयो भूमिमेत्य स्वाश्रमेषु स्थितवन्त इत्याद्युपाख्यानं पूरयितव्यम् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये त्रिसप्ततितमोऽनुवाकः ॥ ७३ ॥

=====

अथ चतुःसप्ततितमोऽनुवाकः ।

एवं जपानन्तरं हृदयमालभ्य जप्यं मन्त्रमाह—

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः ।

तेनान्नेनाऽऽप्यायस्व, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषदि चतुःसप्ततितमोऽनुवाकः ॥ ७४ ॥

हे हृदयवर्तिन्नहंकार त्वं वायुरूपाणामिन्द्र(न्द्रिय)रूपाणां च **प्राणानां ग्रन्थिरसि** । परस्परमविश्लेषाय ग्रन्थनहेतुरसि । तादृशस्त्वं रुद्रस्त(स्त्व)दभिमानिदेवतारूपोऽन्तको दुःखस्य विनाशको भूत्वा **मा** मां **विश** मच्छरीरे प्रविष्टो भव । **तेन** मद्भुक्तेनान्नेनाऽऽप्यायस्व मामभिवर्धय ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये चतुःसप्ततितमोऽनुवाकः ॥ ७४ ॥

=====

अथ पञ्चसप्ततितमोऽनुवाकः ।

एवं हृदयाभिमन्त्रणमुक्त्वा यावज्जीवं मृत्युपरिहारार्थं देवताप्रा(प्री)णनरूपमन्त्रमाह–

नमो रुद्राय विष्णवे मृत्युर्मे पाहि, इति

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि पञ्चसप्ततितमोऽनुवाकः ॥ ७५ ॥

रुद्राय पार्वतीपतये **नमोऽस्तु** । **विष्णवे** लक्ष्मीपतये **नमोऽस्तु** । किंच हे रुद्र हे विष्णो त्वं त्वं च **मृत्युर्त्यत्ययेन** मृत्योः सकाशान्मे **मां पाहि** ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये पञ्चसप्ततितमोऽनुवाकः ॥ ७५ ॥

अथ षट्सप्ततितमोऽनुवाकः ।

त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ।
त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि षट्सप्ततितमोऽनुवाकः ॥ ७६ ॥

त्वमिति । हेऽग्ने **त्वमपि द्युभिरुत्तमकान्तिभिः** सहितः सन्नस्मन्मृत्युं निवारय । किंच **त्वमाशु** शीघ्रं शोषयति भक्तानां पापमित्याशुशुक्षणिः, [तादृशो भव] । किंच **त्वमद्भ्य** उपरि कणत्वेन (कारणत्वेन?) तिष्ठसि । अप्कारणत्वादग्नेरद्भ्य आधिक्यम् । "अग्नेरापः" इति श्रुतेः । किंच **त्वं** महामेरूत्तुङ्गस्य **पाषाणस्य** पर्युपरि तिष्ठसि । कनकाचलशिखरेष्वग्न्यादिदेवानां विद्यमानत्वप्रसिद्धेः । किंच **त्वं वनेभ्यो** व्यत्ययेन नन्दनादिवनेषु विहरसि । किंच **त्वमोषधीभ्यो** व्यत्ययेन सोमलताद्योषधीषु व्याप्य तिष्ठसि । हे **नृपते** यजमानरूपमनुष्याधिपतेऽग्ने **त्व नृणां** यजमानानां मध्ये पूज्यो **जायसे** भवसि । किंच त्वं वैदिकलौकिकसमाशानिकसर्वपदार्थभुगपि सन्सर्वदा **शुचिरेव** । एवंविधप्रभावस्त्वं मृत्योः सकाशान्मां पाहीति पूर्वेणान्वयः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये षट्सप्ततितमोऽनुवाकः ॥ ७६ ॥

---

१ ऋ. १० । २ ऋ. १६ ।

अथ सप्तसप्ततितमोऽनुवाकः ।

अथेदानीं परमात्मनः सकाशात्स्वाभीष्टं याचते—

शिवेन मे संतिष्ठस्व स्योनेन मे संतिष्ठस्व सुभूतेन मे संतिष्ठस्व ब्रह्मवर्चसेन मे संतिष्ठस्व यज्ञस्यर्द्धिमनु संतिष्ठतोपते यज्ञ नम उपते नम उपते नमः, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषदि सप्तसप्ततितमोऽनुवाकः ॥ ७७ ॥

हे यज्ञ सर्वयज्ञस्वरूप हे भगवन्परमात्मंस्ते तुभ्यमुप सामीप्येन नमोऽस्तु । त्वत्संनिधौ त्वत्समक्षं भूयो भूयो नमस्करोमीत्यर्थः । अत्यादरार्थमाम्रेडितम् । किंच त्वं शिवेन कल्याणप्रदानेन सह मे गृहे संतिष्ठस्व । स्योनेनैहिकसुखप्रदानेन सह । सुभूतेन महैश्वर्यप्रदानेन सह । ब्रह्मवर्चसेन सह । समानमन्यत् । एवंगुणवति त्वयि मद्गृह उपस्थिते सत्यहमप्येवंविधगुणवान्भूयासमिति प्रार्थयितुराशयः । किंच त्वत्प्रीत्यर्थं कृतस्य यज्ञस्य सत्कर्मानुष्ठानस्यर्द्धिं समृद्धिमनु पश्चात्तत्फलं दातुमस्मत्समीपे संतिष्ठस्व सम्यगचलचित्तः सन्नुपविश ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये सप्तसप्ततितमोऽनुवाकः ॥ ७७ ॥

अथाष्टसप्ततितमोऽनुवाकः ।

समाप्तं भोजनप्रकरणं कर्मप्रकरणं च । अथेदानीं सर्वकर्ममयसंसारबीजदाहार्थं संन्यासप्रकरणमारभ्यते । तत्र ज्ञानप्रतिबन्धकमहापातकपरिहारेण ज्ञानयोग्यतालक्षणां शुद्धिमुक्त्वा योग्यस्य पुरुषस्यापेक्षितेषु ज्ञानसाधनेषु संन्यासस्य निरतिशयोत्कर्षार्थं(र्थत्वं) वक्तुं सत्यादीन्येकादशोत्कृष्टसाधनानि प्रतियोगित्वेन वक्तव्यानि, तत्र प्रथमं साधनमुपन्यस्यति—

सत्यं परं परꣳ सत्यꣳ सत्येन न सुवर्गाल्लोकाच्च्यवन्ते कदाचन सताꣳ हि सत्यं तस्मात्सत्ये रमन्ते,—इति ।

यद्वस्तु प्रमाणेन दृष्टं तस्य तथैवाभिवदनं सत्यं तच्च परं पुरुषार्थसाधनेषूत्कृष्टम् । तत्र विधानात्(स्यैव ऽऽदरा)र्थं परं सत्यमिति पुनर्वचनम् । यद्वा परं [ब्रह्म] सत्यम-

तात्पर्यं तद्वदार्षवचनमपि बाधरहितमिति व्यावहारिकबाधराहित्येनोत्कर्षं विवक्षित्वा दृष्टान्तेन परं सत्यमित्युक्तम् । सत्येन यावज्जीवनं यथार्थकथनेन स्वर्गलोकात्कदाचन कदाचिदपि न प्रच्यवन्ते, अनृतवादिनस्तु केनचित्पुण्येन स्वर्गं प्राप्ता [प्य-] नृतवदनदोषेण कर्मफलापूर्व (र्णं) तायामपि तदैव स्वर्गात्प्रच्यवन्ते । किंच हि यस्मात्कारणात्सतां सन्मार्गवर्तिनामृष्यादीनां संबन्धि[सत्यं] यथार्थवादित्वं तस्मात्कारणात्सतामिदमिति व्युत्पत्तिमाश्रित्य सत्यवादित्वमेव परमं मोक्षसाधनमिति केचिन्महान्तो वदन्तस्तस्मिन्नेव सत्ये रमन्ते क्रीडन्ति ।

एकं मतमुक्त्वा द्वितीयं मतमाह—

तप इति तपो नानशनात्परं यद्धि परं तप-
स्तद्दुर्धर्षं तदुराधर्षं तस्मात्तपसि रमन्ते—, इति ।

तपः परं मोक्षसाधनमिति केषांचिन्मतम् । तीर्थयात्राजपहोमादीनि यद्यपि बहूनि तपांसि सन्ति तथाऽपि तेषु सर्वेष्वनशनमु (नादु) पवासैकभक्ताद्युपदेश (द्यशन)-वर्जनात्परमुत्कृष्टं तपो नास्ति । यदनशनरूपं कृच्छ्रचान्द्रायणादिकं परं तपोऽस्ति तद्दुर्धर्षं धर्षयितुं सोढुमशक्यमत एवाऽऽसमन्तात्सर्वेषां प्राणिनां तत्तपो दुर्धर्षं दुःशकमित्यनुभूयते । तस्मात्कारणात्केचन श्रद्धालवः कृच्छ्रचान्द्रायणादिके तपसि रमन्ते क्रीडन्ति ।

तृतीयं मतमाह—

दम इति नियतं ब्रह्मचारिणस्तस्माद्दमे रमन्ते—, इति ।

वाक्चक्षुरादीन्द्रियाणां बाह्यानां निषिद्धेभ्यो विषयेभ्यो निवृत्तिर्दमः, स एवोत्तमो मोक्षहेतुरिति मन्यमाना नैष्ठिकब्रह्मचारिणो नियतं सर्वदा वदन्ति तस्माद्दमे रमन्ते ।

चतुर्थं मतमाह—

शम इत्यरण्ये मुनयस्तस्माच्छमे रमन्ते—, इति ।

अन्तःकरणस्य क्रोधादिदोषराहित्यं शमः, स एवोत्तमो मोक्षहेतुरित्यरण्ये वर्तमाना मुनयो वानप्रस्था मन्यन्ते तस्मात्ते शमे रमन्ते ।

पञ्चमं मतमाह—

दानमिति सर्वाणि भूतानि प्रशंसन्ति दाना-
न्नातिदुष्करं तस्माद्दाने रमन्ते—, इति ।

गोभूहिरण्यादीनां स्वकीयानां शास्त्रोक्तवर्त्मना स्व [स्वत्व] परित्यागपूर्वकं परस्वत्वापादनं दानं तदेवोत्तमं मोक्षसाधनमिति सर्वे प्राणिनः प्रशंसन्ति । दानादतिशयितं

दुष्क(श्व रं नास्ति । धनरक्षार्थं प्राणानपि परित्यजतां पुरुषाणामुपलम्भात् । तस्माद्भो-भूहिरण्यादिदाने रमन्ते ।

[षष्ठं मतमाह—]

धर्म इति धर्मेण सर्वमिदं परिगृहीतं धर्मा-
न्नास्तिदुष्करं तस्माद्धर्मे रमन्ते—, इति ।

स्मृतिपुराणादिप्रतिपाद्यो वापीकूपतडागादिनिर्माणरूपो धर्मोऽत्र विवक्षितः । स चोत्तमो मोक्षहेतुरिति स (म) हामात्यादयः प्रभवो मन्यन्ते । तडागादिरूपेण धर्मेण सर्वमिदं जगत्परिगृहीतम् । सर्वेऽपि मनुष्यपश्वादयः स्नानपानादिना तुष्यन्ति । तादृशधर्मादन्यदतिदुश्च(ष्क)रं नास्ति । तस्मात्कारणाद्धर्मे रमन्ते प्रभवः ।

सप्तमं मतमाह—

प्रजन इति भूयांस्तस्माद्भूयिष्ठाः प्रजा-
यन्ते तस्माद्भूयिष्ठाः प्रजनने रमन्ते-, इति ।

प्रजनोऽपत्योत्पादनं तस्यैवोत्तमसाधनत्वं भूयांसो (सोऽति) बहवः प्राणिनो मन्यन्ते । धनिकैर्दरिद्रैः शिष्टैश्च सर्वैरपि पुत्रोत्पादनायातिशयेन प्रयतमान (त्नस्याऽऽदृत) त्वात् । तस्मादेकैकस्य पुरुषस्य भूयिष्ठा द्विग्राः पञ्च षडित्येवं बहवोऽपत्यविशेषा उत्पद्यन्ते । तस्माद्भूयिष्ठा अतिबहवः प्राणिनः प्रजोत्पादने रमन्ते ।

अष्टमं मतमाह—

अग्नय इत्याह तस्मादग्नय आधातव्याः—, इति ।

अग्नयो गार्हपत्यादय उत्तमा मुक्तिहेतव इति । कश्चिद्वेदार्थपर आह । तस्मात्कारणाद्गृहस्थैरग्नय आधातव्या भवन्ति ।

नवमं मतमाह—

अग्निहोत्रमित्याह तस्मादग्निहोत्रे रमन्ते—, इति ।

आहितेष्वग्निषु सायं प्रातश्चानुष्ठेयो होमोऽग्निहोत्रं तदुत्तमं मोक्षसाधनमित्यपरः कश्चिद्वेदार्थपर आह । तस्मात्केचिदग्निहोत्रे रमन्ते ।

दशमं मतमाह—

यज्ञ इति यज्ञो हि देवास्तस्माद्यज्ञे रमन्ते—, इति ।

दर्शपूर्णमासज्योतिष्टोमादिको यज्ञ उत्तमो मोक्षहेतुरित्यपरे वेदार्थपरा मन्यन्ते । तत्र हेतुरुच्यते—हि यस्मात्कारणाद्यज्ञो व्यत्ययेन तृतीया यज्ञेन पूर्वोक्ता देवा इन्द्रादयो दिवं गता इति वाक्यशेषः । तस्मादेव कारणादद्यापि केचन वैदिका यज्ञे पूर्वोक्ते रमन्त आसक्तचित्ताः सन्तः क्रीडन्ति ।

एकादशं मतमाह —

मानसमिति विद्वाꣳसस्तस्माद्विद्वाꣳस एव मानसे रमन्ते—, इति ।

मनसैव निष्पाद्यमुपासनं मानसं तदेवोत्तमं मोक्षसाधनमिति विद्वांसः सगुणब्रह्मविदो मन्यन्ते । तस्मात्कारणात्केचन विद्वांसो वेदोपास्तितात्पर्यविदो मानस एवोपासने रमन्ते ।

द्वादशं मतमाह—

न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा तानि वा
एतान्यवराणि पराꣳसि न्यास एवात्यरेचयत्, इति ।

पूर्वोक्तकारणा(र्वकाण्डोक्ता)नामग्निहोत्रादिकर्मणामारुणिजाबालाद्युपनिषदुक्तप्रकारेण परित्यागो न्यासः स एवोत्तमो मोक्षहेतुरिति ब्रह्मा हिरण्यगर्भो मन्यते । स च ब्रह्मा परो हि परमात्मरूपो हि न तु पूर्वोक्तमतानुसारिण इव जीवः । यद्यप्यसौ हिरण्यगर्भो देहधारी तथाऽपि परो हि परमात्मैव ब्रह्मा हिरण्यगर्भ इति वक्तुं शक्यते। तच्छिष्यत्वेन तत्ममानज्ञानत्वात् । अत एव श्वेताश्वत[रा आमनन्ति]—" यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै " इति । यानि पूर्वोक्तसत्यादीनि मानसान्ता[नि तान्येतानि [परांसि] तपांसि भवन्त्येव तथाऽपि संन्याससमपेक्ष्यावराणि निकृष्टानि । संन्यास एक एव सर्वाण्यत्यरेचयदतिक्रान्तवान् । उत्तमत्वेन तारतम्यं तत्र विश्रान्तमित्यर्थः ।

उक्तमुत्तमसाधनमुपसंहरति—

य एवं वेदेत्युपनिषत्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके दशमप्रपाठके नारायणोपनिषद्यष्टसप्ततितमोऽनुवाकः ॥ ७८ ॥

यः पुमानेवंप्रकारेण [सं]न्यासस्यान्येभ्यः साधनेभ्य उत्तमत्वं वेद तस्य विदुष इत्युक्ता विद्योपनिषद्रहस्यभूता भवति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्येऽष्टसप्ततितमोऽनुवाकः ॥ ७८ ॥

अथैकोनाशीतितमोऽनुवाकः ।

पूर्वोक्तमोक्षसाधनसमूहमुपपादयितुमाख्यायिकामाह—

प्राजापत्यो हाऽऽरुणिः सुपर्णेयः प्रजापतिं पितरमुपससार

किं भगवन्तः परमं वदन्तीति तस्मै प्रोवाच —इति ।

प्रजापतेः पुत्रः प्राजापत्यः स चाऽऽरुणिनामकः । स एव सुपर्णरूपायाः स्त्रिया अपत्यत्वात्सु र्णेय इत्युच्यते । तादृशः पुरुषः स्वकीयं पितरं प्रजापतिमुपससारोत्तमसाधनजिज्ञासयोपसन्नवान् । उपा(प)सद्य चैवं पप्रच्छ । हे प्रजापते भगवन्तः पूज्या महर्षयो मोक्षसाधनेषु किं साधनं परममुत्कृष्टं वदन्ति । एवं पृष्टः प्रजापतिरतस्मा आरुणये प्रोवाच ।

पूर्वमुक्तेषु साधनेषु प्रथमं दर्शयति—

सत्येन वायुरावाति सत्येनाऽऽदित्यो रोचते
दिवि सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं तस्मात्सत्यं परमं वदन्ति—, इति ।

योऽयं वायुरन्तरिक्षे वाति सोऽयं पूर्वजन्मनि मनुष्यः सन्सत्यवादित्वं परिपाल्य तेन सत्येन वायुदेवतात्वं प्राप्येदानीं लोकानुग्रहार्थमन्तरिक्षे वाति । तथैवाऽऽदित्योऽपि पूर्वजन्मानुष्ठितेन[सत्येन] दिवि रोचते द्युलोके प्रकाशते । एतत्सत्यं वाचो वागिन्द्रियस्य प्रतिष्ठा स्थिरं स्थानमनृतं तु वाचोक्तमपि परैर्निराक्रियत इति न वाचः प्रतिष्ठा । तस्य स्वर्ग (था सति) लोकेऽस्मिन्सत्ये भाषणे [सर्वं] प्रामाणिकव्यवहारजातं प्रातीष्ठितं तस्मात्कारणात्सत्यमेव परमं साधनमित्येवं केचिदनुष्ठातारो वदन्ति ।

त(अ)थाऽऽरुणेर्मुखविकाशराहित्यलक्षणापरितोषं दृष्ट्वा द्वितीयं साधनमाह—

तपसा देवा देवतामग्र आयन्तपसर्षयः सुवरन्वविन्दन्तपसा सपत्नान्प्रणुदामारातीस्तपसि सर्वं प्रतिष्ठितं तस्मात्तपः परमं वदन्ति—, इति ।

इदानीं स्वर्गे वर्तमाना अग्नीन्द्रादयो देवा अग्रे पूर्वजन्मन्यनुष्ठितेतान्नपरित्यागरूपेण कृच्छ्रचान्द्रायणादितपसा देवतामायन्निदानींतनं देवतात्वं प्राप्ताः । तथा वसिष्ठादयो महर्षयः पूर्वानुष्ठितेन तपसा सुवरन्वविन्दन्स्वर्गलोकमनुक्रमेण लब्धवन्तः । तथा वयमपीदानीमभिचाररूपेण तपसा सपत्नाञ्शत्रूनरातीरस्मदीयद्रव्यलाभविरोधिनः पुरुषानपि प्रणुदाम निराकुर्मः । अन्यदपि सर्वं फलजातं तपसि प्रतिष्ठितं तस्मादनशनरूपं तपः परमं मोक्षसाधनमिति वदन्ति ।

अत्रापि पूर्ववदपरितोषं दृष्ट्वा तृतीयं साधनमाह—

दमेन दान्ताः किल्बिषमवधून्वन्ति दमेन ब्रह्म-
चारिणः सुवरगच्छन्दमो भूतानां दुराधर्षं दमे
सर्वं प्रतिष्ठितं तस्माद्दमः परमं वदन्ति—, इति ।

दान्ता बाह्येन्द्रियदमनयुक्ताः पुरुषास्तेन दमेन स्वकीयपापमवधून्वन्ति नाशयन्ति। तथा नैष्ठिकब्रह्मचारिणो दमेन स्वर्गमगच्छन् । स च दमो भूतानां प्राणिनां दुराधर्षं धर्षयितुं सर्वदा सोढुं दुःसहः । तस्मिंश्च दमे सर्वमपेक्षितं फलं प्रतिष्ठितम् । तस्मात्कारणाद्दमः परमं मुक्तिसाधनमिति केचिद्वदन्ति । अत्र सर्वत्र पूर्वसाधने परितोषराहित्यादुत्तरसाधनोक्तिर्द्रष्टव्या ।

चतुर्थं साधनमाह —

शमेन शान्ताः शिवमाचरन्ति शमेन नाकं मुन-
योऽन्वविन्दञ्छमो भूतानां दुराधर्षं छमे सर्वं
प्रतिष्ठितं तस्माच्छमः परमं वदन्ति—, इति ॥

शान्ता अन्तःकरणगतक्रोधादिरहितास्तेन शमेन शिवं मङ्गलं पुरुषार्थमाचरन्ति । नारदाद्या मुनयः शमेन स्वर्गमलभन्त । अन्यत्पूर्ववत् ।

पञ्चमं साधनमाह—

दानं यज्ञानां वरूथं दक्षिणा लोके दातारꣳ सर्वभूतान्यु-
पजीवन्ति दानेनारातीरपानुदन्त दानेन द्विषन्तो मित्रा
भवन्ति दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदन्ति—, इति ।

गोहिरण्यादिदानं यज्ञानां संबन्धिनी दक्षिणा भवति । तस्माद्वरूथं श्रेष्ठम् । लोकेऽपि दातारं पुरुषं वेदशास्त्रसंविदो मूढाश्च सर्वेऽपि पुरुषा उपजीवन्ति । तथा योद्धुकामानां भटानां धनदानेनारातीः शत्रूनपानुदन्त राजानो निराकृतवन्तः । येऽपि प्रबला द्विषन्तस्तेऽपि धनदानेन तुष्टा मित्राणि भवन्ति । अन्यत्पूर्ववत् ।

षष्ठं साधनमाह—

धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं
प्रजा उपसर्पन्ति धर्मेण पापमपनुदति धर्मे
सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदन्ति—, इति ।

श्रुतिस्मृतिप्रतिपादितवापीकूपतटाकादिनिर्माणरूपो धर्मो विश्वस्य जगतः सर्वस्य

प्राणिजातस्य प्रतिष्ठाऽऽश्रय इत्येतत्प्रसिद्धम् । तथा लोके धर्मिष्ठमतिशयेन धर्मे वर्तमानं पुरुषं प्रजाः सर्वा उपसर्पन्ति धर्माधर्मनिर्णयार्थमुपगच्छन्ति । किंच प्रायश्चित्तरूपेण [धर्मेण] पापं विनाशयन्ति । अन्यत्पूर्ववत् ।

सप्तमं साधनमाह—

प्रजननं वै प्रतिष्ठा लोके साधु प्रजायास्तन्तुं
तन्वानः पितृणामनृणो भवति तदेव तस्या
अनृणं तस्मात्प्रजननं परमं वदन्ति—, इति ।

प्रजननं पुत्रोत्पादनं यदस्ति तद्गृहस्थानां प्रतिष्ठा पुत्रस्य गृहकृत्यनिर्वाहकत्वात् । "सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा" इति श्रुतेः । किंच प्रजायाः पुत्रपौत्रादिरूपायास्तन्तुं परम्परां साधु तन्वानः शास्त्रीयमार्गो यथा भवति [तथा विस्तारयन्पितृणां मृतानां पितृपितामहादीनामनृणो भवति] । तदीयमृणं पुत्रिणा प्रत्यर्पितं भवति । यत्प्रजननं तदेव तस्य पुत्रिण ऋणापाकरणहेतुः । अन्यत्पूर्ववत् ।

अष्टमं साधनमाह—

अग्नयो वैत्रयी विद्या देवयानः पन्था गार्ह-
पत्य ऋक्पृथिवी रथंतरमन्वाहार्यपचनं यजुर-
न्तरिक्षं वामदेव्यमाहवनीयः साम सुवर्गो
लोको बृहत्तस्मादग्नीन्परमं वदन्ति—, इति ।

गार्हपत्यो दक्षिणाग्निराहवनीय इति येऽग्नयः सन्ति त एव त्रयी विद्या वेदत्रयात्मिका वेदत्रयोक्तकर्मसाधनत्वाद्वेदविहितत्वाच्च, देवयानो यागद्वारेण देवत्वप्रापको मार्गश्च । किंच तेषामग्नीनां मध्ये गार्हपत्योऽग्निर्ऋग्वेदात्मकः पृथिवीलोकरूपो रथंतरसामात्मकश्चेति प्रशस्यते । अन्वाहार्यपचनो दक्षिणाग्निर्यजुर्वेदान्तरिक्षलोकवामदेव्यसामात्मकः । [दक्षिणाग्निस्तु सामवेदस्वर्गलोकबृहद्रथंतरसामात्मकः ।] अन्यत्पूर्ववत् ।

नवमं साधनमाह—

अग्निहोत्रं सायं प्रातर्गृहाणां निष्कृतिः स्विष्ट-
सुहुतं यज्ञक्रतूनां मायणꣳ सुवर्गस्य लोकस्य
ज्योतिस्तस्मादग्निहोत्रं परमं वदन्ति—, इति ।

सायं प्रातश्चानुष्ठितमग्निहोत्रं गृहाणां निष्कृतिः क्षयसाधनं मूल्यम्, अग्निहो-

त्राभावे क्षुधितोऽग्निर्गृहान्दहेत्। किंचाग्निहोत्रं स्विष्टं शोभनयागरूपं सुहुतं शोभनहोमरूपम्। देवतामुद्दिश्य द्रव्यत्यागो यागः। तस्य द्रव्यस्याग्नौ प्रक्षेपो होमः। किंचैतद्यज्ञक्रतूनां प्रायणं प्रारम्भः। अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणं चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञाः। क्रतुशब्दो यूपवत्सु सोमयागेषु रूढः। अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्यामश्चेति सप्त सोमसंस्थाः क्रतवः। तेषां सर्वेषां यज्ञक्रतूनां प्रारम्भकमग्निहोत्रम्। अत एव स्वर्गस्य लोकस्य ज्योतिः प्रकाशकम्। अन्यत्पूर्ववत्।

दशमं साधनमाह—

यज्ञ इति यज्ञेन हि देवा दिवं गता यज्ञेनासुरा-
नपानुदन्त यज्ञेन द्विषन्तो मित्रा भवन्ति यज्ञे
सर्वं प्रतिष्ठितं तस्माद्यज्ञं परमं वदन्ति—, इति।

यज्ञ उत्तमं साधनमिति केचिदाहुः। किंच देवाः पूर्वानुष्ठितेन यज्ञेन स्वर्गं प्राप्ताः। किंच यज्ञेनैव तदा [तदा] देवा असुरान्विनाशितवन्तः। किंच सर्वकामप्राप्तिसाधनेन ज्योतिष्टोमेन द्वेष्टृ(ष)शान्तिकामस्य पूर्वं द्वेषं कुर्वन्तोऽपि शत्रवो मित्रा[णि] भवन्ति। पूर्ववदन्यत्।

एकादशं साधनमाह—

मानसं वै प्राजापत्यं पवित्रं मानसेन मनसा साधु
पश्यति मानसा ऋषयः प्रजा असृजन्त मानसे
सर्वं प्रतिष्ठितं तस्मान्मानसं परमं वदन्ति—,इति।

मनसा निष्पाद्यं मानसमुपासनं यदस्ति तदेव [प्राजापत्यं] प्रजापति[पद]प्राप्तिसाधनमत एव पवित्रं चित्तशुद्धिकारणम्। मानसेनैवोपासनेन युक्तं मनोऽन्तःकरणं यदस्ति तेनैकाग्रेण मनसा साधु पश्यति, अतीतानागतव्यवहितादिवस्तुजातं योगी सम्यक्साक्षात्करोति। एतच्च योगशास्त्रे बहुधा प्रपञ्चितम्। मानसा एकाग्रमनोयुक्ता विश्वामित्रादय ऋषयः स्वसंकल्पमात्रेण बर्हीः प्रजा असृजन्त। पूर्ववदन्यत्।

द्वादशं साधनमाह—

न्यास इत्याहुर्मनीषिणो ब्रह्माणम्—, इति।

न्यास इत्युक्तो [यो] मोक्षहेतुस्तं ब्रह्माणं हिरण्यगर्भरूपं मनीषिणो बुद्धिमन्तो महर्षयः स्मृतिकर्तार आहुः। तथा च "संन्यासाद्ब्रह्मणः स्थानम्" इति स्मर्यते। हिरण्यगर्भप्राप्त्यन्तरङ्गसाधनत्वात्तद्रूपत्वम्।

तमेव संन्यासं स्तोतुं तत्प्राप्यहिरण्यगर्भस्य रूपं प्रपञ्चयति—

ब्रह्मा विश्वः कतमः स्वयंभुप्रजापतिः संवत्सर इति—, इति ।

यो [ब्रह्मा] हिरण्यगर्भः सोऽयं **विश्वः** सर्वजगदात्मकः । **कतमोऽतिशयेन सुख-स्वरूपः** पुनः **स्वयंभुप्रजापतिरुत्पादकाभ्यां मातापितृभ्यां विना स्वयमेवोत्पन्नः** स चासौ प्रजानां पालकश्चेति समासः । **संवत्सरः** कालात्मकः । **इतिशब्दः** प्रदर्शनार्थः । **इति** सर्वस्वरूपत्वमुन्नेयमित्यर्थः ।

पुनरपि संन्यासस्तुतये हिरण्यगर्भावयवस्य संवत्सरस्य माहात्म्यं दर्शयति—

संवत्सरोऽसावादित्यो य एष आदित्ये
पुरुषः स परमेष्ठी ब्रह्माऽऽत्मा—, इति ।

योऽयं **संवत्सरः** काल उक्तोऽसावादित्यस्वरूप एव । आदित्यगत्यभा(भ्या)-सेन निष्पादितत्वात् । **य एष** तस्मिन्नादित्यमण्डले **पुरुषः** स एव **परमेष्ठी** हिरण्यगर्भरूपः, आदित्यमण्डलद्वारेण हिरण्यगर्भस्य प्राप्यत्वात् । स च परमेष्ठी **ब्रह्म** जगत्कारणवस्तु । तथैव **ऽऽत्मा** सर्वेषां प्रत्यगात्मभूतः ।

एवमादित्यादिद्वारा संवत्सरं प्रशस्य तमादित्यमण्डलद्वारेण सर्वव्यवहारहेतुतया प्रशंसति—

याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति
पर्जन्येनौषधिवनस्पतयः प्रजायन्त ओषधिवनस्पतिभि-
रन्नं भवत्यन्नेन प्राणाः प्राणैर्बलं बलेन तपस्तपसा श्रद्धा
श्रद्धया मेधा मेधया मनीषा मनीषया मनो मनसा
शान्तिः शान्त्या चित्तं चित्तेन स्मृतिꣳ स्मृत्या स्मारꣳ
स्मारेण विज्ञानं विज्ञानेनाऽऽत्मानं वेदयति तस्मादन्नं दद-
न्तसर्वाण्येतानि ददात्यन्नात्प्राणा भवन्ति भूतानां प्राणैर्मनो
मनसश्च विज्ञानं विज्ञानादानन्दो ब्रह्म योनिः—, इति ।

अयमादित्यो याभिरुष्णस्वरूपाभी रश्मिभिस्तपति प्रभूतं संतापं करोति ताभिस्तीव्ररश्मिभिर्भूमिगतं जलमादाय पर्जन्यो भूत्वा वर्षति । तेन च पर्जन्येन वृष्टिजलेन व्रीह्याद्या ओषधयोऽश्वत्थपनसाद्या वनस्पतयश्च प्रकर्षेणोत्पद्यन्ते । ओषधिभिर्वनस्पतिभिश्च भोज्यमन्नं संपद्यते । तेन चान्नेन प्राणाः पु(षो)षिता भवन्ति । तैश्च पुष्टैः प्राणैः शरीरे बलं संपद्यते । तेन बलेन कृच्छ्रचान्द्रायणादिरूपं तपः संपद्यते । तेन

अन्नेन शुद्धचित्तस्य तत्त्वज्ञानविषया श्रद्धा जायते । तया श्रद्धया पुरुषस्यैकाग्रचित्तस्य **मेधा** गुरूपदिष्टग्रन्थतदर्थधारणशक्तिरूपा जायते । तया च **मेधया मनीषा** बुद्धिरुत्पद्यते । तया च **मनीषया मनो** निरन्तरं तत्त्वविषयं मननमुपजायते । तेन च **मनसा** मननेन क्रोधादिदोषस्यावसराभावाच्छान्तिरुपजायते । तया च **शान्त्या** विक्षेपरहितस्य **चित्तं** चेतनं तत्त्वविषयप्रमाणजनितज्ञानमुपजायते । तेन **चित्तेन ज्ञानेन निद्रा** [दि] व्यवधानेऽपि तत्त्वविषयां [स्मृतिं] प्राप्नोति । तया निद्राद्यनन्तरभाविन्या **स्मृत्या** [स्मारं] निरन्तरं **स्मरणं** प्राप्नोति । तेन च **स्मारेण विज्ञानं** विज्ञातीयि[प्रत्यय]व्यवधानराहित्येन विशिष्टं संततं ज्ञानं प्राप्नोति । तेन च **विज्ञानेनाऽऽत्मानं वेदयति** परमात्मानं सर्वदाऽनुभवति । यस्मादन्नस्योक्तप्राणबलादिपरम्परया परमात्मानुभवे हेतुत्वं **तस्मादीदृशमन्नं** ददत्पुरुषः **सर्वाण्येतानि** प्राणादीन्यात्मानुभवान्तानि वस्तूनि **ददाति** । अन्नदानस्य सर्वदानरूपत्वं विस्पष्टयितुमुक्तमेवार्थं पुनरप्यन्नात्प्राणा भवन्तीत्यादिवाक्येन संक्षिप्योपन्यस्यते । प्राणादिपरम्परोत्पन्नाद्विज्ञानादानन्दः परमानन्दरूपो भूत्वा **ब्रह्म** वेदान्तप्रतिपाद्यं **योनिर्**जगत्कारणम् । यद्वा ब्रह्मणो वेदस्य योनिः कारणं तादृग्रूपः स्वयं भवति ।

यथोक्तं संन्यासमेव स्तोतुं तेन संन्यासेन प्राप्ततत्त्वज्ञानं पुरुषं प्रशंसति—

स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं
प्रोतं पृथिवी चान्तरिक्षं च द्यौश्च दिशश्चावा
न्तरदिशाश्च स वै सर्वमिदं जगत्स स भूतꣳ स
भव्यं जिज्ञासक्लृप्त ऋतजा रयिष्ठा श्रद्धा
सत्यो महस्वान्तपसो*वरिष्ठात्,— इति ।

यः पुरुषः संन्यासपुरःसरं तत्त्वज्ञानं संपादयति स **एवैष पुरुषः सर्वात्मकः पञ्चधा** पञ्चभिः प्रकारैः पञ्चात्मा पञ्चविंशतिवस्तुस्वरूपो भवति । शब्दस्पर्शादिकं गुणपञ्चकं पृथिव्यादिकं भूतपञ्चकं चक्षुःश्रोत्रादिकं ज्ञानेन्द्रियपञ्चकं वाक्पाण्यादिकं कर्मेन्द्रियपञ्चकं प्राणापानादिकं वायुपञ्चकमेतावतां वस्तूनां स्वरूपभूत इत्यर्थः । यद्वा पञ्चभिरात्मभिर्युक्तः पञ्चधा वर्तते ।

तथा च **पुराणेऽभिहितम्**—

" भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा भवान् ।
आत्मा च परमात्मा च त्वमेकः पञ्चधा स्थितः " ॥ इति ।

येन ब्रह्मरूपेण **सर्वमिदं** जगत्सूत्रे मणिगणा इव **प्रोतं** प्रकर्षेणोतं व्याप्तमित्यर्थः ।

---

* छान्दसत्वान्मकारपकारटकाराणां पकारवकारठकारादेशा इति बोध्यम् ।

तदेव सर्वं पृथिवी चेत्यादिना प्रपञ्च्यते—स एव पृथिव्यादिवस्तुव्यापी पुरुषः सर्वमिदं वर्तमानं जगत्, तत्त्वदृष्ट्या तद्व्यतिरेकेणाभावात्। तथा भूतमतीतं जगत्स एव। भव्यं भविष्यदपि जगत्स एव। ननु तत्त्वावित्पुरुषो मूढवद्धस्तपादादियुक्तदेहरूप एव दृश्यते न तु सर्वजगत्स्वरूप इति चेन्मैवम्। यतोऽयं जिज्ञासकल्पो जिज्ञासया वेदान्तविचारेण सर्वात्मकतया निश्चितो भवति। ऋतजा ऋतेन सत्येन प्रामाणिकेन ज्ञानेन सर्वात्मा जातः, जिज्ञासाकाले भ्रान्तिज्ञानरूपेषु स (पू) र्वपक्षेषु [निराकृतेषु] प्रामाणिकेन सिद्धान्तज्ञानेन तादृशो जातो भवति। स च रथिष्ठा रथिर्धनं गुरूपदेशस्तत्रैव तिष्ठति न तूपदेशरहितानां प्रतीयत इत्यर्थः। ईदृशस्वरूपविज्ञानस्य श्रद्धया लभ्यत्वादसौ श्रद्धारूपः। " श्रद्धावाल्लँभते ज्ञानम् " इति स्मृतेः। सत्यमबाध्यं यद्ब्रह्म तत्स्वरूपत्वादयं सत्यः। महस्वांस्तेजस्वान्स्वयंप्रकाश इत्यर्थः। अत एव तमसा संसारकारणाज्ञानेन वियुक्तत्वादुपरिष्टाद्वर्तते।

इत्थं संन्यासपूर्वकज्ञानयुक्तपुरुषं प्रशस्य ज्ञानयुक्तफलं दर्शयति—

ज्ञात्वा तमेवं मनसा हृदा च भूयो न मृत्युमुपयाहि विद्वान्—, इति।

हे आरुणे त्वं [तं] परमात्मानं हृदा हृत्पुण्डरीकनिवासित्वाद्धृदयरूपेण मनसैवं पूर्वोक्तसंन्यासरूपसाधनप्रकारेण ज्ञात्वा ज्ञानेन युक्तः सन्भूयः पुनर्मृत्युं नोपयाहि [मा प्राप्नुहि], ज्ञानिनो वर्तमानदेहपाते सति जन्माभावात्पुनर्मृत्युर्नास्तीत्यर्थः।

[बहुधा प्रशस्तं संन्यासमुपसंहरति—]

तस्माच्छ्यासमेषां तपसामतिरिक्तमाहुः—, इति।

यस्मात्पुरुषार्थस्यान्तरङ्गसाधनं तस्मात्ते(दे)षां सत्यादीनां तपसां मध्ये संन्यासमतिरिक्तमत्युत्कृष्टं साधनं मनीषिण आहुः।

संन्यासादूर्ध्वं प्रणवेनाऽऽत्मनि समाधिं विधित्संस्तस्मिन्समाधौ विघ्नपरिहारार्थमादावन्तर्यामिणः सर्वकारणत्वेन स्तुतिं दर्शयति—

वसुरण्वो विभूरसि प्राणे त्वमसि संधाता ब्रह्मन्त्वमसि विश्वधृत्तेजोदास्त्वमस्यग्निरसि वर्चोदास्त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चन्द्रमस उपयामगृहीतोऽसि ब्रह्मणे त्वा महसे—, इति।

हे ब्रह्मन्नन्तर्यामिन्वसुरण्वो वसुनो वस्तुतत्त्वस्य रण्वो वक्षिता कथयिताऽस्मदनुग्रहार्थमुपदेष्टाऽसि। तथा विभुर्हिरण्यगर्भविराडादिविविधरूपेणोत्पन्नोऽसि। प्राणे वायुरूपे जीवात्मनः संधाता योजयिता त्वमसि। विश्वं भ (ध)रतीति विश्वभृ(धृ)द्ब्रह्मा-

ण्डधारकवायुरूपोऽसि । भूलोकवर्तिनोऽग्नेस्तेजोदाः प्रकाशरूपधनप्रदस्त्वमसि । द्युलोकवर्तिनः सूर्यस्य वर्चोदाः प्रकाशदस्त्वमसि । तथा चन्द्रमसो द्युम्नोदाः प्रकाशरूपधनप्रदस्त्वमसि । तथा यागेषु सोमरूपः सन्नुपयामेन पार्थिवमृन्मयदारुमयपात्रेण गृहीतोऽसि । उपयामशब्दस्य पृथिवीपरत्वं षष्ठकाण्डे मन्त्रव्याख्याने समाम्नातम्—" उपयामगृहीतोऽसीत्याह । इयं वा उपयामः" इति । उक्तप्रकारं सर्वकर्तारमन्तर्यामिणं त्वा महसे ब्रह्मणे ज्योतिर्ज्यो(चैतन्यज्योति)तिःस्वरूपब्रह्मतत्त्वाभिव्यक्त्यर्थं भजामीति शेषः ।

अनेन प्रकारेणान्तर्यामिणं स्तुत्वा परिहृतविघ्नस्य संन्यासिनः समाधिं विधत्ते—

ओमित्यात्मानं युञ्जीत— इति ।

त्रिमात्रप्रणवमुच्चारयन्सर्ववेदान्तेषु निर्णीतमात्मानं स्वात्मरूपेण चित्ते समादध्यात् । समाधिसाधनमोंकारं प्रशंसति—

एतद्वै महोपनिषदं देवानां गुह्यम्, इति ।

यत्प्रणवस्वरूपमस्त्येतद्वै महोपनिषदं महत्यो बह्वच उपनिषदः प्रतिपादिका यस्य परमात्मवाचकस्य प्रणवरूपस्य तन्महोपनिषदम् । अकारान्तत्वं छान्दसम् । "सर्वे वेदा यत्पदमामनन्ति, तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्" इति प्रणवस्य सर्वोपनिषत्प्रतिपाद्यत्वं कठवल्लीषु श्रुतम्, तच्च प्रणवरूपं निर्गुणतत्त्वप्रतिपादकं देवानामिन्द्रादीनां गुह्यं गोप्यम् । ते हि शमदमाद्यधिकारसंपत्तिरहिताय प्रणवं नोपदिशन्ति ।

यथोक्तप्रणवसमाधिजनितस्य तत्त्ववेदनस्य फलं दर्शयति—

य एवं वेद ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानम्—, इति ।

यः पुमान्संन्यासादूर्ध्वं प्रणवेन ब्रह्मतत्त्वसमाधिं कुर्वन्नेवं वेदान्तमहावाक्योक्तप्रकारेण वेद ब्रह्मतत्त्वं जानाति, असौ ज्ञानी स्वस्मिन्नविद्याकल्पितं जीवत्वापादकं परिच्छेदमपहाय देशकालवस्तुपरिच्छेदशून्यस्य ब्रह्मणो महिमानं महत्त्वमाप्नोति । तत्त्ववेदनेन जीवत्वकृतभ्रमो निवर्तते ब्रह्मस्वभाव आविर्भवति ततो जीवन्मुक्तो भवतीत्यर्थः । तस्य जीवन्मुक्तस्य प्रारब्धभोगक्षयेण देहपाते सति तस्मात्कृत्स्नाविद्यानिवर्तकाद्वेदनादविद्यातत्कार्यवासनालेशरहितस्य मुख्यब्रह्मणो महिमानं महत्त्वं प्राप्नोति, विदेहमुक्तिर्भवतीत्यर्थः ।

संन्यासपुरःसरां तत्त्वविद्यामुपसंहरति—

इत्युपनिषत्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषद्येकोनाशीतितमोऽनुवाकः ॥ ७९ ॥

इत्येवमतीतेन ग्रन्थेन प्रोक्ता येयं विद्या सेयमुपनिषद्रहस्यविद्या ।

अथ मीमांसा—तस्य(त्र) संन्यासरूपस्य चतुर्थाश्रमस्य सद्भावस्तृतीयाध्यायस्य चतुर्थपादे चिन्तितः—

"नास्त्यूर्ध्वरेताः किंवाऽस्ति नास्त्यसावविधानतः ।
वीरघाताद्वि(तो वि)धेः क्लृप्तावन्धपङ्ग्वादिगा स्मृतिः ॥
अस्त्व(स्त्य)पूर्वविधेः क्लृप्तेर्वीरहाऽनग्निको गृही ।
अन्धादेः पृथगुक्तत्वात्स्वस्थानां श्रूयते विधिः ॥

पूर्वाधिकरणे स्वतन्त्रमात्मविज्ञानं कर्मनैरपेक्ष्येण पुरुषार्थसाधनमित्युक्तम् । तस्य चाऽऽत्मज्ञानस्योर्ध्वरेतःस्वाश्रमेषु सुलभत्वादाश्रमसद्भावश्चिन्त्यते । तत्र नास्त्यूर्ध्वरेता इति प्राप्तम् । कुतः । विध्यभावात् । "त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयः" इत्यत्र यज्ञाद्युपलक्षितगार्हस्थ्यस्य तपःशब्दलक्षितवानप्रस्थत्वस्य नैष्ठिकब्रह्मचर्यस्य च परामर्शमात्रं गम्यते । न विधिरुपलभ्यते न चापूर्वार्थत्वेन विधिः कल्पयितुं शक्यः । "वीरहा वा एष देवानां योऽग्निमुद्वासयते" इत्यग्न्युद्वासनलक्षणस्य गार्हस्थ्यपरित्यागस्य निन्दितत्वात् । चत्वार आश्रमा इति स्मृतिस्तु गार्हस्थ्यधर्मानधिकृतान्धपङ्ग्वादिविषया भविष्यति । न ह्यन्धस्याऽऽज्यावेक्षणोपेते कर्मण्यधिकारः । नापि पङ्गोर्विष्णुक्रमणाद्युपेते कर्मण्यधिकारः । तस्माच्चक्षुरादिपाटवयुक्तस्याऽऽत्मज्ञानोपयुक्त ऊर्ध्वरेता आश्रमो नास्तीति प्राप्ते ब्रूमः । अस्त्यूर्ध्वरेता आश्रमः । विध्यश्रवणेऽप्यपूर्वार्थत्वेन कल्पयितुं शक्यत्वात् । न च वीरघातदोषः । उत्सन्नाग्निविषयत्वाद्वीरहत्यायाः । यत्त्वन्धविषयत्वं स्मृतेरुक्तं तदसत् । "अथ पुनरव्रती वा व्रती वाऽस्नातको वा स्नातको वोत्सन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेत्" इति विरक्तानां गार्हस्थ्यानधिकृतानां पृथक्संन्यासविधानात् । न च चक्षुरादिपाटववतामाश्रमान्तरविध्यभावः । जाबालश्रुतौ तत्यक्षविध्युपलम्भात्—"ब्रह्मचर्यं समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेत्" इति । तस्मादस्त्याश्रमान्तरम्" ।

तत्रैवान्यच्चिन्तितम्—

"लोककाम्याश्रमी ब्रह्मनिष्ठामर्हति वा न वा ।
यथावकाशं ब्रह्मैव ज्ञातुमर्हत्यवारणात् ॥
अनन्यचित्तता ब्रह्मनिष्ठाऽसौ कर्मठे कथम् ।
कर्मत्यागी ततो ब्रह्मनिष्ठामर्हति नेतरः ॥

त्रयो धर्मस्कन्धा इत्यत्राऽऽश्रमानधिकृत्य सर्व एते पुण्यलोका भवन्तीत्याश्रमानुयायिनां पुण्यलोकफलमभिधाय ब्रह्मसंस्थोऽमृतत्वमेतीति मोक्षसाधनत्वे[न] ब्रह्मनिष्ठा

प्रतिपाद्यते । सेयं ब्रह्मनिष्ठा पुण्यलोककामिन आश्रमिणोऽपि संभाव्यते । आश्रमकर्मण्यनुष्ठाय यथावकाशं ब्रह्मनिष्ठायाः कर्तुं शक्यत्वात् । न हि लोककामी ब्रह्म न जानीयादिति निषेधोऽस्ति । तस्मादस्ति सर्वस्याप्याश्रमिणो ब्रह्मनिष्ठेति प्राप्ते ब्रूमः । ब्रह्मनिष्ठा नाम सर्वव्यवहारपरित्यागे सत्यनन्यचित्ततया ब्रह्मणि परिसमाप्तिः । न चासौ कर्मशूरे संभवति । कर्मानुष्ठानत्यागयोः परस्परविरोधात् । तस्मात्कर्मत्यागिन एव ब्रह्मनिष्ठेति स्थितिः " ।

अस्मिन्नर्थे श्रुतिस्मृतिवाक्यानि संक्षिप्य प्रदर्श्यन्ते—

"त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमम् ।
त्यजतैव हि विज्ञेयं त्यक्तुः प्रत्यक्परं पदम् ॥
मुक्तेश्च बिभ्यतो देवा मोहेनापिदधुर्नरान् ।
ततस्ते कर्मसूद्युक्ताः प्रा(प्र)वर्तन्ते विचक्षणाः ॥
अतः संन्यस्य कर्माणि सर्वाण्यात्मावबोधतः ।
हत्वाऽविद्यां धिया प्राप त(यैवेयात्त)द्विष्णोः परमं पदम्" ॥

इति **भाल्लविशाखायामामनन्ति** ।

"साशिखं वपनं कृत्वा बहिःसूत्रं त्यजेद्बुधः ।
यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेत् ॥
ज्ञानशिखी(खा) ज्ञाननिष्ठा ज्ञानयज्ञोपवीतिनः ।
ज्ञानमेव परं तेषां पवित्रं ज्ञानमुच्यते ॥
अग्नेरिव शिखा नान्या यस्य ज्ञानमयी शिखा ।
स शिखीत्युच्यते विद्वान्नेतरे केशधारिणः" ॥

इत्याथर्वणिका आमनन्ति ।

"कुटुम्बपुत्रदारांश्च वेदाङ्गानि च सर्वशः ।
यज्ञान्यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिः" ॥

इति **बाष्कलशाखायामामनन्ति** ।

"स शिखान्केशान्निकृन्त्य विसृज्य यज्ञोपवीतं भूः स्वाहेत्यप्सु जुहुयात् ।
त्रिदण्डं कुण्डिकां शिक्यं त्रिविष्टब्धमुपानहौ ।
शीतोपघातिनीं कन्थां कौपीनस्य तु च्छादनम् ॥
पवित्रं स्नानशाटी च उत्तरासङ्गमेव च ।
यज्ञोपवीतं वेदांश्च सर्वं तद्वर्जयेद्यतिः" ॥

इति **कठा** आमनन्ति ।

" अथ परिव्राड्विवर्णवासा मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भवति " इति जाबालिका आमनन्ति । " अथ परिव्राडेकशाटी[परिवृतो] मुण्डोदरपात्र्यरण्यानित्यो भिक्षार्थं ग्रामं प्रविशेदासायं प्रदक्षिणेनाविचिकित्सन्सार्ववर्णिकभैक्षाचरणमभिशस्तपतितवर्जमयज्ञोपवीती शौचनिष्ठः काममेकं वैणवं दण्डमाददीत " इति मैत्रायणीशाखायामामनन्ति । "कन्थाकौपीनोत्तरासङ्गानां त्यागिनो यथाजातरूपधरा निर्ग्रन्था निष्परिग्रहाः" इति संवर्तश्रुतिः । " गृहस्थो ब्रह्मचारी वानप्रस्थो [वा] लौकिकाग्नीनुदराग्नौ समारोपयेद्वायत्रीं च स्वमुखाग्नौ समारोपयेदुपवीतं भूमौ वाऽप्सु वा विसृजेत् " इति वारुणीश्रुतिः ।

"यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः ।
आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् ॥
एतद्द्विजन्मसाफल्यं ब्राह्मणस्य विशेषतः ।
प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा ॥
यदा तु विदितं तत्स्यात्परं ब्रह्म सनातनम् ।
तदैकदण्डं संगृह्य उपवीतं शिखां त्यजेत्" ॥

इत्यादयः स्मृतय उदाहार्याः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां याज्ञिक्यामुपनिषदि भाष्ये एकोनाशीतितमोऽनुवाकः ॥ ७९ ॥

अथाशीतितमोऽनुवाकः ।

संन्यासस्यैव ब्रह्मज्ञानं प्रत्यन्तरङ्गसाधनत्वाज्जिज्ञासोः संन्यास एव युक्तो न तु कर्मानुष्ठानमित्युक्तम् । तर्हि निष्पन्ने तत्त्वसाक्षात्कारे कर्माण्यनुष्ठीयन्तामित्येतां शङ्कां निवारयितुं तत्त्व[ज्ञानि]व्यवहाराणां लौकिकानां सर्वेषां यागरूपत्वमुच्यते । न हि यागस्य यागाधिकारशङ्काऽस्ति । अतोऽस्मिन्ननुवाके पूर्वभागेण योगिनोऽवयवा यज्ञाङ्गद्रव्यत्वेनाऽऽम्नायन्ते—

तस्यैवं विदुषो यज्ञस्याऽऽत्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निर्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीत्—, इति ॥

तस्य पूर्वोक्तस्य संन्यासिन एवं विदुषः पूर्वोक्तेन प्रकारेण ब्रह्मणो महत्त्वं साक्षात्कृतवतो जीवन्मुक्तस्य संबन्धी यो यज्ञोऽस्ति तस्य यज्ञस्य देहेन्द्रियादिसाक्षी य आत्मा स एव यजमानसदृशः, तस्य स्वामित्वात् । या तु तदन्तःकरणे श्रद्धा सा पत्नी । यच्च शरीरं तदिध्मम् । एवमुरआद्यवयवानां वेद्यादिरूपत्वोपचारो योजनीयः । यस्तु दमः शमयिता सर्वेन्द्रियोपशमकारी चित्तवृत्तिविशेषस्तस्य दक्षिणारूपत्वमुन्नेयम् ।

जघनस्यानुवाकस्य द्वितीयभागेन योगिव्यवहारस्य ज्योतिष्टोमावयवक्रियारूपत्वं दर्शयति—

यावद्ध्रियते सा दीक्षा यदश्नाति तद्धविर्यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदो यत्संचरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो या व्याहृतिराहुतिर्यदस्य विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति तत्समिधं यत्प्रातर्मध्यंदिनꣳ सायं च तानि सवनानि—, इति ।

यावन्तं कालं भोजनमकृत्वा ध्रियते विदुषा धार्यते सा धृतिर्दीक्षाख्यसंस्काररूपा । एवं भोजनादौ हविरादिरूपत्वमुन्नेयम् ।

अथास्यानुवाकस्य तृतीयभागेन जीवन्मुक्तस्य संबन्धिनां कालविशेषाणां नानाविधयागरूपत्वमाह—

ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च ते चातुर्मास्यानि य ऋतवस्ते पशुबन्धा ये संवत्सराश्च परिवत्सराश्च तेऽहर्गणाः सर्वेऽहꣳ वा एतत्सत्रं यन्मरणं तदवभृथः—, इति ।

संवत्सराश्च परिवत्सराश्चेतिचकाराभ्यामिदावत्सरानुवत्सरेद्वत्सराः समुच्चीयन्ते । प्रभवादिषु षष्टिसंवत्सरेष्वेकैकं पञ्चकं युगशब्दाभिधेयं तस्मिंश्च पञ्चापि क्रमेण संवत्सरपरिवत्सरेदावत्सरानुवत्सरेद्वत्सरसंज्ञका द्रष्टव्याः ।

तथाच कालनिर्णये संग्रहकारेणोदाहृतम्—

" चान्द्रमा प्रभवादीनां पञ्चके पञ्चके युगे ।
संपरीदान्विदित्येतच्छब्दपूर्वास्तु वत्सराः " इति ॥

अहर्गणा द्विरात्रादयः । सर्ववेदसं सर्व [स्व] दक्षिणाकम् । अत्रैतच्छब्देन प्रकृताहोरात्रादिपरिवत्सरान्तसर्वकालसमु (मष्टचु) पलक्षितं. योगिन आयुर्विवक्ष्यते । यदायुस्तत्सर्वस्वदक्षिणोपेतं सत्रमित्यर्थः ।

अस्यानुवाकस्य चतुर्थभागेन सर्वयज्ञात्मकं योगिन उपासीनस्य क्रममुक्तिलक्षणं फलमाह—

एतद्वै जरामर्यमग्निहोत्रꣳ सत्रं य एवं विद्वानुदग-
यने प्रमीयते देवानामेव महिमानं गत्वाऽऽदि-
त्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते
पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यꣳ
सलोकतामाप्नोत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ
ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महि-
मानमाप्नोति तस्माद्ब्रह्मणो महिमानम्, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणोपनिषद्-
शीतितमोऽनुवाकः ॥ ८० ॥

जरामरणावधिकं यद्योगिचरितमस्ति त [देत] द्वेदोक्ताग्निहोत्रादिसहस्रसंवत्सरसत्रा-न्तकर्मस्वरूपमित्येवं यः पुमान्विद्वानुपासीन उत्तरायणे म्रियते, स उपासको देवा-नामिन्द्रादीनां महिमानमैश्वर्यं प्राप्य तदूर्ध्वमादित्य [स्य] सायुज्यं सहवासं तादात्म्यं वा भावनातारतम्येन प्राप्नोति । अथ पूर्वोक्तवैलक्षण्येन य उपासको दक्षि-णायने म्रियते स उपासकः पितृणामग्निष्वात्तादीनामैश्वर्यं प्राप्य चन्द्रमसः सायुज्यं पूर्ववत्प्राप्नोति। य एवमेतौ सूर्याचन्द्रमसोर्महिमानावनुभवन्ब्राह्मणस्तत्त्वं(त्र) सगुणब्रह्मरूपं हिरण्यगर्भं विद्वाँस्तल्लोकवासिनामुपदेशिनामुपासीनोऽभिजयति हिर-ण्यगर्भसाक्षात्काररूपं प्राप्नोति । अ(त)स्मात्साक्षात्कारा[त्त]ल्लोकवासिदेहपातादूर्ध्वं हिरण्यगर्भलोके गत्वा तत्र ब्रह्मणो हिरण्यगर्भस्य महिमानमैश्वर्यं प्राप्नोति । तत्रोत्पन्नब्रह्म[तत्त्व]साक्षात्कारस्तस्माज्ज्ञानाद्ब्रह्मलोकविनाशादूर्ध्वं सत्यज्ञानादिलक्षणस्य ब्रह्मणो महिमानं महत्त्वं च प्राप्नोति । (*इत्युपनिषदिति वाक्येन यथोक्तविद्या-यास्तत्प्रतिपादकस्य ग्रन्थस्य चोपसंहारः क्रियते)

* धनुश्चिह्नान्तर्गतोऽधिको ग्रन्थः प्रमादात्पतितः ।

अथ मीमांसा । तृतीयाध्याये तृतीयपादे चिन्तितम् —

पुंविद्यैका विभिन्ना वा तैत्तिरीयकताण्डिनोः ॥
मरणावभृथत्वादिसाम्यादेकेति गीयते(गम्यते) ।
बहूनां रूपभेदेन किंचित्साम्यस्य बाधनात् ।
न विद्यैक्यं तैत्तिरीये ब्रह्मविद्याप्रशंसनात् ॥

अस्ति तैत्तिरीये पुरुषविद्या—"तस्यैवं विदुषो यज्ञस्याऽऽत्मा यजमानः" इति । तथा ताण्डिशाखायामपि श्रूयते—"पुरुषो वाव यज्ञः" इति । सेयमेकैव पुरुषविद्या । यन्मरणं तदवभृथो मरणमेवावभृथ इत्युभयत्र समानधर्मश्रवणात्प्रातःसवनादीनां च समानत्वादिति प्राप्ते ब्रूमः । वेद्यस्वरूपस्य भूयांस्तत्र भेद उपलभ्यते । तथा हि—विदुषो यो यज्ञस्तस्य यज्ञस्याऽऽत्मेति तैत्तिरीयके व्यधिकरणे षष्ठ्यौ । अन्यथाऽऽत्मा यजमान इति कथं [न] व्याहन्येत । ताण्डिनां तु पुरुषयज्ञयोः सामानाधिकरण्यं श्रुतमित्येको रूपभेदः । आत्मयजमानादिकं च सर्वमत्र श्रुतं ताण्डिशाखायां नोपलभ्यते । यत्तु ताण्डिनामुपलभ्यते त्रेधा विभक्तस्याऽऽयुषः सवनत्रयत्वमित्यादि न तत्किंचिदपि तैत्तिरीयके पश्यामः । अतो मरणावभृथत्वाद्यल्पसाम्येऽपि बहूनां रूपभेदानां विद्यमानत्वाद्विद्ययोर्भेद एवोचितः । अपिच न तैत्तिरीयाणां कर्मसाधनत्वमुपलभ्यते किं तर्हि ब्रह्मविद्याप्रशंसा । तस्यैवं विदुष इति ब्रह्मविद उत्कर्षणात् । तस्मान्न विद्यैक्यशङ्कायामप्यवकाशोऽस्ति । क्रममुक्तिश्च(श्र)तस्मिन्ननुवाके तत्त्वज्ञानिसेवानिमित्ताऽऽभिहितेत्यदोषमतिमङ्गलम् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यकदशमप्रपाठके नारायणीयापरनामधेययुक्तायां

याज्ञिक्यामुपनिषदि भाष्येऽशीतितमोनुवाकः ॥ ८० ॥

[*अग्भस्यैकपञ्चाशच्छतं जातवेदसे चतुर्दश भूरन्नं भूरन्नये भूरन्नये चैकमेकं पाहि पाहि चत्वारि चत्वारि यश्छन्दसां द्वे नमो ब्रह्मण ऋतं तपो यथा वृक्षस्यैकमेकमणोरणीयाꣳश्चतुस्त्रिꣳशत्सहस्रशीर्षꣳ षड्विꣳशतिरादित्यो वा एष आदित्यो वै तेज एकमेकं निर्धनपतये त्रयोविꣳशतिः सद्योजातं त्रीणि वामदेवायैकमघोरेभ्यस्तत्पुरुषाय द्वे द्वे ईशानो नमो हिरण्यबाहव एकमेकमृतꣳ सत्यं द्वे सर्वो वै चत्वारि कद्रुद्राय त्रीणि

* एतच्चिह्नान्तर्गतो ग्रन्थो ज. पुस्तके नास्ति ।

यस्य वैकङ्कती कृणुष्व पाजोऽदितिरार्षी वा इदꣳ सर्वमेकमेकमापः पुनन्तु चत्वार्यग्निश्च सूर्यश्च नव नवोमितं चत्वार्यायातु पञ्चौजोऽसि दशोत्तमे चत्वारि घृणिस्त्रीणि ब्रह्मेतु मां यास्ते ब्रह्महत्यां द्वादश ब्रह्ममेधयाऽद्या न इमं भ्रूणहत्यां ब्रह्म मेधवां ब्रह्मा देवानामिदं वीरहत्यामेकान्नविꣳशतिरेकान्नविꣳशतिर्मेधा देवी मेधां म इन्द्रश्चत्वारि चत्वार्यामां मेधा द्वे मयि मेधामेकमपैतु परं वातं प्राणमनुत्रभूयाद्धरिꣳशल्कैरग्निं मा छिदो मृत्यो मा नो महान्तं मा नस्तोके प्रजापते स्वस्तिदा ज्यम्बकं ये ते सहस्रं द्वे द्वे मृत्यवे स्वाहैकं देवकृतस्यैकादश यद्दो देवाः कामोऽकार्षीन्मन्युरकार्षीद्द्वे द्वे तिलाञ्जुहोमि गावः श्रियं प्रजाः पञ्च तिलाः कृष्णाश्चोरस्य श्रीः प्रज्ञा तु जातवेदः सप्त प्राणा वाक्त्वच्छिरो(र उ)त्तिष्ठ पुरुष पञ्च पृथिवीशब्दमनोव्यक्ताऽऽत्माऽन्तरात्मा परमात्मा मे क्षुधेऽनमय पञ्चदशाग्नये स्वाहैकंचत्वारिꣳशदो तद्ब्रह्म नव श्रद्धायां प्राणे निविष्टश्चतुर्विꣳशतिः श्रद्धायां दशाङ्गुष्ठमात्रः पुरुषो द्वे वाङ्म आसन्नष्टौ वयः सुपर्णाः प्राणानां ग्रन्थिरसि द्वे द्वे नमो रुद्रायैकं त्वमग्ने द्युभिर्द्वे शिवेन मे संतिष्ठस्व सत्यं प्राजापत्यस्तस्यैवमेकमेकमशीतिः ॥]

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके परिशिष्टत्वेन संगृहीतो दशमः प्रपाठकः समाप्तः ॥ १० ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके परिशिष्टत्वेन संगृहीतं दशम-
प्रपाठकभाष्यं समाप्तम् ॥ १० ॥

समाप्तमिदं सपरिशिष्टं सभाष्यं तैत्तिरीयारण्यकम् ।